३३स

ॐ

श्रीमद्भगवद्गीता ।

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दसरस्वती-
भगवत्पूज्यपादशिष्यश्रीशंकरानन्दसरस्वती-
कृतगीतातात्पर्यबोधिन्याख्य-

शंकरानन्दीव्याख्यासहिता ।

पणशीकरोपाह्वलक्ष्मणतनुजनुषा वासुदेवशर्मणा
संस्कृत्य संशोधिता ।

पञ्चमं संस्करणम् ।

सा च
मुम्बय्यां
पाण्डुरङ्ग जावजी
इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्राकाश्यं नीता ।

शकाब्दाः १८५५, ख्रिस्ताब्दाः १९३४.

Price 2¾ Rupees.

Publisher :-Pandurang Jawaji, } Nirnaya Sagar Press,
Printer :-Ramchandra Yesu Shedge, } 26-28, Kolbhat Lane, Bombay.

प्रस्तावना.

अयि वसुंधरावलयविभूषणायमानसद्गुणा विद्वन्मणयः, सुप्रसिद्धमेवेदं यत्सनातनकालत एवास्मदीयधर्मग्रन्थैः प्रबलप्रमाणार्पणपूर्वकमात्यन्तिकनिःश्रेयसाधिगममूलत्वेन निरूप्यमाणोऽप्यद्वैतसिद्धान्त इदानींतनसमयादेकोनपञ्चाशदधिकपञ्चविंशतिशतसमाभ्यः प्रागुत्पन्नेन शाक्यमुन्यपरनाम्ना गौतमबुद्धेन प्रवर्तितस्याऽथ च तत्र बहूनां धरापतीनां प्रवेशादतिमहदुज्जृम्भणमाप्तस्य बौद्धमतस्य तच्छाखान्तरीभूतस्य जैनमतस्य च प्रसरणेनातितनिमानमवाप्य रोगार्तदशामन्वभूत् । सच मलबारेतिप्रसिद्धकेरलदेशान्तर्गतकालपीग्रामे जनिमवाप्तवद्भिः **श्रीशंकराचार्यैः** पुनररोगभावमापाद्य युवेव संपादितो बौद्धजैनमते च वैदिकप्रमाणप्रबलयुक्तिभिः संचूर्णिते । नैतावदेव कृतं किंत्वद्वैतविरुद्धास्तर्कपातञ्जलादिभागा अपि सप्रमाणाभिः प्रौढाभिश्च रीतिभिर्दुर्बलभावं निन्यिरे । अमुष्य सिद्धान्तस्य मुख्या विषया इमे सन्ति—जीवब्रह्मणोरैक्यं, ब्रह्मण एव सत्यत्वं, नामरूपाणां मिथ्यात्वं, सर्वदेशकालवस्त्वपरिच्छिन्नसत्ताकत्वमेव सत्त्वं, मिथ्यारूपस्य जगत आत्मनि कल्पितत्वं, कल्पनाप्यज्ञानेन वस्तुतो ब्रह्मव्यतिरिक्तसत्ताकं जगन्नास्त्येवेति च । इमे च विषया यद्यप्यपक्वविचाराणां मनसि न यथावन्निवेष्टारः, प्रत्युताऽकर्णनसमय एव तेषामभिप्रायाननेकविधशङ्कासमूहैः प्रतिकूलयितार एव सन्ति तथापि यथार्थ तत्त्वावबोधगोचरा भवन्ति । येषां

---

(१) एषां जन्मकालनिर्णये बह्वयो विप्रतिपत्तयः सन्ति तथापि शोधयितॄणां बहुमतानुसारेण पञ्चचत्वारिंशदधिकाष्टशततमे (८४५) वैक्रमार्कवर्षेऽजनिषतेति अनुमीयते ।

विचारशक्तिर्विद्यानां महति प्रदेशे चंक्रमणेन तत्तद्विषयाणां तलस्पर्शेन च नैर्मल्यमाप्ता, ते सर्वे तत्त्वज्ञानिनो न केवलमेतद्देशीयाः किंतु यूरोपवर्षीया अप्येतान्विषयान् गम्भीरानुभवेनोररीकुर्वन्ति । एतेषु विषयेषु ये चित्सुख्यद्वैतसिद्धिभेदधिक्कारादयः प्रौढग्रन्था निष्पन्नाः सन्ति तत्रत्याः सर्वा युक्तयो येषां मनस्युपतिष्ठेरंस्ते हि मध्ये वेदवचनानां प्रतिभूत्वमनाश्रित्याप्यानुभविकप्रमाणैरेव महतोऽप्यदुराग्रहान्वादिनस्तूष्णींभावयितुं स्वमनसि च ब्रह्मानन्दमाविर्भावयितुं शक्नुयुः । **श्रीमच्छंकराचार्यैः** प्रथमत उपनिषद्भाष्यब्रह्मसूत्रभाष्यगीताभाष्यात्मकप्रस्थानत्रयोपनिबन्धनेन कर्मोपासनादीनि सकलशुभसाधनानि ब्रह्मप्राप्तावुपयुज्यन्त इत्यादि व्यवस्थामुपदिश्याद्वैतसिद्धान्तः सयुक्तिकं सप्रमाणं च दृढतरं स्थापितः । अद्याप्यजीर्णयशःशरीराणां तेषां पवित्रेषु चरित्रेषु न प्रायेण कश्चिदनभिज्ञो जन इति तद्विषय एतावतैव विरम्यते । तेषु च मर्त्यामर्त्यकीर्तनीयसत्कीर्तिषु श्रीमदाचार्यचरणेषु स्वल्पेनैव कालेन कैवल्यसाम्राज्यमारूढेषु पुनरपि कलिकालकरालकल्मषस्वान्तान् निष्कण्टकं निर्भयं निस्तापं च निगमोपदिष्टं सन्मार्गं परित्यज्य सकण्टकं सभयं सतापं च मार्गमाश्रितान् सद्बोधनेत्रविहीनान् दीनान्मानवानुद्धर्तुमधमाधमोद्धारैकबद्धपरिकराः समुदयमानदया भगवन्तस्त एवाऽवतीर्णाः किमिति लोकानां मनस्याशङ्कां जनयन्तो द्राविडान्वयजाताः **श्रीशंकरानन्दसंज्ञा** यतिशिरोमणयो दक्षिणां दिशं विद्वद्रत्नवतीं चक्रुः । येषां च सकलविद्वज्जनश्लाघनीयविद्वत्त्वं तद्रचितो**पनिषद्दीपिका, सूत्रदीपिकाख्या ब्रह्मसूत्रविवृतिः, पुराणरत्नं चात्मपुराणं** निवेदयन्ति । प्रबलप्रतापानलप्रणाशितवादिमतारण्याः सद्विद्याशरण्या भगवन्तः **श्रीविद्यारण्या** अपि श्रीशंकरानन्दगुरुवरकरुणावलोकात्संपादितसद्विद्या आसन्निति "नमः श्रीशंकरानन्दगुरुपादाम्बुजन्मने । सविलासमहामोहग्राहग्रासैककर्मणे ॥" इति श्रीमद्विद्यारण्यप्रणीतपञ्चदशीग्रन्थप्रारम्भमङ्गले लिखितमतिहृद्यं पद्यं निवेदयति । एतदेव तेषां विद्यातिशयद्योतनाय न न्यूनमस्ति साधनम् । परमेतादृशाः सकललोकोपकारका विद्वांसः श्रीशंकरानन्दाः कदाऽवतेरुः, कुत्र निवासं चक्रुः, कानि कानि सुखानि दुःखानि वानुबभूवुः, कियद्वय-

स्काश्च कैवल्यभाजः संबभूवुरित्येतद्विषये सर्वेऽपि प्रायो वयमनभिज्ञाः स्मः किमतःपरं खेदास्पदमस्ति। तथापि श्रीविद्यारण्याः शालिवाहनशाकस्याऽऽम्नान्दुमिते १३ शते संजातास्ते च श्रीमच्छंकराचार्यशिष्यपरम्परायां दशमपुरुषा आसन्नित्येकस्माद्ग्रन्थादुपलभ्यते। ततस्तद्गुरूणां श्रीशंकरानन्दयतीनामप्यवस्थितिकालो यथाकथंचित्परिज्ञातुं शक्यते तदपि यत्किंचित्संतोषमापादयत्येव। अस्मिंश्च विषये अस्मद्देशीयविदुषां तादृशमहात्मजनजन्मचरित्रलेखनप्रमाद एव महान्तमुपालम्भमर्हति। अलमनयातीतचिन्तया बहूनि निदर्शनानि निवेदयन्त्येव तेषामप्रतिमविद्वत्त्वं महात्मतमत्त्वं च। एतैश्च श्रीशंकरानन्दैर्जनानां सुखबोधाय शंकरानन्दीत्यपरपर्याया तात्पर्यबोधिन्याख्या श्रीमद्भगवद्गीताव्याख्या प्रणीतास्ति। सा च संपूर्णज्ञानवैराग्यादिनिर्णयवत्त्वेन सरलत्वेन मनोहरत्वेन च बहुजनोपकारक्षमाप्यद्यावधि मुद्रणाभावादस्मद्देशीयविदुषां निसर्गसिद्धप्रायः परेभ्यः पुस्तकार्पणाप्रणयित्वात् प्राप्तेऽपि पुस्तके लिखनलेखनाशक्यत्वाच्चातिविरलप्रचाराऽतिदुर्लभा च संबभूव। तद्वीक्ष्य नेयं सहृदयहृदयाह्लादिनी कष्टामिमां दशामुपगन्तुमुचितेति विचार्य सुदामपुरवासा वेदान्तविद्यानिवासा व्यासावटंकाः शान्तदान्तस्वान्तवृत्तयः सौजन्यसौशील्यसारल्यशेवधयः श्रीमज्जीवनरामतनुजन्मानो जयकृष्णसंज्ञाः मां तन्मुद्रापणायाज्ञापयामासुः। तदाज्ञावशंवदेन च मया परमकृपालूनां तेषामेवैकं पुस्तकं द्वितीयं च तेषामेव महता प्रयत्नेनाविमुक्तपुर्याः संपादितम्। एवं प्राप्तैतत्पुस्तकद्वयेन च मयाऽखिलाप्यायसाक्षरैरियं मुद्रापिता। एतस्याः परिशोधने च सदा वेदान्तसुधासरःसेवनशान्ततृष्णैरपि प्रतिदिनं तादृशप्रबन्धप्रकाशनप्रबद्धतृष्णैर्गुरुवरैर्जयकृष्णैर्नवीनपुरनिवासिभिरतिहृद्यविद्यैर्गोविन्दभट्टतनूजन्मभिः कालिदासशास्त्रिभिश्च महान्श्रमः स्वीकृतोऽस्ति तत्तेषां गुरुवराणां शास्त्रिणां चोपकारं नायं जनः कदाचिदपि विस्मरिष्यति। एतद्ग्रन्थावलोकने च सकलवेदान्तशास्त्रप्रणयिविद्वज्जनचरणदासोऽयं स्मर्तव्य इति मोढज्ञातेस्त्रिविक्रमतनूजस्य नारायणाख्यस्य सप्रणामसहस्रार्पणा विज्ञप्तिः॥

श्रीमद्भगवद्गीतानुक्रमणिका ।

विषयः	पत्रं	श्लोकः
अथ प्रथमाध्यायस्यानुक्रमणिका ।		
टीकाकारकृतमङ्गलाचरणश्लोकाः	१	०
अवतरणिकायां भारतस्य गीतायाश्च श्रेष्ठत्वनिरूपणपूर्वकं प्रथमाध्याये प्रतिपाद्यनिरूपणम्	१	०
युद्धविषये धृतराष्ट्रप्रश्नः	२	१
धृतराष्ट्रंप्रति संजयोक्तिः	२	२
द्रोणाचार्यंप्रति पाण्डवसेनादर्शने साभिप्राया दुर्योधनस्य प्रेरणा.	३	३
पाण्डवसेनायां महारथानां नामानि श्लोकत्रयेण.	३	४
आचार्यं प्रति दुर्योधनेन स्वसेनानायकानां नामकथनं श्रेष्ठत्वकथनं च श्लोकत्रयेण.	४	७
दुर्योधनेन स्वबलस्य पूर्णत्वकथनं पाण्डवबलस्यापूर्णत्वकथनं च.	४	१०
भीष्मरक्षणे द्रोणादीन्प्रति दुर्योधनस्य प्रेरणा.	५	११
दुर्योधनहर्षार्थं भीष्मेण शङ्खवादनम्	५	१२
ततः सेनायांमन्येषां शङ्खादिवादनम्	५	१३
ततः कृष्णार्जुनयोः शङ्खनिनादः	५	१४
शङ्खानां निनादकर्तॄणां च नामानि श्लोकचतुष्टयेन	६	१५
शङ्खनादेन धार्तराष्ट्राणां हृदयविदारणम्	६	१९
वैराग्यार्थमैहिकामुष्मिकभोगानां कर्मजन्यानामनित्यत्वप्रतिपादनपूर्वकमर्जुनस्य धनुरुद्यमनम्	७	२०
कृष्णं प्रत्यर्जुनवाक्यम्	७	२१
अत्र युद्धार्थं के के आगताः कैः सह मया योद्धव्यं चेत्यर्जुनस्य जिज्ञासायां वर्णनं श्लोकद्वयेन.	७	२२
भगवता सेनयोर्मध्ये रथं स्थापयित्वार्जुनाय समवेतानां योद्धॄणां दर्शनं कारितमिति निरूपणं श्लोकद्वयेन	८	२४
उभयसेनयोः स्थितान्बन्धून्दृष्ट्वाऽर्जुनस्य विषादो जात इति निरूपणं श्लोकत्रयेण.	८	२६
अर्जुनस्य विषादचिह्नसूचकानां वाक्यानां निरूपणं श्लोकत्रयेण.	९	२९
अर्जुनस्याधर्मप्राप्तैहिकसुखेभ्यो विमुखत्ववर्णनं श्लोकद्वयेन. ...	१०	३२
गुर्वादीन्हन्तुमनिच्छयाऽर्जुनस्य स्वर्गादिसुखेभ्यो विमुखत्ववर्णनं श्लोकद्वयेन.	१०	३४
कुटुम्बवधेन पापमेव भवेदिति निरूपणेनार्थशास्त्राद्धर्मशास्त्रस्य बलवत्ताप्रतिपादनम्	११	३६

विषयः	पत्रं	श्लोकः
स्वजनवधेन सुखं न स्यादेवेति निरूपणम्	११	३७
लोभोपहतानां कुलक्षयाद्यनर्थे प्रवृत्तौ सत्यामपि विवेकिनां अत्र प्रवृत्तिर्नोपयुक्तेति प्रतिपादनं श्लोकद्वयेन.	१२	३८
कुलक्षये कुलधर्मनाशनिरूपणम्	१२	४०
कुलधर्मनाशे परम्परया वर्णसंकरतानिरूपणम्	१२	४१
संकरतादोषेण पितॄणां नरकपातनिरूपणम्	१३	४२
कुलघ्नानामनर्थ एवेति निरूपणम्	१३	४३
धर्मशून्यानां नरकवासनिरूपणम्	१३	४४
मुमुक्षूणां लक्षणसूचनार्थमर्जुनस्य पापाद्भीतेर्निरूपणं श्लोकद्वयेन	१४	४५
मुमुक्षुणा सर्वकर्मसंन्यासः कर्तव्य इति सूचनार्थमर्जुनस्य शस्त्रसंन्यासनिरूपणम्	१५	४७

इति प्रथमाध्यायस्यानुक्रमणिका ।

अथ द्वितीयाध्यायस्यानुक्रमणिका ।

द्वितीयाध्याये प्रतिपाद्यनिरूपणम्	१५	०
दयादियुक्तमर्जुनं मधुसूदन उवाचेति संजयवाक्यम् ...	१६	१
मधुसूदनशब्दार्थनिरूपणम्	१६	१
मुमुक्षुसंपाद्यानां कृपाद्यष्टगुणानां नामानि	१६	१
अकीर्त्यादिकरं मनःकालुष्यं त्यक्त्वा युद्धायोत्तिष्ठेत्यर्जुनंप्रति भगवदुपदेशः श्लोकद्वयेन.	१६	२
भीष्मद्रोणौ पूजार्हौ न युद्धार्हावित्यर्जुनवाक्यम्	१७	४
गुर्वादिहिंसापेक्षया भिक्षाशनं श्रेयस्करमिति निरूपणम् ...	१७	५
कर्तव्ययुद्धेऽर्जुनस्य संशयबाहुल्यम्	१७	६
अहं मूढः श्रेयःसाधनं त्वमेव ब्रूहीति भगवन्तं प्रत्यर्जुनस्य प्रार्थना.	१८	७
ब्रह्मज्ञानं विनैहिकामुष्मिकभोगलाभाच्छोकनिवृत्तिर्नास्त्येवेतिनि०	१९	८
संजयेनार्जुनस्य तूष्णींभावनिरूपणम्	१९	९
मोहाक्रान्तमर्जुनं भगवान्बोधयामासेति निरूपणम्	२०	१०
अनेकविकल्पैर्भीष्मादीनामशोच्यत्वनिरूपणम्	२०	११
शोकरहिता ज्ञानिन एव पण्डिता इति निरूपणम्	२०	११
तत्पदार्थस्य श्रुतियुक्तिभिः सद्भावनिरूपणम्	२१	१२
त्वंपदार्थस्य श्रुतियुक्तिभिर्नित्यत्वनिरूपणम्	२१	१२
वादिनाऽनेकप्रमाणयुक्तिभिरात्मानेकत्वनिरूपणम्	२२	१२
आत्मानेकत्वे वादिनोक्तप्रमाणानां युक्तेश्च सिद्धान्तिनाऽनेकप्रमाणैर्युक्तिभिश्चातिशयेन खण्डनम्	२२	१२

विषयः	पत्रं	श्लोकः
आत्मानेकत्वे वादिपक्ष एव दोषनिरूपणम्	२३	१२
श्रुतियुक्तिभिरात्मैकत्वनिरूपणम्	२४	१२
तत्त्वंपदयोरेकत्वनिरूपणेन सर्वं ब्रह्मैवेति निरूपणम्... ...	२५	१२
दृष्टान्तेन श्रुत्या युक्त्या त्रिष्वपि कालेषु त्वंपदार्थस्यात्मनो नित्यत्वनिरूपणम्	२६	१३
शीतोष्णादिद्वन्द्वधर्माणां सहनं कर्तव्यमिति निरूपणम् ...	२७	१४
सत्साधनशीलस्य मोक्षो भवतीति निरूपणम्...	२७	१५
जगतोऽसत्त्वमात्मनश्च सत्यत्वमिति निरूपणम्	२८	१६
जगत्सत्त्वे प्रमाणाभावनिरूपणेनानेकविकल्पैर्जगदभावनिरूपणपूर्वकमात्मनो नित्यत्वनिरूपणम्	२९	१६
आत्मनो नाशो न भवतीत्यनेकविकल्पैर्निरूपणम्	३०	१७
आत्मानात्मनोर्नित्यत्वानित्यत्वज्ञानेन निवृत्तशोकमर्जुनंप्रति स्वधर्मोपदेशः	३२	१८
प्रत्यक्षादिसर्वप्रमाणैरात्मनोऽविषयत्वनिरूपणम्	३३	१८
आत्मा हन्ता हतश्चेति यो मनुते स मूढ एवेति निरूपणम् ...	३४	१९
न जायत इति वाक्येनात्मनः षड्भावविकारराहित्यनिरूपणम्	३४	२०
आत्मज्ञानिनः सर्वक्रियानिवृत्तिनिरूपणम्	३५	२१
देहादेरहंप्रत्ययार्थत्वनिराकरणेन विद्वदात्मनोरभेदनिरूपणम्	३६	२१
जीवो जीर्णशरीराणि त्यक्त्वा नवीनानि धारयतीति दृष्टान्तेन०	३७	२२
शस्त्राग्न्यादिभिरात्मनोऽच्छेद्यत्वादिनिरूपणं श्लोकद्वयेन ...	३८	२३
सूक्ष्मकारणदेहाभ्यां विलक्षणात्मज्ञानिनां न किंचिच्छोच्यमस्तीति निरूपणम्	३९	२५
प्रकारान्तरेणापि शोकाभावनिरूपणम्	४०	२६
जन्यपदार्थस्य मृतेरावश्यकत्वनिरूपणम्	४०	२७
त्रिष्वपि कालेषु मिथ्याभूतशरीरेषु विदां परितापाभावनिरूपणम्	४१	२८
आत्मस्वरूपस्य जिज्ञासुश्रोतृवक्तॄणामतिदुर्लभत्वनिरूपणम् ...	४२	२९
आत्मानमुद्दिश्य शोकाभावनिरूपणोपसंहारः	४३	३०
मुमुक्षुभिः स्वधर्मे स्थातव्यमिति निरूपणार्थं क्षत्रियाणां धर्मयुद्धं श्रेयस्करमिति निरूपणम्	४३	३१
भाग्यवतां धर्मयुद्धमभ्यागच्छतीति निरूपणम्	४४	३२
युद्धस्याकरणे प्रत्यवायाकीर्त्याद्यनर्थपरंपरापततीति निरूपणं श्लोकचतुष्टयेन	४४	३३
जयेऽप्यपजयेऽपि युद्धादिष्टफलमस्तीति निरूपणम्	४५	३७
समबुद्ध्या युद्धे कृते पापाभावकथनम्	४५	३८
ज्ञानयोगनिरूपणानन्तरं कर्मयोगनिरूपणप्रतिज्ञा	४६	३९

विषयः	पत्रं	श्लोकः
ज्ञानं विना कर्मबन्धननिवृत्तिर्नास्तीति निरूपणम्	४७	३९
निष्कामकर्मणः श्रेष्ठत्वनिरूपणम्	४८	४०
विवेकिनां बुद्धिरेकैवाऽविवेकिनामनन्ताश्चेति निरूपणम् ...	४९	४१
कामात्मनां त्रिभिः श्लोकैः स्वभावनिरूपणम्	४९	४२
वेदानां त्रैगुण्यविषयत्वनिरूपणपूर्वकं निस्त्रैगुण्यस्य स्वरूपकथ०	५०	४५
विजानतो ब्राह्मणस्य दृष्टान्तेन सार्वभौमादिसर्वानन्दावाप्तिनि०	५२	४६
शोकमोहाक्रान्तस्य निष्कामकर्मण्येवाधिकार इति निरूपणम्	५३	४७
ज्ञानेच्छुना समबुद्ध्या कर्माणि कर्तव्यानीति निरूपणम् ...	५४	४८
ज्ञानयोगस्य श्रेष्ठत्वनिरूपणपूर्वकं कर्मयोगस्य निकृष्टत्वनिरूपणम्	५४	४९
ज्ञानयोगादेव शुभाशुभकर्मणां निवृत्तिरिति निरूपणम् ...	५५	५०
निष्कामकर्मणा ज्ञानं प्राप्य जन्मबन्धविनिर्मुक्ता भवन्तीति०	५६	५१
मोहनिवृत्त्यैव वैराग्यप्राप्तिर्भवतीति निरूपणम्	५७	५२
संशयरहिताया बुद्धेरात्मस्थितौ सत्यां योगारूढत्वं सिध्यतीति निरूपणम्	५७	५३
स्थितप्रज्ञस्य लक्षणाद्यवगत्यर्थमर्जुनस्य प्रश्नः	५८	५४
स्थितप्रज्ञस्य लक्षणनिरूपणम्	५९	५५
स्थितप्रज्ञः किं प्रभाषत इति प्रश्नस्योत्तरनिरूपणम्	६०	५६
रागद्वेषराहित्यं स्थितप्रज्ञस्य लक्षणान्तरम्	६०	५७
इन्द्रियनिग्रहनिरूपणं दृष्टान्तेन	६१	५८
परमात्मज्ञानेन रागनिवृत्तिनिरूपणम्	६१	५९
इन्द्रियनिग्रहाभावे महाननर्थ इति निरूपणम्	६२	६०
इन्द्रियसंयमत एव स्थितप्रज्ञत्वनिरूपणम्	६२	६१
विषयध्यानादेः सङ्गाद्यनर्थकारित्वनिरूपणं श्लोकद्वयेन ...	६३	६२
रागद्वेषशून्यस्य चित्तनिर्मलतानिरूपणम्	६४	६४
चित्तप्रसादे सति स्थितप्रज्ञत्वमिति निरूपणम्	६४	६५
समाधिरहितस्यानर्थप्राप्तिनिरूपणम्	६५	६६
बहिःप्रवृत्तस्य बुद्धेर्नाशो भवतीति दृष्टान्तेन निरूपणम् ...	६६	६७
इन्द्रियनिग्रहादेव प्रज्ञास्थैर्यमिति निरूपणम्	६६	६८
ब्रह्मविदद्वयबोधे जागर्ति द्वैतबोधे शेत इति निरूपणं तद्विपरीतत्वमज्ञानिनामिति च निरूपणम्...	६७	६९
स्थितप्रज्ञः किमासीतेति प्रश्नस्योत्तरत्वेन पतिव्रता यथा पत्यालम्बना तिष्ठति तथा ब्रह्मविद्ब्रह्मालम्बनस्तिष्ठतीति निरूपणम्	६९	७०

विषयः	पत्रं	श्लोकः
स्थितप्रज्ञः व्रजेत किमिति प्रश्नस्योत्तरम्	७१	७१
अन्तकालेऽपि ब्रह्मनिष्ठां प्राप्य मुक्तिं गच्छंतीति निरूपणम्	७२	७२

इति द्वितीयाध्यायस्यानुक्रमणिका ।

अथ तृतीयाध्यायस्यानुक्रमणिका ।

संन्यासाधिकारनिरूपणपूर्वकं तृतीयाध्याये प्रतिपाद्यनिरूपणम्	७२	०
ज्ञानं श्रेष्ठं चेद्धोरे कर्मणि मां कथं प्रेरयसीत्यर्जुनवाक्यम् ...	७३	१
व्यामिश्रवाक्येन मोहितबुद्धेर्मे यच्छ्रेयःसाधनं तदेव ब्रूहीत्यर्जुनस्य प्रश्नः	७३	२
ज्ञानकर्मयोगयोरुभयोरपि क्रमेण श्रेयस्साधनतेति निरूपणम्	७४	३
नित्यकर्माकरणान्मुक्तिरिति नियमो न तथा संन्यासादेव मुक्तिरित्यपि नियमो नेति निरूपणम्	७६	४
कर्म त्यक्त्वा न केनाप्यज्ञेन स्थातुं शक्यत इति निरूपणम्	७७	५
दम्भाचारस्य निरूपणम्	७८	६
दाम्भिकसंन्यासापेक्षया कर्मयोगस्य श्रेष्ठत्वनिरूपणम् ...	७८	७
मूढतमकृतसंन्यासापेक्षया कर्मकनिष्ठस्य श्रेष्ठत्वनिरूपणम् ...	७८	७
मुमुक्षुणाऽवश्यं कर्म कर्तव्यमिति निरूपणम्	७८	८
काम्यकर्मण एव बन्धकत्वम्	७९	९
ब्रह्मप्रोक्तयज्ञैर्देवानामाराधनं कार्यमिति निरूपणं श्लोकद्वयेन.	८०	१०
यज्ञाद्यकरणे प्रत्यवायी भवतीति निरूपणम्	८१	१२
पञ्चमहायज्ञकरणात्पञ्चसूनानिवृत्तिस्तदभावे पापाशित्वमिति निरूपणम्	८१	१३
वेदबोधितकर्मणो जगत्स्थितिहेतुत्वनिरूपणं श्लोकद्वयेन. ...	८२	१४
ईश्वरप्रवर्तितचक्रानुवर्तिनो व्यर्थजीवित्वम्	८३	१६
ब्रह्मनिष्ठस्य विदुषोऽनेकविकल्पैः कर्तव्याभावप्रतिपादनम् ...	८३	१७
ब्रह्मविदः कृतेनाकृतेनार्थानर्थौ न स्त इति निरूपणम् ...	८८	१८
मुमुक्षुणा कर्म कर्तव्यमेवेति निरूपणम्	८९	१९
मुक्तेनापि लोकसंग्रहार्थं कर्म कर्तव्यमिति निरूपणम् ...	८९	२०
मूढलोकः श्रेष्ठानुसारी भवतीति निरूपणम्	९०	२१
लोकसंग्रहार्थं भगवतः कर्मणि प्रवृत्तिरिति निरूपणं श्लोकद्वयेन	९०	२२
श्रेष्ठैरधिकारिभिः कर्मणि त्यक्ते लोकानां नाशः संकरता च स्यादिति निरूपणम्	९१	२४
लोकसंग्रहार्थं विद्वानसक्तः कर्म कुर्यादिति कथनम्	९२	२५
अज्ञानां बुद्धिभेदं न कुर्यादिति निरूपणम्	९२	२६

विषयः	पत्रं	श्लोकः
अविदुषो लक्षणनिरूपणम्	९२	२७
विदुषो लक्षणनिरूपणम्	९३	२८
अशुद्धहृदयान्कर्मिणो ब्रह्मविन्न विचालयेदिति निरूपणम् ...	९३	२९
निःशोकः सन्स्वधर्मं कुर्विंत्यर्जुनंप्रति भगवदुपदेशः	९४	३०
भगवन्मतानुयायिनो मुक्ता भवन्तीति निरूपणम्	९५	३१
भगवन्मतासूयिनो नष्टा भवन्तीति निरूपणम्	९५	३२
ज्ञानिनोऽपि प्रकृतेरनिवार्यत्वमिति निरूपणम्	९६	३३
विषयेषु रागद्वेषयोर्बन्धकत्वमिति निरूपणम्	९६	३४
परधर्मात्स्वधर्मस्य श्रेष्ठत्वनिरूपणम्	९७	३५
केन प्रेरितः पुमान् पापमाचरतीत्यर्जुनस्य प्रश्नः	९८	३६
प्रश्नोत्तरत्वेन कामक्रोधयोरेव सर्वानर्थहेतुत्वमिति निरूपणम्	९८	३७
कामेन वैरिणा ज्ञानमावृतमिति दृष्टान्तैर्निरूपणं श्लोकद्वयेन ...	९९	३८
कामस्याधिष्ठाननिरूपणम्	१००	४०
मुमुक्षुणा कामस्य निःशेषं विध्वंसनं कर्तव्यमिति निरूपणम्	१००	४१
इन्द्रियमनोबुद्धिभ्य आत्मनो भिन्नत्वेन निरूपणम्	१०१	४२
आत्मज्ञानेन कामशत्रोर्नाशः कर्तव्य इति निरूपणम् ...	१०२	४३

इति तृतीयाध्यायस्यानुक्रमणिका ।

अथ चतुर्थाध्यायस्यानुक्रमणिका ।

श्रुतिप्रमाणसिद्धस्यापि ज्ञानयोगस्य सिद्धपरम्पराप्राप्तत्वेनापि प्रामाण्यमिति निदर्शनम्	१०३	१
नष्टसंप्रदायो ज्ञानयोगोऽर्जुनं निमित्तीकृत्य लोकोद्धाराय भगवता पुनः प्रवर्तित इति निरूपणं श्लोकद्वयेन	१०३	२
अधुना जातस्य तव पूर्वं विवस्वन्तं प्रत्युपदेशः कथं घटत इति कृष्णं प्रत्यर्जुनप्रश्नः	१०४	४
अजस्येश्वरस्यापि मम मायया बहूनि जन्मानीति भगवतोत्तरितं श्लोकद्वयेन	१०५	५
यदा धर्मस्य विच्छेदोऽधर्मस्य चोत्थानं तदा भगवतो देहोत्पादनमिति निरूपणम्	१०६	७
अधर्मन्यक्कारपूर्वकं धर्मसंस्थापनार्थमेव प्रतियुगं भगवदवतार इति निरूपणम्	१०६	८
भगवतो जन्मादिकं ब्रह्मैवेति जानन्मुक्तिं गच्छतीति प्रतिपादनम्	१०७	९
ज्ञानयोगस्य प्राचीनत्वमिति निरूपणम्	१०७	१०

विषयः	पत्रं	श्लोकः
भगवदुपासनानुरूपेणैव फलं भवतीति निरूपणम्	१०८	११
कर्मभिरेवान्तःकरणशुद्धिः संभवतीति निरूपणम्	१०९	१२
गुणकर्मविभागेन वर्णचतुष्टयस्रष्टुरीश्वरस्याकर्तृत्वनिरूपणम् ...	१०९	१३
आत्मनोऽकर्तृत्वज्ञानेन कर्मणामबन्धकत्वनिरूपणम्	११०	१४
लोकहितार्थं कर्म कर्तव्यमिति निरूपणम्	१११	१५
कर्माकर्मस्वरूपज्ञाने विदुषामपि मोह इति निरूपणम् ...	१११	१६
कर्माकर्मविकर्मणां स्वरूपं ज्ञातव्यमिति निरूपणम्	११२	१७
कर्मण्यकर्मदर्श्यकर्मणि च कर्मदर्शी विद्वान्सर्वकर्मकृदिति निरूपणम्	११२	१८
कर्मणो ह्यपि बोद्धव्यमित्यादेः स युक्तः कृत्स्नकर्मकृदित्यन्तस्य श्लोकत्रयस्य प्रकारान्तरेण व्याख्यानम्	११५	१८
ज्ञान्येव पण्डित इति निरूपणम्	११७	१९
ज्ञानी कर्मणि प्रवृत्तोऽप्यकर्मैवेति निरूपणम्	११८	२०
ज्ञानी शारीरं कर्म कुर्वन् दोषं नाप्नोतीति निरूपणम् ...	११८	२१
अजगरवृत्तेर्विदुषो लक्षणनिरूपणम्	११९	२२
ज्ञानिनः सर्वं कर्म लीयत इति निरूपणम्	१२०	२३
विदुषा वैदिककर्मोपकरणेषु चमसादिषु ब्रह्मदृष्टिरेव कर्तव्येति निरूपणम्	१२१	२४
दैवयज्ञस्य ज्ञानयज्ञस्य च निरूपणम्	१२१	२५
श्रोत्रादीनीत्यादि श्लोकत्रयेणानेकयज्ञानां निरूपणम्	१२२	२६
प्राणायामस्य यज्ञत्वनिरूपणं सार्धेन	१२३	२९
सर्वयज्ञानां फलनिरूपणं सार्धेन	१२४	३०
सर्वयज्ञानां वेदैकमूलत्वम्	१२५	३२
सर्वयज्ञाज्ज्ञानयज्ञस्य श्रेष्ठत्वम्	१२५	३३
तत्त्वज्ञानार्थं ब्रह्मनिष्ठमेव गुरुमाश्रयेदिति निरूपणम्	१२६	३४
सद्गुरूपदेशेन लब्धज्ञानस्य फलनिरूपणम्	१२६	३५
ज्ञानप्लवेनैव सर्वपापार्णवतरणमिति निरूपणम्	१२७	३६
अग्निः काष्ठानीव ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुत इति निरूपणम्	१२८	३७
ज्ञानसदृशमन्यत्पवित्रं नास्तीति निरूपणम्	१२९	३८
श्रद्धादिसाधनैरेव ज्ञानप्राप्तिर्भवतीति निरूपणम्	१२९	३९
अज्ञत्वेन श्रद्धाशून्यः संशयात्मा नश्यतीति निरूपणम् ...	१३०	४०
ज्ञानवान्कर्मभिर्न बध्यत इति निरूपणम्	१३१	४१
ज्ञानासिना संशयश्छेतव्य इति निरूपणम्	१३२	४२

इति चतुर्थाध्यायस्यानुक्रमणिका ।

विषयः	पत्रं	श्लोकः
अथ पञ्चमाध्यायस्यानुक्रमणिका ।		
पञ्चमाध्याये प्रतिपाद्यनिरूपणम्	१३३	०
संन्यासकर्मयोगयोर्यच्छ्रेयःसाधनं तद्ब्रूहीत्यर्जुनस्य प्रश्नः ...	१३४	१
अविद्वत्कर्तृकसंन्यासापेक्षया कर्मयोगस्य श्रेष्ठत्वं भगवता निरूपितम्	१३४	२
कर्मयोगिनः स्तुतिर्निरूपिता	१३५	३
संन्यासकर्मयोगयोः फलमेकमेवेति निरूपणम्	१३६	४
संन्यासकर्मयोगयोः फलत एकत्वदर्शिनः स्तुतिः	१३७	५
अपक्वान्तःकरणस्य मुख्यसंन्यासो न सिध्यतीति निरूपणम्	१३७	६
ज्ञानवान् शरीरयात्रार्थं कर्म कुर्वन्नपि न लिप्यत इति निरूपणम्	१३८	७
तत्त्वज्ञानिना दर्शनादीन्द्रियादिव्यापारेषु नाहं कर्तेति धियास्थेयमिति निरूपणं श्लोकद्वयेन	१३९	८
निष्कामकर्मणा लेपो नास्तीति निरूपणम्	१४०	१०
मुमुक्षवश्चित्तशुद्धये कर्म कुर्वन्तीति निरूपणम्	१४०	११
अकामनया कामनया च कर्मकर्तॄणां फलम्	१४१	१२
विद्वान्सर्वाणि कर्माणि त्यक्त्वा नवद्वारे पुरे ब्रह्मात्मना सुखं तिष्ठतीति निरूपणम्	१४१	१३
परमात्मनः कारयितृत्वादिकं नास्तीति निरूपणम्	१४४	१४
परमात्मा कस्यचित्पापं पुण्यं च नादत्त इति निरूपणम् ...	१४५	१५
ज्ञानेनाज्ञाननाशे ज्ञानं प्रकाशत इति निरूपणम्	१४६	१६
ब्रह्मनिष्ठानां पुनरावृत्तिर्नास्तीति निरूपणम्	१४७	१७
समदर्शित्वं पण्डितानां धर्म इति निरूपणम्	१४८	१८
सर्वत्र समब्रह्मदर्शनेनेहैव मुक्तिरिति निरूपणम्	१४८	१९
ब्रह्मविदो लक्षणानि	१५०	२०
ब्रह्मनिष्ठायां तिष्ठतोऽक्षयसुखप्राप्तिनिरूपणम्	१५०	२१
विषयेषु विद्वान्न प्रवर्तत इति निरूपणम्	१५१	२२
कामक्रोधवेगजयिन एव सुखमिति निरूपणम्	१५२	२३
विदेहमुक्तिं गच्छतो योगिनो लक्षणम्	१५३	२४
संशयादिशून्या विदेहमुक्तिं गच्छन्तीति निरूपणम्	१५३	२५
कामक्रोधरहितानामेव जीवन्मुक्त्यादिसुखं सिध्यतीति निरूपणम्	१५४	२६
निदिध्यासकर्तुः षट्साधनानि संपाद्यानीति निरूपणं श्लोकद्वयेन.	१५५	२७
ब्रह्मज्ञानेनैव मुक्तिं गच्छतीति निरूपणम्	१५६	२९

इति पञ्चमाध्यायस्यानुक्रमणिका ।

विषयः	पत्रं	श्लोकः
अथ षष्ठाध्यायस्यानुक्रमणिका ।		
कर्मयोगस्य स्तुत्यर्थं निष्कामकर्मयोगिन एव संन्यासित्वमिति निरूपणम्	१५७	१
कर्मणः स्तुत्यर्थं संन्यासकर्मयोगयोरभिन्नतानिरूपणम् ...	१५८	२
आरुरुक्षोः कर्म कर्तव्यमारूढस्य तु संन्यास एव कर्तव्य इति निरूपणम्	१५९	३
योगारूढस्य लक्षणनिरूपणम्	१६१	४
आत्मैव ह्यात्मनो बन्धू रिपुश्चेति निरूपणम्	१६२	५
यया रीत्या स्वंप्रति स्वस्य बन्धुत्वं रिपुत्वं च तन्निरूपणम् ...	१६४	६
योगारूढस्य श्लोकद्वयेन लक्षणानि	१६५	७
सुहृन्मित्रादिषु समबुद्धेर्जीवन्मुक्तस्य श्रेष्ठत्वम्	१६७	९
समाधिं कुर्वतस्तदङ्गानां सूचनम्	१६८	१०
समाधिं कुर्वत आसनलक्षणम्	१६९	११
आसने स्थित्वा कर्तव्यस्य निरूपणम्	१६९	१२
कायशिरआदीनां समत्वेन धारणा	१७०	१३
समाधेरसाधारणसाधनानि	१७०	१४
समाधिं कुर्वतो ब्रह्मविदो जीवन्मुक्तिरूपं फलम्	१७१	१५
आहारादिनियमरहितस्य योगो न सिध्यतीति निरूपणम् ...	१७२	१६
युक्ताहारादिषु वर्तमानस्य योगो मुक्तिफलदो भवतीति निरूपणम्	१७३	१७
पुनरपि योगारूढस्य लक्षणम्	१७३	१८
यतचित्तस्य योगिन उपमाया निरूपणम्	१७४	१९
योगी स्वात्मानं जानंस्तुष्यतीति निरूपणम्	१७४	२०
योगी स्वात्मानन्दमनुभवन्स्वरूपान्न चलतीति निरूपणम् ...	१७५	२१
ब्रह्मविन्महता दुःखेनापि न विचाल्यत इति निरूपणम् ...	१७५	२२
प्रयत्नेन योगः कर्तव्य इति निरूपणम्	१७६	२३
समाधेः कर्तव्यप्रकारनिरूपणम्	१७७	२४
शनैःशनैरन्तःकरणमुपरतं कुर्यादिति निरूपणम्	१७७	२५
मनो विषयेभ्यो निवर्त्य स्वस्वरूप एव स्थापनीयमिति नि०	१७८	२६
प्रशान्तमनसो ब्राह्मं सुखमाविर्भवतीति निरूपणम्	१७९	२७
योगी ह्यक्षयं सुखमाप्नोतीति निरूपणम्	१७९	२८
योगयुक्तः सर्वमात्मैवेति पश्यति	१८०	२९
सर्वात्मदर्शनस्य फलकथनम्	१८०	३०
प्रारब्धानुरूपेण वर्तमानोऽपि विद्वान्मुक्तिमाप्नोतीति निरूपणम्	१८२	३१
ज्ञानी सर्वत्रात्मबुद्ध्या कस्यापि विक्षेपं न करोतीति निरूपणम्	१८२	३२

विषयः	पत्रं	श्लोकः
ब्रह्मण्यन्तःकरणस्थिरीभावस्य साधनमहं न जानामीत्यर्जुनस्य प्रश्नः	१८३	३३
चाञ्चल्यादिगुणयुक्तस्य मनसो दुर्निग्रहत्वनिरूपणम्	१८३	३४
मनसो निग्रहाय भगवता साधनमुपदिष्टम्	१८४	३५
असंयतमनसो ज्ञानयोगस्य दुष्प्रापत्वम्	१८५	३६
योगभ्रष्टस्य का गतिरित्यर्जुनस्य प्रश्नः	१८५	३७
योगभ्रष्टः किं वा नाशं प्राप्नोतीत्यर्जुनस्य संशयः	१८८	३८
मत्संशयं त्वमेव छिन्धीति भगवन्तं प्रत्यर्जुनस्य प्रार्थना ...	१८८	३९
योगभ्रष्टस्य नाशो नास्तीति भगवदुक्तिः	१८९	४०
योगभ्रष्टस्य स्वर्गादिप्राप्त्यनन्तरं श्रीमतां गेहे जननिरूपणम्	१९१	४१
विरक्तयोगभ्रष्टस्य ज्ञानिनामेव कुले जननिरूपणम् ...	१९१	४२
गृहस्थानां ज्ञानिनां कुले जन्मनो दुर्लभत्वनिरूपणम् ...	१९२	४२
ज्ञानिकुले जातो योगी ज्ञानाय यतत इति निरूपणम् ...	१९३	४३
पूर्वाभ्यासो बलात्कारेण ज्ञाननिष्ठायां प्रवर्तयतीति निरूपणम्	१९४	४४
ज्ञानार्थं प्रयत्नवतः फलनिरूपणम्	१९५	४५
इतरसाधनानुष्ठातृभ्यो ब्रह्मविदः श्रेष्ठत्वम्	१९५	४६
युक्ततमस्य लक्षणम्	१९६	४७

इति षष्ठाध्यायस्यानुक्रमणिका ।

अथ सप्तमाध्यायस्यानुक्रमणिका ।

ईश्वराश्रयेणैव ज्ञानं संपाद्यमिति निरूपणम्	१९७	१
सविज्ञानज्ञाननिरूपणप्रतिज्ञा	१९८	२
अपरिमितेषु मोक्षार्थं यतमानेषु कश्चिदेव परमात्मानं वेत्तीति निरूपणम्	१९९	३
अपरायाः प्रकृतेर्निरूपणम्	२००	४
परायाः प्रकृतेर्निरूपणम्	२००	५
प्रकृतिद्वयस्य कार्यनिरूपणम्	२०१	६
सूत्रे मणिगणदृष्टान्तेन भगवतः सर्वजगदाधारत्वमिति निरूपणम्	२०१	७
अबादिषु रसादिकारणरूपेण भगवतोऽवस्थानमिति श्लोकचतुष्टयेन निरूपणम्	२०३	८
सात्त्विकादिभेदभिन्नं सर्वं जगद्ब्रह्मवेति ब्रह्मणि जगन्नास्तीति च निरूपणम्	२०५	१२

विषयः	पत्रं	श्लोकः
गुणमयैः पदार्थैर्मोहितं जगद्गुणकार्यव्यतिरिक्तं परमात्मानमपरोक्षमपि न जानातीति निरूपणम्	२०८	१३
निर्गुणवस्त्वाश्रयणेनैव गुणमयमायातिक्रमणमिति निरूपणम्	२०९	१४
आसुरस्वभावास्तार्किकादयः परमेश्वरं नाश्रयन्त इति निरूपणम्	२१०	१५
चतुर्विधाः पुरुषाः परमेश्वरं भजन्त इति निरूपणम्... ...	२११	१६
चतुर्षु ज्ञानी श्रेष्ठो भगवत्प्रियश्चेति निरूपणम्	२१२	१७
ज्ञानी भगवद्रूप एवेति निरूपणम्	२१२	१८
सर्वत्र वासुदेवं पश्यतो दुर्लभत्वनिरूपणम्	२१३	१९
विवेकशून्या अन्यदेवानाश्रयन्त इति निरूपणम्	२१५	२०
देवाराधनेषु श्रद्धामन्तर्याम्येव दधातीति निरूपणम् ...	२१५	२१
देवाराधनेन काम्यप्राप्तिरपीश्वरादेव भवतीति निरूपणम् ...	२१६	२२
देवोपासकानां नाशिफलनिरूपणपूर्वकमीश्वरज्ञानवतां मुक्तिरिति निरूपणम्	२१६	२३
सदसद्विवेकविकलाः पण्डिता अपि प्रत्यग्रूपं परमात्मानं देहरूपं मन्यन्त इति निरूपणम्	२१७	२४
मूढः परमात्मानं न जानातीति निरूपणम्	२१८	२५
परमात्मा सर्वं वेत्ति परं तु तं न कश्चिज्जानातीति निरूपणम्	२१९	२६
द्वन्द्वमोहितानां ज्ञानं नोदेतीति निरूपणम्	२२०	२७
पुण्येन क्षालितपापाः परमेश्वरं भजन्त इति निरूपणम् ...	२२०	२८
मन्दबुद्धीनां सर्वत्र ब्रह्मबुद्धिकरणलक्षणं सगुणोपासनमुक्तं श्लोकद्वयेन	२२१	२९

इति सप्तमाध्यायस्यानुक्रमणिका ।

अथाष्टमाध्यायस्यानुक्रमणिका ।

अथाष्टमाध्याये प्रतिपाद्यनिरूपणम्	२२३	१
किं ब्रह्म किमध्यात्ममित्याद्यर्जुनकृतसप्तप्रश्नानां निरूपणं श्लोकद्वयेन	२२३	२
प्रश्नोत्तरत्वेन ब्रह्मणोऽध्यात्मस्य कर्मणश्च निरूपणम् ...	२२३	३
प्रश्नोत्तरत्वेन अधिभूतस्याधिदैवस्याधियज्ञस्य च निरूपणम्	२२४	४
सप्तमप्रश्नोत्तरत्वेन ब्रह्मविदोऽप्यन्तकाले ब्रह्मात्मनैव स्थातव्यमिति निरूपणम्	२२५	५
सर्वेषामन्तकाले भावनारूपैव गतिरिति निरूपणम्	२२६	६
सर्वदा ब्रह्मानुसंधिं कुर्वत एव ब्रह्मप्राप्तिर्भवतीति निरूपणम्	२२७	७

विषयः	पत्रं	श्लोकः
ब्रह्मध्यानेन ब्रह्मैव यातीति निरूपणम्	२२८	८
उपासकस्य प्राप्तव्यपरतत्त्वनिरूपणम्	२२९	९
उपासकस्य परब्रह्मप्राप्तये साधनानां निरूपणम्	२२९	१०
ब्रह्मविन्निरूपिततत्त्वप्राप्त्यर्थं ब्रह्मचर्यं चरन्तीत्यादिनिरूपणम्	२३०	११
उपासकस्य योगिनः क्लेशेन क्रममुक्तिकथनं श्लोकद्वयेन ...	२३१	१२
ब्रह्मविदो ब्रह्मप्राप्तिः सुलभेति निरूपणम्	२३१	१४
मुक्तिं गता ब्रह्मनिष्ठाः पुनर्जन्मादिदुःखं नैव लभन्त इति निरूपणम्	२३२	१५
ब्रह्मलोकादिगतानां पुनरावृत्तिकथनपूर्वकं ब्रह्मविदां पुनरावृत्तिर्नास्तीति निरूपणम्	२३३	१६
ब्रह्मण अहोरात्रयोर्वर्णनम्	२३४	१७
प्रजापतेरहोरात्रिषु प्राणिनां जन्ममरणदुःखमिति निरूपणम्	२३५	१८
जीवानां नित्यत्वनिरूपणपूर्वकमज्ञानेन तेषां घटीयन्त्रवत्पुनः पुनर्जन्ममरणादिदुःखमिति निरूपणम्	२३५	१९
सर्वभूतनाशेऽपि परमात्मनोऽविनाशित्वम्	२३६	२०
यं प्राप्य न पुनः शरीरधारणं तत्परमात्मनः स्वरूपमिति निरूपणम्	२३६	२१
परमात्मप्राप्तौ ज्ञानरूपा भक्तिः परमसाधनमिति निरूपणम्	२३७	२२
यस्मिन्काले मृतानामनावृत्त्यावृत्ती भवतस्तत्कालनिरूपणप्रतिज्ञा	२३९	२३
उत्तरायणकाले मृतानां क्रममुक्तिर्भवतीति निरूपणम् ...	२४०	२४
दक्षिणायनकाले मृतानां पुनरावृत्तिर्भवतीति निरूपणम् ...	२४०	२५
उत्तरायणदक्षिणायनरूपयोः शुक्लकृष्णगत्योरनादित्वनिरूपणम्	२४१	२६
द्वयोर्गत्योः फलं जानता मोक्षमार्गे प्रमादो न कर्तव्य इति निरूपणम्	२४१	२७
सगुणब्रह्मोपासकस्य प्राप्यसुखनिरूपणम्	२४२	२८

इति अष्टमाध्यायस्यानुक्रमणिका ।

अथ नवमाध्यायस्यानुक्रमणिका ।

नवमाध्याये प्रतिपाद्यनिरूपणम्	२४३	०
विज्ञानसहितज्ञानस्य गुह्यतमत्वनिरूपणम्	२४३	१
राजविद्येत्यादिना ज्ञानस्यात्युत्कृष्टत्वनिरूपणम्	२४४	२
ज्ञानमार्गे श्रद्धाशून्यानां जन्ममरणाद्यनर्थप्राप्तिनिरूपणम् ...	२४५	३
ब्रह्मणो ज्ञानस्य विज्ञानस्य च स्वरूपनिरूपणपूर्वकं सर्वाधारस्य ब्रह्मणो भूतेष्वप्रवेशनादिनिरूपणं श्लोकद्वयेन ...	२४६	४

विषयः	पत्रं	श्लोकः
आकाशे वायुवत्सर्वभूतानां ब्रह्मणि स्थितिरिति निरूपणम् ...	२५०	६
सर्वभूतानां परमात्मन्येवोत्पत्तिप्रलयौ	२५०	७
परमात्मैव मायया भूतजातं सृजतीति निरूपणम्	२५०	८
उदासीनस्यासङ्गस्येश्वरस्य सृष्ट्यादिकर्मणा न लेपोऽस्तीति निरूपणम्	२५१	९
भगवत्सांनिध्यात्प्रकृतिरेव जगत्सृष्ट्यादि कर्म करोतीति निरूपणम्	२५१	१०
एको देवः सर्वभूतेषु गूढ इत्यादि श्रुतिप्रतिपादितप्रकारेण सर्वभूतेषु स्थितं परमात्मानमजानन्तो मूढा देहाध्यासेन तं तिरस्कुर्वन्तीति निरूपणम्...	२५२	११
मूढानां स्वभावकथनपूर्वकमासुरयोनिप्राप्तिनिरूपणम् ...	२५४	१२
दैवीसंपत्तिमन्तो महात्मानः परमात्मानं ज्ञात्वा भजन्तीति निरूपणम्	२५५	१३
मुमुक्षूणां परमेश्वरोपास्तिप्रकारनिरूपणम्	२५५	१४
ज्ञानिनामज्ञानिनां च परमेश्वरोपास्तिभेदनिरूपणम्	२५६	१५
अहं क्रतुरित्यादिना सदसच्चाहमर्जुनेत्यन्तेन श्लोकचतुष्टयेन भगवतः सर्वात्मत्वनिरूपणम्	२५७	१६
सकामकर्मिणां स्वर्गसुखप्राप्तिनिरूपणम्	२५९	२०
स्वर्गं गतानां पुनरावृत्तिनिरूपणम्	२६०	२१
ब्रह्मनिष्ठानां योगक्षेमं परमात्मैव करोतीति निरूपणम् ...	२६०	२२
सर्वात्मकं परमेश्वरमज्ञात्वाऽन्यदेवोपासनं श्रेयोहेतुर्नेति निरूपणम्	२६१	२३
तत्त्वज्ञानशून्यानां मोक्षाभावनिरूपणम्	२६२	२४
इन्द्रादिदेवाद्युपासकानामुपासनानुरूपं फलं भवतीति निरूपणम्	२६२	२५
भक्त्या समर्पितं पत्रपुष्पादिकमपीश्वरो गृह्णातीति निरूपणम्	२६३	२६
ईश्वरार्पणबुद्ध्यैव सर्वं कर्म कर्तव्यमिति निरूपणम्	२६३	२७
निष्कामकर्मकर्तुर्ज्ञानद्वारा मुक्तिर्भवतीति निरूपणम्	२६४	२८
परमात्मा सर्वभूतेषु सम एवेति निरूपणम्	२६५	२९
दुराचारवतोऽप्यनन्यवृत्त्या ब्रह्मानुसंधानेन सर्वदोषनिवृत्त्या साधुत्वं भवतीति निरूपणम्	२६६	३०
ब्रह्मानुसंधानेन सद्य एव धर्मात्मा सन्मुक्तिं गच्छतीति निरूपणम्	२६८	३१
स्त्रीशूद्रादीनामपि मुक्तिर्भवतीति निरूपणम्	२६८	३२
यदा स्त्रीशूद्राणां मुक्तिस्तदा ब्राह्मणादीनां मुक्तिर्भवतीत्यत्र		

विषयः	पत्रं	श्लोकः
किमु वक्तव्यमिति कैमुतिकन्यायेन ज्ञानस्य सुलभत्वनिरूपणम्	२६९	३३
ईश्वरभजनप्रकारकथनम्	२७१	३४

इति नवमाध्यायस्यानुक्रमणिका।

अथ दशमाध्यायस्यानुक्रमणिका।

दशमे प्रतिपाद्यनिरूपणम्	२७२	०
श्रद्धावत एव ज्ञानमुपदेष्टव्यमिति कथनम्	२७२	१
अर्वाचीना देवादयः परमेश्वरप्रभावं न जानन्तीति निरूपणम्	२७२	२
परमात्मज्ञानेन दोषाणां दोषकार्याणां च निवृत्तिरिति निरूपणम्	२७३	३
ईश्वरानुग्रहानुग्रहाभ्यां ज्ञानाज्ञानादिसदसद्गुणानामुत्पत्तिर्भवतीति निरूपणं श्लोकद्वयेन	२७४	४
सामान्येन भगवद्विभूतेर्वर्णनम्	२७५	६
विभूतेर्याथार्थ्यज्ञानस्य फलकथनम्	२७५	७
बुधाः परमेश्वरं भजन्त इति निरूपणम्	२७६	८
परमेश्वरोपास्तिप्रकारनिरूपणम्	२७६	९
वेदान्तश्रवणादिना भजतां परमेश्वरो ज्ञानयोगं ददातीति निरूपणम्	२७७	१०
एतां विभूतिमित्यादि येन मामुपयान्ति ते इत्यन्तानां श्लोकानां प्रकारान्तरेण व्याख्यानम्	२७७	१०
परमात्मैव ज्ञानदीपेनाज्ञानं नाशयतीति निरूपणम्	२७९	११
परं ब्रह्म परं धामेत्यादि श्लोकचतुष्टयेन भगवतो माहात्म्यस्यार्जुनेन निरूपणम्	२८०	१२
विभूतिज्ञानार्थं भगवन्तं प्रत्यर्जुनस्य प्रश्नः	२८१	१६
त्वां कथं जानीयामित्याद्यर्जुनस्य पुनः प्रश्नः	२८२	१७
तवैश्वर्यं विभूतिं च विस्तरेण निरूपयेति भगवन्तं प्रत्यर्जुनस्य पुनः प्रश्नः	२८२	१८
भगवता विभूतिनिरूपणप्रतिज्ञा कृतेति निरूपणम्	२८३	१९
उत्तममध्यमाधिकारिणामुपास्यनिरूपणम्	२८३	२०
आदित्यानामहं विष्णुरित्यादिना ज्ञानं ज्ञानवतामहमित्यन्तेनाष्टादशश्लोकसमूहेन मूढानामुपासनार्थं विभूतिविशेषाणां विस्तरेण निरूपणम्	२८४	२१
सर्वं विश्वं परमात्मैवेति निरूपणम्	२८७	३९

विषयः	पत्रं	श्लोकः
परमेश्वरविभूतीनामियत्ता नास्तीति निरूपणम्	२८८	४०
सामान्येन विभूतिदिक्प्रदर्शनम्	२८८	४१
विभूतिविशेषोपासनस्याकिंचित्करत्वेन विश्वरूपोपासनार्थं विश्वात्मना परमेश्वर एव स्थित इति निरूपणम्	२८९	४२

इति दशमाध्यायानुक्रमणिका।

अथैकादशाध्यायस्यानुक्रमणिका।

एकादशाध्याये प्रतिपाद्यकथनम्	२९०	०
अर्जुनेन भगवत्कृपया स्वस्य मोहरहितत्वनिरूपणम्... ...	२९०	१
भगवतो माहात्म्यमर्जुनेन निरूपितम्	२९०	२
भगवदैश्वर्यदर्शनेच्छार्जुनस्य	२९१	३
विश्वरूपं दर्शयेति भगवन्तं प्रत्यर्जुनस्य प्रार्थना	२९१	४
मे बहूनि रूपाणि पश्येत्याद्यर्जुनं प्रति भगवतोक्तं श्लोकद्वयेन	२९१	५
विश्वात्मके मद्देहे सर्वं जगत्पश्येति भगवदुक्तिः	२९२	७
भगवतार्जुनाय दिव्यं चक्षुर्दत्तमिति निरूपणम्	२९२	८
भगवता विश्वरूपं दर्शितमिति संजयवाक्यम्	२९२	९
श्लोकद्वयेन विश्वरूपवर्णनम्	२९३	१०
विश्वरूपप्रकाशस्योपमाया अभावनिरूपणम्	२९३	१२
भगवद्देहेऽर्जुनः सर्वं जगदपश्यदिति निरूपणम्	२९३	१३
विश्वरूपदर्शनेनार्जुनस्य विस्मयादेर्निरूपणम्	२९४	१४
विश्वरूपे देवादीनां दर्शनम्	२९४	१५
विश्वरूपे अनन्तबाहूदरादेर्दर्शनम्	२९४	१६
विश्वरूपे तेजःपुञ्जादेर्दर्शनम्	२९४	१७
विश्वरूपस्याक्षरत्वादिना निरूपणम्	२९४	१८
विश्वरूपेऽनन्तवीर्यादेर्दर्शनम्	२९५	१९
विश्वरूपस्योग्रत्वादेः कथनम्	२९६	२०
विश्वरूपे देवादीनां प्रवेशादेर्निरूपणम्	२९६	२१
विश्वरूपदर्शनेन देवादीनां विस्मयो जात इत्यर्जुनस्य दर्शनम्	२९६	२२
भयानकरूपदर्शनेनार्जुनस्य भयभीतत्वादेर्निरूपणं श्लोकत्रयेण	२९६	२३
दुर्योधनादीनां स्वनाशाय भगवद्वक्त्रे प्रवेशादेः श्लोकचतुष्टयेन निरूपणम्	२९७	२६
विष्णोर्भयानकरूपस्य वर्णनम्	२९८	३०
उग्ररूपस्त्वं क इत्याद्यर्जुनस्य प्रार्थना...	२९९	३१

विषयः	पत्रं	श्लोकः
कालोऽस्मीत्यादिभगवदुत्तरम्	२९९	३२
अर्जुनस्य शत्रुजये निमित्तमात्रस्त्वमिति निरूपणं श्लोकद्वयेन	२९९	३३
धृतराष्ट्रं प्रति संजयवाक्यम्	३००	३५
भगवतो महत्त्वनिरूपणम्	३०१	३६
भगवतः सर्वदेवनमस्कार्यत्वादिनिरूपणम्	३०१	३७
सविशेषनिर्विशेषाभ्यां भगवतो निरूपणम्	३०२	३८
वाय्वग्न्यादिदेवरूपेण भगवतो निरूपणम्	३०३	३९
भगवतः सर्वतो नमस्कार्यत्वनिरूपणम्	३०३	४०
स्वापराधनिवृत्तये श्लोकद्वयेनार्जुनकृतप्रार्थना	३०४	४१
भगवतः सर्वतो गरीयस्त्वादिनिरूपणम्	३०४	४३
अपराधक्षमापने उदाहरणानि	३०५	४४
भयकारकरूपोपसंहारप्रार्थना	३०५	४५
शान्तं रूपं दर्शयेत्यर्जुनस्य पुनः प्रार्थना	३०६	४६
भगवत्प्रसादाद्विश्वरूपदर्शनं भवतीति निरूपणम्	३०६	४७
विश्वरूपदर्शनस्य दुर्लभत्वनिरूपणम्	३०६	४८
भयं त्यक्त्वा मे शान्तं रूपं पश्येत्यर्जुनं प्रति भगवदुक्ति-निरूपणम्	३०७	४९
सौम्यं रूपं दर्शयित्वार्जुनमभयं चकार भगवानिति संजयोक्ति-निरूपणम्	३०७	५०
सौम्यरूपदर्शनेनार्जुनस्य स्वास्थ्यमिति निरूपणम्	३०८	५१
विश्वरूपदर्शनस्य श्रेष्ठत्वनिरूपणम्	३०८	५२
भगवत्साक्षात्कारे कर्मणामसाधनत्वनिरूपणम्	३०८	५३
भगवत्साक्षात्कारार्थं भक्तिर्निरूपणम्	३०९	५४
भगवत्प्राप्त्यर्थं साधनपञ्चकनिरूपणम्...	३०९	५५

इति एकादशाध्यायानुक्रमणिका ।

अथ द्वादशाध्यायस्यानुक्रमणिका ।

द्वादशाध्याये प्रतिपाद्यनिरूपणम्	३१०	०
सगुणनिर्गुणोपासकानां तारतम्यज्ञानायार्जुनकृतप्रश्ननिरूपणम्	३१०	१
सर्वं ब्रह्मैवेति सगुणोपासकाः श्रेष्ठा इति निरूपणम्	३११	२
निर्गुणोपासकानां श्रेष्ठतमत्वनिरूपणं श्लोकद्वयेन	३१२	३
अपक्वचित्तानां निर्गुणोपासने क्लेशाधिक्यनिरूपणम्	३१३	५
सगुणोपास्त्या शुद्धचित्तानां ब्रह्मज्ञानद्वारा बन्धनिवृत्तिरिति निरूपणं श्लोकद्वयेन	३१३	६

विषयः	पत्रं	श्लोकः
ब्रह्मज्ञानद्वारा मुक्त्यर्थं भगवदुपासनं कर्तव्यमिति निरूपणम्	३१४	८
विश्वरूपोपासनेऽशक्तस्य साधनान्तरोपदेशनिरूपणम् ...	३१५	९
अभ्यासेऽशक्तस्य कर्म कर्तव्यमिति निरूपणम्	३१५	१०
अत्यन्तमन्दबुद्धिः कर्मफलत्यागं कुर्यादिति निरूपणम् ...	३१६	११
श्रेयो हि ज्ञानमभ्यासादित्यत्र कर्मफलत्यागस्य मोक्षफलप्रदत्वनिरूपणम्	३१६	१२
कर्मफलत्यागशब्दार्थस्य प्रकारान्तरेण निरूपणम्	३१७	१२
अद्वेष्टृत्वादिलक्षणलक्षितो ब्रह्मविद्भगवत्प्रिय इति निरूपणं श्लोकद्वयेन	३१८	१३
यस्मान्नोद्विजते लोक इत्यादिभगवत्प्रियस्य लक्षणम्	३२०	१५
अनपेक्ष इत्यादिभगवद्भक्तस्य लक्षणान्तरम्	३२१	१६
रागद्वेषादिराहित्यं विदुषो लक्षणान्तरम्	३२१	१७
शत्रुमित्रादिषु समत्वेनावस्थानादिलक्षणलक्षितो भगवत्प्रियो भवतीति निरूपणं श्लोकद्वयेन	३२२	१८
अद्वेष्टृत्वादिसाधनसंपन्ना भगवत्प्रिया भवन्तीति निरूपणम्	३२३	२०

इति द्वादशाध्यायस्यानुक्रमणिका।

अथ त्रयोदशाध्यायस्यानुक्रमणिका।

त्रयोदशाध्याये प्रतिपाद्यनिरूपणम्	३२४	०
क्षेत्रक्षेत्रज्ञयोः स्वरूपविवेचनम्	३२५	१
देहेन्द्रियादिव्यतिरिक्तः क्षेत्रज्ञ आत्मा नेति शङ्काया निरूपणम्	३२६	१
अनेकविकल्पयुक्तिप्रमाणैर्देहादिसङ्घातव्यतिरिक्तत्वेन क्षेत्रज्ञस्य निरूपणम्	३२७	२
क्षेत्रज्ञपरमात्मनोरेकत्वनिरूपणम्	३२८	२
क्षेत्रस्यापि ब्रह्मणि कल्पितत्वेन निरूपणम्	३२९	२
क्षेत्रक्षेत्रज्ञयोर्विभागनिरूपणप्रयोजनम्	३३०	२
जीवेश्वरयोरेकत्वं न संभवतीति शङ्काया निरूपणम्	३३१	२
श्रुतिस्मृत्याद्यनेकप्रमाणैर्जीवेश्वरयोर्भेदो नास्तीति निरूपणम् ...	३३२	२
क्षेत्रक्षेत्रज्ञयोः पुनर्निरूपणे भगवतः प्रतिज्ञा	३३३	३
क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं श्रुत्यादिभिर्निरूपितमिति कथनम् ...	३३३	४
श्लोकद्वयेन क्षेत्रस्वरूपनिरूपणम्	३३४	५
आत्मज्ञानार्थममानित्वादिसाधनानां निरूपणम्	३३५	७
जन्ममरणादिषु दुःखदोषादिनिरूपणम्	३३६	८

विषयः	पत्रं	श्लोकः
पुत्रदारगृहादिष्वङ्गो न कर्तव्य इत्यादिसाधनानां निरूपणं श्लोकत्रयेण	३३७	९
ज्ञेयस्य क्षेत्रस्य तज्ज्ञानफलस्य च निरूपणम्	३४०	१२
क्षेत्रज्ञं त्यक्त्वा ब्रह्मनिरूपणं कथमिति शङ्काया निरूपणम् ...	३४०	१२
क्षेत्रज्ञब्रह्मशब्दयोरर्थ एक एवेति निरूपणम्	३४१	१२
सदसल्लक्षणात्कार्यकारणाद्विलक्षणत्वेन ब्रह्मणो निरूपणम् ...	३४२	१२
क्षेत्रज्ञरूपस्य परमात्मनः सर्वतः पाणिपादादिमत्त्वनिरूपणम्	३४२	१३
परमात्मनि क्षेत्रज्ञलक्षणसंपन्निरूपणम्	३४४	१४
सर्वं जगद्ब्रह्ममात्रमेवेति निरूपणम्	३४६	१५
विभक्तेषु प्राणिषु ब्रह्माविभक्तमेवेति निरूपणम्	३४७	१६
ब्रह्मणः स्वरूपस्य तत्प्राप्तिसाधनस्य तदुपलब्धिस्थानस्य च निरूपणम्	३४८	१७
क्षेत्रक्षेत्रज्ञयोर्याथात्म्यज्ञानेन ब्रह्मप्राप्तिनिरूपणम्	३५०	१८
प्रकृतिपुरुषयोरनादित्वनिरूपणम्	३५१	१९
प्रकृतिपुरुषयोः संसारकारणत्वनिरूपणम्	३५३	२०
सदसद्योनिषु जन्मकारणं गुणसङ्ग एवेति निरूपणम्... ...	३५४	२१
ब्रह्मात्मनोरेकत्वज्ञानार्थमुपद्रष्टेत्यादिविशेषणषट्कानां निरूपणम्	३५५	२२
उपद्रष्टृत्वादिलक्षणात्मज्ञानात्कैवल्यं यातीति निरूपणम् ...	३५७	२३
उत्तममध्यमकनिष्ठाधिकारिणां ब्रह्मप्राप्तये पृथक्पृथक् साधनानां निरूपणम्	३५८	२४
कर्मस्वनधिकारिणां मुक्तिसाधननिरूपणम्	३५९	२५
क्षेत्रक्षेत्रज्ञयोः कल्पितसंयोगादेव सर्वेषां जननमिति निरूपणम्	३६०	२६
नश्यत्सु देहादिष्वनाशादिलक्षणमात्मानं जानन्मुक्तो भवतीति निरूपणम्	३६१	२७
सर्वत्र परिपूर्णस्वात्मज्ञानेनात्मानमहिंसन् मुक्तो भवतीति नि०	३६२	२८
अकर्तात्मज्ञान्येव परमात्मज्ञानवानिति निरूपणम्	३६४	२९
आत्मैकत्वज्ञानसमय एव ब्रह्मभावं गच्छतीति निरूपणम् ...	३६५	३०
अनादित्वादिविशेषेण विशिष्टस्यात्मनः कर्तृत्वलेपवत्त्वाभावनि०	३६५	३१
सर्वदेहेषु स्थितस्याप्यात्मन आकाशदृष्टान्तेन निर्लेपत्वनि०	३६७	३२
रविदृष्टान्तेन क्षेत्रज्ञातुः क्षेत्राद्वैलक्षण्यनिरूपणम्	३६८	३३
क्षेत्रक्षेत्रज्ञविभागज्ञानेनाज्ञानतत्कार्यनिवृत्त्या परप्राप्तिनिरूपणम्	३६९	३४

इति त्रयोदशाध्यायस्यानुक्रमणिका ।

विषयः	पत्रं	श्लोकः
अथ चतुर्दशाध्यायस्यानुक्रमणिका ।		
चतुर्दशाध्याये प्रतिपाद्यनिरूपणम्	३६९	०
गुणतत्कार्यज्ञानस्य श्रेयस्करत्वनिरूपणम्	३७०	१
भगवद्भावं गतानां जन्मादिदुःखं नेति निरूपणम्	३७१	२
चैतन्यशक्त्या प्रकृतेर्जगदुत्पादकत्वम्	३७२	३
प्रकृतेर्मातृत्वं परमात्मनः पितृत्वं च	३७२	४
गुणानां बन्धकत्वनिरूपणम्	३७३	५
सत्त्वगुणस्य स्वरूपकार्ययोर्निरूपणम्	३७४	६
रजसः स्वरूपकार्ययोर्निरूपणम्	३७४	७
तमसः स्वरूपकार्ययोर्निरूपणम्	३७५	८
त्रयाणां गुणानां कार्यनिरूपणम्	३७५	९
गुणानां परस्पराभिभावकत्वलक्षणम्	३७६	१०
विवृद्धसत्त्वगुणस्य लक्षणम्	३७६	११
विवृद्धरजोगुणस्य लक्षणम्	३७६	१२
विवृद्धतमोगुणस्य लक्षणम्	३७७	१३
सत्त्ववृद्ध्या मृतस्य गतेर्निरूपणम्	३७७	१४
रजस्तमसोर्वृद्ध्या मृतस्य गतेर्निरूपणम्	३७७	१५
सात्त्विकादिकर्मणां फलनिरूपणम्	३७७	१६
सत्त्वादिगुणानां कार्यान्तरनिरूपणम्	३७८	१७
सत्त्वादिगुणस्थितानां गतेर्निरूपणम्	३७८	१८
गुणव्यतिरिक्तात्मज्ञानी मुक्तिं गच्छतीति निरूपणम्	३७९	१९
गुणत्रयातिक्रमणेन मुक्तो भवतीति निरूपणम्	३८०	२०
गुणातीतस्य किं लक्षणमित्यर्जुनस्य प्रश्नत्रयम्	३८०	२१
गुणातीतस्य स्वसंवेद्यलक्षणनिरूपणम्	३८१	२२
गुणातीतस्य किमाचार इति प्रश्नस्योत्तरम्	३८२	२३
गुणातीतस्य परसंवेद्यलक्षणनिरूपणं श्लोकद्वयेन	३८३	२४
कथं गुणानतिवर्तत इति तृतीयप्रश्नस्योत्तरम्	३८५	२६
ब्रह्मात्मनोरेकत्वनिरूपणम्	३८७	२७

इति चतुर्दशाध्यायस्यानुक्रमणिका ।

अथ पञ्चदशाध्यायस्यानुक्रमणिका ।

पञ्चदशाध्याये प्रतिपाद्यनिरूपणम्	३८८	०
संसारवृक्षस्य मूलशाखादेर्वर्णनम्	३८८	१
संसारवृक्षस्य शाखाप्रसृतेः प्रवालादेश्च वर्णनम्	३८९	२

विषयः	पत्रं	श्लोकः
संसारवृक्षं वैराग्यखड्गेन छित्त्वा ब्रह्मपदलाभाय प्रयत्नः कर्तव्य इति निरूपणं श्लोकद्वयेन	३९०	३
निर्मानमोहत्वादिलक्षणलक्षिता मुक्तिं गच्छन्तीति निरूपणम्	३९३	५
सूर्याद्यप्रकाश्यस्वयंज्योतिर्ब्रह्मप्राप्तानां पुनरावृत्तिर्नास्तीति निरूपणम्	३९४	६
ब्रह्मण एवाविद्योपाधिना जीवत्वमिति निरूपणम्	३९७	७
इन्द्रियादीन्गृहीत्वा जीवस्य शरीरान्तरे गमनम्	३९७	८
आत्मनो विषयदर्शने इन्द्रियाणां करणत्वनिरूपणेनात्मन इन्द्रियादिभ्यो भिन्नत्वनिरूपणम्	३९८	९
ज्ञानचक्षुषा ज्ञेयमात्मानं मूढा न जानन्तीति निरूपणम् ...	३९९	१०
बहिर्मुखानामात्मज्ञानं न जायत इति निरूपणम्	३९९	११
सूर्यादिषु सर्वत्र परमेश्वरबुद्धिः कर्तव्येति निरूपणम् ...	४००	१२
पृथ्वीचन्द्रादिषु परमेश्वरबुद्धिः कर्तव्येति निरूपणम् ...	४००	१३
देहे जठराग्निरूपेण परमेश्वर एव चतुर्विधान्नपाचनं करोतीति निरूपणम्	४०१	१४
ईश्वरानुग्रहाननुग्रहादेव ज्ञानाज्ञानादीति निरूपणम्	४०२	१५
कार्यकारणरूपयोः क्षराक्षरपुरुषयोर्निरूपणम्	४०३	१६
उत्तमपुरुषरूपस्य प्रत्यगात्मनो निरूपणम्	४०४	१७
पुरुषोत्तमशब्दस्य व्याख्यानम्	४०६	१८
परमात्मज्ञानस्य फलनिरूपणम्	४०७	१९
पञ्चदशाध्याये प्रतिपाद्यार्थज्ञाता कृतकृत्यो भवतीति निरूपणम्	४०७	२०

इति पञ्चदशाध्यायस्यानुक्रमणिका ।

अथ षोडशाध्यायस्यानुक्रमणिका ।

षोडशाध्याये प्रतिपाद्यनिरूपणम्	४०८	०
दैवीसंपद्गुणानां निरूपणं श्लोकत्रयेण	४०८	१
आसुरीसंपद्गुणानां निरूपणम्	४१०	४
दैवासुरसंपदोः कार्यनिरूपणम्	४१०	५
आसुरीसंपन्निरूपणप्रतिज्ञा	४११	६
आसुराणां स्वभावनिरूपणम्	४११	७
आसुराणां निश्चयनिरूपणम्	४११	८
आसुरा जगन्नाशाय प्रवर्तन्त इति निरूपणम्	४१२	९
आसुरा यद्बीत्या जगन्नाशाय प्रवर्तन्त इति निरूपणम् ...	४१२	१०
आसुराणां चिन्तादेर्निरूपणं श्लोकद्वयेन	४१३	११
आसुराणामनन्तमनोरथानां निरूपणं श्लोकत्रयेण	४१३	१३

विषयः	पत्रं	श्लोकः
आसुरमनोरथानां फलनिरूपणम्	४१४	१६
आसुराणां दम्भयज्ञप्रकारनिरूपणम्	४१४	१७
आसुरा आत्मज्ञानद्वेषिण इति निरूपणम्	४१४	१८
आसुराणां श्वानशूकरादियोनिप्राप्तिनिरूपणम्	४१५	१९
आसुराणां पुनःपुनरधमगतिरेवेति निरूपणम्	४१५	२०
कामक्रोधलोभानां नरकहेतुतेति निरूपणम्	४१६	२१
कामादिरहित आत्मज्ञानेन मुक्तिमाप्नोतीति निरूपणम् ...	४१६	२२
अशास्त्रीयकर्मकर्तुरसद्गतिरेवेति निरूपणम्	४१७	२३
कार्याकार्ये शास्त्रमेव प्रमाणमिति निरूपणम्	४१७	२४

इति षोडशाध्यायस्यानुक्रमणिका ।

अथ सप्तदशाध्यायस्यानुक्रमणिका ।

सप्तदशाध्याये प्रतिपाद्यनिरूपणम्	४१८	०
शास्त्रविधिमविज्ञाय श्रद्धया यजतां का संपदित्यर्जुनप्रश्नस्य निरूपणम्	४१८	१
प्रश्नोत्तरार्थं श्रद्धायास्त्रैविध्यनिरूपणम्	४१९	२
सत्त्वादिगुणानुरूपा श्रद्धा भवतीति निरूपणम्	४२०	३
गुणानुरूपं देवादीनां यजनमिति निरूपणम्	४२०	४
अशास्त्रीयशरीरशोषणादिषु प्रवृत्तानामासुरत्वनिरूपणं श्लोकद्वयेन	४२१	५
आहारयज्ञादीनां सात्त्विकादिभेदेन त्रैविध्यमिति निरूपणम्...	४२१	७
सात्त्विकाहारस्य निरूपणम्	४२१	८
राजसाहारस्य निरूपणम्	४२२	९
तामसाहारस्य निरूपणम्	४२२	१०
सात्त्विकयज्ञस्य लक्षणम्	४२२	११
राजसयज्ञस्य लक्षणम्	४२२	१२
तामसयज्ञस्य लक्षणम्	४२२	१३
शारीरतपसो निरूपणम्	४२३	१४
वाङ्मयतपसो निरूपणम्	४२३	१५
मानसतपसो निरूपणम्	४२३	१६
सात्त्विकतपसो निरूपणम्	४२४	१७
राजसतपसो निरूपणम्	४२४	१८
तामसतपसो निरूपणम्	४२४	१९
सात्त्विकदानस्य निरूपणम्	४२४	२०
राजसदानस्य निरूपणम्	४२४	२१

विषयः	पत्रं	श्लोकः
तामसदानस्य निरूपणम्	४२५	२२
ॐतत्सदिति ब्रह्मणो नाम्नस्तन्महत्त्वस्य च निरूपणम् ...	४२५	२३
ॐकारविनियोगनिरूपणम्	४२५	२४
तत्पदस्य विनियोगनिरूपणम्	४२६	२५
सच्छब्दस्य विनियोगनिरूपणं श्लोकद्वयेन	४२६	२६
श्रद्धारहितसर्वकर्मणो निष्फलत्वनिरूपणम्	४२७	२८

इति सप्तदशाध्यायस्यानुक्रमणिका ।

अथाष्टादशाध्यायस्यानुक्रमणिका ।

अष्टादशाध्याये प्रतिपाद्यनिरूपणम्	४२८	०
संन्यासत्यागशब्दयोः कोऽर्थ इति प्रश्नस्य निरूपणम् ...	४२८	१
संन्यासत्यागशब्दयोर्मतभेदेनार्थभेदस्य निरूपणम्	४२९	२
निषिद्धकर्मणां त्याज्यत्वनिरूपणपूर्वकं यज्ञदानादीनां कर्तव्यत्वनिरूपणम्	४२९	३
स्वाभिप्रायकथने भगवतः प्रतिज्ञा	४३३	४
यज्ञदानादीनां कर्तव्यत्वनिरूपणपूर्वकं तेषां पावनत्वनिरूपणम्	४३३	५
यज्ञादिकर्मणामनुष्ठानप्रकारनिरूपणम्	४३४	६
तामसत्यागस्य लक्षणम्	४३५	७
राजसत्यागस्य लक्षणम्	४३५	८
सात्त्विकत्यागस्य लक्षणम्	४३६	९
सात्त्विकत्यागेन शुद्धान्तःकरणस्य ज्ञानिनो लक्षणानि ...	४३६	१०
देहाभिमानिनां सर्वकर्मत्यागस्याशक्यत्वात्कर्मफलमेव त्यक्तव्यमिति निरूपणम्	४३७	११
कर्मिणां संसारकथनपूर्वकं विदुषां मुक्तिरेवेति निरूपणम् ...	४३९	१२
सर्वकर्मनिष्पत्तये पञ्चकारणनिरूपणप्रतिज्ञा	४४०	१३
अधिष्ठानादिपञ्चकारणानां नामानि	४४१	१४
शारीरादित्रिविधसर्वकर्मणामधिष्ठानादिपञ्चैव हेतव इति निरूपणम्	४४१	१५
अधिष्ठानादिकृतकर्मस्वात्मानं कर्तारं जानन्मूढ एवेति निरूपणम्	४४२	१६
देहाभिमानरहितस्य न लेप इति ज्ञानमाहात्म्यस्य निरूपणम्	४४५	१७
ज्ञात्रादेर्निरूपणम्	४४८	१८
ज्ञानकर्मादीनां सात्त्विकादिभेदनिरूपणप्रतिज्ञा	४४९	१९
सात्त्विकज्ञानस्य लक्षणम्	४५०	२०
राजसज्ञानस्य लक्षणम्	४५०	२१

विषयः	पत्रं	श्लोकः
तामसज्ञानस्य लक्षणम्	४५१	२२
सात्त्विककर्मणो निरूपणम्	४५१	२३
राजसकर्मणो निरूपणम्	४५२	२४
तामसकर्मणो निरूपणम्	४५२	२५
सात्त्विककर्तुर्निरूपणम्	४५२	२६
राजसकर्तुर्निरूपणम्	४५३	२७
तामसकर्तुर्निरूपणम्	४५३	२८
बुद्ध्यादेस्त्रैविध्यनिरूपणे प्रतिज्ञा	४५४	२९
सत्त्वबुद्धेर्लक्षणनिरूपणम्	४५४	३०
राजसबुद्धेर्लक्षणनिरूपणम्	४५५	३१
तामसबुद्धेर्लक्षणनिरूपणम्	४५५	३२
सत्त्वधृतेर्निरूपणम्	४५५	३३
राजसधृतेर्निरूपणम्	४५६	३४
तामसधृतेर्निरूपणम्	४५६	३५
सुखस्य त्रैविध्यनिरूपणे प्रतिज्ञा	४५६	३६
सात्त्विकसुखस्य निरूपणम्	४५६	३७
राजससुखस्य निरूपणम्	४५९	३८
तामससुखस्य निरूपणम्	४५९	३९
सर्वं विश्वं त्रिगुणात्मकमेवेति निरूपणम्	४५९	४०
ब्राह्मणक्षत्रियादीनां भिन्नानि कर्माणीति निरूपणम्	४६०	४१
ब्राह्मणकर्मनिरूपणम्	४६१	४२
क्षत्रियकर्मनिरूपणम्	४६१	४३
वैश्यशूद्रकर्मणोर्निरूपणम्	४६२	४४
स्वस्वकर्मणान्तःकरणशुद्धिप्रकारनिरूपणं श्लोकद्वयेन	४६३	४५
परधर्मात्स्वधर्मस्य श्रेष्ठत्वनिरूपणम्	४६४	४७
स्वधर्मोऽवश्यमनुष्ठेय इति निरूपणम्	४६५	४८
ज्ञानलक्षणसंन्यासेन ब्रह्मप्राप्तिनिरूपणम्	४६६	४९
ज्ञाननिष्ठाया ज्ञानफलस्य च निरूपणम्	४६८	५०
विशुद्धबुद्धित्वादिसाधनपूर्वकं ब्रह्मनिष्ठां कुर्वतो ब्रह्मप्राप्तिनिरूपणं श्लोकत्रयेण	४७५	५१
कृतार्थस्य विदुषो लक्षणनिरूपणम्	४७९	५४
ब्रह्मविदुषो ब्रह्मप्राप्तिनिरूपणम्	४८०	५५
ईश्वरानुग्रहान्मुक्तिरिति निरूपणम्	४८३	५६
ईश्वराश्रयः कर्तव्य इति निरूपणम्	४८४	५७

विषयः	पत्रं	श्लोकः
ईश्वराश्रयस्य फलम्	४८४	५८
प्रकृतिः कर्म कारयत्येवेति निरूपणं श्लोकद्वयेन	४८५	५९
अन्तर्यामिणो निरूपणम्	४८६	६१
ईश्वरानुग्रहाच्छाश्वतपदप्राप्तिनिरूपणम्	४८६	६२
मुमुक्षुणा स्वाधिकारानुरूपाज्ञाने कर्मणि वा प्रवृत्तिः कार्येति निरूपणम्	४८७	६३
आरुरुक्षुणा कर्मैव कर्तव्यमिति निरूपणं श्लोकद्वयेन	४८७	६४
आरूढेन ज्ञाननिष्ठैव कर्तव्येति निरूपणम्	४८८	६५
गीताशास्त्रमनधिकारिणे नोपदेष्टव्यमिति निरूपणम्	४८९	६६
मुमुक्षवे ज्ञानशास्त्रोपदेष्टुः फलनिरूपणम्	४९४	६८
ज्ञानशास्त्रोपदेष्टा भगवत्प्रियो भवतीति निरूपणम्	४९४	६९
गीताध्ययनफलनिरूपणम्	४९६	७०
गीताश्रवणकर्तुः फलनिरूपणम्	४९६	७१
अर्जुनं प्रति मोहो नष्टो न वेति जिज्ञासार्थं भगवत्प्रश्नः ...	४९६	७२
मम मोहो नष्ट इत्यर्जुनवाक्यम्	४९७	७३
कृष्णार्जुनसंवादस्य श्रेष्ठत्वनिरूपणम्	४९८	७४
व्यासप्रसादात्संजयस्य गीताश्रवणमिति निरूपणम्	४९९	७५
गीताश्रवणजन्यसंजयहर्षस्य निरूपणम्	४९९	७६
विश्वरूपदर्शनजन्यसंजयहर्षस्य निरूपणम्	४९९	७७
यत्र कृष्णार्जुनौ तत्रैव विजयादिकमिति निरूपणम्	५००	७८

इति अष्टादशाध्यायस्यानुक्रमणिका ।

शंकरानन्दीश्रीमद्भगवद्गीतानुक्रमणिका समाप्ता ।

॥ अथ गीतामाहात्म्यप्रारंभः ॥

श्रीगणेशाय नमः ॥ ॥ श्रीराधारमणाय नमः ॥ ॥ धरोवाच ॥ भगवन्परमेशान भक्तिरव्यभिचारिणी ॥ प्रारब्धं भुज्यमानस्य कथं भवति हे प्रभो ॥ १ ॥ विष्णुरुवाच ॥ प्रारब्धं भुज्यमानो हि गीताभ्यासरतः सदा ॥ स मुक्तः स सुखी लोके कर्मणा नोपलिप्यते ॥ २ ॥ महापापादिपापानि गीताध्यानं करोति चेत् ॥ क्वचित्स्पर्शं न कुर्वन्ति नलिनीदलमम्बुवत् ॥ ३ ॥ गीतायाः पुस्तकं यत्र यत्र पाठः प्रवर्तते ॥ तत्र सर्वाणि तीर्थानि प्रयागादीनि तत्र वै ॥ ४ ॥ सर्वे देवाश्च ऋषयो योगिनः पन्नगाश्च ये ॥ गोपाला गोपिका वापि नारदोद्धवपार्षदैः ॥ ५ ॥ सहायो जायते शीघ्रं यत्र गीता प्रवर्तते ॥ यत्र गीताविचारश्च पठनं पाठनं श्रुतम् ॥ तत्राहं निश्चितं पृथ्वि निवसामि सदैव हि ॥ ६ ॥ गीताश्रयेऽहं तिष्ठामि गीता मे चोत्तमं गृहम् ॥ गीताज्ञानमुपाश्रित्य त्रींल्लोकान्पालयाम्यहम् ॥ ७ ॥ गीता मे परमा विद्या ब्रह्मरूपा न संशयः ॥ अर्धमात्राक्षरा नित्या स्वानिर्वाच्यपदात्मिका ॥ ८ ॥ चिदानन्देन कृष्णेन प्रोक्ता स्वमुखतोऽर्जुनम् ॥ वेदत्रयी परानन्दा तत्त्वार्थज्ञानसंयुता ॥ ९ ॥ योऽष्टादशजपो नित्यं नरो निश्चलमानसः ॥ ज्ञानसिद्धिं स लभते ततो याति परं पदम् ॥ १० ॥ पाठेऽसमर्थः संपूर्णे ततोऽर्धं पाठमाचरेत् ॥ तदा गोदानजं पुण्यं लभते नात्र संशयः ॥ ११ ॥ त्रिभागं पठमानस्तु गङ्गास्नानफलं लभेत् ॥ षडंशं जपमानस्तु सोमयागफलं लभेत् ॥ १२ ॥ एकाध्यायं तु यो नित्यं पठते भक्तिसंयुतः ॥ रुद्रलोकमवाप्नोति गणो भूत्वा वसेच्चिरम् ॥ १३ ॥ अध्यायं श्लोकपादं वा नित्यं यः पठते नरः ॥ स याति नरतां मन्वन्तरं यावद्वसुंधरे ॥ १४ ॥ गीतायाः श्लोकदशकं सप्त पञ्च चतुष्टयम् ॥ द्वौ त्रीनेकं तदर्धं वा श्लोकानां यः पठेन्नरः ॥ १५ ॥ चन्द्रलोकमवाप्नोति वर्षाणामयुतं ध्रुवम् ॥ गीतापाठसमायुक्तो मृतो मानुषतां व्रजेत् ॥ १६ ॥ गीताभ्यासं पुनः

कृत्वा लभते मुक्तिमुत्तमाम् ॥ गीतेत्युच्चारसंयुक्तो म्रियमाणो गतिं लभेत् ॥ १७ ॥ गीतार्थश्रवणासक्तो महापापयुतोऽपि वा ॥ वैकुण्ठं समवाप्नोति विष्णुना सह मोदते ॥१८॥ गीतार्थं ध्यायते नित्यं कृत्वा कर्माणि भूरिशः ॥ जीवन्मुक्तः स विज्ञेयो देहान्ते परमं पदम् ॥ १९॥ गीतामाश्रित्य बहवो भूभुजो जनकादयः ॥ निर्धूतकल्मषा लोके गीता याताः परं पदम् ॥ २० ॥ गीतायाः पठनं कृत्वा माहात्म्यं नैव यः पठेत् ॥ वृथा पाठो भवेत्तस्य श्रम एव ह्युदाहृतः ॥ २१ ॥ एतन्माहात्म्यसंयुक्तं गीताभ्यासं करोति यः ॥ स तत्फलमवाप्नोति दुर्लभां गतिमाप्नुयात् ॥ २२ ॥ सूत उवाच ॥ माहात्म्यमेतद्गीताया मया प्रोक्तं सनातनम् ॥ गीतान्ते च पठेद्यस्तु यदुक्तं तत्फलं लभेत् ॥ २३ ॥

इति श्रीवाराहपुराणे धराप्रोक्तं श्रीगीतामाहात्म्यं संपूर्णम् ॥

अथ श्रीमद्भगवद्गीतामङ्गलाचरणम् ।

श्रीगोपालकृष्णाय नमः ॥

ॐ अस्य श्रीमद्भगवद्गीतामालामन्त्रस्य भगवान्वेदव्यास ऋषिः ॥ अनुष्टुप् छन्दः ॥ श्रीकृष्णः परमात्मा देवता ॥ अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषस इति बीजम् ॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति शक्तिः ॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इति कीलकम् ॥ नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावक इत्यङ्गुष्ठाभ्यां नमः ॥ न चैनं क्लेदयन्त्यापो न शोषयति मारुत इति तर्जनीभ्यां नमः ॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव चेति मध्यमाभ्यां नमः ॥ नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन इत्यनामिकाभ्यां नमः ॥ पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रश इति कनिष्ठिकाभ्यां नमः ॥ नानाविधानि दिव्यानि नानावर्णाकृतीनि चेति करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥ अथ हृदयादिन्यासः ॥ नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावक इति हृदयाय नमः ॥ न चैनं क्लेदयन्त्यापो न शोषयति मारुत इति शिरसे स्वाहा ॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव चेति शिखायै वषट् ॥ नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन इति कवचाय हुम् ॥ पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रश इति नेत्रत्रयाय वौषट् ॥ नानाविधानि दिव्यानि नानावर्णाकृतीनि चेति अस्त्राय फट् ॥ श्रीकृष्णप्रीत्यर्थे पाठे विनियोगः ॥ ॥ ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम् ॥ अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीमम्ब त्वामनुसंदधामि भगवद्गीते भवद्वेषिणीम् ॥ १ ॥ नमोस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ॥ येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥ २ ॥ प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ॥ ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥ ३ ॥ सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ॥ पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत ॥ ४ ॥

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ॥ देवकीपरमानन्दं कृष्णं वन्दे
जगद्गुरुम् ॥ ५ ॥ भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोपला शल्य-
ग्राहवती कृपेण वहनी कर्णेन वेलाकुला ॥ अश्वत्थामविकर्णघोरमकरा
दुर्योधनावर्तिनी सोत्तीर्णा खलु पाण्डवै रणनदी कैवर्तकः केशवः
॥ ६ ॥ पाराशर्यवचःसरोजममलं गीतार्थगन्धोत्कटं नानाख्यानककेसरं
हरिकथासंबोधनाबोधितम् ॥ लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे ॥ ७ ॥ मूकं करोति
वाचालं पङ्गुं लङ्घयते गिरिम् । यत्कृपा तमहं वन्दे परमानन्दमाधवम्
॥ ८ ॥ यं ब्रह्मावरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैर्वेदैः साङ्गपद-
क्रमोपनिषदैर्गायन्ति यं सामगाः ॥ ध्यानावस्थिततद्गतेन मनसा पश्यन्ति
यं योगिनो यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ ९ ॥

इति श्रीमद्भगवद्गीतान्यासध्यानादि ॥

ॐ

शंकरानन्दीसमाख्यव्याख्यासमलंकृता

श्रीमद्भगवद्गीता ।

प्रथमोऽध्यायः ।

ॐनमः श्रीगोपालकृष्णाय ।

सत्यं ज्ञानमनन्तं यन्निष्कलं निष्क्रियं परम् ।
अद्वितीयं निर्विशेषं ब्रह्म तत्समुपास्महे ॥ १ ॥
अधस्तान्मानवं दिव्यमुपरिष्टाद्गजाकृति ।
परस्तात्तमसस्तेजः पुरस्तादस्तु नः सदा ॥ २ ॥
पञ्चाशद्वर्णरूपेण यया व्याप्तमिदं जगत् ।
शब्दब्रह्ममयीं वाणीं भजे तां परदेवताम् ॥ ३ ॥
असंस्पृश्यैव प्रकृतिं विकृतिं च गुणैः सह ।
यः सदा भाति मेऽन्तस्थस्तं सेवे कृष्णमीश्वरम् ॥ ४ ॥
सनन्दनं श्रीसनकं सनातनं सनत्कुमारं च सनत्सुजातम् ।
श्रीवामदेवं च शुकं महान्तं नमामि भक्त्या निजबोधसिद्ध्यै ॥ ५ ॥
भक्त्या श्रीशंकराचार्यं तच्छास्त्रं सद्गुरुं मुहुः ।
नमामि शिरसा नित्यं सम्यग्ज्ञानोपपत्तये ॥ ६ ॥
भक्त्या प्रणम्य स्वगुरुमानन्दात्मसरस्वतीम् ।
क्रियते श्रीमद्भगवद्गीतातात्पर्यबोधिनी ॥ ७ ॥

इह खलु भगवानमिततपोबलतेजःशक्तिसंपन्नः सर्वविद्यानिधिः सर्वज्ञचूडामणिः साक्षादपरः श्रीमान्नारायणः श्रीकृष्णद्वैपायनः परमकारुणिकाग्रगण्यः स्वयमतिकृपया भविष्यद्विद्वज्जनानामनतिप्रज्ञामाज्ञाय वर्णाश्रमिणां सकलपुरुषार्थसिद्धये तत्सिद्धिसाधनप्रकाशकमनन्तवेदराशिमृगादिभेदेन चतुर्धा विभज्य, एकैकां शाखां पैलवैशंपायनादिशिष्यप्रशिष्योपशिष्यपरम्पराद्वारा संवर्धयामास । तत्रापि वेदार्थस्य परमसूक्ष्मत्वाद-

तिगूढत्वाद्दुर्विज्ञेयत्वाच्च तदर्थाधिगमाशक्तानां सत्पुरुषाणां धर्मादिसर्वपुरुषार्थसिद्धये 'भारतं पञ्चमो वेदः' इति पञ्चमवेदत्वेन प्रसिद्धां धर्मादिसर्वपुरुषार्थतत्साधनप्रकाशनपरां भारतीं शतसाहस्रीं संहितां प्रवर्तयांचकार। तस्या एतस्या एव संहिताया मध्ये केवलं मुमुक्षूणामनाद्यविद्यातत्कार्यनिवृत्तिद्वारा विदेहकैवल्यफलसिद्धये ब्रह्मात्मैकत्वप्रतिपादनपरां कृष्णार्जुनसंवादरूपामद्वैतामृतवर्षिणीं गीतोपनिषन्नाम्नीं ब्रह्मविद्यां श्लोकानां सप्तशत्या अन्तरे च नक्षत्रमालयाश्चन्द्रमण्डलमिव स्थापयामास। तस्या एतस्यास्त्वध्ययने तदर्थग्रहणे तच्छ्रुतिजन्यज्ञाने तत्फलावाप्तौ चाधिकारी सदसद्विवेक्यधर्मभीरुश्चैहिकामुष्मिकसुखविमुखः शमादिषट्कसंपन्नो मुमुक्षुरेवेति निर्धारयितुं ब्रह्मविद्याश्रोतर्यर्जुने सदसद्विवेचनमधर्मभीरुत्वमैहिकामुष्मिकसुखवैमुख्यं शमदमादिसंपत्तिं च प्रदर्शयितुं प्रथमाध्याय आरभ्यते—तत्रादौ पाण्डवानां धार्तराष्ट्राणां च युद्धाय सन्नद्धानां प्रवृत्तिं श्रोतुकामो धृतराष्ट्र उवाच—

धृतराष्ट्र उवाच।

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय ॥ १ ॥

धर्मक्षेत्र इति। धर्मप्रधानत्वाद्धर्मप्रदत्वाद्वा धर्मक्षयात्त्रायत इति वा धर्मक्षेत्रं तस्मिन्धर्मक्षेत्रे वासमात्रेण धर्मतत्फलप्रदे कुरुक्षेत्रे। युयुत्सवो युद्धं चिकीर्षवोऽतएव समवेताः समवायं प्राप्ताः सन्नद्धाः। मामका दुर्योधनादयः पाण्डवाश्च। किमकुर्वत किं कार्यं कृतवन्तः संजय, तद्ब्रूहीत्यर्थः। नन्वत्र युयुत्सव इति विशेषणबलेन समवेतानां तेषां कर्तव्यं कार्यं युद्धमेवेति युद्धस्यैव कर्तव्यत्वे प्रतीयमाने कथं युद्धं प्रवृत्तमिति प्रश्नमुत्सृज्य किमकुर्वत संजयेति धृतराष्ट्रप्रश्नोऽनुपपन्न इति न शङ्कनीयम्। धर्मक्षेत्र इत्युक्तत्वात्तत्क्षेत्रमहिम्ना स्वयमेव धर्मपरो भूत्वा दुर्योधनस्तत्पित्र्यं धर्म्यमर्धराज्यं तेषां दत्तवान्वा, उत तस्यैव महिम्ना प्रवृद्धधर्मा सन् धर्मपुत्रः स्वजनवधो नरकायेति नरकभयाद्युद्धादुपरतो वा, सर्वे युद्धमेव कृतवन्तो वा, यत्तत्र प्रवृत्तं तद्वदेत्युपपन्नतरः प्रश्न इत्यर्थः ॥ १ ॥

पक्षस्तृतीय एव सिद्ध इति संजय उवाच—

संजय उवाच।

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २ ॥

दृष्ट्वा तु पाण्डवानीकमिति। राजा दुर्योधनस्तदा युद्धसन्नाहकाले

व्यूढं व्यूहाकारतामापन्नं पाण्डवानामनीकं बलं दृष्ट्वा धनुर्विद्याचार्यं द्रोणमुपसंगम्य पाण्डवबलोत्कर्षवर्णनेन स्वबलस्य शौर्यबलपौरुषोत्साहोद्रेकं संपादयितुमिच्छयेदं वचनमब्रवीत् ॥ २ ॥

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम्।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥

उवाच मधुसूदन इत्यत्र श्रीभगवानुवाचेति यथा तथात्रापि दुर्योधन उवाचेति निवेशनीयम्। परं तथा पाठो न दृश्यते तत्प्रामादिकम्। **पश्यैतामिति**। हे आचार्य, धीमता सूक्ष्मबुद्धिना तव शिष्येणेति गूढाभिसंधीदं वचनम्। द्रुपदपुत्रेण धृष्टद्युम्नेन व्यूढां शकटपद्माद्याकारेण संभाविताम् अतएव महतीं द्रष्टॄणां स्तोत्रार्हां पाण्डुपुत्राणां चमूं सेनामेतामदूरवर्तिनीं पश्य। योद्धृतेजोबलपौरुषसन्नाहसमुज्जृम्भितां विलोकयेत्यर्थः ॥ ३ ॥

योद्धृतेजोबलपौरुषसन्नाहमेव प्रकटयति त्रिभिः—

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥

अत्रेति। अत्र पाण्डवसेनायां ये योद्धारस्ते सर्वे शूराः विक्रान्तानपि शृणन्तीति शूराः। महेष्वासाः इषवोऽस्यन्ते क्षिप्यन्ते एभिरितीष्वासाः कोदण्डाः ते महान्तो येषां ते महेष्वासाः। युधि भीमार्जुनसमाः बलेन पराक्रमेण च भीमार्जुनाभ्यां समाः। सर्वे तुल्या इत्यर्थः। के ते इत्याकाङ्क्षायां तानेव नाम्ना निर्दिशति—**युयुधान** इत्यादिना। अतिशयेन युध्यतीति युयुधानः सात्यकिः। शत्रून् विशेषेण रटयतीति विराटः। द्रुर्वृक्षः पदं ध्वजे चिह्नं यस्य स द्रुपदो महारथः। 'एको दशसहस्राणि योधयेद्यस्तु धन्विनाम्। शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः॥' इति वचनात् द्रुपदो महारथः ॥ ४ ॥

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुंगवः ॥ ५ ॥

धृष्टकेतुरिति। धृष्टः परभयंकरः केतुरस्येति धृष्टकेतू राजविशेषः। चिकितानस्यापत्यं चेकितानो वीर्यवान् राजविशेषः। युद्धे पुरून्बहूञ्जयतीति पुरुजित् कुन्तिभोजः कुन्तीपिता। शिबेर्गोत्रापत्यं शैब्यो राजविशेषः स एव नरपुंगवः ॥ ५ ॥

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान्।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥

युधामन्युरिति । युधायां युद्धे मन्युः कोपवेगो यस्य स युधामन्युः उत्तममोजो बलं यस्य स उत्तमौजाः पाञ्चालः । वीर्यवान् सौभद्रः सुभद्रापुत्रः तेजोबलविक्रान्तानपि शत्रून्विविधमीरयति पलाययतीति वीरस्तस्य कर्म वीर्यं तदस्यास्तीति वीर्यवान् । द्रौपद्याः पुत्रा द्रौपदेयाः प्रतिविन्ध्यादयश्चोक्ताः सर्वे महारथाः । 'आत्मानं सारथिं चाश्वान्रक्षन्न-क्षतमायुधैः । यो युध्यत्ययुतैर्वीरैः स महारथ उच्यते ॥' इत्युक्तलक्षण-लक्षितत्वात्सर्वेषां महारथत्वं सिद्धम् ॥ ६ ॥

एवं पाण्डवसेनानेतॄन्निर्दिश्याथ स्वसेनानेतॄन्निर्देष्टुमिदमाह—

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥ ७ ॥

अस्माकं त्विति । अस्माकं ये तु विशिष्टा विद्याबलपौरुषपराक्रम-कुलशीलादिभिः प्रसिद्धाः सैन्यस्य नायका नेतारस्तान् ते संज्ञार्थं मम परमाप्तत्वेन परिज्ञानार्थं ब्रवीमि । त्वं निबोध बुध्यस्व । द्विजोत्तम ॥७॥

के ते इत्यत आह द्वाभ्याम्—

भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥

भवानिति । भवान्, भीष्मः, कर्णः, कृपः कृपाचार्यः, समितिं वीराणामपि युद्धक्रियां जयतीति समितिंजयो युद्धे दुर्जयोऽश्वत्थामा, विकर्णश्च, सौमदत्तिः सोमदत्तस्यापत्यं भूरिश्रवाः ॥ ८ ॥

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥

अन्य इति । अन्येऽवशिष्टा बाह्लीकभगदत्तादयश्च बहवः शूराः शौर्यशालिनः नानाशस्त्रप्रहरणाः नानाविधानि शस्त्राणि शूलचक्रगदा-खड्गपरिघादीनि प्रहरणसाधनानि येषां ते नानाशस्त्रप्रहरणास्तत एव युद्धविशारदाः सकलयुद्धेषु निपुणाश्चेति । सर्वे मदर्थे मद्विजयसिद्ध्यै त्यक्तजीविताः प्राणत्यागेनापि जयं संपादयिष्याम इति निश्चयेन तिष्ठ-न्तीत्यर्थः ॥ ९ ॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥

किंच **अपर्याप्तमिति** । अपर्याप्तं युद्धाय यदनलमस्माकं निरुक्तेभ्यो

भिन्नं तद्भीष्माभिरक्षितं भीष्मेणाभितः शरीरवाक्शस्त्रास्त्रबलेन रक्षितं सत् मम जयसंपादनाय पर्याप्तमेव भवति महापुरुषाश्रयबलात् । एतेषां पाण्डवानां तु इदं पुरोदृश्यमानं बलं पर्याप्तमपि भीमेनाभिरक्षितं सदपर्याप्तमेव भवति हीनपुरुषाश्रयादिति भावः । इतोऽन्यथा व्याख्याने संधिः प्रसज्यते तददर्शनादेवमेव युक्तमिति भाति ॥ १० ॥

तथैवास्तु नाम, किमिदानीं कर्तव्यमित्यत आह—

अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ ११ ॥

अयनेष्विति । हि यस्माद्भीष्माधीनो मम जयस्तस्माद्भवन्तो योद्धार एव निरुक्ताः सर्वे अयनेषु चक्रादिव्यूहमार्गेषु यथाभागं विभक्तं स्वं स्वं स्थानं यथा तथा स्थिताः सन्तो भीष्ममेवाभिरक्षन्तु सेनामुखे युध्यन्तं भीष्ममभितो रक्षन्तु । भीष्मस्य परेभ्य उपद्रवो यथा न स्यात्तथा परिवेष्ट्य रक्षणं कुर्वन्तः सन्त एव यूयं युद्धं कुरुतेत्यर्थः ॥ ११ ॥

एवमुक्तवति राज्ञि किमभवदिति धृतराष्ट्रप्रश्ने संजय आह—

तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ १२ ॥

तस्येति । प्रतापवान्कुरुवृद्धः पितामहो भीष्मः तथैव जयं संपादयिष्यामीति सूचयन्निव तस्य दुर्योधनस्य हर्षं संपादयन् सिंहनादं विनद्य कृत्वा स्वमुच्चैरुदात्तं शङ्खं दध्मौ पूरयामास ॥ १२ ॥

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १३ ॥

तत इति । ततः भीष्मशङ्खनिनादेनोत्पन्नरणोत्साहैर्द्रोणादिसर्वसैनिकैः स्वस्वशङ्खाश्च सेनाचरैर्भेर्यश्च पणवानकगोमुखाः पणवाद्या वाद्यविशेषाश्च सहसातित्वरयैवाभ्यहन्यन्त । शङ्खभेर्यादिहननसमुत्पन्नो यः शब्दो ध्वनिः स तुमुलः संकीर्णः सन्महानभूदित्यर्थः ॥ १३ ॥

एवं दुर्योधनसेनाप्रवृत्तिमुक्त्वा पाण्डवसेनाप्रवृत्तिमाह—

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥

तत इति । ततो भीष्मादिशङ्खोद्घोषानन्तरमेव श्वेतैर्हयैर्युक्ते महति पूज्ये स्यन्दने रथे स्थितौ माधवः पाण्डवोऽर्जुनश्च दिवि भवौ दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥

उक्तमेव विस्पष्टयति—

पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ १५ ॥

पाञ्चजन्यमिति । पञ्चजनादुत्पन्नं पाञ्चजन्यं हृषीकेशो दध्मौ । देवैर्दत्तं देवदत्तं शङ्खं धनंजयो दध्मौ । लोकभयंकराणि कर्माण्यस्येति भीमकर्मा वृकवदुदरं यस्य स वृकोदरो भीमः पौण्ड्रं नाम महाशङ्खं दध्मौ ॥१५॥

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥

अनन्तविजयमिति । राजा युधि स्थिरत्वाद्युधिष्ठिरो धर्मपुत्रः अनन्तविजयं अनन्तो नाशरहितो विजयो यस्मात्तमनन्तविजयं नाम शङ्खं दध्मौ । सुघोषमणिपुष्पकनामानौ शङ्खौ नकुलः सहदेवश्च दध्मतुरिति शेषः ॥ १६ ॥

काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥

किंच **काश्य इति** । परमो महानिष्वासो यस्य स काश्यः काशीपतिश्च । 'शिखण्डं श्मश्रुशून्यता' इत्यभिधानात्तदस्यास्तीति शिखण्डी पाञ्चालः । महारथो धृष्टद्युम्नः धृष्टं परधर्षकं द्युम्नं बलं यस्य स धृष्टद्युम्नः सेनापतिः विराटश्चापराजितो रिपुभिरपराजितः सत्यकस्यापत्यं पुमान्सात्यकिः १७

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक् ॥ १८ ॥

द्रुपद इति । द्रुपदो द्रौपदेयाश्च महाबाहुराजानुबाहुः सौभद्रश्च निरुक्ता योधाः सर्वशः पृथक्पृथक् शङ्खान्दध्मुः प्रत्येकं पूरयामासुरित्यर्थः १८

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९ ॥

किंच **स इति** । पाञ्चजन्यदेवदत्तपौण्ड्रादिमहाशङ्खेभ्यः समुत्पन्नो यो घोषो महाध्वनिः स सर्वशङ्खनिनादैस्तुमुलः संकीर्णो भूत्वा नभ आकाशं चकाराद्दिशः सर्वाः पृथिवीं चकारात्पर्वतबिलानि व्यनुनादयन् स्वस्वनादानुरूपं प्रतिध्वनयन् तद्ध्वनिना संभूय स्वयं धार्तराष्ट्राणाम् । अत्र संबन्धार्थोऽण्प्रत्ययः । धृतराष्ट्रस्य पुत्राः पौत्राः सैनिकाश्च सर्वे धार्तराष्ट्राः तेषां हृदयानि हृदयस्थकालखण्डान्व्यदारयद्विदलितवान् । तेन नादेन भग्नहृदया जाता इत्यर्थः ॥ १९ ॥

'तद्यथेह कर्मचितो लोकः क्षीयते', 'सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः', 'अष्टादशोक्तमवरं येषु कर्म', 'एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति', 'श्वोभावा मर्त्यस्य यदन्तकैतत्', 'पराचः कामाननुयन्ति बालाः' इति, 'कर्मणा पितृलोको विद्यया देवलोकः' इति, 'अन्धं तमः प्रविशन्ति येऽविद्यामुपासते । ततो भूय इव ते तमो य उ विद्याया ँ रताः' इत्यादिश्रुतिभिः, 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च', 'मोघाशा मोघकर्माणः', 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इत्यादिस्मृतिभिश्च जन्यत्वदृश्यत्वादियुक्तिभिश्चापि पण्डितस्य मोक्षैककामिनः स्वेन यष्टव्यदेवानां तदुद्देशेन क्रियमाणकर्मणां तत्फलानां च विचारः सम्यक्कर्तव्य इति सूचयितुमर्जुनस्य परमार्थिनः कर्तव्यं योद्धव्यं योद्धॄणां युद्धक्रियायास्तत्फलस्य च विचारं तदुदितवैराग्यं च प्रतिपादयितुमिदं प्रकरणमारभ्यते—

अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः ।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥ २० ॥

अथेति । अथोभयसेनयोर्युद्धसन्नाहसमनन्तरं पाण्डोरपत्यं पाण्डवः कपिध्वजोऽर्जुनः व्यवस्थितान् युद्धाय समुपस्थितान्धार्तराष्ट्रान्दृष्ट्वा स्वयमपि धनुरुद्यम्य शस्त्राणां संपाते प्रयोगकाले प्राप्ते ॥ २० ॥

हृषीकेशं तदा वाक्यमिदमाह महीपते ।

अर्जुन उवाच ।

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥
यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥ २२ ॥

हृषीकेशमिति । तदा हृषीकेशमिदं वक्ष्यमाणं वाक्यमाह—**सेनयोरिति ।** योद्धुकामान्युयुत्सून् । अतएवावस्थितान्सेनां सन्नह्य युद्धायोद्युक्तानेतान्योधान्सर्वान् यावत् यावति देशे स्थित्वाऽहं निरीक्षे सम्यक्पश्यामि हे अच्युत, तावन्तं देशं मे रथं नीत्वा सेनयोरुभयोर्मध्ये स्थापय । किमिह सेनां द्रष्टुमागतोऽसि वा त्वमित्यत आह—**कैरिति ।** अस्मिन् रणसमुद्यमे युद्धव्यापारे कैः सह मया योद्धव्यं युद्धं कर्तव्यं भवतीति द्वयोरर्थः ॥ २१ ॥ २२ ॥

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥

योत्स्यमानानिति । दुर्बुद्धेरधर्मनिष्ठस्य धार्तराष्ट्रस्य धृतराष्ट्रापत्यस्य दुर्योधनस्य युद्धे प्रियचिकीर्षवः युद्धेनेष्टमर्थं संपादयितुकामाः सन्तोऽत्र कुरुक्षेत्रे ये वा एते समागतास्तान्योत्स्यमानान्सर्वानहमवेक्ष्ये । नाम रूपं कुलं च संबन्धं यथा ज्ञास्ये तथा रथं स्थापयेत्यर्थः ॥ २३ ॥

संजय उवाच ।

एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥

एवमिति । गुडाकेशः 'अङ्गुष्ठतर्जनीयोगो गुडानाम्नी तु मुद्रिका' इति वचनादङ्गुष्ठतर्जनीयोगो गुडेत्युच्यते । तत्परिमाणा अग्रकेशा यस्य स गुडाकेशः । यद्वा 'गुडो गोलेक्षुपाकयोः' इत्यभिधानाद्गुडो गोलः ब्रह्माण्डगोलस्तं तप्तायःपिण्डमग्निरिवान्तर्बहिश्चाकति व्याप्नोतीति गुडाकः शिवः । 'विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवम्' इति श्रुतेः । यद्वा गुडवन्मधुरः सन् भक्तानकति प्राप्नोतीति गुडाकः शिवः 'स्वादुष्किलायं मधुमाँउतायम्' इति श्रुतेः । स शिव ईशो यस्य स गुडाकेशोऽर्जुनस्तेन, हृषीकेशः हृषीकाणामिन्द्रियाणामीशो हृषीकेशः श्रीकृष्ण एवमुक्तः सन् रथोत्तमं रथिकसारथिभ्यामश्वविशेषैर्ध्वजप्रभावेण चोत्कृष्टत्वेन तद्रथस्योत्तमत्वम् । तं रथोत्तमं सेनयोरुभयोर्मध्ये स्थापयित्वा ॥ २४ ॥

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥

भीष्मेति । भीष्मद्रोणप्रमुखतः षष्ठीबहुवचनान्तस्तसिः । भीष्मद्रोणौ प्रमुखावादी येषां ते भीष्मद्रोणप्रमुखाः महीक्षितः । छत्रिन्यायेनात्र भीष्मस्यैव महीक्षित्त्वम् । तेषां भीष्मद्रोणप्रमुखानां महीक्षितां भूभुजां सर्वेषां शृण्वतामिति शेषः । हे पार्थ, समवेतान्समवायं प्राप्तानेतान्कुरून्पश्येत्युवाच ॥ २५ ॥

मुमुक्षोर्विदुषो यष्टव्यदेवतापरिशीलनमेव कर्तव्यमिति सूचयितुमर्जुनस्य सैनिकपरिशीलनप्रकारमाह द्वाभ्याम्—

तत्रापश्यत्स्थितान्पार्थः पितृनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातृन्पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ।
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ॥ २७ ॥

तत्रेति । अथ भगवदुक्तेरनन्तरं पार्थः पृथा कुन्ती तदपत्यं पार्थो-

ऽर्जुनो यत्र रथः स्थापितस्तत्र स्थित्वा। सेनयोरुभयोरपि स्थितान् पितॄन् पितृव्यान् सखीन् सवयस्काः सखायस्तान् श्वशुरान् सुहृदो मित्राणि चैवं सर्वानपि स्वीयानेवापश्यत् नतु तदतिरिक्तानित्यर्थः। एवं तान्दृष्टवतोऽर्जुनस्य तद्दर्शनकार्यमाह—**तानिति**। स दर्शनकर्मणि प्रवृत्तः कौन्तेयः कुन्त्या अपत्यं कौन्तेयोऽर्जुनः बन्धून्बन्धुत्वधर्मविशिष्टानेव तानवस्थितान् युद्धसन्नद्धान्सर्वान्समीक्ष्य। ग्रीवामुन्नम्य सम्यग्दृष्ट्वेति द्वयोरर्थः॥ २६॥ २७॥

कृपया परयाविष्टो विषीदन्निदमब्रवीत्।
दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्॥ २८॥

कृपयेति। तेषु परया कृपयाविष्टो भूत्वा विषीदन्निदं वक्ष्यमाणलक्षणं वचनमब्रवीत्। 'तस्माच्च देवा बहुधा संप्रसूताः' इति, 'मुखादिन्द्रश्चाग्निश्च' इत्यादिश्रुतिभ्यो देवतानां जनिश्रवणाज्जनिमतां तेषामनित्यत्वमागन्तुकैश्वर्यत्वं संसारित्वं फलदानेन बन्धकत्वं च विज्ञाय मुमुक्षुणा नित्यसुखार्थिना तद्यजने किमनेन दुःखान्तेन कर्मणेति परितापः कर्तव्य इति सूचयितुमर्जुनस्य स्वकर्तृकबन्धुजनवधनिमित्तकपरितापप्रकारमाहाऽऽध्यायसमाप्तेः—**दृष्ट्वेति**। युयुत्सुं सेनां सन्नह्य युयुत्सया समुपस्थितमिमं पुरःस्थं स्वजनं पितृपुत्रादिकं दृष्ट्वा मदीया इति ज्ञात्वा॥ २८॥

सीदन्ति मम गात्राणि मुखं च परिशुष्यति।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते॥ २९॥

सीदन्तीति। हन्तुं मम गात्राणि करचरणादयः सीदन्ति शिथिलायन्ते। मुखं च परिशुष्यति शुष्कीभवति। शरीरे वेपथुः कम्पो रोमहर्षो भयसंतापाभ्यां रोमोद्गमश्च जायते॥ २९॥

गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः॥ ३०॥

गाण्डीवमिति। हस्ताद्गाण्डीवं धनुः स्रंसते गलति। त्वक् चर्म च परितापेन परिदह्यते। मे मनोऽपि च भ्रमती परवशं गच्छति। अतएव रथे स्थातुं च न शक्नोमि॥ ३०॥

निमित्तानि च पश्यामि विपरीतानि केशव।
न च श्रेयोऽनु पश्यामि हत्वा स्वजनमाहवे॥ ३१॥

निमित्तानीति। युद्धप्रवृत्तेरनर्थत्वसूचकानि विपरीतान्येव निमि-

त्तानि च पश्यामि नत्वनुकूलानि । हे केशव, इदानीमेवमस्तु, तथापि पश्चात्तु श्रेयो भविष्यतीत्यत आह—**नचेति** । इमं पितृपितामहादिकं स्वजनमाहवे युद्धे हत्वा अनु पश्चाद्युद्धानन्तरभावि न किमपि श्रेयश्च पश्यामि । एतेषां वधेन न कमपि पुरुषार्थमेष्यन्तं विजान इत्यर्थः ॥३१॥

अस्त्वेवैतेषां वधेन जयादिलक्षणं श्रेय इत्यत आह—

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥ ३२ ॥

न काङ्क्ष इति । स्वजनहिंसया प्राप्तो यो जयस्तमहं न काङ्क्षे । तेन प्राप्तं राज्यं च तन्मूलकानि विषयसुखान्यपि नाहं काङ्क्ष इत्यर्थः । एतेनाधर्मप्राप्तमैहिकसुखमस्माकं मास्त्वित्युक्तं भवति । एतैर्यथा राज्या-द्यपेक्षया युध्यते तथा भवद्भिरपि युध्यतामित्यत आह—**किमिति** । धर्माधर्मविवेकवतां नोऽस्माकं स्वजनहिंसया प्राप्तेन राज्येन किं फलम् । तन्मूलकैर्भोगैर्वा किम् । तदर्थकेन जीवितेन वा किम् । अधर्ममूलकं दोषावहमेतत्सर्वं सतां नाशास्यमित्यर्थः ॥ ३२ ॥

'अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्' इतिवचनात्पित्रादिभर-णार्थं कृतोऽप्यधर्मो न दोषायेत्यत आह—

येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥

येषामिति । अकार्यशतेनापि पोषणीयानां येषां पितृपुत्रादीनामर्थे निमित्ते राज्यं भोगाः सुखानि च काङ्क्षितं नोऽस्माभिः काङ्क्षितानि भव-न्ति । नः इति तृतीयार्थे षष्ठी । त एव पित्रादय इमे प्राणान् धनानि च त्यक्त्वा युद्धे युद्धनिमित्तमवस्थिताः । जीविताशां त्यक्त्वा युद्धे मर्तुमागत्य तिष्ठन्तीत्यर्थः ॥ ३३ ॥

के ते इत्याकाङ्क्षायामाह—

आचार्याः पितरः पुत्रास्तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः श्यालाः संबन्धिनस्तथा ॥ ३४ ॥

आचार्या इति । अत्रास्माकं केचिदाचार्याः केचित्पितरः केचि-त्पुत्रास्तथैव केचित्पितामहाः, चकारात्केचित् मातामहाः केचिन्मातुलाः केचिच्छ्वशुराः केचित्पौत्राः केचित् श्यालाः केचित् संबन्धिनः । एवं सर्वे स्वजना एव नान्य इत्यर्थः ॥ ३४ ॥

स्वजना एव सर्वे ते भवन्तु । त्वमिदानीं किं कर्तुमिच्छसीत्यत आह—

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५ ॥

एतानिति । खड्गैर्मां घ्नतोऽपि हिंसतोऽप्येतानाचार्यादीन्हन्तुं नेच्छामि । त्रैलोक्यराज्यस्य हेतोरपि निमित्ताय वा । एतेषां हननेनेन्द्रत्वं वाप्यागच्छतु तथाप्येतान् हन्तुं नेच्छामि, किं नु महीकृते किं वक्तव्यं राज्यार्थमेतान्हन्तुं नेच्छामीति । अनेन स्वर्गसुखमपि मास्त्वित्युक्तं भवति ॥३५॥

एतैर्युष्माकं लाक्षागृहदाहादिभिर्बहपकृतम्, अपकारिणां हननं संतोषाय धर्माय च भवतीत्यत आह—

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६ ॥

निहत्येति । धार्तराष्ट्रान् दुर्योधनादीनस्मद्भ्रातॄन् सबान्धवान् हत्वा तद्धननेनास्माकं का प्रीतिः स्यात् । अपराधिनः पुत्रस्य शिशोर्हननेन पितुः प्रीतिश्चेदस्माकमेतेषां वधेन प्रीतिः संभवेत् । यथा पुत्रहननेन पितुः शिशुहत्या तथास्माकमपि भ्रातृहत्या स्यात् । ननु 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहर्ता च षडेते ह्याततायिनः ॥ आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥' इति वचनादुक्तसर्वदोषविशिष्टानामेतेषां वधे न कश्चिद्दोष इत्यत आह— **पापमेवेति** । आततायाः उक्ताः षड्विधा दोषा येषां सन्ति ते आततायिनस्तानुक्तदोषवतोऽप्येतान् हत्वा तद्धननेन कर्मणास्मान्पापमेवाश्रयेत् । अत्रायोगव्यवच्छेद एवकारार्थः । यद्यप्यस्त्याततायिवधो न दोषाय तथापि 'स एव पापिष्ठतमो यः कुर्यात्कुलनाशनम्' इति । 'अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः' इति न्यायेनार्थशास्त्राद्बलवत्त्वाद्धर्मशास्त्रस्य । अत आततायित्वदोषादपि कुलनाशकत्वदोषोऽनर्हः सोऽयमस्माकं स्यादिति भावः ॥ ३६ ॥

तर्हि त्वया किं निश्चितमित्यत आह—

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७ ॥

तस्मादिति । यस्माद्धार्तराष्ट्राणां वधेन कुलनाशनदोष एव प्रसज्यते तस्मात्स्वबान्धवान् धार्तराष्ट्रान् हन्तुं वयं नार्हा न योग्याः । नेच्छाम इत्यर्थः । स्वसुखार्थमेतेषां वधः कर्तव्य एवेत्यत आह—**स्वजनमिति** ।

स्वजनसुखार्थं खलु पुंसः प्रवृत्तिः, वयं तु स्वजनं हत्वा कथं नु सुखिनः स्याम ॥ ३७ ॥

उभयसाधारणः खल्वयं विचारः कथं त्वयैव क्रियत इत्यत आह—

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३८ ॥

यद्यपीति । एते दुर्योधनादयो लोभोपहतचेतसः स्थितद्रव्यत्यागासहिष्णुत्वं लोभस्तेन हतं ग्रस्तं चेतो येषां ते लोभोपहतचेतसः सन्तः कुलक्षयकरणेन प्राप्तं कुलक्षयकृतं दोषं, मित्रद्रोहे विश्वासघात तज्जन्यं पातकं च यद्यपि न पश्यन्ति न विचारयन्ति ॥ ३८ ॥

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥

कथमिति । तथापि धर्मस्वरूपज्ञैः कुलक्षयकृतं दोषं प्रपश्यद्भिर्विजानद्भिः पण्डितैरस्माभिरस्मात्कुलक्षयकृतात्पापान्निवर्तितुं कथं न ज्ञेयमिति काकुः । कथं न विचारितव्यम् । विचारितव्यमेव । 'किमकार्यं दुरात्मनाम्' इति न्यायेनैते राज्यलोभेन कुलक्षयं मित्रद्रोहं च कुर्वन्ति यथा तथा वयं कर्तुं न शक्नुम इत्यर्थः ॥ ३९ ॥

कुलक्षये कृते को वानर्थ इत्युक्ते नैक एवानर्थः किंतु कुलतद्धर्मक्षयाद्यनर्थपरम्परैवापतति । तदागमप्रकारमेवाह—

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥ ४० ॥

कुलक्षय इत्यादि पञ्चभिः । अत्र कुलपदेन कुलसंबन्धिनः पुरुषा लक्ष्यन्ते । कुलक्षये कुलधर्मप्रवर्तकपुरुषक्षये सति सनातना वंशपारम्पर्येणागताः कुलधर्माः कुलानुरूपेण जात्यनुरूपेण च कर्तव्या आचारविशेषाः प्रणश्यन्ति प्रवर्तकाभावात्प्रकर्षेण नश्यन्ति । धर्मे कुलाचारे जात्याचारे च नष्टे स्वरूपेणादर्शनं गते सति कृत्स्नं कुलमधर्मस्त्वनाचारोऽप्यभिभवति । शिक्षकाभावादभितः कुले त्वनाचार एवाभिवर्धते ॥ ४० ॥

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१ ॥

अधर्माभिभवादिति । अधर्माभिभवादनाचारवृद्धेः कुलस्त्रियः प्रकर्षेण दुष्यन्ति कुवृत्त्या दूषिता भवन्ति । स्त्रीषु सतीषु दुष्टासु वर्ण-

संकरः आनुलोम्येन प्रातिलोम्येन च ब्राह्मणादिवर्णानां संकीर्णता जायते । व्यवस्थां त्यक्त्वा वर्णाः संकीर्णा भवन्तीत्यर्थः ॥ ४१ ॥

नैतावानेवानर्थः किंतु विशेषोऽस्तीत्याह—

संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ ४२ ॥

संकर इति । कुलधर्मव्यवस्थापकपुरुषनाशकाः कुलघ्नास्तेषां च कुलस्य च संकरो नरकायैव भवति । कुलहन्तारः सांकर्यसंपादकाः संकीर्णाः सांकर्यसमुत्पन्नाश्च सर्वे नरके पतन्तीत्यर्थः । आस्तामेषोऽनर्थ इतोऽप्यधिकतरोऽस्तीत्याह—**पतन्तीति** । हिश्चार्थे प्रसिद्ध्यर्थो वा । एषां कुलघ्नानां कुलस्य च संकीर्णकानां च ये पितरः स्वर्गस्थास्तेऽपि लुप्तपिण्डोदकक्रियाः सन्तस्तेषामेव दोषेण स्वयं च नरके पतन्ति । 'संकीर्णकानां पितरश्च्यवन्ते नात्र संशयः' इति प्रसिद्धेः ॥ ४२ ॥

इतोऽपि कुलघ्नानामेवानर्थं प्रतिपादयति—

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥

दोषैरिति । कृत्याकृत्यविचारमुत्सृज्य कामक्रोधलोभादिभिः कुलधर्मप्रवर्तकान् ये तु घ्नन्ति ते कुलघ्नास्तेषामेव वर्णसंकरकारकैरेतैरुक्तैरेव दोषैः शाश्वताः श्रुतिमूलकाः स्वर्गापवर्गप्रदाः कुलधर्मा जातिधर्माः चकारादाश्रमधर्माश्च उत्साद्यन्ते उत्सादिता भवन्ति यतः ॥ ४३ ॥

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरकेऽनियतं वासो भवतीत्यनुशुश्रुम ॥ ४४ ॥

उत्सन्नेति । तत उत्सन्नाः विध्वंसिताः कुलजात्यादिधर्मा यैस्ते उत्सन्नकुलधर्मास्तेषामुत्सन्नकुलधर्माणां मनुष्याणां नरके रौरवादावनियतं युगमन्वन्तराद्यवधिराहित्यं यथा तथा वासः स्थितिर्भवतीत्यनुशुश्रुम । महर्षीणां वचनेभ्यः श्रुतवन्तो वयमित्यर्थः ॥ ४४ ॥

'पश्यति पुत्रं पश्यति पौत्रं', 'अपाम सोमममृता अभूम', 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति', 'दक्षिणावन्तो अमृतं भजन्ते' इत्यादिप्ररोचनश्रुतिभिर्विषयसुखाशावशो भूत्वा श्रौतादिकर्मणि प्रवृत्तो यस्तस्य जननमरणप्रवाहसंपात एव निरन्तरो भवतीति मुमुक्षुणा संतप्तव्यमिति सूचयितुमर्जुनस्य कुलक्षयकृतदोषप्राप्तोऽनर्थ एवंलक्षणः कुलघ्नानां महत्तर इति निश्चित्य तज्जन्यसंतापेनोच्यमानमार्तवचनप्रकारमाह—

अहो बत महत्पापं कर्तुं व्यवसिता वयम्।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ४५ ॥

अहो बतेति द्वाभ्याम्। अहो इत्याश्चर्ये। बतेति खेदे। महत् महत्तरं वाचा वक्तुमशक्यं पापं कर्तुं विवेकिनोऽपि वयं व्यवसिताः प्रयतामहे। अहो महदाश्चर्यम्। बत हन्त। किं तन्महत्पापमित्यत आह—**यदिति**। राज्यसुखलोभेन राज्यलब्ध्या प्राप्यं यत्सुखं राजार्हं तत्र यो लोभो लाम्पट्यं तेन दोषेण स्वजनं पितृभ्रातृपुत्रादिकं शस्त्रैर्हन्तुमुद्यता उद्युक्ता वयमिति यत्, एतदेव महत्पापमित्यर्थः ॥ ४५ ॥

पापभीत्या युद्धादुपरतं त्वां त एव बलाद्धनिष्यन्तीत्यत आह—

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ ४६ ॥

यदि मामिति। अप्रतीकारं कृतस्य प्रतिक्रिया प्रतीकारस्ताडयन्तं प्रति ताडनम्। पापभीत्या दयया चानुरक्तया च तमकुर्वन्तम्। अत एवाशस्त्रं परित्यक्तायुधं मां धार्तराष्ट्राः स्वयं शस्त्रपाणयः सन्तो रणे यदि हन्युर्निर्दाक्षिण्येन धर्मं त्यक्त्वा मां हिंस्युश्चेत्तद्धननं मम स्वधर्मनिष्ठस्य क्षेमतरमेव भवेत् क्षेमायैव भवति। 'अप्राप्तप्रापणं योगः क्षेमस्तु स्थितरक्षणम्' इति न्यायेन स्थितस्य परिपालनं क्षेमस्तस्मादधिकः क्षेमतरः कुलनाशनदोषतद्धेतुकनरकपातदुष्कीर्त्याद्यनर्थराहित्येन प्राक्तनपुण्यपुञ्जस्य क्षत्यभाव एव क्षेमतरशब्दार्थस्तस्मादेव भवतीत्यर्थः ॥ ४६ ॥

'परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इत्यादिश्रुत्युक्तरीत्या मुमुक्षुर्ब्राह्मणो विद्वान् कर्मणां कर्मफलानां तद्दातॄणां च क्लेशकरत्वानित्यत्वसंसारित्वादिदोषवत्त्वं कर्मकर्तॄणां च जननमरणप्रवाहपातानपायित्वं निरन्तरसंसारदुःखभाक्त्वाद्यनर्थपरम्परां च श्रुतिस्मृतियुक्तिभिर्निश्चित्य मोक्षैककामनया स्वयमसतो विरज्य सहसाधनं कर्म संन्यस्य मुक्त्यै सद्गुरुमुपसीदेदितीममर्थं सूचयितुमर्जुनस्य सदसद्विचारमसत्प्रवृत्तौ परितापधर्मप्राप्ते राज्ये तत्सुखादौ दोषदर्शनं वैराग्यं च प्रतिपाद्य, इदानीं हिंसासाधनभूतशस्त्रसंन्यासं युद्धक्रियानिवृत्तिं च प्रतिपादयन्नध्यायमुपसंहरति—

संजय उवाच ।

एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादो नाम प्रथमोऽध्यायः ॥ १ ॥

एवमिति । अर्जुनः संख्ये सत्येवं 'धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्' इत्येवंप्रकारकं वचनमुक्त्वा शोकसंविग्नमानसः स्वजनविनाशं निमित्तीकृत्य समुत्पन्नेन शोकेन संविग्नं मानसं यस्य स तथोक्तः सन् सशरं चापं विसृज्य । नाहं योद्धुं शक्ष्यामीति रथोपस्थे रथस्योपर्युपाविशत् । उपविष्टवानित्यर्थः । एतेन सदसद्विवेकवतः परमार्थापेक्षिणो मुमुक्षोरनित्यात्स्वर्गादिसुखादसतः सकाशाद्विरज्य तत्साधनं सर्वं संन्यस्तव्यमिति सूचितं भवति । तथाच श्रुतिः—'परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात्' इति, 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति च ॥ ४७ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ।

सदसद्विवेकेन तज्जनिततीव्रवैराग्येण मुमुक्षया च संन्यस्तसर्वकर्मणो मोक्षैककामस्य ब्राह्मणस्य सदसद्विवेकवैराग्यादिसाधनसंपत्तिसिद्धेर्ब्राह्मणत्वसिद्धेश्च साफल्याय 'अथातो ब्रह्मजिज्ञासा' इति, 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इति, 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इत्यादिश्रुत्युक्तप्रकारेण सद्गुरुं श्रोत्रियं ब्रह्मनिष्ठमुपसद्य ब्रह्मविचारः कर्तव्य इतीममर्थं सूचयितुं सदसद्विवेकिनोऽर्जुनस्य परमार्थापेक्षिणः 'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्' इतीश्वरप्रतिपत्तिं तस्मै ईश्वरेण कृतमात्मानात्मज्ञानोपदेशप्रकारं च प्रतिपादयितुं द्वितीयोऽध्याय आरभ्यते । तत्रादौ 'सोऽहं भगवः शोचामि तं मा भगवाञ्शोकस्य पारं तारयतु' इति श्रवणात्संसारदुःखेन शोचन्तं स्वशरणं गतं मुमुक्षुमभयवचनपूर्वकमभिमुखीकृत्य गुरुस्तत्त्वं बोधयेदिति सूचयितुं, तथा शोचन्तमर्जुनं विवेकवचनैर्भगवान्बोधयामासेति वक्तुं धृतराष्ट्रं प्रति संजय उवाच—

संजय उवाच ।

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥

तमिति । तथोक्तरीत्या मदीया एते भ्रातृपुत्रादयो युधि म्रियन्त इति मरिष्यमाणस्वजनेषु कृपयाविष्टमतएव विषीदन्तमतएवाश्रुपूर्णाकुलेक्षणं तमर्जुनं दृष्ट्वा मधुसूदनः मध्वाख्यमसुरं सूदयतीति मधुसूदनः, यद्वा सर्वेषां देहे मधुवदिष्टत्वान्मधुरहंकारस्तमात्मप्रकाशनेन सूदयतीति मधुसूदनः, यद्वा 'इयं पृथिवी सर्वेषां भूतानां मधु' इति श्रवणान्मधुः स्वरूपानन्दस्तं स्वापरोक्षवतां सूदयति स्फोरयतीति मधुसूदनः श्रीकृष्णः इदं वक्ष्यमाणलक्षणं वाक्यमुवाच । अत्र कृपयाविष्टमित्युक्तिर्मुमुक्षोः कृपादिभिरष्टभिरात्मगुणैर्भवितव्यमिति सूचनार्थं कृपापदं क्षान्त्यादीनामुपलक्षणार्थम्। 'दया सर्वभूतेषु क्षान्तिरनसूयाशुचिरनायासो माङ्गल्यमकार्पण्यमस्पृहा चेत्यष्टावात्मगुणाः'इति गौतमोक्तैरष्टभिरात्मगुणैर्विशिष्टस्यैव सम्यक् ज्ञानं जायते 'सोऽहं भगवः शोचामि' इति श्रवणात्कथं संसारसागरं तरिष्यामीति शोचतः परितप्यत एव गुरुरीश्वरश्च प्रसीदतीति सूचयितुं विषीदन्तमश्रुपूर्णाकुलेक्षणमित्युक्तम् । मुमुक्षोर्गुरुमुपसिषीदिषोरेतैरुक्तगुणैर्भवितव्यमित्यनेन ज्ञापितं भवति ॥ १ ॥

श्रीभगवानुवाच ।

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥
क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥ ३ ॥

कुत इति द्वाभ्याम् । हे अर्जुन शुद्धस्वभाव, विषमे संकटे शत्रुभिः शस्त्रैर्हन्तुं प्रवृत्तसमये इदं कश्मलं 'एतान्न हन्तुमिच्छामि', 'यदि मामप्रतीकारम्' इत्याद्युक्तलक्षणश्चित्तव्यामोहः कुतः कस्माद्धेतोस्त्वा त्वां समुपस्थितं प्राप्तम्। कालदोषात्कर्मदोषाद्वा कस्मादयं भ्रमः शुद्धस्वभावस्य विवेकिनस्तव प्राप्त इत्यर्थः । हे पार्थ, अनार्यजुष्टमनार्यैरार्यशिक्षावर्जितैः पामरैर्जुष्टं सेवितमस्वर्ग्यं स्वर्गाप्रापकं दुर्गतिकारणमिह लोकेऽप्यकीर्तिकरमिदं क्लैब्यं क्लीबभावं कातर्यं शूराणामनर्हं त्वं मा स्म गमः मा भजस्व । राजधर्मज्ञे रणपण्डिते त्वयि नैतदुपपद्यते । वीरतमस्तुल्यस्य तव नैतद्युक्तमित्यर्थः । हे परंतप शत्रुकर्शन, क्षुद्रं क्षुद्रत्वकारणं निकृष्टत्वापादकं हृदयदौर्बल्यमधैर्यं मनःकालुष्यमेतत्त्यक्त्वोत्तिष्ठ । युद्धाय सन्नद्धो भवेत्यर्थः ॥ २ ॥ ३ ॥

भगवद्वचनमेतच्छ्रुत्वापि गुर्वादिस्वजनहिंसादोषदुःखमसहमानः सन् उक्तमेवार्थं विशेषयितुमर्जुन उवाच—

अर्जुन उवाच ।

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

कथमिति । कुलवृद्धं गुणवृद्धं च भीष्मं, विद्यागुरुं द्रोणं च संख्ये युद्धे इषुभिः कथं प्रतियोत्स्यामि प्रतिपक्षीभूय युद्धं करिष्यामि । किं तौ शौर्याधिकाविति भीत्या ताभ्यां योद्धुं न शक्नोषीत्यत आह—**पूजेति** । अरीन् कामादीन् भक्तानां सूदयतीत्यरिसूदनः हे अरिसूदन, भीष्मद्रोणौ गृहे पितृवत्पुष्पादिभिः पूजार्हौ नतु वाचापि युद्धार्हौ, किमुत बाणैर्मर्मघातिभिर्न युद्धार्हाविति शरैस्तयोर्मर्मच्छेदं कथं करिष्यामीत्यर्थः ॥ ४ ॥

क्षत्रियाणां युद्धं श्रेयस्करं कथं त्यक्तुं शक्यत इत्यत आह—

गुरूनहत्वा हि महानुभावाञ्छ्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥ ५ ॥

गुरूनिति । महाननर्गलोऽनुभावो धर्मब्रह्मविषयको बोधो येषां तान् महानुभावान् गुरून् भीष्मद्रोणकृपादीनहत्वा इह लोके भैक्ष्यं भिक्षान्नं नः श्रेयः युद्धवच्छ्रेयस्करं भवति तदेव भोक्तुं युक्तम् । गुर्वादिस्वजनहिंसारहितं भिक्षाशनमस्माकं श्रेयस्करमित्यर्थः । 'अकृत्वा परसंतापमगत्वा खलमन्दिरम् । अक्लेशयित्वा चात्मानं यदल्पमपि तद्बहु ॥' इत्यादिशास्त्रप्रसिद्धिद्योतनार्थो हिशब्दः । किमनाथवद्भिक्षाशनं शूराणां, शत्रून् जित्वा राजभोगः कर्तव्य इत्यत आह—**हत्वेति** । कामिर्ज्ञानार्थः । अर्थान् धर्मादिपुरुषार्थान् शिष्येभ्यः कामयन्ति बोधयन्तीत्यर्थकामास्तान् धर्मोपदेष्टॄन् गुरून् हत्वाहमिहैव लोके रुधिरप्रदिग्धान् रक्तधाराप्रसिक्तान् रुधिरमयान् भोगान् भुज्यन्त इति भोगाः विषयास्तान्नारकीयान् भुञ्जीयाऽनुभवेयम् । नतु नारकीया एव किंतु गुर्वादिवधेन जुगुप्स्यो नरकभोगोऽत्रैव भविष्यत्यतो गुर्वादिहिंसाशून्यं भिक्षाशनं श्रेयस्करं मन्य इत्यर्थः ॥ ५ ॥

'ये युध्यन्ते प्रधनेषु शूरासो ये तनूत्यजः' इति श्रवणात् क्षत्रियाणां युद्धमेव श्रेयस्करं नतु भिक्षाशनमित्यत आह—

नचैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥६॥

न चैतदिति। भिक्षाशनयुद्धयोर्मध्ये नोऽस्माकं धर्मपराणां गरीयः श्रेष्ठं कतरत् किंनु वा। गुरुहिंसादुष्कीर्त्यादिदोषशून्यत्वात् किं भैक्ष्याशनमेव श्रेष्ठं उत स्वधर्मत्वाद्युद्धमेव श्रेष्ठं आहोस्विदुभयमपि समं वा। चस्त्वर्थः। तदेतद्द्वयं तु न विद्मो न विजानीमः। जये राज्यसुखहेतुत्वादपजये स्वर्गप्रापकत्वात्स्वधर्मत्वाच्चेति तत्र संशयो न कर्तव्य इति चेत्तथापि संप्राप्तो विजयोऽस्माकं दुःखायैव भवति नतु किंचिदपि भवति सुखायेत्याह—**यानेवेति**। प्राणेभ्योऽपि प्रेयसो यानेव भ्रातृपुत्रादीन् युधि हत्वा न जिजीविषामो जीवितुं न शक्नुमस्त एव धार्तराष्ट्राः प्रमुखे रणमुखे अवस्थिता म्रियामह इति तिष्ठन्ति। अतोऽनर्थहेतोर्युद्धाद्भैक्ष्याशनमेव नः श्रेयस्करमित्यर्थः॥ ६॥

कथं भवान् पण्डितः सन्नधर्मं धर्ममिव, धर्मं च अधर्ममिव मन्यते मूढवदित्याकाङ्क्षायामहमेतत् द्वयं सूक्ष्मार्थं निर्णेतुं न शक्नोमि, यत्कर्तव्यं तत्त्वमेवोपदिशेत्याह—

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ७

कार्पण्येति। अविद्याकृतदेहेन्द्रियाद्यनात्मनः स्वरूपमिदमेवाहमिति व्यवहरतीति कृपणस्त्वतत्त्वज्ञः 'यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणः' इति 'कृपणो योऽजितेन्द्रियः' इति श्रुतिस्मृतिप्रसिद्धेः तस्य भावः कार्पण्यमज्ञत्वमज्ञानं तमःप्रधानत्वाद्वस्तुस्वरूपं दूषयतीति तदेव दोषस्तेनोपहतस्तिरोहितः स्वस्याविक्रियस्य प्रत्यगात्मनो भावः सत्ता यस्य स कार्पण्यदोषोपहतस्वभावोऽविद्यातिरस्कृतात्मस्वरूपो यस्माद्धर्मसंमूढचेताः अविद्यया संसारे पात्यमानः पुमान् धार्यतेऽनेनेति धर्मस्तस्मिन् स्वरूपप्रकाशके ज्ञानात्मके धर्मे संमूढमप्रविष्टं चेतो यस्य तथोक्त एवंलक्षणसंपन्नोऽहं त्वां परमेश्वरं पृच्छामि श्रुतिस्मृतिभिर्महर्षिभिश्च यन्निश्चितं निर्णीतं नियतफलं श्रेयःसाधनं शोकविध्वंसकं तन्मे ब्रूहि। ननु 'नापुत्रायाशिष्याय वै पुनः' इति श्रवणात्पुत्रशिष्यव्यतिरिक्तायाऽतिरहस्यं न वक्तव्यमित्यत आह—**शिष्य इति**। धर्मज्ञानार्थितयाऽहं ते शिष्यः शिष्यभावं गतोऽस्मि। त्वां जगद्गुरुं परमेश्वरं प्रपन्नं शरणं गतं मुमुक्षुं मां शाध्यनुगृहाण। शोकस्य निःशेषनिवृत्तिर्यथा भवेत् तथा मां बोधयेत्यर्थः॥ ७॥

मया ते किं वक्तव्यं, भवान्पण्डितः खलु, सूक्ष्मबुद्ध्या युक्त्या च यच्छ्रेयःसाधनं तत्त्वयैव ज्ञातव्यमित्यत आह—

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥८॥

न हीति । इन्द्रियाणां देहेन्द्रियमनोबुद्धीनामुच्छोषणमत्यन्तसंतापकं मम शोकं यदपनुद्याद्द्रव्यगुणकर्मणां मध्ये विशिष्टं यत्प्राप्तं सन्मामकं दुःखं निवर्तयेत्तदहं न प्रपश्यामि तादृशं न किंचिज्जानामि । ज्ञातं चेत्कुतोऽयं शोक इति । हिस्तदज्ञानप्रसिद्धिद्योतनार्थः । शत्रून् जित्वा राज्यं प्राप्य शोकस्त्यक्तुं शक्यते विशिष्टपदार्थभोगेनेत्यत आह— **अवाप्येति** । भूमावसपत्नं निःशात्रवं समृद्धं समग्रं राज्यं सार्वभौमत्वमवाप्य प्राप्य वा । सुराणामाधिपत्यमिन्द्रत्वं ब्रह्मत्वं वाथ प्राप्याहं शोकं त्यक्तुं न शक्नुयाम् । सार्वभौमत्वेन्द्रत्वब्रह्मत्वादीनां जन्यत्वेन ध्वंसप्रतियोगित्वात्तद्वतः शोकनिवृत्तिर्न संभवति, प्रकृतेऽपि स्वजनध्वंसहेतुकत्वाच्छोकस्य । अतो विवेकवतो विषयप्राप्तिस्तद्भोगश्च न शोकनिवर्तको भवति । यतः शोकं निःशेषं त्यक्ष्यामि तं धर्मं ममोपदिशेति सर्वभोगविरक्त्या तीव्रमुमुक्षया च भगवन्तं प्रार्थितवानर्जुनः शाधि मामिति । एतेनात्यन्तिकसंसारदुःखनिवृत्तिकारणं न भवति ब्रह्मविष्ण्वादिपदलाभः किंतु दुःखायैव विनैव ब्रह्मज्ञानं, तच्च गुरूपदेशं विना न सिध्यति 'आचार्यवान् पुरुषो वेद' इति श्रवणादतस्तदर्थिना गुरूपसत्तिः कर्तव्येति सूचितम् । 'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्' इति एवमर्जुनस्य वृत्तं धृतराष्ट्रं प्रति संजयः कथयति ॥ ८ ॥

संजय उवाच ।

एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ ९ ॥

संजय उवाच—**एवमिति** । परंतपः शत्रुतापनोऽपि गुडाकेशः । नामैकदेशे नामग्रहणम् । गुडो लगुडो दण्डस्तद्वद्दीर्घा आसमन्तात्समाश्च केशाः शिरोजा यस्य स गुडाकेशोऽर्जुनः गोविन्दं गोभिर्वेदान्तवाक्यैरेव विन्दते लभ्यत इति गोविन्दस्तं हृषीकेशं स्वजनहिंसाया अत्यन्तशोकहेतुत्वान्नाहं योत्स्ये इत्येवमुक्त्वा तूष्णीं बभूव ह । पुनर्न किंचिद्बभाष इत्यर्थः ॥ ९ ॥

'यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे' इति पृष्टः श्रीभगवान् शोचन्तं तं दृष्ट्वा किमुक्तवानित्याकाङ्क्षायामाह—

तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः॥ १०॥

तमिति। हे भारत, सेनयोरुभयोर्मध्ये विषीदन्तं मदीया एते म्रियन्त इति शोचन्तं एतान् हत्वा तद्दोषेणाहं निरयं यास्यामीत्यात्मनि निष्क्रिये निर्विकारे कर्तृत्वादिधर्मशून्य एवानाद्यविद्ययानात्मतद्धर्मानध्यस्य अहं कर्ता भोक्तेति विपरीतभावेन मुह्यन्तं तमर्जुनं दृष्ट्वा परमकृपालुः श्रीभगवान् 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इत्यादिश्रुतिप्रसिद्धब्रह्मात्मैकत्वज्ञानेन विना नायं द्वैतभ्रमप्रवर्तकेन भेदशास्त्रेण बोध्यमानः शोकसागरं भ्रममूलकं तर्तुं शक्नोतीति मत्वा पदार्थद्वयशोधनपूर्वकं तज्ज्ञानमुपदिदिक्षुः सन्नादौ त्वंपदार्थशोधनमवतारयितुं तदीयवृत्तं भवान् पण्डित इति मम बुद्धिरेव वा तव पाण्डित्यमिति प्रहसन्निव वचनमिदमुवाच॥ १०॥

श्रीभगवानुवाच।

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः॥ ११॥

अशोच्यानिति। न शोच्या अशोच्याः शोचितुमनर्हा भीष्मद्रोणादयस्तानेतानशोच्यानेव त्वमन्वशोचः एतानुद्दिश्य शोकं कृतवानसि। ननु स्वजनमरणे सर्वेषां शोको जायत एव कथमुच्यत एतानन्वशोचस्त्वमिति, कुतो वा म्रियमाणानामेतेषामशोच्यत्वमिति चेत्त्वमत्र प्रष्टव्यः, किं भीष्मद्रोणादिशब्दवाच्यार्थमुद्दिश्य शोच्यते उत लक्ष्यार्थमिति। आद्ये भीष्मादिशब्दवाच्यार्थस्यासद्वृत्तत्वमवेक्ष्य शोच्यते किंवा तन्नाशमुद्दिश्य शोच्यते इति। नाद्यः। ते महानुभावा इति त्वयैव तन्महत्त्वप्रतिपादनात्। न द्वितीयः। तदसंभवात्। 'मघवन् मर्त्यं वा इदं शरीरमात्तं मृत्युना' इति शरीरस्य मृत्युग्रस्तत्वश्रवणात् 'दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः' इति देहस्य नश्वरत्वश्रवणात् सर्वदा म्रियमाणप्राणिसंदर्शनाच्च प्रत्यक्षादिप्रमाणैरेव ध्रुवमृत्युकस्य देहादेः शोच्यत्वं न संभवति। न प्रथमो द्वितीयः। आत्माऽजत्वान्न जायते जननाभावान्न म्रियते मरणाभावान्नित्यः 'अजो नित्यः शाश्वतः' इति 'नित्यो नित्यानाम्' इति लक्ष्यार्थस्यात्मनो नित्यत्वश्रवणान्नित्यस्य सदास्यात्मनः शोच्यत्वानुपपत्तेः। नहि बुद्धिमतां नित्यः पदार्थः शोच्यो भवति नाप्यनित्यश्च। यत एवं वाच्यार्थस्य लक्ष्यार्थस्य

चोभयोरशोच्यत्वे सिद्धे त्वमशोच्यानेव शोच्यत्वबुद्ध्या मूढवदनुशोचसि । नैतावन्मात्रमेव करोषि, अपितु प्रज्ञावादांश्च भाषसे सदसत्पदार्थस्वरूपं विविच्य ये प्रकर्षेण जानन्ति ते प्रज्ञाः पण्डितास्तेषां शास्त्रमभिव्याप्ताः वादा आवादास्तान् प्रज्ञावादान् 'कुलक्षये प्रणश्यन्ति कुलधर्माः' इति, 'उत्सन्नकुलधर्माणाम्' इति, 'कथं भीष्ममहं संख्ये' इत्यादीनि प्रौढवचनान्यपि भाषसे । यदशोच्यशोचनं, यच्च शास्त्रार्थप्रकटनपाण्डित्यं तदेतद्द्वयं तेजस्तिमिरवत्परस्परविरुद्धं नैकत्र स्थातुमर्हति । अतो भवान् मूढ एव भवति नतु पण्डितः । तर्ह्येवंसमये पण्डिताः कथं वर्तन्त इत्याह—**गतासूनिति** । केवलं मूढाः ममैते पुत्रादयो मृता इति गतासूनेवानुशोचन्ति नत्वगतासून् । शास्त्रज्ञास्तु ममैते पुत्रादयो मूढा दुर्भगा दुर्वृत्ता जाता इत्यगतासूनेवानुशोचन्ति नतु गतासून् । पण्डितास्तु गतासूनगतासूंश्च पुत्रादीन्नानुशोचन्ति । गतासूनामगतासूनामप्युभयेषामविद्याकार्यत्वेन स्वप्नार्थवदसत्त्वादुभयत्र ब्रह्मैव पश्यन्ति त एव हि पण्डिताः ये त्वसत्त्यक्त्वा सदेव गृह्णन्ति । सदा सर्वत्र ब्रह्मदर्शनं हि पाण्डित्यम् । 'ब्राह्मणः पाण्डित्यं निर्विद्य' इति श्रुतेः । अत उक्तलक्षणाभावात्त्वं मूढ एव नतु पण्डित इत्यर्थः ॥ ११ ॥

अशोच्यानन्वशोचस्त्वमिति भीष्मादीनामशोच्यत्वे प्रतिपादिते भीष्मादिपदलक्ष्यार्थस्यात्मनो देहेन्द्रियादिभ्यो भिन्नत्वं नित्यत्वं च सूचितं भवति । तमिममर्थमजानन्तमर्जुनमालक्ष्य श्रीभगवान् लक्ष्यार्थस्यात्मनो नित्यत्वे त्वजत्वं हेतुरित्यजत्वहेतुना शशविषाणस्यापि नित्यत्वे प्राप्ते भावत्वे सत्यजत्वं नित्यत्वप्रयोजकम् । यस्य कालत्रये सत्ता न व्यभिचरति स भावो नित्यश्च । यस्य व्यभिचरति नासौ भावोऽनित्यश्चेत्यात्मनः कालत्रयेऽपि सत्ताप्रतिपादनद्वारा देहेन्द्रियादिभ्यो भिन्नत्वं नित्यत्वं च सूचयितुं पुनस्तत्त्वंपदार्थयोः शोधनं शोधितयोरेकत्वं च प्रतिपादयति । त्वंपदार्थस्य निःशेषसंसारदुःखनिवृत्त्या नित्यनिरतिशयाखण्डानन्दावाप्तये, तत्पदार्थस्यापि परोक्षत्वपरिच्छिन्नत्वानर्थनिवृत्त्याऽद्वितीयत्वाखण्डैकरसत्वसिद्धये च—

नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ १२ ॥

नत्वेवाहमिति । अहं तत्पदार्थः परमात्मा सर्वज्ञः सर्वशक्तिः सर्वतन्त्रस्वतन्त्रः परमेश्वरः । जातु कदाचिन्नासमिति न, किंतु सर्वदा आसमेव । मदसंभवे जगत्सृष्ट्याद्यसंभवात् । तथाहि 'जन्माद्यस्य यतः', 'यतो वा

इमानि भूतानि जायन्ते', 'यतो जातानि भुवनानि विश्वा', 'स ऐक्षत लोकान्नु सृजा इति', 'स इमाँल्लोकानसृजत' इत्यादिश्रुतिभिर्मत्त एव जगदुत्पत्तिः श्राव्यते, मत्त एव जगतः स्थितिश्च । 'येन जातानि जीवन्ति' 'व्यक्ताव्यक्तं भरते विश्वमीशः', 'स दाधार पृथिवीं द्यामुतेमां', 'भीषास्माद्वातः पवते', 'इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ । तस्मिंल्लोकाः श्रिताः सर्वे' इत्यादिश्रुतिभिः प्रतिपाद्यते । 'यत्प्रयन्त्यभिसंविशन्ति', 'तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति', 'यस्मिन्क्षेत्रे संहरत्येष देवः' इत्यादिश्रुतिभिर्मत्त एव जगल्लयोऽपि श्राव्यते । यतो मदेककर्तृकत्वं जगत्सृष्ट्यादिक्रियायास्ततो जगदुत्पत्तिस्थितिलयादिष्वागच्छत्सु सत्सु तदधिष्ठातृतया सदाहमासमेवेति निरुक्तश्रुतिबलात्रिष्वपि कालेषु मत्सद्भावो निश्चेतव्य इत्यर्थः । एतेन मेघतदागमस्थित्यादीनामाधारतया स्थितस्याकाशस्येव प्रपञ्चतदुत्पत्त्यादीनामधिष्ठानतया स्थितस्य तत्पदार्थस्य स्वस्य रूपतो निष्कलत्वेन निष्क्रियत्वेन च प्रपञ्चतद्धर्मतत्कर्मलेशसंबन्धरहितत्वं तद्भिन्नत्वं नित्यत्वं च सूचितं भवति । ननु परमेश्वरस्य स्वतन्त्रस्य कालत्रयेऽपि तव सद्भावोऽस्तु, मम कथं मर्त्यस्य नित्यत्वं सिध्यतीत्यत आह—**न त्वमिति** । त्वं त्वंपदलक्ष्यार्थश्च जातु कदाचिन्नासीरिति न किंत्वासीरेव । अतीतानागतदेहोत्पत्त्यादिषु जाग्रदादिष्विव त्वमस्येव । यथा जाग्रति तिष्ठत एव तव स्वप्नसंबन्धः, स्वप्ने तिष्ठत एव सुषुप्तिसंबन्धः, सुषुप्तौ तिष्ठत एव जाग्रत्संबन्धस्तथा गतदेहे तिष्ठत एवैतद्देहसंबन्ध एतद्देहे तिष्ठत एव भाविदेहसंबन्धोऽङ्गीकर्तव्यस्त्वन्यथा सुखदुःखादिवैचित्र्यासंभवात्कर्मवैचित्र्यादेव तव सुखादिवैचित्र्यं, ततस्तादृग्विधकर्मकर्तुस्तवास्त्येव देहान्तरेषु सद्भावस्त्वन्यथा कृतहानाऽकृताभ्यागमप्रसङ्गात् । 'जन्मान्तरकृतं कर्म भुङ्क्ते जन्तवोऽधुना' इति, 'यत्कर्म कुरुते तदभिसंपद्यते' इत्यादिश्रुतिस्मृतिविरोधप्रसङ्गाच्च पूर्वकृतस्याधुना अधुना कृतस्य कर्मणः फलं भाविजन्मन्यनुभुज्येत । तथैव श्रूयते 'प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम् । तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे ।' इति यतस्ततो जाग्रदाद्यवस्थास्विव गतदेहेषु भाविदेहेष्वपि इदानीमिव तव त्रिष्वपि कालेषु सद्भावोऽस्त्येवेत्यर्थः । एतेन त्वंपदार्थस्यात्मनो देहेन्द्रियादिभ्यो भिन्नत्वं नित्यत्वं च सूचितं भवति । इमे जनाधिपाश्च नासन्निति न, किंतु त्वंपदार्थत्वाविशेषात्त्रिषु कालेष्वासन्नेव । यथाहं तथैवैतेऽपि नित्यसिद्धसत्स्वभावा इत्यर्थः । जनाधिपा इत्यविद्यावृत्तिभेदेन बहुवचनं नत्वात्मभेदेन ।

तद्भेदे प्रमाणाभावात् । नन्वात्मभेदे प्रमाणाभाव इति यदुक्तं तदतिसाहसं। आत्मतत्त्वे विचार्यमाणे त्वात्मैकत्वं न घटते । प्रत्यक्षादिप्रमाणविरोधात् । तथाहि । यत्र यत्र अहंप्रत्ययभेदस्तत्रतत्रात्मभेद इति प्रतिदेहमहंप्रत्ययभेदस्य प्रत्यक्षेणोपलभ्यमानत्वादेकत्वे तु त्वमहमयमित्यादिव्यवहारलोपप्रसङ्गात्तत आत्मभेदे प्रत्यक्षं प्रमाणम् । आत्मभेदाभावे व्यवहारो न सिध्यतीति व्यवहारसिद्धेरन्यथानुपपत्त्यार्थापत्तिश्च प्रमाणम् । आत्मा प्रतिव्यक्ति भिन्नो भवति व्यक्तीनां भिन्नत्वाद्द्रवादिवत्, आत्मा भिन्न एव भवति प्रतिव्यक्त्यहंप्रत्ययभेदात् व्यक्तिप्रत्ययभेदात् घटादिवदित्याद्यनुमानं च प्रमाणम् । 'अदितिर्देवा गन्धर्वा मनुष्याः पितरोऽसुराः' इति देवादिभेदप्रतिपादकश्रुतिश्च प्रमाणम् । 'देवदानवगन्धर्वा यक्षराक्षसकिन्नराः' इत्यादिपुराणवचनं च प्रमाणम् । यद्यात्मैकत्वमेवाभ्युपगम्यते तर्हि तव सुखदुःखादिव्यवस्था च न सिध्येत् । एकस्मिन् दुःखिनि सुखिनि च सर्वेऽपि दुःखिनः सुखिनश्च स्युः । देवादिसर्वदेहेष्वात्मैकत्वे सर्वे सर्वज्ञाश्च भवेयुः । तेन विधिनिषेधशास्त्राणामानर्थक्यं च स्यात् । एकस्मिन् बद्धे बन्धो मुक्ते मोक्षश्च सर्वेषां प्रसज्येत । तस्मात् प्रमाणसिद्धमात्मानेकत्वं त्वयाप्यङ्गीकर्तव्यमिति चेत् । न । व्याप्तिव्यभिचारात् प्रत्यक्षासिद्धेः । यत्र यत्राहंप्रत्ययभेदस्तत्र तत्रात्मभेद इति व्याप्तिर्व्यभिचरति । शिशुः कुमारो युवा वृद्धोऽहमिति शैशवादिदशाभेदेनाहंप्रत्ययो भिद्यते तत्तदवस्थानां भेदात् । नहि कौमारे शिशुरहमिति प्रत्ययोऽस्ति तदुत्पादकशैशवाभावात्, एवं युवत्वे वृद्धत्वे चाहंप्रत्ययो भिद्यते । तथापि शैशवाद्यवस्थावतोऽहंप्रत्ययार्थस्यात्मनो भेदादर्शनान्न प्रत्यक्षं प्रमाणम् । ननु 'विशेषणभेदाद्विशिष्टस्यापि भेदः' इति न्यायेनावस्थाभेदादवस्थावतोऽपि भेदः स्यादिति चेत्तस्य शिशुत्वाद्यभिमानिन्यहंकार एव चरितार्थत्वान्नित्यात्मविषयत्वानुपपत्तेः । अन्यथा बाल्यमारभ्य देहेन्द्रियकृतकार्यस्मरणसंभवात् । 'स्मर्यते च मया बाल्ये कृतं कन्दुकखेलनमि'ति । नह्यात्मानेकत्वे एतत्स्मरणं घटते अन्यकृते कर्मण्यन्यस्य स्मृत्यदर्शनात् । यतो बाल्यमारभ्य वृद्धत्वावसानकं कृतं कार्यं स्मर्यते, ततः प्रत्ययभेदेन प्रत्ययार्थस्य भेद इति प्रत्यक्षमसिद्धम् । व्यक्तिभेदादात्मनोऽपि भेद इत्यनुमानं च न सिध्यति । स्थूलसूक्ष्मकारणदेहानां जाग्रत्स्वप्नदेहयोश्च भेदे सत्यपि अहंप्रत्ययार्थस्यात्मनो भेदाभावान्नानुमानसिद्धिः । श्रुतिस्तु 'अदितिर्देवा गन्धर्वाः' इत्यात्मोपाधिभेदान्वदति नत्वात्मभेदं, सर्वत्र चैतन्यस्यैकरूपत्वान्नात्मभेदोपपत्तिस्ततो देवगन्धर्वमनुष्यादिदेहाः सर्वे

जाग्रत्स्वप्नादिदेहवदात्मनो भोगायतनान्येव नत्वात्मभेदद्योतकाः । यथा स्थूलादिदेहैरेकस्यैवात्मनो भोगो भिद्यते तथैव देवादिदेहैरपि । अतो देवादिदेहा भोगायतनान्येव भवन्ति । यतस्तेषु रूपतेजःस्वभावादीनामेव भेदो दृश्यते नतु चेतनस्य । तत एवात्मविषयकोऽहमस्मीत्यहंप्रत्ययः सदैकरूपो भवति । तेन व्यक्तिभेदप्रतिपादनपरैव श्रुतिर्नत्वात्मभेदप्रतिपादनपरेति सिद्धम् । तथैव पुराणवचनं च 'यथैकस्मिन्नेव देहेऽवयवभेदमुपाश्रित्य शिरः करः पाद इत्यादिव्यवहारस्तथात्मैकत्वेऽपि व्यक्तिभेदमुपाश्रित्य त्वमहमयमित्यादिव्यवहारः सिध्यति नात्मभेदस्त्वपेक्ष्यते, एवं व्यवहारसिद्धावन्यथानुपपत्त्यसंभवान्नार्थापत्तिश्च प्रमाणम् । यत्त्वसत्यात्मभेदे सुखदुःखादिव्यवस्था न सिध्यतीति । तन्न । तस्याः कर्मैकनिबन्धनत्वादेकस्मिन्नेव देहे कर्मभेदेन सुखदुःखादिवैचित्र्यदर्शनात्सुखदुःखयोः पुण्यपापकार्यत्वेन तद्भेदाद्भोक्तृभेदाच्च सुखदुःखादिव्यवस्थोपपत्तेः 'यत्कर्म कुरुते तदभिसंपद्यते' इति 'यथाकारी यथाचारी तथा भवति' इति श्रवणात्ततो नात्मैकत्वे सुखादिसांकर्यसिद्धिः 'नान्योऽतोऽस्ति विज्ञाता' इति श्रवणात्फलभोक्तृणामनेकत्वाच्च । सत्यप्यात्मैकत्वे तदाभासानामनेकत्वोपपत्तेः । यद्यप्यात्मैव सदा सर्वत्र जानाति तथापि तत्तद्देहे तत्तद्बुद्धिमुपादाय स्वयं जानाति देहभेदाद्बुद्धिभेदस्य नियतत्वात्प्रतिदेहं ज्ञानं तु भिद्यते । ज्ञायते वस्त्वनेनेति ज्ञानं नाम बुद्धिवृत्तिः । सा च परिच्छिन्ना चक्षुरिव स्वसंपृक्तवस्तुमात्रप्रकाशिनी । वृत्तेः परिच्छिन्नत्वात्पदार्थैः सर्वैः संबन्धो न घटते । यदि सर्वपदार्थैः संबन्धः स्यात्तदा सर्वे सर्वज्ञा भवेयुस्तदभावान्न सर्वेषां सार्वज्ञ्यं सिध्यति । यथा विभोरपि महाकाशस्य शब्दसंभूतिहेतोः सर्वत्र भेरीपणवादिभिः संयोगे सत्यपि यत्र भेर्यादिस्ताड्यते तत्रैव शब्दोत्पत्तिर्न तु सर्वत्र, तथैवैकस्यात्मनः परिपूर्णस्यापि यत्र बुद्धिवृत्तेरर्थसंबन्धस्तत्रैव ज्ञानोदयो नान्यत्र । ततो बुद्धिवृत्तीनामनेकत्वादव्यापकत्वाच्च सर्वेषां सार्वज्ञं नोपपद्यत इति सिद्धम् । ततः किंचिज्ज्ञान्प्रति प्रवृत्तिनिवृत्तिहेतुत्वाद्विधिनिषेधशास्त्राणां सार्थक्यमेवोपपन्नं भवति । प्राणिनां सर्वज्ञत्वाभावस्य प्रतिपादितत्वाद्वेदान्तश्रवणजन्यज्ञानेन प्रत्यगभिन्नं परब्रह्म स्वात्मना यो विजानाति तस्यैव मुक्तिर्नेतरस्य । तथाच श्रुतिः—'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्' इति । तत आत्मैकत्वेऽपि मुक्तिरात्मज्ञानादेव सिध्यति 'ज्ञानादेव तु कैवल्यम्' इति नियमश्रवणात्तत आत्मैकत्वे नैवोक्तदोषाणामवकाशः । आत्मनामनेकत्वं पूर्णत्वं चाभ्युपग-

तवतस्तव पक्ष एवामी दोषाः संप्रसज्यन्ते । तदुच्यते । आत्मनामनेकत्वे विभुत्वे चाभ्युपगते सत्यन्योन्येषामन्योन्यमनोबुद्ध्यादिभिः संयोगः संभवति । तेनोक्तरीत्या सुखदुःखबन्धमोक्षादीनां सांकर्यं च प्रसज्यते । नैक एष एवानर्थः । अपितु विभुत्वाद्यसिद्धिश्च । तथाहि । यद्यद्वस्तु स्वेतरभेदवत्तत्तत्परिच्छिन्नमित्यात्मनामनेकत्वे सत्यन्योन्यसत्ताभिरन्योन्यभेदवत्त्वेन परिच्छिन्नत्वात्पूर्णत्वं न सिध्यति । पूर्णत्वेऽङ्गीक्रियमाणे त्वनेकत्वं च न सिध्यति । पूर्णत्वानेकत्वयोः परस्परविरोधादात्मनां पूर्णत्वमनेकत्वं च ब्रह्मणापि निर्वोढुं न शक्यते । ततो भवताप्यात्मैकत्वमेवाभ्युपगन्तव्यम् । किंच । परिच्छिन्नाश्चिद्रूपाश्चानेके चात्मान इति यः पक्षः सोऽपि न सिध्यति । बहुश्रुतिस्मृतियुक्तिविरोधात् । 'आकाशवत्सर्वगतश्च नित्यः', 'एकस्तथा सर्वभूतान्तरात्मा', 'एको देवः सर्वभूतेषु गूढः', 'एकः सन् बहुधा विचचार', 'एक एव हि भूतात्मा', 'निरपेक्ष एक एव साक्षी एकस्तेनेदं पूर्णं पुरुषेण सर्वं', 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानम्' इत्यादिश्रुतिभिः । 'नित्यः सर्वगतः स्थाणुः', 'नित्यः सर्वगतोऽप्यात्मा कूटस्थो दोषवर्जितः । एकः सन् भिद्यते भ्रान्त्या मायया न स्वरूपतः' इत्यादिस्मृतिभिश्च आत्मा सर्वशरीरेष्वेक एव भवितुमर्हति पूर्णत्वाद्घटादिष्वाकाशवत् । आत्मा एक एव भवति निष्कलत्वात्सर्वप्रकाशकत्वात्सर्वसाक्षित्वात्सर्वत्राहंप्रत्ययार्थत्वाच्चेत्येवमादियुक्तिभिश्चात्मनः पूर्णतैवावध्रियते । निरुक्तश्रुतिस्मृतियुक्तिप्रामाण्यादेक एवात्मेति सिद्धान्तः । यतोऽहं त्वं चेमे जनाधिपाश्च पूर्वोक्तरीत्या भूतभविष्यद्वर्तमानकालेषु क्वचिदपि न भविष्याम इति न, किंतु भविष्याम एव । त्रिष्वपि कालेषु सत्तावन्त एव स्मस्ततोऽहं त्वं चेमे च सर्वे वयं परं ब्रह्मैव । प्रपञ्चतदभिमान्यादिसर्वदृश्यकल्पनाधिष्ठानभूतं निष्कलं निष्क्रियं शान्तमनन्तं नित्यशुद्धबुद्धमुक्तसत्यज्ञानानन्दाद्वयं ब्रह्मैव स्मः । 'भोक्ता भोज्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्', 'ब्रह्मैवेदं सर्वम्' इति च श्रवणात्त्वां च मां चैतांश्च सर्वान् परं ब्रह्मैवेति जानीहीत्यर्थः ॥ १२ ॥

एवं तत्त्वंपदार्थयोः श्रुतियुक्तिभिः शोधितयोर्द्वयोरेकत्वे प्रतिपादिते सत्यपि त्वंपदार्थस्यात्मनोऽविद्यातत्कार्यकोटिभिस्तिरोहितत्वादतिसूक्ष्मत्वात् दुर्विज्ञेयत्वाच्च श्रोतुर्मुमुक्षोर्मन्दप्रज्ञस्य यावदप्रतिबद्धाऽपरोक्षं तावत् 'आवृत्तिरसकृदुपदेशात्' इति न्यायेन पुनः पुनस्त्वंपदार्थशोधनमेव

सम्यक्कर्तव्यमिति सूचयितुमुत्तरग्रन्थमारभते । तत्र पूर्वं त्वंपदार्थस्यात्मनः कालत्रयेऽपि सद्भावे प्रतिपादिते सत्यप्येतद्देहनाशानन्तरं सत्ता न दृश्यते कथं तत्र सद्भाव इति शङ्कावन्तमर्जुनमालक्ष्य, आत्मनो देहान्तरेऽपि सत्तां सदृष्टान्तं प्रत्यक्षानुमानाभ्यामवगमयितुमाह—

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ १३ ॥

देहिन इति । अस्मिन् देहे त्वविक्रियात्मनैवैकरूपेणाहमहमिति सर्वदा तिष्ठत एव देहिनो देह एवात्मोपलम्भादात्मा देहीत्युच्यते । तस्य देहिनो देहोपाधिमत आत्मनः कौमारं कुमारस्येदं कौमारम् । वपुरिति शेषः । यून इदं यौवनं वपुः । जरा जरोपलक्षितं जीर्णवपुश्च यथा येन प्रकारेणायाति, कौमारं जहतः सत एव यौवनं, यौवनं जहतः सत एव जरठं वपुरन्वागच्छति, तथैव एतत् स्थूलं जहतः सत एव देहान्तरमन्यो देहश्चायात्यविनश्यत एवात्मनः । 'जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते' इति श्रवणात् । किंच जाग्रत्स्वप्नदेहयोः सुषुप्तौ नाशे सत्यात्मसद्भावो न ज्ञायते, तथापि सुषुप्तोत्थितः स्वयं यः स्वप्नमद्राक्षं यः सुखमस्वाप्सं सोऽहमिदानीं जागर्मीति स्वप्रत्यभिज्ञाबलेन जाग्रत्स्वप्नसुषुप्तिष्वात्मनः सत्त्वं नित्यत्वं च यथा जानाति तथा एतद्देहनाशानन्तरमप्यात्मनः सत्त्वं नित्यत्वं च विज्ञाय धीरो विद्वान् आत्मतत्त्वज्ञः अतस्तत्रात्मनो नित्यत्वविषये न मुह्यति । गतजन्मन्यन्नाद्याहारवान् भवितुमर्हति, इदानीं स्वयमुपदेशमन्तरेणैव स्तन्याहारप्रवृत्तत्वाद्यन्नैवं तन्नैवं यथा प्रतिमादिः । आत्मा देहान्तरेष्वागच्छत्सु सत्सु तिष्ठति नित्यत्वाद्यथात्र कौमारादिदेहेषु प्राप्तेषु सत्सु तिष्ठति तथेत्युक्तप्रत्यक्षश्रुत्यनुमानैरात्मनो जन्मान्तरेषु सद्भावं विज्ञाय तेन नित्यत्वमेव निश्चित्यात्मास्ति वा न वेति पण्डितो न भ्रमतीत्यर्थः ॥ १३ ॥

यद्यपि प्रत्यक्षानुमानश्रुतिभिस्त्वंपदलक्ष्यार्थ आत्मा नित्य एवेति विजानामि तथापि भीष्मादिशब्दवाच्यार्थानां म्रियमाणानां वियोगजं दुःखं सोढुं न शक्यत इत्याशयवन्तमर्जुनमालक्ष्य ब्रह्मविद्भिरनात्मविषयकसुखदुःखानुसंधानं न कर्तव्यं, किंतु शरीरान्तरासत्त्या प्रारब्धवशात्प्राप्तमप्याध्यात्मिकादि त्रिविधदुःखं यत्तत्सोढ्वा तीव्रमुमुक्षया सदा ब्रह्मानुसंधानमेव कर्तव्यमिति सूचयितुमाह—

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ १४ ॥

मात्रास्पर्शा इति । चक्षुरादिज्ञानेन्द्रियैः सामान्येन मीयन्त इति मात्राः । वागाद्युभयेन्द्रियैः स्पृश्यन्ते गृह्यन्त इति स्पर्शाः शब्दादयो भोग्यपदार्थाः स्वयं शीतोष्णसुखदुःखदाः शीतोष्णवत्सुखदुःखदाः । शीतोष्णावनुकूलौ प्रतिकूलौ च सन्तौ यथा सुखं दुःखं च ददते तथैव शब्दादयोऽप्यनुकूलाः प्रतिकूलाश्च सन्तः सुखं दुःखं च ददत इत्यर्थः । यद्वा शब्दादयः प्रतिकूलमनुकूलं वा शीतमुष्णं वाप्यध्यात्ममुत्पाद्य तद्वारा साक्षाद्वा सुखं दुःखं च ददतीति शीतोष्णसुखदुःखदाः । ननु विषयेन्द्रियसंयोगस्य नित्यत्वात्तन्निमित्तकसुखदुःखयोरपि नित्यत्वे सत्यात्मविदस्तदनुसंधानं विना ब्रह्मानुसंधिः कथं सिध्यतीत्यत आह—**आगमेति ।** आगम उत्पत्तिरपायो विनाशस्तद्वन्तो विषयास्तज्जन्यसुखदुःखादयश्च तडिद्वदनित्यास्तान् क्षणकालावस्थायिनो विषयान् तत्संयोगवियोगांश्च तितिक्षस्व । भारत भा ब्रह्मविद्या तस्यामेव रमत इति भारत हे कौन्तेय, मुमुक्षोर्नित्यसुखार्थिनः प्रारब्धादागतानां सुखदुःखादीनां सहनमवश्यं कर्तव्यं, तत्सहनं कुर्वत एव श्रवणादि तज्जन्यं ज्ञानं तत्फलं चापि सिध्यत्यतस्त्वमेतेषां समागमसुखवद्वियोगदुःखं च सहस्व । प्रतिक्रियाचिन्ताविषादराहित्येन प्राप्तदुःखसहनं मुमुक्षोरुत्तमो धर्मः । तथाच श्रुतिः—'वृक्ष इव तिष्ठासेच्छिद्यमानो न कुप्येत न कम्पेत । उपल इव तिष्ठासेच्छिद्यमानो न कुप्येत न कम्पेत' इति । देहेन्द्रियादयः शब्दादयश्चानित्याः आगमापायित्वाद्यन्नैवं तन्नैवं यथात्मेति, आत्मा नित्यः सदागमापायसाक्षित्वाद्यन्नैवं तन्नैवं यथा देह इत्याद्यनुमानेन देहेन्द्रियादीनामनित्यत्वं तत्साक्षिण आत्मनो नित्यत्वं चात्रापि सूचितं भवति ॥ १४ ॥

तितिक्षुत्वमेव विवेकवैराग्यशमदमसंन्याससहितं श्रवणादिसाधनं सत्तज्जन्यज्ञानद्वारा मोक्षफलदं भवतीत्याह—

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥

यं हीति । सर्वदुःखसहनपूर्वकं निरन्तरब्रह्मनिष्ठया यः कैवल्यं संपादयति स एव पुरुषोत्तम इति सूचयितुमिदं संबोधनम् । हे पुरुषर्षभार्जुन, धीरं विषयग्रहणेभ्यो धियं राति निगृह्णातीति धीरः सदात्मनिष्ठस्तम् । अतएव समदुःखसुखं समे दुःखसुखे यस्य तं सुखदुःखयोः प्राप्तयोरविकारात्मना तिष्ठन्तम् । यद्वा समे समभावं ब्रह्मभावं गमिते दुःखसुखे यस्य

तम्। यं पुरुषं ब्रह्मविदमेते शीतोष्णादयो न व्यथयन्ति न बाधन्ते निष्ठातो न चालयन्ति स एवामृतत्वाय यदज्ञानात् मृतं मरणं जन्म च पुंसस्तदमृतं ब्रह्म 'एतदमृतमभयमेतद्ब्रह्म' इति श्रवणात्तद्भावायामृतत्वाय कल्पते। मुक्तो भवतीत्यर्थः। 'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति' 'अभयं वै ब्रह्म' 'अभयं हि वै ब्रह्म भवति' इत्येतत् श्रुतिप्रसिद्धिद्योतनार्थो हिशब्दः॥ १५॥

ननु सर्वत्र विद्यमानानां शब्दादीनामनुसंधिं सुतरां त्यक्त्वा सदा ब्रह्मैवानुसंधातुं न शब्दत इत्याकाङ्क्षायां ब्रह्मातिरिक्तस्य वस्तुनोऽभावाद्ब्रह्मण एव पूर्णत्वान्निरन्तरत्वाच्च मुमुक्षोः सदा तदेवानुसंधातव्यमिति सूचयितुं ब्रह्मण एव सत्तां तदन्यस्य त्वसत्तां च प्रतिपादयति—

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥ १६॥

नासत इति। सदित्यस्तितामात्रं वस्तु सर्वगतं सूक्ष्ममेकमेकरसं नित्यं निरवयवं निरञ्जनम् विज्ञानं यदवगम्यते सर्ववेदान्तेभ्यः एतद्विलक्षणमसच्छब्दादिलक्षणं जगत्तस्यैतस्य भावः सत्ता न विद्यते नास्ति। सति स्वरूपेण वस्तुनि सत्ता संपद्येत। तदभावात्सत्ताभावः। असदात्मनो जगतः सत्त्वे प्रमाणाभावात्। नन्वस्त्वेव प्रत्यक्षादिप्रमाणमिति चेत्त्वमत्र प्रष्टव्यः। तत्सत्त्वे प्रमाणं किं प्रत्यक्षं, अनुमानं वा, किमुपमानं वा, उत शब्दो वा। नाद्यः। इदं रजतं प्रादेशमात्रश्चन्द्र इत्यादौ व्यभिचारदर्शनात्। तत्र प्रमाणप्रमेययोः सम्यक्संसर्गाभावाद्व्यभिचारः। तदन्यत्र प्रमाणमेवेति चेन्न। दारुणि गज इति मृदि घट इति विपरीतग्रहदर्शनाद्व्यभिचारानुच्छित्तेः। न द्वितीयः। त्वत्पक्षे प्रपञ्चस्य प्रत्यक्षत्वात्तत्रानुमानानुपपत्तेः। नापि तृतीयः। गोसदृशो गवय इतिवत्तत्सदृशं जगदिति सादृश्यासंभवात्, अस्त्येव सादृश्यं स्वप्न इति चेत्तथात्वे मिथ्यात्वेऽपि तत्सादृश्यापत्तेः। नैव चतुर्थः। विकल्पो नहि वस्तु, नह्यस्ति द्वैतसिद्धिः असत्त्वादन्यस्येति जगतोऽसत्त्वश्रुतिं विना श्रुतिभ्यस्तत्सद्भावाश्रवणात्। ननु 'आत्मन आकाशः संभूतः' इति, 'यतो वा इमानि भूतानि जायन्ते' इति च ब्रह्मणः सकाशाज्जगदुत्पत्तिः श्रूयते। ब्रह्मकार्यत्वेन जगतोऽस्तित्वे श्रुतिरस्त्येव प्रमाणमिति चेत्त्वमत्र प्रष्टव्यः। ब्रह्मकार्यं यज्जगदस्ति तद्ब्रह्मणो भिन्नं किमभिन्नं वा उत भिन्नाभिन्नं वा। भिन्नत्वपक्षे कार्यं सद्वा किमसद्वा उत सदसद्वा। आद्ये कार्यस्य कारण-

सत्ता वा किमु कार्यसत्ता वा। नाद्यः। कार्यकारणयोः सत्तैकत्वे स्वतः सत्ताभावात्कार्यस्यासत्त्वापत्तेः। द्वितीये कार्यसत्ता सद्रूपा वा किमसद्रूपेति। आद्ये सद्रूपकार्यसत्ता कारणसत्ताया भिन्ना वा किमभिन्ना वा। नाद्यः। ब्रह्मणः पूर्णत्वेन निरन्तरत्वात्कार्यस्य तत्सत्ताव्यतिरिक्तसत्तासंभवादसत्त्वमेव स्यात्। न द्वितीयः। सत्तयोरुभयोः सद्रूपेणैकत्वावगमात्कार्यस्य कारणभिन्नत्वासंभवादसत्त्वाव्याहतेः असद्रूपेण भिन्नायाः कार्यसत्तायाः स्वतः स्वरूपाभावात्कार्यस्य शून्यत्वापत्तेः। कार्यस्यासत्त्वपक्षे जगतः शशविषाणवत्स्वरूपशून्यत्वाद्ब्रह्मकार्यत्वानुपपत्तेः। नन्वसतोऽपि जगतः प्रध्वंसाभाववत्कार्यत्वमुपपद्यत एवेतिचेन्न। प्रध्वंसाभावस्यापि कारणसंबन्धासंभवात्कार्यत्वानुपपत्तेः। कर्तृकरणादिकारकसंबन्धे सति खलु जनिक्रियायां घटादेः कार्यत्वं दृष्टं तथैव कारकसंबन्धवत्त्वे प्रध्वंसस्य भावत्वापत्तावभाव इति निर्देशायोगात्कारकसंबन्धः सत एव सावयवस्य घटते नेतरस्य। नहि घटनाशनसामग्रीसंबन्धः प्रध्वंसस्यात्यन्ताऽसत उपयुज्यते तदभावादेव प्रध्वंसाभावस्य न कार्यत्वं, तथैव जगतोऽप्यसतो न कार्यत्वं सिध्यति। सदसत्त्वपक्षेऽपि सत्त्वासत्त्वयोर्भावाभावधर्मत्वेनान्योन्यविरुद्धत्वादेकाधिकरणत्वासंभवात्तादृग्धर्मवैशिष्ट्यानुपपत्तौ सुतरां जगतो ब्रह्मकार्यत्वानुपपत्तेः। तर्हि कार्यं कारणाभिन्नमेवेति चेन्न। बह्वनर्थागमप्रसङ्गात्कार्यस्य जगतो जडात्मनो ब्रह्मभिन्नत्वे ब्रह्मणोऽपि दृश्यत्वानित्यत्वाप्रकाशत्वदुःखरूपत्वसावयवत्वादिदोषपरम्पराप्रसङ्गात्तदिष्टापत्तिरेवेति चेत्तव जगदान्ध्यप्रसक्त्याऽहंममेदमित्यादिव्यवहारासिद्धेः भवतोऽपि जडत्वेन ज्ञानानुत्पत्तौ मोक्षाभावप्रसङ्गात् 'तरति शोकमात्मवित्' इत्यादिश्रुतिवैयर्थ्यापत्तेः, ब्रह्मानन्दप्राप्तिकामानां सतां मुक्तौ प्रवृत्तिविच्छेदप्रसङ्गात्, 'यत्तदद्रेश्यमग्राह्यम्' इति, 'अजो नित्यः शाश्वतः' इत्यादिश्रुतिविरोधप्रसङ्गाच्च। तर्हि तृतीय एव पक्षोऽस्त्विवतिचेन्न। भिन्नाभिन्नत्वयोरन्योन्यविरुद्धत्वेनैकाश्रयत्वासंभवात्। एवं जगतो ब्रह्मकार्यत्वानुपपत्तौ श्रुतिप्रमाणकत्वं च न सिध्यति। नन्वेवं सति 'यतो वा' इत्यादिश्रुतेर्मृषावादित्वेनाप्रामाण्यापात इति चेन्न। तस्याब्रह्मणोऽद्वितीयत्वप्रतिपादनपरतया प्रामाण्याभ्युपगमात्केचिज्जगत्कारणं परमाणव इति वदन्ति। प्रकृतिरित्यपरे। तदुररीकृत्य कार्यकारणाभ्यां सर्वश्रुतिप्रसिद्धमद्वितीयत्वं ब्रह्मणो व्येति, तदसहमानयानया श्रुत्या जगदुपादानत्वं ब्रह्मणः प्रतिपाद्यते। ननूक्तरीत्या जगद्ब्रह्मणोः कार्यकारणभावानुपपत्तौ

कथमुपादानं ब्रह्मेति चेद्विवर्तोपादानं ब्रह्मेति ब्रूमः । विवर्तत्वं नामाधिष्ठानस्यान्यथाभानमात्रम् । तच्च ग्रहीतुर्ग्रहणदोषकृतं शुक्तेर्यथा रजताकारेण प्रतीतिः शुक्तियाथात्म्यसंदर्शनेन रजताभासस्य शुक्तिमात्रत्ववदधिष्ठानब्रह्मस्वरूपसाक्षात्कारेण जगतोऽपि प्रतीतिमात्रस्य 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इति, 'वाचारम्भणं विकारो नामधेयम्' इत्यादिश्रुतिप्रामाण्याद्ब्रह्ममात्रत्वसिद्धौ ब्रह्मणोऽद्वितीयत्वेऽव्याहते सत्यत्रैवं पूर्वोक्तदोषानवकाशः, कार्यस्य नाममात्रत्वावशेषाद्यत एवं ततोऽर्थतः शब्दादिप्रपञ्चसद्भावे न श्रुतिः प्रमाणम् । नापि प्रत्यक्षं अनुमानं च । तस्मादप्रामाणिकत्वाज्जगतः स्वतः सत्ता नास्तीति सिद्धम् । एवमसतः शब्दादेः सत्ताभावं प्रतिपाद्य इदानीं ब्रह्मणः स्वस्वरूपस्य सद्भावं प्रतिपादयति—**नाभावो विद्यते सत इति** । सामान्यविशेषभावशून्यमखण्डचिदेकरसं सर्वविक्रियारहितं सदेवेत्यादिश्रुतिप्रसिद्धमपूर्वमनपरमनन्तरमबाह्यं यत्सत्तस्य सतस्त्वभावो नास्तिता कचित्कदाचिन्न विद्यते । जाग्रत्स्वप्नसुषुप्त्यादिषु सद्भावदर्शनादात्मनः सदा सत्त्वे प्रत्यक्षं प्रमाणम् । आत्मा नित्यसत्ताको भवति अवस्थात्रयसाक्षित्वाद्यन्नैवं तन्नैवं यथा देहादिरित्याद्यनुमानं च । 'अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः' इति, 'अजो नित्यः शाश्वतः' इति 'तथाऽरसं नित्यमगन्धवच्च' इत्यादि श्रुतिश्च प्रमाणम् । एवं सर्वप्रमाणैर्निर्धारितनित्यसत्ताकस्य सतः प्रत्यगभिन्नस्य ब्रह्मणस्त्वभावः कदाचिन्नास्तीति तत्त्वदर्शिभिस्तत्त्वं, सर्वाधिष्ठानभूतस्य ब्रह्मणो याथात्म्यमबाधितस्वरूपं सत्यज्ञानानन्दात्मकं यत्तदेव सदा सर्वत्र द्रष्टुं शीलं येषां ते तत्त्वदर्शिनस्तैर्ब्रह्मविद्भिरेवमुभयोः सदसतोरन्तो निश्चयः सदा सर्वत्र ब्रह्मैकमेवास्ति न ततोऽन्यदिति निष्कर्षो दृष्टः । कृत इत्यर्थः । एतेन त्वमप्यात्मनोऽनित्यत्वभ्रममुत्सृज्य निःशोको भूत्वा 'सर्वं खल्विदं ब्रह्म' इत्यादिश्रुत्यर्थमवष्टभ्य सर्वत्र ब्रह्मदर्शनपरो भवेति सूचितं भवति ॥ १६ ॥

ननु सदिति सामान्यं, उत स्वरूपम् । सामान्यत्वे तस्य विशेषापेक्षत्वेन प्रलयदशायामशेषविशेषविनाशे विनाशः स्यात् । विशेषाणामपि कार्यत्वेन तत्र विनाशः स्यात् । सामान्यस्यापि तद्धर्मत्वेन विनाशोपपत्तेः । स्वरूपत्वे तस्य व्यावृत्तत्वे कल्पितत्वाद्विनाशित्वमुपात्तं, अनुवृतत्वे तस्यैव सामान्यत्वेनोक्तदोषप्रसक्तिरित्याशङ्कायां तस्य सामान्यविशेषभावशून्यत्वान्न कथंचिदपि विनाश उपपद्यत इत्याह—

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ १७ ॥

अविनाशि त्विति । इदं परिदृश्यमानमविद्याकार्यमसज्जगत्सर्वं येनातिसूक्ष्मेण विभुना सदात्मकेन मरीच्या जलप्रवाहवत्ततं अन्तर्बहिश्च व्याप्तं भवति तत्सच्छब्दितं वस्तु अविनाशि यथा असत्तथा विनष्टुं विनाशनविक्रियाया विषयतां प्राप्तुमनर्हं शीलं स्वभावः सत्ता यस्य तदविनाशि । अतिसूक्ष्मत्वादतिमहत्त्वाच्च स्वयं विनाशनक्रियातिगं सन्नित्यमेव भवतीत्यर्थः । आत्मा नित्यः परिपूर्णत्वाद्गगनवदिति नित्यत्वे अनुमानं प्रमाणम् । नष्टेऽप्येकस्मिन्देहे पदार्थाः सर्वत्र सर्वेषामुपलभ्यन्ते । सत्ये वात्मनि रविवत्सर्वप्रकाशके पदार्थोपलब्धिरन्यथानुपपत्तिरिति तत्प्रसूतार्थापत्तिश्च प्रमाणम् । अत्रात्मनो नाशं वदन् वादी प्रष्टव्यः किमात्मनो नाशः स्वतो वा, किं परतो वा, किमाश्रयनाशाद्वा, किं संबन्धिनाशाद्वा, उत कारणनाशाद्वा, अथ कार्यनाशाद्वेति । नाद्यः । निरवयवत्वाद्यथा सावयवस्य स्वावयवापचयान्नाशस्तथा निरवयवस्यात्मनः स्वतो नाशानुपपत्तेः । न द्वितीयः । तस्याप्यात्मत्वेन स्वंप्रति स्वस्य कर्तृकर्मत्वायोगात्ततोऽपि नाशासंभवात् । न तृतीयः । 'कस्मिन् भगवः प्रतिष्ठित इति स्वे महिम्नीति' इत्यात्मनः स्वातिरिक्ताश्रयाभावश्रवणादाश्रयनाशनिमित्तकनाशानुपपत्तेः । नापि चतुर्थः । आत्मनो निरवयवत्वेन द्रव्यगुणक्रियादिभिः संयोगादिसंबन्धस्य निरूपयितुमशक्यत्वात्तद्विश्लेषप्रयुक्तनाशासंभूतेः । नापि च पञ्चमः । 'न चास्य कश्चिज्जनिता' इति ब्रह्मणः कारणाभावश्रवणात्तन्निमित्तकनाशायोगात् । नैव च षष्ठः । 'न तस्य कार्यं करणं च विद्यते' इति कार्याभावश्रवणात्कार्यनाशनिमित्तकनाशासंभवान्न केनापि प्रकारेणेदं सद्ब्रह्म व्येतीत्यव्ययं तस्यैतस्याव्ययस्य नित्यसिद्धसत्ताकस्य ब्रह्मणो विनाशभावं कर्तुं वक्तुं च कोऽपि वादिविशेषो नार्हति । तथात्वे स्वस्यैव नाहमस्मीत्यभावप्रसङ्गः बहुश्रुतिविरोधः प्रत्यक्षादिविरोधश्च प्रसज्यत इति भावः ॥ १७ ॥

'अशोच्यानन्वशोचस्त्वम्' इत्यत्र त्वंपदवाच्यार्थो देहादिर्जन्मादिमत्त्वेनानित्यत्वादशोच्य एव, त्वंपदलक्ष्यार्थोऽप्यात्मा स्वयमजत्वेन जन्मादिशून्यतया नित्यत्वादशोच्य एवेत्युभयोरप्यशोच्यत्वेन यत्कारणत्वेन सूचितं तयोरनित्यत्वनित्यत्वाज्ञानं तदिदानीं मुखतो विस्पष्टयन् तेन निवृत्तशोकमर्जुनमालक्ष्य स यस्मिन्नर्थे स्वयमेव पूर्वं प्रवृत्तस्तत्रैव तं प्रोत्साहयति श्रीभगवान्—

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ १८ ॥

अन्तवन्त इति । अप्रमेयस्य प्रत्यक्षादिप्रमाणैः प्रमापयितुमशक्यस्य । नह्यस्ति प्रत्यक्षादेर्विषयतात्मनः प्रमापयित्री । तथाहि । नात्मा प्रत्यक्षविषयः शब्दादिरहितत्वात् 'अशब्दमस्पर्शम्' इति श्रुतेः । नानुमानविषयः लिङ्गाभावात् 'नैव च तस्य लिङ्गम्' इति श्रुतेः । नाप्युपमानविषयः सादृश्याभावात्, 'हेतुदृष्टान्तवर्जितम्' इति श्रुतेः । न शब्दस्यापि विषयः नामरूपजात्याद्यभावात् 'यत्तदद्रेश्यमग्राह्यमगोत्रम्' इति श्रुतेः । ननु 'तं त्वौपनिषदम्' इति श्रूयते कथं शब्दागम्यत्वमिति चेत्सत्यम् । यद्यपि श्रूयते तथापि शब्दप्रवृत्तिनिमित्ताभावान्न तत्र शब्दः प्रवर्तते 'यतो वाचो निवर्तन्ते' इति श्रुतेः । तर्हि श्रुतेरप्रामाण्यमिति चेन्न । निर्विशेषाधिगमकत्वात्प्रामाण्योपपत्तेः । श्रुतिरात्मन्यध्यस्ताशेषविशेषं निरस्याऽधिष्ठानभूतं सन्मात्रं निर्विशेषमात्मानमधिगमयति तेन प्रामाण्यमुपपद्यते । आत्मनः सविशेषत्वे ज्ञातत्वेऽपि निर्विशेषत्वस्याज्ञातत्वादज्ञातज्ञापकत्वेन श्रुतेः प्रमाणलक्षणसंभवात्, तथापीदन्तया साक्षान्निर्देष्टुमशक्यत्वादात्मा श्रुतेरविषय एव । किंच आत्मनि विषये त्वन्यथानुपपत्तेरभावान्नाप्यर्थापत्तेर्विषयः । भावत्वादनुपलब्धेरप्यविषयः । वागविषयत्वादैतिह्यस्याप्यविषयः । इत्यात्मनस्त्वप्रमेयत्वं सिद्धम् । सर्वेषां प्रमाणानां प्रमेयानां च यतः प्रामाण्यसिद्धिस्तं किं प्रामापयेत् । 'विज्ञातारमरे केन विजानीयात्' इति श्रुतेः । स्वस्मिन्नध्यस्तसर्वप्रमाणप्रमेयसद्भावासद्भावप्रकाशकत्वात्स्वप्रकाशत्वाच्च आत्मनः स्वतएव प्रामाण्यं नतु कचिच्च परतस्तत एवाप्रमेयस्तस्याविनाशिनो विनाशः सत्ताऽदर्शनं परिच्छित्तिस्तदभावोऽस्यास्तीत्यविनाशी अनन्तः 'सत्यं ज्ञानमनन्तम्' इति श्रुतेस्तस्याविनाशिनोऽपरिच्छिन्नस्य परिपूर्णस्याऽतएव नित्यस्य । ननु परिच्छिन्नस्यापि परमाणोरस्ति नित्यत्वमिति चेन्न । तन्नित्यत्वे प्रमाणाभावात् । 'सर्वगतश्च नित्यः' इति, 'यो वै भूमा तदमृतम्' इति श्रवणादपरिच्छिन्नस्यैव भूम्नो नित्यत्वं नतु परिच्छिन्नस्य, 'यदल्पं तन्मर्त्यम्' इति श्रुतेः । शरीरिणः ब्रह्मादिस्तम्बकान्तानि शरीराण्युपलब्धिस्थानत्वेनास्य सन्तीति शरीरी सर्वप्राणिशरीरोपाधिकस्तस्य आत्मा त्वेक एवेत्यात्मैकत्वे इदं भगवद्वचनं प्रमाणम् । यतः शरीरिण इत्यात्मैकत्वमिमे देहा इतीदमा निर्दिश्यमानानां देहानामनेकत्वं च वक्ति । शरीरिणः सर्वशरीरेष्वहमित्युपलभ्यमानस्य नित्यस्यात्मनः इमे उभयत्र सेनयोर्दृश्यमाना भीष्मादिशब्दवाच्या उक्ताः 'आ-

चार्याः पितरः पुत्राः' इत्यादिना त्वयोक्ता देहाः सर्वे अन्तवन्तः अन्तोऽवसानमदर्शनं तद्वन्तः । जन्मादिमत्त्वेन प्रतीतिमात्रत्वेन चानियतसत्ताका इति यावत् । नहि शुक्तिरजतवदधिष्ठानभ्रमकल्पितानां देहादीनां सत्ता संभवति प्रमाणतो गृह्यमाणे यतोऽसतः सत्ताभावः प्रदर्शितः 'नासतो विद्यते भावः' इति, ततस्त्वमेवं देहादीनामन्तवत्त्वं देहिनस्त्वात्मनो नित्यत्वं च सम्यक् अविज्ञाय पूर्वं मदीया एते म्रियन्त इति शोचितवानसि । इदानीं श्रुतियुक्त्यनुभवैर्विचार्यमाणे आत्मनो देहानां चाशोच्यत्वं सिद्धमनुभूतं च त्वया यस्मात्, तस्मात् हे भारत विवेकविज्ञानसंपन्न, युध्यस्व युद्धाय यतस्वेति पूर्वमेव युद्धाय प्रवृत्तमर्जुनं भ्रान्त्या शोचन्तं तच्छोकमूलमपनीय स्वकार्यं कुर्वित्यनुजानीते भगवान्, बुभुक्षुं शङ्कितं शङ्कामपास्य भुङ्क्ष्वेतिवत् नतु युद्धं कुर्विति नियुङ्क्ते । ज्ञानकाण्डे कर्मविधेरनुपयुक्तत्वात् 'नहि कर्मणि कर्मारम्भः' इति कर्मणि कर्मान्तरस्यैवानुपयुक्तत्वे किं वक्तव्यं स्वप्रतिपक्षे ज्ञानप्रकरणे कर्मविधेरनुपयुक्तत्वम् । प्रयास्यन्तं प्रयाहीतिवत् योत्स्यन्तं युध्यस्वेत्यनुमतिमात्रं भगवतो वचनस्य तात्पर्यम् । यद्वा 'एतं वै तमात्मानं विदित्वा ब्राह्मणा व्युत्थायाथ भिक्षाचर्यं चरन्ति' इति ब्रह्मविदां ब्राह्मणानां सर्वेषणाभ्यो व्युत्थितवतां शरीरयात्रार्थं भिक्षाविधिः श्रूयते । ज्ञानिनामप्यवश्यं शरीरयात्रायां वर्तितव्यमिति, तद्वदत्रापि ब्रह्मविदां प्राणत्राणमवश्यं कर्तव्यमिति सूचयितुं ज्ञानप्रकरणे आत्मज्ञानिनोऽर्जुनस्य क्षत्रियत्वेन युवत्वेन च संन्यासवनस्थत्वयोरनुपपत्तौ, राज्ञोऽस्य राज्येनैव शरीरयात्रा भवितव्या राज्यस्य पराक्रान्तत्वेन तज्जयाय यतस्वेति शरीरयात्रात्र भगवता विधीयते 'शरीरयात्रापि च ते न प्रसिध्येदकर्मणः' इत्यग्रे उच्यते च यतस्ततो न कश्चिदत्र कर्मविधिरिति मन्तव्यम् ॥ १८ ॥

यत्तु 'पापमेवाश्रयेदस्मान्' इति, 'संकरो नरकायैव कुलघ्नानाम्' इति, 'कथं भीष्ममहं संख्ये' इत्यात्मनः पापक्रियाविषयत्वं तत्फलभोक्तृत्वं तत्क्रियाकर्तृत्वं च मन्यसे तदात्मस्वरूपाऽज्ञानकृतमेव भवति । सत्यात्मतत्त्वे परिज्ञाते न कस्यापि विकल्पस्यावकाशोऽस्तीत्यात्मयाथात्म्यमवगमयितुं तत्प्रकाशनपरौ मन्त्रावर्थतः पठति । तत्राद्येनात्मनः क्रियाश्रयत्वं तद्विषयत्वं च यो मन्यते स श्रुतवेदान्तोऽपि मूढ एवेत्याह—

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९ ॥

य एनमिति । यस्त्वहमिमं हन्मीत्यहंप्रत्ययार्थमेनं प्रकृतमात्मानं हन्तारं हननक्रियायाः कर्तारं मन्यते; योऽहमनेन हतोऽस्मीत्येनमात्मानं परेण हतं तद्धननक्रियाया विषयभूतं च मन्यते। एवमात्मानं हनन-क्रियाया आश्रयं विषयं च मन्यमानौ तौ उभौ पुरुषावात्मानं न विजानीतः । यथाभूतमात्मतत्त्वं साक्षान्न विदितवन्तौ । यतोऽयमात्मा न स्वयं यं च कंचन हन्ति येन केनापि न हन्यते । देहेन्द्रियादिषु व्यापृतेषु सत्स्वयमात्मा चलितेऽपि च वृक्षे तदन्तःस्थ आकाश इव कूटस्थासङ्गचिद्रूपेण सर्वत्रोदासीनतया तूष्णीमास्त इत्यर्थः । 'न तद्-श्नाति किंचन न तदश्नाति कश्चन' इति श्रुतेः । आत्मा निष्क्रिय एव भवति निरवयवत्वादाकाशवदित्यादियुक्तिभिः' 'निष्कलं निष्क्रियं शान्तम्' इति 'साक्षी चेता केवलो निर्गुणश्च' इत्यादिश्रुतिभिश्चात्मा निष्क्रिय एवेति श्रुत्वा मत्वा च स्वं कर्तारं भोक्तारं सुखिनं च दुःखिनं च यो मनुते नासावात्मतत्त्वं विजानाति, अपितु तस्य श्रवणादिक्रियामृत-प्रसवाप्रसवक्रियावच्छ्रमैकफलैवेति सूचितं भवति ॥ १९ ॥

तर्ह्यात्मत्त्वं कथंभूतमित्याकाङ्क्षायां यास्कपठितजन्मादिषड्भावविकार-रहिततया कूटस्थासङ्गचिद्रूपत्वमेवात्मनः स्वाभाविकं तत्त्वमित्यात्मतत्त्वनि-र्धारणाय द्वितीयं मन्त्रं पठति—

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥२०॥

न जायत इति । अत्र कदाचिच्छब्दः कदाचिन्न जायते कदाचिन्न म्रियत इति सर्वत्र संबध्यते । वाशब्दौ चार्थौ भवतः । अत्राज इत्यजत्वेनैव सर्वविकारासंभवे प्राप्तेऽपि स्वयं श्रुतिः कण्ठरवेण प्रत्येकं तान्निषेधति आत्मनो निर्विकारत्वज्ञानस्य निर्विचिकित्सत्वाय । अजः यत्साक्षा-त्काराद्विद्वान् पुनर्न जायते सोऽजः, स्वयं जननरहितो वाऽजोऽयमात्मा कदाचिन्न जायते निरवयवत्वान्नोत्पद्यते । 'निष्कलं निष्क्रियम्' इति, 'न चास्य कश्चिज्जनिता न चाधिपः' इति निरवयवत्वनिष्कारणत्वश्रव-णादात्मनो जनिक्रिया नोपपद्यत इति भावविकारः प्रथमो निरस्तः । न म्रियते च तेनैव हेतुनाऽयमात्मा नाशक्रियां न प्राप्नोतीति षष्ठो विकारो निरस्तः । अयमात्मा भूत्वा जनिक्रियां प्राप्य भूयः पुनर्भविता

चास्तित्वमात्र भवति । घटवज्जन्मानन्तरभाव्यस्तित्वं न प्राप्नोति किंतु मृदिव जन्यनपेक्षितप्राक्तनसत्तावानेव भवतीति द्वितीयो विकारो निरस्तः। निरवयवत्वादात्मा नित्य एकरूप इति विपरिणामलक्षणश्चतुर्थो विकारो निरस्तः । एकरूपयैव सत्तया शश्वद्भवतीति शाश्वत इत्यक्षयलक्षणः पञ्चमो विकारो निरस्तः । निरवयवत्वेनायं पुराप्यधुना च सर्वदा नवत्वात् पुराण इति वृद्धिलक्षणस्तृतीयो विकारो निरस्तः । एवं षड्भिर्भावविकारैर्वर्जितत्वे प्रतिपादिते सति आत्मनो नित्यकूटस्थासङ्गचिद्रूपत्वमाद्यन्तशून्यत्वमद्वितीयत्वं च सूचितं भवति । तथाप्यस्य श्रोतुर्देहनाशादात्मनाशभ्रमो न नष्ट इति मत्वा यत्र भ्रमस्तत्रैव पुमान् सम्यग्बोधनीय इति तस्य भ्रमं छेत्तुमाह—**न हन्यत इति** । अस्मिन् शरीरे खड्गादिना हन्यमाने छिद्यमाने सत्यप्यात्मा निर्विकारत्वात् स्वयं घटे भिद्यमाने घटाकाशवन्न हन्यते हननक्रियाया विषयो न भवति । घटे नष्टे घटाकाशवद्देहे नष्टे सत्यात्मा स्वयं स्वरूपेणैव तिष्ठति । तथाच श्रुतिः 'अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा' इति ॥ २० ॥

एवमात्मनोऽहमर्थस्य निर्विकारत्वं नित्यकूटस्थासङ्गचिद्रूपता तदेतत्पारमार्थिकं तत्त्वमिति प्रतिपाद्य, ईदृशमात्मतत्त्वं विदितवतो विदुषः सर्वकर्मसंन्यास एवाधिकारो नान्यत्रेति सूचयितुमाह—

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१ ॥

वेदेति । ब्रह्मचर्याहिंसादिविवेकवैराग्यशमदमादिश्रुत्याचार्येश्वरप्रसादादिलक्षणया नियतया श्रुत्यादिसाधनसंपत्त्या युक्तो मोक्षैकप्रयोजनोऽक्तमुमुक्षुरधिकारी ब्रह्मविद्गुरुसन्निधौ श्रद्धाभक्तिभ्यामजस्रं कृतश्रवणादिजन्यज्ञानेनानुभूयमानमेनं प्रत्यग्रूपमात्मानमहमर्थमजं जन्मादिसर्वविकारशून्यमत एवाव्ययं येन केनापि प्रकारेण न व्येतीत्यव्ययम् अविनाशिनं विनाशः प्रमाणेन रज्जुसर्पादेरिव सत्ताबाधः द्रव्यगुणादिभिः परिच्छेदः तदभावोऽस्यास्तीत्यविनाशी परिपूर्णस्तमत एव नित्यमेकरसमद्वितीयमात्मतत्त्वमिदमेवाहमस्मीति साक्षाद्यो वेद स पुरुषः सर्वात्मभावं गतो विद्वान् कथं केन प्रकारेण कं हन्ति कं विषयीकृत्य हननक्रियां करोति । कं घातयति कं हननक्रियायां प्रवर्तयति । सर्वत्र किंशब्द आक्षेपार्थक एव भवति नतु प्रश्नार्थकः । प्रत्युत्तरादर्शनात् । कथमिति साधनमाक्षिप्य कमिति विषयाक्षेपः । कं घातयतीति प्रयोज्याक्षेपः । एवं

क्रियातत्साधनाद्यसंभवे निर्विकारब्रह्मात्मदर्शिनः सर्वसंन्यास एवाधिकार इति सिद्धम् । ननु निर्विकारब्रह्मदर्शिनः कथं हन्ति कं हन्ति कं घातयतीति साधनाद्याक्षेपेण हननक्रियाया एव निवृत्तिरत्र सूच्यते नतु सर्वेषां कर्मणामिति चेन्न । क्रियामात्रहेतोस्तुल्यत्वात्, यत्र यत्र त्वविक्रियात्मज्ञानं तत्र तत्र न प्रवृत्तिरिति निर्विकारात्मज्ञानस्य प्रवृत्तिमात्रं प्रति निवृत्तिहेतुत्वान्न हननक्रियामात्रं प्रति हेतुत्वं नियन्तुं शक्यम् । अतो निर्विकाराद्वितीयब्रह्मात्मज्ञानिनो न कर्तव्यं न कारयितव्यं च किंचिदस्तीति सिद्धम् । ननु न जायते म्रियते इति जन्मादिसर्वविक्रियाशून्यत्वं ब्रह्मण उक्तमतो निर्विकारं ज्ञेयं ब्रह्म, ज्ञाता तु विद्वान् विकारीत्युभयोर्निर्विकारत्वसविकारत्वधर्माभ्यां परस्परभिन्नत्वाद्विकारिणो विदुषस्त्वविक्रियत्वज्ञानासंभवात्संन्यासो नोपपद्यते । अविक्रियं ब्रह्मेति ज्ञानमस्त्येव संन्यासकारणमितिचेन्न । तस्य ज्ञेयविषयत्वेनासाधनत्वात् । नह्यचलः पर्वत इति ज्ञानं क्रियानिवृत्तिकारणं भवति तद्वत्स्वस्य विकारित्वेन विदुषस्त्वक्रियोऽहमित्यविक्रियात्मत्वज्ञानासंभवात्कर्मसंन्यासोऽनुपपन्न एवेति चेद्भवानत्र प्रष्टव्यः । इदमहं जानामीतीदमर्थस्य ज्ञाताहंप्रत्ययार्थो देवो वा प्राणो वा, इन्द्रियाणि वा, मनो वा, अहंकारो वा, विश्वो वा, तैजसो वा, प्राज्ञो वा, उत आत्मा वेति । आद्ये स्वप्नदेहो वा, जाग्रद्देहो वा, उतोभयं वा । नाद्यः । जागरे अहंप्रत्ययानुदयः स्यात्स्वप्नदेहनाशात् ज्ञातुरहमर्थस्यापि नाशप्रसङ्गात् । तदिष्टापत्तिरेवेति चेन्न । जाग्रति नाहमस्मीति तवाभावप्रसङ्गात्प्रत्यक्षविरोधाच्च । न द्वितीयः । न यस्य कस्यापि स्वप्ने अहमस्मीत्यहंप्रत्ययोदयः स्यात् । अहं व्रजामीत्युक्त्वा देह एव व्रजत्यतो देह एवाहंशब्दार्थ इति चेन्न । देवानिष्ट्वाहं स्वर्गं व्रजामीत्यादौ व्यभिचारान्मृते देहे विद्यमानेऽप्यहंप्रत्ययादर्शनाच्च । न तृतीयः । द्वयोः सामानाधिकरण्यासंभवात् नादिमो द्वितीयः पक्षः । स्वभावजडत्वात्, नहि जाग्रति स्वप्ने वा स्वं वान्यं वा प्राणो जानाति तदभावान्नाहमर्थत्वसिद्धिः । तृतीये एकस्य वा इन्द्रियस्य सर्वेषां वाहमर्थत्वम् । नाद्यः । शब्दादिष्वेकस्यैवार्थस्योपलब्धिप्रसङ्गाच्छब्दादेः सर्वस्य सर्वत्रोपलब्धिप्रदर्शनाप्रत्यक्षविरोधश्च स्यात् । न द्वितीयः । अहं ब्राह्मण इत्यत्र श्रोत्रादीनां प्रत्येकं ब्राह्मणशब्दार्थत्वे ब्राह्मणानेकत्वसिद्धावयमेको ब्राह्मण इति प्रत्यक्षसिद्धब्राह्मणैकत्वव्यवहारविरोधप्रसङ्गात् । योऽहं चक्षुषा घटमद्राक्षं सोऽहं पाणिना स्पृशामीति दृगादिभ्यो भिन्नस्याहमर्थत्वसिद्धाविन्द्रियाणां तदनुपपत्तेः । नापि चतुर्थः । चक्षुरादिवत्करणत्वाविशेषात्

'मनसा ह्येव पश्यति' इति श्रुतेः। नापि च पञ्चमः। विकारित्वात् ज्ञातृत्वानुपपत्तावहमर्थत्वानुपपत्तेः। नन्वहं जानामीत्यहंकारस्यापि ज्ञातृत्वं प्रतीयत इति चेन्न। स्वतो जडत्वात् ज्ञातृत्वानुपपत्तेः। यथा अहं मनुष्य इत्यन्यधर्माध्यासस्तथा ज्ञाताहमित्यन्यधर्माध्यास एव। स्वतो जडत्वेन ज्ञातृत्वमस्य न संभवति। ज्ञातृत्वस्य चेतनधर्मत्वाद्दहेर्दग्धृत्ववत् शैशवे मया द्राक्षा भुक्तेति तेन तेन सहैव विकारेण विनश्यतोऽहंकारस्य विकारिणः शैशवभुक्तद्राक्षानुभूतिश्चिरकालिकी वृद्धत्वे नोपपद्यते। तदनुपपत्तावहमर्थत्वं न संभवति। ममायमहंकारो दुष्ट इति स्वातिरिक्तस्य ज्ञेयत्वेन ज्ञातृत्वानुपपत्तावहमर्थत्वासिद्धेः। नापि षष्ठो नापि च सप्तमो नाप्यष्टमश्च। विश्वादीनां ज्ञातृव्यतिरिक्तत्वेनाहमर्थत्वायोगात्तेषामेकैकावस्थाभिमानित्वेन त्र्यवस्थातद्धर्मविज्ञानासंभवात्। यः स्वप्नमद्राक्षं यः सुखमस्वाप्सं सोऽहं जागर्मीत्यवस्थात्रितयज्ञातुर्विश्वादिभ्यो भिन्नत्वमेवावगम्यते नित्यत्वमविकारित्वं च। अतः पारिशेष्यादात्मैव ज्ञाता। 'नान्योऽतोऽस्ति विज्ञाता' इति श्रुतेः। ननु निरवयवस्यात्मनो बुद्धितद्वृत्तीन्द्रियैरिन्द्रियार्थैः संबन्धासंभवात्कथं ज्ञातृत्वमिति चेद्बुद्ध्यादिभिराध्यासिकसंबन्धस्य संभवादविक्रियस्याप्यात्मनो ज्ञातृत्वं सिध्यति। यत एवं ततो विज्ञातुरात्मन एवाहमर्थत्वम्। 'अहं विजानामि विविक्तरूपः' इति श्रुतेः। तत आत्मैव विद्वान् निरुक्तिविज्ञानस्य विदुषः संभवादेवं विद्वदात्मनोरभिन्नत्वे 'अयमात्मा ब्रह्म' इत्यात्मनो ब्रह्माभिन्नत्वश्रवणादविक्रियोऽहमिति विदुषः स्वस्याविक्रियत्वाद्वितीयत्वज्ञानसिद्धेर्निरङ्कुशत्वादविक्रियब्रह्मात्मत्वज्ञानबलेन सर्वकर्मसंन्यास उपपद्यत एवेति सिद्धम्॥ २१॥

नन्वात्मनः स्वतो विक्रियावत्त्वाभावेऽपि पूर्वापरदेहपरिग्रहपरित्यागयोर्विक्रियावत्त्वमौपाधिकं संभवति पूर्वापरगिरियोगाद्भानोरिव तेनाविक्रियत्वमसिद्धमित्याशङ्क्य, वासांसि गृह्णतो जहतश्च पुरुषस्य यथाऽविक्रियत्वं तथैवात्मनोऽपि देहोपादानविसर्गयोरित्यात्मनस्त्वविक्रियत्वं देहादिभिन्नत्वं तद्धर्मतत्कर्मतदवस्थाराहित्यं च सूचयितुमाह—

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥२२॥

वासांसीति। नरः पुरुषो जीर्णानि वासांसि विहायापराणि नामरूपलक्षणैः पूर्वविपरीतानि नवानि वासांसि स्वयमविक्रियः सन्नेव यथा गृह्णाति तथा देही देहेऽहमित्युपलभ्यमान आत्मा स्वयमविकारात्मना

स्थितः सन्नेव जीर्णानि कालकर्मवशात्त्याज्यतां प्राप्तानि शरीराणि विहाय अन्यानि नामरूपजातिगुणविशेषैः पूर्वविलक्षणानि संयाति प्राप्नोति नतु स्वयं विक्रियते । यथा वस्त्राणामेवागमनिर्गमौ नामरूपवैचित्र्यं शैथिल्यं च नतु पुरुषस्य, तथा शरीराणामेवागमापायाववान्तरविकारश्च नत्वात्मनो निरवयवस्येति देहेन्द्रियादिभ्यो भिन्नत्वमविक्रियत्वं नित्यत्वं चात्मनः सूचितं भवति ॥ २२ ॥

ननु घटस्थजलनाशात्तत्रस्थप्रतिबिम्बस्येव शस्त्रादिना देहविनाशे सत्यात्मनोऽपि तत्रोपलभ्यमानस्य चरमविकारः स्यादेवातोऽविक्रियत्वमसिद्धमित्यत आह—

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २३ ॥

नैनमिति । शस्यन्ते पदार्था एभिरिति शस्त्राण्यसिगदादयः पृथिवीविकारा देहवदेनं प्रकृतमात्मानं न छिन्दन्त्यवयवविश्लेषं न कुर्वन्ति । निरवयवत्वादाकाशवत्तेषां विशसनक्रियाविषयो न भवत्यात्मेत्यर्थः । आपोऽपि नैनमात्मानं देहवत् क्लेदयन्ति आर्द्रतामापाद्य सावयवस्येव निरवयवस्यात्मनः शैथिल्यं संपादयितुं न शक्नुवन्ति । पावकोऽग्निरपि देहवन्नैनं दहति दहनक्रियाया अविषयत्वात् भस्मीकर्तुं न शक्नोति । स्नेहशोषणेन देहं यथा शोषयति तथा मारुतोऽप्येनं न शोषयति । शोषणक्रियाया अगोचरत्वादेनं शुष्कीकर्तुं न शक्नोति । यथा घटं जलं क्लेदयति शस्त्राणि ताडनीयानि ताडयन्ति वायुः शोषयति वह्निर्दहति, तथा तत्रस्थमाकाशं निरवयवं न क्लेदयति न ताडयति न शोषयति न दहति, तद्वदात्मानं देहस्थमिति भावस्ततोऽविक्रियत्वमात्मनः सिद्धम् । एतेन जरारोगादयो भौतिका दैविकाश्चोपद्रवाः सर्वे शरीरस्यैव नात्मनोऽहमर्थस्येति देहादिभिन्नत्वेनात्मनो देहं विषयीकृत्य प्राप्तानर्थागोचरत्वमुक्तम् । ततस्तेषु प्राप्तेष्वपि स्थिरप्रज्ञतया ब्रह्मविद्भिः स्थातव्यमिति सूचितं भवति ॥ २३ ॥

वासांसि जीर्णानीति यतो देहव्यतिरिक्तत्वमात्मनः प्रतिपादितं ततो देहस्यैव छेदादयो दृश्यविषयकाः नत्वात्मनो निरवयवस्येति छेदक्लेददहनशोषणानि भूतचतुष्टयकार्याणि न प्रसरन्त्यात्मनीति स्फुटमाह—

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४ ॥

अच्छेद्य इति । सनातनोऽनादिः । 'न तस्य कश्चिज्जनिता न चाधिपः' इति श्रवणादात्मायं निरवयवत्वेन कुतश्चित्कारणादुत्पन्नो न भवतीति सनातनः जन्मादिविकाररहितस्तत एव नित्यः नित्यत्वादेव सर्वगतः परिपूर्णः । नित्यत्वे सर्वगतत्वेऽप्यात्मनः क्रियाशक्त्याश्रयत्वमस्त्विति न शङ्कनीयम् । नित्यत्वादिधर्मवत्याकाशे तददर्शनात् । अतएव स्थाणुः स्थिरस्वभावः स्थिरत्वादेवाचलः । अयमयमित्यपरोक्षेण निर्देश आत्मनो विद्वत्प्रत्यक्षविषयत्वज्ञापनार्थम् । सनातनत्वान्नित्यत्वात् स्थिरत्वादचलत्वाच्चायमात्मा स्वयमच्छेद्यः छेत्तुमशक्यः, अदाह्यो दग्धुमशक्यः, अक्लेद्यः क्लेदयितुमशक्यः, अशोष्यश्च शोषयितुमशक्य एव भवति । शस्त्रादीनामित्यर्थः । सनातनत्वविशेषणेन निर्विकारत्वं, नित्यत्वविशेषणेन प्रमाणान्तराबाध्यत्वं, स्थिरत्वाचलत्वविशेषणाभ्यां क्रियाया जनाश्रयत्वमविषयत्वं, पूर्णत्वविशेषणेनाद्वितीयत्वं, नित्यशुद्धत्वमानन्दैकरसत्वं चात्मनः सूचितं भवति ॥ २४ ॥

'तरति शोकमात्मवित्' इति श्रवणादात्मनि विज्ञाते शोकनिवृत्तिरात्मविज्ञानं त्वात्मानात्मशोधनं विना न सिध्यतीति तच्छोधनमुपक्रम्य, वासांसीति स्थूलशरीरभिन्नत्वमात्मनः प्रतिपाद्य, 'नैनं छिन्दन्ति शस्त्राणी'ति छेदादेरविषयत्वे प्रतिपादिते सूक्ष्मकारणयोः शस्त्रादेरविषयत्वसंभवात्तत्रात्मत्वबुद्धिः स्यात् सा मा भूदिति अव्यक्ताचिन्त्यपदाभ्यां तद्भिन्नत्वं प्रतिपादयन्नविकार्यत्वं च वदन्नेतल्लक्षणमात्मानं विदितवतस्तव न पुनः शोको युक्त इत्युपक्रान्तमुपसंहरति—

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥

अव्यक्त इति । अहंकारममकारादिभिर्व्यज्यत इति व्यक्तं लिङ्गशरीरं तद्धर्मतदवस्थासाक्षित्वेन ततो भिन्नत्वादात्मायमव्यक्तो व्यक्ताद्भिन्नः ममेदं दुःखं प्राप्तमिति दुःखानुभवितृत्वं येन ज्ञायते स तस्माद्भिन्न एव नात्र संशयः । तथैवाचिन्त्यश्च अदृष्टादिवत्कार्येण शोकमोहादिना चिन्त्यतेऽनुमीयत इति चिन्त्यमव्याकृतमज्ञानं कारणशरीरं येन तत् ज्ञायते स ततो भिन्नो दृष्टः । मामहं न जानामीति अहमज्ञ इत्यज्ञत्वमज्ञानं यतोऽनुभूयते ततः स्वविषयकाज्ञानसाक्षित्वादात्मायमज्ञानाचिन्त्याद्भिन्नत्वेनाचिन्त्यश्चिन्त्याद्भिन्न एव भवतीति । अविकार्यश्च निरवयवत्वादा-

त्मायं विकृतेरविषयत्वेनाविकार्यः । अविकार्य इत्यनुत्पाद्यत्वादीनामात्मधर्माणामुपलक्षणम् । 'पुरस्तात्सिद्धं हि ब्रह्म' इति श्रवणादनादिसिद्धत्वादात्मायमनुत्पाद्यः । 'नान्योऽतोऽस्ति विज्ञाता' इति श्रवणात् ज्ञातुः स्वरूपत्वादनाप्यः । शुद्धोऽबाध्यस्वरूपो बुद्धः सुखस्वरूप इति श्रवणान्नित्यशुद्धत्वादात्मायं न संस्कार्यः । 'अद्वय एवायमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यगेकरसः प्रमाणैरेतैरवगतः' इति श्रुत्या यस्मादुच्यते तस्मात्त्वमेवं यथोक्तलक्षणमेतमात्मानमस्थूलमव्यक्तमचिन्त्यं निष्कलं निष्क्रियं कूटस्थासङ्गचिद्रूपमहमेवंलक्षण इति स्वं विज्ञाय नानुशोचितुमर्हसि । अहमेतेषां हन्ता मयैते हन्यन्त इति पूर्ववच्छोकं कर्तुं भवान्नार्हतीत्यर्थः । एतेन ब्रह्मविदामद्वैतदर्शिनां न किंचिच्छोच्यमस्तीति सूचितं भवति ॥ २५ ॥

एवं संसारभ्रमविध्वंसकमात्मयाथात्म्यविज्ञानमुपदिश्य श्रीभगवानेतादृशविज्ञानस्यात्मप्रसादेन विना लब्धुमशक्यत्वादर्जुने तदनुदयमालक्ष्य प्रकारान्तरेण तच्छोकमपाकर्तुमिदमाह—

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ २६ ॥

अथ चेति । महाबाहो इति साभिप्रायं संबोधनम् । चशब्दो यद्यर्थः । अथवा एनमुक्तमात्मानं नित्यजातं यदा यदा देहोत्पत्तिस्तदा तदा देहेन सह जातमुत्पन्नं देहे मृते देहेन सहैनं नित्यं मृतं च मूढलोकवत्त्वं यदि मन्यसे तथापि तस्मिन् पक्षेऽपि 'एवं नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान्' इत्युक्तरीत्या शोचितुं नार्हसि ॥ २६ ॥

स्वस्मिन्पक्षेऽपि शोकस्याकर्तव्यत्वे हेतुमाह—

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥

जातस्येति । हि यस्मात्कारणाज्जातस्य जन्मवतो मृत्युर्मरणं ध्रुवोऽनपायी । तथा मृतस्य च जन्म पुनर्जननं ध्रुवं नियतम् । एवं जन्ममरणयोर्मरणजन्मनोश्चाहोरात्रयोरिवाव्यभिचार्ययं नियमोऽपरिहार्यस्तस्मादपरिहार्ये ब्रह्मणापि परिहर्तुमशक्येऽर्थे अयं देवदत्तो मदीयो म्रियत इति त्वं शोचितुं नार्हसीत्यर्थः ॥ २७ ॥

इमे भीष्मादिशब्दवाच्याः सर्वे देहा मायाकार्यत्वेनासत्त्वादेते मदीया इति न कदापि शोचनीयमिति सूचयति—

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥

अव्यक्तादीनीति । नामरूपगुणादिभिर्न व्यज्यत इत्यव्यक्तं माया तस्याः सकाशादादिर्जन्म येषां तान्यव्यक्तादीनि । भूतानि भवन्तीति भूतानि शरीराणि । भावे क्तः । व्यक्तं व्यक्तता मध्ये येषां तानि व्यक्तमध्यानि देवस्तिर्यङ्मनुष्यो ब्राह्मण इत्याभासतो मध्ये लब्धस्वरूपाणि । पुनरव्यक्तनिधनानि अव्यक्ते मायायामेव निधनं लयो येषां तान्यव्यक्तनिधनानि ऐन्द्रजालिकवद्दृष्टनष्टस्वरूपाणि । अतएव शरीराणि मायाकार्याणि 'यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः । तथा जाग्रत्प्रपञ्चोऽयं मयि मायाविजृम्भितः ॥' इति वचनादिदं सर्वं स्वप्नार्थवन्मायिकमेवेति सर्वस्य मायाकार्यत्वमेव विदितवतः पुरुषस्य तत्र मायाकार्ये मयायं हन्यते म्रियते नश्यतीति का परिदेवना मिथ्याभूतार्थे कः परिताप इति विदां परितापमाक्षिपति श्रीभगवान् । यद्वा प्रमाणैः सर्वैर्न व्यज्यते व्यक्तीकर्तुं न शक्यत इत्यव्यक्तं परं ब्रह्म तदग्रहणादादिर्जन्म येषां तान्यव्यक्तादीनि भूतानि शुक्त्यग्रहणाद्रजतवदात्माग्रहणाल्लब्धजन्मानि । तथा व्यक्तमध्यानि सर्वं व्यञ्जयतीति व्यक्तमन्तःकरणं मध्ये स्थितिकाले येषां तानि व्यक्तमध्यानि देवतिर्यङ्मनुष्यादिभेदं स्त्रीपुंसादिभेदं पितृपुत्रादिभेदं अहं ममायमित्यादिसंबन्धं च कल्पयित्वान्तःकरणमेव प्रपञ्चनिर्वाहं करोति तेन व्यक्तमध्यानि यावदधिष्ठानादर्शनं तावत्तेषां सत्तास्फूर्त्यादीनि सवासनान्तःकरणबलादेव तस्माद्व्यक्तमध्यानीत्युच्यन्ते । भूतानि 'मनोवृत्तिमयं द्वैतमद्वैतं परमार्थतः' इति वचनात्सत्यधिष्ठाने दृष्टे तदा पुनरव्यक्तनिधनानि अव्यक्ते स्वाधिष्ठाने ब्रह्मणि निधनमेषां तथोक्तानि, अधिष्ठानाग्रहणादुत्पन्नानि यावदधिष्ठानं न ज्ञायते तावत्स्वतः स्वरूपवन्तीव भूतानि मरीचिकाजलवद्भान्ति । अधिष्ठाने दृष्टे सत्यधिष्ठानमात्राण्येव भवन्ति न ततो व्यतिरिच्यन्ते । तत्र मरीचिजलवत्प्रतिभासमात्रे अधिष्ठानाज्ञानविजृम्भिते देहादिप्रपञ्चे अधिष्ठानसंदर्शनेन सर्वं ब्रह्मैवेति पश्यतो विदुषः का परिदेवना । परिदेवनाया अवकाशः कुत इत्यर्थः ॥ २८ ॥

ननु बहुभिः पण्डितैरात्मतत्त्वं श्राव्यते श्रूयते मन्यते च तथाप्येतादृशं ज्ञानं न कुत्रचिद्दृश्यत इत्याशङ्कायां ममेश्वरस्य श्रुत्याचार्यात्मनां च प्रसादेन विना लब्धुमशक्यमिति सूचयितुं जिज्ञासुश्रोतृवक्तॄणां चातिदुर्लभत्वं वदन्नात्मनो दुर्बोधत्वं प्रतिपादयति—

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २९ ॥

आश्चर्यवदिति । मनुष्येषु शतकोटिसंख्याकेषु यः कश्चिन्मत्प्रसादपात्रीभूत एवं कूटस्थासङ्गचिद्रूपमात्मानमद्वयमखण्डानन्दैकरसं पश्यति साक्षात्कर्तुमिच्छति स आश्चर्यवदेव भवति । लोकैः कर्तुमशक्यस्य कर्मणः करणमाश्चर्यं तत्कारणार्ह एव भवति । यथा हनुमतः समुद्रलङ्घनं तद्वदत्र सर्वविषयाशापाशं निर्दह्य मोक्षेच्छाकरणमाश्चर्यं, मोक्षेच्छाया अतिदुर्लभत्वाद्बहुजन्मलभ्यत्वाद्बहुपुण्यपरिपाकसाध्यत्वाच्चित्तप्रसादैकमूलत्वाच्च संतीर्णाशेषविषयाशासिन्धुः शुद्धात्मा मोक्षैककामो मुमुक्षुरतिदुर्लभ इत्यर्थः। किंच एनमुक्तलक्षणमात्मानमन्यः पूर्वोक्तादिदृक्षोर्भिन्नः य कश्चिच्छृणोति सोऽप्याश्चर्यवदेव भवति, आकाशगामी पुरुषो यथा तद्वत्प्राणात्ययेऽपि दुस्त्यजेषु भोग्येषु वैराग्यमतिदुर्लभं, सत्येतस्मिन् ससाधनस्य कर्मणः संन्यासो दुष्करः, कृतेऽपि च तस्मिन्नमानित्वाद्यक्रोधत्वादिब्रह्मचर्यादिदैवी साधनसंपद्दुर्लभा, तस्यामपि लब्धायां 'अनन्यप्रोक्ते गतिरत्र नास्ति' 'आचार्यवान्पुरुषो वेद' इति श्रवणाद्ब्रह्मविदाचार्यो दुर्लभः, सिद्धेऽप्युक्तसाधने गुरौ च मत्प्रसादैकलभ्या श्रवणादिनिष्ठा त्वतिदुर्लभा, मदनुग्रहवत्कर्तृकश्रवणादेरेव सम्यग्ज्ञानजनकत्वेन मोक्षफलकत्वान्निरुक्तसाधनसंपन्न आत्मनि विषये श्रोता दुर्लभ इत्यर्थः । तथैव निरुक्तसर्वसाधनसंपन्नश्चाद्वेष्टृत्वादिस्वधर्मयुक्तो मत्प्रसादपात्रीभूतो यः कश्चिदुक्तादन्यः श्रवणादिनिष्ठया विज्ञातात्मतत्त्वो ब्रह्मनिष्ठ एव एनमुक्तलक्षणमात्मानं वदति उपसन्नाय सच्छिष्यायात्मतत्त्वमुपदिशति सोऽप्याश्चर्यवदेव भवति । 'ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः' इति श्रुत्युक्तब्राह्मणत्वसिद्धिहेतोरतिदुःसाध्यत्वादुक्तलक्षणो ब्रह्मवित्तत्त्वोपदेष्टातिदुर्लभ इत्यर्थः । एवं परमार्थेच्छोः श्रोतुस्तत्त्वोपदेष्टुश्चातिदुर्लभत्वं प्रतिपाद्य इदानीमुक्तसाधनसंपद्विधुरस्य मद्विमुखस्यात्मा बोद्धुं न शक्य इत्याह—**श्रुत्वाप्येनमिति** । श्रुत्याचार्यमत्प्रसादरहितोऽमानित्वादिदैवसंपद्विधुरो यः कश्चिदात्मतत्त्वावगत्यै श्रवणादि करोति स उक्तसाधनवैधुर्याच्छतधा सहस्रधा वा श्रुत्वा श्रवणं कृत्वा अपिशब्दान्मननं च कृत्वाप्येनं प्रकृतमात्मानं नैव जानाति । ज्ञातुं ज्ञानफलं च प्राप्तुं न शक्नोतीत्यर्थः । एतेन 'सर्वमिदमहं च ब्रह्मैव' इति सर्वस्य ब्रह्ममात्रत्वविज्ञानं दुर्लभतरमिति सूचितं भवति ॥२९॥

पूर्वमव्यक्तादीनि भूतानीति भीष्मादिशब्दवाच्यार्थस्याशोच्यत्वमुपसंहृत्य इदानीमात्मनो लक्ष्यार्थस्याशोच्यत्वमुपसंहरति—

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३० ॥

देहीति । हे भारत आत्मज्ञानसंपन्न, सर्वे देहा उपलब्धिस्थानत्वेनास्य सन्तीति देही सर्वदेहोपाधिमानयमात्मा सर्वस्य ब्रह्मादिस्तम्बान्तस्य प्राणिजातस्य देहे वध्यमानेऽपि नित्यं स्वयमवध्य एव भवति । अविक्रियत्वादात्मा घटेषु नष्टेषु तत्स्थाकाशवत्स्वयं तु न नश्यति यस्मात्तस्मादात्मनोऽनश्वरत्वविज्ञानात् 'त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च' इत्युक्तरीत्या भीष्मादिसर्वभूतानि शरीराण्येते म्रियन्ते मदीया इति न त्वं शोचितुमर्हसि । एतेषु हन्यमानेष्वात्मा न नश्यतीत्यात्मनो नित्यत्वविज्ञाता त्वमात्मानमुद्दिश्य शोकं मोहं च कर्तुं नार्हसीत्यर्थः । अत्र देहो नश्यतीति ममायमिति च यस्य देहविषयौ शोकमोहौ न स्तस्तस्याप्रतिबद्धापरोक्षविज्ञानवतो विदुषः 'दैवाधीने शरीरेऽस्मिन्गुणभाव्येन कर्मणा' इति न्यायेन शरीरस्य प्रारब्धाधीनत्वाच्छरीरयात्रार्थमपि न किंचित्कर्म कर्तव्यं किमुतापरमिति । सिद्धस्य ब्रह्मविदः सर्वकर्मसंन्यास एवाधिकार इति भूतानि न त्वं शोचितुमर्हसीति पदेन सूचितं भवति ॥३०॥

वेदाविनाशिनमित्यत्रायमर्थः स्फुटं निरूपितः 'सर्वमिदमहं च ब्रह्मैव' इति सर्वस्य ब्रह्ममात्रत्वविज्ञानमात्मप्रसादजं यस्य तस्य न किंचित्कर्तव्यमस्ति, तदन्यस्याहंममेत्याद्यभिमानवतो मुमुक्षोः 'ब्राह्मणा विविदिषन्ति यज्ञेन दानेन' इत्यादिश्रुतिबलाच्चित्तशुद्ध्यर्थं विधिदृष्टः स्वधर्मः पूर्वोक्तज्ञानसिद्ध्यर्थं कर्तव्य एवेति बोधयितुमिदं प्रकरणमारभ्यते । तत्रादावर्जुनस्यात्मज्ञानाभावमालक्ष्य तं स्वभक्तं मुमुक्षुं कर्तव्ये स्वधर्मे प्रवर्तयितुमिदमाह श्रीभगवान्—

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ ३१ ॥

स्वधर्ममिति । यदा कर्ता करणं कार्यं च सर्वं ब्रह्मैवेति विज्ञातं तदा न किंचित्कर्तव्यमेवोपपद्यते । यद्येते मदीया मया हन्यन्त इति भेदज्ञानं तदापि । चस्त्वर्थः । 'युद्धं स्वधर्मो नृपतेः प्रजानां परिपालनम्' इत्यादिशास्त्रोक्तं स्वधर्मं क्षत्रियस्य कर्तव्यत्वेन विहितमवेक्ष्य स्वबुद्ध्या विचार्य त्वं विकम्पितुं स्वधर्माच्चलितुं नार्हसि । स्वधर्मं त्यक्तुं नार्हसीत्यनेन

स्वधर्मतया कर्तव्यत्वेन प्राप्ते युद्धे याग इव शोकमोहौ हिंसादिदोषविचारश्च न कर्तव्यो विदुषेति सूचितम् । धर्मशास्त्रादागतं धर्म्यं कर्तव्यत्वेन विहितं तस्माद्युद्धादन्यदपरं श्रेयःसाधनं क्षत्रियस्य न विद्यते नास्ति जयलब्धधनैकसाध्यैर्यागैर्दानैर्व्रतादिभिश्चित्तशुद्धिस्तया ज्ञानं तेन मोक्ष इति युद्धस्य श्रेयःसाधनता युक्ता, ततो युद्धं कर्तव्यमेवेति सिद्धम् । 'ये युध्यन्ते प्रधनेषु शूरासः' इत्यादिश्रुतिप्रसिद्धिद्योतनार्थो हिशब्दः ॥३१॥

ननु जयश्चेद्युद्धस्य श्रेयःसाधनता स्यान्मृतिश्चेन्न किमप्यस्तीत्यत आह—

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥ ३२ ॥

यदृच्छयेति । हे पार्थ पृथापुत्र, यदृच्छयैवोपपन्नं अयत्नप्राप्तमपावृतं चोद्घाटितकपाटं स्वर्गद्वारं स्वर्गप्राप्तिद्वारभूतं युद्धमीदृशं सुखिनः स्वर्गसुखार्थिनो धन्याः क्षत्रियाः पुण्येन लभन्ते । भाग्यवतामेवेदृशं युद्धमभ्यागच्छतीत्यर्थः । युद्धे मृतस्याप्यस्ति स्वर्गसुखमित्यत उभयथापि फलहेतुत्वादवश्यं युद्धं कर्तव्यमित्यर्थः ॥ ३२ ॥

मुमुक्षोर्मोक्षसाधने विध्युक्ते स्वधर्मे प्रमादो मास्त्विति ज्ञापयितुं स्वधर्मतया कर्तव्यत्वेन प्राप्तस्य युद्धस्याकरणे प्रत्यवायाऽकीर्त्याद्यनर्थपरम्परा आयास्यतीति नयभयाभ्यामर्जुनं स्वधर्मे प्रवर्तयति पञ्चभिः । तत्राद्येन हिंसारूपत्वाद्दोषाय भवतीति वा तेषु स्वीयत्वभ्रमेण वा स्वधर्मं युद्धं त्यक्ष्यसि चेत्प्रत्यवायः कीर्तिनाशश्चोभाभ्यामिहपरलोकभ्रंशः स्यादित्याह—

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥

अथ चेदिति । अथ युद्धसन्नाहसमनन्तरं त्वमिमं धर्म्यं धर्मत्वेन दृष्टं विध्युक्तं संग्रामं न करिष्यसि चेत्तत्स्तदकरणेन कीर्तिमीश्वरादिभिः सह युद्धं कृतवानिति अर्जुनः स्वधर्मनिष्ठ इति वा कीर्तिं लोकप्रसिद्धां, स्वधर्मं स्वस्य धर्मं च धर्मावबोधकं शास्त्रं वेदादिलक्षणं वा स्वधर्मं त्यक्तवानसि । वेदोक्तकर्मत्यागेन वेदोऽपि त्यक्त एव भवति । एवं स्वधर्मं कीर्तिं च हित्वा वेदवेदोक्तकर्मत्यागलक्षणं पापमवाप्स्यसि नतु संन्यासफलमित्यर्थः ॥ ३३ ॥

एतावन्मात्रमेव न भवति किंतु—

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ ३४ ॥

अकीर्तिमिति । भूतानि अत्र चान्यत्र च विद्यमाना जनाः सर्वे स्वधर्मत्यागजनितामव्ययां चिरकालस्थायिनीमकीर्तिं च ते तव कथयिष्यन्ति सभासु पापिष्ठः स्वधर्मं त्यक्तवानिति । ननु स्वजनवधादागतनिन्दापेक्षया युद्धोपरतिकृतनिन्दा सोढुं शक्यत इति चेदुच्यते । 'ब्रह्मणे ब्राह्मणमालभेत' इति ब्राह्मणालम्भो विहितत्वाद्दोषाय न भवति यथा, तथा युद्धस्य शास्त्रीयत्वाद्युद्धे स्वजनवधो दोषाय न भवति । युद्धादुपरतेरस्वशास्त्रीयत्वात्तदुपरत्या आगतेयमकीर्तिर्दुष्कीर्तिः संभावितस्य तु । चस्त्वर्थः । धर्मात्मा सत्यसंधः शूरतमोऽर्जुन इति सर्वत्र सर्वैरीडितस्य सत्कीर्तेस्तव पुण्यपुरुषस्य मरणादतिरिच्यते अधिका भवति । लोके मरणदुःखं क्षणकालिकं दुष्कीर्तिदुःखं तु सतामापातभावित्वान्मरणदुःखान्महत्तरमतो दुष्कीर्तेर्वरं मरणमित्यर्थः ॥ ३४ ॥

अकीर्तिमात्रमेव न भवति, शूरास्त्वां लघुकरिष्यन्तीत्याह—

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥

भयादिति । महारथाः बाह्लीकभगदत्तसौमदत्तिद्रुपदादयः शूराः एवं दययोपरतं त्वां भीष्मेण द्रोणेन कर्णेन चान्यैर्वीरैर्योद्धुमशक्ततया तद्भयेन रणादुपरतोऽर्जुनो नतु दययेति मंस्यन्ते निश्चेष्यन्ति । पूर्वं येषां त्वं बहुमतः शौर्यधैर्ययुद्धचातुर्यादिगुणैरुत्कृष्ट इति बहुमानं गमितः सत्यमिदानीं तेभ्य एव लाघवं रणभयात्पलायत इति लघुत्वमवमतिं यास्यति । अकीर्तिः पारोक्षिकी तिरस्कृतिः, अवमतिर्लघुकृतिः आपरोक्षिकीति तयोर्भेदः ॥ ३५ ॥

विद्याकुलशीलधर्मकर्मभिः प्रतिष्ठां गतस्याकीर्तिर्दुःखं ततोऽप्यधिकं दुःखमवमतिस्ततोऽप्यधिकतरं दुःखं प्रत्यक्षदूषणमिदमित्याह—

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६ ॥

अवाच्यवादानिति । अहिताः शत्रवो दुर्योधनकर्णविकर्णादयस्तव सामर्थ्यमत्रादृश्यमानं पौरुषं पराक्रमं च निन्दन्तः रणात्पलायितवतस्तव शौर्यं किमिति कुत्सयन्तः सन्तश्चावाच्यवादान् वक्तुमनर्हानवाच्यान् वादान् धिक्शब्दपूर्वकान् दूषणशब्दाननेकधा इतो वदिष्यन्ति । ततः

कर्णकठोरेभ्यो मर्मघातिभ्यो दूषणवचनेभ्यो दुःखतरं क्षत्रियस्याभिमानिनः शूरस्य किंनु किमस्ति। न ततोऽन्यद्दुःखतरमस्तीत्यर्थः ॥ ३६ ॥

ननु युद्धे कृते गुर्वादिवधवशाच्छिष्टनिन्दा स्यादकृते शत्रुनिन्दा स्यादुभयथापि निन्दादुःखमेव फलाय भवति न ततोऽन्यदस्तीत्याशङ्कायां न कृते युद्धे यागवद्युद्धस्य स्वधर्मत्वाद्गुर्वादिहिंसायाः पशुहिंसावत्तदन्तःपातित्वान्न शिष्टनिन्दा नापि च शत्रुनिन्दास्ति जयेऽप्यजये च युद्धेन इष्टफलमस्तीत्याह—

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७ ॥

हतो वेति। युद्धे कर्णादिभिर्हतो वा निहतश्च त्वं स्वर्गं प्राप्स्यसि। रिपून् जित्वा जितवांश्चेन्निष्कण्टकां महीं भोक्ष्यसे। यस्माद्युद्धमुभयथा फलायैव भवति नतु विफलाय; तस्माद्युद्धायैव कृतनिश्चयः सन् हे कौन्तेय, उत्तिष्ठ। सन्नद्धो भवेत्यर्थः ॥ ३७ ॥

ननु 'हतो वा प्राप्स्यसि स्वर्ग'मिति वाक्येन युद्धस्य ऐहिकामुष्मिकसुखसाधनत्वमेव प्रतीयते नतु 'धर्म्याद्धि युद्धाच्छ्रेयोऽन्य'दित्युक्तन्यायेन श्रेयःसाधनता विद्यते। तत इन्द्रियारामाणामेव कर्तव्यं युद्धं, यतः स्वर्गादिसुखहेतुत्वं युद्धस्य दृश्यते ततो बन्धकत्वान्न परमार्थापेक्षावतामित्याशङ्कायां। न। भावनाभेदादत्र तत्फलभेदोऽप्यस्ति। यथा ज्योतिष्टोमः स्वर्गकामनया कृतः स्वर्गहेतुरकामनया चित्तशुद्धिहेतुः, तद्वद्युद्धं प्रजापरिपालनं दानं च कामाकामाभ्यां स्वर्गादिफलाय चित्तशुद्धये च भवति। श्रेयस्कामश्चेत्त्वं युद्धमकामनयैव कुर्वित्याह—

सुखःदुखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥

सुखदुःखे इति। लाभालाभौ जयाजयौ च तत्फलभूते सुखदुःखे च समे कृत्वा। समबुद्धिर्भूत्वा लाभादीनां सिद्ध्यसिद्ध्योर्हर्षविषादावकृत्वेत्यर्थः। मद्भक्त्या विधिविधेयो भूत्वा ततो विध्युक्ताय युद्धाय स्वधर्मानुष्ठानाय युज्यस्व यतस्व। एवं विध्युक्तं यत्तदीश्वरार्पणबुद्ध्या करिष्यामीत्येवं निश्चयेन युद्धं कुर्वन् पापं नावाप्स्यसि। 'ब्रह्मणे ब्राह्मणमालभेत' इति श्रुत्युक्ते नरमेधे ब्राह्मणमालभ्य कर्ता यथा पापं नाप्नोति तथा 'ये युध्यन्ते प्रधनेषु' इति श्रुत्युक्ते स्वधर्मे युद्धे गुर्वादीन् हत्वा गुर्वादिवधजं पापं नरमेधिवन्नावाप्स्यसीत्यर्थः ॥ ३८ ॥

ननु 'वेदाविनाशिनं नित्य'मित्यादिना ब्रह्म वेदो न किंचित्कर्तव्यमस्तीत्युपपाद्येदानीं 'स्वधर्ममपि चे'त्यादिना कर्म कर्तव्यमिति त्वया पुनः कर्म विधीयते। दुःखभूयिष्ठस्य कर्मणः करणापेक्षया कर्ता कारणं कार्यं च सर्वं मिथ्यैवेति कर्म सर्वं संन्यस्य तूष्णीमवस्थानमेव सुखमिति चेत्सत्यम्, एवंविधज्ञानमेवाहंममेत्यादिसंसारभ्रमविध्वंसकं भवति, तथापि तदारूढविषयं न त्वारुरुक्षुविषयमिति मुमुक्षूणां कर्म तत् संन्यासमार्गपरिज्ञानाय कर्मसंन्यासकर्मयोगयोर्विषयविभागं सूचयितुं कर्मानुष्ठानप्रकारं च बोधयितुमिदमाह—

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ ३९ ॥

एषेति । सांख्ये 'यया तदक्षरमधिगम्यते' इति ब्रह्मविद्भिः ऋषिभिः सम्यक् ख्यायते पठ्यत इति सांख्या परविद्या तया, संख्यया 'यत्तदद्रेश्यमग्राह्यम्' इत्यादिना प्रतिपाद्यत इति सांख्यं निर्विशेषं परं ब्रह्म तस्मिन् सांख्ये ब्रह्मणि विषये या बुद्धिरभिहिता 'न जायते म्रियते' इत्यादिना परं ब्रह्म विषयीकृत्य पूर्वं यज्ज्ञानं ते तुभ्यमुपदिष्टं सैषा बुद्धिः तज्ज्ञानमारूढस्यैवाश्रयणीयं नत्वारुरुक्षोः । आरुरुक्षोस्तव चित्तशुद्ध्यै श्रद्धयेश्वरार्पणबुद्ध्या निरभिमानेनाकामनया च सुखदुःखादिषु समबुद्ध्या च कर्मयोग एव कर्तव्यः नतु ज्ञानयोगस्तव । एवं कर्तव्ये योगे कर्मयोगे त्विमां वक्ष्यमाणलक्षणां बुद्धिं ज्ञानं शृणु । हे पार्थ, यया बुद्ध्या युक्तः समन्वितो वक्ष्यमाणोपदेशप्रकारेण कर्मयोगे वर्तमानः सन् त्वं कर्मबन्धं जन्ममृत्युजरादिभिः पुनःपुनः पुरुषं बध्नाति योजयतीति बन्धः कर्मैव बन्धः कर्मबन्धस्तं प्रहास्यसि । बन्धकेभ्यः सर्वेभ्यः कर्मभ्यो वैदिककर्मानुष्ठानसंभावितचित्तशुद्ध्युत्पन्नाऽकर्त्रात्मविज्ञानबलेन निष्क्रान्तो भविष्यसीत्यर्थः । नन्वीश्वर एव कर्ता कारयिता कर्मणां फलभोक्ता चेत्यध्यवसायात्मिकयैव बुद्ध्या कर्मबन्धप्रहाणे सति किमकर्त्रात्मज्ञानेन कर्मबन्धान्मुक्तो भविष्यसीति मध्ये कर्मबन्धस्यात्मज्ञाननिवर्त्यत्वकल्पनयेति चेद्भवानत्र प्रष्टव्यः, किं कर्मणामीश्वरार्पणमात्रेण कर्मबन्धनिवृत्तिरुच्यते उतेश्वर एव कर्ता कारयितेत्युक्तिमात्रेण वा कर्मबन्धनिवृत्तिरिति । नाद्यः। तावन्मात्रेण नैष्कर्म्यासंभवात् । 'नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः' इति परमेश्वरस्य भक्तैर्दत्तसुकृतदुष्कृतादेरनादानस्मरणादङ्गीकृतेऽप्यस्मिन् पक्षे शतकोटिब्रह्मकल्पेषु कृतानामनर्पितानां सुकृतादिकर्मणां

निवृत्त्यसंभवाच्च । भक्तेरिदानींतनत्वात्तेषां तत्समर्पणायोगाद्यदा जन्मारब्धं तदारभ्यास्त्येव भक्तिरिति चेन्न । तथात्वे जन्मान्तर एव तव मुक्तिप्रसङ्गात् 'लोकत्रयाधिपतिमप्रतिमप्रभावमीषत्प्रणम्य शिरसा प्रभविष्णुमीशम् । जन्मान्तरप्रलयकल्पसहस्रजातमाशु प्रणाशमुपयाति नरस्य पापम् ॥' इति सकृत्प्रणतेः संसारमहासागरतारकमित्यादिभक्तवाक्यानामप्रामाण्यप्रसङ्गाच्च । तत्रापि च पापस्यैव नाशो नतु पुण्यस्य । न द्वितीयः । 'अयुद्धेन हतो वाली तस्येदं कर्मणः फलम्' इति स्वकृतकर्मण एवापरिहार्यत्वे ईश्वरस्य परकृतकर्मपरिहारायोगात्ततोऽविक्रियात्मविज्ञानादेव पुरुषस्य सर्वकर्मनिवृत्तिर्वक्तव्या । तथाच श्रुतिः—'सर्वं पाप्मानं तरति', 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इत्यादि । तर्हि 'बुद्ध्या युक्तो यया पार्थ' इति वचनस्य का गतिरिति चेत्तस्य फलाभिसंधिराहित्येन कृतं कर्म बन्धाय न भवतीति कर्मस्तुत्या मुमुक्षुभिर्निष्कामत्वेन चित्तशुद्ध्यै कर्म कर्तव्यमिति कर्मविधिपरत्वमेव गतिरिति ब्रूमस्ततोऽविक्रियात्मविज्ञानादेव कर्मबन्धनिवृत्तिरिति सिद्धम् ॥ ३९ ॥

उक्तमेव कर्मयोगं मुमुक्षुप्रवृत्त्यै स्तौति—

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥

नेहेति । इह मोक्षैकप्रयोजने उक्तकर्मयोगे नाभिक्रमनाशोऽस्ति अभिक्रम उपक्रमः कर्मण आरम्भस्तस्य नाशो नास्ति । कृषिवाणिज्यादावारब्धे सति क्वचित्फलति क्वचिन्न फलति न तथेदं किंतु नियतफलवदेव भवति मुक्तिवत् । अत्र प्रत्यवायो न विद्यते ज्ञानाज्ञानकृतकर्मनियमादिलोपकृतो दोषः राजाज्ञावन्नानर्थाय कल्पते । अस्य भक्त्या क्रियमाणस्येश्वराराधनात्मकस्य वेदोक्तस्य धर्मस्य संबन्धि स्वल्पमपि केवलाग्निहोत्रं वा श्रौतमौपासनं वा स्मार्तं श्रद्धया कृतं कर्म चित्तशुद्धिजननद्वारा ज्ञानहेतुत्वात् कर्तारं महतो भयाज्जननमरणदुःखात्त्रायते रक्षत्यतो मुमुक्षोः श्रौतं स्मार्तं चोभयं वा श्रद्धाभक्तिभ्यामकामनयेश्वरप्रीत्यै यथाशक्त्यवश्यं कर्तव्यमीश्वरप्रीत्यर्थमेव कृतेन कर्मणा पुमान् तरति नान्यथेति सूचितं भवति ॥ ४० ॥

योगविषयिण्या बुद्ध्या विशिष्टः पुमान् तरतीत्युक्तं योगविषयिणी बुद्धिः केत्याकाङ्क्षायां तस्याः स्वरूपं वदन् तदितरबुद्धिविशिष्टानां न कदाचित्तरणमस्तीति सूचयति—

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

व्यवसायात्मिकेति । 'मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च। अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ॥' इति श्रवणात्कामसंकल्पादिकषायरहिततया शुद्धत्वेनेश्वर एवास्माकं परा गतिरिति व्यवस्थितो व्यवसायो निश्चयो यस्यां सा व्यवसायात्मिका । वस्तुतत्त्वनिश्चयवतीश्वराश्रया बुद्धिरिह मोक्षैकप्रयोजने कर्मयोगे प्रवृत्तस्य व्यवसायिनो मुमुक्षोरेकैव बहिरन्तः सदैकरूपैव भवति । 'यो वा एतदक्षरं गार्ग्यविदित्वास्मिंल्लोके जुहोति यजते तपस्तप्यते अन्तवदेवास्य तद्भवति' इति व्यतिरेकमुखेन विदित्वा जुह्वतो यजतस्तप्यतश्च सर्वं कर्म वैदिकमनन्तवदेव भवतीति वदच्छ्रुतिप्रमाणजनितत्वादेकरूपेणैव तिष्ठति न कदाचिद्भिद्यते । अव्यवसायिनां विवेकबुद्धिरहितानां व्यवस्थाशून्यानामेव कामिनां बुद्धयो बहुशाखा बहुप्रकाराः 'आशास्तेयं यजमानोऽसौ' इत्युक्तप्रकारेण बह्वर्थविषयत्वाद्बहुधा भिद्यन्ते । अतएवानन्ताः काम्यानामनन्तत्वात्, एवं बुद्धीनामनन्तत्वे तद्वतां संसारोऽप्यनन्त एव भवति न कदाप्युपशाम्यतीत्यर्थः ॥ ४१ ॥

नन्वव्यवसायिनामपि योगबुद्धिरस्त्वित्याकाङ्क्षायां कामपराणां तेषामेषा नान्तःकरणमारोहतीति बोधयितुं तेषां स्वभावं वर्णयति त्रिभिः—

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥

यामिमामिति । वेदवादरताः उच्यन्त इति वादा वाक्यानि वेदस्य वादाः वेदवादास्तेषु 'वायव्यं श्वेतमालभेत भूतिकामः' इत्यादिषु कर्मतत्फलतत्साधनप्रकाशकेष्वर्थवादादिवेदवाक्येषु रताः निरतास्तत्रैव तात्पर्यवन्तः । अतएव नान्यदस्तीति वादिनः कर्मतत्फलेभ्यः साधनसाध्येभ्योऽन्यदपीश्वरो वा मोक्षो वा किंचिन्नास्तीति प्रष्टृभ्यो वक्तारो वदनशीलाः, यतोऽविपश्चितः वेदानामुपक्रमोपसंहारादिषु तात्पर्यानभिज्ञाः बहिर्मुखा मीमांसकाः पुष्पितां पुष्पैर्मल्लिकालतावत् 'अपाम सोमम्' इति, 'दक्षिणावन्तो अमृतत्वं भजन्ते' इति, 'पश्यति पुत्रम् । पश्यति पौत्रम्' इति, 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इत्याद्यर्थवादलक्षणैः फलशून्यैः पुष्पै रञ्जयन्तीमिमां जन्मकर्मफलप्रदामित्यादिना वक्ष्यमाणलक्षणां यां वाचं 'अग्निमीळे पुरोहितं', 'इषेत्वोर्जेत्वा', 'ब्रह्म संधत्तं तन्मे जिन्वतम्' इत्यादिवाक्यरूपां प्रवदन्ति । कर्मकाण्डमेव प्राशस्त्येन वदन्ति नतूपासनाकाण्डं नापि ब्रह्मकाण्डमित्यर्थः ॥ ४२ ॥

योगबुद्ध्यनर्हत्वे तेषां स्वभावो दुष्ट इति सूचयितुं तद्गुणानेव वर्णयति कृष्णः—

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥

कामात्मान इति। स्वर्गपराः स्वर्ग एव परो निरतिशयः पुरुषार्थ इति निश्चयो येषां ते स्वर्गपराः, तत एव भोगैश्वर्यगतिं प्रति भुज्यन्त इति भोगा दिव्याः स्रक्चन्दनवनितादयस्तेषां समग्रभोगायैश्वर्यमीश्वरत्वं स्वामित्वं तस्य गतिः प्राप्तिस्तां प्रत्येव काम इच्छावेग आत्मनि बुद्धौ येषां ते कामात्मानः विषयभोगलम्पटा मीमांसकाः कामिनः। क्रियाविशेषबहुलां क्रियाविशेषा अग्निष्टोमातिरात्रादयः फलविशेषहेतवो बहुला बहवो यया प्रतिपाद्यन्ते सा क्रियाविशेषबहुला तां तत एव जन्मकर्मफलप्रदाम्। जन्मपदेन मृत्युजरारोगास्तद्दुःखानि च लक्ष्यन्ते। जन्मादय एव स्वप्रतिपादितकर्मणां फलानि जन्मकर्मफलान्यनुष्ठातृभ्यः प्रददातीति जन्मकर्मफलप्रदां, नानायोनिषु जन्मानि कर्मफलानि सुखादीनि च स्वप्रकाशितकर्मकर्तृभ्यो यच्छतीति वा तां जन्मकर्मफलप्रदां वाचं प्रवदन्तीति पूर्वेणान्वयः ॥ ४३ ॥

यत एवंलक्षणास्ततस्तेषां योगबुद्धिस्तत्फलं च न सिध्यतीत्याह—

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥

भोगेति। अर्थवादबहुलया तया कर्मकाण्डलक्षणया वाचाऽपहृतचेतसां अपहृतं तिरोभावितं चेतः कार्याकार्यविवेकविज्ञानं येषां ते अपहृतचेतसः विषयाशाभ्रामितबुद्धयस्तेषां, अतएव भोगैश्वर्यप्रसक्तानां भुज्यन्त इति भोगा भोग्यपदार्था ऐश्वर्यं तेषामीश्वरत्वं तयोरेव प्रसक्तानां तेषाम्। समाधौ समाधीयते पुरुषो विषयेष्वनेनेति समाधिः, वासनात्मना जगत्सर्वं समाधीयते पुरुषेणास्मिन्निति वा समाधिरन्तःकरणं तस्मिन्व्यवसायात्मिका बुद्धिर्योगबुद्धिर्न विधीयते न प्रवेश्यते कामैरन्तरालाभावान्न प्रविशति यतस्ततः 'कारणाभावे कार्याभावः' इति न्यायेन योगबुद्ध्यभावे तत्कार्यभूतो मोक्ष एतेषां कदापि न संभवतीत्यर्थः ॥ ४४ ॥

एवं श्रुतिवाक्यानामुपक्रमोपसंहारादिष्ववावान्तरतात्पर्यं महत्तात्पर्यं चाविजानतामर्थवादैर्मोहितानां कामिनां योगबुद्ध्यभावादीश्वरप्रसादाभावस्तेनैव संसारोपरमाभाव इति प्रतिपाद्य, इदानीं केवलमुमुक्षूणां योगबुद्धिमतामीश्वरप्रीत्यै कर्म कुर्वतां प्ररोचनवाक्यैर्न मोहितव्यमिष्टानिष्टप्राप्तौ

समबुद्ध्या श्रद्धाभक्तिभ्यामीश्वराराधनात्मकं कर्म वैदिकं कर्तव्यमिति सूचयितुमाह—

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥ ४५ ॥

त्रैगुण्येति । राजसास्तामसाः सात्त्विकाश्चेति त्रिविधा गुणास्त्रिगुणा रागद्वेषलोभमोहादयस्तेषां तत्कार्याणां तत्फलानां च समाहारस्त्रैगुण्यं संसारः स एव विषयः कर्मतत्साधनादिप्रकाशनद्वारा वर्धनीयत्वेन गोचरो येषां ते त्रैगुण्यविषया वेदाः । संसारवृद्धेर्वेदोक्तकर्माधीनत्वेन वेदास्त्रैगुण्यविषया इत्युच्यन्ते । त्रैगुण्यस्य वेदविषयत्वेन सर्वेषामुपादेयत्वे सत्यपि न तन्मुमुक्षुभिरादर्तव्यमित्याह—**निस्त्रैगुण्य इति** । यतस्त्वं मोक्षेच्छया योगबुद्धियुक्तः स्वधर्मे प्रवृत्तस्ततो निस्त्रैगुण्यो भव प्ररोचनश्रुतिभ्यो रागद्वेषादिभ्यस्तत्प्रधानकर्मभ्यस्तत्फलेभ्यश्च निष्क्रान्तो भव । निर्द्वन्द्वश्च इष्टानिष्टपदार्थौ द्वौ द्वन्द्वशब्दवाच्यौ रागद्वेषादिदोषजनकौ तत्र समबुद्ध्या ताभ्यां निष्क्रान्तो भव । मोक्षस्य तत्साधनस्य च शमदमक्षान्त्यादेः सत्त्वगुणैकलभ्यत्वान्निस्त्रैगुण्यत्वेऽपि मुमुक्षोः सत्त्वेन भवितव्यमित्याशयेनाह—**नित्यसत्त्वस्थ इति** । नित्यं सत्त्वगुण एव तिष्ठतीति नित्यसत्त्वस्थो भव । विवेकवैराग्यशमदमादिष्वेव तिष्ठेत्यर्थः । योगक्षेमपरस्य रागद्वेषादिः प्रसज्यते तेन शमादयः पलायन्ते ततः साधनविच्छित्तिस्तया मोक्षाऽसिद्धिस्ततो मुमुक्षोस्ताभ्यां निर्गमः कर्तव्य इत्याशयेनाह—**निर्योगक्षेमो भवेति** । अविद्यमानस्य संपादनं योगः । विद्यमानस्य पालनं क्षेमः । प्रारब्धाधीनो भूत्वा त्वं ताभ्यां निष्क्रान्तो भव । मनसो विषयान्तरपारवश्ये स्वधर्मो न सिध्यत्यतस्तदभावेन भवितव्यमित्याह—**आत्मवानिति** । विहिते कर्मणि श्रवणध्यानकीर्तनादिष्वेव स्थित आत्मा मनोऽस्यास्तीत्यात्मवान् । निश्चलचित्तो भवेत्यर्थः । यद्वा 'न जायते म्रियते वा कदाचित्' इति, 'वेदाविनाशिनम्' इत्यादिवाक्यैः प्रतिपादिता सांख्यविषया बुद्धिर्यदि तवास्ति दृढा, तदा त्वयैवं स्थातव्यमिति ज्ञानिनः कर्तव्यं सूच्यते । त्रयो गुणाः सत्त्वादयो यस्य सन्ति तत्त्रिगुणं जगद्बीजमव्याकृतं तस्मादुत्पन्नं जगत्त्रैगुण्यं तदेव प्रतिपाद्यत्वेन विषयो येषां ते त्रैगुण्यविषयाः । साध्यसाधनसाधकफलदेवतात्मकजगत्प्रकाशनपराः सर्वे वेदा इत्यर्थः । वेदतदुक्तकर्मतत्फलेषु प्रवृत्तस्य द्वैतज्ञानबाधं विना नाद्वैतज्ञानं तन्निष्ठा तत्फलमपि न सिध्यति । अतस्तन्निष्क्रमो विदुषा कर्तव्य इत्याह—

निस्त्रैगुण्यो भवेति। 'वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्' इति स्मरणाद्वेदेभ्यस्तदुक्तकर्मभ्यस्त्रैगुण्याज्जगतश्च सर्वस्मान्निष्क्रान्तो भव। सर्वसंन्यासं कुर्वित्यर्थः। कृतेऽपि सर्वसंन्यासे बहिर्मुखस्य द्वैतावलम्बिनो ब्रह्मनिष्ठायोगात्तदयोगे ज्ञानभ्रंशस्तेन मोक्षो न सिध्यत्यतो ज्ञानिना द्वैतावलम्बनं त्यक्तव्यमित्याह—**निर्द्वन्द्व इति**। द्वन्द्वे नामरूपे। सर्वत्र तयोर्ग्रहणान्निर्गतो भव। नामरूपयोर्ग्रहणं माकुर्वित्यर्थः। निद्रां कुर्वतो नामरूपग्रहणं न संभवत्यतः प्राप्तां तां विदुषो निषेद्धुमाह—**नित्यसत्त्वस्थ इति**। सतो भावः सत्त्वं ब्रह्मस्वरूपं नित्यं तस्मिन्नेव तिष्ठतीति नित्यसत्त्वस्थो भव। सर्वदा ब्रह्मैवानुसंवेहीत्यर्थः। ब्रह्मविदः शरीरयात्रापि ब्रह्मदृष्ट्यैव कर्तव्या नतु बाह्यदृष्ट्येति सूचयितुमाह—**निर्योगक्षेम इति**। स्थितस्यैव देहस्याहिकण्टकादिभ्यस्तात्पर्येण पालनं क्षेमः, तस्यानुकूलद्रव्यसंपादनं योगः, तदुभयस्यापि प्रारब्धाधीनत्वात्स्वदृष्ट्या देहाभावाच्च अधिष्ठानज्ञानबलेन तयोर्निर्गमं कृत्वा निर्योगक्षेमो भव। ब्रह्मनिष्ठायां प्रमादः क्वचिदपि माभूदित्याह—**आत्मवान्**। आत्मा ब्रह्माकारबुद्धिः सदा सैवास्यास्तीत्यात्मवान्। यद्वा अहंबुद्धेर्विषय आत्मैव सदास्तु न क्वचित्प्रमादेनाप्यनात्मेति मत्वाह—**आत्मवान्भवेति**। अनात्मानमहंबुद्धेः क्वचित्कदाचिदपि विषयं मा कुर्वित्यर्थः॥ ४५॥

ननु ब्रह्मविदः श्रुत्युक्तसर्वकर्मसंन्यासे 'साधनाभावे साध्याभावः' इति न्यायेन तत्तत्कर्मविशेषलभ्याः सुखविशेषा न संभवन्ति। तर्ह्युन्मत्तस्येव निष्फलैवास्य प्रवृत्तिरित्याशङ्कायाम्। न। 'सर्वं पदं हस्तिपदे निमग्नम्' इति न्यायेन सत्क्रियालभ्याः सार्वभौमादिब्रह्मान्ता आनन्दाः सर्वे ब्रह्मानुभूतौ तिष्ठतोऽस्यारूढस्य संभवन्तीति सदृष्टान्तमुपपादयति—

यावानर्थ उदपाने सर्वतःसंप्लुतोदके।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥ ४६॥

यावानिति। उदमुदकं पिबन्त्यस्मिन्नित्युदपानं जलाशयः। जातावेकवचनम्। तस्मिन्नुदपाने भूमौ सर्वत्र विद्यमानवापीकूपतटाकपुष्करिणीनदनद्यादौ पुण्यतीर्थे स्नानदानार्चनादिक्रियया साध्यमानोऽर्थः पुण्यलक्षणो यावान् यावत्परिमाणकः सिध्यति। सर्वतःसंप्लुतोदके सर्वत्र संप्लुतं परिपूर्णमुदकं यस्य स सर्वतःसंप्लुतोदकः समुद्रस्तस्मिन्नेव स्नानदानार्चनादिक्रियया लभ्यमानः पुण्यरूपोऽर्थस्तावानेन गङ्गादिपुण्यतीर्थेषु तत्र तत्र पृथक्पृथक् क्रियमाणस्नानदानादिक्रियालभ्यमानपुण्यविशेषैः समानपरिमाण एव सिध्यति न ततो न्यूनायते। शते पञ्चा-

शन्न्यायेन परिच्छिन्नजलानां गङ्गादीनां समुद्रेऽन्तर्भावात् । एवमेव सर्वेषु वेदेषु ऋगादिषु प्रसिद्धैः कर्मभिर्यागयज्ञदानाध्ययनव्रततपोयोगादिभिरन्यैश्च पुण्यविशेषैः संपाद्यमानः श्रुत्युक्त आनन्दः सार्वभौमादिब्रह्मान्तः पुनः पुनः शतगुणितो यावान् भवति तावानानन्दो विजानतः सर्वमिदमहं च ब्रह्मैवेति जगत्सर्वं स्वं च सच्चिदानन्दं ब्रह्मैव पश्यतो ब्राह्मणस्य ब्रह्मविद्यतेर्ब्रह्मानुभूत्या सिध्यति । ततो ब्रह्मविन्नित्यानन्द एव भवति । 'स मोदते मोदनीयं हि लब्ध्वा' इति श्रुतेः । यद्वा उदपाने भूमौ सर्वत्र विद्यमानवापीकूपतटाकनदनद्यादौ जलप्रदेशे विद्यमानो जलरूपोऽर्थो यावान् तिष्ठति तावान् स जलरूपोऽर्थः सर्वतः संप्लुतोदके समुद्रे एककोणस्थितजलस्यांशांशो भवति यथा, तथा वेदेषु शब्दादिविषयजातं विदन्ति जानन्तीति वेदाः । विदधातोः कर्तर्यच् । ब्रह्मादिपिपीलिकान्ताः सर्वे प्राणिनस्तेषु वेदेषु सर्वेषु प्राणिषु पुण्यकर्मपरिपाकवशादिष्टार्थसान्निध्ये प्रतीयमान आनन्दरूपोऽर्थः यावान् तावान् आनन्दरूपोऽर्थः सर्वतःसंप्लुतोदकस्थानीये ब्रह्मणि स्थितानन्दस्य लेशांशो भवति । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः । एवं स्वप्रतिबिम्बलेशांशमात्रेण ब्रह्मादिपिपीलिकान्तप्राणिजातस्य तत्तत्पुण्यविशेषतारतम्येन सुखतारतम्यप्रदं सर्वतःसंप्लुतोदकस्थानीयमद्वितीयं सत्यज्ञानानन्दघनं परं ब्रह्म विजानतः एतदेवाहमिति स्वस्वरूपत्वेन साक्षात्कृतवतो ब्राह्मणस्य ब्रह्मविदोऽखण्डाकारवृत्त्या सर्वदाऽनुभूयमानोऽनन्तो बिम्बानन्द एवंलक्षण एतावानिति वक्तुं न केनापि शक्यत इत्यर्थः ॥ ४६ ॥

यद्यप्येवंलक्षणसंपन्नस्यैव ब्रह्मवित्तमस्य सर्वकर्मसंन्यासेऽधिकारस्तथापि शोकमोहाविष्टत्वादिधर्मैर्विचार्यमाणे नैतल्लक्षणं त्वयि दृश्यते । ततस्तव कर्मण्येवाधिकारो नतु ज्ञाने नापि च संन्यासे इति वदन् शतधा कृतश्रवणानामप्यनुदितात्मज्ञानानां मुमुक्षूणां स्वधर्मानुष्ठानमवश्यं कर्तव्यं न क्वचिदपि त्यक्तव्यमिति निष्कर्षमाह—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ ४७ ॥

कर्मणीति । मुमुक्षोस्तव श्रुतिस्मृतिभ्यां विहिते काम्यवर्जिते नित्ये नैमित्तिके च कर्मण्येवाधिकारो योग्यता नान्यत्र ज्ञाननिष्ठायां संन्यासे वेत्यन्ययोगव्यवच्छेदार्थ एवकारस्तत्रापि कर्मफलेषु 'यज्ञो दानं तपश्चैव पावनानि' इति, 'धर्मेण पापमपनुदति' इति नित्यानामपि फलश्रवणा-

त्तत्फलेषु मा ते अधिकारः नास्ति योग्यता । कदाचिदपि कर्मफलेष्वपेक्षा न कर्तव्येत्यर्थः । कर्मफलेष्वपेक्षितेषु सत्सु बीजे सत्यङ्कुरवत्पुनर्जन्मादयो दुःखभूमयः स्वयमेव स्युस्तस्मान्मा कर्मफलहेतुर्भूः यथा स्वर्गकामी स्वर्गफलहेतुस्तथा त्वमेतत्कर्मफलहेतुर्माभूः । कर्मफलेष्वपेक्षावान्मा भवेत्यर्थः । ननु फलशून्यं तत्रापि क्लेशप्रधानं कर्म कर्तुं न शक्यते तदपेक्षया तत्त्यागः सुखावह इत्याकाङ्क्षायामारुरुक्षोः कर्मत्यागो न युक्त इत्याशयेनाह—**मा त इति** । अकर्म कर्मव्यतिरेकः क्रियात्याग इति यावत् । तस्मिन्नकर्मणि ते सङ्गो मनःसक्तिर्मास्तु । अकरणे प्रत्यवायस्तेन नरको दुर्योनिश्च स्यात् । अतो मुमुक्षोः कर्मसंन्यासो न युक्त इत्यर्थः । एतेन कर्मफलानपेक्षया श्रद्धया चेश्वरप्रीत्यर्थं भक्त्या कर्म कुर्वत एव मोक्षो नान्यथेति सूचितं भवति ॥ ४७ ॥

जन्मादिदुःखनिःशेषनिवृत्त्यपेक्षैव तवास्ति चेत्तर्हि त्वं कर्मैव कुर्वित्युपदिशति—

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनंजय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ ४८ ॥

योगस्थ इति । 'निर्दोषं हि समं ब्रह्म' इति वक्ष्यमाणं ब्रह्मात्र समशब्देनोच्यते । समस्य भावः समत्वं तदेव ज्ञानेन युज्यते प्राप्यत इति योग इत्युच्यते । तस्मिन् योगे ब्रह्मणि स्वस्य तद्भावापत्त्यैतदेकापेक्षया तिष्ठतीति योगस्थो मोक्षैककामः सन् त्वं सङ्गं एतैर्मम दुरितक्षयोऽस्त्विति प्रतिबन्धनिवृत्तिरस्त्विति वा, प्रसीदत्वीश्वरो मह्यमिति वा, कर्मजन्यं फलं मे भूयादिति वा, सङ्गः कामस्तं कर्मसु त्यक्त्वा प्रारब्धस्य कर्मणः साङ्गतासिद्धिस्तदभावोऽसिद्धिः, ईश्वरप्रसादप्राप्तिः सिद्धिस्तदप्राप्तिरसिद्धिः, चित्तप्रसक्तिः सिद्धिस्तदभावोऽसिद्धिरित्यादिसिद्ध्यसिद्ध्योः समो हर्षविषादशून्यो भूत्वा कर्माणि क्लेशात्मकान्यपि विहितानीति बुद्ध्या कुर्वित्यर्थः ॥ ४८ ॥

मोक्षेच्छयैव फलानपेक्षया समबुद्ध्या च कर्माणि नित्यानि नैमित्तिकानि च कुर्वतश्चित्तशुद्धिर्यदा जायते कर्मभिस्तत्फलैश्च भोग्यैर्न किमप्यस्ति तुच्छैरित्यलंबुद्धिलक्षणा तदा निकृष्टफलदे कर्मण्यनास्थया ज्ञानयोग एवादर्तव्य इति बोधयति—

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥

दूरेणेति । बहुसाधनसाध्यत्वात्क्लेशभूयिष्ठत्वादसाङ्गत्वे फलवैगुण्यात्सा-

ज्ञत्वे च जन्मादिदुःखबीजत्वादकरणे प्रत्यवायजनकतया निरयहेतुत्वाच्च अवरं निकृष्टं कर्म नित्यनिरतिशयमोक्षसुखहेतोर्बुद्धियोगाज्ज्ञानयोगाद्दूरेण वर्तते 'दूरमेते विपरीते विषूची', 'अविद्या या या च विद्या' इति श्रवणाद्विपरीतभावहेतुतया मोक्षहेतोर्ज्ञानयोगस्य दूरमेव भवति । 'अष्टादशोक्तमवरं येषु कर्म' इति श्रुत्योक्तमवरत्वं कर्मणो हिशब्दो द्योतयति । अतः कर्म नास्थेयमिति भावः । ननु बहवः कर्मयोगमेवानुतिष्ठन्ति कथं कर्माऽवरमित्यत आह—**कृपणा इति** । कर्मजन्यफलस्य स्वर्गस्य, सुखस्य वाप्यैहिकस्य हेतवः कर्मफलहेतवः कर्मफलप्रार्थिनः कामिनो ये त एव कृपणा अधमा नीचाः । 'यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणः' इति श्रुतिर्विशिष्टजन्यकर्मशीलगुणवतोऽप्यजानत एव ब्रह्मतत्त्वं कर्मिणोऽधमत्वं ब्रवीति । एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति', 'यत्कर्मिणो न प्रवेदयन्ति रागात्तेनातुराः क्षीणलोकाश्च्यवन्ते' इति कर्मिणां कर्मफलमोहितानां ब्रवीति श्रुतिरनर्थमेव । अतो धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्त इति । 'एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य', 'ज्ञानादेव तु कैवल्यं,' 'यया चिरात्सर्वपापं व्यपोह्य परात्परं पुरुषमुपैति विद्वान्' इत्यादिश्रुतिभिर्विवेकवतां भोग्येष्वप्रार्थ्यत्वं मोक्षस्यैव प्रार्थ्यत्वं विद्यैकगम्यत्वं च प्रतिपाद्यते यस्मात्तस्माद्धनंजय, बुद्धौ सांख्यबुद्धौ चित्तप्रसादासादितज्ञानसंयोग एव शरणं वासं मनसोऽन्विच्छ तत्रैव मनः स्थापय । तव चित्तं यदा प्रसीदति तदारभ्य ज्ञानयोग एव तिष्ठ । अवरत्वादसाधनत्वादनात्मन्यात्मताधीहेतुत्वाच्च न कचित्कर्मणि तिष्ठेत्यर्थः । एतेन यावच्चित्तप्रसादस्तावदेव कर्मसाधनं मुमुक्षोरतः परं ज्ञानयोग एवेति सूचितम् । तेन यावज्जीवमग्निहोत्रमपक्वबुद्धेरेवेति सिद्धम् ॥ ४९ ॥

मुमुक्षोर्जन्मादिहेतूनां सर्वेषामपि कर्मणां निःशेषनिवृत्तिर्ज्ञानयोगबलेनैव सिध्यति नान्येन । अतस्त्वं तत्रैव निष्ठां कुर्विति बोधयति—

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥

बुद्धियुक्त इति । बुद्धिः सांख्यविषया निरुक्ता तया युक्तः ज्ञानयोगेन युक्तो ब्रह्मविदारूढः स्वस्य कूटस्थासङ्गचिदात्मत्वविज्ञानबलेनैव इहलोके जन्मान्तरशतसहस्रेष्वधुना ज्ञानोत्पत्तेः प्रागूर्ध्वं च कृते नानायोनिसहस्रप्रापके उभे सुकृतदुष्कृते जहाति । ज्ञानाग्निना निर्मूल्यात्र

जीवन्नेव मुक्तो भवति यस्मात्तस्मात्त्वं योगाय ज्ञानयोगाय युज्यस्व यतस्व। ननु कृच्छ्रचान्द्रायणादिप्रायश्चित्तैस्त्रिसुपर्णादिजपैरश्वमेधादियागैर्गङ्गादिमहानदीस्नानदानैश्च सर्वपापक्षये सति किमर्थं ज्ञानयोगाभ्यासक्लेश इति चेत्। न। तैर्निःशेषनिवृत्त्यसंभवादुक्तः प्रायश्चित्तादयो यदुद्देशेन क्रियन्ते तैस्तदेव निवर्त्यते नेतरत्। अन्यथा प्रायश्चित्तभेदविध्यानर्थक्यप्रसङ्गात्। 'तरति ब्रह्महत्यां योऽश्वमेधेन यजते' इति ब्रह्महत्याव्यतिरिक्तपापतरणाश्रवणात्कृतेऽपि प्रायश्चित्तादौ पापस्यैव निवृत्तिर्न तु पुण्यस्य शतकोटिजन्महेतोः।नहि पुण्यस्य निवर्तकमस्ति महत्साधनं विनात्मज्ञानम्। 'तदा विद्वान्पुण्यपापे विधूय' इति, 'स य एवंविद्वानेते आत्मानँ स्पृणुते' इति स्मृतावत्रैवास्ति उभे सुकृतदुष्कृते इत्यतः पापपुण्योभयात्मकेषु कर्मसु निवर्तितव्येषु सत्सु योगो ज्ञानयोग एव कौशलं कुशलमेव कौशलं निपुणं ज्ञानकुशलैर्दृष्टं परमं साधनं तस्माद्योगाय युज्यस्वेति पूर्वेणान्वयः। जहातीह उभे इत्यत्रासंधिरार्षः॥ ५० ॥

फलानपेक्षया समबुद्ध्या च सम्यगनुष्ठितनित्यनैमित्तिककर्मपरिपाकसंजातचित्तशुद्धेः फलभूतायाः श्रवणादिजनिताऽविक्रियाऽऽत्मतत्त्वविज्ञानसिद्धेः फलमाह—

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्॥ ५१ ॥

कर्मजमिति। बुद्धियुक्ताः बुद्धिः सांख्यबुद्धिर्ब्रह्मात्मैकत्वविज्ञानं तया युक्तास्तन्निष्ठासंपन्नाः हि ज्ञानयोगनिष्ठाः खलु मनीषिणो विद्वांसः कर्मजं कर्मभ्यः संचितादिभ्यो जातं नानायोनिसहस्रप्रापकं फलं जन्मादिलक्षणं त्यक्त्वा 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन ज्ञानाग्निना सर्वेषामपि कर्मणां दाहे सति तत्फलानां च जन्मादीनां दाहसंभवात्तेन त्यक्तकर्मफला भवन्ति। आत्मनः कूटस्थत्वासङ्गत्वविज्ञानशक्तिबलेन विद्वांसः स्वयं कर्मफलाऽविषया भूत्वेत्यर्थः। जन्मबन्धविनिर्मुक्ताः जन्मना बन्धः संबन्धो यस्य स जन्मबन्धो देह उत्तरकालभावी वर्तमानश्च तेन विनिर्मुक्ताः कारणाभावाद्भाविदेहसंबन्धरहितास्तादात्म्याभावाद्वर्तमानदेहसंबन्धरहिताश्च सन्तः स्वयमिह जीवन्त एवाऽनामयमाध्यात्मिकादिसर्वोपद्रवरहितं नित्यशुद्धबुद्धमुक्तस्वभावमखण्डानन्दैकरसं पदं पद्यते ज्ञानेन प्राप्यत इति पदं परं ब्रह्म गच्छन्ति। अविद्याकृतं वासनाकृतमप्यन्यभावं परित्यज्य तद्भावमेव प्राप्नुवन्तीत्यर्थः। हिर्विद्वदनुभवद्योतनार्थः॥ ५१ ॥

चित्तशुद्धिजन्यं सर्वत्रासंबुद्धिलक्षणं वैराग्यं प्रज्ञास्थैर्यलक्षणं योगं च कदा केन वा प्राप्स्यामीत्यभिप्रायमर्जुनस्यालक्ष्य यदा तव बुद्धिकालुष्यनिवृत्तिर्यदा वा प्रज्ञा निर्विकल्पा भविष्यति तदा वैराग्यं योगं च प्राप्स्यसीत्येतद्वयं श्लोकद्वयेन क्रमेण प्रतिपादयति—

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥

यदेति । सदसद्विवेकशून्यतयान्तःकरणमसत्स्वेव विषयेषु रम्यमरम्यमिष्टमनिष्टं ग्राह्यमग्राह्यमिति येन रागद्वेषग्रस्तं सत्सर्वदा प्रवर्तते तदेव मोहकलिलं मोहो विचित्तता विषयजातमेतत्सर्वमसन्मायिकं तुच्छमिति विवेकाभावः पदार्थापरिज्ञानं तदेव कलिलं कालुष्यं दर्पणस्य धूलिपटलवद्विवेकबुद्धेरावरणमेवंलक्षणं मोहकलिलं ते बुद्धिर्यदा व्यतितरिष्यति 'यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः । नश्वरं गृह्यमाणं च विद्धि मायामनोमयम् ॥' इत्यादिवचनार्थस्य सम्यग्ग्रहणजन्येन शिवप्रसादमूलकेन दृश्यमानं सर्वं मिथ्यैवेति निश्चयेन यदा त्यक्ष्यति तदा श्रोतव्यस्य श्रुतस्य च, द्रष्टव्यस्य दृष्टस्य च, ज्ञातव्यस्य ज्ञातस्य च, गृहीतस्य ग्राह्यस्य च वस्तुनो मिथ्यात्वमेव विज्ञाय च निर्वेदं वैराग्यं सर्वत्रालंबुद्धिलक्षणं गन्तासि प्राप्स्यसि । व्यवहार्यस्य मिथ्यात्वाद्व्यवहारस्य मिथ्यार्थगोचरत्वान्निष्फलेनानेन मम किमिति सर्वस्माद्व्यवहार्याद्व्यवहाराच्चोपरतो भविष्यसीत्यर्थः ॥ ५२ ॥

एवं मुमुक्षोर्ज्ञानयोगसिद्धेरसाधारणकारणं बाह्योपरमणं निरूप्याथ ज्ञानयोगसिद्धिप्रकारमाह—

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३ ॥

श्रुतीति । ऋगादिभिः श्रुतिभिः कुत्रचित्कर्मविशेषास्तत्फलविशेषास्तन्महत्त्वविशेषाः प्रतिपाद्यन्ते, कुत्रचिदुपास्तिविशेषास्तत्फलविशेषास्तन्महत्त्वविशेषाः प्रतिपाद्यन्ते, कुत्रचिद्ब्रह्म सगुणं तन्माहात्म्यं तत्फलस्य औत्कृष्ट्यं च प्रतिपाद्यते, कुत्रचिन्निर्गुणं ब्रह्म तज्ज्ञानं तन्माहात्म्यं तत्फलप्राशस्त्यं च प्रतिपाद्यते । एतत्सर्वं श्रुतवतो विप्रतिपत्तिः— किं सर्वेषां प्राधान्यं, उत सगुणस्य, उत निर्गुणस्य, उतोभयेषामित्येवं श्रुतिवाक्यैर्विप्रतिपन्ना संशयाविष्टा बहुविक्षेपवती ते बुद्धिः प्रज्ञया शास्त्रं सर्वमवलोड्य श्रुतिस्मृतियुक्तिबलेन गुरूपदेशेन च 'सर्वे वेदा

यत्पदमामनन्ति' इति न्यायेन सर्वस्यापि शास्त्रस्य महत्तात्पर्यं निर्विशेषे एव ब्रह्मणि पर्यवसितमिति परिज्ञाय विप्रतिपत्तीः सर्वाः परित्यज्य निश्चला निर्विशेषा भूत्वा समाधौ समानीयते चित्तमस्मिन्निति समाधिः परंब्रह्म तस्मिन् तदाकारेणैवाचला चलनहेतूनां बाह्यवासनानां नाशादविक्रिया निश्चला सती यदा स्थास्यति तदा योगं प्रज्ञास्थैर्यलक्षणमवाप्स्यसि । यद्वा 'सत्यं ज्ञानमनन्तं ब्रह्म', 'सर्वं ब्रह्मैतदात्म्यमिदं सर्वं', 'सद्धीदं सर्वं चिद्धीदं सर्वं', 'तत्त्वमसि', 'अयमात्मा ब्रह्म', 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यं', 'ब्रह्मैवेदं सर्वं' इत्यादिश्रुतिभिः सर्वस्य ब्रह्ममात्रत्वप्रतिपत्तिजनकाभिर्विशेषप्रतिपत्तिमती या सा श्रुतिविप्रतिपन्ना । सर्वं ब्रह्मैवेति श्रुतिभिः संभावितविशिष्टज्ञानवतीत्यर्थः । तत एव निश्चला विक्षेपनिर्मुक्ता । नहि परमाप्तवाक्यश्रवणेन वाप्यधिष्ठानसंदर्शनेन वा सद्बुद्धेर्विप्रतिपत्तिर्विक्षेपो वा संभवति । अत एवं सम्यक्श्रवणेन मननेन च संपन्ना ते बुद्धिः समाधावसंप्रज्ञाताख्ये अचला निर्वातस्थदीपवन्निश्चला निष्कम्पा भूत्वा यदा यस्मिन्काले चित्तपरिपाकावस्थायां स्थास्यति स्थित्वा भविष्यति तदा त्वं योग्यं ज्ञानयोगमप्रतिबद्धं प्राप्स्यसि । योगारूढो भविष्यसीत्यर्थः ॥ ५३ ॥

श्रवणमननाभ्यां विज्ञातात्मतत्त्वस्य विदुषः समाधिना प्रज्ञास्थैर्यसिद्धिं श्रुत्वा स्थितप्रज्ञस्य लक्षणं विज्ञातुकामोऽर्जुनः पृच्छति—

अर्जुन उवाच ।

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ ५४ ॥

स्थितप्रज्ञस्येति । स्थितप्रज्ञस्य स्थिता ब्रह्माकारेण निश्चला बाह्याऽनवगाहिनी प्रज्ञा बुद्धिर्यस्य स स्थितप्रज्ञ आरूढस्तस्य भाषा भाषणं का कदा सिध्यति । समाधिस्थस्य नित्यं निरन्तरं नियमेन समाधिं कुर्वाणस्य समाधिनिष्ठानिरतो विद्वान् पण्डितैरयं स्थितप्रज्ञ इति कदा भाष्यत इत्यर्थः । स्थितधीः स्थितप्रज्ञः स्वयं किं प्रभाषेत किमासीत किं व्रजेत । कथं तिष्ठति कथं चरति किं वदतीत्यर्थः ॥ ५४ ॥

सिद्धस्य लक्षणानि यानि तान्येव साधकस्य साधनानि प्रयत्नेन संपाद्यानि । येषु सिद्धेषु सत्स्वेव विदुषः प्रज्ञास्थैर्यं विदेहकैवल्यं च सिध्यत्यतस्तानि मुमुक्षोर्यत्नेन साधनीयानीति सूचयितुमध्यायपरिसमाप्तेस्तान्येव प्रतिपाद्यन्ते । तत्रादौ प्रथमप्रश्नस्योत्तरमाह श्रीभगवान्—

श्रीभगवानुवाच ।

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥

प्रजहातीति । श्रवणादिना सम्यग्विज्ञातात्मतत्त्वो मुमुक्षुः समाधौ वर्तमानो मनोगतान्, 'मनसैवानुद्रष्टव्यम्' इति श्रवणादात्मस्वरूपप्रकाशनैककारणे मनस्येव स्थितान्विषयान् । कामयन्तीति कामाः विषयभोगेच्छास्तान् सर्वान्यदा यस्मिन् काले समाधिसिद्धिदशायां प्रजहाति निःशेषं परित्यजति । विषयाशानां निःशेषपरित्यागे हेतुमाह—**आत्मनीति** । स्वतःसिद्धे नित्यकूटस्थासङ्गचिद्रूपे चक्षुषो रूपवत्सर्वत्रोपलभ्यमान आनन्दैकरस आत्मनि स्वस्वरूपे क्रीडन् रममाणो ब्रह्मविदात्मना स्वस्वरूपेणैवोक्तलक्षणेन तुष्टः स्वात्मानन्दरसानुभूत्यैव संतोषं तृप्तिं च प्राप्यामृतरसपायी लवणाम्बुवत्तुच्छं विषयसुखं नापेक्षते । तत एव तद्विषयान् कामान् सर्वान् प्रजहाति । यदैवंलक्षणो भवति तदा स्थितप्रज्ञोऽयमिति पण्डितैरुच्यत इत्यर्थः । 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य' इति श्रुतेरर्थोऽनेन प्रतिपादितो भवति । ननु विषयेषु कामोदयकारणेषु सत्सु दृष्टेषु च विदुषोऽपि तदनुभूतौ कामो जायत एव न निःशेषेण कामपरित्यागः संभवतीति चेद्भवानत्र प्रष्टव्यः । विषयेषु कामोदयो विषयस्वभावो वा किं पुरुषस्वभावो वा । नाद्यः । दृष्टे तृणपर्णादौ भोक्तुं पुंसः कामानुदयात् । न द्वितीयः । कान्तासंनिधौ बालस्य कामादर्शनात् । तर्हि कथं कामोदय इति चेदुच्यते । 'काम जानामि ते मूलं संकल्पात्किल जायसे' इति स्मरणात्कामः संकल्पमूलकः संकल्पो वासनामूलकः । नहि वासनया विना वस्तुनि समीचीनत्वबुद्धिरुदेति । समीचीनत्वबुद्धिं विना कामोऽपि न घटते । ततः कामोत्पत्तेः कारणं विषयेषु भोग्यत्ववासनैव । वासना नाम भोगजन्यसंस्कारः । भोग्यत्ववासनाबलादेव विषयेषु कामः प्रवृत्तिश्च जन्तूनाम् । तदिदं लोकशास्त्रप्रसिद्धं विदुषस्तु नित्यं निरन्तरं समाधिनिष्ठायामेव तिष्ठतः सदा सर्वत्र ब्रह्मैव पश्यतो विषयग्रहणं न संभवति, मृदात्मना पश्यतो घटाग्रहणं यथा तथा सर्वं ब्रह्मात्मना पश्यतस्तदभावे विषयवासनाः स्वयमेव क्षीयन्ते । तासां क्षये कामाः प्रजहाति यदेति । प्रभया नश्यस्तमसो नाशनं सूर्यः करोतीतिवत्, यत एवं ततस्तत्सिद्धं निर्वासनत्वं विदुषो लक्षणमिति । तदिदं निर्वासनत्वं समाधिना साधकस्य संपादनीयमित्यवसितं च ॥ ५५ ॥

इदं मुमुक्षोरवश्यं साधनीयं साधनमिति सूचयितुं सिद्धस्य लक्षणान्तरमाह—

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥

दुःखेष्विति । दुःखेषु दुःखप्रापकेषु ज्वरशूलशिरोवेदनादिष्वाध्यात्मिकेषु, चौरादिव्याघ्रादिष्वाधिभौतिकेषु, वर्षवातातपादिष्वाधिदैविकेषूपद्रवेषु प्राप्तेषु सत्सु । स्वयमनुद्विग्नमनाः अनुद्विग्नं किं करोमि क गच्छामीति विक्षेपव्यथाविधुरं मनो यस्य सोऽनुद्विग्नमनाः समाधिनिष्ठया तैरक्षोभितचित्त इत्यर्थः । तथा सुखेषु सुखप्रापकेषु मिष्टान्नरसादिषु स्वयं प्राप्तेषु विगतस्पृहः । विगता विशिष्य निर्गता स्पृहा रसनादीन्द्रियलौल्यं यस्य स विगतस्पृहः । स्वानन्दरसास्वादासक्त्या तेष्वादररहित इत्यर्थः । वीतरागभयक्रोधः उपकारिणि रागः प्रीतिः, अत्यन्ताऽपकारिणि क्रोधोऽप्रीतिः, आसन्ने मरणहेतौ भयं चैतत्त्रितयं स्वात्मनिष्ठया वीतं न प्राप्तं येन स वीतरागभयक्रोधः । प्रीत्यप्रीतिभयहेतूनां प्रीत्यादीनां तत्कार्याणां चाविषयीभूत इत्यर्थः । दुःखादिषु विषादाद्यनुदये हेतुमाह—**मुनिरिति** । श्रुतं दृष्टं च स्पृष्टं च सर्वं प्रत्यग्दृष्ट्या ब्रह्मैव मनुते पश्यति जानाति नतु तत्तदाकारेणेति मुनिर्ब्रह्मनिष्ठः एवंलक्षणो यः स स्थितधीः स्थितप्रज्ञः । सिद्ध इत्युच्यत इत्यर्थः । एतेन दुःखादिबाह्यानालम्बिन एव सद्ब्रह्मनिष्ठा । निष्ठावत एव सम्यग्ज्ञानं सम्यक् ज्ञानिन एव विदेहमुक्तिरिति सूचितं भवति । संसिद्धो ब्रह्मविद्यतिरापत्सु संपत्सु न किंचिद्वदति किंतु तूष्णीमेव स्वात्मना तिष्ठतीति किं प्रभाषेतेत्यस्य प्रश्नस्योत्तरं दत्तम् ॥ ५६ ॥

श्रवणादिना विज्ञातात्मतत्त्वो विदेहकैवल्यार्थी सन् ज्ञानपरिपाकाय समाधौ प्रवृत्तः साधको य एवं वर्तते तस्यैव ज्ञाननिष्ठा सिध्यतीत्याह—

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥

य इति । यः समाधौ प्रवृत्तो यतिः सर्वत्र कन्थाकौपीनादिपरिग्रहे देहजीवनेऽप्यनभिस्नेहः अत्यन्तासक्तिरहितो भवति । प्रारब्धवशादागतं यच्छुभमनुकूलं तन्नाभिनन्दति, यदशुभं प्रतिकूलं तत् न द्वेष्टि । हर्षविषादरहितो भूत्वा सर्वत्र समबुद्धिः सन् समाधावेव तिष्ठति तस्यैव प्रज्ञा प्रतिष्ठिता स्याज्ज्ञाननिष्ठा सिध्यति नेतरस्येत्यर्थः ॥ ५७ ॥

यद्यपि ज्ञाननिष्ठासिद्धेर्महद्वैराग्यं तीव्रमोक्षेच्छा तत्परत्वं चैतत्त्रितयमेव कारणं तथापीन्द्रियनिग्रहाभावे वैराग्यादि ज्ञाननिष्ठा च न सिध्यतीत्यतः साधकस्य यतेर्यत्नत इन्द्रियजयः संपाद्यः प्रज्ञासिद्ध्या इत्याह—

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥

यदेति । योऽयं ज्ञाननिष्ठायां प्रवृत्तो यतिर्यथा कूर्मः स्वाङ्गानि परेभ्यो भयात् सर्वशः सर्वाणि तत्तत्काले स्वस्मिन्नेवोपसंहरते तद्वदिन्द्रियार्थेभ्यस्तत्तद्विषयेभ्यो भयाद्रागादिदोषप्रसक्तिभयात्समाधिविघ्नभयाच्च वागादीनि चक्षुरादीनि च सर्वशः सर्वाणि यदा स्वयं स्वस्मिन्नुपसंहरते समाधिस्थैर्याय तत्तत्प्रवृत्तिं वारयति तदा तस्य प्रज्ञा प्रतिष्ठिता भवतीत्यर्थः ॥ ५८ ॥

नन्विन्द्रियाणां विषयेभ्यो वैमुख्यकरणं प्रज्ञास्थैर्यकारणमित्येतदयुक्तम् । यत्किंचित्कार्यमुद्दिश्य सर्वेन्द्रियनिग्रहं कृत्वा तिष्ठति पुरुषे इन्द्रियनिग्रहो दृश्यते नतु प्रज्ञास्थैर्यमिति चेन्न । तस्य रागवत्त्वेन ब्रह्मज्ञानं तन्निष्ठा च न संभवतीति सूचयितुमाह—

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥

विषया इति । आह्रियन्ते विषया यैस्ते आहारा इन्द्रियाणि नियमार्थं तेभ्यो निर्गतो यः स निराहार इन्द्रियनिग्रहवान् तापसस्तस्य देहिनः देह एवाहमित्यहंबुद्धेरालम्बनत्वेनास्यास्तीति देही देहाद्यभिमानी, तस्य इन्द्रियाणां निगृहीतत्वाद्विषयाः शब्दादयः सर्वे विनिवर्तन्ते विशिष्य निवृत्ता भवन्ति । रसवर्जं रागं विना । 'रसो रागे गुणे द्रव्ये' इत्यभिधानाद्रसो रागो न गच्छति । 'रागो लिङ्गमबोधस्य' इति नियमात्सर्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य च ब्रह्ममात्रत्वज्ञानं रागश्च नैतत् द्वयमेकत्र स्थातुं शक्नोति । अतो रागवत्त्वादेवास्य बोधाभावस्तत एव रुद्धेन्द्रियत्वेऽपि न प्रज्ञास्थैर्यप्रसक्तिरित्यर्थः । तर्हि कथं तस्य रागनिवृत्तिः प्रज्ञा च सिध्यतीत्याकाङ्क्षायामाह—**रसोऽपीति** । अस्य मौनेनेन्द्रियनिग्रहेण व्रतादिना चित्तशुद्धौ सत्यां श्रवणादिजन्यज्ञानेन परं ब्रह्माद्वितीयं दृष्ट्वा इदमेवाहमस्मीति स्वात्मना साक्षात्कृतवतो रसो निवर्तते निर्गच्छति । विषयेषु भोग्यत्वभावनानिवृत्त्या रागनिवृत्तिः । भोग्यत्वभावना तु ब्रह्मदृष्ट्या निवर्तते । सर्वस्य स्वस्य च ब्रह्ममात्रत्वावगमाग्निना भोक्तृभो-

ज्यत्वादिभेदवने निर्दग्धे सति तदाश्रितत्वात्तेन सहैव स्वयं च दग्धो भवतीत्यर्थः । अपिशब्दात्प्रज्ञास्थैर्यं च सिध्यतीति सूचितं भवति ॥ ५९ ॥

यत एवमतः सिद्धं मुमुक्षोर्यतेः सर्वस्य ब्रह्ममात्रत्वज्ञानं संपादनीयं रागद्वेषादिनिःशेषनिवृत्तये निष्प्रवृत्तये विदेहमुक्तये चेति विदेहकैवल्यसिद्धेः कारणभूतब्रह्मज्ञानस्य सम्यक्त्वसिद्धये समाधौ प्रवृत्तस्य यतेरिन्द्रियनिग्रह एवादाववश्यं कर्तव्यस्तदभावे महाननर्थ इति सूचयितुमाह—

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६० ॥

यतत इति । हि यस्मात्कारणाद्यततः समाधिना ज्ञानस्याप्रतिबन्धत्वसिद्धये प्रयत्नं कुर्वतः । समाधौ तिष्ठतोऽपीत्यर्थः । विपश्चितः विषयजातं मायिकमसत्तुच्छमिति विषयप्रवृत्तिर्बन्धाय भवतीति च विजानतोऽपि पुरुषस्य मुमुक्षोर्मनः । मनुते ब्रह्मानेनेति मनः सर्वत्र सदवलोकनकारणम् । इन्द्रियाणि प्रमाथीनि प्रमथितुं विषयदर्शनमात्रेण व्याकुलीकर्तुं शीलं येषां तानि प्रमाथीनीन्द्रियाणि रागादिदोषग्रस्तानि । प्रसभं बलात्कारेणास्य पश्यतः सतो विवेकयुक्तमपि मनः हरन्ति गृहीत्वा विषयेषु पातयन्ति । स्वरूपाच्च्यावयन्तीत्येतदिन्द्रियनिग्रहमकुर्वतः स्वरूपभ्रंश एव विदुषो महाननर्थः ॥ ६० ॥

यस्मादेवं तस्मादिन्द्रियसंयमवत एव स्थितप्रज्ञत्वमाह—

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

तानीति । विषयेषु पुनः पुनर्दोषदर्शनेन बन्धकत्वभयेन च रागद्वेषाभ्यां वियोजितानि तानीन्द्रियाणि सर्वाणि संयम्य तेषु प्रवृत्तिं निरुध्य तत्तद्गोलकेषु स्थापयित्वा ब्रह्मविद्याभियुक्तो योगेन युक्तः समाहितचित्तः । वृत्तेर्ब्रह्माकारतामापाद्येत्यर्थः । मत्परः अहमेव परः परमात्मेति परस्मिन्नेव ब्रह्मण्यहंधीर्यस्य स मत्परः सर्वमिदमहं च ब्रह्मैवेति सर्वं स्वं च ब्रह्मैव पश्यन्नासीत । प्रत्यग्दृष्ट्या सर्वदा तिष्ठेदित्यर्थः । एवं नित्यं निरन्तरं पश्यतो यस्य यतेरिन्द्रियाणि विषयग्रहानवकाशतया नीरागाणि भूत्वा वशे वश्यानि भवन्ति । तस्य खलु प्रज्ञा प्रतिष्ठिता निश्चला भवति मोक्षश्च सिध्यति नैवेतरस्येत्यर्थः ॥ ६१ ॥

नन्विन्द्रियैरन्तःकरणं विषयेषु पातितं चेदनेनास्य विदुषः को वानर्थ इति चेद्विषयाभिध्यानमेव सर्वानर्थबीजम्, तेनानर्थहेतुपरम्परा-

ऽऽपतति, तया परावरैकत्वविज्ञानं विनश्यति, तन्नाशाज्जननमरणतरङ्गमालिनि संसाराब्धौ पतित्वा स्वयं च विद्वान् विनश्यतीति विदुषोऽपि बहिर्मुखत्वस्य जन्मादिदुःखप्रवाहपातानपायित्वमेव फलं नतु मुक्तिः । कारणाभावात् । रागद्वेषाभ्यां विषयेषु प्रविष्टस्य विदुषोऽपि विषयाभिध्यानमेव प्रसज्यते नतु ब्रह्मध्यानमिति सर्वानर्थमूलं विषयाभिध्यानं तत्कार्यं च प्रतिपादयति—

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥

ध्यायत इति द्वाभ्याम् । विषयान् शब्दादीन् ध्यायतस्तेषु रम्यत्वमरम्यत्वं च, इदं भोग्यमिति वा चिन्तयतः पुंसः । सङ्गस्तेषु रम्यत्वाकारेण, भोग्यत्वाकारेण वा भावितेषु भोगेषु प्रीतिः प्राक्तनसंस्कारादासक्तिरुपजायते सद्य उत्पद्यते । सङ्गात्प्रीत्या तत्र ममामुना भवितव्यमिति कामो भोगेच्छावेगः सम्यक् जायते । ग्रस्तो येनाभोग्यमपि कलत्रादि, स्त्रैणो भगिन्यादि वा भोग्यत्वबुद्ध्या भोक्तुं त्वरयते पुरुषः । कामाद्येन केनापि प्रतिबन्धेन हतात् क्रोधोऽभिजायते । परवशीकृतात्मनः परापकारकरणहेतुबुद्धिविशेषः क्रोधः ॥ ६२ ॥

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥

क्रोधादिति । क्रोधात्संमोहो वैचित्त्यं कार्याकार्यविवेकशून्यता जायते । क्रोधाविष्टः खलु संमोहेन महांतमप्यपचरति । गुरुमपि धिक्करोति । संमोहादुक्तलक्षणात्स्मृतिविभ्रमो जायते । वेदान्तश्रवणजन्यज्ञानेन ब्रह्मैवाहमिति पुनः पुनः कृतस्वानुभवसंस्कारजस्तदाकारपरिणामिबुद्धिवृत्तिविशेषः स्मृतिरित्युच्यते । तस्या विभ्रमो भ्रंशः स्मृतिहेतुषु सत्स्वपि स्मृतेरनुदयः । तस्मात् स्मृतिभ्रंशाद्बुद्धिनाशः बुद्धिर्ब्रह्ममयी वृत्तिस्तस्याः स्वविषयकस्मृतिविनाशान्नाशो भवति । यथा पुरोवर्तिन्येव पुरुषे पुत्र इति स्मृतिरस्ति चेन्ममायं पुत्र इति पुत्राकारेण बुद्धिर्जायते, भ्रान्तस्य तु स्मृत्यसंभवात्पुत्राकारा बुद्धिर्न जायते । तथा ब्रह्मण्यपरोक्षेऽपि विषयव्यामोहाक्रान्तचित्तस्य विदुषः स्वविषयकस्मृत्यभावादिदमहं च ब्रह्मैवेति दृश्याकारतामुत्सृज्य जगतः स्वस्य च ब्रह्माकारत्वावगाहिन्यखण्डात्मिका चिन्मयी वृत्तिर्न जायते । किंतु भोक्तृभोग्याकारवृत्तिभिः स्वयं तिरोहिता भूत्वा नष्टा भवति । एवं स्वविज्ञानविनाशाद्विद्वान् स्वयमपि

प्रणश्यति प्रकर्षेण नश्यति प्रणश्यति । संसारकारागारे पतितत्वात्कदाचिदपि मुक्तिं न प्राप्नोति । विषं पिबतोऽमरत्वमिव असन्मार्गे प्रविष्टस्य सद्गतिर्न संभवति । अतो विषयाणामवकाशमदत्त्वा सर्वेन्द्रियनिग्रहपूर्वकं समाधिं कुर्वत एव सम्यक् ज्ञानं तत्फलं च सिध्यतीति सिद्धम् ॥६३॥

नन्विन्द्रियैर्विषयग्रहणाभावे विदुषः कथं शरीरयात्रा सेत्स्यतीत्याशङ्कायां तत्प्रकारं नित्यं समाधिमनुतिष्ठतश्चित्तप्रसादं च प्रतिपादयति—

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥

रागेति । रागद्वेषयोर्बीजं विषयेष्विष्टत्वानिष्टत्वबुद्धिरेव दोषदर्शनेन तस्यां परित्यक्तायामिन्द्रियाणि रागद्वेषवियुक्तानि भवन्ति तैः रागद्वेषवियुक्तैः । विषयेष्वसत्त्वतुच्छत्वबन्धकत्वबुद्ध्या रागद्वेषाभ्यां वियोजितैरित्यर्थः । तत एवात्मवश्यैरात्मनः स्वस्य वश्यैः संकोचव्याकोचयोर्वशवर्तिभिः प्रसन्नैरिन्द्रियैस्तु विषयानन्नरसादीननिषिद्धान् । तत्रापि प्राणत्राणमात्रपर्याप्तान् चरन् भुञ्जानो ब्रह्मविद्यतिर्विधेयात्मा विधेयः इन्द्रियशुद्ध्या समाधिना च निर्मुक्तरागादिदोषतया शुद्धत्वेन स्वाधीन आत्मा मनो यस्य स विधेयात्मा सन् । प्रसादं चित्तस्य स्वास्थ्यमत्यन्तनिर्मलतां गच्छति । 'आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः' इति श्रवणादिन्द्रियशुद्ध्या चित्तशुद्धिः सिध्यतीत्यर्थः ॥ ६४ ॥

नित्यं समाधिनिष्ठया चेन्द्रियाणां मनसश्च शुद्धिलक्षणं प्रसादं संपादितवतो विदुषस्तत्सिद्धेः फलमाह—

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥

प्रसाद इति । इन्द्रियशुद्धिसिद्धेः प्रसादे प्राप्ते सति अस्य विदुषः सर्वदुःखानाम् । अत्र दुःखशब्देन तद्धेतवो विक्षेपा लक्ष्यन्ते । तेषां सर्वेषां विक्षेपाणां हानिर्निःशेषनिवृत्तिरुपजायते । तत एव आशु शीघ्रमेव प्रसन्नचेतसो निर्मलात्मनस्तस्य बुद्धिः सर्वत्र ब्रह्मदर्शिनी प्रज्ञा पर्यवतिष्ठते । प्रतिष्ठिता भवतीत्यर्थः ॥ ६५ ॥

नित्यानित्यविवेकवैराग्याभ्यां तीव्रमुमुक्षुतया च सर्वं संन्यस्य मुमुक्षवो ये यतयः श्रवणं कुर्वन्ति तेषां मुक्तिः सम्यग्ज्ञानेन विना न सिध्यति, सम्यग्ज्ञानं च समाधिं विना, समाधिश्चेन्द्रियनिग्रहं विना, इन्द्रियनिग्रहोऽपि निःशेषरागादित्यागं विना न सिध्यतीति । यततो ह्यपि

कौन्तेय इत्यादिना रागद्वेषपरित्यागमिन्द्रियनिग्रहं समाध्यनुष्ठानं च प्रतिपाद्य, ध्यायतो विषयान्पुंस इति ज्ञानिनोऽपि बहिर्मुखस्य ज्ञाननाशाद्यनर्थनिपातं प्रतिपाद्य इदानीं बहुधा श्रुतश्रावितवेदान्तस्य पठनपाठनमात्रेण आत्मानं कृतार्थं मन्यमानस्य मुमुक्षोरालस्येन दुर्मेधया च ध्यानादावप्रवृत्तस्य समाधिरवश्यं कर्तव्य इति सूचयितुं तदकर्तुरनर्थमाह—

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६६ ॥

नास्तीति । शतधा श्रुतवेदान्तोऽपि यस्तीव्रमुमुक्षया शान्तो दान्त उपरतस्तितिक्षुर्भूत्वाऽप्रतिबद्धज्ञानसिद्धये समाधिं न करोति तस्याऽयुक्तस्यासमाहितचेतसः पुरुषस्य बुद्धिः सर्वत्र ब्रह्मदर्शनलक्षणा चित्तप्रसादैकलभ्या प्रत्यग्दृष्टिर्नास्ति । बहुधा कृतेऽपि श्रवणे तदुत्पन्नं ज्ञानं पदवाक्यार्थगोचरमेव भवति नतु वस्तुगोचरं, सूक्ष्मबुद्ध्या क्वचिज्जातमपि न तिष्ठति स्थिरमित्यर्थः । अयुक्तस्येति पुनरुक्तिः समाधेरवश्यकर्तव्यत्वद्योतनार्था । 'कारणाभावे कार्याभावः' इति न्यायेन अयुक्तस्य समाधिसमुत्पन्नब्रह्मापरोक्षज्ञानशून्यस्य भावना नच नास्ति । देह इव इदमेवाहमस्मीति स्वात्मना साक्षात्कृते ब्रह्मण्येवात्मत्वाभिनिवेशो भावना । तत्तादात्म्यापत्त्या स्वस्य ब्रह्मण्येव व्यवस्थिताऽहंबुद्धिलक्षणा या सा चायुक्तस्य न संभवतीत्यर्थः । तदसंभवे तत्कार्यं च न संभवतीत्याह—**नचाभावयत इति** । प्रबुद्धो यथा देहं तथा ब्रह्मैवाऽहं नेतरदित्यात्मानं ब्रह्मैवाऽभावयतोऽमन्यमानस्य ब्रह्मात्मना स्वयमतिष्ठतो यतेः शान्तिरनात्मतादात्म्यतत्कार्यसंबन्धादर्शनलक्षणा चोपशान्तिर्न सिध्यति । किंचाऽशान्तस्याऽनात्मानमेवात्मानं द्वैतं च पश्यतः सुखं नित्यं निरन्तरं ब्राह्मं कुतः सर्वमिदमहं च ब्रह्मैवेति सर्वं स्वं च ब्रह्मैव पश्यत एव यतेर्ब्रह्मानन्दरसानुभवः स्यात् । तद्विपरीतदर्शिनः कुतः सिध्यतीत्यर्थः । यद्वा नचाभावयतः शान्तिः श्रुतं दृष्टं स्पृष्टं मतं विज्ञातं स्वयं च सर्वं चिद्रूपं ब्रह्मैवेति सर्वस्य चिन्मात्रत्वमखण्डया चिदात्मिकया वृत्त्या नित्यं निरन्तरमभावयतोऽपश्यतोऽविदुषः शान्तिर्विदेहमुक्तिश्चिदानन्दैकरसब्रह्मरूपेणावस्थानलक्षणा नास्ति । एवमशान्तस्य विदेहमुक्तिमप्राप्तस्य सुखं विदेहकैवल्यसुखं कुतः । ब्रह्मभावमप्राप्तस्य ब्रह्मसुखं न सिध्यतीत्यर्थः ॥ ६६ ॥

ननु सूक्ष्मबुद्धेः श्रवणादिजन्यज्ञानं समाध्यभावेऽपि न नश्यति यथा मेधाविनाऽधीतमीमांसादिशास्त्रजन्यज्ञानं मेधया प्रतिष्ठितमेव भवति

तथैवेति चेन्न। इष्टकाचयनादिज्ञानमतिस्थूलमपि मुहुर्मुहुरवलोडनं चरणं प्रचारणं वा विना न स्फुटं प्रतिभाति । किमु वक्तव्यमतिसूक्ष्ममतीन्द्रियमविषयमप्रचुरमसंस्कृतमनारूढमविनष्टप्रतिपक्षमात्मज्ञानं समाध्यभावे न प्रतिभातीति । ततस्तत्सिद्ध्यै मुमुक्षोः समाधिः कर्तव्य इति सूचयितुं बहिः प्रवृत्तस्य ज्ञाननाशनप्रकारं सदृष्टान्तमाह—

इन्द्रियाणां हि चरतां यन्मनोऽनु विधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७ ॥

इन्द्रियाणामिति। हि यस्मात्कारणादिन्द्रियाणां श्रोत्रादीनां वागादीनां च स्वस्वविषयेषु चरतां सतां लोकशास्त्रविषयकर्मवासनाभिराविष्टं यन्मनोऽनुविधीयते विदुषा तत्तदिच्छावता स्वेच्छानुरूपं प्रवर्त्यते तदेव मनः अम्भसि नदीजले वायुर्नावमिवास्य स्ववासनारूपं प्रवर्तमानस्यास्य विदुषः प्रज्ञां आत्मानात्मविवेकबुद्धिं हरति संहरति । अत्रायमभिप्रायः। नद्याः परपारं गच्छन्तीं नौकां प्रतिकूलो वायुर्गृहीत्वा महाऽऽवर्ते तां पातयति, जलेनापूर्य वा मज्जयति, महापाषाणेनाभिहत्य मज्जयति, पुनरपारं वा विषमस्थानं वा गमयति, सर्वथाऽनर्थवतीमेव करोति यथा, तथा विदुषोऽपि प्रज्ञां विवेकबुद्धिमनाद्यविद्यावासनाभिरुच्चावचाभिराकृष्टं मनो विषये वा कर्मणि वा योगे वाप्युपास्तौ वा व्यवहारे वान्यत्र वा पातयित्वा वायुर्नावमिव विध्वंसयतीत्यर्थः ॥ ६७ ॥

यस्माद्रागद्वेषलोभमोहादिदोषैरेवेन्द्रियप्रवृत्तिस्तया समाध्यभावस्तेन ज्ञानाभावस्तेनैव ब्रह्मणि स्वात्मन्यहंभावाभावस्तस्मात् मुक्त्यभावस्ततः सुखाभावश्चैवमनर्थव्रातापातो रागद्वेषादिभिरिन्द्रियनिग्रहमकृत्वा बहिःप्रवृत्तस्य ज्ञानिनोऽपि । तस्मादिन्द्रियग्रामं रागादिभिर्वियोज्य सम्यङ् निगृह्य च मुमुक्षोर्यतेर्विदेहमुक्त्यै समाधिरवश्यं कर्तव्य इति सूचयितुमाह—

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥

तस्मादिति । रागादिशत्रुसंहारसमर्थस्यैवात्राधिकारो नान्यस्येति सूचनार्थं महाबाहो इति संबोधनम्। यस्य मोक्षैकार्थिनो यतेरिन्द्रियार्थेभ्यः सर्वाणीन्द्रियाणि निगृहीतानि भवन्ति तीव्रवैराग्येण तस्य धन्यस्य समाधिः सिध्यति प्रज्ञा प्रतिष्ठिता भवति । विदेहबुद्धिरग्रे तिष्ठति तत्सुखं चेत्यर्थः ॥ ६८ ॥

जन्मानेकशतसहस्रकृतसुकृतपरिपाकेन श्रुत्याचार्येश्वरप्रसादपौष्कल्यं प्राप्तवतो यस्य समाधिना सर्वमिदमहं च ब्रह्मैवेति ब्रह्माऽपरोक्षविज्ञानमप्रतिबद्धं भवति तस्य महात्मनः स्थितप्रज्ञस्य प्रबुद्धस्य स्वप्नव्यवहारवदहंममेदमित्यादिव्यवहारो लौकिको वैदिकश्च निःशेषो विनिवर्तते । निद्रावदविद्याया निःशेषविनष्टत्वात्तत्कार्यस्यापि निःशेषनिवृत्तिः, अतः प्रबुद्धो जागर इव जीवन्मुक्तो ब्रह्मविद्ब्रह्मण्येवारमति नान्यत्रेति प्रतिपादयति—

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥

या निशेति । प्राचीनकर्मफलानुभूत्यै पुनःपुनर्भवन्ति जायन्त इति भूतानि प्राणिनस्तेषां सर्वेषां भूतानां स्थितप्रज्ञव्यतिरिक्तानां सर्वभूतानां या निशा भवति । 'तेजः परस्यां देवतायां' इत्यादिश्रुत्युक्ता या परदेवता सर्वप्रमाणगोचरा निर्विशेषा सत्तामात्रा स्वयं निशेव भवति । यथा निशा नितरां शेरते प्राणिनो यत्र सा निशा तमिस्रा रात्रिः सर्वव्यापकत्वेन दृष्टेः प्रवेष्टुमशक्यत्वेन सर्वपदार्थानां स्वमात्रत्वापादनेन च भूतानां मनुष्यादीनां व्यवहर्तुमशक्या भवति, तथा मेयं परदेवतापि सर्वव्यापकत्वादिधर्मैः सर्वभूतानां व्यवहर्तुमशक्यत्वान्निशेत्युच्यते । शं सुखं नितरां सुखरूपत्वान्निशा तस्यां निशायामत्यन्तसुखरूपायां परस्यां देवतायां परे ब्रह्मण्यानन्दघने स्वयमविद्यानिद्राप्रबुद्धः संयमी बहिःप्रवृत्तिनिवृत्तसर्वेन्द्रियो ब्रह्मविदेक एव जागर्ति । तत्रैवारमति क्रीडत्यानन्दति । तदन्ये तु शेरते श्रुतवेदान्ता अपि निद्रिता इव तत्स्वरूपं किमपि न जानन्तीत्यर्थः । यस्यामविद्यायां द्रष्टृदर्शनदृश्यादिभेदवत्यां भूतानि जाग्रति अहं ममेदमिष्टमनिष्टमिदं कार्यमिदमकार्यमिति व्यवहरन्ति सा त्वविद्या द्वैतभूमिः पश्यतः द्रष्टारं दर्शनं दृश्यं च सर्वं प्रत्यग्दृष्ट्या ब्रह्मैव पश्यतो मुनेर्ब्रह्मनिष्ठस्य निशा भवति । यथा निशायां प्राणिनो न व्यवहरन्ति तथाऽयमविद्यानिशायामहंममेति न व्यवहरति । अहं ममेत्यादिप्रत्ययहेतूनामनाद्यविद्यावासनानां निःशेषविनष्टत्वेन तद्बुद्धेर्ब्रह्ममय्याः प्रवेष्टुमशक्यत्वादत्राहं ममेदमिति प्राकृतमेव व्यवहारं न करोति, कुत एवंलक्षणस्यास्य विदुषो वैदिकव्यवहारः सिध्यतीत्यर्थः । यद्वा 'अधीहि भगवो ब्रह्मविद्यां वरिष्ठाम्' इत्यादिश्रुतिप्रसिद्धा या ब्रह्मविद्या सर्वभूतानां सर्वेषां प्राणिनां निशा भवति । स्वयं चिदाकृत्या सूर्यप्रभावत्प्रकाशरूपापि सुदृष्टिशून्यानां निशेव भवतीति निशे-

त्युच्यते । यथा प्रसिद्धनिशा स्वकीयतमःशक्त्या नामरूपभेदमपास्य सर्वं वस्तुजातं तमोमात्रं कृत्वा स्वयमेव सर्वत्र विजृम्भते तथैवैषा ब्रह्मविद्या स्वकीयचिच्छक्त्या नामरूपभेदमपोह्य सर्वं दृश्यजातं चिन्मात्रं कृत्वा स्वयमेकैव सर्वत्र विजृम्भते । यत्र निशायामिव अज्ञास्तज्ज्ञाश्च सर्वे त्र्यवस्थानरूपान् स्वप्नान् पश्यन्तः शेरते तस्यां ब्रह्मविद्यायां संयमी बहिःप्रवृत्तिशून्यः स्थितप्रज्ञो ब्रह्मविदेक एव जागर्ति । आत्मरतिरात्मक्रीड आत्ममिथुन आत्मज्योतिरात्मानन्दो भूत्वा सर्वदाऽऽस्ते । यस्यामविद्यायां सर्वाणि भूतानि जाग्रति त्वमहमिदमद इति व्यवहरन्ति सात्वविद्या द्वैतावस्था, पश्यतो द्रष्टारं दर्शनं दृश्यं च सर्वं मिथ्यैवेति पश्यतो ब्रह्मविदो निशा भवति । यथा प्राणिनां ब्रह्मविद्या निशा तथा ब्रह्मविदोऽप्यविद्या निशा । ब्रह्मविद्यया ब्रह्मैवाहमिति स्वमानन्दैकरसं परिपूर्णं विषयीकर्तुं यथैवाऽज्ञाः न शक्नुवन्ति तथैवायं ब्रह्मविदविद्ययाहं ममेदमिति देहेन्द्रियादिकं विषयीकर्तुं न शक्नोतीत्यर्थः । तत एवास्य लौकिके वैदिके च कर्मण्यनधिकारः योग्यत्वाभावात् । यस्य देहतदाश्रितवर्णजात्यादावभिमानः फलार्थित्वं ममेदं कर्तव्यमिदं न कर्तव्यमिति क्रियासु गुणदोषदर्शनं च विद्यते तस्यैव कर्मणि योग्यता दृश्यते नतूक्तलक्षणशून्यस्य । नहि नित्यनिरन्तरसमाधिनिष्ठया निरूढविज्ञानबलेनाविद्यां तत्कार्यं चाऽध्यासादिकं निर्मूल्य ब्रह्मतादात्म्यमापाद्य ब्रह्मैवाहमिति सर्वदा ब्रह्मण्येव तदात्मना तिष्ठतो विदुषः पुनः शरीरतादात्म्यापत्तिस्तत्राहंममेत्यभिमानश्च संभवति । तदसंभवे तत्रारोपितवर्णजात्याद्यभिमानोऽपि न सिध्यति । तदसिद्धौ सर्वमिथ्यात्वदर्शिनः फलाभिसंध्यसिद्धेः क्रियासु गुणदोषदर्शनाऽसिद्धेश्च । सत्येवं न विदुषः कर्मण्यधिकार उपयुज्यते सर्वमिथ्यात्वदर्शनस्य प्रवृत्तेश्च परस्परविरुद्धत्वादेकाधिकरणत्वानुपपत्तेः वस्तुनः सत्यत्वनिश्चयधीपूर्विका प्रवृत्तिर्भ्रमकल्पितत्वनिश्चयधीमूलकं मिथ्यात्वज्ञानं ततस्तयोः परस्परविरुद्धत्वमेकाधिकरणत्वानुपपत्तिश्च । ननु कर्ता करणं कार्यं च सर्वं मिथ्यैवेति विदुषा कर्म क्रियतां, मिथ्यात्वेन कृतं कर्म बन्धाय न भवतीतिचेन्न । मिथ्यात्वज्ञानस्य प्रवृत्तिविरोधान्नेदं जलं किंतु मरुरेवेति जलमिथ्यात्ववेदिनस्तृषितस्यापि प्रवृत्त्यदर्शनात्किमुतारोपितं दृश्यं सर्वं मिथ्यैवेति । तदधिष्ठानं ब्रह्मैव सर्वत्र पश्यतः प्रवृत्तिरनुपपन्नेत्यतो ह्यविद्यावत एव कर्मण्यधिकारो नतु विद्यावतः । विद्याया अविद्यातत्कार्यविरोधित्वाद्विद्यावति ब्रह्मविदि अविद्यातत्कार्यं च तेजसीव तमः सकार्यं स्थातुं न शक्नोति । यत एवं ततो विधिर्विधानं

विधेयं विधाता च सर्वमाविद्यकं मिथ्यैवेति विजानतो ब्रह्मविदः सदात्मना तूष्णीमवस्थितिं विना न किंचित्कर्तव्यमस्तीति सिद्धम् ॥ ६९ ॥

यथा कन्यका स्वयमृतुमती भूत्वा जननीं जनकं भ्रातरं च सर्वं स्वजनं त्यक्त्वा भर्तारमेवैकमाश्रित्य तदेकालम्बना भूत्वा तत्रैव रमते तेनैव तुष्यति हृष्यत्यानन्दति नान्यं शृणोति पश्यति स्मरति स्पृशति स्वयं पतिव्रता भूत्वा तत्रैव तिष्ठति, तथैव यस्य ब्रह्मविदो यतेः प्रज्ञा समाधिना प्रौढीभूय देहं प्राणमिन्द्रियजातं च सर्वं दूरतः परित्यज्य सच्चिदानन्दैकरसं परं ब्रह्मैकमेवाश्रित्य तदेकालम्बना भूत्वा तत्रैव रमन्ती क्रीडन्ती नन्दन्ती तुष्यन्ती हृष्यन्ती सती पतिव्रतावन्नान्यच्छृणोति पश्यति मनुते विजानाति । स्वयं सदा तदात्मना तिष्ठति । स एव जीवन्मुक्तिसुखं विदेहकैवल्यसुखं च विन्दत इति सूचयितुं स्थितप्रज्ञस्य यतेर्भिक्षादावपि वृत्तेर्बाह्यानालम्बनत्वमेव प्रतिपादयति श्रीभगवान् एवंलक्षण एव यतिर्विदेहमुक्तिं प्राप्नोति नान्यविध इति निर्धारयन्—

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥७०॥

आपूर्यमाणमिति । गङ्गानर्मदागोदावरीकृष्णाकावेरीसिन्ध्वादीनां महानदनदीनां दशशतसहस्रसंख्याकेभ्यो मुखेभ्योऽतिपरिणाहवद्भ्यः समागतैरभ्रंकषैर्महाप्रवाहैरपरिमितैः समन्तादापूर्यमाणमपि स्वयमचलप्रतिष्ठं अचला चलनवर्जिता प्राक्तनस्वीयलक्षणमनतिक्रान्ता वृद्धिक्षयशून्या प्रतिष्ठा जलस्थितिमर्यादा यस्य सोऽचलप्रतिष्ठस्तम् । प्रवाहाप्रवेशकाल इव प्रवेशकालेऽप्येकरूपेण सत्ताविशेषशून्यतया वर्तमानमित्यर्थः । सदैकरूपेणैव तिष्ठन्तं समुद्रमापः गङ्गासिन्ध्वादिमहानदीनां नानामुखेभ्यः समागतानि जलानि नानाविधवर्णरसगन्धगुणफलवत्य आपो यद्वत्प्रविशन्ति स्वकीयशुक्लनीलारुणपीतादिरूपविशेषम् मधुराम्लतिक्तकषायादिरसविशेषम् परिमलपूत्यादिगन्धविशेषम् लघुत्वगुरुत्वादिगुणविशेषम् एकद्वित्रिचतुःपञ्चषट्सप्ताष्टनवदशशतकृच्छ्रसमानपुण्यविशेषं तत्तन्नामविशेषं च परित्यज्य समुद्रभावमेव यथा गच्छन्ति । समुद्रं प्राप्य तत्संबन्धमहिम्ना नामरूपगुणविशेषैर्यथा समुद्रान्न भिद्यन्त इत्यर्थः । तद्वत्कामा यं प्रविशन्ति । काम्यन्ते नामभेदेन रूपभेदेन रसभेदेन गन्धभेदेन पाकभेदेन च विविच्य गृह्यन्त इति कामा भोग्यपदार्थाः सूपापूपरसान्नादयस्तदन्ये च भोग्यविशेषा नाना-

विधैर्नामरूपरसगन्धपाकसंस्कारादिविशेषविचित्रैरनेकैर्भोग्यविशेषैः सर्वतोऽनिच्छाप्रारब्धादेव संप्राप्तैरापूर्यमाणं,मां गृहाण मां गृहाणेति दातृजनद्वारा समन्तात्पतद्भिर्व्याकुलीक्रियमाणमप्यचलप्रतिष्ठमचला निर्विकल्पा विपरीतभावशून्या, व्युत्थानदशायामप्याहारादौ सदाकारतामापाद्य सदात्मनैव निश्चलीभूय स्थिताऽखण्डाकारवृत्तिः प्रतिष्ठा स्थितिर्यस्य सोऽचलप्रतिष्ठः । तदानीमपि बाह्यानविकल्प्य समाधिनिष्ठया विपरिणामरहितान्तःकरण इत्यर्थः । तमचलप्रतिष्ठमेव यं ब्रह्मविदं यतिं सर्वे कामाः प्रविशन्ति, यं ब्रह्मनिष्ठं प्राप्य सर्वे विषयाश्चिद्भावापन्ना अध्यात्मदृष्ट्या प्रविलापिताः सन्तः स्वकीयं नामविशेषं रूपविशेषं गन्धविशेषं पाकविशेषं संस्कारविशेषं रुचिविशेषं च परित्यज्य, समुद्रप्रविष्टमहानदीजलानि समुद्रभावमिव स्वयं ब्रह्मभावं गच्छन्तीत्यर्थः । य एवंलक्षणो ब्रह्मविद्यतिः स एव शान्तिमविद्याप्रपञ्चोपशमलक्षणां विदेहमुक्तिमाप्नोति । नतु कामकामी कामान् विषयान् यः कामयते स कामकामी स्वयं कैवल्यकारणभूतां ब्रह्मनिष्ठां स्वधर्मं परित्यज्यानात्मन्येवात्मभावमापद्य भोक्ता सन् शुक्तौ रजतमिव मरौ जलमिव ब्रह्मण्यद्वितीये ह्यविद्यमानमेव द्वैतं कल्पयित्वा अहं भोक्तेदं भोग्यमित्यनृताभिसंधितया बाह्यवासनाभिरसत्यहन्ताममताभिनिवेशेन बद्धः सन् इदं रम्यमिदमिष्टमित्यादिभेदबुद्ध्या नामरूपादिविशेषविभागेन पदार्थान् गृह्णाति यतस्ततः कामकामी भेददर्शी शान्तिं न प्राप्नोति देहादितादात्म्यापत्त्या योऽसदभिनिवेशेन ब्रह्मण्यद्वितीये भेदं पश्यति स एव कामकामी द्वैतदर्शी मुक्तिं न प्राप्नोतीत्यर्थः । तथाच श्रुतिः—'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति तत्त्वेव भयं विदुषोऽमन्वानस्य' इति । नहि देहतादात्म्यं विना भेददर्शनं, कामना च सिध्यति । नापि देहतादात्म्यं चाविद्यां विना संभवति, अविद्यावतो मुक्त्यभावो युक्त एव यतस्ततः क्वचित्कदाचिदपि देहतादात्म्यापत्त्या भेददृष्टिर्न कर्तव्या विदेहकैवल्यार्थिना यतिनेति सिद्धम् । पूर्वश्लोकेनानेन च द्वाभ्यामाहारादावपि स्थितप्रज्ञो ब्रह्मविद्यतिर्ब्रह्मात्मना ब्रह्मण्येव तिष्ठति न क्वचिदप्यनात्मनीति किमासीतेति प्रश्नस्योत्तरं दत्तम् ॥ ७० ॥

तस्मात् ध्यायतो विषयानित्यत्र विषयाणां श्रवणेन दर्शनेन च विनैव केवलध्यानमात्रेण कामाद्यनर्थाविर्भूत्या विदुषोऽपि प्रणाशः प्रतिपादितः किमुत ब्रह्मनिष्ठामुत्सृज्य बाह्यवृत्त्या विषयानिन्द्रियैर्गृह्णतो भुञ्जतो यथेच्छं विरहतो वा कामकामिनः प्रणाश इति । तस्माद्विदेहकैवल्या-

र्थिना यतिना ब्रह्मविदा सर्वथा विषयग्राहमुत्सृज्य सर्वेन्द्रियनिग्रहपूर्वकं सदात्मनिष्ठया स्थातव्यम्, एवं यस्तिष्ठति स एव विदेहमुक्तिं विन्दतीति प्रतिपादति—

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥ ७१ ॥

विहायेति । पुमर्थमतिदुर्लभं मोक्षं महता प्रयत्नेन संपादयति ब्रह्मवित् खलु पुमान् पुरुषशब्दवाच्यो यो ब्रह्मविद्यतिः स्वयं निरहंकारः ब्रह्मैवाहमिति ब्रह्मण्येव निरूढात्मत्वाभिनिवेशेन देहान्निर्गताहंकारोऽहमात्मिका बुद्धिर्यस्य स निरहंकारः । नित्यनिरन्तरब्रह्मनिष्ठया निर्मूलितानात्मतादात्म्यग्रन्थिरित्यर्थः । ततएव निर्ममः देहतद्धर्मतत्कर्मतदवस्थादिभ्यो निर्गतो ममताबन्धो यस्य स निर्ममः । ब्रह्मतादात्म्यापत्त्या वपुष्यहंभावाभावे तद्धर्मादौ ममताभावो विदुषो युक्त एवेत्यर्थः । ततएव निःस्पृहः विषयेभ्यो निर्गता स्पृहा सुखाशालक्षणा यस्य स निःस्पृहः ब्रह्मण्येवात्मतापत्त्या देहादेरनात्मत्वेन निरस्तत्वात्तमुद्दिश्य सुखाशासंभवात्स्वस्य निरन्तरब्रह्मानन्दामृतरसेनैव तृप्तत्वाच्च विदुषो विषयसुखापेक्षाऽभावो युक्तः । तत एव सर्वान् कामान् बाह्यशब्दवाच्यान् विषयान् विहाय शुक्तिरजततुल्यैस्तैः प्रयोजनाभावादिन्द्रियैस्तद्ग्रहणमकृत्वा सर्वमिदमहं च ब्रह्मैवेति स्वं सर्वं च ब्रह्मैव पश्यन् चरति 'कामान्नीकामरूप्यनुसंचरन्' इत्यादिश्रुत्युक्तप्रकारेण भूमौ सर्वत्रासङ्गोदासीनो भूत्वा यः पर्यटति परमहंसः स एव शान्तिमात्यन्तिकसंसारोपरमलक्षणां विदेहमुक्तिमधिगच्छति नैतद्विपरीतलक्षण इत्यर्थः । ब्रह्मात्मना सर्वं वीक्षमाणो ब्रह्मानन्दमनुभुञ्जानो ब्रह्मवित्सर्वत्र चरति नैकत्र तिष्ठतीति व्रजेत किमिति प्रश्नस्योत्तरं दत्तम् ॥ ७१ ॥

मुमुक्षोर्यतेः श्रवणजन्यं ज्ञानं प्रपञ्चवासनाभिः कामक्रोधादिभिरहंममाद्यभिमानविशेषैश्च सप्रतिबन्धकं विदेहमुक्त्यै नालमिति निश्चित्य परमकृपालुः श्रीभगवान् समाधावचला बुद्धिरिति ब्रह्मनिष्ठां प्रस्तुत्य, निरन्तरं ब्रह्मनिष्ठया सर्वकामप्रहाणं कृतवतः, शरीरयात्रादावपि ब्रह्मात्मना ब्रह्मणि तिष्ठतोऽहंममादिबन्धान्मुक्तवत एव विदुषो विदेहमुक्तिं प्रतिपाद्य, इदानीं मुमुक्षोरेषैव संपादनीया ह्यनयैव विदेहमुक्तिर्नान्यथेति सूचयन्नुपक्रान्तां ब्रह्मनिष्ठामुपसंहरति—

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ ७२ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन-संवादे सांख्ययोगो नाम द्वितीयोऽध्यायः ॥ २ ॥

एषेति। स्वस्वरूपं प्रकाश्य मुमुक्षुं संसारमृत्योः पातीति पः परमात्मा तमेवार्थयते वाञ्छतीति पार्थस्तस्य संबुद्धिः हे पार्थ मुमुक्षो, त्वमिदं मयोच्यमानं शृणु । श्रुत्वा कुरु । ब्राह्मो ब्रह्मप्राप्तेर्नियतकारणत्वाद्ब्राह्मी ब्रह्मप्रापिका स्थितिर्निष्ठा । एषा मया प्रतिपादिता मुमुक्षूणाम् । विदेहकैवल्यार्थी ब्रह्मविन्मुमुक्षुरेनां प्रस्तुतां ब्रह्मनिष्ठां प्राप्यानुष्ठाय न मुह्यति विमोहाय न कल्पते । सर्वेषां प्राणिनामहमिति विशिष्टो मोहो यत्र स विमोहो देहस्तं न प्राप्नोति । एतस्यां निष्ठायां स्थित्वा ब्रह्मवित्पुनर्देही न भवतीत्यर्थः । किंच पूर्वस्मिन्नेव वयसि प्रसिद्धसाधनो जन्मान्तरीयसंन्यासश्रवणादिपुण्यकर्मपरिपाकवशाद्विद्वानिह प्रारब्धविशेषबलेन किंचित्कालं संसृत्यन्तकाले चरमावस्थायामप्यस्यां निष्ठायां स्थित्वा निर्वाणं निष्क्रियं नित्यानन्दैकरसं ब्रह्म ऋच्छति । मुक्तिं गच्छतीत्यर्थः । 'विज्ञाय चरमावस्थां देवताभ्यो नृपोत्तमः । खट्वाङ्गो नाम राजर्षिर्मुहूर्ते मुक्तिमेयिवान् ॥' इति प्रसिद्धेः । यत एवं ततो विदेहकैवल्यार्थिभिर्यतिभिर्बाह्ये प्रवृत्तिं परित्यज्यास्यामेव निष्ठायां सर्वदा स्थातव्यमिति सिद्धम् ॥ ७२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्द-सरस्वतीकृतौ गीतावाक्यतात्पर्यबोधिन्यां द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ।

नत्वेवाहं जातु नासमित्यात्मानात्मविवेचनमुपक्रम्य, न जायते म्रियते वेत्यादिना सम्यगात्मतत्त्वं निर्धार्य, वेदाविनाशिनमित्यादिना ब्रह्मविदः सर्वकर्मसंन्यासमुक्त्वा,तस्यैव प्रजहातीत्यारभ्य स शान्तिमाप्नोतीत्यन्तेन ग्रन्थेन ब्रह्मनिष्ठां तत्फलं च मोक्षं प्रतिपाद्य न कामकामीति कामकामिनो मोक्षभावः प्रतिपादितस्तेन सर्वकर्मसंन्यासपूर्वकं ब्रह्मनिष्ठया मोक्षः संपादनीय इति सर्वेषां प्रवृत्तौ संप्रसक्तायां—'विरक्तः प्रव्रजेद्धीमान् सरक्तस्तु गृहे वसेत् । सरागो नरकं याति प्रव्रजन् हि द्विजाधमः ॥ यदा मनसि संजातं वैतृष्ण्यं सर्ववस्तुषु । तदा संन्यासमिच्छेत पतितः स्याद्विपर्यये ॥ प्रवृत्तिलक्षणं कर्म ज्ञानं संन्यासलक्षणम् । तस्माज्ज्ञानं पुरस्कृत्य

संन्यसेदिह बुद्धिमान् ॥ यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम् । तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत् ॥ अहमेव परंब्रह्म वासुदेवाख्यमव्ययम् । इति बोधो दृढो यस्य तदा भवति भैक्ष्यभुक् ॥ प्राणे गते यथा देहः सुखं दुःखं न विन्दति । तथा चेत्प्राणयुक्तोऽपि स कैवल्याश्रमे वसेत् ॥ अनधीत्याखिलान्वेदाननिष्ट्वाखिलान्सुरान् । अनुत्पाद्य सुतान्विप्रो न संन्यसितुमर्हति ॥ अकुर्वन्विहितं कर्म निन्दितं च समाचरन् । प्रचरन्निन्द्रियार्थेषु नरः पतनमृच्छति ॥''ज्ञात्वा नैष्कर्म्यमाचरेत् । सशिखं वपनं कृत्वा बहिः सूत्रं त्यजेद्बुधः' । 'ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' इति । 'परं ब्रह्म परिज्ञाय प्रव्रजेद्ब्राह्मणोत्तमः । अन्यथा कर्म कुर्वीत न प्रमाद्येत कर्हिचित् ॥ स्वेस्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः। विपरीतस्तु दोषः स्यादुभयोरेष निश्चयः ॥' इत्यादिश्रुतिस्मृतिवचनेभ्यो ह्यधिकारिणामेव संन्यासो नानधिकारिणामन्यथा कृत्वा पतिष्यन्तीति ज्ञानकर्मयोगयोरधिकार्यादिभेदेन भेद एवेति तयोर्विभागं दर्शयितुं चानधिकारिणां कर्मैव चित्तशुद्धिद्वारा मोक्षसाधनं तदेवावश्यं कर्तव्यमिति बोधयितुं च तृतीयाध्याय आरभ्यते। तत्रादौ 'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन' इति तव कर्मण्येवाधिकारो नान्यत्रेत्यवधारणपूर्वकं कर्म विधाय—'दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय । बुद्धौ शरणमन्विच्छ' इति ज्ञानयोगात्कर्मयोगो निकृष्टस्ततो ज्ञानयोगमेवाश्रयेति ज्ञानयोगविधानाच्च तेन व्याकुलीभूतान्तरात्मा भूत्वार्जुनः स्वयं 'दूरेण ह्यवरं कर्म' इति वचनार्थमेव मनसि निधाय कर्मयोगात् ज्ञानयोगस्य साक्षान्मोक्षसाधनत्वेन विशिष्टतरत्वं मन्यमान इदमुवाच—

अर्जुन उवाच ।

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १ ॥

ज्यायसीति । जनं जननं तत्कारणमज्ञानं च स्वसाक्षात्कारेणार्दयति हिनस्तीति जनार्दनस्तस्य संबुद्धिर्हे जनार्दन, कर्मणः कर्मयोगाद्बुद्धिर्ज्ञानयोग एव ज्यायसी श्रेष्ठेति ते मताभिमता चेत्किं किमर्थं 'कर्मण्येवाधिकारस्ते' इति मां कर्मणि ज्ञानान्निकृष्टे नियोजयसि। तत्रापि घोरे हिंसात्मके 'तस्माद्युध्यस्व भारत' इति चोदयसि । भवानी-

श्वरस्तव वचनमलङ्घ्यम्। मां भक्तमनुरक्तं च योग्यमर्थं त्याजयित्वाऽयोग्यार्थे प्रेषयसीत्यर्थः ॥ १ ॥

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ २ ॥

किंच **व्यामिश्रेणेति**। 'कर्मण्येवाधिकारस्ते' इति 'बुद्धौ शरणमन्विच्छ' इति चैवंलक्षणेन व्यामिश्रेणेव क्षीरनीरयोरिव द्वयोर्मेलनं व्यामिश्रं तेनेव ज्ञानकर्मणोः समुच्चयवतैव वाक्येन मम बुद्धिं मोहयसीव मां कर्मणि नियोजयसि। यद्यपि युद्धं कर्तव्यं वा त्यक्तव्यं वेति संशयालोस्त्वां शरणं गतस्य मम भ्रमापनयाय भवान् दयया प्रवृत्तो नतु मोहनाय, तथापि विवेकविकलस्य जडात्मनो मम भवद्वचनं व्यामिश्रमिव भाति। तेन व्यामिश्रकवाक्येन मम बुद्धिं मोहयसीव प्रतीयते। तदपि मम बुद्धिदोष एवेति भावः। तर्हीदानीं किं कर्तव्यमित्यत आह—**तदेकमिति**। ज्ञानकर्मणोः क्रियाकारकफलभेदेन विपरीतयोरेककर्तृत्वासंभवात्तयोरेकं ज्ञानं वा कर्म वा मदधिकारानुरूपं, तत्र मम योग्यत्वमयोग्यत्वं च विचार्य, इदमेवास्यार्हमिति निश्चित्य वद। येन ज्ञानेन वा कर्मणा वा तयोरेकतरेण वाहं साक्षात्परम्परया वा श्रेयः परमपुरुषार्थमाप्नुयाम् ॥ २ ॥

मया यदुक्तं तत्सत्यं तवैवायं बुद्धिदोषस्तदा यदुक्तं तत्त्वया न ज्ञातम्। विद्याबुद्धिशक्त्यवस्थादौ विचार्यमाणे तव कर्मण्येवाधिकारो नतु संन्यासे। तत एवोक्तं मया 'कर्मण्येवाधिकारस्ते' इति। तथापि चित्तशुद्धिद्वारा ज्ञानसिद्ध्यै कर्म कुरु नतु फलायेति सूचयितुं 'बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः' इत्युक्तं नतु कर्म त्यक्त्वा बुद्धिमाश्रयेत्युक्तं, नाप्युभयं च कुर्विति। ज्ञानकर्मणो राजसूयबृहस्पतिसवादिवद्भिन्नकर्तृकत्वेनैकपुरुषानुष्ठेयत्वायोगादिदं पूर्वमेव सूचितं 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु' तदेव पुनरुच्यते श्रूयतामित्याशयेन श्रीभगवानुवाच—

श्रीभगवानुवाच।

लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥ ३ ॥

लोक इति। अस्मिँल्लोके ब्राह्मणादीनां स्वधर्मपराणां मुमुक्षूणां पुरा पूर्वकाले मया वेदरूपिणा सर्वज्ञेन सर्वधर्मोपदेष्ट्रा द्विविधा द्विप्रकारा निष्ठा शास्त्रीयस्यानुष्ठेयस्य धर्मस्यासांकर्यं यथा तथा नियमेन

स्थितिर्व्यवस्था प्रोक्ता कृतेत्यर्थः। तत्कथमितिचेदुच्यते—ज्ञानयोगेनेति। वेदान्तैः सर्वैः सम्यक् ख्यायते तात्पर्येण प्रतिपाद्यत इति सांख्यं निर्विशेषं परं ब्रह्म तदेव स्वात्मत्वेन ये विदुस्ते सांख्याः ब्रह्मविदस्तेषां सांख्यानां यतीनां ब्रह्मज्ञानाम्। ज्ञानयोगेन ब्रह्मविद्ब्रह्मणा युज्यत एकीक्रियतेऽनेनेति योगः ज्ञानमेव योगो ज्ञानयोगस्तेन सर्वमिदमहं च ब्रह्मैवेति ब्रह्माकारवृत्त्या निष्ठा नैश्चल्येन स्थितिः प्रोक्ता सदैकरीत्या कर्तव्यत्वेन विहिता। 'तमेवैकं विजानथ आत्मानमन्या वाचो विमुञ्चथ', 'ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात्', 'वेदान्तविज्ञानसुनिश्चितार्थाः', 'सर्वं खल्विदं ब्रह्म, तज्जलानिति शान्त उपासीत', 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत्' इत्यादिवाक्यैरतत्प्रवृत्तिं निषिध्य तेषां ब्रह्मनिष्ठैव कर्तव्यत्वेन प्रोक्तेत्यर्थः। योगिनां कर्मयोगिनां गृहिणां कर्मयोगेन युज्यते अभ्युदयोऽनेनेति योगः कर्मैव योगः कर्मयोगस्तेन निष्ठा नियमस्थितिः प्रोक्ता। 'अहरहः संध्यामुपासीत', 'उदिते सूर्ये प्रातर्जुहोति', 'वसन्ते ब्राह्मणोऽग्नीनादधीत', 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः', 'तस्मात्स्वाध्यायोऽध्येतव्यः', 'ऋतं च स्वाध्यायप्रवचने च। सत्यं च स्वाध्यायप्रवचने च। अग्नयश्च स्वाध्यायप्रवचने च। अग्निहोत्रं च स्वाध्यायप्रवचने च। सत्यं वद। धर्मं चर। तानि त्वयोपास्यानि' इति श्रौतस्मार्तकर्मनिष्ठैव कर्मिणां कर्तव्यत्वेन प्रोक्ता विहिता। एवं निष्ठाद्वयं कर्मिणां गृहस्थानामकर्मिणां संन्यासिनां चासंकीर्णम्। विभज्य प्रदर्शितमित्यर्थः॥ ३॥

नन्वेवंसति ज्ञानकर्मणोरुभयोरपीतरेतरानपेक्षयैव साक्षान्मोक्षहेतुत्वं प्राप्तमितिचेन्न। 'न कर्मणा न प्रजया' इत्यादिश्रुतिभिः कर्मणो मोक्षसाधनत्वानिषेधात् 'ज्ञानादेव तु कैवल्यम्' इतीतरव्यावृत्तिपूर्वकं ज्ञानस्यैव साक्षान्मोक्षसाधनत्वावधारणाच्च न कर्मणो मोक्षसाधनता संभवति। यद्यपि ज्ञानमेव समुत्पन्नं स्वयमन्यानपेक्षया पुरुषस्य सद्यो मुक्तिसुखं प्रयच्छति तथापि 'सत्त्वशुद्धौ ध्रुवा स्मृतिः' इति श्रवणात्सत्त्वशुद्धिं विना ज्ञानं नोदेति। सत्त्वशुद्धिश्च 'ब्राह्मणा विविदिषन्ति यज्ञेन दानेन' इति श्रवणाद्यज्ञदानादिसत्कर्मानुष्ठितिं विना न सिध्यति। अतो मुमुक्षोरनुत्पन्नात्मज्ञानस्यावश्यं चित्तशुद्ध्यर्थं कर्म कर्तव्यमन्यथा मोक्षो न सिध्यतीत्याह—

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
नच संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४ ॥

न कर्मणामिति । नित्यानां कर्मणां श्रौतादीनामनारम्भादनाचरणान्नैष्कर्म्यं न यत्र कर्म तन्निष्कर्म ब्रह्म 'निष्कलं निष्क्रियम्' इति श्रुतेः । तस्य भावो नैष्कर्म्यं निष्क्रियब्रह्मात्मनावस्थानलक्षणां मुक्तिं पुरुषो नाश्नुते । उपायाभावात् । सत्येवोपाये उपेयं सिध्यति । यत उपायभूतानां कर्मणामननुष्ठानादुपेयभूतं ज्ञानं तत्फलं च नैष्कर्म्यं पुरुषस्य न सिध्यति । अतो मुमुक्षोरीश्वरार्पणबुद्ध्या नित्यं नैमित्तिकं च कर्मावश्यमनुष्ठातव्यं तेन ज्ञानं मोक्षश्च सिध्यतीत्यर्थः । ननु 'न कर्मणा न प्रजया' इतिश्रुत्यैव कर्मणो मोक्षसाधनत्वनिषेधात् संन्यासयोगादिति संन्यासस्यैव यतीनां मुक्तिहेतुत्वश्रवणाच्च सर्वकर्मणां संन्यासमेव कृत्वाऽहं तूष्णीं सुखमासे न कदापि च कुर्वे क्लेशभूयिष्ठं कर्म । तत्रापि च हिंसाप्रधानमित्याशङ्कायामाह—**नचेति** । कर्मणि क्लेशभूयिष्ठत्वबुद्ध्याप्यलसत्वेन वाप्यापातवैराग्याच्छिखायज्ञोपवीतत्यागमात्रादेव सिद्धिं नैष्कर्म्यसिद्धिं विदेहमुक्तिं ब्राह्मणो मुमुक्षुर्न समधिगच्छति विनैव वेदान्तश्रवणजन्यज्ञानेन । 'ज्ञानादेव तु कैवल्यम्' इति श्रुतिप्रसिद्धेः । ननु संन्यस्य मुक्त्यर्थं दहरोपास्तिं वा वैश्वानरीं वोपास्तिं शिवस्य वा पूजां तन्नामकीर्तनं वा कुर्यामिति चेत् । नाद्यः । 'सत्यकामः सत्यसंकल्पः' इति दहरोपासनस्य सत्यकामत्वादिगुणवत्त्वश्रवणाद्गुणवदुपास्त्या तद्भावापत्तिप्रसङ्गात् । न द्वितीयः । 'स सर्वेषु भूतेष्वन्नमत्ति' इति श्रवणाद्वैश्वानरोपास्त्या सर्वभूतात्मनान्नादनमात्रफलप्रसङ्गात् । न तृतीयः । 'देवो भूत्वा देवानप्येति' इति श्रवणात्तल्लोकप्राप्तिप्रसङ्गात् । नापि चतुर्थः । 'नास्ति पातकमहो कलिकाले नामकीर्तनपरेषु नरेषु' । 'पुण्यश्रवणकीर्तनम्' इत्यादिवचनात्पापक्षयमात्रप्रयोजनसिद्धेः । यद्दृश्यं तदसदित्यव्याकृतादेः स्थलान्तरस्य सगुणस्य सर्वस्य दृश्यत्वेनासत्त्वावगमादुपास्यस्य सर्वस्यापि सगुणत्वेनासत्त्वाद्व्यभिचारादसदुपास्त्या त्वसद्भाव एव फलं सिध्यति न क्वचिदपि सद्भावः । उपासनानुरूपत्वात्फलसिद्धेः । 'तं यथायथोपासते तथैव भवति', 'असन्नेव स भवति असद्ब्रह्मेति वेद चेत्' इत्यादिश्रुतेः 'ये यथा माम्' इति स्मृतेश्च । किंच 'असुर्या नाम ते लोका' इति, 'नचेदिहावेदीन्महती विनष्टिः' इत्यात्मतत्त्वाज्ञानिनोऽसुरलोकप्राप्तिरूपमहानर्थश्रवणात् 'अरुन्मुखान् यतीन् सालावृकेभ्यः प्रायच्छम्' इति वेदान्तविमुखानां यतीनामिन्द्रभयश्रवणाच्च प्रत्यक्तत्त्वविवेकाय संन्यासः सर्वकर्मणाम् । श्रुत्या विधीयते तस्मात्त्यागी

पतितो भवेत् ॥' इति यतेः स्वरूपविवेकाभावे पतितत्वस्मरणात्संन्यासस्यापि कर्मत्वाविशेषात्तावन्मात्रेण मोक्षसंभवाच्च । तस्माद्यतेर्मुमुक्षोः सर्वथा वेदान्तश्रवणेन ज्ञानं प्रयत्नेन संपादनीयमिति सूचितं भगवता 'न च संन्यसनादेव सिद्धिं समधिगच्छति' इति । चकारस्त्वर्थः । संन्यासयोगादित्यत्र ब्रह्मविदां यतीनां ब्रह्मण्यारोपितनामरूपग्रहणत्यागः संन्यासशब्देनोच्यते नतु कर्मसंन्यासः । यतय इति पदेनैव संन्यासस्य सिद्धत्वादन्यथा पुनरुक्तिप्रसङ्गः । तस्माद्यतेः संन्यासस्य फलं वेदान्तश्रवणजन्यज्ञानमेवेति सिद्धम् ॥ ४ ॥

यदुक्तं सर्वकर्मसंन्यासं कृत्वाहं तूष्णीं सुखमास इति तन्न । संस्कारजप्रवृत्तेः क्रियाया निःशेषत्यागायोगाद्वृत्तेरालम्बनाभावाच्च तूष्णीमासनं ब्रह्मनिष्ठं विना न कस्यापि घटत इत्याशयेनाह—

नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥

नहीति । अत्र लोके जातु कदाचिदपि कश्चिद्यो वा को वापि प्राणी क्षणं क्षणार्धमप्यकर्मकृत्किमपि कर्माकुर्वन्न तिष्ठति किंतु सुषुप्तिं विना जाग्रत्स्वप्नयोः सर्वदा कायेन वा मनसा वा वाचा वा चक्षुरादिभिर्वा यत्किंचित्कर्म कुर्वन्नेव तिष्ठति न क्वचिदपि तूष्णीमित्यर्थः । इदं सर्वं प्रत्यक्षमिति । हिः प्रसिद्धिद्योतनार्थः । कस्मात्तूष्णीं स्थातुं न शक्नोतीत्याकाङ्क्षायामाह—**कार्यत इति** । हि यस्मात्कारणात्सर्वोऽपि प्राणिवर्गः प्रकृतिजैः सत्वरजस्तमोगुणात्मिका मूलप्रकृतिस्तस्याः सकाशाज्जाताः प्रकृतिजास्तैर्गुणैर्गुणाः द्रव्यवासना गुणवासना कर्मवासना जातिवासना रागद्वेषादयश्च तैः प्रकृतिजैर्गुणैरन्तः प्रेर्यमाणोऽवशोऽस्वतन्त्रः सन्नेव बहिरन्तःकर्म नानाव्यापाररूपं कार्यते । वासनात्मिकायाः प्रवृत्तेर्वशो भूत्वा न कोऽपि तूष्णीं स्थातुं शक्नोति विना ब्रह्मविद्वर्यम् । ब्रह्मविद्वर्यस्तु निर्विकल्पसमाध्यग्निना निर्मूलितप्रकृतिगुणतत्कार्यतूलपटलत्वाद्वायुना मेरुरिव स्वयं गुणैर्न चाल्यते किंतु निष्क्रियब्रह्मात्मना तूष्णीमेव तिष्ठति । 'उदासीनवदासीनो गुणैर्यो न विचाल्यते' इति स्मरणात् । ततो ब्रह्मविद्वर्य एकएव तूष्णीं स्थातुं शक्नोति न ततोऽन्य इत्यर्थः ॥ ५ ॥

ननु सर्वं कर्म संन्यस्य करपादादीन्द्रियग्रामं रुद्ध्वा बहिस्तूष्णीं स्थाणुवन्नैश्चल्येन स्थातुं शक्य एवेत्याशङ्कायां न । बन्धमोक्षयोर्गतिं स्वाधिकारं चाविज्ञाय किं कर्मणा निष्फलेन क्लेशभूयिष्ठेनेति दुरहंकारेण

मुक्तिसाधनं वैदिकं कर्म सर्वं संन्यस्य यस्तूष्णीं तिष्ठति स दम्भाचार इत्याह—

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६ ॥

कर्मेन्द्रियाणीति । विमूढात्मा विमूढः कार्याकार्यविवेकरहित आत्मा मनो यस्य स विमूढात्मा सन् स्वस्य कर्तव्यं वैदिकं कर्म मुक्तिसाधनं परित्यज्य बहिः कर्मेन्द्रियाणि संयम्य निरुध्य चक्षुषी निमील्यान्तरिन्द्रियार्थाञ्शब्दादीन्स्मरंश्चिन्तयन् य आस्ते ब्रह्मविदहमेव कर्मसंन्यासेन कृतार्थोऽस्मीति स मिथ्याचारोऽसदाचारः कपटचारित्र आत्मवञ्चक इति सद्भिरुच्यत इत्यर्थः । एतेन श्रवणार्थं वान्यथा वा संन्यस्य श्रवणादिकमकृत्वा वेषेण जीवनं कुर्वन् संन्यासेनैव कृतार्थोऽहमिति यो यतिर्मन्यते सोऽपि मिथ्याचार एवेति सूचितं भवति ॥ ६ ॥

अनात्मज्ञस्य मुमुक्षोः कर्मसंन्यासापेक्षया कर्मयोग एव श्रेष्ठ इत्याह—

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ७ ॥

यस्त्विति । तुशब्दः पूर्वस्मादस्य श्रेष्ठत्वद्योतनार्थः । यस्त्वनात्मज्ञो मुमुक्षुर्विचक्षणः कर्मसंन्यासमकृत्वैव चक्षुरादीनीन्द्रियाणि रागद्वेषादिदोषाणां गोचराणि न भवेयुर्यथा तथान्तर्नियम्य स्वयमसक्तः फलाभिसंधिरहितो भूत्वेश्वरार्पणबुद्ध्या कर्मेन्द्रियैर्वागादिभिः कर्मयोगं श्रौतं स्मार्तं वारभते श्रद्धया चित्तशुद्ध्यै करोति स विशिष्यते । मोक्षसाधनीभूतकर्मयोगनिष्ठत्वात्कर्मयोगी पूर्वोक्तदाम्भिककर्मसंन्यासापेक्षया श्रेष्ठ इत्यर्थः॥७॥

मुमुक्षोर्नैष्कर्म्यसिद्धये मिथ्याचारत्वादौ निवृत्तये चावश्यं कर्म कर्तव्यमिति सूचयितुमाह—

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥ ८ ॥

नियतमिति । हि यस्मात्कारणादकर्मणः येन न संभाव्यते कर्मबन्धः पुरुषस्य स कर्मसंन्यासस्तस्मादकर्मणो मूढकर्तृकाद्विवेकवता मोक्षसाधनत्वेन क्रियमाणं कर्म ज्यायः श्रेष्ठम् । यद्यपि संन्यास एवात्यरेचयदिति संन्यासस्यैव सर्वोत्कृष्टतमत्वं श्रूयते तथापि 'योग्यप्रयुक्तं साधनं कार्यसाधकम्' इति न्यायेन नाहं कर्म करोमीत्यभिमानवन्मूढतमकृ-

तत्वात्संन्यासस्य तदपेक्षया परमेश्वरमाराध्याहं तरिष्यामीतीश्वरार्पणबुद्ध्या निरभिमानिना मुमुक्षुणा क्रियमाणत्वात्कर्म ज्याय इत्युपचर्यते ननु संन्यासो दूष्यते। किंतु विद्वत्संन्यासाद्विविदिषासंन्यासाद्विलक्षणः संन्यासः स्वस्थेन न कर्तव्य इत्युच्यते । तत्र विध्यभावाद्यत आत्मतत्त्वमज्ञात्वैव केवलमूढेनाविविदिषुणा कर्मसंन्यासः कृतश्चेत्तेन प्रत्यवाय एकोऽनर्थः। नरकपातो द्वितीयः । दुर्योनिस्तृतीयः । मोक्षाभावश्चतुर्थः । कृते तु कर्मणि प्रत्यवायाद्यभावः ईश्वरप्रसादश्चित्तशुद्धिर्ज्ञानं मोक्षश्च सिध्यति। अतः फलभूयस्त्वात्कर्मणः, त्वं नियतं विध्युक्तं कर्म नित्यं वा नैमित्तिकं वेश्वरप्रीत्यर्थं चित्तशुद्ध्यर्थं च कुर्वित्यर्थः । न केवलमामुष्मिकार्थमेव कर्म कर्तव्यं भवति किंत्वैहिकार्थमपि कर्तव्यमित्याह—**शरीरेति**। निश्चलात्मना स्थाणुवत्तूष्णीमवस्थानं खल्वकर्म कर्मसंन्यासस्तस्मादकर्मणो निःशेषकर्मपरित्यागात्ते शरीरयात्रापि न प्रसिध्येत् । सुखेन न सिध्यतीत्यर्थः । नहि बृहच्छिलावद्गुहायां कंदरे वा तूष्णीं तिष्ठतः शरीरयात्रा सिध्यति यत्किंचित्तदनुकूलव्यापारं विना । ततस्तदर्थमपि कर्म कर्तव्यमेव। ननु यावता कर्मणा शरीरपरित्राणं सिध्येत्तावत्कर्म कुर्यां न ततोऽतिरिक्तमिति चेत्तत एव भवानतिमूढः संन्यासानर्हश्च भवति। यतः स्वेतरस्यैवानात्मनो देहस्य रक्षणं कर्तुमिति न त्वात्मनः। तवायमात्मा जननमरणप्रवाहे पतित्वा मुहुर्मुहुर्निमज्जन्नुन्मज्जन्निरन्तरदुःखेन क्लिश्नाति। त्वमात्मनस्त्राणमकृत्वा अनात्मनः शत्रोरेव त्राणाय यतस इतोऽपि वा दुरभिमानं त्यक्त्वा कर्मणा शरीरत्राणमत्यन्तास्थया यथा करोषि तथा विहितानि कर्माण्यनुष्ठाय तेन प्राप्तचित्तशुध्यात्मज्ञानमपरोक्षलक्षणं संपाद्यात्मानं दुःखसागरादुद्धर। 'उद्धरेदात्मनात्मानम्' इति वचनादात्मनो मोक्षार्थमेव कर्म कुरु न क्वचिदप्यन्यार्थमित्यर्थः ॥ ८ ॥

ननु 'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते' इति कर्मणां बन्धहेतुत्वस्मरणात्कथं बन्धकं कर्म कर्तुं शक्यत इत्याशङ्कायां न, काम्यस्यैव कर्मणो बन्धकत्वं नत्वीश्वरार्पणबुद्ध्या क्रियमाणस्येत्याह—

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९ ॥

यज्ञार्थादिति। 'यज्ञो वै विष्णुः' इति श्रवणाद्यज्ञस्य श्रीविष्णोः परमेश्वरस्यार्थं संतुष्टिनिमित्तं यत्कर्म क्रियते वैदिकं तद्यज्ञार्थमित्यु-

च्यते । तस्माद्यज्ञार्थात्कर्मणो नित्यादीश्वरप्रीतिहेतोरन्यत्र काम्यादौ कर्मण्ययं लोकोऽधिकारी ब्राह्मणादिः । कर्मबन्धनः कर्मैव बन्धनं जन्मादेर्निबन्धनं हेतुर्यस्य स कर्मबन्धनो भवति । विहिताकरणेन वा काम्येन निषिद्धेन वा कृतेन कर्मणा नरो बन्धवान्भवति नत्वीश्वरप्रीत्यै क्रियमाणेन कर्मणा । 'तत्कर्म यन्न बन्धाय' इतिस्मरणादीश्वराराधनात्मकमेव कर्माबन्धकं तदन्यत्तु बन्धकमित्यर्थः । ततस्तदर्थमीश्वरप्रीत्यर्थं चावश्यं त्वं मुक्तसङ्गः फलाभिसंधिरहितो भूत्वा विहितं कर्म समाचर सम्यगनुतिष्ठ । तेन तुष्टेश्वरप्रसादाच्छुद्धात्मा सन् ज्ञानं प्राप्य मुक्तो भविष्यसीत्यर्थः ॥ ९ ॥

पूर्वं नैष्कर्म्यसिद्धये मिथ्याचारत्वनिवृत्तये शरीरयात्रासिद्धये चावश्यं कर्म कर्तव्यमित्युक्त्वा, इदानीं 'धर्मज्ञसमयः प्रमाणम्' इति सूत्रोक्तरीत्या धर्मज्ञतमेन ब्रह्मणा प्रोक्तः प्रामाणिकोऽयं परमो धर्मो मुमुक्षूणामवश्यं कर्तव्य इन्द्रादिदेवताप्रसादसिद्धय इत्याह—

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ १० ॥

सहयज्ञा इति । द्वाभ्याम् । पुरा सृष्ट्यादौ प्रजापतिर्ब्रह्मा श्रुत्युक्तैर्यज्ञैः सह प्रजाः ब्राह्मणादिवर्णान्सृष्ट्वा ताः प्रजा उवाच यूयमनेन यज्ञेन श्रौतेन स्मार्तेन च प्रसविष्यध्वं चरुपुरोडाशादिद्रव्यैर्देवानां प्रीतिमुत्पादयध्वम् । एष देवानुद्दिश्य श्रद्धया कृतो यज्ञोऽपि वः इष्टानिच्छाया विषयभूतान्काम्यन्त इति कामाः फलविशेषास्तान्दोग्धीतीष्टकामधुक् भवतु । निष्कामानां ज्ञानप्रतिबन्धकदुरितक्षयाय सकामानां स्वर्गसुखाय भवेदित्यभिप्रायः ॥ १० ॥

कथमयं यज्ञोऽस्माकमिष्टार्थाय भवतीत्यत आह—

देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ११ ॥

देवानिति । अनेन यज्ञेन श्रौतेन स्मार्तेन च यूयं देवानिन्द्रादीन्भावयत संभावयत । चरुपुरोडाशादिभिः संतुष्टान्कुरुतेत्यर्थः । अनेन संभावितास्तुष्टाः सन्तस्ते देवा इन्द्रादयो वः युष्मान्भावयन्तु इष्टार्थप्रदानेन संभावयन्तु । एवं परस्परं भावयन्तः सन्तो यूयं देवानां प्रसादेन निःशेषविनष्टप्रतिबन्धा भूत्वा सत्त्वशुद्ध्या सम्यक्ज्ञानं प्राप्य परं निरतिशयानन्दलक्षणं श्रेयो विदेहकैवल्यमवाप्स्यथ । यद्यप्यत्र 'परस्परं

भावयन्तः श्रेयः परमवाप्स्यथ' इत्युभयेषां परश्रेयःप्राप्तिविधिः प्रतीयते, तथापि विचार्यमाणे प्रजानामेव धर्मोपदेशविषयत्वेनोक्तधर्मानुष्ठानलभ्यपरमश्रेयःप्राप्तिविधिर्नतु तदनुग्राहकाणां देवानाम् । तेषामुपदेशाविषयत्वात्स्वयं प्रभातविज्ञानत्वाज्जीवन्मुक्तत्वाच्च न श्रेयोविधिरुपयुज्यते । ततः संभावनायामेव परस्परपदस्य संबन्धो नतु परमश्रेयःप्राप्तिविधाविति ज्ञेयम् ॥ ११ ॥

यज्ञैः संभाविता देवा मुमुक्षूणां न केवलमामुष्मिकमेव सुखं प्रयच्छन्ति किंतु ऐहिकसंपत्सुखमपि, अतस्तेषां प्रीत्यै यज्ञाद्यवश्यं कर्तव्यमन्यथा प्रत्यवायी भवतीति सूचयितुमाह––

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ १२ ॥

इष्टानिति । यज्ञैः श्रौतैः स्मार्तैश्च भाविताः संभाविता देवा वो युष्मभ्यमिष्टानिच्छाविषयभूतान्भोगान्पशुपुत्रकलत्रधनधान्यादीन्दास्यन्ते वितरिष्यन्ते । एवं तैर्देवैर्दत्तान् पदार्थान्पुनश्चरुपुरोडाशादिरूपेणैभ्यो देवेभ्योऽप्रदायाऽदत्त्वा देवानामृषीणां पितॄणां च यज्ञेन ब्रह्मचर्येण प्रजया चानृण्यमकृत्वा यः स्वशरीरमेव पोष्टुं भुङ्क्ते स स्तेनो देवादीनां चोर एव भवति शिष्टानां निन्द्यश्च । देवब्रह्मस्वहारिणस्तस्करस्य या गतिस्तां च गच्छतीत्यर्थः ॥ १२ ॥

ये तु पञ्चमहायज्ञान्कृत्वा शिष्टान्नाशिनो भवन्ति ते सर्वपापैर्मुक्ता भवन्ति । ये तु देवतातिथ्यादीननुद्दिश्य स्वार्थमेव पचन्ति ते पापाशिन एवेति पञ्चमहायज्ञानुष्ठानाननुष्ठानयोः फलं प्रतिपादयति पञ्चमहायज्ञानां दैनंदिनत्वेनावश्यकर्तव्यत्वदार्ढ्याय––

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ १३ ॥

यज्ञशिष्टाशिन इति । ब्राह्मणा यज्ञशिष्टाशिनः सन्तो 'देवयज्ञः पितृयज्ञः' इति श्रुत्युक्तपञ्चमहायज्ञाननुष्ठाय तच्छेषान्नभोजिनो भूत्वा सर्वकिल्बिषैः 'कण्डनी पेषणी चुल्ली चोदकुम्भी च मार्जनी । पञ्च सूना गृहस्थस्य पञ्चयज्ञात्प्रणश्यति' इति स्मृत्युक्तानि यानि बुद्धिपूर्वकं पाणिपादपातोत्पन्नानि यान्यवशेन प्राप्तानि तैरेतैः सर्वैः किल्बिषैर्मुच्यन्ते । तेषां मोकाच्चित्तशुद्धिस्तया ज्ञानं मुक्तिं च विन्दन्तीत्यर्थः । पञ्चमहायज्ञानकुर्वाणाः पापा ये ब्राह्मणा आत्मकारणात्स्वोदरपूर्तिहेतोरेव

पचन्ति शूद्रवन्न देवार्थं वैश्वदेवार्थं पचन्ति देवेभ्यः पितृभ्यो ब्राह्मणेभ्यश्चादत्त्वा स्वयमेव भुञ्जते च ते तु पापमेवान्नरूपेण स्थितं भुञ्जते नत्वन्नम् । स्वदृष्ट्या तदन्नमिव भाति शास्त्रदृष्ट्या देवतादृष्ट्या च पापमेव भवति त एव पापिष्ठतमा इत्यर्थः । तथाच श्रुतिः 'मोघमन्नं विदन्ते अप्रचेताः' 'केवलाघो भवति केवलादी' इति 'एका क्रिया द्व्यर्थकरी बभूव' इति न्यायेन मुमुक्षुणा श्रोत्रियेण क्रियमाणं कर्म सत्त्वशुद्धिद्वारा स्वस्य मोक्षहेतुर्भवति वृष्ट्यादिद्वारा जगत्स्थितिहेतुश्च भवत्यत उभयथापि कर्म कर्तव्यमेव ॥ १३ ॥

'मुच्यन्ते सर्वकिल्बिषैः' इति 'नैष्कर्म्यं पुरुषोऽश्नुते' इति कर्मणो मोक्षहेतुत्वं प्रतिपादितम्, जगत्स्थितिहेतुत्वमिदानीं निरूप्यते—

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥

अन्नादिति त्रयेण । 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' इति स्मृत्युक्तप्रक्रियया यज्ञाच्छ्रोत्रियेण यथाशास्त्रं निर्वर्तितात्पर्जन्यो वृष्टिर्भवति । पर्जन्याद्व्रीहियवादिरूपस्यान्नस्य संभव उत्पत्तिर्भवति । अन्नात्स्त्रीपुंसाभ्यां भुक्ताच्छुक्रशोणितरूपेण परिणताद्भूतानि प्राणिनो भवन्ति जायन्ते । जातान्यन्नेनैव जीवन्ति च । एवं वृष्ट्यन्नद्वारा जगज्जीवनहेतुर्यो यज्ञः स तु कर्मसमुद्भवः ऋत्विग्यजमानादिभिः क्रियमाणहोममन्त्रतन्त्रादिक्रिया वैदिकी कर्मेत्युच्यते । तस्मात्सम्यगुद्भवो यस्य स कर्मसमुद्भवोऽपूर्वलक्षणो यज्ञः॥१४॥

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ १५ ॥

कर्मेति । यज्ञकारणभूतं यत्कर्म तत्तु ब्रह्मोद्भवं ब्रह्म वेद ऋगादिस्तस्मादुत्पन्नं विद्धि । तच्च ब्रह्माक्षरसमुद्भवं विद्धि । 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः' इति श्रवणात्सर्वजगत्कारणभूतादक्षरात्परमात्मनः सकाशान्निःश्वासरूपेण स्वयमेवाविर्भूतमत एव नित्यमपौरुषेयं ब्रह्म वेदं विजानीहीत्यर्थः । यस्माद्यज्ञैकमूलाज्जगदुत्पत्तिः स्थितिश्च तस्मात्स्वयं सर्वगतं सर्वार्थप्रकाशकत्वेन सर्वलोकस्थानां तत्तद्धर्मनियतिस्थापकत्वेन च सर्वत्र स्थितमपि ब्रह्म वेदो यज्ञे ब्राह्मणादिभिरनुष्ठेये औपासनाद्यश्वमेधान्ते कर्मण्येव तद्विधानैकप्रयोजनत्वात्प्रतिष्ठितं नित्यं

नियमेन स्थितं भवति । वर्णाश्रमिणां कर्तव्यत्वेन कर्माणि वेद एव विदधातीत्यर्थः ॥ १५ ॥

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥

एवमिति । ईश्वरः श्रुतिमुखेन यज्ञसंततिं विधाय यज्ञद्वारा वृष्टिं चान्नं च संभाव्य भूतसृष्टिं तत्स्थितिं च निर्वोढुमिच्छया स्वयमेव चक्रं प्रवर्तितवान् । तदिदमीश्वरप्रवर्तितं चक्रं नियतमिह लोके यः कर्माधिकारी ब्राह्मणादिर्नानुवर्तयति परमेश्वरेण श्रुत्या विधापितं कर्मयोगं नानुतिष्ठति एतदीश्वरशासनमकृत्वा स्वयमिन्द्रियाराम इन्द्रियार्थेष्वेव अजस्रमारमतीतीन्द्रियारामो विषयभोगलम्पटः सन्नत एवाघायुरायुषः फलमघमेव यस्य सोऽघायुर्भूत्वा काकवच्छाल्मलिवन्मोघं व्यर्थं निष्फलमेव जीवति । नैतावन्मात्रमेव भवति किंत्वीश्वराज्ञोल्लंघनदोषेण विहिताकरणप्रत्यवायेन नित्यकृतपापसंघातेन चानेककल्पं नरकं चाधिगच्छतीत्यर्थः । ततो विवेकिनो ब्राह्मणस्य मुमुक्षोरनात्मज्ञस्य तरणार्थं लोकहितार्थं चावश्यं वेदोक्तं कर्म कर्तव्यमेवेति सिद्धम् ॥ १६ ॥

तत्र श्रीभगवान् 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्' इति सांख्यानां संन्यासिनामसांख्यानां योगिनां गृहिणां चोत्तरदक्षिणायनवदसंकीर्णं निष्ठाद्वयं विभज्य दर्शयित्वा 'तदेकं वद निश्चित्य' इति स्वस्य कर्तव्यं पृष्टवतोऽर्जुनस्य कर्माधिकारिणः सन्निहितत्वात्तद्धितमुपदेष्टुं 'न कर्मणामनारम्भात्' इति कर्मयोगमुपक्रम्य, 'नियतं कुरु कर्म त्वम्' इत्यस्मै कर्मयोगमेवोपदिश्य, यज्ञार्थादित्यारभ्य 'मोघं पार्थ स जीवति' इत्यन्तेन ग्रन्थेनानात्मज्ञस्य मुमुक्षोरवश्यं सत्त्वशुद्ध्यर्थं कर्म कर्तव्यमेव । कृते कर्मणि देवताप्रसाद ईश्वरप्रसादश्च सिध्यतीति सूचयितुं कर्मणः कर्तव्यत्वमेव बहुप्रक्रियया निश्चित्य इदानीं सांख्यस्य यतेर्ज्ञानयोगनिष्ठां विना नान्यत् कथंचिदपीषत्कर्तव्यमस्तीति सूचयितुमाह—

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ १७ ॥

य इति । तुशब्दोऽनात्मरतिव्यावृत्त्यर्थः । यस्तु मानवः बहिरन्तश्च सर्वत्र ब्रह्मैव मापयति ग्राहयतीति मानं प्रत्यग्दर्शनं तदेव सर्वदा वाति भजतीति मानवो ब्रह्मविद्यतिरात्मरतिः, 'अहं ब्रह्मास्मि' इति श्रुत्युक्तरीत्या स्वात्मना साक्षात्कृते नित्यानन्दैकरसेऽद्वितीये परे ब्रह्मण्येव रतिरन्तःकरणस्य रमणं क्रीडा सर्वदा विहारो यस्य स आत्मरतिरेव भवेत् ।

'आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः' इति श्रवणाद्यो ब्रह्मवित्सर्वदात्मन्येव विहरति न कचिदप्यनात्मनीत्यर्थः। किंचात्मतृप्तश्च आत्मनैवानन्दैकरसेन पूर्णेन स्वीकृत्याधिगतेन तृप्तः। 'आत्मलाभान्न परं विद्यते' इति स्मरणात्। अतः प्राप्तव्यान्तराभावादात्मप्राप्त्यैव सर्वत्र प्राप्तालंबुद्धिर्यस्य स आमतृप्तश्च भवेत्। आत्मन्येव चक्षुषो रूपवद्बहिरन्तः सर्वत्र वृत्तेर्विषयभूते चिदानन्दैकरसे ब्रह्मण्येव संतुष्टः, यथा कामी इष्टार्थे संतुष्टो भवति तथा य आत्मन्येव संतुष्टश्च स्यात्। तस्य महात्मन आत्मारामस्य कृतकृत्यस्य यतेः कार्यं कर्तव्यं कर्म न विद्यते नास्ति। पर्याप्तकामत्वेन प्राप्तव्याभावात्। नन्वधिकृतत्वाविशेषाद्विदुषोऽपि कर्तव्यमेव वैदिकं कर्म कर्मविधेः सर्वसामान्यात्कर्मशास्त्रतदर्थतन्नियमपरिज्ञातृत्वाद्विदुषः 'विद्वान् यजते' इति विशेषविधानाच्च विधिबलाद्विदुषाप्यवश्यं कर्म कर्तव्यमेवेति चेद्भवानत्र प्रष्टव्यः। परावरैकत्वविज्ञानवह्निनिर्मूलितद्वैतभ्रमस्य सर्वं ब्रह्मैव पश्यतो जीवन्मुक्तस्य ब्रह्मविदः कर्मकरणं स्वार्थं वा किं परार्थं वा। आद्ये कर्मैहिकार्थं वा, किमामुष्मिकार्थं वा। आद्ये शरीररक्षार्थं वा किं परिग्रहरक्षार्थं वाप्युत विलासार्थम्। नाद्यः। सिद्धेऽन्यथार्थे न यतेत तत्र 'परिश्रमं तत्र समीक्षमाणः' इति वचनाच्छरीरस्थितेः प्रारब्धाधीनत्वात्तदुद्दिश्य विदुषः कर्मानुपपत्तेः। न द्वितीयः। 'एवं वै तमात्मानं विदित्वा' इति श्रुतेः। निःशेषनिवृत्तमिथ्याज्ञानानां ब्रह्मविदां पुत्राद्येषणाभ्यो व्युत्थानश्रवणात्ताभ्य उत्थितवतो विदुषः परिग्रहाभावात्तद्रक्षानिमित्तककर्मानुपपत्तेः। न तृतीयः। सर्वमात्मानमेव पश्यत आत्मरतेर्विदुषोऽन्यत्र रत्यप्रसक्तौ विलासासंभवात्। तर्ह्यामुष्मिकार्थमस्त्विति चेत्तत्रापि किं स्वर्गार्थं वा किमपवर्गार्थं, किमात्मशुद्ध्यर्थं वा। नाद्यः। 'पर्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः' इति सर्वकामप्रविलयश्रवणाद्विदुषः स्वर्गकामासंभवात्तदर्थककर्मानुष्ठानानुपपत्तेः। न द्वितीयः। 'न कर्मणा न प्रजया' इति श्रुत्या कर्मणा मोक्षसाधनत्वनिषेधाज्जीवन्मुक्तत्वाच्च विदुषस्तदर्थककर्मासिद्धेः। तृतीये किं शरीरशुद्ध्यर्थं वा, किं चित्तशुद्ध्यर्थं वा, किं आत्मशुद्ध्यर्थं वा कर्म कर्तव्यम्। नाद्यः। 'कलेवरं मूत्रपुरीषभाजनम्' इति स्मरणात्प्रत्यक्षत्वाच्च मलमांसास्थिमतो वपुषः कर्मणा शुद्ध्यसंभवात्। न द्वितीयः। 'यतयः शुद्धसत्त्वाः' इति श्रवणात् शुद्धचित्तत्वादेव सम्यगुत्पन्नात्मज्ञानत्वाद्विदुषस्तच्छुद्ध्यपेक्षासिद्धेः। न

तृतीयः। 'अस्नाविरꣳ शुद्धमपापविद्धम्' इति श्रवणान्निरवयवत्वेनाविषयत्वाच्च कर्मणात्मनः शुद्धिकल्पनायोगात् यज्ज्ञानबलेन विष्णुरुद्रादयोऽकार्यशतकोटिमपि कृत्वा स्वयं शुद्ध्यन्त्यन्यानपि च शोधयन्ति तमात्मानं कः केन शोधयेत्। 'स्वत एव सतः शुद्धिर्नासता येन केनचित्' इत्यात्मनः स्वत एव शुद्धत्वात्। तर्हि विदुषः कर्माचरणं परार्थमेवास्त्विति चेत्त्वमत्र प्रष्टव्यः। लोकार्थं यः कर्म करोति स किमपरोक्षज्ञानी उत परोक्षज्ञानी वेति। आद्ये स यतिर्वा गृहस्थो वा। नाद्यः। तस्य निरभिमानत्वात्संन्यस्तसर्वकर्मतत्साधनत्वाच्च कर्मशब्दाप्रसक्तेः। देहवर्णाश्रमादिष्वहंममेत्यभिमानः प्रपञ्चसत्यत्वबुद्धिरर्थित्वं कर्तव्यताबुद्धिकरणे प्रत्यवायभयं शास्त्रभयं च खलु प्रवृत्तेर्बीजम्। तदेतत्सर्वमपि समूलं परावरैकत्वविज्ञानमहाग्निना निर्दह्य स्वयं निष्क्रियब्रह्मात्मना तिष्ठतो निर्दग्धानात्मतादात्म्यग्रन्थेः सर्वात्मभावापन्नस्य स्वात्मारामस्य यतेरतिवदनमेव न संभवति किमुत कर्मणि प्रवृत्तिरिति। तथाच श्रुतिः—'प्राणो ह्येष सर्वभूतैर्विभाति विजानन्विद्वान् भवते नातिवादी' इति। ततो ब्रह्मनिष्ठस्यात्मरतेः स्वार्थं वा परार्थं वा कर्मणि प्रवृत्तिर्न संभवति। नापि द्वितीयः। जन्मानेकसहस्रकृतपुण्यकर्मपुञ्जपरिपाकेनेश्वरप्रसादेन च सर्वदृश्यमिथ्यात्वनिश्चयपूर्वकं ब्रह्मैवाहमिति ब्रह्मात्मैकत्वविज्ञानमप्रतिबद्धं यदा समुत्पन्नं स्यात्तदैव गृहस्थोऽपि याज्ञवल्क्यादिवदेषणाभ्यो व्युत्थास्यति नत्वहंममेति संसर्तुमर्हति। तत्कारणासंभवात्। संसारकारणं खल्वनात्मनि देहादावहंभावस्तदन्यत्र ममाभावश्च। तदेतद्द्वयं यस्य ब्रह्मात्मैकत्वविज्ञानेन विध्वस्तं न स पुनः संसाराय कल्पते। नहि ब्रह्मैवाहमिति विज्ञानं ब्राह्मणोऽहं ममेदमिति बुद्धिश्च तेजस्तिमिरवत्परस्परविरुद्धमेकत्र वस्तुं शक्नोति। ततो ब्रह्मतत्त्वविज्ञानखड्गनिर्भिन्नहृदयग्रन्थेर्विदुषः पुनः संसरणं न संभवति। अतः संसाराद्व्युत्तिष्ठत्येव गृह्यपि विद्वान् यदि न व्युत्तिष्ठेत्तदव्युत्थानमेव ज्ञापयत्यज्ञानतत्कार्यनिगृहीतत्वं विदुषः। ननु तद्धेतुकप्रारब्धाभावाद्गृही ब्रह्मभावापन्नोऽपि नोत्तिष्ठतीति चेज्जडभरतवद्वसेत् नत्वहंममेदमिति संसरति। मिथ्यात्वज्ञानस्य संसारस्य च मिथो विरोधात्। नहि मरुं निर्जलं दृष्ट्वा पुनर्दूरात्प्रतीयमानं जलमादातुं पातुं वा विवेकी गच्छति। स्वयं बलवता प्रेर्ष्यमाणोऽपि वेगेन हर्षेण च न गच्छति, किंतु हा कष्टमिति रुदन् मन्दं मन्दं गच्छति नाप्यन्यं चोदयति, तद्वत्प्रतिकूलप्रारब्धवानपि विद्वान् तत्सर्वमिथ्यात्वदर्शी संसर्तुं न हृष्यति नान्यं

प्रेषयति च। किंतु भग्नकटिसर्पवन्मन्दगतिर्भविष्यति । प्रवृत्तिहेतोरनात्मन्यहंभावस्याभावात् ब्रह्मैवाहमिति ब्रह्मात्मना ब्रह्मण्येव तिष्ठतो ब्रह्मविदो ब्राह्मणस्य चाण्डालमिव तनुं स्प्रष्टुं न रोचते। देहादितादात्म्यं विनाऽहंममेति व्यवहर्तुं च न शक्यते। ब्रह्मविदां देहादितादात्म्यमतीव दुःखम्, तत्तादात्म्येनाहंममेति प्रवृत्तिस्ततोऽतिदुःखम्, तत्रापि कर्मकरणमत्यन्तदुःखमेवेति विज्ञाय गृहस्थोऽपि विद्वान् सर्वं संन्यस्यत्येव, न स्वार्थं न परार्थं वा कर्म कर्तुं शक्नोति । अतः परोक्षज्ञान्येव चतुर्थाध्याये चात्र च वक्ष्यमाणरीत्या लोकसंग्रहं करिष्यतीति न कचिदप्यपरोक्षज्ञानी निःशेषविनष्टानात्माहंभावः । ननु 'योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः । सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते। नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्' इत्यादिवाक्यार्थपर्यालोचनया त्वपरोक्षज्ञानिनोऽपि लोकसंग्रहार्थं कर्म कर्तव्यमेवेति प्रतीयते, कथं परोक्षज्ञान्येव लोकसंग्रहं करिष्यतीति नियमः क्रियते, विशुद्धात्मत्वादिविशेषणजातं कथं परोक्षज्ञानिनः सिध्येद्विना ब्रह्मविदं ब्रह्मनिष्ठं मुनिरिति तत्त्वविदिति ब्रह्मविल्लिङ्गदर्शनात्ततोऽपरोक्षज्ञानिनोऽपि लोकसंग्रहार्थं कर्म कर्तव्यमेवेति चेत्। सत्यम्। विशुद्धात्मत्वादिविशेषणजातमितरस्माद्ब्रह्मविदं व्यावर्तयति। तदिदं मुक्तिकृतलक्षणं जन्मशतकोट्याप्यन्येषामलभ्यम् । तथाप्यत्र त्वं प्रष्टव्यः । अपरोक्षज्ञानी द्विविधः सिद्धः साधकश्चेति। तयोः किं सिद्धस्योच्यते उत साधकस्य वा लोकसंग्रह इति। नाद्यः । मुक्तत्वात्तस्य लोकसंग्रहानुपपत्तेः 'सर्वमिदमहं च ब्रह्मैव' इति नित्यनिरन्तरब्रह्मनिष्ठया निशितीकृतपरावरैकत्वविज्ञानखड्गेन द्वैतभ्रमबन्धं विच्छिद्य ब्रह्मादिस्तम्बपर्यन्तैः सह सर्वप्राणिभिः स्वं मुक्तं पश्यतो ब्रह्मविद्यतेस्तद्दृष्ट्या ब्रह्मलोकाभावात्तत्संग्रहासंभवात् । यथा देवदत्तः सर्वेभ्यः पूर्वं स्वयं भुक्त्वा स्वमेव भुक्तवन्तं पश्यति न तथा विद्वानात्मानमेव मुक्तं पश्यति, किंतु स्वविज्ञानेन स्वं च सर्वं च प्राणिजातं मुक्तमेव पश्यति। यथा बुद्धिमान् स्वस्य चेतनत्वधर्मवैशिष्ट्यविज्ञानेन ब्रह्माण्डस्थं प्राणिजातं सर्वं चेतनत्वधर्मविशिष्टमेव विजानाति, यथावा पाचकः स्थालीपुलाकस्यैकस्य पक्वताज्ञानेन सर्वस्याप्यन्यस्य पक्वतां विजानाति, तथा ब्रह्मविद्यतिः स्वमुक्त्या सर्वान्मुक्तानेव विजानाति नतु स्वमात्रम्। यस्तु स्वमात्रमेव मुक्तं पश्यति नत्वन्यं न स ब्रह्मविदेव भवति नापिच मुक्तः, किंतु स वाचा मुक्तः न त्वविद्याबन्धात् । यथा करकसूक्ष्मबुद्ध्या तरङ्गफेनबुद्बुदाद्यम्मयं सर्वं जलमात्रं पश्यति, यथा कटक-

मुकुटादि हैमं सर्वं हेममात्रं पश्यति । यथा वा रज्जुसर्पं रज्जुमात्रं पश्यति, तथा यस्तु प्रत्यग्दृष्ट्या स्वं च जगत्सर्वं च ब्रह्ममात्रं पश्यति स एव ब्रह्मविदद्वैतदर्श्यविद्याबन्धविमुक्तश्च । तस्यैतस्याद्वैतदर्शिनो महात्मनः सिद्धस्य सुप्तोत्थितवत्स्वातिरिक्तमपश्यतः पूर्ववृत्तेर्ब्रह्मविद्वरिष्ठस्य लोकविधिविधानविधेयादेरभावात्तदुद्देशेन कर्मणि प्रवृत्तिर्न संभवति । कुर्वन्नपि न लिप्यत इति प्रवृत्तिद्योतकं वाक्यं विद्यते । तत्कथमिति चेत्तदर्थं श्लोकव्याख्यानावसरे वक्ष्यामः । विद्वान् यजत इत्यत्र विदितवेदार्थो ब्राह्मणो विद्वच्छब्दार्थो नतु ब्रह्मविद्यतिस्तस्य सर्वकर्मसंन्यासित्वाद्विधेरपि लोकवन्मिथ्यात्वकोट्यन्तःपातित्वाच्च कर्मविध्यनुपपत्तेः । न द्वितीयः । साधकस्य मुमुक्षोर्यतेः कर्मविध्यदर्शनात् । नहि मुमुक्षोर्यतेर्निदिध्यासोर्लोकसंग्रहार्थं कर्म कर्तव्यमिति विधिरस्ति विना समाधिं 'तमेव धीरो विज्ञाय प्रज्ञाम्' इति, 'परं ब्रह्मानुसंदध्यात्' इति, 'यच्छेद्वाङ्मनसी प्राज्ञः' इति, 'ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्' इति ज्ञाननिष्ठैव कर्तव्यत्वेन श्रूयते । स्मर्यते च 'मनः संयम्य मच्चित्तः' इति, 'ध्यानयोगपरो नित्यम्' इति, 'वाचं यच्छ मनो यच्छ' इति च, अतः साधकस्यात्मवेदिनो यतेः कर्तव्यः समाधिरेव न श्रौतं न स्मार्तं च स्वार्थं वा परार्थं वा । 'शौचमाचमनं स्नानं नतु चोदनया चरेत्' इति ज्ञाननिष्ठस्य विध्यभावस्मरणात् । 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' इति श्रुत्या जिज्ञासया संन्यस्तसर्वकर्मणो यतेर्विविदिषोरेव 'जिज्ञासायां संप्रवृत्तो नाद्रियेत्कर्मचोदनाम्' इति श्रवणादिज्ञानसाधनं विना नान्यत्कर्तव्यमिति कर्मविधेरुपेक्ष्यत्वस्मरणात्किमुत सिद्धस्य विज्ञातात्मतत्त्वस्य साधकस्य कर्मतन्त्रानवकाश इति । अतः परोक्षज्ञान्येव बहुधा कृतश्रवण आभासात्मज्ञान्यहंममादिबाह्यवासनाबद्धो लोकसंग्रहवचनस्य विषयः । अथवा लोकानुग्रहार्थं ब्रह्मणा सृष्टा महान्तो व्यासागस्त्यपराशरवसिष्ठादयस्तत्सदृशा वा अन्ये आधिकारिका निग्रहानुग्रहक्षमास्ते वा भवेयुर्लोकसंग्रहवचनस्य विषयाः । नतु सिद्धो नापि च साधको मुमुक्षुर्यतिः, ततएवोच्यते भगवता सर्वज्ञेन 'तस्य कार्यं न विद्यते' इति ॥ १७ ॥

ननु ब्रह्मेन्द्रादिभिस्तत्तत्पदं लब्ध्वा प्राप्तं यत्सुखं तत्कर्मजन्यमेव । ततः सर्वत्र सुखस्य कर्मसंपाद्यत्वाद्ब्रह्मविदोऽपि सुखार्थित्वाच्च तस्य निरन्तरसुखसिद्ध्यै कर्म यत्किंचित्कर्तव्यमेवेत्याशङ्कायाम् । न । 'आनन्दो ब्रह्म' इति 'विज्ञानमानन्दं ब्रह्म' इति ब्रह्मण आनन्दैकरूपत्वश्रवणान्निरन्तरब्रह्मनिष्ठया तद्भावापन्नस्याखण्डानन्दस्वरूपेणैव तिष्ठतोऽस्य निरन्तर-

ब्रह्मानन्दरसानुभूतेरनवच्छिन्नत्वात्क्रियाजन्यसुखस्यानित्यत्वात्तदनपेक्षिणो ब्रह्मविदः कर्मसाध्योऽर्थस्तदभावे अनर्थो वा न कश्चिदस्तीत्याह—

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

नैवेति । तस्याहमेवेदं सर्वमिति सर्वमात्मानमेवाद्वितीयं पश्यत आत्मारामस्यात्मानन्दस्य यतेः सिद्धस्य कृतेनानुष्ठितेन कर्मणा प्राप्तव्योऽर्थः कश्चिदपि नैवास्ति । आत्मतृप्तत्वात्सर्वमिथ्यात्वदर्शित्वाच्च योगक्रियया प्राप्तव्याकाशगमनाणिमादिसिद्धिर्नापेक्ष्यते । सर्वात्मभावापन्नत्वात्तपःक्रियया प्राप्तव्यब्रह्मेन्द्रादिपदापेक्षा च न संभवति । जीवन्मुक्तत्वाद्वैदिकक्रियया प्राप्तव्यचित्तशुद्धिद्वारकमोक्षापेक्षापि नास्ति । अतो ब्रह्मवित्तमस्य कर्मणा साधनीयोऽर्थः कश्चिदपि नास्त्येवेत्यर्थः । नन्वेतस्य कर्मणा प्राप्तव्येष्टार्थाभावेऽपि विध्युल्लङ्घनदोषो वाप्यकरणे प्रत्यवायदोषो वा स्यात्तेन ज्ञानहानिर्वा स्वरूपहानिर्वा प्रसज्येतेत्याशङ्कायामाह—**नाकृतेनेति** । उक्तलक्षणस्य ब्रह्मविदस्त्वकृतेन विहिताना‍चरणेनानर्थ उक्तः कश्चनेह लोके न संभवति 'मायामात्रमिदं द्वैतम्' इति न्यायेन विधेरप्याविद्यकत्वेन मिथ्यात्वाद्विदुषस्तदुल्लङ्घने दोषाभावः । 'उभे ह्येवैष एते आत्मानꣳस्पृणुते' इति श्रवणादकर्मणोऽपि ब्रह्ममात्रत्वदर्शनेन स्वतःसत्ताभावादकर्मापि दोषाय न कल्पते । निरन्तरब्रह्मनिष्ठयैव तिष्ठतो विदुषस्तेन ज्ञानहानिर्न संभवति 'एष नित्यो महिमा ब्रह्मणस्य' इति ब्रह्मवित्स्वरूपस्य कर्माकर्मभ्यां वृद्धिक्षयाभावश्रवणाद्ब्रह्मविदोऽकर्मणा स्वरूपहानिश्च न भवति । तस्मादकृतेनास्य न कश्चिदप्यनर्थ इत्यर्थः । नन्वस्य मुक्तिप्रतिबन्धकनिवृत्त्यर्थं वाप्याध्यात्मिकाद्युपद्रवनिवृत्त्यर्थं वाप्युपास्तिक्रियया शिवो वा विष्णुर्वाऽन्यो वा व्यपाश्रयणीयो भवति । अथवा शरीरयात्रार्थं ब्राह्मणो वा क्षत्रियो वाप्यनुसृत्याश्रयणीयो भवति । अतो विदुषः सर्वदा कर्मत्यागो न युज्यत एवेत्याशङ्कायामाह—**नचेति** । अस्योक्तलक्षणस्य ब्रह्मवित्तमस्य देवेषु शिवो वा विष्णुर्वा, सर्वभूतेषु ब्राह्मणो वान्यो वा कश्चिदपि यत्किंचित्कार्यमुक्तलक्षणमुद्दिश्य क्रियया व्यपाश्रय आश्रणीयः कश्चिदपि नास्ति 'इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः' इति वचनादिहैवास्मिन् शरीरे नित्यनिरन्तरब्रह्मनिष्ठया भाविशरीरप्रापकमज्ञानं तत्कार्यं संचितादिसर्वकर्मजातं च विनिर्मूल्य स्वयं शरीरसंबन्धरहितत्वेनैव सदास्थितत्वाद्ब्रह्मविदोऽत्रैव मुक्तस्य इतो मुक्तिप्रतिबन्धकासंभवान्मिथ्याकोट्यन्तःपातित्वाच्च शिवविष्ण्वादिराराध्यो न भवति आध्यात्मिकाद्युपद्रवस्य शरीरत्राणस्य च

प्रारब्धाधीनत्वात्पुंप्रयत्नस्य वैयर्थ्यदर्शनाच्च न कोऽपि ब्राह्मणादिराश्रयणीय एव। अतो ब्रह्मविद्यस्य मुक्तस्य क्वचिदपि यत्किंचिदपि कर्म न कर्तव्यमेव। कृतं चेत्स ब्रह्मविदेव न भवति। तथाच स्मृतिः—'ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः। नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित्' इति १८

योगारूढस्य तस्यैवमुक्तस्य यतेरात्मारामस्य कर्म न कर्तव्यं किंत्वारुरुक्षोर्मोक्षार्थिनस्तव कर्म कर्तव्यमेवेति बोधयितुमाह—

तस्मादसक्तः सततं कार्यं कर्म समाचर।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ १९ ॥

तस्मादिति। हि यस्मात्कारणान्मुमुक्षुः पुरुषः स्वयमसक्तः फलाभिसंधिरहितो भूत्वा वैदिकं कर्माचरन् सम्यगनुतिष्ठन्नेव परं परमपुरुषार्थं मोक्षमाप्नोति यथायमात्मरतिरस्मिञ्जन्मनि जन्मान्तरेषु च वैदिकं कर्म कृत्वैव चित्तशुद्धिं प्राप्यात्मज्ञानेन मुक्तिं प्राप्तवान्, तथान्योऽपि कर्मभूमिस्थः कर्म कृत्वैव ज्ञानं प्राप्य मुक्तो भवति नैवान्यथा। तस्मात्त्वमपि मुमुक्षुरसक्तो निष्कामः सन् सततं कार्यं कर्तव्यं वैधं नित्यं नैमित्तिकं च कर्म समाचर श्रद्धाभक्तिभ्यामीश्वरार्पणबुद्ध्या सम्यक्कुरु। कर्मणैव चित्तशुद्धिं प्राप्य ज्ञानं च मोक्षं च प्राप्स्यसीत्यर्थः। 'धर्मेण पापमपनुदति' इति, 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' इति, 'ज्ञानादेव तु कैवल्यम्' इत्यादिश्रुतिस्मृतिभिर्धर्मानुष्ठानादेव पापक्षयः, पापक्षयादेव ज्ञानं ज्ञानादेव मोक्ष इति प्रतिपाद्यते ॥ १९ ॥

ततो मुमुक्षोरज्ञातात्मतत्त्वस्यावश्यं कर्मैव कर्तव्यमित्युपदिश्यास्मिन्नर्थे वृद्धाचारं प्रमाणयति श्रीभगवान्—

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥ २० ॥

कर्मणैवेति। जनकादयः जनको वैदेह आदिर्येषां ते जनकादयः अश्वपतिभगीरथादयः क्षत्रियाः कर्मणैव श्रौतस्मार्तकर्मानुष्ठानेनैव चित्तशुद्धिं प्राप्य ज्ञानेन संसिद्धिमास्थिताः मुक्तिं प्राप्य कृतार्था जाता इत्यतस्त्वमपि कर्मैव कृत्वा तदुत्पन्नचित्तशुद्ध्या ज्ञानं प्राप्य मुक्तो भूत्वा सुखेन तिष्ठेत्यर्थः। यद्वा जनकादयो ज्ञानयोगनिष्ठानिरूढतया संसिद्धिं मुक्तिं प्राप्यापि लोकहितार्थं कर्मणैव सह स्थिताः स्वयं कृतार्था अपि मूढतारणार्थं कर्म कुर्वन्त एव स्थिता इत्यर्थः। आरूढानामेव एवं सति किमुतानात्मज्ञेनारुरुक्षुणा त्वया मोक्षार्थं कर्म कर्तव्यमिति। एवं मुमुक्षो-

रनात्मज्ञस्यारुरुक्षोर्मोक्षार्थमवश्यं कर्म कर्तव्यमेवेति निर्धार्य, इदानीं मुक्तेनाप्याधिकारिकेण लोकहितार्थं कर्म कर्तव्यमेवेति बोधयितुं तत्र दृष्टान्तत्वेन जनकादीनां ज्ञानवृद्धानां प्रवृत्तिमुदाहृत्य तवाप्येतादृशोऽधिकारो यद्यस्ति तिष्ठतु तथापि जनकादिवत्त्वया लोकहितार्थमपि कर्मावश्यं कर्तव्यमेव। महापुरुषप्रवृत्त्या खलु शास्त्रस्य प्रामाण्यं कर्मणः प्राशस्त्यमज्ञतरणं च पारम्पर्येणाचारप्रचयोऽपि च सिध्यति, अतो मुक्तेनाप्यवश्यं महता कर्म कर्तव्यमित्याशयेनाह—**लोकसंग्रहमिति**। लोकः पामरजनस्तस्य संग्रहः सत्कर्ममार्गप्रदर्शनेन तारणमुन्मार्गान्निवारणं वा तमिमं लोकसंग्रहमेवार्थं संपश्यन् मया क्रियमाणं कर्म लोकोपकाराय भवतीति पश्यन्नपि कर्म कर्तुं त्वमर्हसीत्यर्थः ॥ २० ॥

मत्कर्तृकं कर्म कथं लोकस्योपकाराय भवतीति चेदुच्यते—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥

यद्यदाचरतीति। वेदशास्त्राध्ययनाध्यापनयोस्तदर्थज्ञानज्ञापनयोस्तदुक्तकर्मानुष्ठानानुष्ठापनयोश्च दक्षिणः कुलशीलादिमहत्त्वसंपन्नश्च यो द्विजश्रेष्ठः, यद्यच्छ्रौतं स्मार्तं वा अन्यद्वाचरति नियमेनानुतिष्ठति मुमुक्षुः इतरः पामरोऽपि तत्तदेव कर्माचरति नतु स्वयमप्यन्यत्करोति शास्त्रतज्ज्ञानतदुक्तकर्मपरिज्ञानाभावात्। किंच उक्तलक्षणः श्रेष्ठः यद्यच्छास्त्रं स्वयं प्रमाणं कुरुते इदमेव प्रमाणमिति व्यवहरति, लोको मूढजनस्तदेव तेन प्रमाणीकृतमेव शास्त्रमनुवर्तते तदेव शास्त्रं स्वयं प्रमाणं करोति। श्रेष्ठानुसारी भवति पामर इत्यर्थः। एतेन श्रेष्ठस्य कृतार्थस्यापि लोकहितार्थं कर्म कर्तव्यमेवेति सिद्धम् ॥ २१ ॥

ननु महात्मनः कृतार्थस्य कर्मणा साध्यमपश्यतः कर्मकरणं कुत्रापि न दृष्टमित्याशङ्कायां अस्मिन्नर्थे त्वहमेव प्रमाणमित्याह श्रीभगवान्—

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥

न मे इति। हे पार्थ, षड्गुणैश्वर्यसंपन्नस्यावाप्तसर्वकामस्य सर्वेश्वरस्य मे यत्किंचित्कार्यमाप्तव्यमर्थमुद्दिश्य कर्तव्यं कर्म नास्ति, तत्कुतः अनवाप्तमप्राप्तं सत् मम क्रिययाऽवाप्तव्यं प्राप्तव्यं वस्तु किंचिदपि त्रिषु लोकेषु न विद्यते। गृहस्वामिनो गृहस्थद्रव्यवद्ब्रह्माण्डस्थं सर्वं वस्तु ब्रह्माण्डस्वामिनो मे प्राप्तमेव भवति नतु प्राप्तव्यं किंचिदस्ति, एवं महाभाग्यवैराग्यज्ञान-

समृद्धोऽप्यहं लोकसंग्रहात्मके कर्मणि वर्ते एव हि। चकारो ह्यर्थः। मम वैदिके लौकिके च कर्मणि प्रवर्तनं भवतां प्रत्यक्षसिद्धमिति हिः प्रसिद्धिबोधनार्थः ॥ २२ ॥

ननु सर्वेश्वरस्य तव लोकसंग्रहोऽपि न कर्तव्यः अनर्थाभावादित्याशङ्क्य, न। 'अश्रेष्ठः श्रेष्ठानुसारी' इति न्यायेन सर्वज्ञोऽयं कृष्ण इति सर्वे मदनुसारिणो भवन्ति। मय्यकर्मणि सति सर्वेऽप्यकर्माणो भवेयुस्तेन लोकक्षतिरुपपद्यते। अतः कर्म मम कर्तव्यमेवेत्याशयेनाह—

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ २३ ॥

यदीति द्वाभ्याम्। अहं कृतार्थोऽस्मीति वा न कर्मणा मम साध्यमस्तीति वाप्यहमतन्द्रितः मन्त्रतन्त्रप्रयोगादावप्रमत्तो भूत्वा जातु कचित्कदाचिदपि कर्मणि विहिते न वर्तेयं यदि विहितकर्मकर्ता न स्यां चेत् मामकर्माणं दृष्ट्वा सर्वे मनुष्या अप्यकर्माणो भवेयुः। हि यस्मात्कारणान्मनुष्याः सर्वे भगवानयं सर्वज्ञ इति मयि सर्वज्ञत्वबुद्ध्या मम वर्त्म मदीयमेव मार्गमनुवर्तन्ते अश्रेष्ठस्य श्रेष्ठानुसारित्वनियमात्। मया कर्मणि त्यक्ते स्वयमपि कर्म त्यजेयुरित्यर्थः ॥ २३ ॥

ननु तैरपि कर्म त्यज्यतां ततः कोऽनर्थ इत्यत आह—

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥

उत्सीदेयुरिति। सर्वैः कर्मणि परित्यक्ते 'अन्नाद्भवन्ति भूतानि' इत्युक्तरीत्या हविर्भागाभावाद्देवाः प्रक्षीणा भवेयुः। वृष्ट्याद्यभावान्मनुष्यादीनामनुत्पत्तिरुत्पन्नानां च विनाशः स्यात्। एतावानेवानर्थो न भवति किंतु वर्णसांकर्यमपि च स्यादित्याह—**संकरस्येति।** कृतकृत्यत्वाभिमानेनाहं लोकस्थितिकारणं वैदिकं कर्म त्याजयित्वा संकरस्य च कर्ता स्याम्। तत्तद्वर्णजातिभेदव्यवस्थापककर्माभावे सर्वेषामैकरूप्यापत्तौ वर्णाः संकीर्यन्ते सोऽपि वर्णसंकरो मत्कर्तृक एव स्यात्। एवं सांकर्यसंपादनेनाहं सर्वाः प्रजा उपहन्यां सर्वासां प्रजानामुपहतिकर्ता च स्याम्। उपहतिर्दुर्गतिप्राप्तिः। सद्गतिहेतोः सत्कर्मानुष्ठानस्याभावात्सर्वे नरकभाजो भवेयुरित्यर्थः। यत एषानर्थपरम्परापत्तिस्ततः कृतकृत्यस्यापि मम तव चाप्यात्मविदोऽन्यस्य च लोकहितार्थं कर्म कर्तव्यमेवेति सिद्धम् ॥ २४ ॥

तर्हि लोकहितार्थं कर्मणि प्रवृत्तेन विदुषा कथं कर्म कर्तव्यमित्याकाङ्क्षायामाह—

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत।
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ २५ ॥

सक्ता इति। अविद्वांसोऽनात्मज्ञाः कर्मणि कर्मजन्यफले स्वर्गपुत्रधनादौ सक्ता आसक्तिमन्तो भूत्वा नियमेन श्रद्धाभक्तिभ्यां यथा विहितं कर्म कुर्वन्ति तथैव वर्तमानः सन् लोकसंग्रहं चिकीर्षुर्विद्वान् ब्रह्मविदाधिकारिकः स्वयमसक्तः कर्तृत्वाभिनिवेशरहितः फलापेक्षारहितोऽपि भूत्वा कर्म कुर्यात्। एवं कुर्वन् स्वयं तीर्णः परानपि तारयतीति भावः। कर्तृत्वाभिनिवेशरहितत्वं फलानपेक्षित्वं साकल्यवैकल्ययोर्हर्षविषादशून्यत्वं च तज्ज्ञाज्ञयोर्वैलक्षण्यम्। नियमेन कर्मकरणं तूभयत्र सममेव ॥ २५ ॥

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६ ॥

किंच **न बुद्धिभेदमिति।** विद्वान् ब्रह्मवित्स्वयं युक्त आत्मनो देहादितादात्म्याभावदर्शनयोगनिष्ठो भूत्वा समाचरन् कालोचितं कर्म कुर्वन् कर्मसङ्गिनां कर्मासक्तानाम्। फलापेक्षया नियमेन कर्म कुर्वतामित्यर्थः। यद्वा देहेन्द्रियादिभिरेव क्रियमाणेषु कर्मस्वहं कर्ता भोक्तेत्यभिमानः सङ्गः स येषां तेषां कर्मसङ्गिनामतत्त्वविदां मूढानां स्वयं पण्डितत्वाभिमानेन बुद्धिभेदं 'ज्योतिष्टोमेन स्वर्गकामः' इति वचनाज्ज्योतिष्टोमं कृत्वा स्वर्गफलं भोक्ष्य इत्यादिफलविषया या कामनाबुद्धिस्तस्या भेदं चालनं न जनयेत्। न कर्माणि कामनया कर्तव्यानीति वा, स्वर्गादिफलमसदिति वा, कर्त्रादिसर्वं मिथ्येति वा, तेषां बुद्धेर्वैकल्यं न संपादयेत्, किंतु 'अक्षय्यं ह वै चातुर्मास्ययाजिनः' इति, 'पश्यति पुत्रं पश्यति पौत्रम्' इति, 'तस्माद्धर्मं परमं वदन्ति' इत्यादिना च सर्वाणि कर्माणि वैदिकानि जोषयेत् प्रीणयेत्। कर्मफलस्तुत्या कर्माणि कर्तुमिच्छामेव संपादयेदित्यर्थः ॥ २६ ॥

मूढानामेव कर्म नतु पण्डितानामिति सूचयितुमज्ञानां कर्मसङ्गिनामित्युक्तम्, कर्मसङ्गिनामिति यदुक्तं तदेव विस्पष्टयति—

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥ २७ ॥

प्रकृतेरिति। प्रकृतिर्माया सत्यादिगुणद्वारा आकाशादिमहाभूतरू-

पेण परिणता तस्याः प्रकृतेर्गुणाः कार्यभूताः देहेन्द्रियादयस्तैरेव न क्वचिदप्यात्मना क्रियमाणानि सर्वाणि कर्माणि प्रति अविद्वानहंकारविमूढात्मा स्वाविद्यया देहेन्द्रियादावनात्मन्यहमिति बुद्धिरहंकारस्तेन विमूढो विपरीतग्रहणतत्पर आत्मा मनो यस्य सोऽहंकारविमूढात्मा । यद्वा विमूढ इत्यत्रान्तर्गर्भितो णिच् । देहेन्द्रियादिष्वहंकरणेन विमोहितः द्रष्टाहं स्प्रष्टाहं श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता भोक्तेति तत्तदुपाधिसंबन्धसंभावितविपरीतवृत्तीनां विषयतां गमित आत्मा प्रत्यग्लक्षणो येन सोऽहंकारविमूढात्मा । यद्वा देहेन्द्रियादिष्वहंकरणेन विमोहितोऽहंप्रत्ययार्थत्वेनाविदित आत्मा येन सोऽहंकारविमूढात्मा कर्ताहमिति मन्यते । दुष्टादुष्टप्रारब्धवशाद्देहेन्द्रियैः कृतेषु दुष्टेष्वदुष्टेष्वपि कर्मस्वकर्तारमेवात्मानं मया पापं कृतं पुण्यं कृतमिति तत्तत्क्रियायाः कर्तारमेव पश्यतीत्यर्थः ॥ २७ ॥

विद्वान् युक्त इति यदुक्तमात्मनो देहेन्द्रियतत्कर्मसंबन्धाभावदर्शनं विदुषस्तदनेन प्रतिपाद्यते—

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ २८ ॥

तत्त्वविदिति । गुणकर्मविभागयोः गुणाश्चक्षुरादयो वागादयो बुद्धिर्मनश्च । तत्र चक्षुःश्रोत्रादीनामेव दर्शनश्रवणादिक्रिया, वाक्पाण्यादीनामेव वचनादानादिक्रिया, बुद्धेरेवाहंकरणक्रिया, मनस एव संकल्पनक्रिया, आत्मनस्तु कूटस्थासङ्गचिद्रूपेणावस्थानमात्रं, एवं गुणविभागः कर्मविभागश्च तयोर्गुणकर्मविभागयोरात्मनश्च तत्त्वं याथात्म्यं सम्यग्वेत्तीति तत्त्वविद्विद्वान् । तुशब्दोऽविद्वद्व्यावृत्त्यर्थः । सर्वकर्मसु गुणाश्चक्षुरादय एव गुणेषु रूपादिषु वर्तन्ते, वागादय एव वचनादिषु वर्तन्ते, बुद्धिरेव तेषां कर्मस्वहंकर्तेत्यहंकरोति, अहं तु न शृणोमि, न पश्यामि, न वदामि, न करोमि, न गच्छामि किंतु कूटस्थासङ्गचिदात्मना सर्वदा तूष्णीमेवासमिति मत्वा निश्चित्य तेषां कर्मसु न सज्जते । तत्राहंममेति प्रत्ययं न करोतीत्यर्थः ॥ २८ ॥

एवं देहेन्द्रियादिभिः क्रियमाणेषु कर्मसु स्वस्य कर्तृत्वदृष्ट्या विद्वान् स्वविलक्षणानज्ञान् कर्मिणः प्रमादेनापि न विचालयेदिति पुनरुक्तमेवार्थं द्रढयति—

प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥ २९ ॥

प्रकृतेरिति । कर्मिणां विद्वद्वैलक्षण्यं दर्शयति—**प्रकृतेर्गुणसंमूढा इति** । प्रकृतेरुक्तलक्षणाया गुणेषु कार्येषु देहेन्द्रियादिष्वहंबुद्ध्या संमूढास्तदात्मतामापन्नाः पामराः स्वयं गुणकर्मसु गुणैः श्रवणादिभिर्वागादिभिः क्रियमाणेषु कर्मसु श्रवणदर्शनवचनादानभोजनादिष्वहमेव श्रोता द्रष्टा वक्ता दाता कर्ता भोक्तेति सज्जन्तेऽभिनिवेशं कुर्वन्ति । एतान् कर्मिणोऽकृत्स्नविदोऽब्रह्मविदोऽज्ञान् कृत्स्नवित्पूर्वोक्तलक्षणो ब्रह्मविन्न विचालयेत् । कामनया कर्म न कर्तव्यमिति वा, कर्मफलमसदिति वा, कर्त्रादि मिथ्येति वा, त्वं ब्रह्मैव तव न किंचित्कर्तव्यमस्तीति वा न विक्षेपयेत् किंतु कर्मस्तुल्या कर्मस्वेव प्रवर्तयेदित्यर्थः ॥ २९ ॥

एवं ज्ञानिनामप्याधिकारिकाणां लोकसंग्रहार्थमवश्यं कर्म कर्तव्यमिति लोकसंग्रहकारिणात्वेवं वर्तितव्यमिति चोपदिश्याधुना लोकसंग्रहदृष्ट्यापि स्वधर्मं कुर्वित्याह—

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

मयीति । लोकसंग्रहकर्तात्मतत्त्वज्ञस्त्वध्यात्मचेतसा 'इदं सर्वं यदयमात्मा' इति श्रुत्युक्तरीत्यात्मानमधिकृत्य प्रवृत्तमध्यात्मं चेतो ज्ञानम् । अध्यात्मं च तच्चेतश्च तेनाध्यात्मचेतसा 'ब्रह्मार्पणं ब्रह्महविः' इति वक्ष्यमाणलक्षणया प्रत्यग्दृष्ट्या सर्वं ब्रह्मैवेति दर्शनेन कर्माणि नित्यनैमित्तिकादीनि सर्वाणि मयि सर्वात्मनि ब्रह्मणि संन्यस्य सर्वं ब्रह्मैवेति प्रविलाप्य जयेन प्राप्तराज्ये युद्धक्रियाफले निराशीर्निरपेक्षः सन्, वध्यमानेषु भ्रात्रादिषु निर्ममो ममतारहितो भूत्वा एते मदीया मया हन्यन्त इति यो ज्वरः संतापः स विगतो यस्य स विगतज्वरो निःशोको भूत्वा युध्यस्व । लोकसंग्रहार्थं कर्म कुर्वित्यर्थः । अत्रायमभिप्रायः । सर्वमिदमहं च ब्रह्मैवेति परावरैकत्वविषयकाप्रतिबद्धापरोक्षज्ञानवानाधिकारिको ब्रह्मविदत्रोक्तरीत्या लोकहितार्थं कर्म कुर्याज्जीवत एव मुक्तत्वादस्य परतारणमेव प्रयोजनम् । परोक्षज्ञानी चेदात्मा देहादिभिन्नस्तद्द्रष्टृत्वाद्घटद्रष्टृवदिति स्वस्य देहादिभिन्नत्वज्ञानेन यौक्तिकेन नाहं कर्ता कारयितेत्यकर्तृत्वबुद्ध्या 'मायामात्रमिदं द्वैतम्' इत्यादिश्रुतिबलेन इदं सर्वं मिथ्या मायाकार्यत्वादैन्द्रजालिकवदित्यादियुक्तिबलेन च कर्ता कार्यं करणं च सर्वं मिथ्यैवेति कर्त्रादेः सर्वस्य मिथ्यात्मत्वमेव पश्यन् सर्वत्र निराशीर्निर्ममो भूत्वा लोकहितार्थं कर्म कुर्यात्तेन चित्तपरिपाको ज्ञानं मोक्षश्च सिध्यति । लोकोपकारश्चास्य तरणं तारणं चोभयमप्युपपद्यते । अनात्मज्ञश्चेत्परिग्रहे ममतारहितः कर्म-

फलानपेक्षश्च भूत्वा श्रौतानि स्मार्तानि च सर्वाणि कर्माणीश्वरार्पण-बुद्ध्या स्वार्थमेव कुर्यात्तेन चित्तशुद्धिस्तया ज्ञानं मोक्षश्चास्य सिध्यतीति ॥ ३० ॥

'न कर्मणामनारम्भात्' इत्यारभ्य 'मयि सर्वाणि कर्माणि' इत्यन्तेन ग्रन्थेन मुमुक्षोरवश्यं मोक्षार्थमीश्वरार्पणबुद्ध्या कर्म कर्तव्यमिदं मम मतमिति निश्चित्य श्रीभगवान् स्वमतानुसारिणो ये ते मुक्ता भविष्यन्ति, ये तु विपरीतकारिणस्ते विनङ्क्ष्यन्तीति नियमयति—

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१ ॥

ये मे मतमिति । ये विवेकिनो मानवा ब्राह्मणादयो मुमुक्षवः इदमुक्तलक्षणं मे ममेश्वरस्य मतं शासनमनसूयन्तः । असूया नाम गुणदूषणा जगद्गुरौ मयि तामकुर्वन्तः किंतु श्रद्धावन्तस्तत्र श्रद्धां भक्तिं च कुर्वन्तः सन्तोऽनुतिष्ठन्ति समनुवर्तन्ते । मच्छासनमनुल्लङ्घ्य ये नित्यं कर्म कुर्वन्तीत्यर्थः । ते सत्त्वशुद्ध्या निर्विकारात्मविज्ञानं प्राप्य कर्मभिः पुण्यापुण्यलक्षणैर्नानादुःखहेतुभिः संचितादिभिर्मुच्यन्ते । अपिशब्दाज्जन्मादिभिश्च मुक्ता भवन्तीत्यर्थः ॥ ३१ ॥

विपर्यये दण्डमाह—

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३२ ॥

ये त्विति । ये त्वविवेकिनो ब्राह्मणादयो दुरहंकारा एतदुक्तं ममेश्वरस्य मतं शासनमभ्यसूयन्तोऽत्यन्तं दूषयन्तः सन्तो नानुतिष्ठन्ति दुराग्रहेण मदाज्ञां न कुर्वते सर्वज्ञानविमूढान् सर्वात्मकाद्ब्रह्म सर्वमित्युच्यते, तद्विषयकं ज्ञानं सर्वज्ञानं तस्मिन् विषये विशिष्य मूढांस्तान्सर्वज्ञानविमूढान्, अचेतसो विचेतसोऽविवेकिनः, कर्म बहुसाधनसाध्यं क्लेशभूयिष्ठमदृष्टफलं चातस्तत्संन्यास एव परमसुखमित्येवं विपरीतबुद्धयस्तान् संन्यासानर्हानकर्मनिष्ठान् जनान्नष्टान् विनष्टपुण्यलोकान्विद्धि । स्वधर्मं परित्यज्य परधर्मे वर्तमानाः स्वयमेव विपरीतबुद्ध्या विनश्येयुरित्यर्थः ॥ ३२ ॥

मम मतमनादृत्य कर्तव्यं कर्म संन्यस्य स्थाणुवत्तूष्णीमास्महे इति ये तु मन्यन्ते तेषां प्रकृत्यधीनानामचलित्वा तूष्णीमासनं न घटते ।

ज्ञानिनामप्यजयायाः प्रकृतेर्मम मायाया निग्रहस्यातिदुष्करत्वादिति 'कार्यते ह्यवशः कर्म' इति वचनार्थमेव पुनर्द्रढयति मूढानां कर्मणि नियमनार्थम्—

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥

सदृशमिति । नित्यनिरन्तरब्रह्मनिष्ठानिर्मूलितसर्ववासनाग्रन्थिरपि ब्रह्मवित्प्राणत्राणहेतुतयाऽविशिष्टायाः स्वस्याः प्रकृतेर्वासनायाः सदृशमनुरूपमेवाहारादौ चेष्टते । तानि ग्रहीतुं न शक्नोति शरीरस्थितिहेतोः प्रकृतेर्दुर्निवारत्वात् । एवं ब्रह्मनिष्ठया प्रकृतिमतीत्य तिष्ठतो जितेन्द्रियस्य ब्रह्मविदोऽपि प्रकृत्यनुवर्तित्वे सत्यवशिष्टानां मूढानां किमु वक्तव्यमित्याशयेनाह—**प्रकृतिमिति** । सुखदुःखयोरनुभूत्यै स्वस्वकर्मणा भवन्तीति भूतानि सर्वे प्राणिनः स्वस्वजात्यनुरूपेण नानाक्रियानिवृत्तिहेतुभूतां प्रकृतिं रागद्वेषादिगुणवतीं वासनात्मिकां यान्ति स्वस्वप्रकृत्यनुरूपेण रागद्वेषाभ्यां नानारूपं चेष्टन्त एव न प्रकृत्यधीनास्तूष्णीं स्थातुं क्षणमपि शक्नुवन्त्यतो वयं न किंचित्कुर्म इति निग्रहस्तात्कालिकेन्द्रियनिरोधः किं करिष्यति । रागादिदोषवत्स्वकीयप्रकृतिवेगेन सर्वस्यापि चेष्टितव्ये सति नाहं किंचित्करोमीति नियमो व्यर्थ इत्यर्थः ॥ ३३ ॥

ननु सर्वस्यापि प्राणिजातस्य रागद्वेषात्मिकया प्रकृत्या ग्रस्तत्वे त्वन्मतानुसारिणामप्युक्तलक्षणप्रकृतिग्रस्तत्वात्त्वदुक्ते कर्मयोगे कथं तेषां प्रवृत्तिर्घटेतेत्याकाङ्क्षायां रागद्वेषयोः समीचीनत्वासमीचीनत्वबुद्धिमूलकत्वात् 'न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते' इति न्यायेन ईश्वराराधनात्मके कर्तव्ये विध्युक्ते कर्मणि कुशलत्वाकुशलत्वबुद्धिपरित्यागे रागद्वेषयोरनवकाश इति सूचयितुं रागद्वेषयोः स्थितिं तन्निवृत्तिप्रकारं तयोर्बन्धकत्वं चाह—

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

इन्द्रियस्येति । इन्द्रियस्येन्द्रियस्य सर्वेषामिन्द्रियाणां श्रोत्रादीनामर्थे शब्दादौ रागद्वेषौ व्यवस्थितौ इष्टे रागोऽनिष्टे द्वेष इत्येवं प्रतिविषयं नियमेन स्थितौ भवतः । इन्द्रियाणां विषयेषु रागो वा द्वेषो वास्तु मुमुक्षोस्तेन तु का हानिरित्यत आह—**तौ हीति** । हि यस्मात्कारणात्तौ रागद्वेषावस्य धर्मं चिकीर्षोर्मोक्षमार्गस्य परिपन्थिनौ पथि चोराविव

प्रतिबन्धको मुमुक्षुं मोक्षसाधनमाश्रयन्तं स्वाश्रयबलेन विषयारण्ये पातयित्वा तदन्तरेव भ्रामयतः । ततो मुमुक्षुः पुरुषः सदसद्विवेकी विषये समीचीनत्वादिबुद्ध्या तयो रागद्वेषयोः वशमधीनतां न गच्छेत् द्रव्ये गुणे कर्मणि वा समीचीनत्वादिबुद्धिं न कुर्यात् । विषयेषु समीचीनत्वाऽसमीचीनत्वबुद्धिकरणमेव तयोर्वशवर्तित्वहेतुस्तां मुमुक्षुरकुर्वन् रागद्वेषयोरविषयो भूत्वा स्वधर्मे कुशले वाऽकुशले वाऽपीश्वरप्रीत्यै प्रवर्तेत । एवं प्रवृत्तो निष्प्रत्यूहं मोक्षं प्राप्नोतीत्यर्थः ॥ ३४ ॥

ननु 'अभयं सर्वभूतेभ्यो दत्त्वा नैष्कर्म्यमाचरेत्' इति स्मरणात्कर्मसंन्यासोऽपि धर्मः कर्तव्य एवेति चेत् । सत्यम् । संन्यासोऽपि शास्त्रीय एव धर्मः कर्तव्यश्च मुमुक्षोस्तथापि 'स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः' इति वचनादपक्वान्तःकरणस्य स धर्मो न भवति किंतु बहुजन्मानुष्ठितपुण्यपुञ्जैः परिपक्वान्तःकरणस्य सर्वतो विरक्तस्य कर्मणां मोक्षसाधनत्वमपश्यत एव मुमुक्षोर्विविदिषया कर्तव्यो धर्मः संन्यासः कृतार्थस्य वा विदुषः नतु मूढस्य कर्मस्खलसस्य दुःखबुद्ध्या । ततोऽस्य संन्यासः परधर्म एव नतु स्वधर्मः, नापि च श्रेयोहेतुः किंतु कर्मैव स्वधर्मः श्रेयोहेतुश्चानुष्ठेय इत्याह—

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

श्रेयानिति । वर्णाश्रमिणामयं परमोपदेशः क्रियते भगवता शृण्वन्तु मुमुक्षवः स्वनुष्ठितात् यथाशास्त्रं सु सम्यङ्नियमेनानुष्ठितादाचरितात्परधर्माद्विगुणोऽपि व्यङ्गोऽप्यसम्यगनुष्ठितोऽपि स्वधर्मः कर्तव्यत्वेन स्वस्य यः शास्त्रेण विहितः स एव स्वधर्मः पुरुषस्य श्रेयान् श्रेष्ठतरः विध्युक्तत्वात्, यथा कर्मणः परधर्मत्वाद्यतेः स्नानजपस्तोत्रादिकर्मापेक्षया ज्ञानसाधनश्रवणाद्येकप्रयोजनः सर्वकर्मसंन्यास एव श्रेष्ठो धर्मस्तथा कर्मसंन्यासस्य परधर्मत्वाद्गृहिणोऽपि सर्वकर्मसंन्यासापेक्षया ज्ञानसाधनसत्त्वशुद्ध्येकप्रयोजनः कर्मयोग एव श्रेष्ठो धर्मः । एवमेवेतरेषां वर्णाश्रमिणां च परधर्मापेक्षया स्वधर्म एव श्रेयस्कर इत्यर्थः । किंच सुतरां परधर्मं परित्यज्य स्वल्पे व्यङ्गेऽपि वा स्वधर्मे नियमेन वर्तमानस्य निधनं मरणं श्रेयः श्रेयसे स्वर्गायापवर्गाय वा भवति न क्वचिदप्यश्रेयसे नरकाय । स्वधर्मं संपरित्यज्य वागगोचरेऽपि परधर्मे वर्तमानस्य निधनं क्वचिच्छ्रेयसे न भवति, किंतु परधर्मो भयावहः नियमेन सम्यगनुष्ठितोऽपि

परधर्मो भयं यमदूतेभ्यो नरकं चावहति संपादयतीति भयावहः। नरकगर्भवासादिदुःखप्रवाहहेतुरेव भवतीत्यर्थः ॥ ३५ ॥

यद्यपि 'ध्यायतो विषयान्' इति, 'इन्द्रियस्येन्द्रियस्य' इति च पुरुषस्य जननमरणाद्यनर्थपरम्परागमनकारणं निरूपितं तथापि विशेषतस्तत्स्वरूपं तदधिष्ठानं तज्जयोपायं च विज्ञातुकामोऽर्जुनः स्वयं विस्मृतवत्तदेव पृच्छति, संसारकारणे विज्ञाते पण्डितैस्तदुपायेन परिहर्तुं शक्यत इत्यर्जुन उवाच—

अर्जुन उवाच।

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

अथेति। अथशब्दः पृथक्प्रश्नारम्भार्थः। ब्रह्मविदां ब्रह्मानन्दामृतं वर्षतीति वृष्णिः सम्यग्बोधस्तेनावगम्यत इति वार्ष्णेयः परमात्मा श्रीभगवान् तस्य संबुद्धिर्हे वार्ष्णेय, बलवता राज्ञा चान्येन वा बलात्कारेण नियोजितः प्रेष्य इव कार्याकार्यज्ञोऽप्ययं पुरुषः स्वयं फलं पापसाध्यमनिच्छन्नपि पापमाचरति, केन प्रयुक्तोऽस्मिन् कार्यकारणसंघाते बलवता केन प्रेरितो भूत्वाऽयुक्तमपि करोति तं ब्रूहीत्यर्थः ॥ ३६ ॥

'अकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित्। यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम् ॥' इति न्यायेन पुंसः सकलकर्माचरणकारणं सर्वानर्थबीजं काम एवेति बोधयितुं श्रीभगवानुवाच—

श्रीभगवानुवाच।

काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥

काम एष इति। सर्वेषां प्रवृत्तेः काममूलत्वात्कामः सर्वप्रत्यक्ष इत्यभिप्रायेण एष इति पुरोनिर्देशः। योग्यत्वायोग्यत्वविचारमन्तरेण वस्तु दृष्टं श्रुतं च कामयति पुमांसमिति कामः। वैषयिकी प्रबलेच्छात्र कामशब्देनोच्यते। एष कामः यः पुंसः संसारकारणं स एष काम एव केनचित्स्वविषये प्रतिबद्धे क्रोधात्मना परिणमते। ततः क्रोधोऽप्येष काम एव। स्वयं रजोगुणसमुद्भवः रजसः गुणो रागो रञ्जनात्मिका वैषयिकी सामान्येच्छा स एव विषयसंनिधाने काममुद्भावयतीति कामो रजोगुणसमुद्भवः। यद्वा 'प्रज्ञां तु सात्त्विकीं प्राहुस्तामसीं तु विचित्तताम्। क्रियां तु राजसीं प्राहुर्गुणतत्त्वविदो बुधाः ॥' इति वचनात्क्रिया रजोगुणस्तस्य

समुद्भवो यस्मात्स रजोगुणसमुद्भवः काम एव प्रवृत्तिहेतुरित्यर्थः । 'न जातु कामः कामानामुपभोगेन शाम्यति' इतिवचनान्महदियत्ताशून्यमशनमुपभोगलक्षणं यस्य स महाशनः । कदाचित्तृप्तिरहित इत्यर्थः । तत एव महापाप्मा महान्पाप्मा दोषो यस्मात्पुरुषस्यायाति स महापाप्मा । यतः कामाविष्टः स्वसारमप्यारोढुमिच्छति, चण्डालादप्यर्थं गृह्णाति, क्रुद्धो गुरुमप्याक्रोशति, गामपि च हन्ति, अतः कामस्य युक्तं महापाप्मत्वमित्यर्थः । तस्मात्त्वमिह संसारे मुमुक्षोरेनं काममेव वैरिणं विद्धि । मुक्तिप्रतिबन्धकमेतमेव विजानीहीत्यर्थः ॥ ३७ ॥

यदुक्तं मुमुक्षोर्मुक्तिप्रतिबन्धकत्वेन वैरित्वं कामस्य तदेव विस्पष्टयति—

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

धूमेनेति द्वाभ्याम् । धूमेनाप्रकाशस्वरूपेण स्वयं प्रकाशस्वरूपोऽपि वह्निर्यथाऽऽव्रियते आवृतो भवति, मलेन लेपनस्वभावेन रजसा स्वयं बिम्बप्रकाशनेनाह्लादकर आदर्शश्च यथाऽऽव्रियते, अचेतनेनोल्बेन चेतनो गर्भः शिशुर्यथाऽऽवृतो भवति तथाऽप्रकाशरूपेण लेपकेन अचेतनेन च तेन पूर्वोक्तेन कामेन प्रकाशस्वरूपमात्मप्रकाशनेनानन्दकं आभासव्याप्त्या चेतनतुल्यमिदं पुरुषस्य ज्ञानमावृतं तिरोहितमित्यर्थः ॥ ३८ ॥

ज्ञानावरणमेव विशदयति—

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥

आवृतमिति । यस्मादनलेन निरन्तरविषयसेवयाप्यलंभावो यस्य नास्ति सोऽनलः ह्यन्तरनलवदाचरतीति वाऽनलस्तेन दुष्पूरेण दुःखेन पूरणमिष्टप्रापणं यस्य स दुष्पूरः, कामिताप्राप्तौ पुरुषं दुःखेन पूरयतीति वा दुष्पूरस्तेन कामरूपेण काम्यत इति कामो विषयस्तमेव सर्वत्र रूपयति गोचरयति न क्वचिद्ब्रह्मेति कामरूपस्तेन, तस्मादेव ज्ञानिनो नित्यवैरिणा नित्यं बाह्यालम्बनहेतुत्वेन प्रतिकूलत्वान्नित्यवैरी, नित्यग्रहणहेतोर्ज्ञानस्यावरकत्वाद्वा नित्यवैरिणा । एतेन कामेन ज्ञानं सर्वत्र ब्रह्मग्राहिकी बुद्धिवृत्तिरावृतम् । पङ्केन जलमिव राहुणा चन्द्रबिम्बमिव पिहितमित्यर्थः ॥ ३९ ॥

ननु संसारकारणं कामस्तत्कार्यं ज्ञानतिरोधानं विषयसंनिधापनं तापनं दुःखप्रापणं च निरूपितं, तथापि मुमुक्षोस्तज्जयो दुर्घटस्तदधिष्ठानाज्ञानात्। ज्ञाते हि शत्रोः स्थाने तज्जित्यै यत्नः कर्तुं शक्यत इत्याकाङ्क्षायामाह—

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम्॥ ४०॥

इन्द्रियाणीति। 'यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह। बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम्॥' इत्येतच्छ्रुतितात्पर्यज्ञैरिन्द्रियादीनां कामाश्रयत्वमुच्यते। कामस्यैव तच्चेष्टाहेतुत्वात्। तत इन्द्रियाणि चक्षुरादीनि मनो बुद्धिश्चास्य कामस्याधिष्ठानमाश्रय इति बोद्धव्यम्। स्वप्रवृत्तेर्द्वारभूतैर्यैरिन्द्रियव्यापारैरेष कामः ज्ञानं प्रत्यग्दृष्टिमावृत्य वृत्तेर्बहिःप्रवणतां कृत्वा देहिनं देहात्मबुद्धिं पुरुषं ज्ञानिनमज्ञानिनं च विमोहयति अहं भोक्ता इदं भोग्यं रम्यमरम्यं इदं सुखमिदं दुःखमित्यादिना विविधं भावयति। कामदोषेणैव बुद्धेश्चलनं देहेन्द्रियादितादात्म्यापत्तिरहंममेति संसारः पुंस इत्यर्थः॥ ४०॥

निःशेषकामनिबर्हणाभावे बुद्धेर्नैश्चल्यं न संभवति, तदसंभवे ज्ञानं विशुद्धं न भवति, तदभावे मोक्षाभावस्ततो मुमुक्षुणा तज्जयोऽवश्यं कर्तव्य इति सूचयितुमाह—

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥ ४१॥

तस्मादिति। हि यस्मान्मनोबुद्धीन्द्रियव्यापारैकबलः कामो मुमुक्षोस्तव नित्यशत्रुस्तस्मात्त्वमादाविन्द्रियाण्यनन्तरं मनो बुद्धिं च नियम्य विषयग्रहविमुखानि कृत्वा। इन्द्रियाण्यादावित्युक्तिर्मनोबुद्ध्योर्नियमनं सूचयति। नियमविधावादिपदस्यानन्तरकृत्यद्योतकत्वात्, सत्यामन्तर्विषयचिन्तायामिन्द्रियनिग्रहस्य विफलत्वात्, 'मनस्तु पूर्वमादद्यात्कुमीनमिव मत्स्यहा' इतिवचनाद्वस्तुदर्शने मनस एव करणत्वाच्च, अत इन्द्रियनियमानन्तरमेव मनोबुद्ध्योरपि निग्रहः कर्तव्य एव। एवं कामाधिष्ठाननिरोधं कृत्वा ज्ञानविज्ञाननाशनं ज्ञानं श्रुतियुक्तिभिः पर्वते वह्निरस्तीतिवत्परोक्षको वस्तुनिश्चयः सर्वं ब्रह्मैवेति, विज्ञानं तु विषयव्याप्तवृत्तिजन्यं महानसाग्निज्ञानवदिदमेवाहमिति, एवंरूपयोर्मोक्षैकप्रयोजनयोश्चन्द्रसूर्ययोरिवाविशेषविशेषस्फुरणयोर्ज्ञानविज्ञानयोर्नाशनं विध्वंसकम्। अतएव स्ववैरिणं पाप्मानं पापिष्ठमेनं कामं प्रजहि। निःशेषं विध्वंसयेत्यर्थः॥ ४१॥

ननु कामो दुर्जयो दुर्जयस्य जये बलवदाश्रयोऽपेक्ष्यते मुमुक्षुः कमाश्रित्य कस्य महिम्ना कामं जयेदित्याकाङ्क्षायां 'रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते' इति न्यायेन परमात्मानं सर्वान्तरं सर्वगमवगम्य तदाश्रयणेन त्वं कामं जहीति बोधयितुमात्माधिगमप्रकारमाह—

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥

इन्द्रियाणीति । 'इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यश्च परं मनः' इत्याद्याः श्रुतय इन्द्रियाणि पराण्याहुः इन्द्रियाणि श्रोत्रादीनि पञ्च पञ्च कर्मेन्द्रियाणि च स्वापेक्षया जडं बाह्यं स्थूलं व्याप्यं कार्यं प्रवर्त्यं च यच्छरीरं तस्मात्प्रकाशकत्वान्तरत्वसूक्ष्मत्वप्रवर्तकत्वव्यापकत्वकारणत्वादिधर्मैः पराण्युत्कृष्टतराण्याहुर्वदन्ति । येन यत्प्रकाश्यते प्रवर्त्यते च तत्तदपेक्ष्य व्यापकं सूक्ष्मं परं भिन्नं च भवति । यथाऽयसोऽयस्थो वह्निस्तथा देहमपेक्ष्येन्द्रियाणि देहतद्धर्मप्रकाशकत्वात्प्रवर्तकत्वाच्च पराणि भिन्नानि च भवन्तीत्यर्थः । तथेन्द्रियेभ्यो मनः प्रकाशकत्वादिधर्मेण परमुत्कृष्टं भिन्नं च भवति । इन्द्रियतद्धर्माणां प्रकाशकत्वान्मनः खल्वन्तस्थं सदिन्द्रियाणि तद्धर्मांश्च प्रकाशयति । ततो मनसस्तत्परत्वं भिन्नत्वं च युक्तमित्यर्थः । एवं मनसोऽपि प्रकाशकत्वादिधर्मैर्बुद्धिः परा भवति । बुद्ध्या खलु मनस्तद्धर्माश्च प्रकाश्यन्ते प्रवर्त्यन्ते च । ततस्तत्परत्वं भिन्नत्वं च बुद्धेः सिद्धमेव सूक्ष्मत्वान्तरत्वव्यापकत्वकारणत्वप्रवर्तकत्वप्रकाशकत्वादिधर्मैर्यः स्वयं सर्वतो व्याप्य बुद्ध्यादिस्थूलपर्यन्तं कार्यकरणसंघातं स्वसन्निधिमात्रेण प्रवर्तयन् तद्धर्मतत्कर्मतद्गुणतद्विकारांश्च सर्वानविकारात्मना साक्षाज्जानाति प्रकाशयति स एव आत्मा बुद्धेः परतः परः सर्वस्मादुत्कृष्टतमः भिन्नश्च नित्यत्वात्सर्वज्ञत्वात्सर्वप्रकाशकत्वात्सर्वसाक्षित्वाच्च । 'पुरुषान्न परं किंचित्' इति श्रवणात् । यत एवं ततः सर्वस्मात्परं सर्वद्रष्टारमतएव देहेन्द्रियादिभ्यो भिन्नं सर्वप्रकाशकं चिदानन्दैकरसं सन्मात्रं परिपूर्णमेतमेव स्वात्मानं विजानीहीत्यर्थः ॥ ४२ ॥

एवं बुद्ध्यादेर्दृश्यजातस्य द्रष्टारमात्मानं सन्मात्रमात्मत्वेनाधिगम्य तन्निष्ठया स्वशत्रोः कामस्य संसारहेतोर्निःशेषनिर्मूलनं कुर्विति कर्मयोगस्य मोक्षोपायभूतस्योपेयभूतया ज्ञाननिष्ठया संभाव्यमानः सर्वकामनिर्मोक एव मुक्तिरिति सूचयन् कर्मयोगमुपसंहरति—

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः ॥ ३ ॥

एवमिति । महाबाहो इति विशेषणं मुमुक्षोः कामरूपशत्रुसंहरणपटीयस्त्वद्योतनार्थम् । बुद्धेर्बुद्ध्यादेः सर्वदृश्यस्य परं विलक्षणं द्रष्टारमखण्डानन्दैकरसमात्मानमयमेवाहमस्मीत्येवं स्वात्मना सम्यग्बुद्ध्वात्मन्येवात्मबुद्धिं दृढां कृत्वा त्वमात्मानं कामस्याश्रयभूतं कारणभूतं चान्तःकरणमात्मना स्वस्वरूपेणान्तर्बहिःपूर्णेनाखण्डैकरसेन संस्तभ्य संयोज्यारोपितं नामरूपग्रहणमकृत्वा तदधिष्ठानभूतब्रह्मदर्शन एव नियोज्य सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मदर्शनादन्यत्र दुरासदं दुर्जयं जेतुमशक्यस्वभावं कामरूपं शत्रुं जहि विध्वंसय । विशिष्य विषयग्रहणमेव कामाविर्भूतिकारणं सर्वत्र ब्रह्मदृष्ट्या तदग्रहणमेव कामविनाशनहेतुरतः सर्वं ब्रह्मैव पश्यन् कामं निर्मूलयेत्यर्थः । अत्र 'न कर्मणामनारम्भात्' इति कर्मयोगमुपक्रम्य मुमुक्षोस्तत्त्यागनिन्दनपूर्वकं बहुवचनैः कर्मण एव कर्तव्यत्वं प्रतिपाद्य अहंममेति संसारस्य प्रवृत्तिलक्षणस्य कारणं काम एवेति काममाहात्म्यं वर्णयित्वा, कर्मणा प्राप्तचित्तशुद्धेः पुरुषस्य ज्ञानयोगनिष्ठया तज्जयः कर्तव्य इति वदता भगवता 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः' इत्यादिश्रुतिप्रमाणककामनिर्मोक्ष एव मोक्ष इति सूचितं भवति । तेन मोक्षहेतोर्ज्ञानयोगस्यैव प्राधान्यं कर्मयोगस्योपसर्जनतैवेत्यस्याध्यायस्य ज्ञानयोगपर्यवसायित्वात्तत्परत्वमेवेति सिद्धम् ॥ ४३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतावाक्यतात्पर्यबोधिन्यां तृतीयोऽध्यायः ॥

चतुर्थोऽध्यायः ।

द्वितीयाध्याये तदनन्तराध्याये च कर्मयोगैकोपायस्य ज्ञानयोगस्यैव 'एषा ब्राह्मी स्थितिः' इति, 'संस्तभ्यात्मानमात्मना' इत्यादिवचनैर्मोक्षैकसाधनत्वं प्रतिपाद्याधुना तस्यैव योगस्य 'एष पन्था एतत्कर्म' 'एतद्ब्रह्म' इत्यादिश्रुतिप्रमाणकत्वे सिद्धेऽपि सिद्धपरम्पराभ्युपगतत्वेनापि प्रामाण्यं सूचयितुमिदमाह श्रीभगवान्—

श्रीभगवानुवाच ।

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

इममिति । अहं परमात्मा सृष्ट्यादौ अव्ययः अव्ययवेदैकप्रमाणत्वादव्ययः 'न स पुनरावर्तते न स पुनरावर्तते' इति श्रवणादव्ययफलहेतुत्वाद्वाऽव्ययः । सर्वत्र ब्रह्मदर्शनलक्षणयोगसाध्यस्य मोक्षस्य व्ययाभावाज्ज्ञानस्याव्ययफलहेतुत्वं यत्साध्यं तदनित्यमिति मोक्षस्य ज्ञानसाध्यत्वान्न नित्यत्वमिति नानुमानस्यावकाशस्तस्योक्तश्रुतिपराहतत्वात्तमव्ययं नित्यफलमित्यर्थः । इममध्यायद्वयेन प्रतिपादितं मोक्षैकप्रयोजनं योगं ज्ञानयोगं विवस्वते सूर्याय प्रोक्तवानस्मि । 'स्वयं तीर्णः परान् तारयति' इति न्यायेन सोऽपि विवस्वान्मनवे प्राह स्वपुत्रायोक्तवान् । मनुरपि स्वपुत्रायेक्ष्वाकवेऽब्रवीदुपदिष्टवानित्यर्थः ॥ १ ॥

स्वप्रोक्तज्ञानयोगस्य विशिष्टजनपरिगृहीतत्वमेव विस्पष्टयति—

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥

एवमिति । ब्रह्मनिष्ठया परं शत्रुं कामक्रोधादिलक्षणं तापयति विनाशयतीति परंतपेति संबुद्धिः । एवमुक्तरीत्या विवस्वदादिविशिष्टजनपरम्पराप्राप्तं ज्ञानयोगमिममर्वाचीना राजर्षयो जनकादयो विदुः । एवमेव विदुरिति वा । राजानश्च ते ऋषयश्च राजर्षयः । इदं ब्राह्मणादीनामुपलक्षणम् । राजानश्च ऋषयश्च विदुरिति वा । ननु राजभिर्ऋषिभिर्महापुरुषैः परिगृहीतत्वे सर्वत्र प्रसिद्धत्वात्किं त्वयोपदिश्यत इत्यत आह— **स इति** । पूर्वं विवस्वदादिषु मया प्रवर्तितो यो योगः स इदानीं महता कालेन कालदेशविपर्यासेन प्रवर्त्यप्रवर्तकजनाभावादिहास्मिँल्लोके नष्टः । संप्रदायविच्छित्तिं प्राप्त इत्यर्थः ॥ २ ॥

विनष्टसंप्रदायः स योगः किमर्थं पुनरिदानीं त्वया प्रवर्तित इत्याकाङ्क्षायां कूटस्थासङ्गचिद्रूप एवात्मन्यविक्रियेऽविषयेऽनात्मतद्धर्मकर्माण्यध्यस्य कर्ताहं भोक्ताहं सुखी दुःखीति मोमुह्यमानं दोधूयमानं लोकमिममालोक्य कृपया तं संसारसागरादुद्दिधीर्षया मया त्वां निमित्तीकृत्य प्रवर्तित इत्याशयेनाह—

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

स एवायमिति । पूर्वं विवस्वते संप्रदायवृत्तये पुरातनः अनादिश्रुतिमूलकत्वात्सनातनो यो योगः प्रोक्तः संसारध्वान्तविध्वंसकः स एवायं योगो मयाद्य कर्तृत्वभोक्तृत्वभ्रमेण मुह्यमानाय ते तुभ्यं प्रोक्तः । बुद्धिमोहविच्छित्तये उपदिष्ट इत्यर्थः । अर्जुनस्य ज्ञानोपदेशयोग्यतां दर्शयति—**भक्त इत्यादिना** । 'यथा शिवमयो विष्णुरेवं विष्णुमयः शिवः' इति शिवकेशवयोरभेदश्रवणाच्छिवरूपं मामेव बहिरन्तरमायया श्रद्धया भजस्यतो मे भक्तोऽसि सदा मद्भजनशीलोऽसि । सखा सखा चासि, स्निग्धः सख्युः स्मरणश्रवणादिभिर्द्रवीभूयमानचित्तः स्निग्धश्चासि । ममायं भक्तः स्निग्धश्चेति हेतोरेव स योगस्त उपदिष्ट इत्यर्थः । किमेवं पात्रपरिशीलनं योगोपदेशायेत्यत आह—**रहस्यमिति** । गृहस्थानामकर्मिणां उत्तमं सर्वोत्तमं परं ब्रह्म तत्प्राप्तिहेतुत्वादुत्तमसाधनं मुक्तेरत एव रहस्यमत एव न कस्मैचिद्वक्तव्यमित्यर्थः ॥ ३ ॥

राजसाधारणोऽयं कृष्णः वसुदेवपुत्रत्वादनेनोक्तमिदं शास्त्रमप्रमाणमित्यत्र गीतायां सर्वेषामविश्वासः स्यात्तद्वक्तुर्भगवत ईश्वरत्वे विज्ञाते श्रद्धाभक्तिभ्यां प्रवृत्तिः संपद्येत तया सर्वे कृतार्थाः स्युरिति श्रीकृष्णस्य परमेश्वरत्वं तन्मुखेनैव प्रथयितव्यमित्याशयेनार्जुन उवाच—

अर्जुन उवाच ।

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥

अपरमिति । श्रीकृष्णाभिधानस्य भवतो जन्म अपरमर्वाचीनं, वसुदेवगृहे त्वदुत्पत्तेर्दृष्टत्वात् । विवस्वतः सर्वजगत्प्रकाशकं तेजोऽस्यास्तीति विवस्वान् सूर्यस्तस्य तु जन्म परं प्राचीनं, सृष्ट्यादौ 'चक्षोः सूर्यो अजायत' इति श्रवणात् । एवमुभयोर्जन्मव्यत्यासे सति त्वमादौ विवस्वत इमं योगं प्रोक्तवानित्येतद्वचनं सत्यमित्यहं कथं विजानीयामन्यो वा विजानीयात्, 'एष वन्ध्यासुतो याति' इतिवाक्य इवास्मिन्वाक्ये त्वदुक्तशास्त्रे च सर्वेषामविश्वास एवोदेतीत्यर्थः ॥ ४ ॥

इदं मम मायाविलासवैभवमेव सत्यमिति जानतां केवलमूढानामेवं प्रत्ययो नतु मत्तत्त्वं विदितवतां पण्डितानाम् । तेषामस्त्येव मयीश्वरत्वभावना श्रद्धा भक्तिश्च । मदुक्तौ च प्रमाणताबुद्धिः । अहं तु स्वयमजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावस्तथापि तस्यैतस्य स्वमहिम्ना सिद्धनित्यज्ञानैश्वर्यशक्तिबलवीर्यतेजःसंपन्नस्य लोकनिग्रहानुग्रहचिकीर्षोर्ममैवमेव बहूनि जन्मानि सन्तीत्याह—

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ५ ॥

बहूनीति । मे ममाप्रमेयस्वभावस्यानन्तशक्तेः परमेश्वरस्य देवतिर्यङ्मनुष्येषु जन्मानि व्यतीतान्यतिक्रान्तानि बहून्यसंख्यानि सन्ति । तव चान्येषां च भूतानां तानि गतानि जन्मानि सर्वाण्यहं वेद वेद्मि । 'नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इति श्रवणादप्रतिहतविज्ञानशक्तित्वादतीतानागतवर्तमानार्थं सर्वं विजानामीत्यर्थः । त्वं तु तानि जन्मानि न वेत्थ पापपुण्यरागद्वेषादिदोषैस्तिरोभूतज्ञानशक्तित्वादतीतानागतवर्तमानं न किंचिज्जानासीत्यर्थः ॥ ५ ॥

ननु 'कर्मणा जायते जन्तुः कर्मणैव प्रलीयते' इति स्मरणाज्जन्मादिहेतोः पुण्यपापादेरभावात्तवेश्वरस्य स्वतन्त्रस्य कथं जन्मादिरित्याकाङ्क्षायां माययैव मम जन्मादयो नतु लोकवत्कर्मणेति बोधयितुमाह—

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ ६ ॥

अजोऽपीति । कदाचित्कथंचित् कुतश्चिन्न जायत इत्यजः । 'न तस्य कश्चिज्जनिता न चाधिपः'इतिश्रवणाज्जन्महेतोरुपादानादेरभावादजो जन्मरहित एवास्मि । एवमजः सन्नपि तथाव्ययात्मा निरवयवत्वेन विनाशकारणसामग्रीसंबन्धायोगादव्ययः नाशनक्रियाया अविषय आत्मा स्वभावो यस्य सोऽव्ययात्मा नित्यः । 'अजो नित्यः' इति श्रवणादव्ययात्मा नित्य एवास्मि न क्वचिदपि षष्ठविकारवान्। अजोऽव्ययात्मेति विशेषणद्वयं तदन्तरालविकारासंभवद्योतनार्थम् । आद्यन्तयोरभावे तदन्तरवस्थाकल्पनायोगात् । ननु तव कर्मनिमित्तकजन्माभावेऽपीश्वरो नियन्ता स्यादेवेत्यत आह—**भूतेति** । ब्रह्मादीनामन्येषां च भूतानामहमेवेश्वरो नियन्ता स्वसंनिधिमात्रेण 'एष सर्वेश्वरः' इति श्रुतेः । नतु ममान्योऽस्ति नियन्ता । नचाधिप इति श्रवणादतोऽहं न कस्यापि च नियोगविषयः । एवमजोऽप्यव्ययात्मापीश्वरोऽपि च सन्नहं निर्विकार एव परमात्मा । प्रकृतिं प्रकर्षेण कृतिः सृष्ट्यादिक्रिया यस्याः सकाशान्मम सा प्रकृतिस्त्रिगुणात्मिका दैवी माया 'मायां तु प्रकृतिं विद्यात्' इति श्रुतेः । तां प्रकृतिं स्वां स्वकीयां 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इति श्रवणात्स्वस्योपाधिभूतामव्यक्तसंज्ञिकां मूलप्रकृतिमधिष्ठाय तस्यां तत्कार्ये चाहंममेति भावनां कृत्वा योऽजत्वादिलक्षणः सोऽहं संभवाम्यात्ममायया

आत्माधीना माया आत्ममाया तया संभवामि। यद्वा भानोः प्रभावाद्वह्नेर्दग्धृत्वशक्तिवदात्मनो ममाभिन्ना माया आत्ममाया नतु मद्व्यतिरिक्ता 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' इति श्रवणादन्यथा त्वद्वैतहानिः श्रुतिविरोधश्च स्यात्। अतो वह्नेर्दहनशक्तिवदभिन्नैव सा प्रकृतिशब्दिता माया, तयैवाहं जन्मवान्न तु वस्तुतस्तथात्वे 'निष्कलं निष्क्रियम्' इति 'न जायते म्रियते वा विपश्चित्' इति श्रुतेर्विरोधापत्तेस्ततो माययैवाहं देवादिषु संभवामीत्यर्थः। एवं तत्पदार्थस्येश्वरस्य जन्मादेर्मायिकत्वे बोधिते त्वंपदार्थस्यापि तदभिन्नत्वाज्जन्मकर्माद्याविद्यकमेवेति सूचितं भवति ॥६॥

देवादिषु मायया तव संभवः कदेत्याकाङ्क्षायामाह—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ७ ॥

यदेति। वर्णाश्रमिणामभ्युदयनिःश्रेयससिद्धेः सम्यगनुष्ठेयस्य धर्मस्य वैदिकस्य ग्लानिर्विघ्नकारिभिर्निर्विशेषविच्छित्तिर्यदा यदा भवति। हिः पुराणप्रसिद्धिद्योतनार्थः। तथैवाधर्मस्य सर्वानर्थहेतुरभ्युत्थानं अभितः सर्वत्राश्रमेषु वर्णेषु चोत्थानं धूमकेतोरिवोत्पत्तिर्भवति तदा तदात्मानं स्वस्य धर्माधर्मयोस्तद्वतां चानुग्रहनिग्रहयोग्यं देहमात्ममायया सर्वनियन्ताहमीश्वरः सृजामीत्यर्थः ॥ ७ ॥

उक्तमर्थं स्पष्टयति—

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगेयुगे ॥ ८ ॥

परित्राणायेति। प्राणात्ययेऽपि ये स्वधर्मं न त्यजन्ति त एव साधवस्तेषां स्वधर्मैकशरणानां परित्राणाय तेषां विनैव प्रार्थनामिहपरलोकयोर्विच्छित्तिर्यथा न स्यात्तथा रक्षणं परित्राणं तस्मै। एतेन साधुभिरीश्वर एवास्माकं त्रातेति धैर्येण स्वधर्मे स्थातव्यमिति सूचितं भवति। किंच दुष्कृतां ये तु त्रिभिरपि करणैः शास्त्रनिषिद्धमेव कुर्वन्ति नान्यत्ते दुष्कृतो जगद्दूषणास्तेषां समूलविनाशाय च धर्मसंस्थापनार्थाय च धर्मस्य सतामभ्युदयनिःश्रेयसहेतोरधर्मस्य न्यक्कारपूर्वकं संस्थापनार्थाय धर्मस्याधिकारिभिः सर्वैर्नियमेन यथाशास्त्रमनुष्ठापनमेव संस्थापनं तदेवार्थः प्रयोजनं तस्मै युगेयुगे कृतादौ भूयोभूयः स्वमायया स्वयमेव संभवाम्यवतरामीत्यर्थः। एतेन साधुपरिपालनमसाधुविनाशनं धर्मसंस्थापनं

चैतत्त्रितयमेव भगवदवतारस्य प्रयोजनमिति सूचितं भवति । यज्ञादिधर्मेण संरक्षितेन देवा वर्धन्ते तैर्वृष्टयश्च ताभिरन्नमन्नेन प्राणिनः सर्वे जीवन्त्यतो धर्मसंरक्षणमात्रेण विश्वं सर्वं रक्षितमेव भवतीति भावः ॥८॥

दुष्टानां शिष्टानां च निग्रहानुग्रहार्थं धर्मसंस्थापनार्थं च विवस्वदादिभ्यो योगोपदेशाय च मायया संभावितानि यानि शरीराणि यानि तैः कृतानि कर्माणि तान्येतानि च सर्वाणि वस्तुतो ब्रह्ममात्रमेवेति यो जानाति स मुक्तिं गच्छतीत्याह—

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥

जन्म कर्मेति । इतरानपेक्षया स्वात्मनि स्वयमेव स्वप्रकाशेन दीप्यते प्रकाशत इति दिव्यं निर्विशेषचिदेकरसं परं ब्रह्म दिविति दिवुधातोः क्विबन्तं रूपं तस्मिन् दिवि परे ब्रह्मणि पूर्णानन्दैकघनेऽद्वितीये सर्वाधिष्ठाने प्रतीता या प्रकृतिर्यच्च प्राकृतं मे जन्म शरीरं यच्च तत्कृतं कर्म तदेतत्सर्वं तत्त्वतोऽध्यात्मदृष्ट्या परिशील्य दिव्यं दिवो ब्रह्मणः स्वरूपं दिव्यं चैतन्यं तन्मात्रमेवेत्येवं यो वेत्ति साक्षाद्विजानाति स सर्वस्य ब्रह्ममात्रत्वदर्शी विद्वानिमं विद्वद्देहं त्यक्त्वा पुनर्जन्म नैति न तु पुनर्जायते, किंतु मामेति सच्चिदानन्दैकरसं मां ब्रह्मैव प्राप्नोति । विदेहमुक्तिं गच्छतीत्यर्थः ॥ ९ ॥

सर्वं ब्रह्मैवेति सर्वस्य ब्रह्ममात्रत्वदर्शनयोगेन प्राञ्चो बहवो मुक्ता इति 'योगः प्रोक्तः पुरातनः' इति यदुक्तं योगस्य प्राक्तनत्वं तत्प्रतिपादयति—

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

वीतरागेति । भोगेषूपकारिषु च राग आध्यात्मिकाद्युपद्रवेभ्यो भयं स्वस्यापकारिषु क्रोधः । क्रोध इत्यापस्तम्बेनोक्तानां भूतदाहीयानां दुर्गुणानामुपलक्षणम् । तीव्रमुमुक्षया सदसद्विवेकवैराग्याभ्यां वीता विशिष्य निर्गता रागभयक्रोधा येषां ते वीतरागभयक्रोधाः ज्ञानतपसा ज्ञानं ब्रह्मैवाहमिति साक्षाद्ब्रह्मण्येवात्मत्ववेदनमप्रतिबद्धं यज्ज्ञानं तदेव तपः मुमुक्षोर्यतेः कर्तव्यं 'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः' इति स्मरणात्तेन ज्ञानतपसा पूताः सम्यग्विनष्टानात्मस्वभावत्वेन शुद्ध आत्मा मनो येषां ते शुद्धात्मानो बहवो वामदेवादयो मुमुक्षवः स्वयं

सर्वदा मामुपाश्रिताः मामपूर्वमनपरमनन्तरमबाह्यमद्वितीयं परं ब्रह्मैवोपाश्रिताः, उपाश्रयणं नाम सर्वं ब्रह्मैवेति बहिरन्तः सर्वत्र प्रत्यग्दृष्ट्या सदेकत्वदर्शनं तदेव कुर्वन्तः सन्तो मन्मया मदात्मना पूर्णा भूत्वा देहपातानन्तरं मद्भावं ब्रह्मात्मनावस्थानलक्षणमागताः । विदेहमुक्तिं प्राप्ता इत्यर्थः ॥ १० ॥

ननु सर्वे प्राणिनः सुधाब्धाविव त्वय्येवाद्वितीये परे ब्रह्मणि तिष्ठन्ति त्वदावासस्य सर्वसमत्वे केभ्यश्चिदेव तत्र मुक्तिं प्रयच्छसि नतु सर्वेभ्यः कस्तवायं पक्षपात इत्याशङ्कायां न सुधाब्धिवासस्य सर्वसमत्वेऽपि निपीतसुधानामेवामरत्वं न त्वितरेषां यथा, तथैव मय्यवस्थानस्य सर्वसमत्वेऽपि मामेकं परं भावं ये भजन्ति तेषामेव विमुक्तिर्न त्वपरं भावं भजतां कामिनामिति 'तं यथायथोपासते तथैव भवति' इत्येतच्छ्रुत्यर्थमनुसृत्याह—

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११ ॥

ये यथेति । 'द्वे रूपे वासुदेवस्य व्यक्तं चाव्यक्तमेव च । अव्यक्तं ब्रह्मणो रूपं व्यक्तमेतच्चराचरम् ॥' इति स्मरणादव्यक्तं निर्विशेषं परं ब्रह्म । व्यक्तं तु मायोपाधिकमपरं ब्रह्म सकार्यमेवं व्यवस्थितं मत्तत्त्वं शास्त्राचार्योपदेशसंस्कृतस्वस्वप्रज्ञानुरूपेण तत्तद्विज्ञाय परं ब्रह्मविदो वाप्यपरं ब्रह्मविदोऽपि वा तत्तत्फलार्थिनो ये जना मामेवं द्वेधावस्थितं परमात्मानं यथा प्रपद्यन्ते ज्ञानयोगेन वा कर्मयोगेन वाप्यन्यथा वा येन प्रकारेणोपासते तत्तत्साधननिष्ठांस्तानुपासकान् तथैव यस्मिन् यस्मिन् तत्त्वे परिनिष्ठिता भवन्ति तत्तद्रूपेणैव प्रत्यक्षीभूय भजाम्यनुगृह्णामि । तत्तद्वस्तूपासनानुरूपफलेन योजयामीत्यर्थः । 'यादृशी भावना यत्र सिद्धिर्भवति तादृशी' इति नियमात्स्वस्वप्रज्ञाबलेन परिगृहीतवस्तूपासनानुरूपेणैव तेषां तेषां फलं सिध्यति नान्यथा । अतो मम न कश्चित्पक्षपात इति भावः । एवं ज्ञानकर्मयोगफलप्रदाने समभावेन मयि स्थिते सत्यपि शास्त्रार्थज्ञास्तदनुसारिणो ये मनुष्या ब्राह्मणादयो मुमुक्षवस्ते सर्वे ममेश्वरस्याभिमतं श्रुतिस्मृतिविहितं वर्त्म कर्ममार्गमेव अनुवर्तन्ते । यद्वा ममेश्वरस्य कृतेर्विषयभूतं कर्ममार्गमनुवर्तन्ते । विशिष्य कर्मैव कुर्वन्तीत्यर्थः ॥ ११ ॥

ननु मोक्षस्य सन्निकृष्टकारणं प्रकृष्टं सर्वश्रुतिप्रसिद्धं ज्ञानयोगमुत्सृज्य पण्डिता अपि किं कर्ममार्गमनुतिष्ठन्तीत्याशङ्कायां, न । ज्ञानयोगस्य

चित्तशुद्ध्येकलभ्यत्वात्तदसिद्धौ सर्वकर्म संन्यस्य ज्ञानयोगे प्रवृत्तस्य ज्ञाननिष्ठासंभवात्तदसिद्धौ मोक्षासिद्धेस्तेन ज्ञानकर्मफलयोरुभयोरपि भ्रंशः स्यात्ततो मोक्षस्यादिमं परं कारणं चित्तशुद्धिरेव कर्मभिः संपादनीयेति विचक्षणाः कर्मैव कुर्वन्तीत्याशयेनाह—

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

काङ्क्षन्त इति । इहास्मिन् लोके देवता इन्द्राग्न्यादिदेवान् तत्प्रसादसिद्धये यजन्तः । आज्यादिहविषाराधयन्तः पण्डिताः कर्मणां श्रद्धाभक्तिभ्यां नियमेनानुष्ठितानां श्रौतादीनामनुष्ठानेन लब्धां सिद्धिं सत्त्वशुद्धिलक्षणां काङ्क्षन्तो मम वर्त्मानुवर्तन्त इति पूर्वेणान्वयः । ननु हठादियोगैरपि धीशुद्धिः संपादयितुं शक्यते किं कर्मणेत्याशङ्कायां । न । तेषामवैदिकत्वाद्ब्राह्मणस्याविहितत्वाच्च कर्तुमयोग्यत्वात्कृतैरपि तैश्चित्तशुद्धेर्बहुकालभाव्यत्वाच्चावश्यं ब्राह्मणस्य मुमुक्षोः कर्मणैव भवितव्यमित्याशयेनाह— **क्षिप्रमिति ।** हि यस्मात्कारणान्मानुषे लोके कर्मभूमौ कर्मजा वैदिककर्मानुष्ठानसंपन्ना सिद्धिश्चित्तशुद्धिलक्षणा क्षिप्रं शीघ्रमेव भवति । यज्ञैराराधितानां देवानां प्रसादाच्छीघ्रमेव मनः प्रसीदतीत्यर्थः । मानुषे लोके सिद्धिरित्युक्तिर्मनुष्यलोक एव चातुर्वर्ण्यं चातुराश्रम्यं कर्मविधिश्च नास्त्यन्यत्र लोक इति सूचितं भवति ॥ १२ ॥

मम वर्त्मानुवर्तन्त इत्यत्र मत्कृतेर्विषयभूतं कर्ममार्गमनुवर्तन्त इति यदुक्तं तद्विस्पष्टयति—

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

चातुर्वर्ण्यमिति । गुणकर्मविभागशः गुणानां सत्वादीनां कर्मणां शमादीनां च विभागेन रजउपसर्जनसत्वप्रधानस्य ब्राह्मणस्य शमदमादयः कर्माणि, सत्वोपसर्जनरजःप्रधानस्य क्षत्रियस्य शौर्यतेजोधृत्यादयः कर्माणि, तमउपसर्जनरजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि, रजउपसर्जनतमःप्रधानस्य शूद्रस्य परिचर्यात्मकं कर्म, एवं गुणकर्मविभागशश्चातुर्वर्ण्यं चत्वारो वर्णा एव चातुर्वर्ण्यं चातुराश्रम्यं च सर्गादौ मया सृष्टम् । अतएव 'मम वर्त्मानुवर्तन्ते मनुष्याः' इति यदुक्तं तत्सिद्धम् । 'यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते' इति श्रवणात्तवापि तर्हि चातुर्वर्ण्यसृष्टिकर्मकर्तुस्तत्फलेन जन्मादिना संबन्ध-

संभवान्न नित्यत्वेश्वरत्वादि सिध्यतीत्याशङ्कायां, न। 'विकल्पो नहि वस्तु' 'मायामात्रमिदं द्वैतम्' इति श्रवणात् स्रष्टृस्रष्टव्यादेर्मायिकत्वेन मिथ्यात्वान्निष्कलस्य निष्क्रियस्याविक्रियस्य मम सर्जनादिक्रियायोगाद्वस्तुतो ममाकर्तारमेव विजानीहीत्याह—**तस्येति** । तस्य चातुर्वर्ण्यस्य प्रपञ्चस्य च मायया कर्तारमपि मायामोहितचित्तानां कर्तृत्वेन प्रतीयमानं मां परमात्मानमकर्तारं निर्गुणत्वाद्वस्तुतः कर्तृत्वादिधर्मशून्यमेव विद्धि । तदभावे कर्मासंभूतौ तत्फलजन्माद्यसंभवादव्ययं नाशरहितं नित्यशुद्धबुद्धमुक्तस्वभावमेव विजानीहीत्यर्थः ॥ १३ ॥

परस्य ब्रह्मणो ममोपाधिद्वयं माया तत्कार्यं च स्वस्य कूटस्थासङ्गचिद्रूपत्वेन मायातत्कार्यसंबन्धासंभवान्मायाकर्तृकैर्जगत्सृष्ट्यादिकर्मभिः श्लेषो यथा नास्ति, तथा प्रत्युग्रूपस्य ममासङ्गत्वेन देहेन्द्रियादिकृतकर्मभिरपि श्लेषो नास्ति। एवं कर्तृत्वभोक्तृत्वादिधर्मशून्यं मां परमात्मानं श्रवणमननादिसंजातविज्ञानबलेन यः स्वात्मत्वेन विज्ञाय कर्मणि प्रवर्तते स कर्मभिर्न बध्यत इत्याह—

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥

न मामिति । कूटस्थासङ्गचिद्रूपत्वेन बुद्ध्यादिसंबन्धशून्यस्य मे प्रत्यगात्मनः कर्मफले कर्मसु तज्जन्यफलेषु च न स्पृहास्ति स्पृहाया बुद्धिधर्मत्वाद्बुद्ध्यादिसाक्षिणोऽविकारिणो मम तद्धर्मायोगान्न कर्मफलेच्छा संभवति । अतएव 'न मां कर्माणि लिम्पन्ति', 'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते' इति कामिन एव कर्मसंकल्पतदारम्भश्रवणात्कर्मफलेच्छुनैव विज्ञानात्मना कर्माणि क्रियन्ते नत्वकामिना अक्रियेण मया । अतो न बुद्ध्यादिभिः कृतानि कर्माणि मामकर्तारं कर्मतत्कर्तृसाक्षिणं लिम्पन्ति स्पृशन्ति । येन यत्कर्म क्रियते फलेच्छुना स तेन कर्मणा लिप्यते तैलवन्नान्यस्ततो बुद्ध्यादेः कर्मकर्तुरन्यस्य बुद्ध्यादिकृतकर्माणि लेपाय न भवन्ति इत्येवं कर्मफलेच्छारहितं कर्मणामकर्तारमभोक्तारं चाकाशवत्सर्वगतमसङ्गमविक्रियं बुद्धितद्धर्मतत्कर्मतदवस्थासाक्षिणं मां परमात्मानं स्वतत्त्वं योऽभिजानाति सम्यगाभिमुख्येन अयमेवाहमस्मीति साक्षात्स्वात्मना यो वेत्ति स विद्वानाधिकारिको लोकसंग्रहार्थं कृतैः कर्मभिर्न बध्यते । कृतानि कर्माण्यमुष्य देहारम्भकाणि न भवन्तीत्यर्थः ॥ १४ ॥

विदुष उपाधिकृतानां कर्मणामबन्धकत्वज्ञानमेव परार्थप्रवृत्तौ बलवत्साधनमिति सूचयित्वा प्राञ्चोऽप्यबन्धकत्वज्ञानेनैव परार्थं प्रवृत्ता इति शिष्टाचारं प्रमाणय्य त्वयाप्येवमेव प्रवर्तितव्यमित्याह—

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

एवमिति । एवं ज्ञात्वा अहं बुद्ध्यादिसाक्षी प्रत्यगेवास्मि देहेन्द्रियादिभ्यो भिन्नः सन् देहेन्द्रियकृतैः कर्मभिर्न बद्ध इत्यात्मनो देहेन्द्रियादिभ्यो भिन्नत्वं देहादिकृतकर्मणामबन्धकत्वं चैवमुक्तरीत्या विज्ञाय मुमुक्षुभिर्मुक्तैर्मुमोचयिषुभिरितीदं गर्भितणिजन्तं रूपम् । अविद्याबन्धेभ्यो मोचयितुमिच्छद्भिर्मुमुक्षुभिः पूर्वैरपि जनकादिभिर्लोकहितार्थं कर्म कृतं भवति यस्मात्तस्मात्त्वं पूर्वैः कृतं ज्ञानवृद्धैः सद्भिरनुष्ठितं पूर्वतरमनादिकालप्रवृत्तं कर्मैव लोकहितार्थं कुरु नतु संन्यासमित्यर्थः ॥ १५ ॥

ननु कर्मणां बन्धकत्वमेव सिद्ध्यति 'कर्मणा बध्यते जन्तुः' इति कर्मणां बन्धकत्वस्मरणादितिचेन्न । तत्स्मृतेरविद्वत्कर्तृककर्मविषयत्वात् । 'तं विदित्वा न लिप्यते कर्मणा पापकेन' इति विदुषः कर्मालेपश्रवणात्कर्माकर्मणोस्तत्त्वं सम्यग् ज्ञात्वा विदुषा क्रियमाणं कर्माऽकर्मैव तत् न बन्धाय भवति । अविदुषा कृतमकर्मैव कर्म तदेव बन्धाय भवति । तर्हि कर्माकर्मणोर्लक्षणं किमित्याकाङ्क्षायामाह—

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

किं कर्मेति । श्रुतिस्मृतिभ्यां यद्विहितं तत्कर्म यदविहितं तदकर्मेति केचित्पण्डिता जगुः । वैदिकं श्रौतं स्मार्तं च यत्तत्सर्वं कर्म तत्संन्यासोऽकर्मेत्यपरे । चलनात्मकं कर्म अचलनं तूष्णीमासनमकर्मेत्यन्ये । केचित्तु किं कर्म किमकर्मेति किंवा कर्मशब्दवाच्यमकर्मशब्दवाच्यं वा किमिति कवयः सर्वशास्त्रज्ञा अप्यत्र कर्माकर्मतत्त्वनिर्णये मोहिता मूढभावं गताः । तत्तत्त्वं निर्णेतुमसमर्था जाता इत्यर्थः । यत एवं ततः कर्माकर्मस्वरूपमजानते ते तुभ्यं कर्म चाकर्म च प्रवक्ष्यामि तयोर्लक्षणमुपदेक्ष्यामि । यज्ज्ञात्वा ययोस्तत्त्वं विज्ञाय अशुभात्संसारान्मोक्ष्यसे । कर्माकर्मणोस्तत्त्वं सम्यक् ज्ञात्वा मुक्तो भविष्यसीत्यर्थः ॥ १६ ॥

ननु कर्माकर्मणोरुभयोस्तत्त्वमारुरुक्षोर्ज्ञातव्यं वा किमारूढस्यैवेत्याकाङ्क्षायामारुरुक्षोः कर्माकर्मविकर्मणामेव तत्त्वं सम्यक् ज्ञातव्यं तद्बो-

धस्यैव तस्य दुरवगाहत्वात्तान्येव बोद्धव्यानि प्रयत्नेनास्यात्रैवाधिकारो नान्यत्रेत्याशयेनाह—

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ १७ ॥

कर्मण इति । मुमुक्षोरारोढुमिच्छतः कर्मणो वर्णाश्रमादेरनुष्ठेयस्य बोद्धव्यमस्ति । ज्ञाते सति हि कर्मस्वरूपे यथाशास्त्रं कर्म कर्तुं शक्यते नाज्ञाते । शास्त्राणामनेकत्वाच्छास्त्रप्रवर्तकानां बहुविधत्वाच्च देशकालयुगाधिकारिवर्णाश्रमवयोवस्थादिभेदेन संकोचव्याकोचाभ्यां कर्मविधेरनेकरूपत्वाच्च कर्तव्यस्य कर्मणस्तत्त्वं सम्यग्बोद्धव्यमित्यर्थः । विकर्मणोऽनन्तसंबन्धवता विधिना विहितविपरीततया विधीयमानत्वाद्विकर्म प्रतिषिद्धं निन्दितं कर्म तस्य विकर्मणोऽपि बोद्धव्यमस्ति । ज्ञाते हि निषिद्धांशे यन्निषिद्धं तत्परिहर्तुं शक्यते । ततो निरुक्तदेशकालादिभेदेन निषिद्धस्यापि बहुविधत्वाद्बोद्धव्यमस्तीत्यर्थः । तथैवाकर्मणोऽपि न कर्माकर्म कर्माभावः यस्मात्कर्म न संभवति तदकर्मेति वा कर्मसंन्यासस्तस्यापि बोद्धव्यमस्ति । काम्यकर्मत्यागो निषिद्धत्यागः कर्मफलत्यागः सर्वकर्मपरित्यागः कर्ममात्रपरित्याग इत्यादिभेदेन संन्यासोऽपि बहुधा भिद्यते ततस्तस्यापि बोद्धव्यमस्तीत्यर्थः । हि यस्मात्कारणात्कर्मणः । कर्मण इति विकर्माकर्मणोरप्युपलक्षणम् । कर्माकर्मविकर्मणां त्रयाणामपि गतिरेवं कर्तव्यमिति कर्तव्यतानिश्चितिर्गहना विदुषामपि दुर्ज्ञेया भवत्यत आरुरुक्षोः कर्माकर्मविकर्मणां स्वरूपं शास्त्रत आचार्यतश्च सलक्षणं सरहस्यं च सम्यक् ज्ञातव्यमित्यर्थः ॥ १७ ॥

नैवैतान्यारूढस्य तु बोद्धव्यानि किंतु अरुरुक्षोः कर्माकर्मणोरेव तत्त्वं बोद्धव्यमशुभमोक्षायेति पूर्वं वक्ष्यामीति यत्प्रतिज्ञातं तदिदानीमुपदिशति—

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥

कर्मणीति । क्रियते देहेन्द्रियैरेव निर्वर्त्यत इति कर्म लौकिको वैदिकश्च सर्वोऽपि व्यापारस्तस्मिन् कर्मणि चेष्टामात्रे औपाधिके आत्मयाथात्म्यज्ञो विद्वान् अकर्म कर्माभावं यः पश्येत् । तथैवाकर्मणि देहेन्द्रियव्यापारोपरमलक्षणे तूष्णीमवस्थायां कर्म क्रियामेव यः पश्येत् । ननु कर्मण्यकर्मदर्शनं चाकर्मणि कर्मदर्शनं चोभयमपि न संभवति प्रत्यक्ष-

विरोधात् । नहि कर्माकर्म भवितुमर्हति व्यापारस्य दृश्यमानत्वात् । नाप्यकर्म च कर्म भवति स्थाणुवत्तूष्णींभावस्योपलभ्यमानत्वाद्भावे चाभावदर्शनमभावे च भावदर्शनमतिविरुद्धमप्रामाणिकं च भावाभावयोरभावत्वभावत्वासंभवादिति चेन्न । सद्बुद्ध्या विचार्यमाणे दर्शनद्वयोपपत्तेः । तत्कथमिति चेदुच्यते । स्वयमकर्मा सन्नेव पुमानन्यकर्मणा कर्मी भवति । यथा मेघक्रियया चन्द्रः क्रियावान् यथा चालनक्रिययाऽऽतपः क्रियावान् तथा देहादितादात्म्येन देहादिक्रियया स्वयमक्रियोऽपि क्रियावान् भवत्यखिलो जन्तुस्तथापि ब्रह्मवेत्ता ब्रह्मैवाहमिति ब्रह्मण्येवात्मत्वविज्ञानेन स्वस्य देहादिसंबन्धाभावात्तत्कर्तृकं कर्माकर्मैव पश्यति । तत्राहंममेति स्वत्वाभावात् । नह्यन्यकर्तृके कर्मण्यन्यस्य स्वत्वमुपपद्यते तदभावाद्देहादिकर्तृकं कर्मास्याकर्मैव भवत्यबन्धकत्वेनाकर्मतुल्यत्वात् । तस्मात्तदकर्मैव पश्यतीत्यर्थः । ननु स्वगतं कर्माकर्म पश्यति स्वस्य निरवयवत्वेन क्रियासमवायानुपपत्तेः । यथा वृक्षे चलति सति तत्स्थमाकाशं निष्क्रियं पश्यति । यथा मेघेषु धावत्सु सत्सु चन्द्रं निष्क्रियं पश्यति । तथा देहेन्द्रियादि स्वच्छन्दं विषयेषु प्रवृत्तेषु सत्सु स्वं निष्क्रियमेव पश्यति विद्वान् । ततो 'निष्कलं निष्क्रियम्' इत्यादिश्रुतिप्रामाण्यात्कूटस्थासङ्गचिद्रूपमात्मानमेवात्मत्वेन विजानतो विदुषो देहादिकर्तृके कर्मण्यकर्मदर्शनमुपपद्यत एव । तस्यैतस्य दर्शनस्य विद्वत्प्रत्यक्षत्वादकर्तारं स पश्यतीत्यादिस्मृतिसिद्धत्वाच्च प्रामाण्योपपत्तेः । किंच मूढः स्वस्मिन् देहाद्यध्यस्य तद्व्यापारोपरमे चाहमासे तूष्णीं सुखं न किंचित्करोमि दुःखकरं कर्मेत्यसुखे देहेन्द्रियनिरोधे सुखबुद्ध्या तदक्रियया स्वमक्रियमेव पश्यति । यथाश्वारूढोऽश्वस्थित्या स्वं स्थितं पश्यति यथा गच्छन्तमेव सूर्यमगच्छन्तं पश्यति न तथा विद्वान् किंतु तस्मिन् देहादिव्यापारोपरमेऽप्यकर्मणि कर्मैव पश्यति । यथा निगूढाङ्गुलिमुष्टौ बहिः क्रियाभावेऽप्यन्तरङ्गुलीनां मुकुलीभावसिद्धेः कारणभूताङ्गुलिनिरोधनक्रिया विद्यते । तथा निमीलिते चक्षुषि बहिर्दर्शनक्रियाभावेऽपि पक्ष्मनिरोधनक्रिया विद्यते तथा नाहं किंचित्करोमीति तूष्णीमवस्थायामपि बहिर्देहेन्द्रियादिचलनक्रियाभावेऽप्यन्तर्नाहं किंचित्करोमीति कर्तुराग्रहरूपा मानसी क्रिया विद्यत एव । अन्तराग्रहक्रियाभावे बहिः पाण्यादिनिरोधायोगान्मनोव्यापारैकमूलत्वात्सर्वार्थसिद्धये इन्द्रियक्रियासंभवाच्च । ऐन्द्रियनिग्रहक्रिययैव देहो निश्चलस्तिष्ठति तदभावे देहचलनं वेन्द्रियचलनं वा स्यात्ततो मूढदृष्ट्या त्वकर्मणि तूष्णीमवस्थानेऽपि कर्मदर्शनस्य न्यायदृष्टा-

न्तानुभवसिद्धत्वादकर्मणि कर्मदर्शनमविरुद्धं प्रामाणिकं च । भावे चाभावदर्शनमभावे च भावदर्शनमयुक्तमिति यत् । तन्न । देहचेष्टया भावत्वेऽप्यबन्धकत्वेनाभावतुल्यत्वात्तत्र कर्माभावदर्शनस्योपयुक्तत्वाभावे चाभावदर्शनमुपपद्यते । तूष्णीमवस्थायामकर्मण्यप्युक्तरीत्या कर्मदर्शनादकर्मणि कर्मदर्शनं चोपपन्नतरमेवातो न कोऽपि विरोधः । ननु विदुषः कर्मण्यकर्मदर्शनमतीतानागतवर्तमानसर्वकर्मनिर्मोकहेतुत्वेन जन्मादिबन्धनिवर्तकत्वात्कर्तव्यमेव भवति । अकर्मणि कर्मदर्शनस्य तु प्रयोजनाभावादकर्मणि च कर्म यः पश्येदिति विधिर्निरर्थक एवेति चेन्न । तस्याप्यकर्मास्पष्टात्मदर्शनसाधनत्वेन सफलत्वोपपत्तेः । निष्क्रियं शान्तमिति निष्क्रियत्वशान्तत्वयोर्ब्रह्मलक्षणत्वश्रवणादत्रापि निष्क्रियत्वशान्तत्वधर्मवति देहेन्द्रियव्यापारोपरमे तूष्णीमवस्थाने स्वरूपभ्रमः स्यात्तन्माभूदित्युपदिशति—'अकर्मणि च कर्म यः' इति । कर्मवदकर्मणोऽप्यौपाधिकत्वात्पुरुषतन्त्रत्वात् दृश्यत्वाद्विचार्यमाणे सक्रियत्वाच्च स्वयमनात्मैव भवति । तद्रष्टा यः स एवात्मेति बोद्धव्यमिति सूचयितुमुपदिश्यते 'अकर्मणि च कर्म यः' इति । किंचाकर्मणोऽपि कर्मवत्कर्मत्वज्ञानेन कर्माकर्मणोरुभयोरप्यनात्मत्वे सिद्धे विदुषस्तूष्णीमवस्थायामकर्मणो निष्फलत्वात्तदपेक्षया लोकोपकारकत्वात्कर्मणि प्रवृत्तिः सफलेत्यपि सूचयति । 'अकर्मणि च कर्म य' इत्यतो विधेः सर्वथा साफल्यमस्ति । ननु कर्मण्यकर्मदर्शनमकर्मणि कर्मदर्शनं चैककर्तृकं न संभवति । परस्परविरुद्धत्वेन तयोरेकाश्रयत्वायोगात् 'विकल्पो नहि वस्तु' इति द्वैतं सर्वं मिथ्यैव पश्यतो विदुषो देहेन्द्रियादेर्मिथ्यात्वात्तदाश्रितकर्मणोऽपि मिथ्यात्वदर्शनं युक्तम् । नत्वकर्मणि कर्मदर्शनं युक्तम् । तस्य देहादिसत्यत्वज्ञानैकसाध्यत्वात् । देहादेः सत्यत्वे खलु तदाश्रितस्याकर्मणः सत्यत्वं कर्मत्वं च सिध्यति, तत्सिद्धौ तु कर्मण्यकर्मदर्शनं न सिध्यति, तस्य मिथ्यात्वज्ञाननिबन्धनत्वात् । एवं परस्परविरुद्धयोस्तयोरेकपुरुषाधिकरणत्वं न संभवति, 'कर्मण्यकर्म यः पश्येदकर्मणि च कर्म य' इति यच्छब्दद्वयश्रवणाच्च । ततस्तयोर्भिन्नपुरुषाश्रयत्वमेवेति चेन्न । विदुष उभयत्र मिथ्यात्वदर्शनस्यैव विवक्षितत्वाद्यथा देहेन्द्रियादेस्तत्कर्मणोऽपि च मिथ्यात्वं द्रष्टव्यं तथा तद्व्यापारोपरमस्यापि मिथ्यात्वमेव द्रष्टव्यम् । उभयोरप्यविद्याकार्यभूतदेहाश्रयत्वेनावस्तुत्वाविशेषादन्यथा भेददृष्टेरशुभमोक्षासंभवात् । यः कर्माकर्मणोरुभयोस्तदाश्रयस्यापि मिथ्यात्वमेव विनिश्चित्य तदधिष्ठानं परं ब्रह्म निष्कलं निष्क्रियं शान्तमनन्तमखण्डानन्दैकरसमिदमेवाहमिति स्वात्मना विज्ञाय तदात्मना तिष्ठति

स एवाशुभान्मुक्तो भवत्यतोऽन्यथात्मानं पश्यतो न मुक्तिरस्ति । तस्मात्तयोरेकपुरुषाश्रयत्वमेव नत्वनेकपुरुषाश्रयत्वम् । यच्छब्दद्वयं तु 'यतो वा इमानि भूतानि जायन्ते' इत्यत्र यथा तथा बोधसौकर्यार्थमेव नतु ग्रहीतृभेदसिद्ध्यर्थं । स बुद्धिमानित्येकेनैव तच्छब्देनोपसंहारात् । एवं कर्मण्यकर्मदर्शनमकर्मणि कर्मदर्शनं च यः करोति शास्त्रत आचार्यतो युक्तितश्चानुभूतितश्च स एव मनुष्येष्वधिकृतः सर्वशास्त्रेषु बुद्धिमानात्मतत्त्वज्ञः स एव युक्तो योगी च स एव कृत्स्नकर्मकृत् सर्वेषां श्रौतानां स्मार्तानामितरेषां च पुण्यकर्मणां कर्ता च भवति। 'यथा कृताय विजितायाधरेयाः संयन्त्येवमेनꣳ सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद' इति श्रवणात्सर्वाणि सर्वलोकैः कृतानि पुण्यकर्माण्यनेन कृतानि भवन्तीत्यर्थः ॥ १८ ॥ यद्वा किं कर्म किमकर्मेति श्लोकव्याख्यानपुच्छमत्र लिख्यते । अशुभात्संसारान्मोक्ष्यसे । कर्माकर्मणोस्तत्त्वं सम्यक् ज्ञात्वा मुक्तो भविष्यसीत्यर्थः ॥ १६ ॥ ननु 'तमेव विदित्वातिमृत्युमेति' इत्यात्मतत्त्वज्ञानादेव मुक्तिः श्रूयते, नतु कर्माकर्मणोस्तत्त्वज्ञानादिति चेत्सत्यम् । आत्मज्ञानादेव मुक्तिस्तथापि 'तदा विद्वान्पुण्यपापे विधूय' इति पुण्यपापविध्वंसनं कृतवत एव विदुषो मुक्तिः श्रूयते, ततो मुमुक्षोः कर्मादितत्त्वज्ञानेन जन्मादिहेतुभ्यः कर्मादिभ्यो मोक्तव्यं तदर्थं कर्मादीनां तत्त्वं ज्ञातव्यमित्याह—**कर्मणो ह्यपीति** । कर्मणोऽपि कर्तव्यत्वेन शास्त्रेणोक्तस्य स्वर्गादिहेतोस्तत्त्वं मुमुक्षोर्बोद्धव्यं तद्विपरीतस्य दुर्गतिहेतोर्विकर्मणो निषिद्धस्यापि तत्त्वं बोद्धव्यं तथैवानर्थहेतोरकर्मणोऽप्यश्रद्धया विहिताकरणलक्षणस्य तत्त्वं बोद्धव्यं सद्गुरोः । ननु चलनात्मकं कर्मेति चलनमेव कर्मणः स्वरूपं किं तस्य बोद्धव्यमस्तीत्याशङ्कायां । न । कर्माकर्मविकर्मणां तत्त्वं मूढैर्ज्ञातुं न शक्यमित्याह—**गहनेति** । हि यस्मात्कारणात्कर्मणः । कर्मण इतीतरयोरप्युपलक्षणम् । कर्मणो विकर्मणोऽप्यकर्मणश्च गतिस्तत्त्वावगतिर्याथात्म्यवेदनं सद्गुरूपदेशेन विना ज्ञातुं गहना दुर्घटा दुर्लभेत्यर्थः ॥ १७ ॥ तर्हि तेषां तत्त्वं त्वयैवोपदेष्टव्यं जगद्गुरुणेत्याकाङ्क्षायां कर्माकर्मविकर्मणां चाकाशादिप्रपञ्चस्य सर्वस्यापि तत्त्वं ब्रह्मैव तस्मिन्विदिते सर्वस्यापि तत्त्वं विदितं भवतीति । 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि', 'संपश्यन् ब्रह्म परमम्' इत्येतच्छ्रुतिप्रमाणकं परावरैकत्वदर्शनं निःशेषसंसारभ्रमविध्वंसनमुपदिशति—**कर्मण्यकर्म य इति** । क्रियते सृज्यत इति कर्म ब्रह्मकार्यं महदादिस्थूलान्तं जगत्तस्मिन् कर्मणि सर्वत्र जगत्यकर्म न विद्यते यत्र कर्म तदकर्म 'निष्कलं

निष्क्रियम्' इति श्रवणान्निष्क्रियं परं ब्रह्म यः पश्येत्। प्रतीतं प्रपञ्चं सर्वं ब्रह्मैव यः पश्यतीत्यर्थः। ननु सविशेषं जगन्निर्विशेषं परं ब्रह्म गवाश्ववदेतद्द्वयं परस्परं विलक्षणं भवति। गामश्वमिव ब्रह्मविलक्षणं विश्वं कथं ब्रह्म पश्यति विद्वानितिचेन्न। तयोः कार्यकारणभावापन्नत्वाद्वैलक्षण्यानुपपत्तेः। गवाश्वयोस्तु कार्यकारणभावाभावाज्जातिभेदाच्च वैलक्षण्यं संभवति न तथा जगद्ब्रह्मणोः। ननु नामतो रूपतो गुणतो जातितश्च जगद्विद्यते निरुक्तभेदस्य प्रत्यक्षत्वादेवं भेदभिन्नं जगत्कथं ब्रह्म पश्यतीतिचेन्न। नामरूपादेरधिष्ठानाज्ञानकल्पितत्वाद्यथैकस्मिन् तोये तरङ्गफेनबुद्बुदादिभेदकल्पना, यथैकस्यामेव भूम्यां गृहक्षेत्रादिभेदकल्पना, तथैवैकस्मिन् ब्रह्मणि नामरूपादिभेदकल्पना भ्रममूला नतु वास्तवी। यथा द्रवत्वशीतत्वशुक्लत्वमधुरत्वादीनां तोयधर्माणां तरङ्गादिषु बहिरन्तरनुस्यूतत्वाज्जलसत्ताव्यतिरेकेण पृथक्सत्ताभावाच्च तरङ्गादिसर्वं जलमात्रमेव भवति, तथा जगत्यपि बहिरन्तः सर्वत्राविच्छेदेन सत्त्वचित्त्वादीनां ब्रह्मधर्माणामनुगमदर्शनाद्ब्रह्मसत्ताव्यतिरेकेण पृथक्सत्ताभावाच्च 'चिद्धीदं सर्वं सद्धीदं सर्वं', 'सर्वं खल्विदं ब्रह्म', 'ब्रह्मैवेदं सर्वम्' इत्यादिश्रुतिभिरिदं सर्वं ब्रह्मैव ब्रह्मकार्यत्वात् मृत्कार्यभूतो घटो मृद्यथा। इदं सर्वं ब्रह्मैव ब्रह्मण्यारोपितत्वाच्छुक्तिरजतवदित्यादियुक्तिभिर्मृदादिदृष्टान्तैश्च सम्यग्विचार्यमाणे जगत्सर्वं ब्रह्मैव भवति। अतएव शुद्धात्मा ब्रह्मवित्सर्वं जगद्ब्रह्मैव पश्यतीत्यर्थः। यद्यपि श्रुतियुक्तिदृष्टान्तानुभवैर्जगतो ब्रह्ममात्रत्वे सिद्धे जगतः कार्यत्वं निवृत्तं तन्निवृत्त्या ब्रह्मणोऽपि 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन कारणत्वं निवृत्तमेव भवति। कार्यत्वसापेक्षत्वात्कारणत्वस्य तन्निवृत्त्या तन्निवृत्तिरेवमुभयनिवृत्त्या तु कार्यकारणभावविकलमेकमेवाद्वितीयं ब्रह्मेति ब्रह्मणोऽद्वितीयत्वं सिद्धं, तथाप्यधुना विचारादद्वितीयत्वं ब्रह्मणः सिद्धं पूर्वं तु जगदिति ब्रह्मेति द्वैतमस्त्येवेत्याशङ्कायां। न। पूर्वमपि यथा रज्जुरेव सर्पतच्छिरःपुच्छादिरूपेणाभावात्। यथा मरुरेव जलतत्तरङ्गफेनादिरूपेणाभावात्तथा ब्रह्मैव भ्रान्त्या द्रव्यगुणकर्मादिभेदभिन्नजगदात्मना भातं नतु वस्तुतो जगदस्तीति मुमुक्षुणा ब्रह्मणः कालत्रयेऽप्यद्वितीयत्वसिद्धये ब्रह्मणि तद्विवर्तत्वेन जगत्स्थितमिति द्रष्टव्यमिति व्यतिहारमुखेनोक्तमेव दर्शनं पुनर्द्रढयति—जगतो ब्रह्ममात्रत्वे निर्विचिकित्सत्वाय—**अकर्मणि च कर्म य इति।** अकर्मण्युक्तलक्षणे ब्रह्मणि कर्म चोक्तलक्षणं जगद्यः पश्येद्ब्रह्मविवर्तत्वेन स्वतः सत्ताभावाद्रजतं शुक्तिमिव सलिलं मरुमिव जगत्सर्वं ब्रह्मैव यः पश्य-

तीत्यर्थः। 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद' इति श्रुतिर्ब्रह्मणः पृथक्सत्तावत्त्वेन नामरूपादिभेदभिन्नं जगत् पश्यतो विदुषोऽनर्थं ब्रवीति यतस्ततो नामरूपादिद्वैतदर्शनं भ्रमकल्पितमुत्सृज्य निःश्रेयसार्थिना निःशेषविनष्टविपर्ययं यथा तथा नामरूपं गुणं कर्म च सर्वं ब्रह्मैवेति द्रष्टव्यमिति सिद्धम्। एवमसंदिग्धमविपर्यस्तं सर्वं प्रत्यग्दृष्ट्या ब्रह्मैव यः पश्यति स एव बुद्धिमान् ब्रह्मवेत्ता। स एव युक्तो ब्रह्मनिष्ठः। स एव कृत्स्नकर्मकृत् कृत्स्नानि सर्वाण्यनेककल्पार्जितानि संचितान्याधुनिकजन्मकृतान्यप्रवृत्तफलानि कर्माणि नानायोनिप्रापकाणि स्वयाथात्म्यविज्ञानखड्गेन कृन्तति छिनत्तीति कृत्स्नकर्मकृत् सर्वं पाप्मानं तरतीति श्रवणादेवं द्रष्टा यः सोऽशुभान्मुक्तो भवतीत्यर्थः॥ १८॥

'यथा पुष्करपलाश आपो न श्लिष्यन्ते' इत्येतच्छ्रुत्युक्तरीत्या कर्मण्यकर्मत्वदर्शनेन शरीरयात्रोपयुक्तानि ज्ञानसमकालानि सर्वाणि कर्माणि यो विश्लेषयति स एव पण्डित इत्याह—

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥ १९॥

यस्येति। समारम्भाः सम्यग्देहेन्द्रियादिभिरेवारभ्यन्ते क्रियन्त इति समारम्भाः प्राणत्राणोपयोगिनो देहेन्द्रियव्यापाराः सर्वे यस्य ब्रह्मविदः कामसंकल्पवर्जिताः। कामोऽनेन भवितव्यमितीच्छावेगः। संकल्पस्तद्धेतुः सम्यक्त्वबुद्धिस्ताभ्यां वर्जिताः क्षुदादिवत्तात्कालिका भवन्ति तं ज्ञानाग्निदग्धकर्माणं कूटस्थासङ्गचिद्रूप एवाहं नतु कर्ता भोक्ता श्रोता द्रष्टा वक्तेत्यात्मन्येवात्मभावापत्त्या देहतद्धर्मतत्कर्मसुखस्यासङ्गत्वदर्शनं तदेवाग्निस्तेन दग्धानि निर्मूलितानि सर्वाणि विहिताविहितादिरूपाणि कर्माण्यौपाधिकानि यस्य तमेव जीवन्मुक्तं महापुरुषं बुधाः शास्त्रज्ञाः पण्डितं प्राहुः। पण्डा कल्याणी सर्वत्र ब्रह्ममात्रावगाहिन्यखण्डात्मिका वृत्तिरस्य संजातेति पण्डितस्तमेव पण्डितं वदन्ति नान्यमित्यर्थः। अत्र कामजिता इत्यनेन 'यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम्' इति न्यायात्कर्मसु प्रवृत्तेः कारणं कामस्तत्कारणं संकल्प एवारम्भाणां तद्विवर्जितत्वे स्वार्थं परार्थं वा विदुषः प्रवृत्तिरनुपपन्ना सती शरीरयात्रामात्रावशिष्टा, सापि तात्कालिकी, तत्रापि कामाद्यभावाद्वेगवर्जिता ज्ञानाग्निनिर्दग्धा च भवतीति सूचितं भवति॥ १९॥

सर्वं ब्रह्मैव पश्यतो विदुषः स्वार्था परार्था वा प्रवृत्तिर्न संभवति क्वचिद्वासनया आहारादौ कर्मणि प्रवृत्तोऽपि स्वयमकर्मैव भवतीत्याह—

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥ २० ॥

त्यक्त्वेति । ब्रह्मवित्स्वयं नित्यतृप्तः नित्येनानन्दैकरसेन स्वात्मना साक्षात्कृतेन ब्रह्मणैव तृप्तस्तृप्तिं गतः स्वरूपसुखसंपन्नस्तत एव निराश्रयः । येन ससाधनं कर्म पुमानाश्रयति स आश्रयः कामस्तस्मान्निर्गतो यः स निराश्रयो निष्कामस्तत एव कर्मसु न प्रवर्तते काममूलत्वात्प्रवृत्तेस्तदभावात्तदभावो युक्तः । यदि वासनया भिक्षाटनादौ क्वचित्प्रवर्तते तदा कर्मफलासङ्गं कर्माणि फलन्ति यत्रेति वा, कर्मणि फलतीति वा, स्वयं कर्मणा फलत्वाद्वा, कर्मफलो देहस्तत्रासङ्गं कर्ता भोक्ता वक्ता श्रोता द्रष्टाहमिति तत्तादात्म्यं त्यक्त्वा कर्मणि स्वोचितेऽभिप्रवृत्तोऽपि स विद्वान् परदृष्ट्या तु कुर्वन्नपि स्वदृष्ट्या किंचिन्न करोत्येव । कर्मण्यकर्मत्वदर्शनेन कर्मभिरुपाधिकृतैर्न लिप्यत इत्यर्थः ॥ २० ॥

यस्तु विवेकवैराग्यशमदमादिसाधनसंपत्त्या सर्वाणि कर्माणि संन्यस्य श्रवणमननाभ्यां विज्ञातात्मतत्त्वो यतिर्निदिध्यासनपरो भवति स तु शरीरयात्रामात्रात्मकं कर्म कृत्वा ब्रह्मनिष्ठया निर्मूलितबन्धः सन्मुक्तो भवतीत्याह—

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥

निराशीरिति । निःशेषं गता आशिषो वैषयिक्यः कामना यस्मात्स निराशीः । विनष्टसर्वकाम इत्यर्थः । तत एव त्यक्तसर्वपरिग्रहः त्यक्ताः कौपीनकन्थातिरिक्ताः सर्वे परिग्रहा येन स त्यक्तसर्वपरिग्रहो योगनिष्ठापरो यतिः स्वयं यतचित्तात्मा आत्मा देहः यतौ निरुद्धौ चित्तात्मानौ येन स यतचित्तात्मा, यद्वा यतं संस्थापितं चित्तमात्मन्येव न क्वचिदनात्मनि येन स यतचित्तात्मा सन् । शारीरं शरीरस्थितिकारणं शारीरं प्राणत्राणैकप्रयोजनं तत्रापि केवलं यतित्वज्ञानित्वकर्तृत्वाभिमाननिर्मुक्तं शारीरं कर्म कुर्वन् किल्बिषं नाप्नोति । ननु 'व्युत्थायाथ भिक्षाचर्यं चरन्ति' इति प्राणत्राणहेतोर्भिक्षाया यतेर्विहितत्वाद्विहितानुष्ठित्या किल्बिषासंभवादप्राप्तकिल्बिषप्राप्त्यभावप्रतिपादनमयुक्तमिति चेन्न । क्वचित्किल्बिषप्राप्तिप्रसङ्गाद्यतचित्तात्मेत्युक्त्या वाचोऽपि निरुद्धत्वान्मौनिनो यतेः क्वचिदभिशस्तादि-

भ्योऽपि भिक्षाग्रहणप्रसङ्गादभिशस्तपतितवर्जमित्यादिश्रुतिप्रतिषिद्धाननुष्ठित्या स्यादेव किल्बिषं सम्यग्ज्ञानप्रतिबन्धकं यत्तदेव कर्मण्यकर्मत्वदर्शनाग्निना निर्दह्य मुक्तिं प्राप्नोतीत्याशयेनोच्यते कुर्वन्नाप्नोति किल्बिषमिति । यद्वा 'मधु मांसं च मद्यं च ताम्बूलं तैलमौषधम् । त्याज्यान्यष्टौ यतेर्दूरात्तथा कान्ता च काञ्चनम् ॥' इत्यतिनिषिद्धमपि शारीरं शरीरस्थितिकारणं यदभावे शरीरं निर्गच्छति श्रवणादि न सिद्ध्यति तच्छारीरं सर्पदंशननेत्ररोगोदरशूलादिमहोपद्रवे औषधसेवालक्षणमौषधवदाशमनादाचरेदिति श्रवणाच्छारीरं कर्म केवलमयत्नसिद्धं कुर्वन् यतिः श्रवणादिशीलः किल्बिषं न प्राप्नोति । यद्वा निराशीर्नित्यानित्यविवेकवैराग्यतीव्रमोक्षेच्छाभिराशीर्भ्य ऐहिकामुष्मिकसुखाशाभ्यस्तुच्छविषयाभ्यो निर्गतो यः स निराशीस्तत एव त्यक्तसर्वपरिग्रहः धर्मप्रजासंपत्त्यर्थं परिगृह्यत इति परिग्रहो दारादिः सर्वोऽपि मोक्षेच्छया परित्यक्तो येन स त्यक्तसर्वपरिग्रहः संन्यस्तसर्वकर्मतत्साधनो यतिः स्वयं यतचित्तात्मा यतौ बाह्यवृत्तेर्निवर्तितौ चित्तमात्मा कार्यकारणसंघातश्च द्वौ येन स यतचित्तात्मा सन् शारीरं शरीरोपाधिकत्वादात्मा शारीरस्तत्प्रापकं कर्मापि श्रवणादिकं शारीरमेव भवति । बाह्यं जपादिकर्म सर्वं परित्यज्यानन्तरं केवलं शारीरमेव श्रवणादिलक्षणं कर्म कुर्वन् किल्बिषं दुःखप्रदं संसारबन्धनं न प्राप्नोति । कुर्वन्नाप्नोति किल्बिषमिति वदता भगवता जपादिकर्मणा सह श्रवणादि कुर्वन् वा श्रवणादि त्यक्त्वा यतिस्तद्व्यतिरिक्तं कर्मैव कुर्वन् किल्बिषमेव प्राप्नोतीति सूचितं भवति । तेन यतेः श्रवणाद्येव सर्वदा कर्तव्यं नान्यत्स्तोत्रमन्त्रजपादिकमिति सिद्धं भवति । तथाच स्मृतिः 'यमानभीक्ष्णं सेवेत नियमान्परतस्त्यजेत् । जिज्ञासायां संप्रवृत्तो नाद्रियेत्कर्मचोदनाम् ॥' इति 'संन्यस्य श्रवणं कुर्यान्नान्यत्कुर्याद्यतिः क्वचित्' इति च ॥ २१ ॥

परावैकत्वविज्ञानाग्निनिर्दग्धाविद्यातत्कार्यग्रन्थेर्जीवन्मुक्तस्य विदुषः शरीरयात्रातिरिक्तं कर्तव्यं कर्म नास्तीति प्रतिपाद्य निदिध्यासोर्यतेर्मौनिनस्त्वन्नतद्दातृविचारमन्तरेण शरीरयात्रां कुर्वतोऽपि विमुक्तिर्न प्रतिबध्यत इत्युक्त्वा जीवन्मुक्तस्याजगरवृत्तेर्यदृच्छाप्राप्तेन जीवनं कुर्वतोऽपि यतेर्या वृत्तिः सा मुक्तिप्रतिबन्धकी न भवतीतीदानीं प्रतिपादयति श्रीभगवान्—

यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २२ ॥

यदृच्छेति। द्वन्द्वातीतः द्वन्द्वानि त्वमहमिति इदमद इति इष्टमनिष्टमिति शुद्धमशुद्धमिति द्वैतमद्वैतमित्यादीनि विपरीतज्ञानान्यतीतः सर्वत्र ब्रह्मदृष्ट्या विनष्टविपरीतदर्शनस्तत एव विमत्सरः अहमेवेदं सर्वमिति सर्वस्य स्वात्मत्वेनाधिगतत्वादुत्कृष्टत्वापकृष्टत्वभावनानुपपत्तौ सर्वत्रात्मबुद्धिः। अतएव यदृच्छालाभसंतुष्टः अयत्नप्राप्तो लाभो यदृच्छालाभः प्रारब्धवशात्स्वत एव प्राप्तः साधुना वाऽसाधुना वा दत्तः शुद्धोऽशुद्धो वाल्पोऽनल्पो वान्नादिस्तेनैव संतुष्टः परितृप्तिं प्राप्तः सन्नाहारस्य सिद्धावसिद्धौ च समो ब्रह्मानन्दानुभूत्या स्वयं हर्षविषादवैवर्ण्यादिरहितो भूत्वैवं शरीरयात्रां कृत्वाप्यजगरो ब्रह्मविद्यतिर्न निबध्यते मुक्तेः प्रतिबन्धनं न प्राप्नोति। लोकदृष्ट्या त्वाहारादिवैषम्येण प्रतिबन्धकवद्दोषेण प्रतीयमानोऽपि विद्वान् सर्वमिदमहं च ब्रह्मैवेति भोक्तृभोग्यदातृदेयादेः सर्वदृश्यस्य ब्रह्ममात्रत्वेन प्रविलापितत्वात्परे ब्रह्मण्यद्वितीये प्रतिबन्धहेतोरन्यस्यासंभवात्पतितेऽस्मिन् विद्वद्देहे विदेहमुक्तिं प्राप्नोतीत्यर्थः॥ २२॥

ननु सर्वमिदमहं च ब्रह्मैवेति सर्वस्यापि स्वस्य च ब्रह्मत्वमेव प्रत्यक्दृष्ट्या सर्वदा पश्यतां ब्रह्मविदां जीवन्मुक्तानां शरीरयात्रात्मकं कर्म ब्रह्मदृष्ट्या प्रविलापितत्वेन निःसत्ताकतया तेषां मुक्तिप्रतिबन्धकं मास्तु, लोकानुग्रहकाम्यया कर्मणि प्रवृत्तस्याधिकारिकस्यान्यस्य वा विदुषोऽहंकर्ताऽनेनेदं कर्तव्यमिति क्रियाकारकभेददृष्टिमवष्टभ्य क्रियमाणेन कर्मणा मुक्तिः प्रतिबध्यत एव 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इत्यादि स्मृतिनियमादित्याशङ्कायां। न। ब्रह्मविद्भिर्महापुरुषैः क्रियमाणं क्रियाकारकादिभेदभिन्नमपि कर्म लौकिकं वैदिकं च सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मबुद्ध्यैव क्रियते नतु मयेदं क्रियत इति भेददृष्ट्या। ततस्तैः क्रियमाणं कर्माकर्मैव सत्स्वयं मुक्तिं तेषां प्रतिबन्द्धुं न शक्नोतीत्याशयेनाह—

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते॥ २३॥

गतसङ्गस्येति। मुक्तस्य ब्रह्मण्येवात्मभावापत्त्याऽहंममाभिनिवेशनविमुक्तस्य निरहंकृतेरतएव गतसङ्गस्य सज्जते पुमाननेन कर्मस्विति सङ्गः कामः स गतो यस्य तस्य गतसङ्गस्य निष्कामस्यात एव ज्ञानावस्थितचेतसः ज्ञानं सर्वत्र ब्रह्मदर्शनलक्षणं तत्रैवावस्थितं चेतो यस्य तस्य ज्ञानावस्थितचेतसः दृश्यावगाहिन्या वृत्तेः सदा ब्रह्माकारतामेवापादयतो यज्ञाय विष्णवे। यद्वा श्रौतैः स्मार्तैश्च कर्मभिर्देवान् यजन्तीति

यज्ञाः ब्रह्मादयस्तेभ्यः । जातावेकवचनम् । यज्ञाय लोकहितायैवाचरतः कर्माणि कुर्वतः आधिकारिकस्य नित्यमनुष्ठीयमानं कर्म समग्रं करणत्रयनिर्वर्तितं सर्वं, कर्माकर्मादिलक्षणं वा सर्वं प्रविलीयते । ब्रह्मबुद्ध्या प्रविलापितं सत्समूलं विनश्यति न जन्मादिफलाय कल्पत इत्यर्थः ॥ २३ ॥

प्रविलापनप्रकारमेवाह—

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥

ब्रह्मार्पणमिति । ब्रह्मार्पणं हविरर्प्यतेऽनेनेत्यर्पणं चमसस्रुक्स्रुवादिकं सर्वं ब्रह्मैवेति प्रत्यग्दृष्ट्या ब्रह्मवित्पश्यति । मूढदृष्ट्या यद्रजतं तदेव विवेकिदृष्ट्या शुक्तिर्यथा तथाऽज्ञदृष्ट्या यच्चमसादि यज्ञसाधनं तदेव ब्रह्मविद्दृष्ट्या ब्रह्मैव भवतीत्यर्थः । ब्रह्म हविर्यज्ञियं यद्धविश्चरुपुरोडाशादिकं होम्यद्रव्यं तत्सर्वं ब्रह्मैव पश्यति । ब्रह्मणा होमकर्त्रा । कर्तापि ब्रह्मैवेति यजमानं स्वं ब्रह्मविद्ब्रह्मैव पश्यति । ब्रह्माग्नौ ब्रह्मैवाग्निस्तं होमाधिकरणं ब्रह्मैवेति पश्यति । तस्मिन् ब्रह्माग्नौ यद्धुतं हवनक्रिया तदपि ब्रह्मैव पश्यति । ब्रह्मकर्मसमाधिना सर्वस्य ब्रह्ममात्रत्वदर्शनं यत्तद्ब्रह्मकर्म तस्मिन् ब्रह्मकर्मणि समाधिश्चित्तस्य स्थापनं यस्य तेन ब्रह्मकर्मसमाधिना सर्वं ब्रह्मैव पश्यता ब्रह्मविदा यद्गन्तव्यमेवं दर्शनस्य फलत्वेन प्राप्तव्यमिदमेवाहमस्मीति तद्ब्रह्मैव भवति । इत्थं लोकहितार्थं प्रवृत्तस्याधिकारिकस्य ब्रह्मविदोऽपि ससाधनं सर्वं कर्म ब्रह्मवृत्त्या ब्रह्ममात्रत्वेन प्रविलापितत्वात्स्वयं निःसत्त्वेनाकर्मैव सद्बन्धाय न भवतीति सिद्धम् । एतेन चलनात्मिकायाः प्रवृत्तेर्निरोधस्य दुष्करत्वात्सर्वदा विदुषोऽपि प्रवर्तितव्यत्वे प्राप्ते विवेकिनो व्यर्थव्यावृत्त्यपेक्षया वैदिकी प्रवृत्तिर्भूषणाय मनोहर्षाय लोकहिताय चान्ततोऽप्यबन्धाय च भवति, अतस्तयैव दृष्ट्या सद्भिर्ब्रह्मविद्भिः प्रवर्तितव्यमिति सूचितं भवति ॥ २४ ॥

पूर्वं 'ब्रह्मार्पणं ब्रह्म हविः' इति मन्त्रेण चमसादीनां ब्रह्ममात्रत्वदर्शनलक्षणं ज्ञानं यज्ञरूपत्वेन वर्णयित्वा तस्यैव ज्ञानयज्ञस्य साक्षान्मोक्षैकसाधनत्वेन दैवादियज्ञापेक्षया सर्वोत्तमत्वं प्रतिपादयितुं मोक्षस्य व्यवहितसाधनानां दैवादियज्ञानां मुमुक्षुभिः स्वाधिकारानुरूपेण चित्तशुद्ध्यर्थमनुष्ठेयत्वं सूचयितुं च दैवादियज्ञान्निरूपयति—

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥

दैवमिति । देवानिन्द्रादीनुद्दिश्य प्रवृत्तो यज्ञो दैवस्तं दैवमेव यज्ञं श्रौतं स्मार्तं चापरे मोक्षकामा योगिनः कर्मयोगिनो गृहिणश्चित्तशुद्ध्यर्थं पर्युपासतेऽनुतिष्ठन्तीति दैव एव वैदिको यज्ञो गृहिणां कर्तव्य इति सूचयित्वा ब्रह्मविदां यतीनां त्वयमेव यज्ञः कर्तव्यो मुक्त्यर्थमित्युक्तमेव ज्ञानयज्ञं प्रकारान्तरेण वर्णयति—**ब्रह्माग्नाविति** । अपरे गृहिभ्यो भिन्ना यतयः श्रवणादिभिर्विज्ञातात्मतत्त्वाः स्वयं ब्रह्माग्नौ 'सत्यं ज्ञानमनन्तं ब्रह्म', 'आनन्दो ब्रह्म', 'तदेतद्ब्रह्मापूर्वमनपरम्' इत्यादिश्रुतिप्रसिद्धं निरस्ताशेषविशेषं सच्चिदानन्दघनं यत्परं ब्रह्म तदेवाग्निरविद्यातत्कार्यदावदाहकत्वात्सोपाधिकात्माहुतिप्रक्षेपस्याधिकरणत्वाच्च परं ब्रह्माग्निरित्युच्यते । तस्मिन् ब्रह्माग्नौ यज्ञं पामरैरहं भोक्तेति विषयोपभोगैरिज्यत इति यज्ञ आत्मा सोपाधिकस्तं यज्ञं वस्तुतो निर्विशेषमप्यध्यासतो बुद्ध्याद्युपाधियुक्तमात्मानमाहुतिनिक्षेपणकाले यज्ञेनात्मना निर्विशेषस्वरूपेणैव ब्रह्मणि जुह्वति । अहं ब्रह्मास्मीत्यहमित्यहंपदार्थं सोपाधिकवत्प्रतीयमानं विवेकवृत्त्या निर्विशेषं भावयित्वा ब्रह्माभिन्नमनुभवन्तीत्यर्थः । यद्वा यज्ञमात्मानं सोपाधिकं यज्ञेन 'यज्ञो वै विष्णुः' इति श्रवणात्सोपाधिकेनेश्वरेण सहैव जुह्वति । सोपाधिकमीश्वरं सोपाधिकमात्मानं चोभौ तत्तदुपाधिमपोह्य चोभयोरधिष्ठानभूतेन तुरीयेण निर्विशेषेण ब्रह्मणाऽभिन्नौ पश्यन्ति । तथा तरङ्गबुद्बुदौ तन्नामरूपापोहेन तदाधारभूतसमुद्रेणाऽभिन्नौ पश्यन्ति तद्वदित्यर्थः ॥ २५ ॥

एवं ब्रह्मविदां कर्तव्यं ज्ञानयज्ञं विधायाऽथाब्रह्मविदां कर्तव्यानि यज्ञान्तराण्याह—

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥ २६ ॥

श्रोत्रादीनीति । उक्तेभ्योऽन्ये त्वब्रह्मविदो मुमुक्षवो नैष्ठिकब्रह्मचार्यादयः इन्द्रियाणि श्रोत्रादीनि वागादीनि च संयमाग्निषु । संयमो नाम तत्तदिन्द्रियस्य तत्तद्विषयाद्विनिवर्त्य तत्तत्स्थाने निग्रहः । इन्द्रियाणां बहुत्वात्संयमा बहवस्त एवाग्नयस्तेषु संयमाग्निषु चक्षुरादीन्द्रियाहुतीर्जुह्वति । इन्द्रियनिग्रहरूपं यज्ञं कुर्वन्तीत्यर्थः । एतदन्ये गृहिणो मुमुक्षवः स्वधर्मनिष्ठाः शब्दादिविषयाननिषिद्धान् योग्यकाल एवेन्द्रियाग्निषु तन्निक्षेपणाधिकरणत्वादिन्द्रियाण्येवाग्नयस्तेषु जुह्वति । विषयानुभवनियम एव तेषां यज्ञ इत्यर्थः ॥ २६ ॥

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥

किंच **सर्वाणीति** । उक्तेभ्योऽपरे केचन यतयो ध्याननिष्ठा इन्द्रियकर्माणि ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च कर्माणि श्रवणदर्शनादीनि वचनादानादीनि च सर्वाणि, प्राणकर्माणि च प्राणस्यापानव्यानादिभेदभिन्नस्य कर्माण्युच्छ्वासनिश्वासनिमेषोन्मेषजृम्भणोद्गारादीनि कर्माणि सर्वाण्यपि ज्ञानदीपिते ज्ञानेनात्मविषयकेण दीपिते सम्यगवगमिते आत्मसंयमयोगाग्नौ स्वस्वरूपे आत्मनि संयमयोगो मनोनिरोधः समाधिः स एवाग्निस्तस्मिन् प्राणकर्माणीन्द्रियकर्माणि च जुह्वति । प्राणेन्द्रियव्यापारं निरुध्य सदात्मानमेवानुभवन्तीत्यर्थः ॥ २७ ॥

एतान्यपि मुमुक्षुभिः कर्तव्यानीति सूचयितुं पुनरपि यज्ञान्तराण्याह—

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥

द्रव्येति । उक्तेभ्योऽपरे केचन मुमुक्षवो द्रव्ययज्ञाः सत्पात्रेषु नियमेन श्रद्धया द्रव्यनिक्षेपणमयमेवास्माकं यज्ञ इति ये कुर्वन्ति ते द्रव्ययज्ञाः । केचन तपोयज्ञाः तपश्चान्द्रायणप्राजापत्याद्युपवासादिरूपं वा इदमेवास्माकं यज्ञ इति ये कुर्वन्ति ते तपोयज्ञाः । केचन योगयज्ञाः योग आसनप्राणायामादिभिः स्वाङ्गैर्युक्तो लक्ष्ये चित्तस्थैर्यलक्षण एव यज्ञो येषां ते योगयज्ञाः । तथा केचन स्वाध्यायज्ञानयज्ञाः । अन्ते श्रूयमाणो यज्ञशब्दः प्रत्येकं संबध्यते । तेन स्वाध्याययज्ञाः ज्ञानयज्ञा इति रूपद्वयम् । 'तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देशः' इति श्रुत्युक्तानध्यायद्वयं त्यक्त्वा सर्वदा वेदपारायणमेवास्माकं यज्ञ इत्यध्ययनविधिं नियमेन ये कुर्वन्ति ते स्वाध्याययज्ञाः । तथा केचन ज्ञानयज्ञाः ज्ञानं ज्ञानशास्त्रपरिशीलनमिदं नो यज्ञ इति सदा ये कुर्वन्ति ते ज्ञानयज्ञाः । एवं मोक्षार्थं यतयो यत्नशीलाः संशितव्रतास्तत्र तत्र स्वस्वनिष्ठायां संशितमतितीक्ष्णं व्रतं नियमो येषां ते संशितव्रता बहवः सन्तीति द्रव्यत्यागस्य तपसो योगस्य स्वाध्यायावृत्तेः शास्त्रपरिशीलनस्य च यज्ञत्वं सूचितं भवति ॥ २८ ॥

प्राणायामोऽपि मुमुक्षोः पापक्षयार्थिनो यज्ञ एव स कर्तव्य इति सूचयितुमाह—

अपाने जुह्वति प्राणं प्राणेऽपानं तथा परे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥

अपान इति । केचन मुमुक्षवः अपाने अपानवृत्तौ वायुप्रवेशनाड्यां प्राणं प्राणवृत्तिं जुह्वति । नासिकाद्वये तत्तत्कालं ज्ञात्वा पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः । तथा केचन प्राणे प्राणवृत्तौ वायुनिर्गमनाड्यामपानमपानवृत्तिं जुह्वति । रेचकमेव प्राणायामं कुर्वन्तीत्यर्थः । केचन प्राणापानगती रुद्ध्वा मुखनासिकाभ्यां बहिर्वायोर्गमनं प्राणस्य गतिस्ताभ्यां वायोरन्तः प्रवेशोऽपानगतिरेते प्राणापानगती रुद्ध्वा प्राणायामनिरताः केवलं कुम्भकाख्यं प्राणायामं कुर्वन्तीत्यर्थः । यद्वा अपरे केचन प्राणायामपरायणाः मुमुक्षवः प्राणापानयोर्गती मुखनासिकाभ्यां वायोर्निर्गमप्रवेशौ त्रिकूटे निरुध्य ततो हृदये प्राणेऽपानं तथाऽपाने प्राणं च जुह्वति । प्राणेनापानमपानेन प्राणं च योजयन्त्येकीकुर्वन्ति तेन सर्वनाडीषु स्थितं पापं सर्वं भस्मीभवतीत्यर्थः । प्राणेऽपानं जुह्वति पूरकं कुर्वन्ति । ततः प्राणापानगती रुद्ध्वा कुम्भकं कृत्वा तथाऽपाने प्राणं जुह्वति रेचकं कुर्वन्तीति वा योजना ॥ २९ ॥

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥

किंच—**अपर इति** । अपरे केचन मुमुक्षवः नियताहाराः स्वल्पाहाराः क्षीराद्यल्पाहारेणान्तर्वायूनां वशत्वसंपादनाय प्राणान्तरवायून् प्राणेषु तेषु वायुभेदेषु जुह्वति । बस्तिधौत्यादिक्रिययाऽन्तःशोधनं कुर्वन्तीत्यर्थः । एवं दैवादियज्ञान्नियमेन कुर्वतां तत्तद्यज्ञानुष्ठानस्य फलमाह—**सर्वेऽपीति** । यज्ञविदः यज्ञान् विदन्त्यनुतिष्ठन्तीति यज्ञविदो दैवादियज्ञानुष्ठायिन एते निरुक्ताः सर्वेऽपि यज्ञशिष्टामृतभुजः यज्ञानुष्ठानानन्तरभावित्वादेतेषामन्नं यज्ञशिष्टं यज्ञशिष्टत्वादेवामृतं तद्भुञ्जत इति यज्ञशिष्टामृतभुजः । यद्वा यज्ञानुष्ठानेन शिष्टो यज्ञशिष्टः नित्यत्वादमृतः कालः । भोजनसंबद्धत्वादमृतशब्देन काल उच्यते । यज्ञशिष्टो योऽमृतः कालस्तस्मिन् भुञ्जत इति यज्ञशिष्टामृतभुजः सन्तो यज्ञक्षपितकल्मषाः यज्ञैर्नियमेनानुष्ठितैः क्षपितं नाशितं कल्मषं येषां ते यज्ञक्षपितकल्मषाः । यज्ञानुष्ठाननिःशेषविनष्टज्ञानप्रतिबन्धका भूत्वा सकृदुपदेशेनैव सद्गुरोरात्मज्ञानं प्राप्य सनातनं नित्यं ब्रह्म सच्चिदानन्दैकरसं यान्ति । ज्ञानानुत्पत्तौ क्रमान्मुक्ता भवन्तीत्यभिप्रायः । उक्तेषु यज्ञेष्वन्यतरं यज्ञमकुर्वतो दुःशीलस्य दुर्भगस्यानुष्ठानफलमाह—**नायमिति** । अयज्ञस्य यस्य न विद्यते यज्ञेषूक्तेष्वेकोऽपि

यज्ञो मोक्षसाधनः सोऽयमयज्ञस्तस्य मोक्षधर्मशून्यस्य दुर्बुद्धेरयं लोकः लोक्यत इति लोको देहो मुक्तिसंपादनयोग्यो मानव एव नास्ति । इतोऽन्यो दैवो वा ब्राह्मो वा शैवो वा कुतः कस्माद्धेतोरधर्मनिष्ठस्यासाधारणकारणसाध्यः सिध्यतीति द्वयोरर्थः ॥ ३० ॥ ३१ ॥

त्वत्कल्पिता एवैते यज्ञा नतु शास्त्रीया इत्याशङ्कायाम् । न । ते वेदैकमूला इत्याह—

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥

एवमिति । 'दैवमेवापरे यज्ञम्' इत्येवमाद्या बहुविधा बहुप्रकारा निरुक्ता यज्ञाः सर्वे ब्रह्मणो वेदस्य मुखे मुखेनैव वितता विस्तृताः । प्रतिपादिता इत्यर्थः । ननु 'यज्ञविदो यान्ति ब्रह्म सनातनम्' इति यज्ञानामपि साक्षान्मोक्षसाधनत्वं प्रतीयते किं ज्ञानप्रयासेनेत्याशङ्कायां । न । तेषामपि कर्मत्वेन 'न कर्मणा न प्रजया' इत्यादिबहुश्रुतिविरोधान्न नित्यफलदातृत्वं किंत्वनित्यफलदत्वमिति सूचयितुमाह—**कर्मजानिति** । 'क्रियां कुर्वद्धि कारकम्' इति स्मरणात्कर्मभ्यः कर्मकारकेभ्यो जाताः कर्मजा वागादीन्द्रियसंभवास्तान् कर्मजान् कर्माण्येव तान् सर्वान् यज्ञान् विद्धि । नन्वपूर्वाः खलु यज्ञा वागादीन्द्रियव्यापारजा एवेति चेदपूर्वत्वे वा तेषां कर्मत्वं न व्यभिचरति । अतएवाऽनित्यफलदत्वमेवं ज्ञात्वा नित्यफलदं ज्ञानं प्राप्य संसारान्मोक्ष्यसे न त्वनित्यफलदान्यज्ञानित्यर्थः ॥ ३२ ॥

तत एव ज्ञानयज्ञं 'ब्रह्मार्पणम्' इत्यनेन मन्त्रेण वर्णितं दैवादिभ्यो यज्ञेभ्यो व्यवहितसाधनेभ्यः साक्षान्मोक्षैकसाधनत्वादुत्कर्षयति—

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

श्रेयानिति । द्रव्यमयात् द्रव्यमन्त्रतन्त्रक्रियाश्रमसाध्यादनित्याल्पस्वर्गादिफलहेतोर्यज्ञादुक्तात्सर्वयज्ञजातान्नित्यनिरन्तरानन्दरूपमोक्षैकफलदो ज्ञानयज्ञः श्रेयान् श्रेष्ठतरसंप्राप्तिः । यत्र ज्ञाने पुंसः कर्तव्यं श्रौतं स्मार्तं लौकिकं यच्च यावच्च तत्सर्वं कर्माखिलं खिलः शेषः स न विद्यते यत्र तदखिलं निःशेषं परिसमाप्यते समापितं भवति । वेलां प्राप्तस्य यथा गन्तव्यं नास्ति तथा ज्ञानं प्राप्तवतः कर्तव्यं किंचिन्नास्तीत्यर्थः । यद्वा यत्र ज्ञाने संप्राप्ते कर्म ब्रह्मकल्पशतार्जितं संचितमागामि च प्रवृत्तमप्रवृत्तं च सर्वमखिलं निरवशेषं परिसमाप्यते ज्ञानशक्त्या सूर्यप्रभया तम

इव कर्म सर्वं निर्मूल्यत इत्यर्थः। यद्वा 'यथा कृताय विजितायाधरेयाः संयन्ति' इत्येतच्छ्रुत्युक्तरीत्या लोके सर्वत्र पुण्यशरीरिभिर्यज्ञदानतपोव्रतादिरूपं यद्यत्पुण्यं क्रियते तत्सर्वं यस्मिन् ज्ञाने संप्राप्ते विदुषा परिसमाप्यते संप्राप्तं भवति। यत्प्राप्त्या सर्वकर्मणामनुष्ठाता विद्वान्भवतीत्यर्थः॥ ३३॥

एवं विशेषणविशिष्टं ज्ञानं कथं मे सिध्येदित्याकाङ्क्षायामाह—

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥ ३४॥

तद्विद्धीति। यत्तु द्रव्ययज्ञादिभ्यो विशिष्टतरं साक्षान्मोक्षैकफलप्रदं तज्ज्ञानं गुरुभ्यो विद्धि। गुरून् प्रसाद्य तेभ्यो विजानीहीत्यर्थः। केन प्रसन्ना भूत्वा गुरवोऽत्यन्तरहस्यमिदं ज्ञानं मह्यमुपदेक्ष्यन्तीत्याकाङ्क्षायामाह— **प्रणिपातेनेति।** प्रणिपातेन प्रणिपातः साष्टाङ्गनमस्कारस्तेन, सेवया काले काले श्रद्धाभक्तिभ्यां क्रियमाणशुश्रूषया च समये विनयेनोपसंगम्य क्रियमाणपरिप्रश्नेन 'कथं बन्धः कथं मोक्षो विद्याविद्ये उभे च के। क आत्मा कः परात्मा च तयोरैक्यं कथं वद॥' इत्यादिविवेकप्रश्नेन चैवं प्रणिपातशुश्रूषाविवेकप्रश्नैस्त्वयि श्रद्धां भक्तिं पाण्डित्यमुपदेशयोग्यतां च दृष्ट्वा प्रसन्ना भूत्वा। ज्ञानिनः शास्त्रजन्यज्ञानसंपत्तिमन्तः। तत्त्वदर्शिनः साक्षात्कारजन्यवस्तुयाथात्म्यवेदनवन्तश्चोक्तविशेषणद्वयविशिष्टैरुपदिष्टं ज्ञानं संसारनिवर्तकं भवति। अतो विशेषणद्वयेन भवितव्यं गुरोः। एवंलक्षणसंपन्ना गुरवस्ते तुभ्यं शमदमादिसाधनवते ज्ञानं ब्रह्मात्मैकत्वावगमकं निःशेषसंसारभ्रमापनोदकमुपदेक्ष्यन्ति। दययानुग्रहीष्यन्तीत्यर्थः। 'श्रोत्रियं ब्रह्मनिष्ठम्' इति श्रवणाज्ज्ञानिन इति तत्त्वबोधने गुरूणां सर्वशास्त्रार्थपरिज्ञानसंपत्तिं तत्त्वदर्शिन इति वस्तुविषयकाप्रतिबद्धानुभवसंपत्तिमपेक्ष्य विशेषणद्वयोपन्यासः। बहुवचनं तु 'बहुभ्यः श्रोतव्यं बहुधा' इति न्यायमनुसृत्य च सत्सु बहुषु गुरुष्वत्र कश्चिदेको ब्रह्मवित्तमो लभ्यते। ततः संसारभ्रमापनोदकं सम्यग् ज्ञानं सलक्षणं सेत्स्यतीत्यभिप्रायेण चोक्तं नतु बहुभ्यो ज्ञानं संपादनीयमिति। 'श्रोत्रियं ब्रह्मनिष्ठ'मित्येकवचनश्रवणात्। 'उपसीदेदेकमेव सद्गुरुं ब्रह्मवित्तमम्' इति वचनाच्च। तस्माच्छास्त्रज्ञं तत्त्वज्ञं च गुरुमाश्रयेदिति सिद्धम्॥ ३४॥

सद्गुरूपदेशेन लब्धज्ञानस्य फलमाह—

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥ ३५॥

यज्ज्ञात्वेति । प्रसन्नैर्ब्रह्मविद्भिरुपदिष्टं यज्ज्ञानं ज्ञात्वा तदेकनिष्ठया प्राप्य त्वमेवमिदानीं यथा, तथा पुनर्मोहम् 'अहं, एते मदीयाः' इत्यात्मन्यद्वितीयेऽप्यनेकत्वभ्रमं न यास्यसि। त्वमहमिदमद इत्यादि मिथ्याज्ञानं त्यक्ष्यसीत्यर्थः । ननु सति द्वैतज्ञानहेतौ भूतजाते कथमात्मनोऽद्वितीयत्वमित्यत आह—**येनेति** । 'आत्मैवेदं सर्वम्' इति सर्वस्य भूतजातस्यात्ममात्रत्वग्राहकेण येन सूक्ष्मबुद्ध्या समधिगतेन ज्ञानेन भूतानि ब्रह्मादिस्तम्बपर्यन्तान्यशेषेण अशेषाणि साक्षादहमेवेदं सर्वमिति स्वाभिन्नानि द्रक्ष्यसि घटकलशशरावादि सर्वं बुद्धिसौक्ष्म्येण मृन्मात्रं, चित्रं भित्तिमात्रं, तरङ्गफेनबुद्बुदादि जलमात्रं यथा, तथा भूतजातं सर्वं स्वमात्रमेव द्रष्टासीत्यर्थः । ननु तथापि ब्रह्मात्मा चेति भेदोऽस्त्येव कथमद्वैतसिद्धिरित्यत आह—**अथो मयीति** । तानि भूतानि मयि निर्विशेषे परे ब्रह्मण्यप्यथो समनन्तरमेव द्रक्ष्यसि च । एवं तव च मम च सर्वात्मकत्वं दृष्ट्वा द्वयोरप्येकत्वं द्रक्ष्यसीत्यर्थः । 'तत्त्वमसि' इति श्रुतेः । यद्वा सर्वभूतात्मकमात्मानं दृष्ट्वा तमात्मानं निर्विशेषं मयि सर्वाधिष्ठाने परे ब्रह्मणि द्रक्ष्यसि । ब्रह्माभिन्नमात्मानं द्रक्ष्यसीत्यर्थः ॥ ३५ ॥

एवंविधं ज्ञानं प्राप्यापि भीष्मद्रोणादिगुरुस्वजनवधजनितात्पापान्मुक्तो न स्यामेवेत्याशङ्कावन्तमर्जुनमालक्ष्याह—

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥

अपि चेदिति । महापातकोपपातकतत्समपापसंकरीकरणमलिनीकरणादीनि पापान्युक्तान्यनुक्तानि च सर्वाणि समस्तानि व्यस्तानि च ये कुर्वन्ति ते पापाः पापकारिणस्त्रिलोकस्था भूतभविष्यद्वर्तमानकालीना एतेभ्यः सर्वेभ्यः पापेभ्यः पापकारिभ्योऽपि यदि त्वं पापकृत्तमः, तैः सर्वैः कृतं पापं त्वयैकेनैव यदा कृतं भवति तदा त्वं पापकृत्तमो भवितासि । एवं पापकृत्तमोऽप्यसि चेत्सर्वं वृजिनार्णवं ज्ञानप्लवेन स्वस्य कूटस्थासङ्गचिद्रूपत्वेन विक्रियाऽसंभवान्नाहं कर्मणां कर्ता सदा निष्क्रिय एवास्मीति यदविक्रियत्वज्ञानं तदेव प्लवस्तरणिस्तेनैव संतरिष्यसि किमु वक्तव्यं भीष्मादिवधजं पापं तरिष्यसीति ॥ ३६ ॥

महामेरुं लङ्घयतो वालुकाकणलङ्घनवदपारपापार्णवं तरतस्तव भीष्मादिवधजपापपल्वलतरणमविचार्यमेव, अतो धर्माधर्मतत्कार्यमहार्णवं तर्तुमिच्छतो ज्ञानमेव संपादनीयं, तेनैव विद्वाञ्छतकोटिकल्पार्जितं सर्वं

पापं तरति। तथाच श्रुतिः—'नैनं पाप्मा तरति सर्वं पाप्मानं तरति' इति समुद्रतरणे नौकावज्ज्ञानं पापनिबर्हणे बहुकालं नापेक्षते किंतु क्षणेनैव सर्वं पापं विध्वंसयतीति सदृष्टान्तमुपपादयति—

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥ ३७॥

यथेति। समिद्धः क्षुद्रकाष्ठैः प्रज्वलनेन प्रवृद्धोऽग्निरेधांसि काष्ठानि क्षणेन भस्मसात्कुरुते यथा, तथा समिद्धो निरन्तरध्यानसमाधिभिः प्रवर्तितो ज्ञानाग्निर्ज्ञानमुक्तलक्षणं तदेवाग्निर्ज्ञानाग्निः। सर्वकर्माणि सर्वाणि पुण्यपापमिश्ररूपाणि कर्माणि। यद्वा प्रारब्धकर्मणो भोगैकनाश्यत्वात्तद्विना ज्ञानोत्पत्तेः पूर्वभावीनि पश्चाद्भावीनि च बहुजन्मसंचितानि चेत्थंरूपाणि सर्वाणि कर्माणि भस्मसात्करोति क्षणाद्भस्मीकरोति। यथा स्थाणुज्ञानं तत्स्वरूपावरकाज्ञाननिवर्तनेन सह चौरभूतादि भ्रमं विध्वंस्य भ्रमकार्यं च विध्वंसयति, तथा निष्क्रियब्रह्मात्मत्वज्ञानमपि तदावरकाज्ञाननिवर्तनेन सहैव विदुषस्तदुद्भावितकर्तृत्वभ्रमं विध्वंस्य तत्संभावितानि सर्वाणि कर्माणि च सद्यो निर्मूलयति। सर्वदा निष्क्रिय एवास्मीत्येवंविज्ञानवन्तं विद्वांसं करोति निष्क्रियब्रह्मात्मत्वविज्ञानमित्यर्थः। ननु ज्ञानस्य ज्ञाननिवृत्तिरेव कार्यमिति चेन्न। भ्रमादिनिवृत्तेरपि तत्कार्यत्वपर्यवसानादेकस्याः क्रियाया अनेककार्यकारित्वदर्शनात्। यथा ब्रह्मास्त्रपातस्य रावणवक्षश्छेदः प्राणनिर्गमो देहपातश्च कार्यं भवति तद्वत्। ननु कर्ममात्रस्याप्यज्ञानकार्यत्वे सिद्धे कारणनाशात्प्रारब्धस्यापि संचितादिवन्निवृत्तिः स्यादेवेति चेन्न। प्रवृत्तफलत्वात्तस्य निवृत्त्यनुपपत्तेः यथा भुक्तेः पूर्वभाविनः पश्चाद्भाविनोऽप्यन्नस्य त्याग उपपद्यते न तथा भुक्तान्नस्य प्रवृत्तफलत्वात्तथैवारब्धकर्मणोऽपि। ननु कार्यस्य सद्भावे कारणस्यापि सद्भावोऽङ्गीकर्तव्य इति चेन्न। कारणाभावेऽपि कार्याभासदर्शनात्तन्नियमाव्यवस्थितेः। जलबुद्धौ नष्टायामपि मरौ पुनर्जलाभासप्रतीतेः सत्यत्वबुद्ध्यभावेऽपि प्रतिच्छायादौ व्यवहारदर्शनात्तथा देहाद्यात्मत्वसत्यत्वममत्वबुद्ध्यभावेऽपि विदुषः कर्मतत्फलाभासोपपत्तेः। अतो युक्तं निष्क्रियब्रह्मात्मविज्ञानस्य समाधिनाऽप्रतिबद्धतां प्रापितस्याविद्यानिःशेषनिर्मूलकत्वम्। अन्यथा त्वयं घट इत्युक्तिमात्रे ब्रह्मावरकाज्ञानसद्भावप्रसङ्गस्तस्मात्सर्वमिदमहं च ब्रह्मैवेति विज्ञामज्ञानं सर्वं निर्मूलयत्येव सकार्यमिति सिद्धम्॥ ३७॥

ननु राजसूयाश्वमेधादिक्रतुभिः, दानैः कन्यादिभिः, कृच्छ्रचान्द्रायणादितपोभिश्च सर्वपापनिवृत्तिसंभवात्किं सर्वपरिग्रहत्यागमूलकशमदमादिसाधनपूर्वकसंन्यासाश्रमं संपाद्यात्मज्ञानेनेत्याशङ्कायां । न । औषधवद्युद्देशेन क्रियन्ते उक्ता राजसूयादयस्तस्यैवोद्दिष्टस्य पापस्य निवर्तका भवन्ति नतु सर्वेषां पापानां संचितागामिवर्तमानानामेकेषामनेकरूपाणां। तत्रापि पापस्यैव निवर्तका नतु बहुजन्मसंपादकपुण्यकर्मणाम्। इदं तु पापानां पुण्यानां मिश्राणां च कर्मणां संचितादीनां च सर्वेषां विध्वंसने परमकारणं पवित्रतमं ज्ञानमेव । नैवैतादृशमन्यदस्ति मुमुक्षोः प्रयत्नेन संपादनीयमिति सूचयितुमाह—

नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥

नहीति । हि यस्मात्कारणान्नानायोनिषु नानाविधजन्ममरणादिमहादुःखपरम्पराप्रापकाणि पुण्यपापमिश्रात्मकान्यनेककल्पशतसमार्जितान्यशेषाणि कर्माणि समूलमुन्मूलयत्यविक्रियात्मज्ञानम् । तस्माज्ज्ञानेन सदृशमुक्तधर्मैस्तुल्यमत्यन्तशुद्धिकरं परमपुरुषार्थसाधनतममिह लोके शास्त्रे च न विद्यते नास्ति । एतादृशं शुद्धिकारणं मुक्तिकारणमस्मिन् लोके लोकान्तरे च न संभवतीत्यर्थः । एतादृशं ज्ञानमनाद्यविद्यातत्कार्यविध्वंसकमधिकारी कृतश्रवणादिर्यतिः कालेन महता दीर्घेण योगसंसिद्धः योगेन ज्ञानयोगेन नित्यनिरन्तरसमाधिनिष्ठया तात्पर्येण कृतया संसिद्धः निःशेषविनष्टसर्वबाह्यवासनतासंसिद्धिस्तां प्राप्तः संसिद्धः सम्यङ्निर्मूलितसप्रतिबन्धः सन्स्वयमात्मनि स्वान्तःकरण एव विन्दति । सर्वमिदमहं च ब्रह्मैवेत्यप्रतिबद्धा ब्रह्ममयी वृत्तिर्बुद्धावेवोदेतीत्यर्थः ॥ ३८ ॥

एवं ज्ञानमाहात्म्यं तत्सिद्धिप्रकारं च प्रतिपाद्य ज्ञानयोगसिद्धेरन्तरङ्गसाधनान्याह—

श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ ३९ ॥

श्रद्धावानिति । श्रद्धावान् 'तत्त्वमसि' इति श्रुत्या ब्रह्मात्मैकत्वमुच्यते तदेव गुरुणोपदिश्यते । तत्र श्रुतिवाक्ये गुरूक्तौ च सत्यत्वबुद्धिः श्रद्धा 'अस्तीत्येवोपलब्धव्यः' इति श्रवणात् । तादृश्यव्यभिचारिणी श्रद्धा यस्यास्ति स श्रद्धावान् । मुमुक्षोरवश्यं श्रद्धावत्त्वेन भवितव्यं तदभावे न किंचिदस्त्यतः श्रद्धा प्रयत्नेन संपादनीयेत्यर्थः । श्रद्धावत्त्वेऽपि बहिर्मुखस्य

ज्ञानं न सिध्यत्यतस्तद्राहित्येन भवितव्यमित्याह—**संयतेन्द्रिय इति**। संयतानि तत्तद्विषयेष्वप्रवर्तितान्युभयेन्द्रियाणि येन सः। संयतेन्द्रियत्वं यतेर्धर्मत्वेन सदा भवितव्यं बहिःप्रवृत्तिशून्यस्यैव ज्ञानं सिध्यति सिद्धं च तेनैव रक्षितव्यं भवति नान्यथा तिष्ठतीत्यर्थः। एवं च श्रद्धावत्त्वसंयतेन्द्रियत्वयोः सिद्धयोः सतोरप्यन्तर्विषयान्ध्यायतो यतेर्ज्ञानं न सिध्यत्यतस्तद्राहित्येन भवितव्यमित्याह—**तत्पर इति**। सर्वदा तस्मिन्नेव वृत्तेरन्तर्बहिर्ब्रह्माकारत्वापादन एव पर आसक्तचित्तस्तत्परः। ब्रह्माकारवृत्तिपरत्वमेवासाधारणकारणं तेनैव विपरीतप्रत्ययाः सर्वे नश्यन्त्यनात्मवासनाश्च सर्वाः ज्ञानस्याप्रतिबद्धता च सिध्यत्यतस्तदेव संपादनीयं मोक्षैकार्थिन इत्येवं नियतविशेषणत्रयसंपन्नो यो यतिः स एव ब्रह्मैवाहमस्मीत्यप्रतिबद्धं ज्ञानं लभते नान्यः शतधा श्रुतश्रावितवेदान्तोऽपि विद्वानित्यर्थः। एवं श्रद्धावत्त्वसंयतेन्द्रियत्वतत्परत्वादिसाधनसंपत्त्या दैर्घकालिक्या नित्यनिरन्तरं ब्रह्मनिष्ठया निष्पन्नं जगतश्च स्वस्य च ब्रह्मात्मनैवोपलभ्यमानत्वापादकं ज्ञानं लब्ध्वा ब्रह्मविद्यतिरचिरेणैवोत्तरक्षण एव परां संशयविपरीतभावनादिनिर्मुक्तज्ञानावभासितत्वाद्वस्तुस्वाभाव्याच्चाविद्यातत्कार्याभासशून्यां निरतिशयसुखात्मिकां ब्रह्मात्मनावस्थानलक्षणां शान्तिं मुक्तिं विदेहात्मिकां गच्छति। प्राप्नोतीत्यर्थः॥ ३९॥

'ब्रह्मविदाप्नोति परं', 'ज्ञात्वा देवं मुच्यते सर्वपाशैः', 'ज्ञात्वा शिवं शान्तिमत्यन्तमेति', 'तमेव विदित्वाऽतिमृत्युमेति', 'य एतद्विदुरमृतास्ते भवन्ति', 'ये विदुर्यान्ति ते परं', 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' इति, 'ब्रह्मविन्मुक्तो भवति ज्ञानवत्त्वाद्वामदेवादिवत्' इत्यादिश्रुतिस्मृतियुक्तिशतप्रसिद्धेः सम्यग्ज्ञानान्मोक्ष इत्येतस्मिन्नर्थे ब्राह्मणेन मोक्षैककामेन अश्रद्धा वा संशयो वाप्यात्मज्ञानसंपादने प्रयत्नाभावो वा न कर्तव्यः कृतश्चेन्मोक्षो न लभ्यत इत्याह—

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः॥ ४०॥

अज्ञश्चेति। यस्तु सर्वाणि कर्माणि मोक्षार्थं संन्यस्य मोक्षकारणे श्रवणादौ तत्कारणे गुरुशुश्रूषाशमदमतितिक्षातत्परत्वादौ च प्रयत्नमकृत्वात्मज्ञानं न संपादयति स एवात्र मोक्षशास्त्रे अज्ञ इत्युच्यते। स च यस्य तु संन्यासे वेदान्तश्रवणादौ गुरौ च मोक्षे च ज्ञानान्मोक्ष इत्यस्मिन्नर्थे चाविश्वासो भवति सोऽश्रद्दधानः श्रद्धाशून्यश्च संशयात्मा च

'अपाम सोमममृता अभूम', 'दक्षिणावन्तो अमृतत्वं भजन्ते' इत्यादिवाक्यैः कर्मणो मुक्तिहेतुत्वं प्रतिपाद्यते । 'तरति शोकमात्मवित्', 'ज्ञानादेव तु कैवल्यम्', 'कर्मणा बध्यते जन्तुर्विद्यया तु विमुच्यते' इत्यादिश्रुतिस्मृतिवाक्यैर्ज्ञानेन मुक्तिरिति प्रतिपाद्यते । ततः कर्मणा वा ज्ञानेन वा मुक्तिरिति संशय आत्मनि चित्ते यस्य स संशयात्मा सम्यगधीतशास्त्रोऽपि यः संशयग्रहग्रस्तः स चापि विनश्यति ज्ञानफलाद्भ्रश्यति न कदापि मुक्तिं प्राप्नोतीत्यर्थः । एवं त्रयाणामपि ज्ञानशून्यानां मुक्त्यभावं प्रतिपाद्य तत्र दोषाधिक्यात्संशयालुं विशेषयति—**नायमिति** । संशयात्मनः पापिष्ठस्य मुक्तिरेव नास्तीति न किंतु भाविजन्मन्ययं लोको मानुषोऽपि नास्ति, न परः स्वर्गोऽपि च नास्ति, पुंसः संशय एव महापापसमुद्भवः सर्वानर्थस्य च बीजम्, तत इदमवश्यं कर्तव्यमनेन तरिष्यामीति कर्मणि वैदिके सर्वत्र च श्रद्धाया असंभवात् श्रद्धावैधुर्येण कृतानां कर्मणां स्वफलदानसामर्थ्यासंभवात्तत्तल्लोकप्राप्त्यभावोपपत्तेः । नच विषयसुखमप्यस्ति तादृशस्य त्वाहारादावपि संशयसंभवात्ततः संशयात्मा नरलोकपरलोकयोस्तत्सुखस्य च दूरीभवतीत्यर्थः । एतेन मुमुक्षोर्यतेः प्रयत्नेनात्मज्ञत्वं संन्यासगुरुवेदान्तश्रवणादिषु श्रद्धावत्त्वं सर्वत्र निःसंशयवत्त्वं च संपादनीयमिति सूचितं भवति ॥ ४० ॥

तर्ह्येवमनर्थहेतोः संशयस्य निःशेषनिवृत्तिः कथं सिध्यतीत्याकाङ्क्षायां श्रुतियुक्तिसमुत्पन्नब्रह्मात्मैकत्वविज्ञानेनैव तस्य विच्छित्तिर्नान्यथेति सूचयितुं परावरैकत्वविज्ञानविच्छिन्नसर्वसंशयत्वादेव ब्रह्मवित्कर्मभिर्न निबध्यत इति प्रतिपादयति—

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥ ४१ ॥

योगेति । ज्ञानसंछिन्नसंशयं ज्ञानं परावरयोरखण्डैकरसत्वसंदर्शनलक्षणं तेन ज्ञानेन निरन्तरसमाधिनिष्पन्नाप्रतिबद्धभावेन संछिन्ना निःशेषं निर्मूलिताः संशयाः मोक्षः कर्मणा वा ज्ञानेन वा, ज्ञानं च परोक्षं वाऽपरोक्षं वा, मोक्षो ज्ञानेन सिध्यति वा नवेत्येवमादयः सर्वे यस्य तं ज्ञानसंछिन्नसंशयमत एव योगसंन्यस्तकर्माणं 'सर्वमिदमहं च ब्रह्मैव' इति सर्वस्य जगतः स्वस्य च ब्रह्ममात्रत्वदर्शनं योगस्तेन संन्यस्तानि विश्लेषितानि, सम्यङ्नितरामस्तानि ब्रह्मणि ब्रह्मात्मना लयं गतानीति वा कर्माणि संचितान्यागामीनि च सर्वाणि यस्य तं योगसंन्यस्तकर्माण-

मात्मवन्तमप्रमत्तम् । यद्वात्मैव वहिरन्तः सर्वत्र वृत्तेर्विषयत्वेनास्यास्ति नान्यदित्यात्मवान् तमात्मवन्तं ब्रह्मविदं कर्माणि स्वप्नवदाभासरूपाणि शरीरयात्रामात्रैकप्रयोजनानि देहचेष्टारूपाणि योगाग्निनिर्दग्धत्वान्निर्वीर्याणि न निबध्नन्ति बन्धाय न कल्पन्ते । शुक्तिदृष्ट्या रजतप्रत्ययवद्ब्रह्मदृष्ट्या विनश्यन्तीत्यर्थः । एतेन ब्रह्मविदां यतीनां योगेनैव सर्वकर्मसंन्यासः कर्तव्यः कर्मणामबन्धकत्वायेति सूचितं भवति ॥ ४१ ॥

यथा ब्रह्मवित्तमो ज्ञानसंछिन्नसंशयत्वाद्योगसंन्यस्तसर्वकर्मा सन् कर्मबन्धनिर्मुक्तस्तथा त्वमपि ज्ञानसंछिन्नसंशयो भूत्वा योगसंन्यस्तकर्मा सन् कर्मनिष्ठो भवेत्याह—

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां चतुर्थोऽध्यायः ॥ ४ ॥

तस्मादिति । यस्मात्संशयवान् तद्दोषेणैव कर्मज्ञानयोगयोरन्यतरप्रवृत्त्यनुपपत्त्या स्वयमुभयभ्रष्टो भवति तस्मात् हे भारत, त्वमज्ञानसंभूतं स्वस्याविक्रियब्रह्मात्मत्वादर्शनलक्षणं यदज्ञानं तस्मादेव संभूतमात्मनः स्वस्य हृत्स्थं चित्तगतं संशयं मोक्षसाधनं ज्ञानं वाऽन्यद्वा, ज्ञानं च परोक्षं वाऽपरोक्षं वा, ज्ञानेनाविद्यातत्कार्याणां निःशेषनिवृत्तिरस्ति वा नवेत्यादिलक्षणं संदेहं ज्ञानासिना ज्ञानं ब्रह्मैवाहमिति स्वस्य निर्विकारेऽद्वितीये परे ब्रह्मण्येवात्मप्रत्ययोऽप्रतिबद्धस्तदेवासिस्तेनैवं निरुक्तलक्षणं संशयमात्मनाशकं छित्त्वोत्तिष्ठ व्युत्थाय योगं कर्मयोगमातिष्ठ समाचर । युध्यस्वेत्यर्थः ॥ ४२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतावाक्यतात्पर्यबोधिन्यां चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ।

'कर्मण्यकर्म यः पश्येत्' इत्यारभ्य कर्मसंन्यासमुपक्रम्य 'ज्ञानाग्निदग्धकर्माणं', 'शारीरं केवलं कर्म', 'यदृच्छालाभसंतुष्टः', 'सर्वं कर्माखिलं पार्थ', 'ज्ञानाग्निः सर्वकर्माणि', 'योगसंन्यस्तकर्माणम्' इत्येतैर्वाक्यैर्ब्रह्मविदो ब्रह्मनिष्ठस्य कर्तव्यः कर्मसंन्यास एवेति प्रतिपाद्येदानीं कर्मसंन्यासकर्मयोगयोरेकदैकपुरुषाननुष्ठेयत्वमुभयोरव्यवहितव्यवहितसाधनभावेनैकार्थोपयोगित्वं, फलैकत्वेऽपि तयोः साध्यसाधनभावेन पूर्वापरभावित्वं कर्म-

साधनसाध्ये ज्ञाने संप्राप्ते ब्रह्मविदः कर्तव्यः सर्वकर्मसंन्यास एवेत्याद्यर्थनिरूपणाय पञ्चमाध्याय आरभ्यते । तत्रादौ 'लोकसंग्रहमेवापि' इति विदुषो लोकहितार्थं कर्म कर्तव्यमिति कर्मयोगमुपक्रम्योपक्रान्ते 'वर्त एव च कर्मणि' इति तत्र स्वदृष्टान्तं विधाय, 'गुणा गुणेषु वर्तन्ते' इति न्यायेनानुष्ठातव्यमित्यनुष्ठानप्रयिक्रां सूचयित्वा, एवं 'पूर्वैः पूर्वतरं कृतम्' इति तस्य शिष्टाभ्युपगतत्वं दर्शयित्वा, तस्मिन्नेव कर्मयोगे 'कुरु कर्मैव तस्मात्त्वम्' इति 'योगमातिष्ठोत्तिष्ठ' इति संन्यासेन सहोपदिष्टे सति, कर्मसंन्यासकर्मानुष्ठानयोरुभयोर्युगपत्कर्तव्यत्वेन प्राप्तयोश्चक्षुरुन्मीलननिमीलनवदन्योन्यविरोधादेकेनैकदा कर्तुमशक्यत्वाद्द्वयोरन्यतरस्य कर्तव्यत्वे प्राप्ते, तयोर्यच्छ्रेष्ठतरं पुमर्थसाधकं तज्ज्ञात्वैकं कर्तुं शक्यत इति तदन्यतरश्रेष्ठत्वजिज्ञासयार्जुन उवाच । नन्वत्र एतयोः कर्मसंन्यासकर्मयोगयोर्यच्छ्रेष्ठतरं तन्मे ब्रूहीत्यर्जुनस्य प्रश्नः किं विद्वत्कर्तृककर्मसंन्यासकर्मयोगयोर्वा, किमविद्वत्कर्तृककर्मसंन्यासकर्मयोगयोर्वा, उत विद्वदविद्वत्कर्तृकसंन्यासकर्मयोगयोर्वेति चेदुच्यते । नाद्यः । निरन्तरसमाधिसमुत्पन्नसम्यग्ज्ञानेन ब्रह्मैवाहमिति निष्क्रिये परे ब्रह्मण्येवात्मभावमुपेत्य सदा तदात्मनैव तिष्ठतो ब्रह्मविदस्तद्विपरीतात्माज्ञानमूलकानात्मतादात्म्यासंभवादहंकारैककारणकः कर्मयोगो न कथंचन सिध्यति, स्वविरोधिनि सम्यग्ज्ञाने विजृम्भमाणे सत्यर्के तमस इवाज्ञानस्य स्थित्यनुपपत्तौ विदुषोऽनात्मतादात्म्यं न संभवत्येव, तदसंभवे तत्कारणकाहंकारासंभवात्तदेकनिबन्धनः कर्मयोगः स्वप्नेऽपि संभावयितुं न शक्यते । नहि जाग्रतः स्वप्नार्थसंबन्धवद्ब्रह्मविद्यायामेव जाग्रतो ब्रह्मविदोऽनात्मतादात्म्यतत्कार्यसबन्धः संभवति । तत्सत्त्वे कृतकृत्यताभावप्रसङ्गात्तद्ब्रह्माहमस्मीति कृतकृत्यो भवति । नैवास्ति किंचित्कर्तव्यमित्यादिश्रुतिस्मृत्यप्रामाण्यप्रसङ्गात्प्रत्यक्षविरोधाच्च वक्रकोटरत्वादिधर्मसंदर्शिनः स्थाणौ पुनश्चोरत्वबुद्धिः पलायनं च न संभवति यथा, तथा ब्रह्मैवात्मानं विजानतस्तदानन्दमनुभवतः सर्वं ब्रह्मैव पश्यतो ब्रह्मविदोऽनात्मतादात्म्यापत्तिः कर्तृत्वबुद्धिः कामना च कर्मणि प्रवृत्तिश्च न संभवत्येवाऽतो विद्वत्कर्तृककर्मसंन्यासकर्मयोगविषयो न भवति । नापि तृतीयः । विद्वत्ताविद्वत्तयोः परस्परविरोधिन्योरेकाधिकरणत्वानुपपत्तौ प्रश्नासंभवात् परिशेषादविद्वत्कर्तृकयोरेव कर्मसंन्यासकर्मयोगयोर्द्वयोरेकदैव कर्तव्यत्वप्रसक्तावप्युभयोः परस्परविरुद्धत्वेन सह प्रयोगायोगात्तयोरन्यतरस्य प्रशस्यतरत्वे सिद्धे तत्रैको मुमुक्षुणा कर्तुं शक्यत इति तयोरेकस्य श्रेष्ठत्वजिज्ञासुरर्जुनः पृच्छति—

अर्जुन उवाच ।

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

संन्यासमिति । सदानन्दरूपत्वात्परमात्मा कृष्ण इत्युच्यते तस्य संबुद्धिर्हे कृष्ण, पूर्वोक्तैर्वचनैः संन्यासं विध्युक्तानामवश्यमनुष्ठेयानां कर्मणां त्यागं शंससि कथयसि । पुनर्भूयोऽपि 'कुरु कर्मैव तस्मात्त्वम्' इति 'योगमातिष्ठ' इति च कर्मयोगमपि शंससि । क्रिययाप्यधिकारितः साधनसंपत्त्या चाश्रमेण च परस्परविरुद्धौ संन्यासकर्मयोगावेकेनैकदा कर्तुमशक्यौ मह्यं तत्कर्तव्यत्वेन विधत्से । ममात्र संशयः—कर्तव्यः कर्मयोगो वा संन्यासो वेति द्वयोरप्याश्रमादिभेदेन विरुद्धत्वादेकेनैकदा कर्तुमशक्यत्वात्तयोर्यच्छ्रेयःसाधनं भवति तदेव कर्तव्यं नतु द्वयमिति भाति । अत एतयोर्यदेकं प्रशस्यतरं मोक्षसाधनत्वेन भवता सुनिश्चितं तदेव मे ब्रूहीत्यर्थः ॥ १ ॥

एवं कर्मसंन्यासकर्मयोगयोरेकेनैकदाननुष्ठेयत्वे सिद्धे तयोरन्यतरस्य ज्यायस्त्वनिर्णयाय 'देशकालवयोवस्थाबुद्धिशक्त्यनुरूपतः । धर्मोपदेशो भैषज्यं वक्तव्यं धर्मपारगैः' इति न्यायेनाधिकार्यनुरूपमुत्तरं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ २ ॥

संन्यास इति । ब्रह्मणि नितरामासः संन्यासः बाह्यप्रवणताराहित्येन चित्तस्य ब्रह्मणि ब्रह्मात्मनावस्थानलक्षणो निर्विकल्पकसमाधिः, प्रत्यग्दृष्ट्याऽनात्मप्रत्ययनिरासः संन्यासः सविकल्पकसमाधिः । द्वावप्येतौ संन्यासौ प्रधानौ, एतयोः श्रवणमननयोश्चाङ्गभूतस्तत्प्रतिकूलानां सर्वेषां च कर्मणां परित्यागलक्षणः संन्यास इत्येवं संन्यासशब्दार्थस्त्रेधा भिद्यते । अत्र प्रधानभूतौ संन्यासौ न विवक्षितौ किंत्वङ्गभूत एव सर्वकर्मसंन्यासः श्रवणादिजन्यज्ञानद्वारा मोक्षहेतुः, यस्त्वविद्वत्कर्तृकः सच स्वानुष्ठानप्राप्तश्चित्तशुद्धिजन्यज्ञानद्वारा मोक्षहेतुः, यस्त्वविद्वत्कर्तृकः कर्मयोगः सच तावुभावपि निःश्रेयसकरौ यद्यपि मोक्षस्य साधने एव भवतस्तथाप्यविदुषः समकाले कर्तव्यत्वेन प्राप्तयोस्तयोस्तु गुणदोषविचारे क्रियमाणे सदसद्विवेकजन्यतीव्रवैराग्यतीव्रमोक्षेच्छायमनियमशमदमाद्यन्तरङ्ग-

साधनपौष्कल्यशून्यात्केवलप्रैषमात्रोच्चारणरूपात्संन्यासात् कर्मयोगः श्रद्धया समनुष्ठीयमानो विशिष्यते स्वानुष्ठानभवैर्गुणैर्विशेषत्वाय कल्पते । श्रौतस्मार्तादिलक्षणं कर्मैव परमेश्वरप्रीत्यै श्रद्धया समनुतिष्ठतोऽविदुष ऋणत्रयनिवृत्तिस्तज्जन्य इन्द्रादिदेवताप्रसाद ईश्वरप्रसादे इन्द्रियप्रसादस्ततश्चित्तशुद्धिरेवमादिज्ञानसाधनसंपत्तिः सिध्यति, अस्माद्धेतोः कर्मयोग उक्तलक्षणात्संन्यासाद्विशिष्टतरो भवति, अतः साधनशून्येनाऽविदुषा सहसा संन्यासो न कर्तव्यः कर्मैवेश्वरार्पणबुद्ध्या सम्यक्कर्तव्यमिति सिद्धम् । ननु 'न्यासमेषां तपसामतिरिक्तमाहुः' इति संन्यासस्यैवोत्कृष्टत्वं श्रूयते, ततो भगवतः संन्यासन्यक्कारपूर्वकं कर्मयोगस्योत्कृष्टत्ववर्णनमयुक्तमिति चेन्न । सर्वलोकानुग्रहहेतुत्वाद्भगवत्प्रवृत्तेः पूर्वं 'न जायते म्रियते वा' इत्यादिवाक्यैरमूढानात्मतत्त्वं तत्साधनं सर्वकर्मसंन्यासं चोपदिश्य, इदानीं स्वीयां विद्यां प्रज्ञां प्रकृतिं च परपारगमनशक्तिं चाविज्ञायाऽज्ञानात्कुतश्चिन्निमित्तात्सहसा संन्यस्य मूढाः पतिष्यन्तीति तानुद्धर्तुमत्राऽप्रकृतमपि प्रकृत्य कर्मयोगं तेषां कर्मण्येव प्रवृत्तिसिद्धये कर्मयोगं स्तौति 'कर्मयोगो विशिष्यते' इति नतु संन्यासं निराकरोति । संन्यासस्य स्वरूपत्वात्सर्वोत्तमत्वाच्च । 'न्यास इति ब्रह्मा ब्रह्मा हि पर इति न्यास एवात्यरेचयत्' इति संन्यासस्यैव ब्रह्मत्वसर्वश्रेष्ठतमत्वश्रवणात्ततः कर्मयोगस्तुतिपरमेवैतद्वचनमिति निश्चेतव्यम् ॥ २ ॥

तत एव कर्मयोगिनं स्तौति—

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ३ ॥

ज्ञेय इति । यस्त्वकुशलं कर्म न द्वेष्टि तत्राप्रीतिं न करोति किंतु कुशलमकुशलमपि कर्मैवेति बुद्ध्या करोति । यद्वा न द्वेष्टि द्वेषोऽप्रीतिस्तां यस्मैकस्मैचिदपि प्राणिने न करोति न काङ्क्षति यत्किंचिदपि कर्मजं फलं न काङ्क्षति । यद्वा प्राप्तस्यानर्थस्य निवृत्तिमप्राप्तस्यार्थस्य प्राप्तिं न काङ्क्षति । निर्द्वन्द्वः द्वन्द्वानि शीतोष्णसुखदुःखलाभालाभादीनि तेभ्यः समबुद्ध्या निर्गतो निर्द्वन्द्वो य एवंलक्षणः स एव नित्यसंन्यासी नित्यं संन्यासोऽस्यैवेति पण्डितैर्ज्ञेयो ज्ञातव्यः । हि यस्माद्रागादिदोषरहितः परिपक्वचित्तः समबुद्ध्यादिगुणयुक्तस्तस्मादयं गृही कर्मनिष्ठोऽपि सुखं परिग्रहत्यागशीतवाताद्युपद्रवभिक्षाटनादिदुःखराहित्यं यथा तथाऽनायासेन बन्धात्संसारात्प्रमुच्यते । यथोक्तकर्मानुष्ठानेन चित्तशुद्धिं ज्ञानं च प्राप्य कालान्तरे

मुक्तो भवति नत्वपक्वचित्तो यतिरपीत्यर्थः । एतेन कर्मोपासनाभ्यां परिपक्वचित्तस्यैव संन्यासाधिकार इति सूचितं भवति ॥ ३ ॥

ननु 'कर्मणा पितृलोकः' इति कर्मिणां पितृलोकप्राप्तिः श्रूयते, कथं कर्मिणः 'सुखं बन्धात्प्रमुच्यते' इति कर्मफलं भवबन्धमोक्षणं शास्त्रविरुद्धमुच्यत इत्याशङ्कायां न कामिनामेव कर्मफलं पित्रादिलोको नतु निष्कामाणामतिविरुद्धफलवादिमतन्यक्कारपूर्वकं संन्यासकर्मयोगयोः फलमेकमेवेति निश्चित्य तयोरेकस्याश्रवणेनोभयोर्यत्फलं तदाप्नोतीत्याह—

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥ ४ ॥

सांख्ययोगाविति । बाला वेदान्तशास्त्रार्थरहस्याऽवेदिनः केचिद्विद्वांसः सांख्ययोगौ सांख्यं सर्ववेदान्तैः सम्यक्तत्परत्वेन ख्यायते प्रतिपाद्यत इति सांख्यं परं ब्रह्म तत्प्राप्तेः परमकारणत्वात्सांख्यं, ज्ञाननिष्ठाङ्गभूतः संन्यासयोगः कर्मयोगस्तावुभौ सांख्ययोगौ क्रिययाधिकारितया आश्रमेण च पृथग्यथाभिन्नौ तथा फलेनापि भिन्नाविति साधनतः फलतश्च भेदं वदन्ति । 'कर्मणा पितृलोकः', 'स्वर्गं वा एते लोकं यन्ति' इत्यादिवाक्यैः 'संन्यासयोगाद्यतयः शुद्धसत्त्वाः', 'नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति' इत्यादिवाक्यैश्च संन्यासकर्मयोगयोः साधनभेदं फलभेदं च प्रतिपादयन्तीत्यर्थः । श्रुतिस्मृतिप्रामाण्यात्तयोः फलपार्थक्यं युक्तमेवेत्यत आह—**नेति** । पण्डिता वेदान्तशास्त्रपारगास्तद्रहस्यवेदिनो ब्रह्मविदस्तु तयोः फलमेकमेव वदन्ति तत्कथमिति चेदुच्यते—तत्त्वमस्यादिवाक्यानि पुंसश्चित्तशुद्ध्यभावे ब्रह्मतत्त्वं बोधयितुं न शक्नुवन्ति । चित्तशुद्धिश्च कर्मोपासनाभ्यां विना न सिध्यति, कर्मोपासनयोः प्रवृत्तिश्च कर्मेश्वरयोर्महत्त्वस्तुतिं विना न सिध्यत्यतः श्रुतैरेवार्थवादवाक्यैः 'पश्यति पुत्रम्' इत्यादिभिः 'एष सर्वेश्वर एष सर्वज्ञः' इत्यादिवाक्यैश्च कर्मेश्वरयोर्महत्त्वे प्रतिपाद्यमाने फलानुषक्त्या कर्मण्युपास्तौ च प्रवृत्तस्य ताभ्यां शुद्धात्मन एवोपदिष्टं तत्त्वज्ञानं फलति, अतो ज्ञानसिद्धेः कारणं चित्तशुद्धिस्तत्कारणं कर्मैवेत्यतः । कर्मणो मोक्ष एव फलं ज्ञानसाधनत्वात्संन्यासस्यापि 'विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति श्रवणादविद्यया मृत्युं ज्ञानप्रतिबन्धमतीत्य ज्ञानेनामृतं मोक्षमश्नुत इति ज्ञानकर्मयोगयोर्ज्ञानसंन्यासयोश्च साध्यसाधनभावावगमात् ज्ञानफलं तत्फलमेवेति सांख्ययोगयोरेकमेव फलं मोक्ष इति पण्डिताः

मन्यन्ते । तस्मात्कारकादेरेव भेदो न तु तयोः फलतो भेद इति सिद्धं यतस्ततः सांख्ययोगयोरेकमपि । अपिशब्दो वार्थः । उभयोर्मध्ये सांख्यं वा कर्मयोगं वा सम्यगास्थितः समनुतिष्ठन् मुमुक्षुरुभयोरपि फलं मोक्षाख्यं विन्दते प्राप्नोतीति सांख्यकर्मयोगयोर्मोक्षं प्रत्यन्तरङ्गबहिरङ्गभावेन कालतोऽप्यल्पत्वानल्पत्वाभ्यां च साध्यसाधनभावेनाप्युभयोस्तरतमभावे विद्यमानेऽपि राजाश्वयोरिव तयोः समत्वप्रतिपादनमनधिकारिणा कर्मैव कर्तव्यं न तु संन्यास इति सूचनार्थम् ॥ ४ ॥

यदुक्तं सांख्ययोगयोरेकफलत्वं पुनस्तदेव विस्पष्टयन् तदेकत्वदर्शिनं स्तौति—

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥

यदिति । सांख्यं परं ब्रह्म तदात्मत्वेन ये विदुस्ते सांख्यास्तैः सांख्यैर्ब्रह्मनिष्ठैर्यतिभिर्यत्स्थानं सदैकरूपेणैव तिष्ठति न क्वचित्किंचिदपि विकरोतीति स्थानं स्वरूपं केवलभावात्मकं प्राप्यते स्वात्मनावगम्यते । योगैः फलाभिसंधिवर्जितमीश्वरप्रीत्यै क्रियमाणं वैदिकं कर्म मोक्षोपायत्वाद्योग इत्युच्यते, स योगो येषामस्ति ते योगाः । मतुबर्थेऽच्प्रत्ययोऽत्र द्रष्टव्यः । तैर्योगैः कर्मनिष्ठैरपि तदेव स्थानं मोक्षाख्यं गम्यते । निरन्तरं श्रद्धया समनुष्ठीयमानकर्मसंभावितचित्तशुद्धिजन्यज्ञानतद्योगप्राप्त्या तैरपि स्वात्मत्वेनावगन्तुं शक्यत इत्यर्थः । 'एष पन्था एतत्कर्मैतद्ब्रह्म' इति श्रवणाद्यतः सांख्ययोगयोः फलैकत्वं प्रमाणसिद्धं ततः सांख्यं ज्ञानयोगं योगं कर्मयोगं चैकं यः पश्यति द्वयोरप्येकस्यैव मोक्षस्य फलत्वान्मोक्षसाधनयोस्तयोरप्येकत्वमेकार्थकत्वं यः पश्यति स पश्यति । स एव सम्यग्दर्शी न त्वन्य इत्यर्थः ॥ ५ ॥

यस्मात् संन्यासकर्मयोगयोर्मोक्षैकफलकत्वं प्रदर्शितन्यायेन सिद्धं तस्मादपक्वान्तःकरणेन मोक्षार्थिना कर्मैव कर्तव्यं नतु संन्यासः, अपक्वान्तरात्मनः संन्यासो दुर्घट इत्युपदिशन् कर्मणा मृदितकषायस्य तु कर्तव्यत्वेन संन्यासमुपदिशति—

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥ ६ ॥

संन्यास इति । अयोगतस्त्वयोगे कर्मयोगानुष्ठानजन्यचित्तशुद्ध्यभावे संन्यासो ज्ञाननिष्ठालक्षण आप्तुमधिगन्तुं दुःखं दुर्घटम् । चित्त-

शुद्ध्येकसाध्यत्वात् ज्ञाननिष्ठालक्षणसंन्यासस्य 'कारणाभावे कार्याभावः' इति न्यायेन कर्मसंभावितचित्तशुद्ध्यभावे संन्यासो न सिध्यतीत्यर्थः । एवं संन्यासस्य कर्मयोगानुष्ठानसंभावितचित्तप्रसादैकलभ्यत्वं निश्चित्य इदानीं कर्मयोगेन सुपक्कान्तःकरणस्य तु मुमुक्षोः संन्यासः कर्तव्य इत्याशयेनाह—**योगेति** । योगयुक्तः योगेन योगानुष्ठानसंभूतचित्तप्रसादेन युक्तः संयुक्तः स्वयं मुनिर्गृही ब्रह्म । ब्रह्मशब्देनात्र संन्यास-उच्यते। 'न्यास इति ब्रह्मा ब्रह्मा हि परः' इति श्रवणाद्ब्रह्मस्वरूपेणावस्थानलक्षणं प्रधानसंन्यासं परिपक्कान्तःकरणत्वान्मुमुक्षुरधिकारी नचिरेण शीघ्रमेवाधिगच्छति प्राप्नोतीत्यर्थः । यद्वा योगयुक्तः योगसंभावितचित्तशुद्धियुक्तः स्वयं मुमुक्षुश्चित्तप्रसादमहिम्नैव मुनिः संन्यासी निरुक्तलक्षणसंन्यासवान् भूत्वा तन्निष्ठया नचिरेण क्षिप्रमेव ब्रह्माधिगच्छति । ब्रह्मैवाहमित्यप्रतिबद्धवृत्त्या स्वं ब्रह्मैव विजानातीत्यर्थः । एतेनापक्कान्तःकरणस्य कृतेऽपि कर्मसंन्यासे मुख्यसंन्यासो न सिध्यति, परिपक्कान्तःकरणस्य तु बाह्योऽप्यबाह्यश्च संन्यासः सिध्यति तत्फलमपि सिध्यति सर्वात्मतापत्तिरिति सूचितं भवति ॥ ६ ॥

यः कर्मानुष्ठानसंप्राप्तचित्तशुद्धिर्जितेन्द्रियः सर्वात्मभावापन्नो ब्रह्मवित्तमः स शारीरं कर्म यत्किंचित्कुर्वन्नपि न लिप्यत इत्याह—

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥

योगयुक्त इति । योगयुक्तः योगेन कर्मयोगेन युक्तः । चिरमनुष्ठितकर्मयोग इत्यर्थः । यद्वा मुनिर्ब्रह्माधिगच्छतीति मुख्यसंन्यासाधिगमस्योक्तत्वाद्योगयुक्तः योगेन संन्यासयोगेन ब्रह्मनिष्ठालक्षणेन युक्तः । चिरमनुष्ठितसमाधियोग इत्यर्थः । तत एव विशुद्धात्मा जितेन्द्रियश्च विशुद्धः रागद्वेषादिदोषैर्निःशेषवियुक्त आत्मा मनो यस्य स विशुद्धात्मा । तत एव जितेन्द्रियः जितानि विषयग्रहणवैमुख्यं प्रापितान्युभयेन्द्रियाणि येन स जितेन्द्रियः । विशुद्धात्मत्वं जितेन्द्रियत्वं च चिरकालसमनुष्ठितसमाध्येकलभ्यमत एव विजितात्मा 'आत्मा यत्नधृतिस्वान्तस्वभावपरमात्मसु' इत्यभिधानाद्विजितो निर्जितो निर्यापित आत्मा स्वभावो बाह्यवासनालक्षणो येन स विजितात्मा । समाधिनिर्मूलितानात्मवासन इत्यर्थः । तत एव सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादिस्तम्बान्तानां भूतानां प्राणिनामात्मभूतः स्वरूपभूतः आत्मा प्रत्यग्लक्षणः

स्वात्मा यस्य स सर्वभूतात्मभूतात्मा 'प्राणो ह्येष सर्वभूतैर्विभाति', 'अहमेवेदं सर्वम्' इत्यादिश्रुत्यार्थानुभूत्या स्वानुभूत्या च सर्वात्मतामापन्नो यो ब्रह्मवित्तमः स शरीरयात्रार्थं यत्किंचिद्वैधमवैधं वा कर्म कुर्वन्नपि तेन कर्मणा पुण्येनापुण्येन वा न लिप्यते। कर्मण्यकर्मत्वदृष्ट्या न श्लिष्यत इत्यर्थः। ननु लोकसंग्रहमित्यादिशास्त्रेण कर्तव्यतया प्राप्तानां शास्त्रीयाणामेव कर्मणाममुष्य कर्तव्यत्वे शरीरयात्रार्थं कर्मेति शास्त्रविरुद्धमुच्यत इति चेन्न। ब्रह्मविदः कर्मानुपपत्तेः ब्रह्मैवाहमिति स्वस्याविक्रियब्रह्मात्मत्वविज्ञानेन निःशेषविनष्टमिथ्याज्ञानत्वात् तद्विपरीतज्ञानैकनिबन्धनस्य कर्मयोगस्यासंभवात्सम्यग्ज्ञानस्य मिथ्याज्ञानतत्कार्यविरोधात्। नह्यधिष्ठानज्ञाने सति तद्विपर्ययज्ञानं तत्कार्यं च संभावयितुं शक्यम्। स्थाणुज्ञाने चोरज्ञानतत्कार्यादर्शनात्कूटस्थासङ्गचिद्रूपमेवात्मानमप्रतिहतवृत्त्या पश्यतो विदुषस्त्वनात्मतादात्म्यानुपपत्तौ तदात्मत्वाभिनिवेशनिष्पाद्यः कर्मयोगः स्वप्नेऽपि न संभवति। विधिविधानादेः सर्वस्य दृश्यस्य मिथ्यात्वमेव पश्यतो विधेयत्वासंभवाच्च, योगयुक्तो मुनिर्ब्रह्माधिगच्छतीति सर्वकर्मसंन्यासावगमाच्च, पश्यन् शृण्वन्नित्यत्र च त्रयोदशधा कर्मक्रिया श्रूयते न वैदिकक्रियायास्त्रयोदशधा करणत्वं संभवति, विदुषस्त्वाहारादौ देहेन्द्रियचेष्टायास्तथाविधत्वसंभवात्सर्वथा ब्रह्मविदो जीवन्मुक्तस्य वैधः कर्मलेशो न संभावयितुं शक्यते, तत एवोच्यते 'तस्य कार्यं न विद्यते' इति, ततो न कश्चिच्छास्त्रविरोधः ॥ ७ ॥

योगयुक्तत्वादिविद्वल्लक्षणपञ्चकविशिष्टस्य ब्रह्मविद आहारादौ प्रवृत्तस्य दर्शनादीन्द्रियव्यापारेषु नाहं कर्तास्मीत्येवंबुद्ध्या स्थातव्यमित्याह—

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥ ८ ॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९ ॥

नैवेति द्वाभ्याम्। तत्त्वविदात्मयाथात्म्यज्ञो ब्रह्मविद्यतिर्युक्तः स्वस्य कूटस्थत्वासङ्गत्वान्तर्बहिःपूर्णत्वदर्शनलक्षणया प्रज्ञया युक्तः सन् स्वयं बहिः पश्यन् अश्नन् भक्षणं कुर्वन् स्वप्नं निद्रां कुर्वन् श्वसन्नुच्छ्वासं निःश्वासं च कुर्वन्नुन्मिषन्निमिषन् निमेषोन्मेषौ च कुर्वन्नपि, इन्द्रियार्थेषु शब्दादिविषयेष्विन्द्रियाण्येव वर्तन्ते नाहं द्रष्टा श्रोता स्प्रष्टा घ्राता भोक्ता गन्तेत्येवंलक्षणामेव वृत्तिं सर्वदा धारयन् तानि तानि कर्माणीन्द्रियाण्येव

कुर्वन्त्यहं त्वविक्रियत्वान्नैव किंचित्करोमि किंतु तत्तत्क्रियासाक्षित्वेन निष्क्रियात्मना तूष्णीमेवास इत्येवं मन्येत। स्वं तत्रतत्र निष्क्रियमेव वीक्षेत। देहेन्द्रियव्यापारेष्वहंममेतिभावनां त्यक्त्वा विदुषा तूष्णीं स्थातव्यम्। एवं स्वं ब्रह्मैव पश्यतो ब्रह्मविदो दुष्टादुष्टान्नस्वीकृत्य प्राप्तपापपुण्यलेपो नास्तीति सिद्धमिति द्वयोरर्थः॥ ८॥ ९॥

ननु समविक्रियमेव परं ब्रह्म विजानतो ब्रह्मविदो महात्मनः कर्मलेपो मास्तु कर्मसु प्रवृत्तस्य मुमुक्षोरविदुषस्तु स्यादेव कर्मलेपस्तस्य का वा गतिरित्याकाङ्क्षायां तस्यापि च निष्कामस्य मद्भक्तस्य मय्यर्पितसर्वकर्मणः कर्मलेपो नास्तीत्याह—

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥ १०॥

ब्रह्मणीति। यस्तु मुमुक्षुरनात्मज्ञः सङ्गं सङ्गः फलकामस्तं त्यक्त्वा कर्मफले यत्रकुत्रापि काममकृत्वा संप्राप्तदुःखस्यापि निवृत्तिमकामयमानः सन् ब्रह्मणि सगुणे मयि परमेश्वरे सर्वाणि कर्माण्याधाय कर्तृत्वं कारयितृत्वं भोक्तृत्वं भोजयितृत्वं च स्थापयित्वा मदर्पणबुद्ध्या श्रद्धया भक्त्या च नित्यं नैमित्तिकं च कर्म करोति सोऽपि मद्भक्तः पापेन बन्धकेन यथा पापं जन्मादिबन्धकारणं तथा पुण्यमपि जन्मादिबन्धकारणमेव भवत्यतो वैदिकं कर्म जन्मादिबन्धहेतुत्वात्पापमित्युच्यते। तेन न लिप्यते पद्मपत्रमम्भसा यथा तथा मद्भक्तः कर्मणा न लिप्यत इत्यर्थः॥ १०॥

नन्वकामनया कर्माणि कुर्वतां किं फलमित्याकाङ्क्षायामात्यन्तिकसंसारदुःखविध्वंसकविज्ञानजनयित्री चित्तशुद्धिरेव फलमिति ज्ञापयितुं मुमुक्षवश्चित्तशुद्ध्यर्थमेव कर्म कुर्वन्तीत्याह—

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये॥ ११॥

कायेनेति। योगिनः कर्मयोगिनो मुमुक्षवः सङ्गं सज्जते पुमाननेन कर्मफलेष्विति सङ्गः कामः फलविषयकस्तं त्यक्त्वा फलापेक्षां सुतरां परित्यज्य परमेश्वरप्रीतय एव कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि चात्मशुद्धये सत्वशोधनायैव कर्म वैदिकं नियमेन कुर्वन्ति। यद्वा यत्किंचित्कर्तव्यं मनसा संकल्प्य तदेव बुद्ध्या निश्चित्य तदैवेन्द्रियैः केवलै रागद्वेषविवर्जितैः कायेनापि कर्म कुर्वन्ति। यद्वा कायेनेन्द्रियैश्च वैदिकं कर्म बुद्ध्या निश्चितस्य विष्णवादेर्मनसा ध्यानं श्रोत्रेण केवलेन कथा-

श्रवणं केवलेन चक्षुषा महद्दर्शनं वाचा केवलया स्वाध्यायादि पद्भ्यां तीर्थाटनादिकमीश्वरप्रीत्यै कुर्वन्तीत्यर्थः ॥ ११ ॥

श्रद्धया भक्त्या चेश्वरप्रीतय एवाऽकामनया कर्म कुर्वतामन्यथा कुर्वतां च फलमाह—

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥

युक्त इति । यस्तु सदसद्विवेकी मोक्षेच्छया कर्मफलं त्यक्त्वा स्वेनानुष्ठीयमानानां कर्मणां फलमनपेक्ष्य युक्तो भवति लाभालाभयोः सिद्ध्यसिद्ध्योश्च समो भूत्वा परमेश्वरप्रीतय एव यः कर्म करोति स एव नैष्ठिकीं कर्मनिष्ठाजन्यां शान्तिं चित्तशुद्धिं प्राप्नोति । यद्वा नैष्ठिकीं कर्मनिष्ठासमुत्पन्नचित्तशुद्धिसंभावितज्ञानप्रकाशितां शान्तिं मुक्तिं प्राप्नोति । यस्त्वविवेकी कामकारेण कामनया फले कर्मफले सक्त आसक्तः सन् न युक्त उक्तलक्षणकर्मानुष्ठानपरो न भवति स निबध्यते । ज्ञानानुत्पत्त्या जन्मादिबन्धवान् भवति ततस्त्वमुक्तलक्षणयोगयुक्तो भवेत्यर्थः । एतेन निष्कामेन कृतं कर्म मोक्षाय भवति सकामेन कृतं कर्म बन्धाय भवतीति सूचितम् ॥ १२ ॥

नन्वकामस्य कर्मयोगेनैव मुक्तिश्चेत्तर्हि सर्वैरप्यकामनया कर्मैव कर्तव्यं न तु संन्यास इत्याशङ्कायां न, 'नित्यनैमित्तिकैरेवे'ति न्यायेन अकामनया कृतकर्मणां फलं चित्तशुद्धिस्तस्याः फलं ज्ञानं ज्ञानस्य सर्वकर्मसंन्यासः 'नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् । ज्ञानं च विमलीकुर्वन्नभ्यासेन च वासयेत् । अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः ॥' इति । सदात्मनावस्थानं च फलमतो बहुजन्मकृतसुकृतपरिपाकात्संप्राप्तचित्तशुद्धेस्तयैव समुत्पन्नपरावरैकत्वविज्ञानस्य सर्वात्मदर्शिनो ब्रह्मविदः कर्मेषदपि न संभवति कारणाभावात्किंतु ब्रह्मविद्वर्यः सर्वाणि कर्माणि संन्यस्य स्वयमविक्रियब्रह्मात्मना तूष्णीं तिष्ठतीत्याह—

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देहे नैव कुर्वन्न कारयन् ॥ १३ ॥

सर्वेति । नित्यनिरन्तरसमाधिनिष्ठानिर्मूलितसर्ववासनापटलत्वेन सुप्रसन्नबाह्याभ्यन्तरकरणत्वाद्वशी वशीकृतसर्वेन्द्रियग्रामः शुद्धात्मा ब्रह्मवित् सर्वकर्माणि नित्यनैमित्तिककाम्यप्रतिषिद्धलक्षणानि शास्त्रीयाण्यशास्त्रीयाणि च सर्वाणि कर्माणि मनसाधिष्ठानयाथात्म्यसंदर्शनसंजा-

तारोपितसर्वदृश्यवस्तुमिथ्यात्वप्रत्ययवतः संन्यस्य कर्म तत्कर्ता तत्साधनं तत्फलं च सर्वमसदेवेति विज्ञानेन संत्यज्येत्यर्थः। ननु मनसेति वचनात् सर्वेषां कर्मणां मनसैव त्यागो न तु बहिःक्रियया विहितानां त्यागायोगादिति चेन्न। 'विकल्पो नहि वस्तु', 'मायामात्रमिदं द्वैतम्' इति सर्वमिथ्यात्वदर्शिनो विदुषो विध्यनुपपत्तेः। विधेरपि दृश्यान्तःपातित्वाद्यथा मरुत्स्वरूपदर्शिनो जलपानविधिवचनं जलवन्मिथ्या भवति, तथाऽधिष्ठानब्रह्मसंदर्शिनः कर्मविधिरपि कर्मवत्कारकवन्मिथ्यैव भवति। सर्वप्रमाणैः सर्वं मिथ्यैव पश्यतो ब्रह्मविदः कर्मप्रवृत्तिश्च न संभवत्येव। ननु सर्वं मिथ्यैवेति प्रवर्ततामिति चेन्न। मिथ्यात्वबुद्धेः प्रवृत्तेश्च परस्परविरोधादेकाधिकरणत्वानुपपत्तेः। नन्वन्तर्मिथ्यात्वबुद्ध्या बहिः सत्यत्वबुद्ध्या क्रियतां कर्मेति चेन्न। एकस्मिन्वस्तुनि बुद्धिद्वयायोगात्। नहि मरुं दृष्टवतो जलमिथ्यात्वबुद्धिस्तत्सत्यत्वबुद्धिश्चोपपन्ना दृष्टा। तद्वत्सर्वमिथ्यात्वज्ञानं तत्सत्यत्वज्ञानं तत्प्रवृत्तिश्च नैकस्य कदाप्युपपद्यते, पदार्थसत्यत्वधीपूर्वकत्वाद्वृत्तेर्मनसि सर्वदृश्यमिथ्यात्वदृढप्रत्ययवति विदुषि सति कथं बहिः प्रवृत्तिः संपद्येत। 'यदि मनसा ध्यायति तद्वाचा वदति तत्कर्मणा करोति' इति वागादिप्रवृत्तेर्मनोव्यापारपूर्वकत्वश्रवणात्ततो बहिः करणं मनसा संन्यास इति यत्तदपास्तम्। तस्मात्सर्वदृश्यमिथ्यात्वनिश्चयपूर्वकं सर्वकर्माणि मनसा संन्यस्य ब्रह्मविद्वर्यः स्वयमविक्रियब्रह्मात्मना तूष्णीमास्ते। कुत्रेत्याकाङ्क्षायामाह—**नवेति**। नवद्वारे चक्षुर्भ्यां श्रोत्राभ्यां नासिकाभ्यां वक्त्रेण च पायूपस्थाभ्यां च नवसंख्याकानि द्वाराणि सूर्याद्यधिदैवतरक्षितानि यस्य तन्नवद्वारं प्रत्यगात्मैकराजकं बुद्धिप्रधानकं मनःप्रभृति सर्वकरणपरिचारकं प्राणादिदशवायुग्रामपालकं ब्रह्मविष्ण्वादिसर्वदेवतायतनं तस्मिन् नवद्वारे पुरे देहे सुखं स्वसुखाविर्भावं यथा तथास्ते। सुखरूपेण तिष्ठतीत्यर्थः। ननु विद्वान् देहे आस्ते इति यत्तदनुपपन्नं विद्वानविद्वान् यतिरयतिश्च सर्वोऽपि देह एवास्ते अहमिहास इत्यनुभवादिति चेन्न, देहात्मबुद्धेर्मूढतमस्य विपरीतप्रत्ययदर्शनात्। यस्तु देहमात्रात्मदर्शी मूढतमस्तस्य गेहे देहल्यामास इति प्रत्ययं विना नाहं देह आस इति प्रत्ययः संभवति यथा ब्रह्मविदः, तथाच ब्रह्माण्डे चराचरं सर्वं वस्तुजातं स्वतेजसा प्रकाशयन्तं भानुमन्तमिव बुद्ध्यादिसर्वदृश्यजातमनात्मकमात्मभासा भासयन्तं स्वप्रकाशं चिदेकरसं सर्वसाक्षिणमसङ्गोदासीनं नित्यशुद्धबुद्धमुक्तस्वभावमानन्दघनमात्मानं स्वात्मना साक्षादयमेवाहमस्मीति यो विजानाति स एव देहव्यतिरिक्तात्मदर्शी विद्वान्

शक्नोति गेहे देवदत्तवद्देहे निष्क्रियब्रह्मात्मना सुखमासितुं नान्यस्तत एवोच्यते भगवता 'सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी। नवद्वारे पुरे देही' इति, यद्वा वशी नित्यनिरन्तरब्रह्मनिष्ठया वशीकृतान्तर्बहिःकरणो निश्चलात्मा ब्रह्मविद्वर्यः सर्वकर्माणि विहितानि प्रतिषिद्धान्युभयविलक्षणानि च देहचेष्टारूपाणि सर्वाण्यपि च कर्माण्यतीतानेककल्पेष्वधुना च सर्वावस्थासु सर्वदा देहेन्द्रियव्यापारेण परिणतया प्रकृत्यैव कृतानि नतु मया कूटस्थासङ्गचिद्रूपेणेत्येवमात्मानात्मनोः स्वरूपविवेकज्ञानवता मनसा नवद्वारे स्थूलेन पुर्यष्टकेन च नवद्वारवति पुरे पुरसदृशे पूर्णत्वाद्वा पुरं तस्मिन् पुरे देहे कारणे देहशब्दोपलक्षितायां प्रकृतत्वेन संन्यस्य जननमरणादिविकाराः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिधर्मा जाग्रदाद्यवस्थाविशेषाश्च सर्वे प्रकृतेरेव नतु कूटस्थासङ्गचिद्रूपात्मनो ममेति सम्यगनात्मतादात्म्याध्यासं परित्यज्य स्वयं निष्कलनिष्क्रियनित्यशुद्धबुद्धनिरन्तरानन्दैकरसाद्वितीयब्रह्मात्मना स्वात्मन्येव तूष्णीं सुखमास्ते न किंचिद्विकरोतीत्यर्थः। ननु जपाकुसुमसान्निध्यात्स्फटिके रक्तिमवदनात्मसान्निध्यादात्मनि प्रतीयमानान्यनात्मकर्तृकाणि सर्वाणि प्रकृतिरेव करोति नाहं करोमीति विद्यया स्वयं ब्रह्मभावमापद्य विद्वान् तिष्ठतु तथापि निष्क्रियात्मना स्थातुं न शक्नोति, तस्य ब्रह्मात्मना तिष्ठतोऽन्यकर्तृकक्रियासंबन्धाभावेऽपि स्वाश्रयक्रियावत्त्वसंभवात्, यथान्तर्गृहस्थप्रदीपस्य पवनाद्यन्यकर्तृकचलनक्रियाभावेऽपि स्वकर्तृकतैलादानक्रिया विद्यते, यथा वा गजमारुह्य गच्छतो राज्ञो गजकर्तृकगमनक्रियाभावेऽपि स्वनिष्ठचलनक्रिया गजप्रेरणादिक्रिया च विद्यते, तद्वत् परमात्मनोऽपि कर्तृत्वं कारयितृत्वं विद्यत एवेति चेन्न। निरवयवत्वात्परमात्मनः क्रियाश्रयत्वानुपपत्तेः 'निष्कलं निष्क्रियम्' इति निरवयवत्वनिष्क्रियत्वश्रवणादात्मनः क्रियावत्त्वे सावयवत्वादनित्यत्वं स्यात्तदनिष्टं सर्ववादिनां श्रुतिविरोधश्च स्यात्। राज्ञोऽवयवित्वात्कर्तृत्वाद्युपपत्तिर्न तथात्मन इति बोधयितुमाह—**नैव कुर्वन्न कारयन्निति।** निरवयवत्वात्परमात्मा स्वयं नैव किंचित्करोति नाप्यन्यान्कारयति चेत्यर्थः। नहि निरवयवे परिपूर्णे च वस्तुनि चलनक्रिया कल्पयितुं शक्यते प्रमाणविरोधात्। नहि निरवयवे पूर्णे आकाशे चलनं संभवति तद्वदात्मन्यपि नित्यः सर्वगतः स्थाणुरित्यात्मनः पूर्णनिष्क्रियत्वयोः प्रतिपादितत्वात्। ननु परमात्मनो निरवयवस्य निष्क्रियस्य कर्तृत्वकारयितृत्वयोरसंभवे 'सर्वाधिपत्यं कुरुते महात्मा',

'एष एव साधु कर्म कारयति', 'एष त आत्मान्तर्याम्यमृतः' इत्यादिश्रुतीनामात्मनः कर्तृत्वकारयितृत्वप्रतिपादिकानामप्रामाण्यं स्यादिति चेन्न । सन्निधिमात्रेणात्मनस्तथात्वसंभवाद्यथा सूर्यसान्निध्यात्तमोनिवृत्तौ सत्यां तन्निवृत्तिं सूर्यः करोतीत्युपचर्यते, यथा चुम्बकसान्निध्यादयसि चलति सति तच्चलनं चुम्बकमयश्चालयतीति चुम्बके उपचर्यते तथात्मसान्निध्यात्प्रकृतौ विजृम्भमाणायां तद्विजृम्भणं सर्वाधिपत्यं परमात्मन्युपचर्यतेऽविकारिण्येव, तथैवात्मसान्निध्याद्बुद्ध्यादेः प्रवृत्तौ सत्यां बुद्ध्यादीनात्मा प्रवर्तयतीति तत्प्रवृत्तिरात्मन्यविक्रिय एवोपचर्यते परमात्मा करोति कारयतीति । 'ध्यायतीव लेलायतीव' इति श्रुतेः, आत्मन एवंविधकर्तृत्वकारयितृत्वयोः संभवात्तमिममर्थमादाय प्राणिनामस्वात्र्यसिद्ध्यै परमात्मनः कर्तृत्वं कारयितृत्वं च श्रुतयो वदन्ति, अनयोक्तरीत्या परमात्मनः सृष्ट्यादिक्रियाप्रतिपादिकानामेतासां च श्रुतीनां प्रामाण्यमभ्युपगन्तव्यम् । अन्यथा 'निष्कलं निष्क्रियं शान्तम्' इति 'न तदश्नाति किंचन न तदश्नोति कश्चन' इत्यादिश्रुतीनामात्मनो निर्विकारत्वप्रतिपादिकानां व्याकोपः स्यात् । यत एवं परमात्मनोऽविक्रियत्वं बहुश्रुतिप्रमाणकं तत आत्मा किंचिन्न करोति न कारयतीति सिद्धम् ॥ १३ ॥

नन्वात्मनो निरवयवत्वेन क्रियाश्रयत्वानुपपत्तौ स्वतः कर्तृत्वासंभवेऽपि यथाऽयस्कान्तस्यायश्चालकत्वं तथा कारयितृत्वं स्यादेवेत्याशङ्कायां न, तथात्वे प्राणिनामात्मसान्निध्यस्य नित्यत्वात्सर्वदा सर्वेषां प्रवृत्तिरेव स्यात्तददर्शनादात्मनः कारयितृत्वं न प्रामाणिकमित्याशयेनाह—

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

न कर्तृत्वमिति । प्रकर्षेण स्वयमेव सर्वत्र भाति सर्वं भासयतीति वा सर्वात्मना स्वयमेव भातीति वा प्रभुरात्मा स्वयं लोकस्य प्राणिनः कर्तृत्वं त्वमिदं कुर्विति कर्मणि प्रवृत्तिं न सृजति । यं कंचन जन्तुं न प्रवर्तयतीत्यर्थः । तथा कर्माणि 'कर्तुरीप्सिततमं कर्म' इति स्मरणात्क्रियया प्राप्तुमिष्टतमानि कर्माणीत्युच्यन्ते तानि न सृजति नोत्पादयति । इष्टप्रदमनिष्टप्रदं वा क्रियया प्राप्तुं योग्यं वस्तु न संपादयतीत्यर्थः । कर्मफलसंयोगं च न सृजति तं तं प्राणिनं तत्तत्कृतपापपुण्यफलेन न

संयोजयति । प्राणिनः सुखदुःखानि नानुभावयति चेत्यर्थः । आत्मना कारयितृत्वप्रापयितृत्वभोजयितृत्वाद्यभावे तर्हि कारयिता प्रापयिता भोजयिता क इत्याकाङ्क्षायामाह—**स्वभाव इति**। स्वयमेव सर्वं भावयतीति स्वं भावयतीति वा स्वभावः प्रकृतिर्वासनामयी प्रवर्तयति कर्मरूपिणी प्रकृतिरिष्टानिष्टे संपाद्य सुखदुःखे चानुभावयति । प्राणिनः स्वात्मा तु प्राणिप्रकृतितच्चेष्टातत्सुखदुःखानुभूतीनां साक्ष्येव भवत्यविक्रियः सन्नित्यर्थः ॥ १४ ॥

ननु 'एष एव साधु कर्म कारयति' 'स सत्त्वस्यैष 'प्रवर्तकः' 'ईश्वरः सर्वभूतानां' 'सर्वाधिपत्यं कुरुते महात्मा' 'धर्मावहं पापनुदं भगेशं वरदं देवमीड्यं' 'प्रभुः प्रीणाति विश्वभुक्' इत्यादिश्रुतिभिः स्मृतिभिश्च परमात्मनः कर्तृत्वं कारयितृत्वं धर्मावहत्वं पापापनोदकत्वं समर्पितपूजादिभिः परितोष्टृत्वादिकं प्रतिपाद्यते । कथं 'न कर्तृत्वं न कर्माणि' इत्यात्मनः श्रुतिस्मृत्युक्तधर्मवत्त्वाभावः प्रतिपाद्यत इत्याकाङ्क्षायां । न । श्रुतिस्मृतिभिः पुराणैरप्यात्मन्युपाधिकृतमारोप्य प्रतिपाद्यते मुमुक्षूणां सत्त्वशुद्ध्यर्थं तदुपास्तौ प्रवृत्तिसिद्धये नतु तत्तात्त्विकम् । वस्तुतस्तु कूटस्थासङ्गचिद्रूपत्वादात्मा स्वयं न करोति न कारयति नादत्त इत्याह—

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५ ॥

नादत्त इति । निरवयवत्वान्निष्क्रियत्वाच्च विभुर्व्यापकः स्वयमात्मा भक्तस्य वाप्यन्यस्य वा यस्य कस्यचित्पापं नादत्ते ब्राह्मणो हिरण्यगर्भमिव न गृह्णाति । ननु 'हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः', 'अनेकजन्मार्जितपापसंचयं हरत्यशेषं स्मृतमात्र एव' इत्यादिवाक्यैर्भक्तकृतपापं भगवानादत्त इति प्रतिपाद्यत इति चेत्सत्यम् । प्रतिपाद्यते तत्प्रतिपादनं नाम कीर्तनप्रायश्चित्त्याऽनात्मज्ञं तत्पापान्मोचयितुमेव भवति नतु परमात्मनो विकारित्वं संपाद्य तत्पापादानप्रतिपादनाय । एतत् 'तस्मात्संकीर्तनं विष्णोर्जगन्मङ्गलमंहसाम् । महतामपि कौरव्य विद्ध्यैकान्तिकनिष्कृतिम् । एका विनिष्कृतिः शंभोः सकृदेव हि कीर्तनम्' इत्यादिवचनेभ्योऽवगम्यते । अन्यथा निर्विकारत्वप्रतिपादकबहुश्रुतिविरोधप्रसङ्गात् । किंच यस्य कस्यापि भक्तस्य वान्यस्य वा भक्त्या समर्पितं श्रौतस्मार्तकर्मानुष्ठानजन्यं सुकृतं च नैवादत्ते वह्निराहुतिमिव न किंचिद्गृह्णाति । ननु तर्हि 'धर्मावहं पापनुदं भगेशं वरदं देवमीड्यं', 'प्रभुः प्रीणाति', 'पत्रं पुष्पं फलं तोयम्' इत्यादिश्रुतिस्मृतिवाक्यानामप्रामाण्यापात इति

चेन्न। मुमुक्षोः सत्त्वशुद्धिकामस्य परमेश्वरोपास्तौ तन्महत्त्वप्रतिपादनेन रुच्युत्पादनपरत्वात्तेषां वाक्यानां 'वायुर्वै क्षेपिष्ठा देवता' इत्यादिवाक्यवत्प्रामाण्योपपत्तेः। ननु पण्डिताश्चाप्यपण्डिताश्च सर्वे स्नानसंध्यानुष्ठानयज्ञदानादिजं फलमीश्वरायैव समर्पयन्ति गृह्णातीश्वर इति तत्कथमित्याकाङ्क्षायां ते वेदान्तविचारजन्यज्ञानाभावादेव तथा कुर्वन्तीत्याशयेनाह—**अज्ञानेनेति**। आत्मनो देहेन्द्रियादिभ्यो भिन्नत्वाविक्रियत्वचिद्रूपत्वपरिपूर्णत्वाखण्डानन्दैकरसत्ववेदनं ज्ञानं तद्विलक्षणमज्ञानं तेनोक्तलक्षणं ज्ञानमावृतं राहुणा रविबिम्बवत्तिरोहितं तेनैव परमात्मतत्त्वाऽविवेकेन जन्तवः प्राणिनः सर्वेऽप्यहं ममेत्यनेन कर्मणेश्वरः प्रीयते मह्यमीप्सितं दास्यति भोक्ष्ये भोजयिष्यामीति मुह्यन्ति। परतत्त्वमजानन्तः सन्तः संसरन्तीत्यर्थः॥ १५॥

ननु सर्वेषामज्ञानावृतज्ञानत्वे कथं मुमुक्षूणामात्मज्ञानाविर्भावः कथं वा तेषां मुक्तिरित्याकाङ्क्षायामीश्वरप्रीत्यै कृतनित्यनैमित्तिककर्मानुष्ठानेन यदा चित्तपरिपाकस्तदा सम्यक् ज्ञानमुदेत्यज्ञानं नाशयित्वा परं तत्त्वं प्रकाशयति तदा ते मुक्तिं गच्छन्तीत्याशयेनाह—

> **ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।**
> **तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्॥ १६॥**

ज्ञानेनेति द्वाभ्याम्। तुशब्दो ज्ञानव्यतिरिक्तस्याज्ञाननाशकत्वासंभवद्योतनार्थः। कर्मोपास्तिभ्यां परिपक्वचित्तानां येषां ज्ञानेन तु श्रवणादिसमुत्पन्नेनात्मविषयकेणात्मनो बुद्धेः संबन्धि बुद्धिनिष्ठमित्येतत् ज्ञानाज्ञानयोर्बुद्धिधर्मत्वादावृतिरनावृतिश्च पटलेन चक्षुष एव नतु घटस्य। तद्वदज्ञानं ज्ञानं च बुद्धेरेवास्तु नात्मनः अन्यथाहमिति प्रत्ययानुत्पत्तेः, ततो बुद्धिसंबन्ध्येवाज्ञानं येन मोहिताः संसरन्ति प्राणिनो यत्सर्वानर्थबीजं तदज्ञानं नाशितं भवति सूर्योदयेन तिमिरमिव विध्वस्तं भवति तेषां शुद्धात्मनां समुत्पन्नं तज्ज्ञानमादित्यवद्यथोदित आदित्यः पदार्थजातं प्रकाशयति तथा, तत्सर्ववेदान्तप्रसिद्धं सत्यज्ञानादिलक्षणं प्रत्यगभिन्नं परं ब्रह्म प्रकाशयति सूर्यप्रकाशेन स्थाणुरेवायमिति यथा तथा ज्ञानप्रकाशेन ब्रह्मैवाहमिति स्वं ब्रह्मैव विजानन्तीत्यर्थः॥ १६॥

'तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्' इत्यादिश्रुत्युक्तरीत्या विदेहकैवल्यार्थिभिः समुत्पन्नज्ञानस्य संरक्षणं कर्तव्यं सदात्मनिष्ठया स्थित्वा न किंचिद्बाह्यं द्रष्टव्यमिति बोधयितुमाह—

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

तद्बुद्धय इति । तद्बुद्धय आदिष्ठेन रूपमिव श्रवणादिजन्यज्ञानेन प्रकाशितं सर्ववेदान्तप्रसिद्धं सच्चिदानन्दैकरसं सर्वात्मकं यत्परं ब्रह्म तस्मिन्नेव बुद्धिर्येषां ते तद्बुद्धयः सर्वत्र ब्रह्मदर्शिनः मुमुक्षुभिः कल्पितभेदमगृहीत्वा चक्षुषा रूपमिव प्रत्यग्दृष्ट्या सदा सर्वत्र ब्रह्मैव द्रष्टव्यमित्यर्थः । सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मण्येव गृह्यमाणेऽपि ग्रहीता ग्राह्यमिति भेदः स्यात्तदा 'एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति' इति भेदद्रष्टुर्भयश्रवणादतोऽभेदेन द्रष्टव्यमित्याह—**तदात्मान इति** । तदेव परं ब्रह्मात्माऽहंप्रत्ययार्थो येषां ते तदात्मानः ब्रह्मैवाहमिति ब्रह्मण्येव स्वात्मना साक्षात्कृते अहंप्रत्ययवन्तो नतु देह इत्यर्थः । समाधिदशायां ब्रह्मण्येवाहंप्रत्यये सत्यपि विदुष आहारादौ देहेऽहंप्रत्ययश्च तेन प्रबलेन चिरकालिकेन स्थूलेन देहात्मप्रत्ययेन ब्रह्मात्मप्रत्ययो बाह्यध्वनिना नादध्वनिवद्विनश्यति । ततो बाह्यं कर्म सर्वं संन्यस्याहाराद्यवस्थासु सर्वास्वपि ब्रह्मण्येवात्मत्वबुद्ध्या दृश्यानवगाहिन्या स्थातव्यमित्याह—**तन्निष्ठा इति** । तस्मिन् ब्रह्मण्यात्माकारप्रत्ययकरणमेव निष्ठा अहंबुद्धेर्नैश्चल्यं येषां ते तन्निष्ठाः स्वस्य ब्रह्मात्मनावस्थितत्वदर्शिन एव स्थिरीभूतवृत्तय इत्यर्थः । ब्रह्मात्मत्वदर्शने स्थिरीभूतचित्तवृत्तीनामपि कचित्प्रयोजनान्तरापेक्षास्ति चेत्तया सा निष्ठा प्रतिबध्यते बाह्यात्मत्वं च स्यात्ततः कार्यान्तरं बाह्यं किंचिदप्यनपेक्ष्य मुमुक्षोः सदा तदेकपरत्वेन भवितव्यमित्याह—**तत्परायणा इति** । तत्सच्चिदानन्दैकरसमद्वितीयं स्वात्मनाधिगतं परं ब्रह्मैव बहिरन्तः सदा बुद्धिवृत्तेश्चक्षुषो रूपवत्परं नियतमयनं गतिर्येषां ते तत्परायणा आहारविहारादौ सदा सर्वत्र ब्रह्मदर्शनं ब्रह्मण्येवात्मदर्शनं च विवेकवृत्त्या ये न मुञ्चन्ति ते तत्परायणाः । सदात्मारामा इत्यर्थः । एवं सर्वत्र ब्रह्मदर्शनं ब्रह्मण्यात्मत्वदर्शनं तन्निष्ठत्वं तत्परायणत्वं च विदेहमुक्तेरसाधारणकारणमेतच्चतुष्टयमनुतिष्ठन्ति ये ब्रह्मविदस्त एवं ज्ञाननिर्धूतकल्मषाः ज्ञानेनोक्तान्तरङ्गसाधनचतुष्टयानुष्ठित्याऽप्रतिबद्धतां गतेन निर्धूतं निःशेषं प्रक्षालितं कल्मषं बौद्धं जगद्ब्रह्मणोर्ब्रह्मात्मनोश्च भेदग्रहणलक्षणं येषां ते ज्ञाननिर्धूतकल्मषाः सन्तः स्वयमपुनरावृत्तिं भूयो देहसंबन्धित्वापत्तिः पुनरावृत्तिस्तदभावोऽपुनरावृत्तिस्तां देहसंबन्धरहितां मुक्तिं

गच्छन्ति । ब्रह्मात्मना स्थितिदशायां गलितेऽस्मिन् देहे ब्रह्मणि वृत्तौ लीनायां सत्यां स्वयं ब्रह्माकारेणैव तिष्ठन्तीत्यर्थः ॥ १७ ॥

तद्बुद्धय इत्यनेन ब्रह्मविद्यतीनां सर्वदा कर्तव्यत्वेन यद्विहितं कल्पितनामरूपाद्यग्रहणेन सर्वत्र ब्रह्मदर्शनं तद्विशदयति—

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १८ ॥

विद्याविनयसंपन्न इति। विद्याविनयसंपन्ने विद्या सर्ववेदशास्त्राधीतिस्तदर्थज्ञानं वा, विनयो नम्रता उपशान्तिर्वा, ताभ्यामन्यैश्च स्वधर्मपरत्वप्रतिग्रहविमुखत्वसत्यशौचदयादिभिः सुगुणैः संपन्ने जगत्पूज्ये ब्राह्मणे, जात्या गुणेन धर्मेण च परमनिकृष्टे स्वप्राणवृत्त्यै श्वानमपि पचतीति वा श्वो भवितव्यमिति पचतीति वा श्वपाकश्चण्डालस्तस्मिन्नपि, जात्या संचारेण क्षीरादिना च जगत्पावन्यां गवि धेनौ, जात्यादिभिरतिनिकृष्टे तुच्छभुजि शुनि शुनके, राजपूज्ये हस्तिनि भद्रगजे, चकाराल्लोष्टाश्मकाञ्चनादिषु सर्वत्र तत्तद्द्रव्यतत्तद्गुणतत्तद्धर्मतत्तत्कर्मभिरस्पृश्यमानं सर्वदाकाशवदेकरूपेण समरसतया तिष्ठतीति परं ब्रह्म सममित्युच्यते । तदेव सर्वत्र द्रष्टुं शीलं येषां ते समदर्शिनः । आरोपितनामरूपाद्यगृहीत्वैव सर्वत्राधिष्ठानभूतब्रह्ममात्रदर्शनपराः पण्डिता इत्यर्थः । परावरैकत्वविज्ञानपौष्कल्यवन्तः पण्डिताः सदा समदर्शिन एव भवन्ति न क्वचिद्विषयदर्शिन इति समदर्शित्वं पण्डितानां धर्म इति सूचितं भवति ॥ १८ ॥

सदा सर्वत्र ब्रह्मैव पश्यन्तः सन्तो ये तु तदात्मना तिष्ठन्ति तेषामेव विदेहमुक्तिर्नेतरेषामिति सूचयितुं ब्रह्मनिष्ठानां यतीनां जीवद्दशायामेव मुक्तिं दर्शयति—

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९ ॥

इहैवेति । परावरैकत्वविज्ञानवतां तद्बुद्धित्वाद्यन्तरङ्गसाधनवतां सर्वकर्मसंन्यासिनां येषां ब्रह्मविदां मनः सर्वदा साम्ये सममेव साम्यं । स्वार्थे ष्यञ्प्रत्ययः । तस्मिन् साम्ये समरसे परे ब्रह्मण्येव स्थितं नैश्चल्येन तिष्ठति । ये तु सर्वत्र ब्रह्मैव पश्यन्ति तदात्मतामेवापद्यन्ते तत्रैव निष्ठां कुर्वन्ति तदात्मतापन्नवृत्त्या कालं नयन्ति तैरेवंलक्षणैर्ब्रह्मविद्भिरिहैव जीवद्दशायामेव सर्गो जन्म भविष्यदेहसंबन्धो जितो निर्जितः । परिहृत

इत्यर्थः । अविद्याकामकर्माणि खलु शरीरारम्भकाणि अद्वितीये ब्रह्मणि जगद्बुद्धिसंपादिका देहादावहंममबुद्धिसंपादिका वासनाऽविद्या तन्मूलकाः कामास्तत्कार्याणि कर्माणि तेषामविद्याकामकर्मणां नित्यनिरन्तरब्रह्मनिष्ठया निःशेषविनाशे सति 'कारणनाशात्कार्यनाशः' इति न्यायेन तत्कार्यभूतभाविदेहसंबन्धनाशोऽपि सिध्यत्यत एवोच्यते—**इहैव तैर्जितः सर्ग इति**। ननु ब्रह्मविदां कचिदपि बाह्यालम्बनं विना सर्वदा ब्रह्मण्येव ब्रह्मात्मनावस्थानं कथमुपपद्यत इत्याकाङ्क्षायां । न । तेषां मनसोऽतिनिर्मलत्वाद्ब्रह्मसुखानुभूतिरसिकत्वात्तादृग्ब्रह्मनिष्ठासंपादकपुण्यसंपत्तेश्च सदानन्दैकरसे ब्रह्मणि स्थितिः संभवतीति सूचयितुं ब्रह्मण आनन्दरूपत्वं प्रतिपादयति—**निर्दोषं हीति** । हि यस्मात्कारणाद्ब्रह्म निर्दोषम् । दोषशब्देनात्र तत्कार्यं दुःखं लक्ष्यते । निर्दोषं निर्दुःखं दुःखलेशशून्यमानन्दरूपमित्यर्थः । 'आनन्दो ब्रह्म', विज्ञानमानन्दं ब्रह्म', 'स्वप्रकाशमानन्दघनम्' इति श्रुतेः । ननु ब्रह्मणः स्वत आनन्दरूपत्वेऽप्यनृतजडदुःखात्मकप्रपञ्चसंबन्धसंभवात्कचिद्दुःखलेशसंबन्धः संभवेदित्याशङ्कायां न 'मायामात्रमिदं द्वैतं' 'असत्त्वादन्यस्य' 'नह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीयः' 'एकमेवाद्वितीयं' 'अद्वयो ह्ययमात्मैकल एव' इत्यादिश्रुतिभिर्जगतः स्वरूपासत्त्वं ब्रह्मणोऽद्वितीयत्वं च नियमेन प्रतिपाद्यते यतस्ततो मरोर्जलसंबन्धवद्ब्रह्मणो मिथ्याभूतप्रपञ्चसंबन्धासंभवात् सदा सर्वत्रैकरसत्वमेवेति बोधयितुमाह—**सममिति** । समं सर्वत्र सममेव परं ब्रह्म सच्चिदानन्दमात्रमेकरसं 'सद्घनोऽयं चिद्घन आनन्दघन एकरसः' इत्यादिश्रुतिभिर्ब्रह्म सदैकस्वभावमेव भवति समरसत्वाल्लवणपिण्डवदित्यादियुक्तिभिश्च सजातीयविजातीयादिभेदवैधुर्यमेव प्रतिपाद्यते । ततः सदानन्दैकरसमेव परं ब्रह्म न त्वविद्यातत्कार्यतद्धर्मतत्कर्मलेशसंपृक्तम् । तस्मादेव ब्रह्मविदां मनो ब्रह्मानन्दामृतरसास्वादासक्त्या ब्रह्मण्येव तिष्ठति । सर्वदैवमेव ब्रह्मण्यानन्दघने येषां ब्रह्मविदां यतीनां मनस्तिष्ठति त एव विदेहमुक्तिं गच्छन्तीति सिद्धम् ॥ १९ ॥

विदेहमुक्तिकामस्य ब्रह्मविदः सर्वं संन्यस्य सर्वदा ब्रह्मण्येव ब्रह्मात्मना तिष्ठतो यतेः सर्ववासनासंक्षयः सर्वकामप्रमोकः सर्वकर्मप्रविलयश्चैतत्त्रितयस्य भाविजन्महेतोरनिष्टस्य निवृत्तिस्तथा जीवद्दशायां दृष्टदुःखानुपलब्धिः सदानन्दानुभूतिर्विदेहकैवल्यप्राप्तिश्चेत्येतत्त्रितयस्येष्टस्य प्राप्तिरेवं पुरुषार्थः सिध्यति, तस्मान्मुमुक्षोः श्रवणादिना सम्यग्विदितात्मतत्त्वस्य यतेर्ब्रह्मनिष्ठाऽवश्यं कर्तव्येति सूचयितुं ब्रह्मयोगं कुर्वतः कर्तव्यमाह—

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २० ॥

न प्रहृष्येदिति । ब्रह्मणि सर्वत्र ब्रह्ममात्रदर्शने समाधौ स्थितः प्रवृत्तो ब्रह्मविद्यतिः स्वयं भिक्षाटनादौ यदृच्छया प्रारब्धवशात्प्राप्तं प्रियमिष्टं वस्तु वचनं वा कर्म वा पूजादिलक्षणं प्राप्य श्रुत्वा दृष्ट्वा स्पृष्ट्वा वा रम्यत्वबुद्ध्येष्टताबुद्ध्या वा न प्रहृष्येत् प्रहर्षं न कुर्यात् । प्रहर्षोऽनात्मधर्मस्तस्मिन् कृते स्वस्यानात्मतादात्म्ये सत्यसदारोपणं स्याद्वस्तुनो नामरूपगुणविशेषविमर्शनं विना समीचीनत्वबुद्धिरिष्टताबुद्धिश्च न जायते, समीचीनत्वादिबुद्धिं विना प्रहर्षोऽपि नोत्पद्यते, हर्षोत्पत्तिश्च द्रष्टरि भोक्तर्यात्मत्वाभिनिवेशं विना न संभवत्येवमनर्थहेतुर्भवति पदार्थविमर्शनं तत्र रम्यताबुद्धिरिष्टताबुद्धिश्च, ततः प्रत्यग्दृष्टिं परित्यज्य पदार्थविमर्शनं रम्यताबुद्धिमिष्टत्वादिबुद्धिं च प्रहर्षं च ब्रह्मविन्न कुर्यात्किंतु सर्वत्र प्रत्यग्दृष्ट्यैव तिष्ठेदित्यर्थः । किंचाप्रियमनिष्टमाध्यात्मिकमाधिभौतिकमाधिदैविकं ज्वरादिसर्पचोरादिवर्षवाताद्यनर्थकारणं प्राप्य नोद्विजेत् उद्वेगश्चलनमधैर्यं भयं च तन्नावहेत् । हा हतोऽस्मीत्यौपाधिकमनर्थं स्वं न प्रापयेत् । तदनर्थस्य स्वयं विषयो न भवेदिति यावत् । किंतु भवितव्यं भवत्येवेति दृढबुद्ध्योपाधिं प्रारब्धाय समर्प्य स्वयं तदविषयीभूतनिर्विशेषे ब्रह्माकारेणैव तिष्ठेत् । स्वदृष्ट्या स्थितवतो मुक्तिर्न विहन्यते, बाह्यदृष्ट्या स्थितस्य तूपाध्यविनाशो मुक्तिविनाशश्च स्यात् । ततः प्रत्यग्दृष्टिं परित्यज्य बाह्यग्रहणं तत्रानिष्टताबुद्धिं स्वस्य तदनर्थविषयत्वमुद्वेगं च विद्वान्न कुर्यादित्यर्थः । इष्टानिष्टयोः प्राप्तौ प्रहर्षोद्वेगावकृत्वा कथं स्थातव्यमित्यत आह—**असंमूढ इति** । संमूढो विपरीतग्राही तद्विलक्षणः समदर्श्येवासंमूढो ब्रह्मण्येवात्मप्रत्ययस्तत्रैव स्थिरबुद्धिः स्थिरा स्वस्य ब्रह्माकारतामत्यजन्ती निश्चला बुद्धिर्यस्य स स्थिरबुद्धिः सन् ब्रह्मण्येव स्थितो भवेत् । स्वस्य सर्वस्य ब्रह्ममात्रदर्शन एव तिष्ठेदित्यर्थः ॥ २० ॥

'न प्रहृष्येत्प्रियं प्राप्य' इत्युक्त्वा विषयसुखं परित्यक्तव्यमिति सूचितं, विषयसुखे परित्यक्ते ब्रह्मविदः सुखाभावादुन्मत्तस्येवामुष्य स्थितिर्निष्फलैवेत्याशङ्कायां न । 'रसं ह्येवायं लब्ध्वानन्दी भवति' इति श्रवणान्नित्यनिरन्तरं निरतिशयं ब्रह्मसुखममुष्य ब्रह्मनिष्ठायां तिष्ठतोऽस्तीत्याह —

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥ २१ ॥

बाह्यस्पर्शेष्विति । य आत्मतत्त्वज्ञः स्वयं बाह्यस्पर्शेषु मूढैरात्मनो बहिरेव कल्पिता बाह्या । इन्द्रियैः स्पृश्यन्ते गृह्यन्त इति स्पर्शाः बाह्याश्च ते स्पर्शाश्च तेषु बाह्यस्पर्शेषु शब्दादिषु तज्जन्यसुखेषु च तुच्छत्वबुद्ध्या बन्धकत्वबुद्ध्या च असक्तोऽप्रवृत्त आत्मा मनो यस्य सोऽसक्तात्मा सन् तीव्रवैराग्येण मनसा विषयग्रहणमकुर्वन् गुहायां वा अन्यत्र रहसि समाहितो भूत्वात्मनि बुद्ध्यादिसाक्षिणि प्रतीचि साक्षात्कृते सति यत्सुखमात्मसाक्षात्कारसंभूतं विन्दत्यनुभवति स एव ब्रह्मविद्ब्रह्मयोगयुक्तात्मा नामरूपग्रहणमकृत्वा चिदाकारवृत्त्या बहिरन्तः सर्वत्र ब्रह्ममात्रदर्शनं ब्रह्मयोगस्तस्मिन् सर्वत्र सदा ब्रह्मदर्शन एव युक्तो नियमित आत्मा मनो यस्य स ब्रह्मयोगयुक्तात्मा सन् व्युत्थानाव्युत्थानयोः सदा सर्वत्र ब्रह्मैवानन्दैकरसं परिपूर्णं पश्यन् ततोऽधिकतरमक्षयं सदा सर्वत्रानन्दैकरसस्य ब्रह्मण एव बुद्धिवृत्तेर्विषयत्वाद्विच्छित्तिरहितं सुखं स्वरूपानन्दमश्नुते । सर्वत्र ब्रह्ममात्रदर्शनपरो ब्रह्मविद्यतिः सदानन्दो भवतीत्यर्थः । अत्रायमभिप्रायः । गुहादौ रहसि समाधिं कुर्वन्तः समाधिकाल एवात्मानन्दानुभवः नतु सर्वदा सर्वत्र, ब्रह्मयोगयुक्तात्मनस्तु बहिरन्तः सदा सर्वत्र ब्रह्मानन्दानुभवो निरर्गल इति ॥ २१ ॥

ननु 'बाह्यस्पर्शेष्वसक्तात्मा' इत्युक्तिरनुपयुक्ता ब्रह्मविदः काले विषयसुखमप्यस्तु सुखं ब्राह्मं चाप्यस्तीत्याशङ्कायाम् । न विषयसुखस्याद्यन्तवत्त्वेन दुःखवत्त्वादल्पत्वात्तुच्छत्वान्न तत्रात्मतत्त्वज्ञः प्रवर्तत इत्याह—

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२ ॥

ये हीति । हि यस्मात्कारणात्संस्पर्शजा इन्द्रियाणां विषयाणां च संस्पर्शः परस्परसंयोगस्तस्मादेव जायन्त इति संस्पर्शजा इन्द्रियार्थसंपर्कसंभाविता ये भोगाः विषयसुखानि ते आद्यन्तवन्त उत्पत्तिविनाशवन्तः । अत एवानित्याः क्षणिका इत्यर्थः । संस्पर्शजा इति जन्यत्वहेतुनैवानित्यत्वे सिद्धे पुनराद्यन्तवन्त इति वचनं निरर्थकमिति न मन्तव्यम् । तार्किकैः प्रध्वंसाभावस्य जन्यत्वं नित्यत्वं चाङ्गीकृतम् । मीमांसकैरपि 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्' इति तज्जन्यसुखस्याप्यक्षयत्वमुररीकृतं तन्निरसितुमाद्यन्तवन्त इत्युक्तम् । तेन विषयसुखस्य क्षणिकत्वमल्पत्वं च प्रत्यक्षादिप्रमाणसिद्धं विषयेन्द्रियसंयोगात्पूर्वं तद्वियोगात्पश्चाच्च सुखादर्शनात् । ये आद्यन्तवन्तो भोगास्ते दुःखयोनयो दुःखहेतव एव

भवन्ति । स्वकारणनाशे स्वनाशे स्वकारणासिद्धौ स्वासिद्धौ च यस्माद्दुःखमेव प्रयच्छन्ति तदिदं सर्वलोकप्रसिद्धं तस्माद्विषयसुखस्य सापेक्षत्वं क्षणिकत्वमल्पत्वं दुःखदत्वं च विज्ञाय बुधो ब्रह्मवित्तेषु विषयसुखेषु न रमते रतिं न करोति । भुक्तिदशायामपि स्वयं स्वदृष्ट्या ब्रह्मानन्दामृतरसमेव पिबति न बाह्यमनुसंधत्त इत्यर्थः ॥ २२ ॥

ननु सर्वं ब्रह्मैव पश्यतो ब्रह्मनिष्ठानिर्धूतकषायस्यात्मारामस्य सिद्धस्य सुखेच्छया विषयेषु प्रवृत्तिर्मास्तु, अभ्यासिनस्त्विष्टेऽप्यनिष्टेऽपि कामः क्रोधस्ताभ्यां प्रवृत्तिर्निवृत्तिश्च स्यातामेवेत्याशङ्कायां न । तस्यापि मुमुक्षोः प्रयत्नेन तौ परिहर्तव्यावेव कामक्रोधजयेनैव शमादयः, श्रवणं ज्ञानं मोक्षस्तत्सुखं च सिध्यति नान्यथेत्याशयेनाह—

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३ ॥

शक्नोतीति । स्मृते श्रुते दृष्टे प्राप्ते च भोग्यपदार्थे या भोगेच्छा सत्वरा स कामः । यः शिष्टमपि भ्रष्टयति वृद्धमपि गर्धयत्यनुपतापिनमपि संतापयति, अप्रियवस्तुनि स्मृते श्रुते दृष्टे च सति मनःक्षोभको यो द्वेषपरिपाकः स क्रोधः । यः स्वाश्रयं वह्निरिव दहति गुरुमपि हिंसति ताभ्यां कामक्रोधाभ्यां सम्यगुद्भव उत्पत्तिर्यस्य तं कामक्रोधसमुद्भवं वेगं कामक्रोधयोरुद्वेगं शरीरविमोक्षणात्प्रागेव विद्यमानदेहस्य पतनात्पूर्वमेव । यौवनकाल एवेति यावत् । यो मुमुक्षुस्तितिक्षया तीव्रमोक्षेच्छासमुत्पन्नया सोढुं शक्नोति । कामक्रोधौ निर्जित्य शान्तो दान्तो भवितुमर्हतीत्यर्थः । स नरो मोक्षार्थी श्रवणादिना ज्ञानं संपाद्य युक्तो योगी सुखी च ब्रह्मानन्दीभवितुं शक्नोतीत्यर्थः । अत्रायमभिप्रायः । 'दुर्लभो मानुषो देहो ब्राह्मो देहः सुदुर्लभः । ब्राह्मं देहं समासाद्य येन मुक्त्यै न यत्यते ॥ सुमेरोरग्रमासाद्य स्वदेहं पातयत्यधः । तमेव पतितं विद्युर्जातिभ्रष्टं महर्षयः ॥' इति न्यायेन ब्राह्मं मोक्षसंपादनयोग्यं प्राप्य कामक्रोधपरवशो भूत्वा यतिश्चेत्पुनरुक्तलक्षणो देहो दुष्प्रापस्ततो मुमुक्षोर्विवेकवैराग्याभ्यां यौवने पूर्वे वयसि कामादिशत्रून्विजित्य प्रयत्नेनेदानीमेव मोक्षः संपादनीय इति । यद्वा इहैवास्मिन्नेव जन्मनि मोक्षं प्राप्तुमिच्छया शरीरविमोक्षणात् । अत्र शरीरपदेन तदाश्रितगार्हस्थ्यं लक्ष्यते । तस्य विमोक्षणात्संन्यासात्प्रागेव यो मुमुक्षुर्नरो विवेकवैराग्याभ्यां कामक्रोधोद्भवं वेगं सोढुं शमयितुं शक्नोति स एव शमदमादिसाधनसंपन्नः

सन् श्रुत्या मत्या च ज्ञानं संपाद्य युक्तो ब्रह्मयोगयुक्तो भवितुं सुखी ब्रह्मानन्दी च भवितुमर्हति नतु कामक्रोधजयमकृत्वा संन्यस्य श्रवणादिना ज्ञानं तत्फलं ब्रह्मण्यात्मभावं मोक्षसुखं च प्राप्तुं शक्नोतीत्यर्थः ॥ २३ ॥

नित्यानित्यविवेकवैराग्यतीव्रमोक्षेच्छाभिः सर्वं संन्यस्य शमाद्यन्तरङ्गसाधनसंपत्त्या श्रुत्या मत्या च ताभ्यां समुत्पन्नात्मविज्ञानो यो यतिः स स्वयं विदेहकैवल्यार्थी सन्नेव ब्रह्मनिष्ठया तिष्ठति चेन्मुक्तिं गच्छति नान्यथेति सूचयितुमाह—

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥ २४ ॥

योऽन्तरिति। योगी श्रवणमननाभ्यां समुत्पन्नात्मज्ञानपरिपाकाय समाधिनिष्ठायां प्रवृत्तो यो ब्रह्मविद्यतिः स सदान्तर्ज्योतिरेव भवेत्। एवशब्दः सर्वत्र संबध्यते। 'सर्वस्मादन्तरतरं यदयमात्मा' इति श्रवणादन्तःशब्देनात्र सर्वान्तरत्वादात्मेत्युच्यते। मनोज्योतिरिति श्रवणाज्ज्योतिःशब्देन मन उच्यते। अन्तरात्मन्येव ज्योतिर्मनो यस्य सोऽन्तर्ज्योतिरेव भवेन्न कचिद्बाह्यज्योतिः सदा सर्वत्रात्मानमेव पश्येन्न तु बाह्यमित्यर्थः। अन्तरारामः अन्तरात्मन्येवारमणमहंबुद्धेः क्रीडनं यस्य सोऽन्तरारामो न कचिदनात्मारामः सदात्मन्येवाहंबुद्धिमान् भवेन्न कचिदप्यनात्मनीत्यर्थः। योऽन्तःसुखः सदात्मन्येव साधनानपेक्षं सुखमात्मीयं यस्य सोऽन्तःसुखः सदात्मनैव संतुष्येदित्यर्थः। स योगी स्वयमेव निरन्तरब्रह्मनिष्ठया ब्रह्मभूतः निःशेषतया देहात्मभावं परित्यज्य ब्रह्मण्येवात्मभावं गतः सन् ब्रह्मनिर्वाणं विदेहकैवल्यसुखं गच्छति। उक्तलक्षणसंपन्न एव विदेहमुक्तिं प्राप्नोतीत्यर्थः ॥ २४ ॥

प्रक्षीणकल्मषत्वाच्छिन्नद्वैधत्वयतात्मत्वादिधर्मविशिष्टा भूत्वा सदात्मन्येव ये रमन्ते त एव विदेहमुक्तिं गच्छन्तीत्याह—

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥

लभन्त इति। यतात्मानः यतः संयमितः बाह्यप्रवणतावैमुख्यं गमित आत्मा मनो येषां ते यतात्मानः सर्वथा विरुद्धान्तरङ्गा भूत्वा सर्वभूतहिते 'तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा' इति श्रवणादानन्दरूपत्वाच्च सर्वेषां ब्रह्मादिस्तम्बान्तानां

भूतानामात्मैव प्रियो हितस्तस्मिन् सर्वभूतात्मनि स्वात्मनि ब्रह्मण्येव रता निरता ये ऋषयो यतयो भवन्ति । ये सदात्मन्येव रमन्ते ते सदात्मनिष्ठया क्षीणकल्मषाः क्षीणं निःशेषक्षयं गतं कल्मषं मनःकषायरूपं वासनाशब्दितं येषां ते क्षीणकल्मषाः ब्रह्मयोगनिष्ठा निर्धूतान्तःकरणदोषा अतएव समुत्पन्नात्मयाथात्म्यविज्ञानेन छिन्नद्वैधाः अर्थस्य द्वैधत्वमवलम्ब्य जायन्त इति द्वैधाः संशयाः, स्थाणुत्वपुरुषत्वबुद्ध्योरेकत्वसमावेशे खलु संशयो जायते स्थाणुर्वा पुरुषो वेत्येवमेवात्राप्यर्थज्ञानद्वैविध्यमवलम्ब्य संशया जायन्ते तत्कथमिति चेदुच्यते । आत्मा चिद्रूपो वाऽचिद्रूपो वा, चिद्रूपत्वेऽपि नित्यो वाऽनित्यो वा, नित्यत्वेऽपि देहेन्द्रियादिभ्यो भिन्नो वाऽभिन्नो वा, भिन्नत्वेऽपि देहादिभिः संसृष्टो वा नवा, असंसृष्टत्वेऽपि स्वयं कर्तृत्वादिधर्मविशिष्टो वा नवा, कर्तृत्वादिधर्मवैशिष्ट्याभावेऽपि स्वयमसङ्गो वा नवा, असङ्गत्वेऽपि देहादिकृतकर्मभिर्लिप्यते वा नवा, कर्मलेपाभावेऽपि स्वयं ब्रह्माऽभिन्नो वा नवा, ब्रह्माभिन्नत्वेऽपि ब्रह्मात्मैकत्वविज्ञानं ममोत्पन्नं वा नवा, उत्पन्नत्वेऽपि तज्ज्ञानं यथार्थं वाऽयथार्थं वा, यथार्थत्वेऽपि मुक्तेः साधकं वाऽसाधकं वा, मुक्तिसाधकत्वेऽपि मम जीवन्मुक्तिरस्ति वा नवा, तत्सत्त्वेऽपि विदेहमुक्तिः सिध्यति वा नवेत्येवमादयः संशयाः पूर्वोक्तज्ञानेन छिन्ना विनष्टा द्वैधा येषां ते छिन्नद्वैधाः सन्तो ब्रह्मनिर्वाणं विदेहकैवल्यं लभन्ते प्राप्नुवन्तीत्यर्थः ॥ २५ ॥

कामक्रोधराहित्येन सदात्मनिष्ठया तिष्ठतामेव यतीनां जीवन्मुक्तिसुखं विदेहमुक्तिसुखं च सिध्यति नेतरेषामित्याशयेनाह—

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ २६ ॥

कामक्रोधवियुक्तानामिति । काम इच्छाविशेषः वस्तुष्विष्टताबुद्ध्या मनसो बहिःप्रवृत्तिहेतुः । कामव्याघाते जायमाने वस्तुन्यनिष्टताबुद्ध्या मनसो बहिःप्रवृत्तेरेव हेतुर्बुद्धिवृत्तिविशेषः क्रोधः । एतद्द्वयमेव श्रवणमननसमाधिविच्छित्तेः परमकारणं तद्वतो ज्ञानं न सिध्यति समाधिश्च ताभ्यां समाधौ विच्छिन्ने सति सम्यग् ज्ञानं शतधा श्रुतवतोऽपि न संभवति तदभावे मोक्षाभावस्ततो मुमुक्षोः समाधित्सोर्यतेः कामक्रोधराहित्येनावश्यं भवितव्यमिति सूचयितुं पुनःपुनरुक्तमपि कामक्रोधपरित्यागं तदविस्मरणाय स्मारयति—**कामक्रोधवियुक्तानामिति** । कामक्रोधाभ्यामुक्तलक्षणाभ्यां वियुक्तानामेव यतीनां शान्तानां यतचेतसां

सर्वात्मनि प्रत्यगभिन्ने ब्रह्मण्येव यतं नियमेन स्थापितं चेतो येषां तेषां सर्वदा ब्रह्मण्येव तिष्ठतामतएव विदितात्मनामयमेवाहमिति साक्षात्स्वात्मत्वेन विदितः सर्वात्मक आत्मा निर्विशेषः परमात्मा यैस्तेषां सम्यग्विदितात्मतत्त्वानामेव ब्रह्मविदामभित उभयतो जीवद्दशायां विदेहदशायां च ब्रह्मनिर्वाणं ब्रह्मानन्दानुभूतिर्वर्तते सिध्यतीत्यर्थः । एतेन कामक्रोधादिकं विक्षेपकारणं दूरतस्त्यक्त्वा समाधिनिष्ठायामेव तिष्ठतो यतेः सम्यग्ज्ञानं तत्फलं मोक्षश्च सिध्यतीति सूचितं भवति ॥ २६ ॥

संयतात्मनामिति सम्यग्ज्ञानसिद्धेस्तत्फलसिद्धेश्च समाधिः परमकारणमिति सूचयित्वा तमेव समाधियोगं ससाधनमुपदिदिक्षुस्तस्य सूत्रभूतं श्लोकत्रयमाह । तत्रादौ श्लोकद्वयेन निदिध्यासोरन्तरङ्गसाधनानि षट्कर्तव्यान्युपदिशति—

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥ २७ ॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ २८ ॥

स्पर्शानिति । आत्मनो बहिरेव भ्रान्त्या कल्पिता बाह्यास्तान् बाह्यान् स्पर्शान् शब्दादिविषयान् बहिः कृत्वा बहिर्देशे एव संस्थाप्य । मनसा न किंचित्स्मृत्वेत्यर्थः । इतस्ततो दर्शनं यथा न स्यात्तथा भ्रुवोरन्तरे चक्षुर्दृष्टिं कृत्वा तथा नासाभ्यन्तरचारिणौ प्राणापानौ च समौ साम्यावस्थापन्नौ हृदये कृत्वा केवलं कुम्भकं कुर्वन्नित्यर्थः । पापक्षयार्थं मनोनैश्चल्यार्थं केवलकुम्भकं मुमुक्षोः कर्तव्यम् । यतेन्द्रियमनोबुद्धिः इन्द्रियाणि च मनश्च बुद्धिश्चेन्द्रियमनोबुद्धयः यताः संयताः स्वस्वविषयवैमुख्यं गमिता यस्य स यतेन्द्रियमनोबुद्धिः । इन्द्रियैर्विषयग्रहणं मनसा विषयचिन्तनं बुद्ध्याऽवेशात्प्राप्तस्याप्यर्थस्य ग्रहणमकुर्वन्नित्यर्थः । विगतेच्छाभयक्रोधः इच्छा च भयं च क्रोधश्च इच्छाभयक्रोधाः विशिष्य बुद्धिं परित्यज्य गता विगता इच्छाभयक्रोधा यस्य स विगतेच्छाभयक्रोधो भूत्वा यस्मिन् कस्मिन् विषये इच्छायां सत्यां समाधिर्न सिध्यति दिवारात्रावरण्ये गुहादौ प्राणिभ्यो भयमस्ति चेत्समाधिर्न सिध्यति मशकपिपीलिकादिष्वपकारिषु च क्रोधो ह्यस्ति चेत्समाधिर्न सिध्यत्यत एव तत्रितयं निदिध्यासुः परित्यजेदित्यर्थः । किंच मोक्षपरायणः प्रयत्नेन कर्तव्यं कार्यं सर्वं परित्यज्य तीव्रमोक्षेच्छया मोक्षसाधनैकनिष्ठः सन्मोक्षप-

रायणः सन् यो मुमुक्षुः सर्वं संन्यस्य सदा मुनिर्भवति मुनिर्मननशीलः मननं वस्तुध्यानं नियमेन तदेव करोतीति मुनिः यः सदा मुनिरेव भवति स एव मुक्तो भवति नान्यः शतधा कृतश्रवणोऽपीति द्वयोरर्थः ॥ २७ ॥ २८ ॥

श्लोकद्वयेन ध्यातुः साधनं ध्यातारं च निरूप्येदानीं तृतीयेन तस्य ध्येयं वस्तु निरूपयति—

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ २९ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे संन्यासयोगो नाम पञ्चमोऽध्यायः ॥ ५ ॥

भोक्तारमिति । उक्तसाधनसंपन्नो निदिध्यासुर्यतिर्यज्ञतपसां यज्ञानां श्रौतानां स्मार्तानां तपसां सत्यश्रुतशाल्यादीनामन्येषां च कर्मणां यत्फलं तस्य भोक्तारमात्मानमुपाधितद्धर्मसंबन्धरहितं स्वं सर्वभूतानां ब्रह्मादिस्तम्बान्तानामात्मत्वात्सुहृदं प्रेष्ठतमम्। यद्वा सर्वभूतानां सु शोभनं हृत् हृदयमुपलब्धिस्थानत्वेन यस्य तं सुहृदं सर्वभूतानां हृदये आत्मन्येन वर्तमानं सर्वलोकमहेश्वरं लोक्यन्त इति लोकाः सर्वे च ते लोकाश्च सर्वलोका अव्यक्तादिस्थूलान्तास्तेभ्यो महान्महत्तमः स्वसन्निधिमात्रेण सर्वमीष्टे चेष्टयतीतीश्वरः महांश्चासावीश्वरश्च महेश्वरस्तं सर्वलोकमहेश्वरं सर्वात्मकं सच्चिदानन्दैकरसं मां परमात्मानं ज्ञात्वा प्रत्यगात्मानं स्वं मामेव परं ब्रह्म ज्ञात्वा प्रत्यगभिन्नं परं ब्रह्म मां मत्वा ध्यात्वा च शान्तिमृच्छति सर्वसंसारोपशमं परं ब्रह्मभावं प्राप्नोतीत्यर्थः । यद्वा यज्ञतपसां भोक्तारं कार्योपाधिकं त्वंपदार्थमात्मानं सर्वभूतसुहृदं सर्वलोकमहेश्वरं कारणोपाधिकं तत्पदार्थं च 'अथात आदेशो नेतिनेति' इत्यादिश्रुत्यवष्टम्भेनोपाधिद्वयं निरस्य केवलचैतन्यमात्रौ तौ तत्त्वंपदार्थौ द्वावपि तयोरधिष्ठानभूतं सत्यं ज्ञानमनन्तं चिदानन्दैकरसं निर्विशेषं मां परं ब्रह्म ज्ञात्वा एतदेवाहमिति तन्मां परं ब्रह्मैव स्वात्मना सर्वदा मत्वा ध्यात्वा च शान्तिमृच्छति विदेहमुक्तिं प्राप्नोतीत्यर्थः ॥ २९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ।

पूर्वं पञ्चमाध्यायान्ते 'स्पर्शान्कृत्वा बहिर्बाह्यान्' इत्यादिश्लोकत्रयेण यतेरात्मविदः श्रवणादिजन्यज्ञानस्याप्रतिबद्धत्वसिद्धयेऽवश्यकरणीयं ध्यानयोगं सूचयित्वेदानीं तस्यैव ध्यानयोगस्य बहिरङ्गान्तरङ्गसाधनान्यधिकारिणं तल्लक्षणं तत्फलं च निरूपयितुं षष्ठोऽध्याय आरभ्यते । तत्रादौ श्रवणादिभिः संभाव्यमानज्ञानोत्पत्तेः परमकारणं चित्तशुद्धिस्तस्यां सत्यामेव श्रवणं मननं निदिध्यासनं तज्जन्यज्ञानं च सिध्यति । सत्त्वशुद्धेः कारणं तु कर्मयोग एव । श्रवणादेस्तज्जन्यज्ञानस्य च यमादिवद्बहिरङ्गं बलवत्तरम् । तस्मिन्सत्येव सत्त्वशुद्धिस्तस्याः श्रवणादि सकार्यं सिध्यति । अतो मुमुक्षोरवश्यं वैदिकं कर्म नियमेन श्रद्धया चेश्वरभक्त्या च कर्तव्यमिति सूचयितुं कर्मयोगिनं तदीयकर्मयोगं च स्तोतुं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥

अनाश्रित इति । अधीतवेदवेदाङ्गस्तदर्थज्ञो यो मुमुक्षुर्ब्राह्मणः स्वयं कर्मफलं 'स्वर्गकामश्चिन्वीत यः पशुकामः' 'पश्यति पुत्रम्' इत्यादिश्रुतिवाक्यैस्तत्र तत्र प्रतिपाद्यमानं कर्मणां फलं पुत्रपशुस्वर्गप्राप्तिलक्षणमनाश्रितः मोक्षैककामनया यत्किंचिदपि कर्मफलमनपेक्ष्यैव सर्वं कर्मेश्वराय समर्प्य निष्कामः सन् कार्यं नियमेन यत्कर्तव्यं नित्यं नैमित्तिकं च काम्यवर्जितं कर्म अग्निहोत्रादिलक्षणं करोति श्रद्धया भक्त्या च सम्यगनुतिष्ठति स कर्मफलकामनापरित्यागरूपसंन्यासवत्त्वात्संन्यासी च भवति । कर्मयोगे चित्तसमाधानवत्त्वाद्योगी च भवति । न निरग्निर्न चाक्रिय इत्यत्रावधारणपदमध्याहर्तव्यम् । निरग्निरेव संन्यासीति न, अक्रिय एव योगीति च न, किंतु फलकामसंकल्पत्यागेन चित्तनैश्चल्येन मदेकभक्त्या च यः कर्म करोति गृहस्थः सोऽपि च संन्यासी योगी च भवतीत्यर्थः । निरग्निरित्यत्राग्निशब्देनाग्निपूर्वकाणि कर्माणि लक्ष्यन्ते । चौलोपनयनमारभ्य ब्राह्मणस्य प्राप्तानि स्मार्तानि श्रौतानि च कर्माणि सर्वाण्यग्निपूर्वकाण्येव । तान्येतानि ससाधनानि सलक्षणानि विविदिषया येन संन्यस्तानि भवन्ति स निरग्निः स संन्यासी स एव श्रवणादिना संप्राप्तविज्ञानो भूत्वा ज्ञानयोगे प्रवृत्तः सन् देहेन्द्रियादिचेष्टारूपाः क्रियाः सर्वास्त्यजन्नक्रियो योगी भवति ॥ १ ॥

ननु संन्यासित्वं योगित्वं चानात्मज्ञकर्तृकसर्वकर्मव्युत्थानलक्षणो ब्रह्मविद्धर्मः सर्वशास्त्रप्रसिद्धः कथं प्रवृत्तिधर्मवतोऽनात्मज्ञस्य गृहिणो दाराग्निहोत्रादिसाधनवत उपपद्यत इत्याशङ्कायाम्। न। उक्तरीत्या धर्माणामपि धर्मिणां परस्परभेदे सत्यपि संन्यासकर्मयोगयोः साध्यैकत्वेन फलतो भेदाभावात्संन्यासिनो यत्फलं तदेव फलं कर्मयोगिनोऽप्यतः फलसाम्यमुपपद्यत इति सूचयितुं संन्यासवत् कर्मापि मोक्षस्य परमसाधनं तदवश्यं मुमुक्षोः कर्तव्यमिति कर्म स्तोतुं च संन्यासकर्मयोगयोरभेदमाह—

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव।
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन॥ २॥

यमिति। पण्डिताः यं कर्मित्वादर्शनलक्षणं धर्मं संन्यासमिति प्राहुर्वदन्ति, त्वं तमेव संन्यासं योगं कर्मयोगं विद्धि जानीहि। सर्वकर्माणि मनसेतिवचनात्स्वस्य कूटस्थासङ्गचिद्रूपत्वविज्ञानेनाऽनात्मकर्तृककर्माभावदर्शनं संन्यासस्तस्य फलं तु मोक्षः। कर्मसंभावितचित्तशुद्धिजन्यज्ञानकार्यत्वात्संन्यासस्य कर्माङ्गं भवति। अङ्गाङ्गिनोरुभयोरप्येककार्यान्वयित्वेनैकफलत्वेन चैकत्वमुपपद्यते ततस्तयोरभेदमेव पश्येत्यर्थः। अथवा उभयोरपि परमार्थसिद्धिसाधनत्वाऽविशेषादेकत्वमेव भवति, यथा श्रवणादिजन्यविज्ञानेन विना कर्मित्वदर्शनाभावे त्वविक्रियात्मस्वरूपेणावस्थानलक्षणो मोक्षो न सिध्यति। तथा विहितकर्मानुष्ठानाभावे चित्तशुद्ध्यभावात्तज्ज्ञानानुत्पत्तौ स्वस्वरूपावस्थानलक्षणो मोक्षो न सिध्यत्येव। ततो मोक्षं प्रत्युभयोरप्यसाधारणकारणत्वे विशेषभावादुभयोरेकशक्तिकत्वेनैकार्थफलकत्वेन च भेदाभावादेकत्वमुपपद्यते। यद्वा सर्वसंकल्पसंन्यासीतिवचनात्सर्वसंकल्पपरित्यागः संन्यासः। सर्वत्र ब्रह्मदृष्ट्या बाह्यपदार्थभावनापरिवर्जनं यतेर्धर्मः। यद्यप्येतल्लक्षणं मुख्यवृत्त्या कर्मयोगस्य न संभवति तथापि कर्मफलसंकल्पसंन्यासलक्षणलक्षितत्वात्फलसंकल्पपरित्यागगुणेन वृत्त्या संन्यासकर्मयोगयोरेकत्वं संभवति, अतः संन्यास एव कर्मयोग इति तयोरभेदमेव विजानीहीत्यर्थः। यं संन्यासमिति प्राहुर्योगं तं विद्धीत्युक्त्वा कर्मफलसंकल्पसंन्यासोपलक्षित एव कर्मयोगो मोक्षाय भवतीति सूचितं भवति। यतः कर्मफलसंकल्पसंन्यासैकप्रधानत्वं कर्मयोगस्य ततो मुमुक्षोर्गृहिणस्तद्वत्तयाऽवश्यंभवितव्यमिति बोधयितुमाह—**नहीति**। असंन्यस्तसंकल्पः संन्यस्तः मोक्षैककामनया सम्यक्परित्यक्तः संकल्पः कर्मफलविषयकं मननं येन मुमुक्षुणा स संन्यस्तसंकल्पस्तद्वि-

लक्षणोऽसंन्यस्तसंकल्पः । कर्मणः पूर्वं पश्चात्तत्काले च कर्मफलमेव मन्वानः सन् यः कर्म करोति सोऽसंन्यस्तसंकल्पो ब्राह्मणो वाऽन्यो वा कश्चिदपि योगी न भवति । योगो नाम कर्मफलापेक्षाराहित्येन लब्धं चित्तनैश्चल्यं तद्वानेव योगी, यः कर्मफलाशासंभावितचित्तविक्षेपवान् स योगी न भवतीत्यर्थः । यद्वा योऽसंन्यस्तसंकल्पः स योगी मोक्षयोगार्हो न भवति, किंतु जन्मादिदुःखयोग्येव भवतीत्यर्थः । 'कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र' इति, 'उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः' इत्यादिश्रुतिप्रसिद्धिद्योतनार्थो हिशब्दः ॥ २ ॥

एवं मुमुक्षूणां कर्मणोऽवश्यकर्तव्यत्वसिद्धये कर्मयोगं कर्मयोगिनं च संन्याससंन्यासिभ्यां समत्वेन स्तुत्वाऽधुना कर्मयोगस्य ज्ञानसाधनत्वं वदन् तत्कर्तव्यताया अवधिं च सूचयन्नारूढस्य विदेहमुक्तेः कारणमाह—

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥

आरुरुक्षोरिति । योगं सम्यक् दर्शननिष्ठामारुरुक्षोर्मुक्त्यै ज्ञानयोगं प्राप्तुमिच्छां कुर्वतो मुनेर्भविष्यन्मुनेः । 'गृहस्थः स्त्रियमुद्वहेत्' इति न्यायेनास्य भविष्यत्संन्यासित्वमादाय मुनित्वव्यपदेशः । गौणवृत्त्या वा मुनेर्गृहिणो ज्ञानयोगप्राप्तेः कारणं कर्मैव । चित्तशुद्धेः कर्मणा विनाऽन्येन संभावयितुमशक्यत्वात्कर्मैव पुरुषं चित्तशुद्धिं संपाद्य ज्ञानयोगमारोहयति, अतः कर्मैव ज्ञानयोगप्राप्तेः कारणमित्युच्यते । 'मन्त्रेषु कर्माणि कवयो यान्यपश्यन् तानि त्रेतायां बहुधा संततानि । तान्याचरथ नियतं सत्यकामाः' इत्यादिश्रुतिभिः प्रतिपाद्यत इत्यर्थः । यस्य चित्तशुद्ध्यै कर्मयोगो विहितस्तस्यैव नित्यनैमित्तिककर्मानुष्ठानसंभावितचित्तशुद्धौ सत्यामुदितविवेकवैराग्यशमदमादिसाधनसंपत्त्या प्राप्तश्रवणादिजन्यज्ञानेन योगारूढस्य योगं ज्ञानयोगमारूढस्य संप्राप्तवतो यतेर्विदेहकैवल्यार्थिनः शमो बाह्योपरमणमेव विदेहमुक्तेरन्तरङ्गसाधनमित्युच्यते । 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ', 'ओमित्येवं ध्यायथ आत्मानं', 'तमेव धीरो विज्ञाय', 'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत्' इति, 'आत्मरतिरात्मक्रीडः' इत्यादिश्रुतिभिः 'नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च । शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः ॥ नैव धर्मी न चाधर्मी न चैव हि शुभाशुभी । यः स्यादेकासने लीनस्तूष्णीं

किंचिदचिन्तयन् ॥' इत्यादिस्मृतिभिश्च विज्ञातात्मतत्त्वस्य यतेः समाधौ प्रवृत्तस्य शम उपशमः सर्वोपरमणं कारणमित्युच्यते । ब्रह्मण्यारोपितनामरूपाद्यग्रहणमेव शमशब्दार्थः सर्वसंन्यासलक्षणः स एव विदेहमुक्तेः परमकारणमिति श्रुतिस्मृतिभिरुच्यत इत्यर्थः । यस्मादेवं तस्मान्मुमुक्षोरवश्यं चित्तशुद्धौ श्रद्धयेश्वरार्पणबुद्ध्या च वैदिकमेव कर्म कर्तव्यम् । तस्यैव कर्मानुष्ठानसंभावितचित्तशुद्ध्या तदेकपरतया सम्यक्कृतश्रवणादिसंप्राप्तज्ञानस्य समाधिनिष्ठायां तिष्ठतः सर्वकर्मसंन्यास एव कर्तव्य इत्यभिप्रायः । आरुरुक्षोः कर्म कारणं तस्यैव योगारूढस्य शमः कारणमित्युक्त्या गन्तुर्गमनं समुद्रपर्यन्तमेव, ततः परं तु गतेः परिसमाप्तिर्यथा, तथा मुमुक्षोर्ज्ञानसिद्धिपर्यन्तमेव कर्म कर्तव्यं, ज्ञानसिद्धौ सर्वकर्मसंन्यास एव कर्तव्य इति सूचितं भवति । तेन 'यावज्जीवमग्निहोत्रं जुहोति', 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः' इत्यादिश्रुतिवाक्यानां यावज्जीवमग्निहोत्रादिकर्मणः कर्तव्यत्वप्रतिपादकानामविद्वानेव गतिर्नतु विद्वान् । अन्यथा 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्', 'सशिखं वपनं कृत्वा बहिः सूत्रं त्यजेद्बुधः', 'ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति', 'यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम् । तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत्' इत्यादिश्रुतिस्मृतिविरोधप्रसङ्गात् । ननु जडजात्यन्धमूकादीनामेव वैदिककर्मानधिकारिणां संन्यासो नतु विदुषः, 'विद्वान् यजते' इति विदुषो यागादिकर्मविधानादिति चेन्न, निरुक्तश्रुतिस्मृतिविरोधप्रसङ्गात् । 'बहिःसूत्रं त्यजेद्बुधः' इति 'किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः' इति, 'यदा तु विदितं तत्त्वम्' इत्यादिश्रुतिस्मृतिवाक्यार्थे सम्यग्विचार्यमाणे संन्यासस्य ब्रह्मविदेव योग्यो विषयो नतु जडादिस्तेषां वेदशास्त्राधीतिशून्यानां 'परीक्ष्य लोकान् कर्मचितान्ब्राह्मणो निर्वेदमायात्' इत्येतच्छ्रुत्यर्थपदवाक्यप्रमाणबलेन लोकानां कर्मचितत्वाऽनित्यत्वाऽल्पफलत्वाऽसत्त्वपरीक्षायोग्यताऽसंभवात्, वेदाध्ययनतदर्थविचारे तत्त्वनिश्चये कर्मणि लौकिके च सर्वत्र योग्यस्यैवाधिकारदर्शनाद्वेदाध्ययनतदर्थविचारानर्हाणां ब्रह्मतत्त्वावगमनं बुधत्वं च स्वप्नेऽपि न संभावयितुं शक्यते । ततो वेदान्तश्रवणादिनाऽधिगतब्रह्मतत्त्वानामेव बुधत्वं संन्यासश्च निरुक्तश्रुतिस्मृतिभिरवगम्यते । तत एव भगवताप्युच्यते 'आरुरुक्षोर्मुनेर्योगम्' इत्यादि । अतः सम्यग्विदितात्मतत्त्वस्यैव संन्यासो नतु जडादेर्नापि परोक्षज्ञानिनः । 'महत्पदं ज्ञात्वा वृक्षमूले वसेत्', 'ज्ञात्वा-

नैष्कर्म्यमाचरेत्', 'तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान्। अहमेवाक्षरं ब्रह्म वासुदेवाख्यमव्ययम् । इति भावो ध्रुवो यस्य तदा भवति भैक्ष्यभुक् ॥ यदा तु विदितं तत्त्वम्' इत्यादिश्रुतिस्मृतिशतेभ्यो ब्रह्मविद एव संन्यासः कर्तव्य इति सिद्धम्। 'विद्वान् यजते' इत्यत्र वेदश्रौतार्थतत्प्रयोगप्रायश्चित्तविद्विद्वच्छब्दार्थस्तस्यैव यजत इति कर्मविधिर्नतु ब्रह्मविदः, 'तस्य कार्यं न विद्यते' इति ब्रह्मविदः कर्माभावस्मरणात् ततस्त्वविद्वानेव यावज्जीवश्रुतिवाक्यानां गतिरिति स्थितम् ॥ ३ ॥

ननु बाह्योपरमणमेवैकं शमाभिधानं साधनमवलम्ब्य योगारोहणं कुर्वतो यतेः कदा योगारूढत्वसिद्धिरित्याकाङ्क्षायां यदा सर्वत्र ब्रह्मदृष्ट्या कर्मसु विषयेषु चासद्धियाऽमुष्य प्रवृत्त्यभावस्तदा योगारूढत्वसिद्धिरिति बोधयति—

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥

यदा हीति । सर्वसंकल्पसंन्यासी संकल्पाः द्रव्यगुणकर्मादिगोचराः समीचीनत्वबुद्धयः सर्वविषयाः संकल्पाः सर्वसंकल्पास्तान्संन्यसितुं शीलमस्यास्तीति सर्वसंकल्पसंन्यासी अधिष्ठानयाथात्म्यसंदर्शनेनारोपितानां द्रव्यादीनां मिथ्यात्वे तेषु शुक्तिरजतवदाभासमात्रेषु तज्ज्ञस्य समीचीनत्वबुद्धयः संकल्पा न जायन्ते । कामाश्च वैषयिकाः कामाः सर्वे यन्मूलाः 'संकल्पमूलाः कामा वै यज्ञाः संकल्पसंभवाः' इति स्मरणात्ततः प्रत्यग्दृष्ट्या सर्वस्य ब्रह्ममात्रत्वेन निराश्रयान्सर्वान्संकल्पान्संन्यस्य सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मदर्शनशीलो ब्रह्मविद्यतिर्यदा यस्मिन्काले इन्द्रियार्थेषु क्वचिद्भिक्षाटनादौ दृष्टेषु शब्दादिषु कर्मसु च क्वचिद्वासनया कर्तव्यत्वेन प्रतीतेषु स्नानशौचादिकर्मस्वपि नानुषज्जते भोक्तृभोजनभोज्येषु कर्तृकारणकार्येषु च मिथ्यात्वबुद्ध्या स्वयमनुषङ्गं आसक्तिं न करोति। अनुषङ्गो नामाहं भुञ्जेऽहं करोमीति भोक्तृकर्तृतादात्म्यापत्तिस्तां न करोति, किंत्वसङ्गोदासीनत्वेन सर्वत्र साक्षिभूतस्तिष्ठतीत्यर्थः। यद्वा प्राक्तनसंस्कारानुरूपा प्रवृत्तिरनुषक्तिस्तां न करोति प्रवृत्तेः काममूलत्वात्कामस्य संकल्पमूलत्वात्संकल्पानां सर्वेषामप्याश्रयमिथ्यात्वविज्ञानेन संन्यस्तत्वाद्विदुषः शब्दादिषु कर्मसु चाप्यनुषङ्गाभावो युक्तः। कारणाभावे कार्याभाव इति न्यायात्। यद्वा विपरीतप्रत्ययनिरसनपूर्वकं सर्वत्र ब्रह्मदर्शननिष्ठायां प्रवृत्तो ब्रह्मविद्यतिः स्वयं सर्वसंकल्पसंन्यासी अधिष्ठानाऽज्ञानदोषेण शुक्तौ रजतप्रत्ययवन्निर्विशेषे परे ब्रह्मण्यद्वितीये घटः पटः कुड्यमिति भ्रान्त्या सम्यक्कल्प्यन्त इति संकल्पाः वि-

परीतप्रत्ययास्तान् सर्वान्संकल्पान्संन्यसितुं चिद्वृत्त्या ब्रह्मणि प्रविलापयितुं शीलमस्यास्तीति सर्वसंकल्पसंन्यासी विजातीयप्रत्ययप्रविलापनपरतया सजातीयप्रत्ययावृत्तिं कुर्वन्नित्यर्थः । यदा यस्मिन्काले सर्वत्र ब्रह्ममात्रग्रहणशीला बुद्धिवृत्तेः स्थिरीभावदशायां इन्द्रियार्थेषु क्वचिदाभासतः प्रतीयमानेषु विषयेषु कर्मसु च चक्षुरादीन्द्रियैस्तत्तद्विषयग्रहणकर्मस्वपि नानुषज्जते अनुषक्तिं न करोति । अनुषक्तिर्नामाकस्माद्दृष्टार्थानुरूपेण पुनर्वृत्तेः परिणतिस्तां चक्षुरादिभिरिन्द्रियैर्ग्रहणक्रियां च न करोति, किंतु दृष्टान्विषयान् तद्वृत्तिद्रष्टारं च प्रत्यावृत्त्या ब्रह्मणि प्रविलापयतीत्यर्थः । एवं द्रष्टृदर्शनदृश्यादिभेदभिन्नं विश्वं सर्वं यदा ब्रह्ममात्रं पश्यति तदा योगारूढः सर्वस्य स्वस्य च ब्रह्ममात्राकारप्रत्ययोऽप्रतिबद्धो योगस्तत्रारूढः प्रतितिष्ठत इति कृत्वा योगारूढ इत्युच्यते । स्थितप्रज्ञोऽयं जीवन्मुक्त इति पण्डितैरन्योन्यं प्रतिभाष्यत इत्यर्थः । 'विजानन्विद्वान्भवते नातिवादी', 'आत्मक्रीड आत्मरतिः क्रियावान्' इत्यादिश्रुतिप्रसिद्धिद्योतनार्थो हिशब्दः ॥ ४ ॥

मुमुक्षुदुर्लभं मानुषं तत्रापि ब्राह्मं देहं प्राप्य सदसद्विवेकसंपादनयोग्यं स्वोद्देशेन कृतश्रौतादिसत्कर्मभिर्भक्त्या च प्रसन्नपरमेश्वरप्रसादसंपन्नो भूत्वा शमादिसाधनसंपत्त्या सद्गुरोः सकाशाच्छ्रवणं मननं च कृत्वा ब्रह्मैवाहमिति स्वात्मना ब्रह्म ज्ञात्वा योगारूढः सन् चिदेकरसब्रह्मात्मना यदा तिष्ठति तदा खल्वयं संसारदुःखसागरे मग्नमात्मानं स्वयमेव समुद्धृत्य मोक्षसाम्राज्यसुखे संस्थापितवान् भवति यतस्ततो ब्राह्मणादिभिर्विवेकसंपन्नैर्मनुष्यत्वब्राह्मणत्वविवेकित्वादिसिद्धेः साफल्याय सर्वं संन्यस्य प्रयत्नेन संसाराब्धिनिमग्नस्यात्मनः समुद्धरणमवश्यं कर्तव्यमित्याह—

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ५ ॥

उद्धरेदिति । पुत्रमित्रकलत्रादिगोचरमहामोहावर्तशताकुले कामक्रोधलोभाहंकारममकारादिचित्तविकारमहाग्राहसमुज्जृम्भिते नानाविधमहारोगतिमितिमिंगिलकोटिविराजिते अशनायापिपासादिमहाकल्लोलोद्वेल्लिते तापत्रयनिबिडवडवानलज्वालामालासंवीते स्वेष्टजननष्टिप्रयुक्तप्रलापमहाध्वनिविघूर्णिते नित्यनिरन्तरदुर्वासनाशैवालपटलसंकीर्णे विषयविषपरिपूर्णे संसारार्णवे निमग्नं जन्ममृत्युजरादिदुःखेन हतोऽस्मीत्याक्रोशन्तमात्मानं स्वमात्मना श्रद्धाभक्तिसमाराधितपरमेश्वरप्रसादवता सदसद्वि-

कवैराग्यशमदमादिसाधनवता श्रवणादिसमुत्पन्नात्मज्ञानवता स्वेनैवोद्धरेत् स्वोद्धरणे स्वयमेवोक्तलक्षणसंपन्नः साधनमनुत्तमं नान्यत् । सत्येवोक्तलक्षणे साधकतमे कार्यं साधनान्तरं च सिध्यति नान्यथा । ततो विचक्षणो मुमुक्षुरुक्तलक्षणवता स्वेनैव स्वोद्धरणं कुर्यात्, यथा महाज्वरादिप्रचण्डरोगदुःखनिमग्नमात्मानं स्वं स्वयमेव प्रतिकूलमपथ्याचरणादिकमपास्य दिव्यौषधपथ्यसेवननिरतो भूत्वा प्रयत्नेन रोगादुद्धरति, तथा भूतदयाहीनानापस्तम्बोक्तान् क्रोधादिदुर्गुणान् तत्कार्याणि चापास्य प्रतिकूलं सर्वं कर्म संन्यस्यामानित्वादीनामात्मगुणानां च सेवया सद्गुरोः संनिधौ नियमेन कृतश्रवणादिनात्मज्ञानं समधिगम्य योगारूढो भूत्वात्मानं स्वं स्वयमेव संसारसागरादुद्धरेदित्यर्थः । आत्मन उद्धरणं नामाविद्यातत्कार्यसंबन्धलेशरहितेन सच्चिदानन्दैकस्वरूपेण स्थापनमेव । स्वस्वःरूपेणावस्थानं खल्वात्मनो मोक्षस्तमेव निरन्तरब्रह्मयोगनिष्ठया मुमुक्षुसंपादयेत् नत्वनाद्यविद्यावासनावशवर्ती सन् बहिर्मुखो भूत्वात्मानमवसादयेत् । यथा रोगी जिह्वादोषवेगवशगो भूत्वा स्वारोग्यप्रतिकूलमपथ्यं भुक्त्वा स्वं स्वयमेव नाशयति, तथा मुमुक्षुर्यतिर्बाह्यवासनयात्मतरणप्रतिकूलां बहिःप्रवृत्तिं कृत्वा स्वं स्वयमेव न नाशयेत्, किंतु 'वाचं यच्छ मनो यच्छ यच्छ प्राणेन्द्रियाणि च । आत्मानमात्मना यच्छ न भूयः कल्पसेऽध्वने' इति न्यायेनान्तःप्रवणो भूत्वा स्वोद्धरणमेव कुर्यादित्यर्थः । ननु पङ्के मग्नं पशुं तदीया इवात्मानं भ्रातृपुत्रादयो बान्धवाः कन्यादानश्राद्धादिभिः समुद्धरिष्यन्ति किं स्वप्रयासेनेत्याशङ्कायामाह—**आत्मैवेति** । स्वाविद्यया जननमरणादिदुःखप्रवाहे पतित्वाऽध्यात्मिकादितापत्रयाग्निना संतप्यमानस्यात्मनः स्वस्यात्मा स्वयमेव बन्धुः संसारदुःखान्मोचयित्वा निरतिशयमोक्षसुखेन बध्नातीति बन्धुः संसारदुःखाब्धितारकः स्वस्य स्वयमेव नतु भ्रात्रादिः तत्कर्तृकश्राद्धादिपुण्यकर्मणामविषयत्वेनात्मा न तैस्तार्यते । यथा महारोगी परकर्तृकपथ्यौषधसेवया न तार्यते विना स्वकर्तृकया, तथैव स्वयमपि स्वकर्तृकश्रवणमनननिदिध्यासनसमाधिनिष्ठया विना पुत्रादिभिर्न तार्यते प्रत्युत स्नेहास्पदत्वेन बन्धहेतुरेव भवति पुत्रादिर्न तु मुक्तये । तत एवावधार्यते 'आत्मैव ह्यात्मनो बन्धुः' इति । स्वस्य रोगक्षुधादिदुःखप्राप्तौ तन्निवर्तकत्वं स्वस्यैव दृष्टमिति प्रत्यक्षप्रसिद्धम् । 'एतैरुपायैर्यतते यस्तु विद्वान् तस्यैवात्मा विशते ब्रह्मधाम' इत्यादिश्रुतिप्रसिद्धिं च हिशब्दो द्योतयति । नन्वात्मानं प्रत्यात्मन एव बन्धुत्वे स्वातिरिक्तानामेव सर्वेषां शत्रुत्वं सिद्धं न काप्यात्मन इत्यादिश-

ङ्कायां । न । स्वोद्धारणाय यत्नमकुर्वाणो यो बहिर्मुखः स एव स्वस्य स्वयं शत्रुर्भवतीत्याह—**आत्मैवेति** । आत्मनः स्वस्यात्मैव शत्रुः शान्तो दान्त इत्युक्तसाधनसंपत्त्यात्मोद्धरणाय समाधिमकुर्वाणो यः स एव यतिः स्वस्य स्वयमेव शत्रुर्भवति । यथा जिह्वादोषेणापथ्यकारी स्वस्य स्वयमेव शत्रुस्तथा शमादिसाधनसामग्रीमनालम्ब्य स्वोद्धरणसाधनभूतब्रह्मयोगनिष्ठायामतिष्ठन्ननाद्यविद्यावासनावेगाद्विदेहमुक्तिहेतोर्ज्ञानस्य निर्मूलकं बाह्यमेवावलम्बते यतस्तत आत्मन आत्मैव रिपुर्मारकः, नतु बहिरपकर्ता । तस्य बाह्यकार्यं प्रत्येव रिपुत्वं नतु मुक्तिं प्रति । अत एवावधार्यते आत्मैव रिपुरात्मन इति । मुक्तिहेतोः सार्वात्म्यसिद्धेर्बाह्यालम्बनस्यैव प्रतिपक्षत्वात्तत्कर्तुः स्वस्य युक्तं स्वं प्रति स्वस्यैव रिपुत्वं रोगिण्यपथ्यकारिणि तद्दृष्टमिति हिः प्रसिद्धिं द्योतयति ॥ ५ ॥

यदुक्तं स्वं प्रति स्वस्यैव बन्धुत्वं शत्रुत्वं च तदिदानीं विस्पष्टयति—

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥

बन्धुरिति । अनाद्यविद्यावासनया रागद्वेषादिभिश्च बन्धकगुणैरिन्द्रियवशो भूत्वा देहेन्द्रियादिप्रवृत्तिमेव स्वाभाविकीं स्वस्येष्टामेव मन्यमानो य आत्मा संसरति तस्यात्मनः सदसद्विवेकवता तीव्रविरक्तिमता मोक्षेच्छयैव कृतश्रवणादिना विज्ञातात्मतत्त्वेनामानित्वादिगुणसंपन्नेन येनात्मना रागद्वेषादिदोषानभिभूयात्मा कार्यकारणसंघात एव जितो निर्जितो भवति स आत्मा बन्धुर्भवति । कार्यकरणसंघातजयस्तु तत्प्रवृत्तिप्रतियोगिगुणावष्टम्भेन कर्तव्यः । देहप्रवृत्तिर्देहशिरोग्रीवाणां समत्वधारणेन धैर्येण च । प्राणप्रवृत्तिः प्राणायामेन क्षान्त्या च । इन्द्रियप्रवृत्तिर्मनःप्रवृत्तिश्च वैराग्येण शान्त्या च । बुद्धिप्रवृत्तिः सदसद्विवेकविज्ञानेन तीव्रमोक्षेच्छया च । ब्रह्मण्येवात्मभावेनाहंकारप्रवृत्तिर्जेतव्या । एवं कार्यकरणसंघातलक्षण एवात्मा येन वशीकृतो भवति स कार्यकरणसंघातजेतात्मा पूर्वोक्तस्याहंममेतिसंसरिष्णोरात्मनो बन्धुस्तारको भवति । स्वतरणकारणभूतज्ञानस्याप्रतिबन्धत्वाय क्रियमाणसमाधिनिष्ठाप्रतिकूलकार्यकरणसंघातप्रवृत्तिं वासनाकृतां निगृह्य यस्मात्समाधावेव प्रवर्तते तस्मादित्यर्थः । एतेन देहेन्द्रियमनोबुद्ध्यादेरनुकूलत्वे समाधिर्ज्ञानं च मोक्षश्च सिध्यति नान्यथा । ततः प्रतियोगिगुणावष्टम्भेन देहेन्द्रियादेर्जयोऽवश्यं मुमुक्षोर्यतेः कर्तव्य इति सूचितम् । तत एव देहेन्द्रियादेर्जयमकुर्वाणः स्वस्य स्वयमेव शत्रुर्भवतीत्याह—**अनात्मन इति** । अनात्मनो देहेन्द्रियादेः स्वस्ववासनानुरूप-

प्रवृत्त्या शत्रुत्वे समाधिनिष्ठाप्रतिकूलत्वे सति तत्प्रवृत्त्यनुसार्यात्मापि संसारमग्नस्यात्मनः स्वस्य स्वयं शत्रुवदेव भवति । स्वोद्धरणक्रियाप्रतिकूलदेहाद्यनुसारित्वाद्यथा रोगी विरोध्यपथ्यानुसारी पुरुषः स्वस्य स्वयं शत्रुर्भवति तथाऽयमात्मापि । 'नाविरतो दुश्चरितात्', 'यच्छेद्वाङ्मनसी प्राज्ञः' इति, 'वाचं यच्छ' इत्यादिश्रुतिस्मृत्युक्तमोक्षमार्गमनादृत्य यतो वासनानुरूपेण स्वमुक्तेः प्रतिकूलां बहिःप्रवृत्तिमेव करोति ततो युक्तमात्मनः स्वं प्रति स्वस्य शत्रुत्वम् । यस्मादेवं तस्मान्मुमुक्षोर्यतेः श्रवणादिजन्यज्ञानवतो विदेहकैवल्यसिद्ध्यै कर्तृकरणभोक्तृभोग्यादिसर्वदृश्यमिथ्यात्वबुद्ध्या तीव्रवैराग्येण च मिथ्याविषयां बन्धकरीं बाह्यप्रवृत्तिं निगृह्य ब्रह्मयोगनिष्ठामधिष्ठायात्मोद्धरणमवश्यं प्रयत्नेन कर्तव्यमिति सिद्धम् । ननु 'उद्धरेदात्मनात्मानं' इत्यात्मनैवात्मनउद्धरणं कर्तव्यमित्युक्ते त्वेकस्यैवात्मनः कर्तृकर्मभावः प्रसज्यते स च लोकशास्त्रविरुद्धः, नहि स्वस्कन्धं स्वयमारोढुं शक्नोति तद्वत् स्वं स्वयमुद्धर्तुं च न शक्नोत्येवेति चेत्सत्यम् । स्वंप्रति स्वस्य कर्तृभावः कर्मभावश्च नोपपद्यते तथापि गुणभेदेन तद्द्वयमात्मन्येकस्मिन्नप्युपपद्यते । तदुच्यते । स्वाज्ञानेन संसारे पतितं स्वं स्वयमेव शमदमसंन्यासादिसाधनसंपत्त्या श्रवणमनननिदिध्यासादिभिः समुत्पन्नकूटस्थासङ्गचिद्रूपत्वविज्ञानेन देहेन्द्रियादिसंबन्धरहितं ज्ञात्वा कर्तृत्वभोक्तृत्वादिसंबन्धेभ्यो मोचयितुमर्हत्येव । यथा अज्ञानेनारण्ये निर्जने ह्रदेऽन्यत्र वा पङ्के पतितं स्वं स्वयमेव विवेकी चतुरः पुरुषस्तरुं तरुशाखां वा लतां वान्यद्वालम्ब्योपायेन पङ्कात्समुद्धरति तद्वदेतन्न्यायाद्भगवद्वचनाच्च न कोऽपि विरोधः ॥ ६ ॥

समाधेः प्रतिकूलां देहेन्द्रियादिप्रवृत्तिं निरुध्य समाधिनिष्ठां कृतवतो यतेः फलमहमेवेदं सर्वमिति सर्वत्राप्रतिबद्धात्मापारोक्ष्यमेवेति सूचयन् वक्ष्यमाणलक्षणसंपन्नो भूत्वा यः समाधिनिष्ठासंपादितविज्ञानबलेन विपरीतप्रत्ययानामकम्प्यो भवति स योगारूढ इति बोधयति—

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ७ ॥
ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥ ८ ॥

जितात्मन इति द्वाभ्याम् । विवेकवैराग्याभ्यां तीव्रमोक्षेच्छया चेश्वरप्रसादाद्गुरोः प्रसादाच्च श्रुत्वा मत्वात्मानं सम्यग्विज्ञाय कार्य-

कारणसंघातं वशीकृत्यात्मोद्धरणाय यः समाधिं करोति तस्य जितात्मनः जितो निर्जितः समाधिना सर्ववासनापटलसंक्षये सति विपरीतग्रहो यथा न स्यात्तथा वशीकृतो विपरीतग्रहवैमुख्यं प्रापित आत्मा मनो यस्य तस्य जितात्मनस्तत एव प्रशान्तस्य निर्विकल्पस्य यतेः परमात्मा निरतिशयानन्दरूपत्वान्निरवधिकमहत्त्वाच्च परमश्चासावात्मा च परमात्मा परं ब्रह्म समाहितः सम्यगाहितः समाहितः विपरीतप्रत्ययनिर्मुक्तो भूत्वा बहिरन्तः सर्वत्र चक्षुषो रूपमिव बुद्धिवृत्तेः स्वयमेव विषयो भवतीत्यर्थः । कर्ताहं भोक्ता सुखी दुःखीत्यादिविपरीतप्रत्ययैः संसारीभूतस्यात्मनः समाधिनिष्ठासंजातविज्ञानबलेन तत्तत्प्रत्ययसंबन्धराहित्यापादनमेवात्मनः समुद्धरणमिति परमात्मा समाहित इतिपदेन सूचितं भवति । यदुक्तमुद्धरेदात्मनात्मानमिति तदुद्धरणप्रकारमेव निरूप्येदानीमेवंलक्षणो योगारूढो जीवन्मुक्त इति योगिनो योगारूढत्वं सूचयितुमाह—**ज्ञानेति** । तस्य योगनिष्ठासिद्धेरसाधारणकारणमाह—**विजितेन्द्रिय इति** । सदसद्विवेकजन्यतीव्रमोक्षेच्छाभ्यां विशिष्य जितानि विजितानि विषयग्रहणवैमुख्यं गमितानीन्द्रियाणि बाह्याभ्यन्तरकरणानि येन स जितेन्द्रियो भूत्वा, योगी योगनिष्ठायां प्रवृत्तो ब्रह्मविद्यतिः स्वयं ज्ञान, विज्ञानतृप्तात्मा 'सर्वं खल्विदं ब्रह्म', 'तज्जलानिति', 'अयमात्मा ब्रह्म', 'तत्त्वमसि', 'ब्रह्मैवेदं सर्वम्' इत्यादिश्रुतयः, 'वासुदेवः सर्वम्' इत्यादिस्मृतयश्च सर्वस्य जगतो नामरूपप्रत्ययनिरासपूर्वकं नियमेन ब्रह्ममात्रत्वं प्रतिपादयन्ति । निरुक्तश्रुतिस्मृतिवाक्यबलात्सर्वस्य ब्रह्ममात्रत्वावधारणमप्रतिहतं ज्ञानं शास्त्रेण सूर्यग्रहणनिश्चयवत् । विज्ञानं तु श्रुतिस्मृतिभिः सम्यङ्निर्धारितस्य चिदेकबुद्धिवृत्त्या ब्रह्मैवाहमिदं जगच्चेति निर्विशेषात्मना सर्वतः परिपूर्णस्य साक्षादपरोक्षीकरणम् । चक्षुषा राहुग्रस्तार्कबिम्बदर्शनवदेताभ्यामुक्तलक्षणाभ्यां ज्ञानविज्ञानाभ्यां सर्वस्य ब्रह्ममात्रत्वावगाहकाभ्यामप्रतिबन्धाभ्यां तृप्तः पूर्णः विकल्पान्तरस्यावकाशरहित आत्मा मनो यस्य स ज्ञानविज्ञानतृप्तात्मा । तत एव समलोष्टाश्मकाञ्चनः समानि चिदाकारवृत्त्या समत्वेन ब्रह्ममात्रतया दृष्टानि लोष्टाश्मकाञ्चनानि येन स समलोष्टाश्मकाञ्चनः सर्वत्र ब्रह्ममात्रदर्शीत्यर्थः । एतेन बाह्यपदार्थविवेकराहित्यं हेयोपादेयत्वबुद्धिशून्यत्वं च सूचितं भवति । ननु योगारूढस्य ब्रह्मविदः सदा सर्वत्र ब्रह्मदर्शनमनुपपन्नं प्राप्ते सत्याधिभौतिकाद्युपद्रवे तद्दर्शनतदनुसंधानाभ्यां ब्रह्मदर्शनस्य व्याघातः स्यादित्याशङ्कायाम् । न । विजितेन्द्रियत्वान्निःशेषविनष्टबाह्यवासनत्वाच्च तेषु

प्राप्तेष्वपि ब्रह्मविद्ब्रह्मदृष्ट्यैव तिष्ठति न ततश्चलतीति बोधयितुमाह—**शीतोष्णेति** । मानापमानयोर्मानः स्तुतिपूजोपचारादिः, अपमानस्तु निन्दातिरस्कारादिस्तयोः प्राप्तयोः सतोस्तथा शीतोष्णसुखदुःखेषु शीतोष्णेत्याधिभौतिकानामाधिदैविकानां चोपलक्षणम् । सुखदुःखेत्याध्यात्मिकानामुपलक्षणम् । शीतोष्णव्याघ्रसर्पादावग्न्यादिषु वृष्ट्यशून्यादिषु च ज्वरादिषु मिष्टान्नादिषु च प्राप्तेषु सत्स्वपि ब्रह्मवित्समदर्शन एव भवति नत्वारोपितनामरूपक्रियातत्फलानुसंधानपरो भवति । नामरूपादेर्ब्रह्मणि प्रविलापितत्वेन पुनर्वृत्तिविषयत्वायोगात्ततः स्वयं ब्रह्मदृष्ट्यैव तिष्ठति न ततः किंचिच्चलति । तथाच श्रुतिः—'महत्पदं ज्ञात्वा वृक्षमूले वसेत् कुचैलोऽसहाय एकाकी समाधिस्थ आत्मकाम आप्तकामो निष्कामो जीर्णकामो व्याघ्रे हस्तिनि सिंहे दंशे मशके नकुले सर्पे यक्षे राक्षसे गन्धर्वे मृत्यो रूपाणि विदित्वा न बिभेति। कुतश्चनेति 'वृक्ष इव तिष्ठासेच्छिद्यमानो न कुप्येत न कम्पेत उपल इव तिष्ठासेच्छिद्यमानो न कुप्येत न कम्पेत आकाशमिव तिष्ठासेच्छिद्यमानो न कुप्येत न कम्पेत सत्येन तिष्ठासेत्' इति । एवं विपरीतप्रत्ययहेतुषु प्राप्तेष्वपि ब्रह्मवित्कूटस्थो विपरीतप्रत्ययैरकम्प्यो भवति यदा तदा युक्तो योगारूढ इत्युच्यते पण्डितैरिति द्वयोरर्थः ॥ ७ ॥ ८ ॥

ज्ञानविज्ञानपूर्णत्वं बाह्यपदार्थविवेकरहितत्वं हेयोपादेयबुद्धिशून्यत्वं विपरीतप्रत्ययैरकम्पितत्वं च योगारूढस्य लक्षणमिति प्रतिपाद्येदानीमपि सर्वत्र समदर्शनमेव ब्रह्मविदो योगारूढस्य जीवन्मुक्तस्य लक्षणमिति तदेव पुनर्द्रढयति—

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥

सुहृदिति । सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु । प्रत्युपकारमनपेक्ष्यैवोपकर्ता सुहृत् । 'ददाति प्रतिगृह्णाति' इत्याद्युक्तलक्षणलक्षितं मित्रम् । परोक्षाऽपरोक्षयोरपकर्ताऽरिः शत्रुः । अप्रियवादित्वात् द्वेष्टुं योग्यो द्वेष्यः । वादिप्रतिवादिनोः समो मध्यस्थः । सर्वत्रोपेक्षावानुदासीनः । बन्धवो बान्धवास्तेषु प्राणात्ययेऽपि ये स्वधर्मं न त्यजन्ति शास्त्रानुवर्तिनस्ते साधवस्तेष्वपि निषिद्धकारिणो दुराचाररताः पापास्तेषु च संन्यासात्पूर्वमुक्तगुणविशिष्टेष्वपि सुहृदादिपापिष्ठान्तेषु जनेषु योगारूढस्य ब्रह्मविदो यतेस्तत्तन्नामरूपजातिगुणक्रियाग्रहणेन विनैव समबुद्धिः सर्वत्र ब्रह्मबुद्धिर्विशिष्यते । क्वचिदापाततो मृदि घटबुद्धिवत्पदार्थबुद्धौ जाता-

यामप्युत्तरक्षणे तां बाधित्वा घटे मृद्बुद्धिवत्सर्वत्र ब्रह्मबुद्धिरेव विशेषायते । ब्रह्मप्रत्यय एवाबाध्यमानः स्थिरीभवतीत्यर्थः । समबुद्धिर्विमुच्यत इति पाठे तु समबुद्धिरिति प्रथमान्तं पदं विशेषणम् । समा समाकारतामापन्ना सदा सर्वत्र ब्रह्ममात्रग्राहिणी बुद्धिर्यस्य स समबुद्धिर्विमुच्यते । सुहृदादिषु सर्वत्र सदा ब्रह्मैव यः पश्यति स मुक्तो भवतीत्यर्थः ॥ ९ ॥

यतो योगारूढस्यैवाप्रतिबद्धज्ञानं सर्वत्र ब्रह्मदर्शिनं मुक्तिश्च नान्यस्यातो मुमुक्षुणा श्रवणमननाभ्यां विज्ञातात्मतत्त्वेन यतिनैतावन्मात्रेणैव कृतार्थोऽस्मीत्यस्मितां त्यक्त्वा ज्ञानस्याप्रतिबद्धत्वाय समाधिरवश्यं कर्तव्य इति तत्कर्तुः समाध्यङ्गानि सूचयन्समाधिं विदधाति—

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ १० ॥

योगीति । योगी 'संन्यासयोगाद्यतयः शुद्धसत्त्वाः' इतिश्रवणात्संन्यासी । यद्वा ब्रह्मणि चित्तं योक्तुं स्थापयितुं शीलमस्यास्तीति योगी योगाभ्यासशीलो यतिरेकाकी एकाकीतिविशेषणान्निदिध्यासोः 'एकस्तपो द्विरध्यायी' इति न्यायेन स्वातिरिक्तजनशून्यत्वं विवक्षितम् । सति जनान्तरे वाग्व्यापारप्रसक्त्या ध्याननिष्ठाभङ्गप्रसङ्गात्तत एकाकित्वेन भवितव्यम् । किंच निराशी सर्वाभ्य आशीर्भ्यो विषयभोगाशाभ्यस्तीव्रमोक्षेच्छावैराग्याभ्यां निर्गतो यः स निराशीः—'एकान्तवासो लघुभोजनादि मौनं निराशाकरणावरोधः । मुनेरसोः संयमनं षडेते चित्तप्रसादं जनयन्ति शीघ्रम् ॥' इति न्यायेन निदिध्यासोर्देहजीवनादावप्याशाराहित्येन भवितव्यमिति सूचितम् । किंच अपरिग्रहः कौपीनकन्थातिरिक्तः परिग्रहो यस्य नास्ति सोऽपरिग्रहः । सति तदतिरिक्ते परिग्रहे यतेरपि चौरादिभयं तद्रक्षणविक्षेपप्रसक्त्या समाध्यसिद्धेस्ततस्तद्राहित्येन भवितव्यम् । एवं योगस्य बहिरङ्गसिद्धावप्यन्तरङ्गाभावे योगो न सिध्यत्यतस्तेन भवितव्यमित्याशयेनाह—**यतचित्तात्मेति** । यतौ वासनया प्राप्ततत्तद्व्यापृतेः सकाशान्निगृहीतौ चित्तं चात्मदेहेन्द्रियसंघातश्च तावुभौ येन स यतचित्तात्मा तत्तद्व्यापारान्निरुद्धदेहेन्द्रियमनोबुद्धिचित्त इत्यर्थः । एवमादिध्यानसाधनसंपन्नो मुमुक्षुर्निदिध्यासुः स्वयं रहस्येकान्ते गिरिकुहरगुहादौ स्थितः सततं नित्यनिरन्तरं नियमेनात्मानं मनः प्रत्यगभिन्ने परे ब्रह्मणि सर्वदृश्यनिषेधावधिभूते नाज्ञानतत्कार्ये किंतु नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयमित्युक्तलक्षणे स्वात्मनि युञ्जीत संदधीत । ब्रह्मैवाहमहमेव ब्रह्मेति स्वात्मना ब्रह्मानुसंदध्यादित्यर्थः ॥ १० ॥

पूर्वं योगस्य बहिरङ्गमन्तरङ्गं च संक्षेपेणोक्त्वेदानीं देशासनशरीरधारणादीनि बहिरङ्गान्यन्तरङ्गाणि च योगस्य विशिष्य बोधयितुमादावासनलक्षणमाह—

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ ११ ॥

शुचाविति । शुचौ मार्जनप्रोक्षणादिक्रियया स्वभावेन वा शुद्धे विजने देशे प्रदेशे नदीतीरगुहादावात्मनः स्वस्यैव ध्यानयोग्यमासनं नात्युच्छ्रितमत्यन्तौन्नत्यरहितम् । अत्युन्नतत्वे कचित्पारवश्येन चलनपतनादिविघ्नप्रसङ्गात्ततो नातितुङ्गं नातिनीचं निम्नं च । तथात्वे शैत्यौष्ण्यपाषाणादिघर्षेण क्लेशप्रसङ्गात्ततस्तदुभयविलक्षणम् । तत्रापि चैलाजिनकुशोत्तरं चैलं वस्त्रं, अजिनं वैयाघ्रं कार्ष्णं वा, कुशा दर्भा उत्तरमुपर्युपरि व्युत्क्रमेण यस्य तच्चैलाजिनकुशोत्तरम् । अधः कुशैस्ततोऽजिनेन ततो वस्त्रेणाच्छादितमित्यर्थः । वस्त्रं यद्यपि स्मृत्या निषिद्धं 'वस्त्रं दारिद्र्यदुःखाय दारु रोगाय चोपलः' इति तद्गृहस्थविषयं न यतिविषयमिति द्रष्टव्यम् । ध्याता स्वस्यैवमासनमचलं स्थिरं निश्चलं यथा तथा प्रतिष्ठाप्य । कल्पयित्वेत्यर्थः ॥ ११ ॥

एवमासनमुक्त्वा तत्र कर्तव्यमाह—

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥ १२ ॥

तत्रेति । निदिध्यासुस्तत्रोक्तलक्षण आसने उपविश्य स्वयं यतचित्तेन्द्रियक्रियः इदमेव योगिनो योगसिद्धेरुत्तममन्तरङ्गसाधनमित्युक्तमपि पुनरुपदिशति—**यतचित्तेन्द्रियक्रिय इति** । यता संयता सम्यङ्निरुद्धा चित्तस्योभयेन्द्रियाणां च क्रिया स्वाभाविकी चेष्टा विषयप्रवृत्तिर्येन स यतचित्तेन्द्रियक्रियो भूत्वा मनो मनोवृत्तिस्तामेकाग्रं लक्ष्यस्यैवाभिमुखं कृत्वा सम्यक्प्रत्यक्प्रवणं कृत्वेत्यर्थः । एवंलक्षणसंपन्नो यतिरात्मविशुद्धये आत्मनो विशुद्धिरविद्यातत्कार्यदेहेन्द्रियादावन्यत्राहंममेदमित्याद्यसत्प्रत्ययानां तत्कारणवासनानां च निःशेषनिवृत्तिरेवात्मनोऽन्तःकरणस्य विशुद्धिस्तत्सिद्धये योगं ब्रह्मण्येवात्मभावेन पुरुषं योजयतीति योगः समाधिस्तं युञ्ज्यात् प्रत्यक्प्रत्ययसंतानं कुर्यादित्यर्थः ॥ १२ ॥

पुनरपि योगाङ्गान्येव सिद्धेरान्तराण्युपदिशन्नेवंलक्षणः सन्नेव यतिः समाधिं कुर्यादित्याह—

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥ १३॥

सममिति द्वाभ्याम्। कायशिरोग्रीवं कायः कटेरूर्ध्वप्रदेशः। कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवम्। समं ऋज्वचलं च यथा स्यात्तथा धारयन्। कायशिरोग्रीवे समतया ऋजुत्वेन धार्यमाणे पार्श्वयोः पश्चाच्च द्रष्टुं स्प्रष्टुं च न शक्यते, तथापि मशकपिपीलिकाद्युपद्रवे चलनं संभवति तन्निरासार्थमचलमित्युक्तम्। एवं कायशिरोग्रीवमृज्वचलं च धारयन् स्थिरः स्थाणुवन्निश्चलो भूत्वा स्वं स्वकीयं नासिकाग्रमेव चक्षुषा संप्रेक्ष्य। चक्षुषा नासिकाग्रं संप्रेक्ष्येत्युक्तिश्चक्षुषा तद्विषयं रूपं न गृह्णीयादिति नियमार्थं नतु नासिकाग्रदर्शनार्थम्। यदि नासिकाग्रदर्शनमेव विवक्षितं स्यात्तदा मनस्तदाकारेण तत्रैव स्थितं स्यात्, तेन चित्तस्य ब्रह्मण्यवस्थानं न संभवति, ब्रह्मणि चित्तस्थापनं खलु समाधिः। यत आत्मसंस्थं मनः कृत्वेत्युच्यते ततश्चक्षुषा नासिकाग्रदर्शनविधौ रूपाग्रहणसूचनार्थमेव चक्षुषोरचाञ्चल्यार्थं च। तेन सिद्धं चक्षुषो यथारूपाग्रहणं तथा श्रोत्रादीनामपि शब्दाद्यग्रहणमत्र विवक्षितमिति ज्ञातव्यम्। चक्षुषो रूपाग्रहणविधानादेव निदिध्यासुं नियमयति— **दिशश्चानवलोकयन्निति**। यद्यपि नासिकाग्रदर्शनविधिनैव तदतिरिक्तदर्शनं निषिद्धमेव भवति तथापि क्वचित्पुरस्तात्पश्चात्पार्श्वयोर्विपरीतशब्दोत्पत्तावपि दिशश्च प्राच्यादींश्चकारादात्मशरीरं चानवलोकयन्नेव युक्त आसीतेत्युत्तरेण संबन्धः॥ १३॥

समकायशिरोग्रीवत्वं स्थिरत्वं नासिकाग्रद्रष्टृत्वं दिगनवलोकनं च योगिनो योगसिद्धेरङ्गानीति सूचयित्वेतोऽप्यन्तरङ्गानि तत्सिद्धेरसाधारणसाधनानि च सूचयन्नुक्तसाधनसंपन्नो यतिः समाधिं कुर्यादित्याह—

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥ १४॥

प्रशान्तेति। प्रकर्षेण शान्तः प्रशान्त आत्मा रागद्वेषानुत्पत्तिरेवात्मनोऽन्तःकरणस्य शान्तिस्तस्याः प्रकर्षस्तु रागद्वेषादिदोषोत्पत्तिहेतूनां विषयेषु समीचीनत्वासमीचीनत्वप्रीत्यप्रीतीष्टसाधनत्वानिष्टसाधनत्वबुद्धीनां निवृत्तिरेव। एवंलक्षणः प्रशान्त आत्मान्तःकरणं यस्य स प्रशान्तात्मा। विगतभीः विशिष्य गता विगता निःशेषविनष्टा भीरन्नादानविसर्गातिरिक्तस्य दन्तधावनमुखक्षालनादेः शास्त्रीयस्य सर्वस्य च कर्मणः परि-

त्यागे शिष्टा निन्दिष्यन्तीति या भीतिः सा यस्य न विद्यते स विगतभीः 'स्वाध्यायं च सर्वकर्माणि संन्यस्य' इत्यादि, 'वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्' इति, 'त्यज धर्ममधर्मं च', 'नैव धर्मी न चाधर्मी नचैव हि शुभाशुभी' इत्यादिश्रुतिस्मृतिनिश्चयमवष्टभ्य निर्भीक इत्यर्थः । किंच ब्रह्मचारिव्रते स्थितः । अत्र ब्रह्मचारिव्रतपदेन भिक्षामात्रं लक्ष्यते नतु त्रिषवणादिः । त्रिषवणाद्यनुष्ठानस्य समाधिसंभाविताऽविक्रियब्रह्माभिन्नत्वज्ञानविध्वंसकत्वाद्योगं युञ्जीत सततमिति नित्यनिरन्तरकर्तव्यतया प्राप्तसमाध्यनुष्ठानप्रतिकूलत्वाच्चाहारमात्रमत्र गृह्यते । आहारविषये ब्रह्मचारिणो व्रतं भिक्षाशनमेव । तस्मिन् ब्रह्मचारिव्रते केवलं माधुकरभक्षण एव स्थितो भवेन्निदिध्यासुर्यतिर्न तु प्राक्प्रणीतादौ । प्राक्प्रणीतायाचिततात्कालिकोपपन्नेषु, आहारस्य परतन्त्रत्वेन द्रव्यगुरुत्वाकालिकत्वन्यूनातिरिक्तत्वप्रतीक्षादिदोषवत्तया समाधिविघ्नकारित्वप्रसङ्गात् । तस्मात्स्वाधीने ब्रह्मचारिव्रते भिक्षाशन एव स्थितो भवेदित्यर्थः । मनोवृत्तिरूपं बहिःप्रवणशीलं संयम्य विषयसंबन्धो यथा न स्यात्तथा निगृह्य मच्चित्तः मयि बुद्धितद्वृत्तिसाक्षिणि चिदेकरसे प्रत्यग्रूपे ब्रह्मणि चित्तं यस्य स मच्चित्तः । बहिर्गच्छच्चित्तं मयि सम्यक् स्थापयित्वेत्यर्थः । मच्चित्त इत्यत्रास्मच्छब्दार्थस्य चित्तस्थापनाधिकरणस्य ब्रह्मणः स्थापयितुश्च भेदे प्राप्ते 'उदरमन्तरं कुरुते अथ तस्य भयं भवति' इति श्रवणाद्भेददर्शिनो मुक्तिर्न संभवति ततो ध्याता ब्रह्मैवाहमिति स्वं ब्रह्माभिन्नं भावयेदिति बोधयितुमाह—**मत्पर इति** । अहमेव परः परमात्मेति मत्परः ब्रह्मैवाहमिति स्वस्य ब्रह्मभावग्राहकया वृत्त्या युक्तः सन्नासीत । स्वं ब्रह्मैव भावयन्नासने तूष्णीमुपविशेदित्यर्थः ॥ १४ ॥

'योगमात्मविशुद्धये' इति वचनाद्योगानुष्ठानस्य फलमात्मविशुद्धिरात्मविशुद्धेस्तु फलमप्रतिबद्धज्ञानसिद्धिद्वारा ब्रह्मनिर्वाणमेवेति सूचयितुं योगिनो ब्रह्मविदो जीवत एव मुक्तिफलमाह—

युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥

युञ्जन्निति । योगी योगनिष्ठापरायणो यतिरेवमेकाकित्वनिराशीष्ट्वापरिग्रहत्वसमकायशिरोग्रीवत्वस्थिरत्वनासिकाग्रदृष्टृत्वदिगनवेक्षितृत्ववीतभयत्वब्रह्मचारिव्रतस्थत्वप्रशान्तत्वादिविशेषणविशिष्टो भूत्वा निरुक्तलक्षण आसन उपविश्यात्मानमन्तःकरणं ब्रह्मणि सदा युञ्जन्ननुसंधानं

कुर्वन्नियतमानसः श्रद्धया तीव्रमुमुक्षया चिरकालं नित्यनिरन्तरसमनुष्ठितसमाध्यभ्यासबलेन नियतं निश्चलं सर्वबाह्यवासनानिःशेषसंक्षयवशाद्विपरीतप्रत्ययायानुत्पत्तौ निर्विकारात्मना स्थितं मानसं 'मनसैवानुद्रष्टव्यम्' इति श्रवणान्मनुत इदमेवाहमस्मीति स्वात्मना ब्रह्म साक्षात्क्रियतेऽनेनेति मनः मन एव मानसं यस्य स नियतमानसोऽप्रतिबद्धात्मविज्ञानो भूत्वा। निर्वाणपरमां निर्वाणं शरीरसंबन्धरहितं परमं परमपुरुषार्थलक्षणं कैवल्यं यया सा ताम्। यद्वा निर्वाणं मोक्षरूपं परमं निरतिशयसुखं यस्यां सा ताम्। अतएव मत्संस्थां ममैव संस्था स्थितिर्यत्र नान्यस्य बुद्ध्यादेस्ताम्। यद्वा मम रूपेण संस्था यया ताम्। यद्वा मद्भावापत्तिरूपां ब्रह्मात्मना स्थितिलक्षणां शान्तिं सर्वोपरतिमात्यन्तिकसंसारनिवृत्तिरूपामधिगच्छति। प्राप्नोतीत्यर्थः। एतेन योगस्य फलं भुक्तेस्तृप्तिवत्स्वप्रत्यक्षं यतस्ततो मुमुक्षोर्यतेः श्रवणमात्रसंभावितमुक्तत्वभ्रममुत्सृज्यावश्यं विदेहमुक्त्यै समाधिः कर्तव्य इति सूचितं भवति ॥१५॥

'योगी युञ्जीत सततम्' इत्यारभ्यैतच्छ्लोकपर्यन्तं योगं योगाङ्गानि योगासनं योगिनो योगस्य फलं च प्रतिपाद्य पुनरपीदानीं योगाभ्यासिन एवाहारादिबहिरङ्गमन्तरङ्गं योगानन्दं च प्रतिपादयति—

नात्यश्नतस्तु योगोऽस्ति न चकान्तमनश्नतः।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

नात्यश्नतस्त्विति। 'यदात्मसंमितमन्नं तदवति न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति' इति श्रवणात्। श्रुतेरयमर्थः। आत्मसंमितं स्वोदरपरिमाणमनुकूलं च यदन्नं भुज्यते तदन्नं भोक्तारमवति धर्मनिर्वाहाय च भवति। न हिनस्ति धातुवैषम्यं संपाद्य पुरुषं न हन्ति न पीडयति च, यद्भूयः स्वोदरपरिमाणादतिरिक्तमन्नं भुज्यते तद्धिनस्ति शूलादिकमुत्पाद्य पुरुषं हन्ति धर्मं च नाशयति, यत्कनीयः यत्कनीयोऽत्यल्पमन्नं भुज्यते न तत्पुरुषमवति क्षुन्निवृत्त्यै धर्मनिर्वाहाय च क्षमं न भवति। ततः परिमितमेव भोक्तव्यमिति सिद्धम्। इममेवार्थं श्रीभगवानप्याह। अत्यश्नतः स्वोदरपरिमाणमतिक्रम्य जरयितुमशक्यमन्नमश्नतो बह्वाशिनो योगिनो यतेर्न योगोऽस्ति योगनिष्ठा न सिध्यति। शुश्रूषोरपि यतेः श्रवणं मननं ब्रह्मचर्यं च न सिध्यति। एकान्तं नियमेनानश्नतोऽप्यल्पमश्नतश्च यतेर्योगो नास्त्येव, श्रवणं मननं चापि न सिध्यति। किंतु स्वस्वोदरपरिमितममेदोवृद्धिकरं चान्नमश्नत एव योगः श्रवणं मननं ब्रह्मचर्यं च दिवास्वापा-

दिदोषराहित्यमपि सिध्यतीत्यर्थः । अथवा 'पूरयेदशनेनार्धं तृतीयमुदकेन तु । वायोः संचरणार्थाय चतुर्थमवशेषयेत् ॥' इत्यादिशास्त्रपरिमाणमतीत्याश्नतोऽनश्नतश्च योगो न सिध्यति यथा, तथातिस्वप्नशीलस्यात्यन्तनिद्रालोरतिजाग्रतश्च योगो न सिध्यतीत्यर्थः ॥ १६ ॥

तर्हि कीदृशस्य योगः सिध्यतीत्याह—

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

युक्ताहारेति । युक्ताहारविहारस्य युक्तः 'पूरयेदशनेनार्धम्' इति, 'न गव्यूतेः परं गच्छेन्न ग्रामे नगरे वसेत्' इत्यादिशास्त्रनियमेन युक्तः आहारोऽन्नं विहारो विश्रान्त्यै संचारो यस्य तस्य परिमिताहारविहारस्य । युक्तचेष्टस्य कर्मसु अन्नादानविसर्गादिक्रियासु युक्ता यावता कार्यसिद्धिस्तावत्परिमिता नतु विशृङ्खला चेष्टा देहेन्द्रियव्यापारो यस्य तस्य । युक्तस्वप्नावबोधस्य स्वप्नो निद्रा, अवबोधो जागरस्तावेतौ युक्तौ परिमितौ 'जागृयाद्दश नाड्यस्तु निद्रा तु दश नाडिकाः । पश्चाज्जागरणं तद्वद्दश नाड्यस्तु योगिनः ॥' इत्युक्तलक्षणलक्षितौ स्वप्नावबोधौ यस्य तस्य योगिनो ब्रह्मनिष्ठस्य आहारविहारनिद्रादीनामतिरिक्तत्वे रजस्तमोवृद्धिस्तया समाधेर्ज्ञानस्य च विच्छित्तिस्ततस्तत्परिमित्या भवितव्यम् । एवंलक्षणस्य यतेर्योगः समाधिर्दुःखहा दुःखान्याध्यात्मिकादीनि जन्मादीनि च सर्वाणि स्वानुष्ठानसमुत्पन्नाप्रतिबद्धबोधेन हन्तीति दुःखहा भवति । विदेहमुक्तिं संपादयतीत्यर्थः ॥ १७ ॥

यद्यपि 'यदा हि नेन्द्रियार्थेषु' इति 'कूटस्थो विजितेन्द्रियः' इति च योगिनो योगारूढत्वं सम्यङ्निरूपितं तथापि ब्रह्मविल्लक्षणे परिज्ञाते मुमुक्षुभिस्तदाराधनं तदाश्रयणं च कृत्वा ज्ञानं मुक्तिश्च प्राप्तुं शक्यत इति तदेव च पुनर्विस्पष्टयति—

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८ ॥

यदेति । निरुक्तबहिरङ्गान्तरङ्गसाधनसंपत्त्या तीव्रमोक्षेच्छावैराग्याभ्यां च नित्यं योगमभ्यस्यतो योगिनो यतेर्यदा यस्मिन्काले विनियतं विषयसंबन्धो यथा न स्यात्तथा निरन्तराभ्यासबलेनैकाग्र्यमधिगमितं चित्तमात्मनि नित्यानन्दैकरसे प्रत्यगभिन्ने ब्रह्मण्येवावतिष्ठते सर्ववासनाक्षत्या सर्वकामविध्वस्त्या च स्वयं सद्वासनावासितं सत्सर्वदा स्वरूप एव

तिष्ठति। प्रयत्नेनापि न बाह्यमवलम्बत इत्यर्थः। तदेव विस्पष्टयति—निःस्पृह इति। काम्यन्त इति कामाः शब्दादयस्तेभ्यो यत्नादयत्नाद्वा कचिद्विषयीभूतेभ्यः सर्वेभ्यश्च यदाऽहं निःस्पृह इच्छाशून्यो भवति तेषु मिथ्यात्वबुद्ध्या इन्द्रियाणि मनश्च न प्रवर्तयति तदा युक्तो योगारूढ इत्युच्यते पण्डितैरिति शेषः॥ १८॥

योगमारुह्य तिष्ठतो यतेश्चित्तं कथं तिष्ठतीत्याकाङ्क्षायां तदनुष्ठितयोगस्यासंप्रज्ञातसमाधित्वं सूचयितुं तच्चित्तस्थितेरुपमानमाह—

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः॥ १९॥

यथेति। आत्मन इति कर्मणि षष्ठी। आत्मन आत्मानं विषयीकृत्य प्रवर्तितं योगं, यद्वा आत्मनः सर्वोपलब्धिसिद्धिसाधनं योगं समाधिं युञ्जतः सादरं नित्यनिरन्तरं समनुतिष्ठतो योगिनो यतेः परमहंसस्य यतचित्तस्य यतं ब्रह्मण्येव ब्रह्माकारेण निश्चलतया सदा स्थापितं चित्तं येन तस्य यतचित्तस्य ब्रह्मण्येव स्थिरीभूतमनसः सैवोपमा उपमीयते अनयेत्युपमा स एव दृष्टान्तः। निवातस्थोऽन्तर्गृहस्थो दीपो यथा नेङ्गते न चलति तथा ब्रह्मणि स्थापितं ब्रह्मविच्चित्तं न चलति, ब्रह्मण्येव ब्रह्मात्मना निश्चलीभूय तिष्ठत्ययमेवासंप्रज्ञातः समाधिः। तदुक्तम्—'मनसो वृत्तिशून्यस्य निर्विकारात्मना स्थितिः। असंप्रज्ञातनामासौ समाधिर्योगिनां प्रियः॥' इति॥ १९॥

एवंलक्षणसंपन्नो यश्चित्तपरिपाकविशेषः स एव योगो ज्ञातव्य इति वक्तुं तल्लक्षणान्याह—

यत्रोपरमते चित्तं निरुद्धं योगसेवया।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति॥ २०॥

यत्रेति त्रिभिः। बहिरङ्गान्तरङ्गसाधनसिद्ध्या तीव्रमोक्षेच्छया च विजृम्भितया योगसेवया योगो योगाङ्गसविकल्पसमाधिर्विजातीयप्रत्ययोदयराहित्येन केवलचित्प्रत्ययमात्रोदयलक्षणस्य सेवया निरन्तरावृत्त्या निरुद्धं विपरीतवृत्तिर्यथा न स्यात्तथा चिरकालं ब्रह्मप्रत्ययायां वृत्तावेव स्थापितं चित्तं स्वयं निःशेषविनष्टसर्वबाह्यवासनापटलं सत् यत्र यस्यां दशायां स्वस्य केवलशुद्धसत्त्वांशमात्रावशेषरूपायां प्राप्तायां सत्यामुपरमते उपशमं गच्छति। वृत्त्यन्तरपरिणाममुज्झित्वा ध्येयात्मनैव निवातस्थप्रदीपवन्निष्कम्पं तिष्ठतीत्यर्थः। किंच यत्र यस्यां चित्तपरिपाकविशेष-

दशायामयं ब्रह्मविदुत्तम आत्मनि निर्मलान्तःकरणे व्योम्नि राकाचन्द्रबिम्बवत्प्रकाशमानं वृत्त्यारूढं चिदानन्दैकरसमात्मानं परं ब्रह्मात्मना स्वात्मना ब्रह्मैवाहमिति स्वस्वरूपत्वेन पश्यन्साक्षादपरोक्षीकुर्वन् तुष्यत्यानन्दति मुक्तः कृतार्थोऽस्मीति मोदते । 'स मोदते मोदनीयं हि लब्ध्वा' इति श्रुतेः । आत्मनि तुष्यतीति योगारोहणं कृतवतो महात्मन आत्मसंसारमोक्षणं तत्सुखं च प्रत्यक्षं यतस्ततः श्रवणादिना विज्ञातात्मतत्त्वस्य यतेर्योगारोहणेनैवात्मोद्धरणं सिध्यति तदवश्यं कर्तव्यमित्यनेन सूचितं भवति ॥ २० ॥

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१ ॥

किंच **सुखमिति** । यत्र यस्यां बुद्धेः केवलशुद्धसत्त्वभावापत्तिदशायामयं योगनिष्ठो ब्रह्मविद्यतिः बुद्धिग्राह्यं स्ववृत्त्यैकगम्यमत एवातीन्द्रियं इन्द्रियाविषयमिन्द्रियविषयसंबन्धरहितमजन्यमित्यर्थः । तत एवात्यन्तिकमन्तमतिक्रम्य वर्तमानमात्यन्तिकमाद्यन्तशून्यमत एव 'एषोऽस्य परमानन्दः' इत्यादिश्रुतिप्रसिद्धं यत्तत्सुखं वेत्ति । सदानन्दोऽहमस्मीत्यात्मानन्दमनुभवतीत्यर्थः । यत्रायं योगी स्वयं चिदेकवृत्त्या स्वस्वरूपे सच्चिदानन्दैकरसे ब्रह्मणि तदात्मना स्थितः सन् तत्त्वतः परमार्थात्स्वरूपान्न चलति शतधा बाह्याभ्यन्तरविक्षेपेषु प्राप्तेष्वपि न किंचिद्विपरीतभावं भजतीत्यर्थः ॥ २१ ॥

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ २२ ॥

किंच **यमिति** । आत्मसाक्षात्कार एव परमो लाभस्तल्लब्धेरसाधारणकारणं योगसिद्धिरपि परमलाभ एवेति मत्वा । यमिति कार्यकारणयोरभेदेन निर्देशः । सदानन्दैकरसस्यात्मन उपलब्धेः परमकारणं यं निर्विकल्पसमाधिं तत्कार्यमात्मलाभं च लब्ध्वा योगारूढो यतिः क्वचित्प्राप्तमपरमनात्मविषयकं लाभं ततः सर्वस्य ब्रह्ममात्रोपलम्भकनिर्विकल्पकसमाधेस्तत्फलादात्मलाभादधिकमुत्कृष्टं न मन्यते । आत्मव्यतिरिक्तस्य सर्वस्यापि पदार्थस्य मायिकत्वेनासत्त्वात्तुच्छत्वात्सोपद्रवत्वाद्दुःखबीजत्वान्मिथ्यात्वाच्च धर्मादेर्लाभं सन्तो न लाभाय मन्यन्त इत्यर्थः । ननु ब्रह्मविष्ण्वादिलोकप्राप्तिस्तु विदुषो लाभ एवेति चेन्न, सत्यलोकवैकुण्ठादेरपि मायिकत्वेनोक्तदोषवत्तया मिथ्यात्वाविशेषात्तल्लाभस्तत्स्वामित्वलाभोऽप्यलाभ

एव भवति। 'आत्मलाभान्न परं विद्यते' इति स्मृत्यैवात्मलाभातिरिक्तलाभस्य लाभत्वनिषेधान्नित्यनिरतिशयानन्दरूपस्यात्मन एव लाभो लाभाय भवति। तस्माद्ब्रह्मविदात्मसाक्षात्कारकरणत्वादमुमेव योगं परमं लाभं मन्यते न ततोऽन्यं लाभमित्यर्थः। किंच यस्मिन् यस्यामन्तःकरणपरिपाकविशेषावस्थायां स्थितः बाह्यमाभ्यन्तरं च विस्मृत्य सद्भावापन्नया वृत्त्या पूर्णानन्दैकरसब्रह्मरूपेण संस्थितो ब्रह्मविद्यतिः गुरुणा खड्गपातादिजनितेनान्येन वाऽध्यात्मिकेन महता दुःखेन न विचाल्यते स्वरूपाच्चालयितुं न शक्यते। बाह्याभ्यन्तरविक्षेपशतैर्विपरीतभावं गमयितुं न शक्यत इत्यर्थः॥ २२॥

योगस्य लक्षणान्युक्त्वाऽधुनोक्तलक्षणवन्तं योगं विजानीयादित्याह—

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम्।
स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा॥ २३॥

तं विद्यादिति। बाह्योपरतत्वादिचित्तपरिपाकभेदविशिष्टो योऽन्तःकरणावस्थाविशेषस्तमेव योगसंज्ञितं विद्यात्। योग इति संज्ञितं संज्ञा यस्य स योगसंज्ञितस्तमुक्तलक्षणमन्तःकरणावस्थाविशेषमेव योगं विजानीयात्पण्डित इत्यर्थः। योगस्योक्तमेव लक्षणं विस्पष्टत्वार्थं पुनरप्याह—**दुःखसंयोगवियोगमिति।** अत्र दुःखशब्देन तदनुबन्धि वैषयिकं सुखं च गृह्यते। दुःखानामाध्यात्मिकादीनां सुखानां च संयोगः संसर्गस्तेन वियोगो यस्य स दुःखसंयोगवियोगः अप्रकाशितबाह्यसुखदुःखप्रत्ययो योऽन्तःकरणस्थितिविशेषस्तं योगं विद्यादित्यर्थः। एवं योगलक्षणं योगं चात्मनि पश्यन् तुष्यतीति योगफलमपि प्रतिपाद्य संसारनिमग्नस्यात्मन उद्धरणं योगेन विना नान्येन सिध्यत्यतो विज्ञातात्मतत्त्वस्य यतेर्विदेहमुक्त्यै समाधिरवश्यं कर्तव्य इति सूचयितुं पुनः समाधेः कर्तव्यतामाह—**स इति।** आत्मसमुद्धरणे परमसाधनमयमुक्तलक्षणो योगोऽनेनैवात्मा समुद्ध्रियते एतच्छास्त्रप्रसिद्धं विद्वत्प्रत्यक्षं चेति निश्चयेन चित्तदार्ढ्येनाप्यनिर्विण्णचेतसा नासाग्रदर्शनमिन्द्रियनिरोधनं साम्येन कायस्थापनं मनोनिग्रहश्च क्लेशाय भवति नाहंकर्तुं शक्नोमीति समाधिकरणे यदलसत्वं तेन दोषेण युक्तं चित्तं निर्विण्णं तीव्रमोक्षेच्छया तद्रहितमनिर्विण्णं तेनानिर्विण्णेन चेतसा मुमुक्षोर्यतेः स उक्तलक्षणो योगः समाधिर्योक्तव्यः प्रयोक्तव्यः। विदेहमुक्त्यै सम्यक्कर्तव्य इत्यर्थः॥ २३॥

समाधेः कर्तव्यप्रकारमेवाह—

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः।
मनसैवेन्द्रियग्रामं विनियम्य समंततः ॥ २४ ॥

संकल्पेति। पदार्थेषु समीचीनत्वकल्पनमेव संकल्पस्तस्मात्प्रभवन्तीति संकल्पप्रभवास्तान् कामान् विषयाभिलाषान्सर्वान्सर्वपदार्थविषयानशेषतस्त्यक्त्वा। परित्यक्तेऽपि तैले लेपरूपेण पात्रे शेषस्तिष्ठति यथा, तथा कामेषु त्यक्तेष्वपि विषयेषु रञ्जनारूपेण कामशेषो यथा न स्यात्तथा सर्वत्र कामत्यागः कर्तव्यः। सति कामलेशे तदाकृष्टं मनः समाधौ न तिष्ठत्यतः सर्वत्र देहजीवनादावपि निरपेक्षो भवेद्योगीत्यर्थः। योगसिद्धेरन्तरङ्गं बलवत्साधनमुक्त्वा साधनान्तरमाह—**मनसेति।** समाधौ कृते सम्यग्ज्ञानं तेनैव मोक्षो नान्यथेत्येवं निश्चयवता कामसंकल्पयोर्दूरवर्तिनैव मनसा इन्द्रियग्रामं चक्षुरादीनां वागादीनां च संघातं समन्ततः सर्वतो नियम्य तेषां प्रवृत्तिं निगृह्येत्यर्थः। इन्द्रियैर्मनसा संयोगाकरणमेवेन्द्रियनियमनमिति मनसैवेति पदेन सूचितम्। तत इन्द्रियाणां मनसश्च संयोगो यथा न स्यात्तथा स्थातव्यमित्यभिप्रायः ॥ २४ ॥

ब्रह्मविदुक्तलक्षण आसने सम्यगासित्वा शरीरं साम्येन स्थापयित्वा दिशोऽपश्यन्नासाग्रे दृष्टिं मुक्त्वा सर्वकामसंकल्पत्यागपूर्वकं सर्वेन्द्रियाणि निगृह्य ततः शनैःशनैरुपरमेदित्याह—

शनैःशनैरुपरमेद्बुद्ध्या धृतिगृहीतया।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥ २५ ॥

शनैरिति। शनैःशनैः क्रमेण बाह्यविषयेभ्यस्तत इन्द्रियेभ्यस्ततोऽन्तर्विपरीतप्रत्ययेभ्यश्च मन्दंमन्दमन्तःकरणमुपरमेदुपरतं कुर्यात्। मोक्षैककामनया विषयैरिन्द्रियैरसत्प्रत्ययैश्च संबन्धो यथा न स्यात्तथा मनसो बहिःप्रवृत्तिमुपशमयेदित्यर्थः। 'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि' इत्येतच्छ्रुत्युक्तरीत्या वागुपलक्षितानि सर्वाणीन्द्रियाणि तत्तद्विषयैः सह मनसि प्रविलापयेत्। प्रपञ्चकारणं तन्मनोऽपि ज्ञान आत्मनि अहमात्मिकायां बुद्धौ तज्ज्ञानमहमात्मिकां बुद्धिं महत्यात्मनि महत्तत्त्वे तन्महत्तत्त्वमव्याकृते तदव्याकृतं शान्ते सर्वप्रपञ्चोपशमे निर्विशेषे परे ब्रह्मणि प्रविलापयेत्। एवं सर्वं ब्रह्मणि प्रविलाप्य 'ब्रह्मैवेदं सर्वम्' इत्यादीत्यर्थावष्टम्भसमुत्पन्ननिश्चयवतीं दृढवृत्तिर्धृतिर्धैर्यं तया गृहीतया निगृ-

हीतया बुद्ध्या पूर्वोक्तप्रविलापनेन सर्वत्र ब्रह्ममात्रावशेषत्वसंस्कारबलेन सर्वमात्मैव न ततोऽन्यदस्तीत्येवंप्रत्ययवत्या बुद्ध्या मन आत्मसंस्थं सम्यगात्मन्येव चैतन्यरूपे स्थितं निश्चलं कृत्वा सर्वमात्मानमेव पश्यन्नित्यर्थः । एवमात्मसंस्थं मनः कृत्वा विद्वान् ततः स्वयं किंचिदपि बाह्यमाभ्यन्तरं वा वस्तु न चिन्तयेन्न भावयेत् किंतु सर्वं ब्रह्मैव भावयेदित्यर्थः । एतेन ब्रह्माकारवृत्त्या मनसो योऽन्यभावनाऽभावः स एव योग इति सूचितं भवति ॥ २५ ॥

ननु विषयलम्पटस्य मनस आत्मनि संस्थितिर्न संभवति तद्विषयवासनाभी रागादिभिश्च विषयप्रवृत्त्येकस्वभावत्वान्मनसः 'स्वभावो दुरतिक्रमः' इति न्यायेन स्वभावतः प्राप्तप्रवृत्ति निरोधो न सिध्यति, तदसिद्धौ कुत आत्मनि संस्थितिरित्याशङ्कायां । न । विषयेषु सत्यत्वसमीचीनत्वेष्टत्वबुद्ध्येकबलान्मनसः प्रवृत्तिस्तद्धेतवो रागादयः 'विकल्पो नहि वस्तु', 'मायामात्रमिदं द्वैतं', 'त्रयमप्येतत्सुषुप्तं स्वप्नं मायामात्रम्' इत्यादिश्रुतिभिरिदं सर्वं मिथ्या कल्पितत्वाच्छुक्तिरजतवदित्यादियुक्तिभिश्च विषयाणां मिथ्यात्वे सिद्धे विषये सत्यत्वसमीचीनत्वेष्टत्वबुद्धयो नश्यन्ति रागादयश्च तेन मनसश्च प्रवृत्तिर्न संभवति । क्वचिद्वासनया यदा मनः प्रवर्तते तदा विषयमिथ्यात्वबुद्ध्या ततो निवर्त्य स्वरूप एव स्थापनीयमित्याह—

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥

यत इति । वासनावेगाच्चञ्चलं चपलं रागादिदोषग्रस्तत्वादस्थिरमव्यवस्थं मनः स्वविषयमात्मानमनादृत्य वासनया वा रागादिना वा हठाद्वा ज्ञातमज्ञातं च सत् यतो यतो यं यं विषयमुद्दिश्य निश्चरति निर्गच्छति ततस्ततस्तस्मात्तस्माद्विषयान्नियम्य तत्रतत्र विषये मिथ्यात्वं दुःखप्रदत्वं बन्धकत्वमात्मव्यतिरेकेणासत्त्वं चोद्घाट्य वैरस्यमापाद्यैतन्मनः पुनराकृष्य चिद्भावं गमयित्वात्मन्येव वशं नयेत् । आत्मनि नित्यत्वचिद्रूपत्वाखण्डानन्दैकरसत्वस्वरूपत्वादिगुणप्रकाशनेन रुचिं संपाद्य नियमेनात्मस्थमेव कुर्यादित्यर्थः ॥ २६ ॥

पुनःपुनर्विषयेभ्यस्तत्तद्दोषोद्घाटनपूर्वकमाकृष्य मन आत्मन्येव स्थापयित्वाऽत्यन्तश्रद्धया चिरकाल नित्यनिरन्तरं चित्प्रत्यावृत्तिमेवं कुर्वतो योगिनो यतेर्बाह्यवासनानां तत्प्रत्ययानां च निःशेषसंक्षये सति यदा ब्रह्मणि मनः प्रशान्तिमेति तदा सुखं ब्राह्ममनुत्तममाविर्भवतीत्याह—

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥

प्रशान्तेति । शान्तरजसं नित्यनिरन्तरसमाधिनिष्ठया शान्तो विनष्टो रजो रजोगुणः । रज इति तमसोऽप्युपलक्षणम् । तमोगुणश्च स्वकार्यैः कामक्रोधलोभमोहाहंकारममकारादिभिः सह यस्य स शान्तरजास्तं शान्तरजसं केवलं शुद्धसत्त्वस्वभावमत एवाकल्मषं अन्तःकरणस्य कल्मषं भेदवासना एव राजस्यस्तामस्यः सत्त्वमिश्रीभूतभौतिकगोचरा यास्ताः सर्वा न विद्यन्ते यस्य चित्ते सोऽकल्मषस्तमतएव प्रशान्तमनसम् । विक्षेपविपरीतभावहेत्वो रजस्तमोगुणयोः सकार्ययोर्निःशेषविनाशाद्वृत्तिशून्यतया प्रशान्तं प्रकर्षेण शान्तं प्रशान्तं अविषयाकारतामेव समापन्नं मनो यस्य तं प्रशान्तमनसमतएव ब्रह्मभूतम् । ब्रह्मैवाहमित्युपाधिकृतपरिच्छित्तिं परित्यज्य पूर्णात्मनैव स्थितमेनं योगिनं ब्रह्मविदं यतिमनुत्तमं यस्मादुत्तमं नास्ति तदनुत्तममनुपमं नित्यं निरतिशयं साधनानपेक्षमयत्नसिद्धमक्षय्यमात्मभूतमात्मैकवेद्यं ब्राह्मं सुखमुपैति । तदा प्राप्नोतीत्यर्थः । साधननिरपेक्षाऽपारसुखाविर्भावः सुषुप्तौ सर्वप्रत्यक्षः । 'एषोऽस्य परमानन्दः' इत्यादिश्रुतिप्रसिद्धश्चेति प्रसिद्धिद्योतनार्थो हिशब्दः ॥ २७ ॥

योगमनुष्ठायैव यतिः कृतार्थो भवति सदा सुखं ब्राह्ममक्षय्यमेव प्राप्नोति न क्वचिद्दुःखलवमित्युक्तमेव सुखलाभं योगजं योगिनः प्रशंसति मुमुक्षोरवश्यं योगः करणीयो मुक्तिसुखसिद्धय इति सूचयितुम्—

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ २८ ॥

युञ्जन्निति । दृश्यं सर्वं मिथ्यैवेति दृश्यमिथ्यात्वं दृढं निश्चित्य सर्वत्र कामसंकल्पपरित्यागपूर्वकं सर्वेन्द्रियाणि निगृह्य बहिरङ्गान्तरङ्गसाधनसंपन्नो भूत्वा योगी समाधिनिष्ठायां प्रवृत्तो यतिरेवं यथाशास्त्रं यथालक्षणं सदा नित्यमात्मानं चिदानन्दैकरसं परिपूर्णमद्वितीयं परं ब्रह्म युञ्जन्ननुसंदधानः सर्वमिदमहं च ब्रह्मैवेत्यखण्डवृत्त्या सर्वं ब्रह्मैव पश्यन् विगतकल्मषः विशिष्य गतं विगतं निःशेषविनष्टं कल्मषं वासनाकृतभेददर्शनलक्षणं यस्य स विगतकल्मषः सन् सुखेनाप्रयत्नेन सिद्धं साधननिरपेक्षमकृत्रिमं ब्रह्मसंस्पर्शं ब्रह्मणा ब्रह्मात्मना संस्पृश्यतेऽवगम्यत इति ब्रह्मसंस्पर्शं ब्रह्माभिन्नं चिदेकरसमित्यर्थः । यद्वा संस्पृश्यते गृह्यतेऽने-

नेति संस्पर्शः स्वरूपं ब्रह्मैव संस्पर्शो यस्य तद्ब्रह्मसंस्पर्शं ब्रह्मात्मकमत एवात्यन्तमन्तं परिमाणमतीत्य तिष्ठतीत्यत्यन्तमपारमक्षयं नित्यं शाश्वतं ब्राह्मं सुखमश्नुते । जीवन्नेव मुक्तः सन्मुक्तिसुखमनुभुङ्क्ते इत्यर्थः ॥२८॥

योगस्य फलमप्रतिबद्धमात्मैकत्वदर्शनमात्मानन्दानुभूतिश्च । तत्र क्रममविवक्षित्वा द्वयोरप्येकैवात्मानन्दानुभूतिर्दर्शिता । अधुना द्वितीयमात्मैकत्वदर्शनं सर्वसंसारदुःखनिर्मूलनकारणं प्रतिपाद्यते—

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥

सर्वभूतस्थमिति । पुरुषं परमपुरुषार्थेन योजयति संघट्टयतीति योगः बहुजन्मकृतं पुण्यपुञ्जपरिपाकजन्यं प्रत्यग्दर्शनम् यस्मिन् सत्येवाप्रतिबन्धेन पुरुषस्य मोक्षस्तेन योगेन सम्यग्दर्शनेनैव युक्तः आत्मा मनो यस्य स योगयुक्तात्मा ब्रह्माकाराकारितान्तःकरणस्तत एव समदर्शनः समं समभावापन्नं विशेषग्रहणनिर्मुक्तं चिरकालयोगाभ्यासवशात्सर्वत्र सन्मात्रग्रहणशीलं दर्शनं यस्य स समदर्शनो ब्रह्मवित्तमः स्वयं सर्वभूतस्थं भवन्तीति भूतानि अधिष्ठानाग्रहणदोषेण ततः पृथक्सत्तावन्तीव प्रतीयमानान्यव्याकृतादीनि ब्रह्मादिस्तम्बान्तानि च यानि तेषु सर्वेषु भूतेषु ब्रह्माण्डे सूर्यवद्गृहेषु प्रदीपवद् घटादिष्वाकाशवदविकारात्मना तिष्ठतीति सर्वभूतस्थमात्मानं यथास्मिन् कार्यकारणसंघाते देहेन्द्रियप्राणमनोबुद्ध्यादीनां तद्धर्मतत्कर्मतदवस्थानां च साक्षित्वेन सर्वप्रकाशकत्वेनाहमर्थतया निरभिमानेनाहं तिष्ठामि तथैव सर्वभूतेष्वपि भूततदवस्थातद्धर्मतत्कर्मादीनां साक्षित्वेन प्रकाशकत्वेनाहमर्थत्वेनाविकारात्मनाहमेवैकरूपेण चैतन्यात्मना तिष्ठामीत्येवंभूतानुभूत्या स्वस्यैव सर्वत्र तथा स्थितिमनुभावयित्र्या स्वसद्भावं सर्वतो विनिश्चित्य सर्वभूतेषु प्रत्यग्रूपेण वर्तमानमात्मानं स्वमेकमेव समीक्षते सम्यगनुभवति । एवं सर्वभूतेष्वात्मैकत्वं विज्ञाय बाह्यनिर्विकल्पसमाधिनिष्ठानिष्पन्नाधिष्ठानयाथात्म्यविज्ञानबलेनात्मन्येव परिपूर्णे सच्चिदानन्दैकरसे निर्विकल्पे निराकारे निर्विशेषे स्वस्वरूपे सर्वभूतान्यव्याकृतादीनि स्थूलान्तानि सकार्याण्यात्ममात्राण्येव समीक्षते । यथाऽधिष्ठानविवेकविज्ञानेन घटशरावादीनि मृण्मात्राणि, यथा जलतरङ्गफेनबुद्बुदादीनि मरुमात्राणि, यथा सर्पशिरउरःपृष्ठादीनि रज्जुमात्राणि समीक्षते विवेकी पुरुषः, तथा ब्रह्मविदपि योगानुष्ठानसमुत्पन्नाप्रतिबद्धाद्वैतात्मविज्ञानबलेन सर्वाण्यपि च भूतान्यधिष्ठानाज्ञानतः प्रतीतान्यात्ममात्राण्येव समीक्षते । अहमेवेदं सर्वमिति

सर्वमात्मानमेव साक्षादनुभवति नतु स्वस्मात्तेषां पृथक् सत्तां पश्यति, एवमाधाराधेयोभयात्मना प्रतीतमात्मानं नित्यशुद्धबुद्धमुक्तस्वभावमेकमेवाद्वितीयं निष्कलं निष्क्रियं शान्तमनन्तमपारसुखं पश्यति सर्वसंसारदुःखनिर्मुक्तमत इदमेव दर्शनं मुक्तेः परमकारणमिति सूचितं भवति। नतु योगः सांख्यं कर्म च स्तोत्रमन्त्रजपादि च। तथाच श्रुतिः—'सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि। संपश्यन् ब्रह्म परमं याति नान्येन हेतुना' इति। एतेन संसारसागरनिमग्नात्मोद्धरणाय मुमुक्षोर्विदेहकैवल्यार्थिनः समाधिरवश्यं कर्तव्य इति सिद्धम् ॥ २९ ॥

उक्तरीत्या स्वात्मनः सर्वभूतस्थत्वं सर्वभूताधारत्वं च पश्यतो ब्रह्मविदश्च स्वस्य च स्वरूपेणैकत्वं बोधयितुं स्वस्यापि सर्वभूतस्थत्वं सर्वभूताधिवासत्वं च सूचयन्नेवमीश्वरस्य स्वस्य च स्वरूपेणैकत्वमेवाप्रतिबद्धवृत्त्या पश्यतो ब्रह्मविद्यतेस्तद्दर्शनस्य फलमाह—

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥

य इति। य उक्तसाधनसंपत्त्या योगारूढो ब्रह्मविद्यतिर्मां सच्चिदानन्दैकरसं परं ब्रह्म सर्वत्र ब्रह्मादिस्तम्बपर्यन्तेषु भूतेषु प्रत्यगात्मस्वरूपेण स्थितं पश्यति। तथैवोक्तलक्षणे मयि परे ब्रह्मण्यव्याकृतादिस्थूलान्तं जगच्च सर्वं व्योम्नि गन्धर्वनगरवदाभासमात्रं निःसत्ताकं पश्यति तस्यैवं स्वस्य च मम च सर्वभूतस्थत्वसर्वभूताधारत्वलक्षणाभ्यां नियताभ्यां श्रुतियुक्तिबलाच्च स्वरूपेणैकत्वमेव सदैव पश्यतो ब्रह्मवित्तमस्याहं सच्चिदानन्दैकरसं परं ब्रह्म न प्रणश्यामि। प्रणाशोऽदर्शनम्। वृत्तेरविषयत्वं न गच्छामि। किंतु तिष्ठतो गच्छत आसीनस्य वा शयानस्य वाप्युन्मिषतो निमिषतो भुञ्जतो वा यथेच्छया तिष्ठतस्तद्बुद्धिवृत्तेः सदा सर्वत्र चक्षुषो रूपवत्परमानन्दमावहन्विषयो भवामीत्यर्थः। यथा घटः स्वद्रष्टुः स्वयं भिन्न एव भूत्वा विषयो भवति तथा ब्रह्मापि सर्वत्र स्वं पश्यतो ब्रह्मविदः स्वयं भिन्नमेव सद्विषयं भवति। तथात्वे 'उदरमन्तरं कुरुते अथ तस्य भयं भवति' इति श्रवणादेवं भेददृष्टेः सतोऽपि मोक्षाभावप्रसङ्गाद्भेददृष्टिं परिहर्तुमाह—**स चेति**। सच ब्रह्मविदपि मे मम चिदेकरसस्य निर्विशेषस्य ब्रह्मणो न प्रणश्यति। प्रणाशो नामानात्मतादात्म्यापत्तिरेव विदुषः। यथा वैधर्म्यापत्तिः पुरुषस्य नरकाद्यनर्थहेतुस्तथा ब्रह्मविदो विपरीतभावापत्तिरेव जन्माद्यनर्थहेतुर्यतस्ततोऽयं क्वचिदप्यनात्मन्यात्मभावं न करोति। किंतु देवदत्तः स्वदेह इव ब्रह्मैवाहमिति

स्वात्मना विषयीकृते निर्विशेषे परे ब्रह्मण्येव सर्वदाहंवृत्त्या तिष्ठतीत्यर्थः ॥ ३० ॥

एवं योगानुष्ठानसंभावितसम्यग्दर्शनस्य सर्वस्य ब्रह्ममात्रत्वावगाहिनः फलं सदा सर्वत्र ब्रह्मदर्शनं ब्रह्मण्येवात्मत्वदर्शनं सर्वदा ब्रह्मानन्दानुभूतिश्चेति सूचयित्वाऽधुना त्वेवंलक्षणो ब्रह्मवित्तमः स्वप्रारब्धानुरूपेण देहे नानाधर्मवत्यपि सति स्वयं स्वनिष्ठयैव वर्तमानः सन् मुक्तिं प्राप्नोतीत्याह—

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥ ३१ ॥

सर्वभूतस्थितमिति । 'एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचन', 'सर्वं ह्येतद्ब्रह्म', 'अयमात्मा ब्रह्म', 'अहं ब्रह्मास्मि' इत्यादिश्रुत्यर्थविचारसमुत्थज्ञानबलेन योगानुष्ठानसमुत्पन्नस्वानुभूतिबलेन चैकत्वमास्थितः सर्वमिदमहं च ब्रह्मैवेति सदैकत्वमेवास्थितः सर्वं ब्रह्मैवेति दृढनिश्चययुक्तो भूत्वा यो ब्रह्मविद्यतिः सर्वभूतस्थं महदादिस्थूलपर्यन्तं सर्वभूतजातं बहिरन्तः सदैकरूपेणाऽयःपिण्डमग्निरिव सर्वतो व्याप्य तिष्ठतीति सर्वभूतस्थं मां निर्विशेषं परं ब्रह्म भजति । ब्रह्मैवाहमिति प्रत्यग्दृष्ट्या स्वं मामेव साक्षाद्विज्ञाय मद्भावं यो भजतीत्यर्थः । स योगी मद्भावापन्नो ब्रह्मवित्सर्वथा वर्तमानः स्वप्रारब्धानुरूपेण विविधचेष्टावद्देहचेष्टया लोकदृष्ट्या बालवन्मूढवदुन्मत्तवच्छिष्टवदशिष्टवत्प्रतीयमानोऽपि स्वदृष्ट्या निर्विकारब्रह्मात्मनैव स्थितो ब्रह्मवित्तमः, पतितेऽस्मिन् देहे मयि वर्तते मदात्मना मयि तिष्ठति । यद्वा मयीति तृतीयार्थे सप्तमी । मया ब्रह्मात्मना तिष्ठति विदेहमुक्तिं प्राप्नोतीत्यर्थः ॥ ३१ ॥

'सर्वभूतसुहृच्छान्तः' इति 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' इति स्मरणात्सर्वभूतसुहृत्तया मनोवाक्कायकर्मभिः प्राणिपीडामकुर्वत एव श्रवणं मननं तज्जन्यज्ञानं च तत्फलं मोक्षश्च सिध्यति नान्यथा, अतो मुमुक्षोर्यतेः श्रवणादिनिष्ठस्य स्वसाम्येन सर्वप्राणिनां सुखं दुःखं च परिज्ञाय तेषामुपद्रवः कथंचिदपि न कर्तव्य इति बोधयितुमिदमाह—

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥

आत्मौपम्येनेति । आत्मौपम्येन सर्वप्राणिसुखदुःखवेदनकर्मण्यात्मा स्वयमेवोपमा दृष्टान्तो यस्य स आत्मोपमस्तस्य भाव आत्मौ-

पम्यं तेन स्वसादृश्येन । सर्वत्र सर्वप्राणिषु । वाशब्दश्चार्थः । यदिशब्दोऽप्यर्थः । सर्वत्र सुखं च दुःखं चापि यः समं पश्यति, यथा स्वस्य सुखमिष्टं दुःखमनिष्टं भवति तथैव सर्वप्राणिनामपीति विज्ञाय वाङ्मनःक्रियादिभिः परेषां क्वचित्कदाचित्कथंचिदपि विक्षेपं न करोतीत्यर्थः । एवंलक्षणः स योगी यतिः परम उत्कृष्टो मतः संमतः । यद्वा आत्मौपम्येन नित्यमुक्तस्वरूपत्वेन यथाहं देहतद्धर्मकर्मसुखदुःखादिसंबन्धरहितस्तथा सर्वेऽपि च देहिनो देहतद्धर्मतत्कर्मसुखदुःखादिसंबन्धरहिता एवेत्यात्मौपम्येन यद्यपि सर्वेषां च नित्यमुक्तत्वं प्रत्यग्दृष्ट्या विजानाति तथापि बाह्यदृष्ट्या सुखं च दुःखं च समं स्वसमं सर्वत्र सर्वभूतेषु यो ब्रह्मवित्पश्यति । 'कीटवद्विचरेन्महीम्' इत्यादिस्मृतिप्रामाण्यान्मुक्तत्वान्न मे पापलेशोऽस्तीत्यभिमानमुत्सृज्य सर्वत्रात्मबुद्ध्या प्राणिमात्रस्य विक्षेपं यो न करोतीत्यर्थः । एवं सर्वप्राणिषु स्वबुद्ध्या अनुकूलवर्ती स योगी योगनिष्ठो ब्रह्मविद्यतिः परमः ज्ञानिनां सर्वेषामुत्तम इति ममाभिमत इत्यर्थः ॥ ३२ ॥

'आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत्' इति, 'यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता' इत्यादिना मनस आत्मसंस्थत्वं निवातस्थप्रदीपवन्निश्चलत्वं च योगिभिर्योगसिद्ध्यै संपादनीयमिति श्रुत्वान्तःकरणस्यात्मसंस्थितत्वसिद्धेरुपायजिज्ञासयार्जुन उवाच—

अर्जुन उवाच ।

योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥ ३३ ॥

य इति । 'योगी युञ्जीत सततम्' इत्यादिना मुमुक्षोर्यतेः कैवल्यार्थिनः कर्तव्यत्वेन योऽयं ध्यानयोगः साम्येन साधारण्येन त्वया प्रोक्तः नतु मनोनिरोधनसाधननिरूपणपूर्वकं विशेषेणोक्त इत्यर्थः । ततो मनसश्चञ्चलत्वादेतस्य प्रतिपादितस्य योगस्य स्थिरां निश्चलां स्थितिं निष्ठामहं न पश्यामि । ब्रह्मण्यन्तःकरणस्थिरीभावस्य साधनमहं न जानामीत्यर्थः ॥ ३३ ॥

यदुक्तं तदेव सविशेषं विस्पष्टयति—

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥

चञ्चलमिति । 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' इति सदानन्दस्वरूपत्वात्पर-

मात्मा कृष्ण इत्युच्यते तस्य संबुद्धिर्हे कृष्ण, मनश्चञ्चलं चपलम्। यद्यपि पक्ष्मणां चञ्चलत्वमस्ति तथापि तत्कृतोऽनर्थः कश्चिदपि नास्ति। न तथेदम्। किंतु प्रमाथि च तत्तद्विषयवासनाभिस्तत्कार्यैं रागद्वेषलोभादिदोषैश्च धीरमपि पुरुषं प्रमथ्नाति विक्षोभयतीति प्रमाथि प्रमथनशीलम्। पण्डितमपि परवशं करोतीत्यर्थः। यद्यपि विषादेः प्रमथनशीलत्वमस्ति तथापि मन्त्रादिना तन्निग्रहीतुं शक्यते न तथेदं, किंतु बलवत्सारवन्महाजववत्स्वशक्त्या वेगवत्त्वान्न मन्त्रादिसाधनैर्निरोद्धुं शक्यत इत्यर्थः। यथा महावेगवतां बाणानां साधनान्तरेण छेदः सिध्यति न तथैतस्य छेदः संभवति, तत्कथमिति चेत्। दृढं वज्रसारं सूक्ष्मं च छेदस्य विषयो न भवति। यत एवंलक्षणं मनस्तत एतस्य मनसो वायोरिव निग्रहं सुदुष्करं मन्ये। उपायकोटिभिः सुतरां निरोद्धुमशक्यं मन्य इत्यर्थः। 'अप्यब्धिपानान्महतः सुमेरून्मूलनादपि। अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः॥' इत्यादिशास्त्रप्रसिद्धिद्योतनार्थो हिशब्दः॥ ३४॥

मनसो दुर्निग्रहत्वं यत्तल्लोकशास्त्रप्रसिद्धमेवेत्यङ्गीकृत्य तदेवानुवदन् मुमुक्षोस्तन्निग्रहसाधनं च प्रतिपादयति श्रीभगवान्—

श्रीभगवानुवाच।

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥ ३५॥

असंशयमिति द्वाभ्याम्। यद्यपि चञ्चलत्वात्प्रमाथित्वाद्बलवत्त्वाद्दृढत्वाच्च मनसो दुर्निग्रहत्वे त्वसंशयं संशयो नास्ति, तथापि तन्निग्रहोपायस्त्वेवमेवोच्यते तं शृणु। वैराग्येण श्रुतिस्मृतियुक्तिभिरुक्तरीत्या सर्वस्यापि च विश्वस्य मिथ्यात्वमेव सम्यक्पश्यतो विदुषः विषयेष्वसत्त्वतुच्छत्वबन्धकत्वबुद्धिः सम्यगुदेति। तया च तीव्रमोक्षेच्छया च समुत्पन्नं यद्विषयवैरस्यं तदेव वैराग्यं तेन वैराग्येण गृह्यते मनो निगृह्यते। पदार्थमिथ्यात्वज्ञानेन रागद्वेषादिदोषास्तद्वेगहेतवो विनिवर्तन्ते। तन्निवृत्त्या मनो वशवर्ति निश्चलं च भवतीत्यर्थः। ननु रागद्वेषादिदोषशून्येषु बालादिषु मनश्चाञ्चल्यमेव दृश्यते कथं रागद्वेषादिराहित्येन वैराग्यमात्रेण च मनसो निश्चलत्वं सिध्यतीत्याशङ्कायाम्। न। तेषां पदार्थमिथ्यात्वज्ञानं रागाद्यभावश्च न संभवति मनोनैश्चल्यं च। तथाप्यङ्गभावे सत्यङ्गमात्रेण कार्यं न सिध्यत्यतोऽङ्गिना भवितव्यमित्याशयेनाह—**अभ्यासेनेति**। विजातीयप्रत्ययतिरस्कारपूर्विका सजातीयप्रत्ययावृत्तिरभ्यासस्तेन तीव्रमोक्षेच्छा तीव्रवैराग्यैकसाधनेन चिरकालं नित्यनिरन्तरभाविना ब्रह्मप्रत्ययाभ्यासेन

विजातीयप्रत्ययानां निःशेषविनाशे सति तत्तद्वासनानां निःशेषसंक्षयात् 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन चलननिमित्तानां बाह्यवासनानामपाये मनः स्वयमेव निश्चलं भवति । अतस्तीव्रमोक्षेच्छावैराग्यसंवलितसत्प्रत्ययाभ्यास एव मनोनिग्रहे तन्नैश्चल्ये च परमकारणं तेनैव सम्यगनुष्ठितेन मनो निश्चलं भवतीत्यर्थः ॥ ३५ ॥

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६ ॥

किंच—**असंयतात्मनेति** । तीव्रमोक्षेच्छावैराग्याभावयुक्तेनासंयतात्मना असंयतः ज्ञातेऽप्यात्मनि तत्तद्वासनया बहिरेव प्रवृत्तिस्ततश्चिरकालं नित्यं निरन्तरमत्यन्तास्थया ब्रह्मण्यस्थापित आत्मा मनो यस्य तेनासंयतात्मना समाधिमकुर्वता यतिना योगो ज्ञानयोगः सदा सर्वत्र ब्रह्ममात्रदर्शनलक्षणोऽप्रतिबद्धः शुक्तिकासंदर्शनेन शुक्तिप्रत्ययवदधिष्ठानब्रह्मदर्शनसमुत्पन्नः सन्ततो यो ब्रह्मप्रत्ययः स दुष्प्रापः । नित्यनिरन्तराभ्यासश्रमदुःखेन विना प्राप्तुमशक्यो दुष्प्राप इति मे ममेश्वरस्य मतिर्निश्चयः । कृतास्वपि श्रवणकोटिषु यतेः समाधिना विना सम्यक् दर्शनं न सिध्यतीत्यर्थः । मुमुक्षोर्यतेः समाधिनैव सम्यग्ज्ञानं मोक्षश्च सिध्यत्यतः समाधिरेव कर्तव्य इति सूचयितुमाह—**वश्यात्मना त्विति** । पूर्वस्मादस्य वैलक्षण्यद्योतनार्थस्तुशब्दः । वश्यात्मना वश्यः स्वायत्तस्तीव्रमोक्षेच्छातीव्रवैराग्याभ्यां सुतरां विषयेष्वप्रवर्तित आत्मा मन इन्द्रियग्रामश्च येन तेन वश्यात्मना, यतताऽत्यन्तश्रद्धया यथाकालं यथालक्षणं योगसिद्धै यत्नं कुर्वतैव यतिना योग उक्तलक्षणोऽनेनैवोपायेन अवाप्तुं प्राप्तुं शक्यो भवति नान्येनेत्यर्थः ॥ ३६ ॥

एवं योगप्राप्त्युपायं ज्ञात्वा पुनरिदानीमिहामुत्र च सुखकारणानि श्रौतादीनि कर्माणि सर्वाणि च संन्यस्य, योगनिष्ठायां प्रवृत्तस्य यतेर्योगसिद्ध्यसंभवकाले एव मृतस्य स्वर्गापवर्गसाधनविधुरस्य का वा गतिर्भविष्यतीत्याशङ्कायां तां गतिं ज्ञातुकामोऽर्जुन उवाच—

अर्जुन उवाच ।

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७ ॥

अयतिरिति । योगानुष्ठानेनैव सम्यग्ज्ञानं तेनैव मोक्ष इति निश्चयपूर्वकयास्तिक्यबुद्ध्योपेतः संपन्नोऽप्ययतिः यतते योगसिद्धौ यत्नं

करोतीति यतिः समाध्यनुष्ठानयत्नवान् स न भवतीत्ययतिः । 'श्रेयांसि बहुविघ्नानि भवन्ति महतामपि' इति न्यायेन प्रतिबन्धककर्मवशात्संप्राप्तविचित्रविघ्नविशेषैः समाधिधारणप्रमत्तस्तत एव योगाच्चलितमानसः ब्रह्मैवाहमिति ब्रह्मण्येवात्मना धीनैश्चल्यं योगस्तस्माद्योगान्तकालेऽन्यथा वा चलितं बाह्यवासनया दुष्कर्मणा च विपरीतभावापन्नं मानसं यस्य स चलितमानसो विनष्टस्मृतिरेवंलक्षणो योगी यतिर्योगसंसिद्धिं विदेहमुक्त्या पुरुषं योजयतीति योगः सम्यग्ज्ञानं तस्य संसिद्धिर्निरन्तरसमाध्यनुष्ठित्याऽप्रतिबद्धता 'सर्वमिदमहं च ब्रह्मैव' इत्यप्रतिबद्धं सम्यग्दर्शनं योगसंसिद्धिस्तां समाधिफलमप्राप्य स्वयं मृत्वा कां गतिं गच्छति । अत्र कामित्यविज्ञातपदार्थज्ञानार्थकः किंशब्दो नत्वाक्षेपाद्यर्थकः । गम्यत इति गतिस्तेन प्राप्तव्योऽर्थः क इत्यर्थः । स्वर्गसंपादककर्मानुष्ठानाभावात्स्वर्गप्राप्त्यभावः, विष्ण्वादिदेवतोपास्त्यभावात्तल्लोकप्राप्त्यभावः, समाधिसंभावितसम्यग्दर्शनाभावान्मुक्तिप्राप्त्यभावः, पापाचरणाभावाद्दुर्योनिदुर्गतिप्राप्त्यभावश्च । ततोऽप्राप्तयोगसंसिद्धेर्यतेः का वा गतिर्भविष्यति तां वदेत्यभिप्रायः । नन्वत्र कां गतिं कृष्ण गच्छतीत्यर्जुनस्य प्रश्नोऽनुपपन्न एव भवति । योगसंसिद्धेरप्राप्तत्वेऽपि यतेरेतस्य प्राक्तनपुण्यकर्मसंभवात्तदनुरूपस्वर्गादिलोकप्राप्त्युपपत्तेरिति चेन्न । तेषां चित्तशुद्धावेवोपक्षीणत्वात् । 'जन्मान्तरसहस्रेषु यज्ञदानतपोध्वरैः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥ स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् । साधनं प्रभवेत्पुंसां वैराग्यादिचतुष्टयम् ॥ नित्यनैमित्तिकैरेव नियमेनेश्वरार्पितैः । बहुजन्मकृतैर्विप्रः सत्त्वशुद्धिं समश्नुते' । 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति च । प्राक्तनानामीश्वरार्पितानां पुण्यकर्मणां चित्तशुद्ध्येकप्रयोजनवत्त्वस्मरणात् । ननु तर्हि 'संन्यासाद्ब्रह्मणः स्थानम्' इत्यादिस्मृतिप्रसिद्धसंन्यासक्रियामात्रलभ्या ब्रह्मलोकगतिर्विद्यत एवेति चेन्न । तत्संन्यासस्यान्यथासिद्धत्वात् । 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति', 'संन्यस्य श्रवणं कुर्यात्' इत्यादिश्रुतिस्मृतिविहितसंन्यासस्य श्रुत्यङ्गत्वेन श्रवणाद्यर्थसिद्धावेवोपक्षीणस्वशक्तिकत्वाद्ब्रह्मलोकप्रापकत्वानुपपत्तेः । यथा 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति विहितज्योतिष्टोमयागस्य स्वर्गप्रापणे एवोपक्लृप्तसंकल्पत्वात्स्वर्गप्रापण एव सामर्थ्यं नतु ब्रह्मादिलोकप्रापणे तथा श्रवणाद्यर्थसिद्धावेवोपक्लृप्तस्य विविदिषासंन्यासस्य श्रवणाद्यर्थप्रापण एव सामर्थ्यं नतु फलान्तरप्रापणे । 'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म

कुरुते यत्कर्म कुरुते तदभिसंपद्यते' इति श्रुतिनियमात्ततः श्रवणाद्यङ्गत्वेन कृतस्य विविदिषासंन्यासस्य, श्रवणादावेवोपक्षीणत्वाद्यतेस्तदतिरिक्तपुण्यकर्मानुपलम्भाच्च युक्त एवाऽर्जुनस्य प्रश्न इति सिद्धम्। ननु तर्हि 'संन्यासाद्ब्रह्मणः स्थानम्' इत्यादिस्मृतिवाक्यानामानर्थक्यं स्यादिति चेदुच्यते। 'संन्यासाद्ब्रह्मणः स्थानम्' इति संन्यासस्य ब्रह्मस्थानं फलं स्मर्यते तद्विद्वत्संन्यासस्य वा विविदिषासंन्यासस्य वा उताऽऽपत्संन्यासस्य वा। नाद्यः। 'न तस्य प्राणा उत्क्रामन्ति' इति विदुषः प्राणोत्क्रमणाभावश्रवणात्तत्कर्तृकसंन्यासफलत्वानुपपत्तेः। न द्वितीयः। विविदिषासंन्यासस्य श्रवणाद्यर्थसिद्ध्येकफलत्वात्पुनः फलान्तरकल्पनायोगात्पारिशेष्यादापत्संन्यासस्यैव ब्रह्मलोकः फलमित्यवसीयते। तथैव स्मर्यते— 'आपद्यपि च कुर्वीत संन्यासं ब्राह्मणोत्तमः। यदनुष्ठानमात्रेण प्रयाति ब्रह्मणः पदम् ॥' इत्यतः 'संन्यासाद्ब्रह्मणः स्थानम्' इत्यादिस्मृतिवाक्यानामापत्संन्यासविषयत्वेन सार्थकत्वान्न कदाचिदप्यनुपपत्तिः। नन्वापदि संन्यस्यापि पुनर्जीवित्वा विवेकी श्रवणादिना ज्ञानं संपाद्य मुक्तो भवति कथमापत्संन्यासस्य ब्रह्मलोकैकफलत्वमिति चेदुच्यते। जन्मान्तरे मोक्षेच्छया संन्यस्य श्रवणं कृतवतस्तस्य प्रतिबन्धवशाज्ज्ञानानुत्पत्तौ पुनरत्रापि जन्मन्यापद्युपदेशेन पूर्वसंस्कारवशात्संन्यस्य श्रुत्या मत्या च ज्ञानं प्राप्य मुक्तो भवति। इममेवार्थं श्रीभगवानपि वक्ष्यति 'शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते' इत्यादिना। ततो न कश्चिदत्र विरोधः। नन्वप्राप्तयोगसंसिद्धेरपि योगिनो यतेः संन्यासस्य श्रवणाद्युपक्षीणत्वेऽपि 'भिक्षाटनं जपः शौचं स्नानं ध्यानं सुरार्चनम्। कर्तव्यानि षडेतानि यतीनां नृपदण्डवत्। स्वशाखोपनिषद्गीताम्'। इत्यादिस्मृत्युक्तमन्त्रजपस्तोत्रसुरार्चनादिपुण्यकर्मणः स्वर्गादिहेतोः संभवादस्त्येव तत्प्राप्यपुण्यलोक इतिचेन्न। स्तोत्रमन्त्रजपादेर्भेदप्रत्ययघटितत्वेन विपरीतभावहेतुत्वात् ब्रह्मविद्विषयत्वानुपपत्तेः। 'नैतादृशं ब्राह्मणस्यास्ति वित्तं', 'उपरमः क्रियाभ्यः', 'नैव धर्मी न चाधर्मी तूष्णीं किंचिदचिन्तयेत्' इति योगिनो यतेः सर्वकर्मोपरमस्मरणात्। 'ध्यानयोगपरो नित्य'मित्यत्र निदिध्यासोः क्रियान्तरानवकाशार्थं नित्यपदमिति श्रीभाष्यकृद्भिर्व्याख्यातत्वाच्च निरन्तरयोगनिष्ठापरस्य यतेर्मन्त्रजपादिपुण्यकर्मानुष्ठानानुपपत्तौ तत्फलभूतपुण्यलोकगतिर्न संभवत्येव। अतएवार्जुनः पृच्छति कां गतिं कृष्ण गच्छतीति ॥ ३७ ॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥

किंच **कच्चिदिति** । ब्रह्मणः पथि ब्रह्ममार्गे योगनिष्ठायां विमूढः विशिष्य मूढो विमूढः प्रतिबन्धककर्मदोषेण विपरीतभावं प्राप्तः । समाधिनिष्ठाप्रच्युत इत्यर्थः । तत एवाप्रतिष्ठः प्रतितिष्ठत्यनयेति प्रतिष्ठा आधारस्तद्रहितोऽप्रतिष्ठः ज्ञानकर्मान्यतरालम्बनरहितो यतिः स्वयमुभयविभ्रष्टः योगनिष्ठाच्युतत्वाज्ज्ञानफलभ्रष्टः सर्वकर्मसंन्यासात्कर्मफलभ्रष्टश्चैवमुभयविधगतिशून्यः सन् छिन्नाभ्रमिव प्रागगच्छन्मेघमण्डलसंबन्धरहितं पश्चादागच्छन्मेघमण्डलसंबन्धरहितं च यन्मध्यवर्ति स्वल्पमभ्रं तद्वायुना छिन्नं सद्यथान्तराले नश्यति स्वरूपनाशं प्राप्नोति, तथायमपि नश्यति कच्चित् । तद्वत्स्वरूपनाशं प्राप्नोति वा किमित्यर्थः ॥ ३८ ॥

एतं मे संशयं कृष्ण च्छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य च्छेत्ता नह्युपपद्यते ॥ ३९ ॥

एवमिति । हे कृष्ण सदानन्दस्वरूप परमात्मन्, त्वमेव सर्वज्ञः परमेश्वरः मे ममैतं प्रतिपादितं संशयमशेषतो निःशेषं यथातथा छेत्तुं श्रुतिस्मृतियुक्तिभिर्निरसितुमर्हसि । समर्थोऽसीत्यर्थः । यस्मिन् छिन्ने सति मुमुक्षवो निर्भयाः सन्तः सर्वकर्माणि संन्यस्य योगनिष्ठायां प्रवर्तेरन् । ननु देवा वा ऋषयो वा सर्वज्ञा महान्तस्ते संशयं छेत्स्यन्ति ते प्रष्टव्या इत्याशङ्कायामाह—**त्वदन्य इति** । 'अहमादिर्हि देवानां महर्षीणां च सर्वशः' इति वचनात्त्वमेव देवानां ऋषीणां चादिः सर्वज्ञः, त्वत्तोऽन्यस्त्वदन्यो देवो वा ऋषिर्वा यः कश्चिदप्यस्य संशयस्य च्छेत्ता निवर्तको नोपपद्यते न संभवतीत्यर्थः । 'मेधावी छिन्नसंशयः' इति सर्वसंशयच्छेत्तृत्वं तव शास्त्रप्रसिद्धमिति प्रसिद्धिद्योतनार्थो हिशब्दः ॥३९॥

'न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत्' इति संन्यासस्य ब्रह्मस्वरूपत्वं सर्वतपोभ्यश्च वरिष्ठत्वं श्रूयते । तथैव 'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः' इति संन्यासयोगवतां यतीनां शुद्धसत्त्वत्वं वेदान्तार्थविज्ञातृत्वं च श्रूयते । 'ऋतं तपः सत्यं तपः श्रुतं तपः शान्तं तपः' इति 'शमेन शान्ताः शिवमाचरन्ति शमेन नाकं मुनयोऽन्वविन्दन् । तस्माच्छमं परमं वदन्ति' 'दमेन दान्ताः किल्बिषमवधुन्वन्ति दमेन ब्रह्मचारिणः सुवरगच्छन् दमो भूतानां दुराधर्षं' 'सत्यं परं परं सत्यं सत्येन न सुवर्गाल्लोकाच्च्यवन्ते कदाचन सतां हि सत्यम्' इत्या-

दिना वाक्यजातेन ऋतसत्यश्रुतशान्तादीनां मुमुक्षुधर्माणां श्रुत्या तपस्त्वमुच्यते । 'मानसं वै प्राजापत्यम्' इति, 'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः' इति, 'अश्वमेधसहस्राणि वाजपेयशतानि च । एकस्य ध्यानयोगस्य कलां नार्हन्ति षोडशीम्' इति समाधेः परमतपस्त्वं श्रूयते । स्मर्यते च 'अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव ब्रह्मलोकं निगच्छति ब्रह्मचर्यैकनिष्ठया', 'अहिंसा परमो धर्मो यया याति त्रिविष्टपम्' इति, 'तपसामपि सर्वेषां वैराग्यं परमं तपः' इति, 'सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः । सर्वभूतदया तीर्थं तीर्थमार्जवमेव च ॥' इति ब्रह्मचर्यादीनां मुमुक्षुधर्माणां परममहत्त्वं श्रूयते । स्मर्यते च विघ्ननिहतयोगानां जडभरतवीतहव्यादीनां जन्मान्तरे योगपारंगतत्वं विष्णुपुराणवासिष्ठादिषु प्रसिद्धम् । एवं निरुक्तलक्षणैः संन्यासऋतसत्यशमदमाद्युत्तमतपोभिर्ब्रह्मचर्याद्युत्तमधर्मैरपि विशिष्टस्य योगिनो यतेः क्वचिद्दुष्कर्मवशाद्योगभ्रंशे सत्यपि ब्रह्मविद इहाप्यमुत्रापि न कश्चिदनर्थोऽस्तीति बोधयितुं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४० ॥

पार्थेति । स्वदत्तां ब्रह्मविद्यां शिष्यप्रशिष्यद्वारा तनोति विस्तारयतीति तातस्तस्य संबुद्धिर्हे तात पार्थ, तस्य समाधिनिष्ठायां प्रवृत्तस्य संन्यासऋतसत्यशमदमाद्युत्तमतपोविशिष्टस्य ब्रह्मचर्याहिंसादिविशिष्टधर्मवतो योगिनो यतेर्दुष्कर्मवशाद्ब्रह्ममार्गप्रच्युतत्वेऽपि इहास्मिँल्लोके विनाशो हानिः शिष्टगर्हणाप्राप्तप्रतिष्ठाभङ्गलक्षणो नैवास्ति । ब्रह्मनिष्ठायां श्रद्धावत्त्वादिविशिष्टगुणवत्त्वाद्ब्रह्मचर्याद्युत्तमधर्मवत्त्वाच्च शिष्टनिन्दाऽप्रसक्तेः । नहि दुष्कर्मप्रापितैराध्यात्मिकाद्युपद्रवैर्विघ्नतः स्वधर्मनिष्ठं पुरुषं शिष्टा निन्दितुमर्हन्ति । यथा विधिना संकल्पपूर्वकं शालां प्रविश्याग्नीषोमीयान्तं कृतस्य यज्ञकर्मणो दैवात्सति विघ्ने यजमानमास्थावन्तं श्रोत्रिया न निन्दितुमर्हन्ति तद्वत् । अतो नैवास्यात्र प्रतिष्ठाभङ्गलक्षणो नाशस्तथैवामुत्र परस्मिँल्लोके विनाशो दुर्योनिदुर्गतिप्राप्तिलक्षणो नास्ति । कल्याणकृत्त्वादमुष्य यतेः । नहि कल्याणकृच्छुभकृत्कश्चित्पुरुषो दुर्गतिं गच्छति किंतु सद्गतिमेव गच्छति । तथाच श्रुतिः 'तद्य इह रमणीयचरणा अभ्याशोह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा' इति । यद्वा 'अतिकल्याणरूपत्वान्नित्यकल्याणसंश्रयात् ।

स्मर्तृणां वरदत्वाच्च ब्रह्म तन्मङ्गलं विदुः' इति, 'मङ्गलानां च मङ्गलम्' इति, 'पवित्रं मङ्गलं परम्' इति, परब्रह्मणो मङ्गलस्वरूपत्व-स्मरणात्कल्याणं मङ्गलस्वरूपं ब्रह्म करोति स्वात्मना साक्षाद्विजानातीति कल्याणकृद्ब्रह्मवित्कश्चिद्ब्राह्मणो वा क्षत्रियो वाऽन्यो वा योगभ्रंशं प्राप्य दुर्गतिं निरयं न गच्छति । जडभरतादौ तत्प्रसिद्धमिति प्रसिद्धिद्योतनार्थो हिशब्दः । ननु ध्यानयोगादौ प्रवृत्तो यो यतिः स ब्रह्मविदेव न भवति तस्य ब्रह्मवित्त्वे ध्यानाभ्यासक्रियाऽयोगात् ध्यानयोगाभ्यासोऽपि स्वाध्यायाभ्यासवत्क्रियैव भवति 'तस्य कार्यं न विद्यते' इति 'नैवास्ति किंचित्कर्तव्यम्' इति च ब्रह्मविदः कर्तव्याभाव-स्मरणादिति चेत्सत्यम् । नास्त्येव कर्तव्यं ब्रह्मविदः । कृतकृत्यस्य यस्य चक्षुषो रूपवद्बहिरन्तर्ब्रह्मोपलब्धिस्तथापि भवानत्र प्रष्टव्यः 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति मुमुक्षोः कर्तव्यत्वेन निदिध्यासा श्रूयते सा कृतश्रवणस्य वा किमकृतश्रवणस्य वा । न द्वितीयः । वेदान्तार्थविचारशून्यस्यात्मनात्मविवेकविभागज्ञाना-भावान्निदिध्यासानुपपत्तेः । आद्ये श्रवणादिना विज्ञातात्मतत्त्वस्य वा उत अविज्ञातात्मतत्त्वस्येति । न द्वितीयः । अविज्ञातात्मतत्त्वस्य निदिध्यासायोगात् । निदिध्यासानाम विजातीयप्रत्ययतिरस्कारपूर्विका स-जातीयप्रत्ययवृत्तिः खलु । सैषा सम्यग्विदितात्मतत्त्वस्यैव सिध्यति नेत-रस्य । यथा घटप्रत्ययस्य विजातीयः पटप्रत्यय इति ज्ञानं घटपटयोः स्वरूपं लक्षणं च विजानत एव सिध्यति । तद्विज्ञानं च तयोः संदर्शनं कृतवत एव सिध्यति नान्यस्य, तद्वदात्मप्रत्ययानामना-त्मप्रत्यया विजातीया इति ज्ञानमात्मानात्मनोः स्वरूपं लक्षणं च विज्ञातवत एव सिध्यति । तादृग्विज्ञानं तत्साक्षात्कारवत एव सिध्यति नेतरस्य । नहि कश्चिदप्यदृष्टं गण्डभेरुण्डं दृष्टरुण्डादिवद्भावयितुं शक्नोति यथा पितरं तथा प्रपितामहं वा तद्वदविज्ञातात्मतत्त्वस्तदनुभवशून्यः कश्चिदप्यनात्मवदात्मानं भावयितुं न शक्नोति स्वानुभवाभावात् । ततोऽनात्मवत्तद्विलक्षणत्वेनात्मस्वरूपं सम्यग्विदितवत एव निरुक्तलक्ष-णा निदिध्यासा समाधिश्च कर्तव्यो भवति । 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ' इत्युक्त्वा निरुक्तलक्षणमात्मानं विज्ञातवतामेव 'ओमित्येवं ध्यायथ आत्मा-नम्' इति चात्मध्यानं विदधाति श्रुतिः । नन्वात्मविदः किमर्थं ध्यानं स-माधिर्वेति न मन्तव्यम् , ध्यानसमाध्योरात्मतत्त्वज्ञानाप्रतिबन्धहेतुत्वात्स-

र्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य च ब्रह्ममात्रत्वविज्ञानं ब्रह्मण्येवात्मताज्ञानं चाप्रतिबद्धं श्रुतिमात्रेण न सिध्यति विनैव ध्यानसमाधिभ्याम् । 'समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति' इति ब्रह्मविदो ब्रह्मण्येवात्मत्वविज्ञानस्याप्रतिबद्धत्वसिद्धये सर्वात्मसिद्धये च समाधिं विदधाति श्रुतिः । अतो ब्रह्मविदोऽप्यप्रतिबद्धज्ञानसिद्धये निदिध्यासादिरवश्यं कर्तव्य इति सिद्धम् ॥ ४० ॥

उक्तरीत्या समाधिं कृतवतो ब्रह्मविदो दुष्कर्मवशात्समाधिविघ्ने सति मृतस्य यतेर्दुर्गतिर्नास्ति किंतु सद्गतिरेवेत्याह—

प्राप्य पुण्यकृताँल्लोकानुषित्वा शाश्वतीः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥

प्राप्येति । योगमार्गे प्रवृत्तो ब्रह्मविद्यतिरप्राप्तयोगसंसिद्धिः सन् मृत्वा । 'वाजिमेधसहस्राणि राजसूयशतानि च । वाजपेयसहस्राणि अश्वमेधशतानि च ॥ एकस्य ज्ञानयोगस्य कलां नार्हन्ति षोडशीम् ॥' इति 'मनसश्चेन्द्रियाणां च ह्येकाग्र्यं परमं तपः' इत्यश्वमेधादिक्रतुकोट्यपेक्षया ध्यानयोगलेशस्य महत्तरपुण्यकर्मत्वस्मरणात् परमतपस्त्वाच्च तत्पुण्यकर्ममहिम्नैव स्वयं पुण्यकृतामश्वमेधादिमहाक्रतुकारिणां महालोकान् प्राप्य तत्र शाश्वती बह्वीः समाः संवत्सरानुषित्वा । तत्रत्यभोगाननुभूयेत्यर्थः । तद्भोगक्षये पुनरिह लोके शुचीनां योनिबीजकर्मादिशुद्धिमतां श्रीमतां भाग्यवतां च गृहिणां गेहे वंशे योगभ्रष्टोऽभिजायते समुत्पन्नो भवति नतु कर्मभ्रष्टः । कर्मिणः सति कर्मभ्रंशे पुण्यलोकप्राप्तिः शुचिश्रीमद्गेहे अभिजननं च न संभवति । तैलपाकवत्साङ्गस्यैव कर्मणः फलावश्यंभावित्वनियमान्न तथा योगिनः । तस्य देवतादर्शनवद्यावद्यावद्योगानुष्ठानं तावत्तावत्फलवद्भवति, तत एव योगभ्रंशेऽपि योगिनः पुण्यलोकप्राप्तिः शुचिश्रीमत्कुलप्रसूतिश्चेत्यर्थः ॥ ४१ ॥

'मनोहराणां भोज्यानां युवतीनां च वाससाम् । वित्तस्यापि च सान्निध्याच्चलेच्चित्तं सतामपि ॥ तत्सान्निध्यं ततस्त्यक्त्वा मुमुक्षुर्दूरतो वसेत् ॥' इति न्यायेन विषयसान्निध्यस्यैव विक्षेपकत्वे श्रीमद्गेहे समुत्पन्नस्य तस्योत्तमभक्तस्य योगिनो विषयभोगानुषक्त्या रागद्वेषादिभिर्मनःक्षोभं विना पुनर्विवेकवैराग्यादिविज्ञानयोगश्च क्षिप्रं न सेत्स्यतीति योगसिद्धेः कालव्यवधानमसहमानः सन्नाह—

अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥

अथवेति । अथवा श्रीसद्विलक्षणानां दरिद्राणां शुचीनां धीमतामेव योगिनां कुले भवति जायते । यद्वा योगी ब्रह्मविन्मृतिकाले यदि प्राक्तनकर्मवशात् हृदये विषयभोगेच्छावेगवान् तदा पुण्यकृतांल्लोकाननुभूय शेषानुभूत्यै श्रीमतां गेहे अभिजायते । यदि हृदये चित्तशोधकसत्कर्मविशेषवशात्तीव्रमोक्षेच्छावैराग्यवेगस्तदा स योगी । अथवा । अथशब्द आनन्तर्यार्थः । वाशब्दोऽवधारणार्थः । अथैव देहापातानन्तरमेव धीमतां ज्ञानिनां तत्रापि योगिनां ज्ञानयोगनिष्ठानामेव कुले भवति । प्रभवतीत्यर्थः । ईदृशं तद्वैराग्यमोक्षेच्छावेगानुरूपं ब्रह्मनिष्ठानामेव ज्ञानिनां कुले समनन्तरभावि यज्जन्म तदेतद्दुर्लभतरं हि एतदत्यन्तदुर्लभं खलु । गृहिणां ज्ञानित्वं दुर्लभं, तत्रापि तादृशानां ब्रह्मनिष्ठानामेव कुले लोकान्तरं योन्यन्तरमगत्वा कालव्यवधानं विना यज्जननं तद्दुर्लभतरमेव महत्तरेण तपसा लभ्यं भवति न त्वल्पेन, तत एवोच्यते दुर्लभतरमिति । ननु योगिनामेव ज्ञानिनां गृहमेधिनां कुले भवतीति यदुक्तं तन्नोपपद्यते । गृहिणां ब्रह्मवेदनासंभवात् ज्ञानोत्पत्तेरधिकारासंभवाच्च । शमदमवैराग्यसंन्यासाद्यन्तरङ्गसाधनशून्यानां बहिर्मुखानां तेषां श्रवणादिना ज्ञानमपरोक्षं न संभवति विना यतिं, तत्रापि परमहंसान् । तदुक्तं 'ब्रह्मात्मैकत्वविज्ञानं वेदान्तश्रवणादिना । जायते परहंसस्य यतेर्मुख्याधिकारिणः ॥ नाश्रमान्तरनिष्ठस्य' इति । ततस्तेषां ज्ञानाभावे कुतो योगनिष्ठेति चेत्, तर्हि धीमतां कर्मशास्त्रार्थज्ञानवतां योगिनां कर्मयोगिनां कुले भवतीति ब्रूम इति चेन्न । तथात्वे जन्मनो दुर्लभतरत्वाभावप्रसङ्गाच्छ्रोत्रियकुलाभिजननस्य सत्कर्मवत्साधारण्याद्ये ये सत्कर्मवन्तस्तेते श्रोत्रियकुले एवाभिजायन्ते । 'रमणीयचरणा रमणीयां योनिमापद्येरन्' इति श्रुतेः । ततो जन्मनो दुर्लभतरत्वानुपपत्तिप्रसूतार्थापत्त्या गृहिणामपि केषांचिदीश्वरप्रसादवतां शुद्धात्मनां ज्ञानं ज्ञानयोगित्वं चाभ्युपगन्तव्यम् । अन्यथा वसिष्ठागस्त्यादीनां जनकाश्वपत्यादीनां च प्राचामाधुनिकानां च वाचस्पतिखण्डनकारादीनामनात्मज्ञत्वप्रसङ्गात् । तर्हि 'अथातः' इति सूत्रस्थाथशब्दसूचितश्रवणसाधनवैधुर्येऽपि श्रवणादिना ज्ञानसिद्धावथशब्दस्यानर्थक्यं स्यादिति चेन्न । तेषामपि जन्मान्तरे शमदमसंन्यासादिसाधनवत्त्वस्योत्पन्नज्ञानेनानुमीयमानत्वादथशब्दस्यार्थवत्त्वोपपत्तेः । नच शमदमसंन्यासाद्युत्तमसाधनवच्छ्रवणादिजन्यज्ञानेन तेषां तत्रैव मुक्तिसिद्धौ पुनर्जनिकथा कुत इति वाच्यम् । तादृक्साधनसंपत्तावपि तेषां प्रतिबन्धवशात्सम्यग्ज्ञानानुपपत्तौ मोक्षासंभवाज्जन्मान्तरे तु तन्निवृत्त्या सम्यग्ज्ञानं योगनिष्ठा च

परमोपशान्तिरपि संभवति । 'क्रमात्तस्यापि जायते' इति स्मृतिवाक्यशेषात्क्रमादाश्रमक्रमाज्जन्मक्रमाद्वा चित्तपरिपाकक्रमाद्वा तस्याप्याश्रमान्तरवतोऽपि ज्ञानं जायत इत्यर्थः । तर्हि तेषां व्युत्थानप्रसङ्ग इति नच वाच्यम् । विषयानुभावककर्मणा व्युत्थाननिरोधसंभवान्निरन्तरब्रह्मनिष्ठानां नित्यानन्दामृतरसपायिनां तेषां संन्याससाध्याभावाच्च । तर्हि विषयानुभूतेर्ब्रह्मानुभूतेश्च परस्परविरोधादेकाधिकरणत्वानुपपत्तिरिति न वक्तव्यम् । तद्दृष्ट्या विषयानुभूतेराभासत्वेन स्वप्नार्थवन्मिथ्यात्वोपपत्तेः । तर्हि व्यवहारलोपप्रसङ्ग इति चेन्न । क्वचित्क्रियते क्वचिन्न क्रियते तेन तेषां सर्वमिथ्यात्वदर्शिनां प्रत्यवायाद्यनर्थाभावात् 'शौचमाचमनं स्नानं नतु चोदनया चरेत् । अन्यांश्च नियमाञ्ज्ञानी यथाहं लीलयेश्वरः ॥' इति ज्ञानिनामीश्वरवद्विधितन्नियमभङ्गदोषाद्यभावस्मरणात् ॥ ४२ ॥

'शिलोञ्छवृत्त्या परितुष्टचित्तो धर्मं महान्तं विरजं जुषाणः । मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः समुपैति शान्तिम् ॥' इत्यादिवचनप्रामाण्याल्लक्षकोटिसंख्याकेषु गृहिष्वपि यः कश्चिदीश्वरप्रसादपात्रीभूतो गृहस्थो ज्ञानी ज्ञानयोगी च संभवति यतस्ततो ज्ञानिनामेव योगिनां गृहिणां गृहे योगभ्रष्टस्याशु योगसिद्ध्यै जन्माङ्गीकर्तव्यम् । इममेवार्थं स्पष्टयितुमाह—

तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ ४३ ॥

तत्रेति । तत्र ज्ञानवतां योगिनां कुले जन्म लब्ध्वा स योगी पौर्वदैहिकं पूर्वस्मिन् देहे भवं पौर्वदैहिकं पूर्वजन्मन्यनुष्ठितश्रवणादिसंभवं ज्ञानिना योगवता च पित्रादिनोपदिष्टं तं बुद्धिसंयोगं यद्धर्मवान् पिता भवति तमेव धर्मं पुत्रायोपदिशति प्रायेण तदिदं लोकप्रसिद्धम् । यः प्राग्जन्मन्यनुष्ठितत्वादग्निवदन्तर्लीनात्मना स्थितः ब्रह्मविदा पित्रा वेदान्तवाक्यैर्व्यक्तीकृतस्तं बुद्धिसंयोगं बुद्धिर्ज्ञानं परावरैकत्वप्रवेदनलक्षणं तदेव समीचीनो योगो मुक्तिसिद्धौ परमोपायस्तं बुद्धिसंयोगं ज्ञानयोगं लभते । प्राग्जन्मन्येवानुबद्धत्वात्स्वल्पोपदेशेनैवाल्पकालेन प्राप्नोतीत्यर्थः । एतावन्मात्रेण पुमान् कृतार्थो न भवति, ज्ञानस्य सम्यक्त्वसंपादनेन विना ततो मुमुक्षोस्तदवश्यं संपादनीयमिति सूचयितुमाह—**यततेचेति** । ततः पित्रादेर्ज्ञानयोगलब्ध्यनन्तरं संसिद्धौ ज्ञानस्य सम्यक्त्वसिद्धिनिमित्तं भूयः पुनरस्मिञ्जन्मन्यपि यतते च प्रयत्नमपि करोति । यद्वा ततस्तस्मादेव संस्कारवेगादेव भूयोऽधिकतरं यतते च ज्ञानस्याप्रतिब-

द्भवसिद्धये पूर्ववन्नियमेन गुरूपदिष्टरीत्या नित्यं निरन्तरं च समाधिं करोतीत्यर्थः ॥ ४३ ॥

निरन्तरं समाध्यनुष्ठाने कारणमाह—

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥

पूर्वाभ्यासेनेति । हि यस्मात्कारणात्पूर्वाभ्यासेन पूर्वस्मिञ्जन्मनि श्रद्धया तीव्रमोक्षेच्छया अत्यन्तवैराग्येण च चिरकालं नित्यं निरन्तरं च नियमेन कृतो योऽभ्यासः संततसमाध्यावृत्तिस्तेनैव संस्कारात्मना बुद्धिस्थेनाभ्यासवेगेन सर्वाणि कर्माणि विधिना त्याजयित्वा स योगभ्रष्टो यतिः स्वयमवशोऽप्यनिच्छन्नपि ह्रियते बलात्कारेण योगनिष्ठायामेव स्थाप्यते नतु कर्मनिष्ठायां नैव विषयभोगनिष्ठायां च, तस्मादेव संसिद्धिनिमित्तं भूयः पूर्वस्मादधिकतरं यतते चेति पूर्वेणान्वयः । ननु 'अहरहः संध्यामुपासीत' 'उदिते सूर्ये प्रातर्जुहोति' 'दर्शपौर्णमासाभ्यां यजेत' 'यावज्जीवमग्निहोत्रं जुहोति' 'श्रौतं चापि तथा स्मार्तं कर्मालम्ब्य वसेद्द्विजः । तद्विहीनः पतत्येव ह्यालम्बरहितान्धवत्' इत्यादिश्रुतिस्मृत्युपदेशमनादृत्यैव ब्राह्मणः सन्, श्रौतं स्मार्तं च कर्म सर्वं सन्न्यस्यायं कथं योगनिष्ठायामेव प्रवर्तत इत्याशङ्कायां 'जन्मान्तरसहस्रेषु बुद्धिर्या भाविता पुरा । तामेव भजते जन्तुरुपदेशो निरर्थकः ॥' इति न्यायेन जन्मान्तरे कर्मी चेत्कर्मरतो धर्मी चेद्धर्मरतः पापी चेत्पापरतो भक्तश्चेद्भक्तिरतो ज्ञानी चेज्ज्ञानरतो योगी चेद्योगरतो भवति स्वस्य संस्कारानुरूपेण । नैवोपदेशतत्परो भवति विना संस्कारेण जनस्तथैवायमपि वेदशास्त्रादिकं सर्वमधीत्य तदर्थं च विचार्य 'न कर्मणा न प्रजया' इत्यादिश्रुतिवाक्यैः कर्मणो मोक्षसाधनत्वं निश्चित्य प्राक्तनज्ञानयोगाभ्याससंस्कारवेगात्कर्म वैदिकं च सर्वं संन्यस्य ब्रह्मनिष्ठायामेव तिष्ठतीति किमु वक्तव्यम् । मुमुक्षुरपि सर्वं कर्म संन्यस्य श्रवणादावेव वर्तत इत्याह—**जिज्ञासुरिति ।** योगस्य श्रवणादिसंजातविज्ञानवन्तं योगिनं स्वभावं ब्रह्मभावं योजयति गमयतीति योगो निर्विशेषः परमात्मा परं ब्रह्म तस्य योगस्य जिज्ञासुस्तत्स्वरूपं ज्ञातुमिच्छुर्जिज्ञासुर्मुमुक्षुरपि मोक्षैककामनया शब्दब्रह्म वेदस्तं तदुपदेशं तत्प्रतिपाद्यं कर्म चातिवर्तते । 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' 'वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्' इत्यादिश्रुतिस्मृतिबलाज्जिज्ञासुरपि वेदं वेदोक्तं कर्म च सर्वं सन्न्यस्य श्रवणादावेव प्रवर्तत इत्यर्थः ॥ ४४ ॥

योगविषये तीव्रमोक्षेच्छावैराग्याभ्यां कृताधिकतरप्रयत्नस्य यतेः फलमाह—

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम्॥ ४५॥

प्रयत्नादिति। प्रयत्नात्समाधौ प्रकृष्टो यत्नः प्रयत्नस्तस्मात्संसिद्ध्यै यतमानस्तत्परतया नित्यं निरन्तरं च नियमेन समाधिनिष्ठां कुर्वाणस्तु कालान्तरफलसिद्धेर्मन्दप्रयत्नाद्भिक्षोरेनं व्यावर्तयितुं तुशब्दः। प्रकृष्टप्रयत्नस्तीव्रमोक्षेच्छुर्योगी ब्रह्मविद्यतिः संशुद्धकिल्बिषः निरन्तरसमाधिनिष्ठया सम्यक् शोधितं निर्यापितं किल्बिषमज्ञानतत्कार्यलक्षणं यस्य सः संशुद्धकिल्बिषः। निःशेषविनष्टबाह्यवासनातत्कार्यकामकर्मफलः सन्ननेकजन्मसंसिद्धः अनेकेष्वेकव्यतिरिक्तेषु कपिञ्जलाधिकरणन्यायेन बहुवचनस्य त्रित्वे पर्यवसानादेकद्वित्रिषु जन्मसु संसिद्धः संसिद्धिः सम्यग्दर्शनं तद्वान् संसिद्धोऽप्रतिबद्धविज्ञानो निःशेषविनष्टभेदप्रत्ययो भूत्वा ततस्तेन सम्यग्दर्शनेनैव परां परमपुरुषार्थभूतां गतिं स्वात्मनाधिगम्यत इति गतिः स्वस्वरूपभूता परमावस्था तां विदेहमुक्तिं याति। निर्विशेषनित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाऽद्वितीयब्रह्मात्मना स्वेन रूपेण तिष्ठतीत्यर्थः। एतेन तीव्रमोक्षेच्छोर्यतेः श्रवणमनननिदिध्याससमाधिषु क्रियान्तरानवकाशेनाधिकतरप्रयत्नेन भवितव्यमल्पप्रयत्नस्य तु चिरतरेणैव कालेन मुक्तिरिति सूचितं भवति॥ ४५॥

यतः शमदमसंन्यासाद्युत्तमसाधनसंपत्तिमताधिकतरप्रयत्नसमनुष्ठितसमाधिनिष्ठासंभाविताद्वैतविज्ञानवतैव योगिना प्राप्यो भवति मोक्षस्ततस्तस्याद्वैतविज्ञानवत एव योगिनोऽन्यसाधनानुष्ठातृभ्य आधिक्यमाह—

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥ ४६॥

तपस्विभ्य इति। तपस्विनस्तापसाः कृच्छ्रचान्द्रायणादिपञ्चाग्निमध्यस्थत्वादितपोनिरता मुमुक्षवस्तेभ्यो योगी उक्तलक्षणो ब्रह्मविद्यतिरधिको भवति। तपसा कल्मषं हन्तीति स्मरणात्तेषां तपसः पापनिवृत्त्येकप्रयोजनवत्त्वेनाल्पफलत्वात्तेभ्योऽल्पप्रयोजनवद्भ्यः प्राजापत्यादिलोकगामिभ्यो ज्ञाननिष्ठया पुनरावृत्तिनिर्मुक्तविदेहमुक्तिपथगामी ब्रह्मविदुत्तमोऽधिको भवतीत्यर्थः। ज्ञानिभ्यो मीमांसादिशास्त्रार्थविद्भ्योऽप्यधिक उत्तमो मतः संमतः तेषां शास्त्रार्थज्ञानस्य धर्मानुष्ठानानुष्ठापनैकप्रयोजनत्वेनाल्पफल-

कत्वात् । यद्यपि 'यस्तु व्याकुरुते वाचं यस्तु मीमांसते गिरम् । तावुभौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ ॥' इति तेषां पुण्यकर्मत्वं पावकत्वं च विद्यते, तथापि तेन पुण्यलोकप्राप्तिः पुनरावृत्तिरप्यस्त्यतस्तेभ्य उक्तलक्षणो योग्येवाधिको भवति। किंच कर्मिभ्योऽग्निहोत्रादिवैदिककर्मनिष्ठेभ्यश्च योग्येवाधिको भवति । यद्यपि 'अपाम सोमममृता अभूम' इति 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति कर्मिणाममृतत्वं सुकृतस्याक्षय्यत्वं च श्रूयते, तथापि तस्याग्निष्टोमादिपुण्यकर्मापेक्षयाक्षय्यत्वं नतु स्वाभाविकं तथैवामरत्वं च मर्त्यापेक्षया पुनःपुनर्मरणराहित्यं न तु मुक्तिः । यतः 'नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति' इति कर्मिणां पुनरावृत्तिः श्रूयते। ततः कर्मिभ्यश्च निरुक्तलक्षणो योग्येवाधिक उत्तमो भवति। चकार उक्तेभ्योऽनुक्तेभ्यः सांख्ययोगादिमतनिष्ठेभ्यः सर्वेभ्यो ज्ञाननिष्ठो ब्रह्मविदेव श्रेष्ठ इति ज्ञापनार्थः । यस्मादेवं तस्मान्मुमुक्षुश्चेत्त्वं योगी भव। हे अर्जुन, योगनिष्ठाजनितसम्यग्ज्ञानबलेन पुनरावृत्तिरहितं ब्राह्मं पदं विदेहकैवल्याख्यं प्राप्स्यसीत्यर्थः ॥४६॥

विदेहमुक्तेरसाधारणकारणसम्यग्ज्ञानसिद्ध्यै समाधिनिष्ठायामधिष्ठितवतो योगिनः परमपुरुषार्थसाधकत्वात्तापसादिभ्योऽधिकत्वं प्रतिपाद्येदानीं सर्वदा समाध्यनुष्ठानाभावे श्रवणश्रावणकोट्यापि सम्यक् ज्ञानं न सिध्यति । तदभावे विदेहमुक्तिश्च । ततो मुमुक्षोर्यतेरवश्यं समाधिः कर्तव्य इति ज्ञापयितुं तस्य समाधिश्रमाद्बाह्यतो देशकालमूलबन्धासननियमादिश्रमरहितं समाधिं सूचयितुमिच्छया तन्निष्ठावन्तं स्तौति—

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ४७ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे आत्मसंयमयोगो नाम षष्ठोऽध्यायः ॥ ६ ॥

योगिनामिति । 'सर्वं खल्विदं ब्रह्म' 'सर्वं ह्येतद्ब्रह्म' 'ब्रह्मैवेदं सर्वम्' इत्यादिश्रुतिशतैः । 'सोऽहं च त्वं स च सर्वमेतत्' 'भूतानि विष्णुर्भुवनानि विष्णुः' 'वासुदेवः सर्वम्' इत्यादिस्मृतिसहस्रैरिदं सर्वं ब्रह्मैव ब्रह्मविवर्तत्वान्मरुजलवदित्यादियुक्तिकोटिभिश्च निर्धारितेऽर्थे सर्वस्य ब्रह्ममात्रत्वे श्रद्धावान् । श्रद्धानाम विपरीतभावनाराहित्येनोक्तार्थानुवृत्तबुद्धिवृत्तिविशेषस्तद्वानेव सन् यो मुमुक्षुर्ब्रह्मविद्यतिर्मद्गतेन श्रुतं दृष्टं स्पृष्टं मतं विज्ञातं च सर्वं ब्रह्मैवेति विपरीतप्रत्ययराहित्येन पूर्वोक्तश्रुतिस्मृति-

युक्तिभिर्निर्धारिते सच्चिदानन्दैकरसे मय्यद्वितीये परे ब्रह्मणि गतेन बहिरन्तः सर्वत्र मत्सत्तानुवर्तिनान्तरात्मना चेतसा निरुक्तलक्षणं मां भजते सर्वमिदमहं च ब्रह्मैवेति स्वं जगच्च सर्वं ब्रह्मैव पश्यति । आहारविहारशयनासनादिषु सर्वास्ववस्थासु च वृत्त्यन्तररहिततया सर्वदा मामेव परमात्मानं स्वात्मना योऽनुसंधत्त इत्यर्थः । योगिनां विराड्हिरण्यगर्भेश्वराद्युपासकानां सर्वेषामपि । पञ्चम्यर्थे षष्ठी । योगिभ्यः सर्वेभ्य इत्यर्थः । स एव युक्ततमः । यतो विराडाद्युपासका योगिनस्त्वविद्यापटलव्यवहितद्दष्टयोपास्योपासकादिभेदमालम्ब्य विराडाद्युपासते । अयं तु श्रवणादिजन्यज्ञानाग्निनिर्दग्धद्वैतभ्रमपटलो भूत्वा स्वस्य च सर्वस्य जगतश्च ब्रह्ममात्रत्वमेव पश्यति । तत एव युक्ततमो योगी श्रेष्ठ इति मे ममेश्वरस्य मतोऽभिमत इत्यर्थः । एतेन यो ब्रह्मवित्तेन सर्वदा ब्रह्मनिष्ठयैव स्थातव्यमिति बोधितं भवति । प्रत्यग्दृष्ट्या वृत्त्यन्तरराहित्येन सर्वस्य ब्रह्ममात्रत्वदर्शनमेव सुकरः समाधिरिति सूचितं च ॥ ४७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः ।

पूर्वं षष्ठाध्यायेन ज्ञानयोगमारुरुक्षोः कर्मैव साधनं तस्यैव योगमारूढस्य सर्वकर्मसंन्यासः साधनमिति कर्मतत्संन्यासयोः क्रमाच्चित्तशुद्धिं ज्ञानयोगसिद्धिं प्रति च कारणत्वं प्रतिपाद्य योगं साङ्गं सलक्षणं च निरूप्य योगभ्रष्टस्य नाशशङ्कामपास्य, यो ब्रह्मवित्तेन सदा ब्रह्मनिष्ठयैव स्थातव्यमित्युक्तम् । इदानीं यन्निष्ठया ब्रह्मवित्तिष्ठति तद्ब्रह्म कीदृशं किंलक्षणं कथं वा तेन तत्र स्थातव्यमित्याशङ्कायां तन्निरूपयितुं सप्तमाध्याय आरभ्यते । तत्रादौ ईश्वरैकशरणतया शुश्रूषुणा मोक्षार्थिना श्रोतव्यार्थे सावधानेन भवितव्यमिति ज्ञापयितुमर्जुनं मदाश्रयो मन्मनाश्च भूत्वा मयोच्यमानमर्थं सावधानतया शृण्विति बोधयितुं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥

मयीति । हे पार्थ, त्वं योगं 'तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम्' इत्युक्तलक्षणं युञ्जन् युयुक्षन् कर्तुमिच्छन्, मदाश्रयः अहमेव

सर्वात्मा सर्वान्तर्यामी भक्तत्राणपरायणः परमेश्वर आश्रय आलम्बनं शरणं यस्य स मदाश्रयः । यथा स्वर्गकाम्यग्निहोत्रादिकर्माश्रयः यथा वा जयैषी शस्त्रास्त्रादिसाधनाश्रयो भवति, यथा मुमुक्षुर्योगी मदाश्रयः 'ईश्वरानुग्रहादेव पुंसामद्वैतवासना' इति स्मरणात्, मदाश्रयेण खलु मुमुक्षोर्ज्ञानं तत्साधनपौष्कल्यं मोक्षश्च निर्विघ्नेन सिध्यत्यतस्त्वं मदाश्रयः सन् मयि वक्ष्यमाणलक्षणे ज्ञातव्ये परे ब्रह्मण्येवासक्तमनाः मल्लक्षणमत्तत्त्वमन्महत्त्वविचारतदवगमतन्निश्चयादावेवासक्तं संलग्नं मनो यस्य स मय्यासक्तमना भूत्वा नत्वन्यत्रासक्तमनाः सन् मां मायया तद्गुणतद्धर्मतच्छक्तितद्वैभवोपलक्षितं वस्तुतस्तद्रहितं च परमात्मानं प्रतिपाद्यमानमसंशयं संशयं विना समग्रं साक्षात्कारपर्यवसानं यथा येन प्रकारेण ज्ञास्यसि इदं खलु परं तत्त्वमिति ज्ञातुं शक्नुयास्तत्तथा वक्ष्यामि शृणुष्वेत्यर्थः ॥ १ ॥

यदुपदेक्ष्यामीति प्रतिज्ञातं तद्वेदनमेवाह—

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ २ ॥

ज्ञानमिति । अहं ते तुभ्यं ज्ञानं मद्विषयकं इदमधुना वक्ष्यमाणं सविज्ञानं विज्ञानसहितमुपदेशोत्तरक्षणभाव्यनुभवसंयुक्तमशेषतः यावता वस्त्वनुभूयते तावदशेषं वक्ष्याम्युपदेक्ष्यामि । यज्ज्ञात्वा मयोपदिष्टं यज्ज्ञानं प्राप्येह ब्रह्मविषये तव भूयः पुनर्ज्ञातव्यं प्राप्तव्यमन्यत्पुरुषार्थसाधनं नावशिष्यते नापेक्ष्यते । अनेनैव कृतार्थो भविष्यसीत्यर्थः । यद्वा जगद्गुरुरेषोऽहं ते मुमुक्षवे शुद्धात्मने तुभ्यं ज्ञानं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रवणाज्ज्ञानैकस्वरूपमिदं विद्वद्भिः प्रत्यक्षेणानुभूयमानमहमर्थत्वेन साक्षादपरोक्षमिति वा इदंतया निर्दिष्टं ब्रह्म सविज्ञानमनुभवसहितं तदनुभवो यथा स्यात्तथाऽशेषतः समग्रं वक्ष्याम्युपदेक्ष्यामि । यज्ज्ञात्वा यत्साक्षादनुभूय । यस्मिन्विज्ञात इत्यर्थः । इह भूयः पुनर्न विज्ञातव्यं वस्त्ववशिष्यते । 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' इति 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इत्येकविज्ञानेन सर्वविज्ञानश्रवणान्मयि परे ब्रह्मणि विज्ञाते न विदुषः पुनर्ज्ञेयान्तरावशेषो विद्यते । मत्तत्त्वज्ञो यः स सर्वज्ञो भवतीत्यर्थः ॥ २ ॥

नन्वहमर्थत्वे ब्रह्मणः कथं तज्ज्ञानं ब्रह्मैवाहमिति सर्वत्र नोपलभ्यत इति चेत्सत्यम् । नोपलभ्यते यद्यपि 'यत्साक्षादपरोक्षाद्ब्रह्म' इति श्रुत्याप्युच्यते ब्रह्मणः साक्षादपरोक्षत्वं, तथाप्यनेकजन्मार्जितपुण्यपुञ्जसमुद्भावि-

तच्चित्तपरिपाकसमुत्पन्नविवेकवैराग्यशमदमसंन्यासाद्युत्तमसाधनवतामेव परमेश्वरानुग्रहपात्रीभूतानां श्रवणमननादिभिस्तज्ज्ञानं सिध्यति नतु मलिनचित्तानामीश्वरकृपादूरवर्तिनां कामानलदंदह्यमानानां सर्वगताप्यर्कप्रभा यथान्धानामत एव स्वज्ञानं दुर्लभमित्याह—

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥

मनुष्याणामिति । मनुष्याणां सहस्रेषु । मनुष्याणामिति मनुष्यत्वग्रहणं तदितरेषां बन्धमोक्षज्ञानाभावसूचनार्थम् । ततो मनुष्याणामेव बन्धमोक्षज्ञानशास्त्रतदर्थग्रहणाधिकार इति मनुष्यत्वं प्राप्तवतां तत्रापि ब्राह्मणत्वमवश्यं मोक्षाय यतितव्यमिति ज्ञापयितुं मनुष्याणामित्युक्तम् । तत्र मनुष्याणामपि पापपूरितदेहानां सर्वेषां मुक्तययोग्यत्वं सूचयितुं सहस्रेष्वित्युक्तम् । सहस्रेष्वित्ययुतनियुतलक्षाणामुपलक्षणम् । देवकृपैकलभ्याया मुमुक्षाया अतिदुर्लभत्वात् । एवमुक्तसंख्यावन्मनुष्येषु कश्चिदेव मोक्षैककामनया श्रद्धाभक्तिभ्यामीश्वरार्पणबुद्ध्या बहुजन्मसमनुष्ठितपुण्यकर्मपरिपाकेन शुद्धात्मा सन् विवेकवैराग्यशमदमाद्युत्तमसाधनसंपन्नो भूत्वा सिद्धये ज्ञानसिद्धये यतति यतते । नित्यनिरन्तरश्रवणादिनिष्ठया यत्नं करोतीत्यर्थः । अयमेव सिद्धो यस्य चित्तं दृष्टादृष्टसर्वविषयवैमुख्यं प्राप्य श्रवणादावेव तिष्ठति । एवमुक्तलक्षणसंपन्नानां ज्ञानसिद्धै एव श्रवणाद्येकनिष्ठानां सिद्धानामपि सहस्रेषु कोटिपर्यन्तेषु कश्चिदेव गुर्वात्मेश्वरसुप्रसादसंपन्नो नित्यनिरन्तरनिर्विकल्पकसमाधिनिष्ठापरिश्रान्तो ब्रह्मविदुत्तमः । वासुदेवः सर्वमिति साक्षान्मामानन्दैकरसं चिद्घनमद्वितीयं परं ब्रह्म वेत्ति विजानाति । ननु विष्णुमीश्वरं रामं कृष्णं च देवमनुष्यादयः सर्वे जानन्ति कथं कश्चिदेव मां वेत्तीत्युच्यत इति चेन्न । ते मामयथाभूतस्वरूपमेव जानन्ति । स्वतो भिन्नं परिच्छिन्नं नतु यथार्थस्वरूपमित्याह—**तत्त्वत इति** । तत्त्वतः श्रुत्या 'एतस्मिन्नदृश्येनात्म्ये' इति दृश्यवैशिष्ट्यरहितत्वेन प्रतिपादितं मायातत्कार्यलेशसंबन्धशून्यं नित्यशुद्धबुद्धमुक्तस्वभावमानन्दैकतनुमद्वितीयं मां परं ब्रह्मविदुत्तम एक एव स्वात्मना साक्षाद्विजाति नान्य इत्यर्थः । एतेन वर्णानां ब्राह्मणादीनां सर्वेषां मुमुक्षुतायाश्चित्तशुद्धेर्ज्ञानोद्देशेनैव नियतश्रवणादिप्रवृत्तेस्तत्समुत्पन्नसम्यग्ज्ञानसिद्धेश्च तदेकद्वारकमुक्तेरपि च पूर्वपूर्वापेक्षया क्रमेणोत्तरोत्तरस्यातिदुर्लभत्वं सूचितमतः प्रयत्नेनोक्तसाधनसंपत्त्या मुक्तिः संपादनीया विवेकवतामिति सिद्धम् ॥ ३ ॥

कीदृशं ब्रह्म किंलक्षणमिति पृष्टवते 'ज्ञानं तेऽहं सविज्ञानम्' इति ब्रह्मणो ज्ञानस्वरूपत्वं लक्षणमित्युक्त्वेदानीं 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इति, 'सर्वं खल्विदं ब्रह्म' इत्यादिश्रुत्यर्थावष्टम्भेन ब्रह्मकार्यत्वात्तद्विवर्तत्वाच्च जगत्सर्वं ब्रह्मैवेति बोधयितुं निर्विकारस्यापि स्वस्य ब्रह्मणः प्रकृतिद्वारा जगत्कारणत्वसिद्धये आदावपरां प्रकृतिं निर्दिशति—

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥

भूमिरिति । भूमिर्गन्धतन्मात्रलक्षणा कारणात्मिका सूक्ष्मा नतु स्थूला कार्यात्मिका । भिन्ना प्रकृतिरष्टधेति भूम्यादीनामष्टानामपि प्रकृतित्वाभिधानात् । 'महदाद्याः प्रकृतिविकृतयः सप्त' इति महदादिभूम्यन्तानां सप्तानामपि विकृतित्वस्मरणात्कथं प्रकृतित्वमिति न शङ्कनीयम् । तासामपि जगदारम्भकत्वात्प्रकृतित्वोपपत्तेः तथैवापोऽपि रसतन्मात्राः अनलो रूपतन्मात्रः वायुः स्पर्शतन्मात्रः खमाकाशं शब्दतन्मात्रं मन इति संकल्पविकल्पयोरहंकारप्रधानत्वात्तदात्मकेन मनसा तत्कारणमहंकारो गृह्यते । बुद्धिरितिशब्देन सर्वसमष्टिर्महत्तत्त्वं लक्ष्यते । अहंकार इत्यहंकारवासनाविशिष्टमविद्यात्मकमव्यक्तमुच्यते । बीजे शाखापर्णपुष्पादिवासनावदव्यक्ते सर्वकारणे महदादिसर्वविकारवासनासंभवात् । 'कारणगुणा हि कार्यगुणानारभन्ते' इति न्यायात् इयं प्रकृतिः कार्यैकवेद्या स्वयमुक्तप्रकारेणाष्टधा भिन्ना मे मम परमात्मनो निर्गुणस्यापि स्वगुणद्वारा गुणित्वे सृष्ट्यादिकारणत्वे च हेतुरुपाधिः सैषैव माया 'मायां तु प्रकृतिं विद्यात्' इति श्रुतेः । यत्कार्यमेतन्मरुमरीचिकाकल्पं जगज्जालमिति ॥ ४ ॥

एवं सृष्ट्यादिहेतोः प्रकृतेरष्टधा स्वरूपं निरूप्य एतस्या एव प्रकृत्यन्तराद्भिन्नत्वं नाम च वदन् तामपि प्रकृतिं निर्दिशति—

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥

अपरेयमिति । या पूर्वोक्ता प्रकृतिः सेयमपरानाम्ना चापरा परप्रकृतेर्भिन्ना निकृष्टा च अनृतत्वाज्जडत्वाद्दुःखात्मकत्वादशुद्धत्वात्पुरुषाधीनत्वात्तद्वेद्यत्वात् ज्ञानेन तन्निवर्त्यत्वाच्च तदपेक्षया निकृष्टत्वम् । पराया अपरावैलक्षण्यद्योतनार्थस्तुशब्दः । इत उक्तायाः प्रकृतेरन्यां भिन्नां विल-

क्षणां च परां शुद्धत्वेन तदुपजीव्यत्वेन सत्तास्फूर्तिप्रदत्वेन च श्रेष्ठाम्। 'परास्य शक्तिर्विविधैव श्रूयते' इति प्रसिद्धां मे प्रकृतिं जीवभूतां क्षेत्रज्ञरूपां विद्धि विजानीहि। यया क्षेत्रज्ञरूपया परया प्रकृत्यान्तरङ्गस्थया जगदिदं धार्यते सर्वत्र देहेन्द्रियादिरूपं जगज्जीवेन खलु धार्यते। अहं ममेत्यभिमानेन तोषणपोषणरक्षणादिक्रिया संपाद्यते। तथा बहिरपि घटोऽयं पटोऽयमिति सत्तास्फूर्तिप्रदानेन नामरूपादिभेदकल्पनया भोग्यत्वसंभावनया विनियोगेन च जगतो निर्वाहोऽप्यनेनैव क्रियत इत्यर्थः॥ ५॥

उक्तस्य प्रकृतिद्वयस्य कार्यमाह—

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥ ६॥

एतदिति। एतन्निरुक्तलक्षणं प्रकृतिद्वयं योनिः कारणं येषां तानि एतद्योनीनि भवन्ति जन्मना सत्तां भजन्तीति भूतानि ब्रह्मादिस्तम्बान्तानि जंगमानि स्थावराणि च वृत्तवर्तमानवर्तिष्यमाणानि जनिमन्ति सर्वाण्यपीत्युपधारय। अवधारयेत्यर्थः। ननु त्वत्प्रकृत्योरेव जगत्कारणत्वे 'यतो वा इमानि भूतानि' इत्यादिश्रुतिप्रसिद्धं जगत्कारणत्वं तव कुत इत्याकाङ्क्षायां तत्कार्यं यज्जगज्जननं तन्मत्कार्यमेव भवति, मद्व्याप्त्या खलु तयोर्जगज्जननशक्तिर्न तु केवलयोः, यथा जीवव्याप्त्या देहस्य पुण्यपापक्रियाकरणशक्तिर्न तु केवलस्य। तथात्वे तस्यैव स्वर्गादिभोगप्रसङ्गात्ततस्तदुपाधिकस्य जीवस्यैव तत्करणं यथा, तथैतद्द्वयोपाधिकस्य ममैव सर्वज्ञस्य सर्वजगज्जनकत्वम्। यतः 'सोऽकामयत बहु स्याम्' इति ममैव बहुभवनसंकल्पः श्रूयते। ततोऽहमेव सर्वजगत्कारणमित्याह—**अहमिति।** कृत्स्नस्य स्थूलस्य सूक्ष्मस्य कारणस्य च सर्वस्य जगतोऽहमेव प्रभवः प्रभवत्यस्मादिति प्रभवः उपादानम्। तथा प्रलयश्च उपसर्गवशात्प्रलीयते निष्पाद्यतेऽनेनेति प्रलयो निमित्तकारणं चोभयमप्यहमेवेत्यर्थः॥ ६॥

केचिद्ब्रह्मणो व्यतिरिक्तं कारणं कल्पयित्वा जगतस्तत्कारणाधारत्वं श्रुतिविरुद्धं वर्णयन्ति तन्मतनिरासं कुर्वन् सर्वाधारोऽहमेवेत्याह—

मत्तः परतरं नान्यत्किंचिदस्ति धनंजय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥ ७॥

मत्त इति। मत्तः प्रकृत्युपाधिकात्सत्यादिलक्षणात्परमेश्वरात्परतरं कारणं सांख्यपरिकल्पितप्रधानशब्दवाच्यं नैयायिकपरिगृहीतपरमाणु-

लक्षणं वा अन्यद्वा किंचिदीषदपि नास्ति । प्रकृत्यादीनां कारणत्वे प्रमाणाभावात् । 'यतो वा' इत्यादिश्रुतिरेव प्रमाणमिति चेन्न । 'ईक्षतेर्नाशब्दम्' इत्याद्यधिकरणजातेन जगत्कारणस्य चेतनत्वादिधर्मवत्त्वप्रतिपादनेन श्रुत्यर्थाविषयतया प्रकृत्यादेः कारणत्वस्य निरस्तत्वात् । 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः' इति, 'एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य' 'प्रभवाप्ययौ हि भूतानाम्' इत्यादिश्रुतिप्रसिद्धत्वादहमेव चेतनः सर्वज्ञः सर्वजगत्कारणमित्यर्थः । किंच 'कस्मिन्सर्वे संप्रतिष्ठिता भवन्ती'त्युपक्रम्य श्रुत्या रसातलादिब्रह्मान्तान्सर्वलोकानपोह्य 'सर्वे लोका आत्मनि ब्रह्मणि मणय इवोताः प्रोताश्च' इति सर्वलोकानां सर्वात्मनि ब्रह्मण्येवोतप्रोतत्वप्रतिपादनाल्लोकानां प्रकृत्याद्याधारत्वं मिथ्या कर्तुमहमेव सर्वाधार इत्याह—**मयीति** । सूत्रे मणिगणा इव मय्येव स्वकारणे सर्वाधिष्ठाने ब्रह्मणीदं चराचरात्मकं व्याकृतादिस्थूलान्तं जगत्सर्वं प्रोतमनुगतं भवति । तन्तुषु पटवत् सूत्रे मणिगणवत् मत्सत्तामेवानुवृत्त्य तिष्ठति न पृथग्विद्यत इत्यर्थः । ननु दृष्टान्ते तावदस्य मण्याधारसूत्रस्य तत्र प्रोतसौवर्णादिमणीनां च यथा भेदस्तथा त्वयि प्रोतस्य जगतस्तदाधारस्य च तवापि भेदो युक्त एवेति चेन्न । सूक्ष्मबुद्ध्या युक्त्या च विचार्यमाणे भेदादर्शनात्स्थूलबुद्धीनां सूत्रस्य मणीनां च भेदे प्रतीयमानेऽपि सूक्ष्मबुद्धीनां युक्त्या विचार्यमाणे सूत्रमणिगणयोराधाराधेययोर्द्वयोरपि भौतिकत्वेनैकत्वमेवावगम्यते नतु भेदः । तत्र रूपव्यक्तिविशेषकृतो भेदो विद्यत एवेति चेन्न । तस्य मूढव्यवहृत्यै कल्पितत्वेनाप्रामाणिकत्वाद्रूपत्वावच्छिन्नरूपस्य सर्वत्रैकत्वसिद्धेः तद्विशेषस्यौपाधिकत्वेनास्वाभाविकत्वान्मिथ्यात्वोपपत्तेः चित्रपटेऽपि सर्वत्रानुगतरूपस्यैकत्वदर्शनात् भौतिकत्वसामान्यस्य सर्वानुगतत्वात्तद्विशिष्टस्य वस्तुन एकत्वोपपत्त्या सर्वमिदं भौतिकमिति सर्वत्र भौतिकैकप्रत्यये जाते तत्र व्यक्तिविशेषकल्पितप्रत्ययानुदयात् अयं समुद्र इत्यत्र तरङ्गफेनबुद्बुदादिप्रत्ययादर्शनात् प्रधाने गृहीतेऽप्रधानग्रहणस्यान्याय्यत्वाद्व्यक्तिविशेषकृतभेदासिद्धेः । यथैकस्या एव भूमेः स्वास्थ्यगृहादिकल्पनया भेदव्यवहारस्तथा भौतिकत्वेनैकत्वेऽपि सूत्रादौ सूत्रमिति मणिरिति भेदो व्यवहारायैव कल्पितो न वास्तवः । तथात्वे भौतिकत्वाभावप्रसङ्गात् भेदस्य निरूपयितुमशक्यत्वाच्च तदेकत्वमेवाभ्युपगन्तव्यं यथा दृष्टान्ते तथैव दार्ष्टान्तिकेऽपि ब्रह्मजगतोरप्येकत्वमेवाङ्गीकर्तव्यम् । अन्यथा 'ब्रह्मैवेदं सर्वम्' इत्याद्यद्वैतप्रतिपादकश्रुतिविरोधप्रसङ्गादित्यर्थः ॥ ७ ॥

तस्मादेव 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्' 'यदादित्यस्य रोहितं रूपम्' इत्यादिश्रुत्युक्तप्रकारेण रसप्रभाप्रणवादिरूपेणाबादेः कारणात्मना तिष्ठतः स्वस्मात्पृथगबर्कादीनां सत्ताभावं प्रतिपादयति स्वाभिन्नत्वसिद्धये—

रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥

रसोऽहमिति । अहमप्सु रसोऽस्मि रसरूपेण तिष्ठाम्यतो रसात्मके मयि स्वकारणे आपः प्रोता मदात्मना मदेकसत्ताः सन्त्यो मयि तिष्ठन्ति । मृत्कार्यस्य घटस्य मृदात्मना मृद्यवस्थानं प्रत्यक्षसिद्धं तद्वन्नतु पृथग्विद्यन्त इत्यर्थः । तथा शशिसूर्ययोरहं प्रभास्मि तत्कारणप्रभारूपेण तयोस्तिष्ठामि । ततस्तदात्मके स्वकारणे मयि तौ प्रोतौ मदेकसत्ताकौ भूत्वा तौ मदात्मना मय्येव विद्येते नतु मत्तः पृथगित्यर्थः । सर्ववेदेषु ऋगादिष्वहं प्रणवोऽस्मि ॐकाररूपेण तिष्ठामि । प्रणवात्मके मयि स्वकारणे सर्वे वेदाः प्रोता मदेकसत्ताका भूत्वा मयि प्रणवे तिष्ठन्तीत्यर्थः । खे व्योम्न्यहं शब्दोऽस्मि तत्कारणशब्दरूपेण तिष्ठामि । तदात्मके मयि स्वकारणे खं प्रोतं ततो मदेकसत्ताकं सत् मदात्मना मयि तिष्ठति । नृषु पुरुषेष्वहं पौरुषमस्मि अहं पौरुषं पुरुषभावः पुंलक्षणं येनायं पुमानिति ज्ञायते तदात्मके मयि पुरुषाः प्रोताः मदेकसत्तया मदभिन्नाः सन्तो मयि तिष्ठन्तीत्यर्थः ॥ ८ ॥

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥

किंच । **पुण्यो गन्ध इति** । पृथिव्यां चाहं पुण्यो गन्धोऽस्मि पुण्यो मनोहरश्च शुद्धश्च । गन्धस्य मनोहरत्वशुद्धत्वोक्तिरबाकाशादिकारणभूतरसशब्दादीनामुपलक्षणार्थम् । पञ्चानामपि पृथिव्यादिकारणानां गन्धरसादीनां वास्तवं यन्मनोहरत्वं शुद्धत्वं तद्योगिप्रत्यक्षम् । दुष्टत्वं तु कार्यद्रव्यान्तरसंसर्गादेव जायते भोक्तृकर्मानुरूपेण नतु स्वभावतोऽस्ति । यो मनोहरः शुद्धो गन्धस्तेन रूपेण पृथिव्यां तिष्ठामि । गन्धात्मके स्वकारणे मयि पृथिवी प्रोता गन्धात्मके मयि गन्धमयात्मना तिष्ठतीत्यर्थः । विभावसावग्नावहं तेजोऽस्मि तेजःस्वरूपे स्वकारणे मय्यग्निः प्रोतः मत्सत्तया तेजोमयो भूत्वा मदभिन्नः सन् मदात्मना तेजःस्वरूपे मयि

तिष्ठतीत्यर्थः । सर्वेषु भूतेषु प्राणिष्वहं जीवनमस्मि । जीवनं जीवनकारणमन्नादिस्तेन रूपेण भुक्तान्नरसात्मना प्राणिषु तिष्ठामि । ततस्तेऽन्नरसात्मके स्वकारणे मयि प्रोतास्ततो मत्सत्तयान्नरसमया भूत्वा तदात्मना मय्यन्नरसात्मके तिष्ठन्तीत्यर्थः । तपः कृच्छ्रचान्द्रायणादिकं चित्तैकाग्र्यं वा पञ्चाग्निमध्यावस्थानं वा येषामस्ति ते तपस्विनस्तेषु चाहं तपोऽस्मि तपोरूपेण तिष्ठामि । ततस्ते तपोमये मयि प्रोतास्तपोमात्रात्मकाः सन्तस्तपःस्वरूपे मयि तिष्ठन्ति नतु मत्तो व्यतिरिच्यन्त इत्यर्थः । ननु तपस्विनां तपस्त्वपां रसवत्कारणं न भवति किंतु धर्मः, तपसः कारणत्वे सिद्धे खलु तव कारणभावस्तेषां कारणमात्रत्वं च संपद्येत तदभावे कथमुच्यते तपश्चास्मि तपस्विष्विति चेन्न । धर्मस्यापि तपसः स्वर्गादिफलजनकत्वेन कारणत्वसंभवात् धर्मवतां यो धर्मः स्वर्गादिफलहेतुः सोऽप्यहमेव यथा व्यवहारहेतुर्धर्माविरुद्धः कामो वक्ष्यमाणस्तद्वत्ततो धर्मिणो धर्मस्वरूपे मयि मदात्मना तिष्ठन्ति । धर्ममात्रस्य मत्स्वरूपत्वं धर्मिणां तन्मात्रत्वं च बोधयितुं तपश्चास्मीत्युक्तम् । तप इति धर्ममात्रस्योपलक्षणम् । ननु कार्यस्य कारणमात्रत्वं घटादौ दृष्टं श्रुतं च कथं धर्मिणो धर्ममात्राकारता धर्मे तन्मात्रत्वेनावस्थानं च संभवतीति चेदुच्यते । वह्नेर्दाहकत्वं धर्मः स चाग्निं सर्वतोव्याप्य तिष्ठति दाहकत्वस्याग्नौ सर्वत्रोपलम्भात्तद्विनाग्नेः पृथक्स्वरूपाभावात् तदाकारता तदात्मना तत्रावस्थानं च दृश्यते तद्वत्सर्वत्र द्रष्टव्यम् ॥ ९ ॥

ननु 'आकाशाद्वायुर्वायोरग्निः' इत्यादिना पूर्वपूर्वस्य कारणत्वमुत्तरोत्तरस्य तु कार्यत्वं श्रूयते ततस्तत्कारणे तत्तत्कार्यं प्रोतं भवति कथं त्वय्यश्रुतकारणत्वे त्वबादिकं प्रोतमित्युच्यत इत्याशङ्कायां न 'आत्मन आकाशः संभूतः' इत्यात्मशब्दवाच्यान्मत्त एवेश्वरादाकाशस्य संभूतिश्रवणादहमेव सर्वजगदुत्पत्तेः प्रकृष्टं कारणमित्याह—

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १० ॥

बीजं मामिति । मामेवेश्वरं बीजं सर्वेषामप्याकाशादिभूतानामाविर्भूतिकारणं विद्धि विजानीहि । ननु यथा भूतानां तथा तवापि कारणमस्तीत्याशङ्कायां 'सा काष्ठा सा परा गतिः' इति 'विश्वस्मादिन्द्र उत्तरः' इति 'न तस्य कश्चिज्जनिता' इति च श्रवणादहमेव सर्वस्मादुत्तरः सर्वस्याप्यादिकारणं नतु मम कारणमस्तीत्याह—**सनातनमिति** । सर्वस्मात्प्राक्तनं स्वयं निष्कारणमित्यर्थः । ततो यदुक्तं मत्तः

परतरमिति मयि सर्वमिति तत्सिद्धम् । एतेन स्वस्यैव सर्वकारणत्वं सर्वस्यापि स्वमात्रत्वं च स्थापितं, तथापीदानीं बुद्ध्यादीनामात्मप्रकाशत्वं बोधयितुमर्थात्तद्वतां तत्कारणत्वं तन्मात्रत्वं चाह—**बुद्धिरिति** । बुध्यते आत्मानात्मा च धर्माधर्मादिरप्यवगम्यतेऽनयेति बुद्धिः प्रज्ञा तद्वतामहं बुद्धिः बुद्धिरूपं कारणमस्मि । मयि बुद्ध्यात्मके ते प्रोताः सन्तो मदात्मना मयि तिष्ठन्तीत्यर्थः । तेजः प्रागल्भ्यं चेतनधर्मत्वादात्मप्रकाशप्रवृत्तिहेतुकं परेषामप्रधृष्यमभिभावकं च यत्तेजस्तद्वतामहं तेजोरूपं कारणमस्मि । तदात्मके मयि ते प्रोता मदात्मना मयि तिष्ठन्तीत्यर्थः ॥ १० ॥

बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥

बलमिति । कामरागविवर्जितं कामः सन्निकृष्टविषयापेक्षाप्रकृष्टप्रवृत्तिहेतुः, रागस्त्वप्राप्तविषयाशाप्रवृत्तिहेतुस्ताभ्यां विवर्जितम् । कामक्रोधादिवेगसमुत्पन्नं मानसमैन्द्रियकं च बलं यत्ततो भिन्नं शरीरमात्राश्रयं देहयात्रामात्रोपयोगि बलं तदहमस्मि । बलवतां देहशक्तिमताम् । बलात्मके मयि स्वकारणे ते प्रोताः सन्तो मदात्मना मयि तिष्ठन्ति । ननु 'काममय एवायं पुरुषः' इत्यादिना पुरुषव्यापारस्य सर्वस्यापि काममूलकत्वमेव श्रूयते दृश्यते च, कामरागाभावे पुंसो देहयात्रा वा स्वधर्मो वा कथं सेत्स्यतीत्याकाङ्क्षायामाह—**धर्मेति** । भूतेषु वर्णाश्रमिषु धर्माविरुद्धः । धर्मस्य शास्त्रीयस्याविरुद्धस्त्वविरोधी स्वस्याश्रमधर्मस्य साधको नतु बाधकः उत्पथहेतुश्च यः कामः सोऽहमस्मि । तेषु कामात्मनाहं तिष्ठामि । मयि कामात्मके स्वकारणे ते प्रोताः सन्तो मयि मदात्मना मृदि घटवत्तिष्ठन्ति नतु स्वरूपेण मत्तो भिद्यन्त इत्यर्थः । प्राणिनिष्ठबलस्य चेष्टाहेतोः कामस्य च चेतनधर्मत्वेनात्मप्रकाश्यत्वं द्रष्टव्यम् ॥ ११ ॥

मत्तः परतरमित्युपक्रम्य योऽर्थः संग्रहेण प्रतिपादितस्तमेवार्थं 'रसोऽहम्' इत्यादिना 'कामोऽस्मि भरतर्षभ' इत्यन्तेन ग्रन्थेन रसप्रभाद्यात्मना स्वस्य कारणत्वमपि चन्द्रादीनां कार्यत्वं कारणे रसादिरूपे स्वस्मिन् तेषां प्रोतत्वं कारणमात्रत्वं च प्रतिपाद्य तमेवोपक्रान्तमर्थमुपसंहर्तुमिदानीं सामान्येन सर्वेषां पदार्थानां स्वस्मादेव जगदेकबीजादुत्पत्तिमुत्पन्नानां स्वस्मिन्नेव स्वात्मनावस्थितिं च प्रतिपादयति—

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि नत्वहं तेषु ते मयि ॥ १२ ॥

ये चैवेति। इह लोके सात्त्विकाः सत्त्वगुणप्रधाना एव भावाः पदार्थाः देवा ऋषयो ब्राह्मणाः शर्करादयश्च। ये च राजसा रजोगुणप्रधाना एव भावा गन्धर्वा यक्षाः क्षत्रियाः मरीचादयः पदार्थाः । ये च तामसास्तमोगुणप्रधाना एव भावा राक्षसाः क्रव्यादाः शूद्राः गृञ्जनादयः पदार्था जायन्ते जाताः जनिष्यमाणाश्च एतान्सर्वान् तत्तद्गुणोपाधिकाज्जगद्बीजान्मत्त एव जातान्विद्धि विजानीहि नत्वन्यस्मात् । मद्व्यतिरिक्तस्य कारणत्वनिषेधादिह्येवकारार्थः। तेषु सात्त्विकादिपदार्थेष्वहं सत्त्वरजस्तमोगुणरूपेण कारणात्मना तिष्ठामि, अतस्ते मयि सत्त्वादिगुणात्मके स्वकारणे प्रोताः सन्तो मदात्मनैव तिष्ठन्तीत्यर्थः । यथा सत्त्वगुणकार्यं शर्करादि माधुर्यमात्रमेव भवति, यथा रजोगुणकार्यं मरिचः कटुमात्र एव भवति, यथा तमोगुणकार्यं गृञ्जनं मत्ततामात्रमेव भवति । तदिदं सर्वप्रत्यक्षं, एवमेव ब्रह्मकार्यं जगत्सर्वं ब्रह्ममात्रमेवेति बोद्धव्यम् । एतेन 'मत्तः परतरं नान्यत्', 'मयि सर्वमिदं प्रोतम्' इत्यारभ्य 'राजसास्तामसाश्च ये' इत्यन्तेन ग्रन्थेन मायाशबलितस्य ब्रह्मणो मृद्वत्परिणामकारणत्वपक्षमाश्रित्य कार्यस्य कारणमात्रत्वमृद्घटादौ सम्यक् दृष्टान्तन्यायेन 'सर्वं खल्विदं ब्रह्म' इत्यादिपूर्वोक्तश्रुतिबलेन च ब्रह्मकार्यस्य जगतो ब्रह्ममात्रत्वमेव सम्यक् निर्धार्य, मुमुक्षुभिः सम्यक्श्रुतवेदान्तैर्विज्ञाततदर्थैर्यतिभिः श्रुतं दृष्टं स्पृष्टं मतं विज्ञातं च सर्वमिदमहं च ब्रह्मैवेति प्राक्तनीं वासनाकृतां नामरूपभेदकल्पनां निःशेषमुत्सृज्य, स्वस्मिन् सर्वत्र च ब्रह्मबुद्धिरेव प्रयत्नेन संपादनीया अयमेव समाधिः । या सर्वत्र ब्रह्माकारवृत्तिर्ब्रह्मत्ववासना चैषा यथा दृढा निरन्तरा वश्या स्यात्तथा वर्तितव्यमिति सूचितं भवति ; 'सर्वं खल्विदं ब्रह्म, तज्जलानिति शान्त उपासीत' इत्येषा श्रुतिरेवास्यार्थस्य प्रमाणम् । एवं स्वस्य ब्रह्मणो मायोपाधिकस्य सच्छब्दवाच्यमविद्याशबलं ब्रह्म 'सर्वं खल्विदं ब्रह्म' इत्यादिश्रुतिप्रसिद्धं परिणामलक्षणं जगत्कारणत्वं प्रतिपाद्य ब्रह्मणः परिपूर्णस्य सर्वाधारस्य च परिणामकारणत्वपक्षे 'रसोऽहमप्सु' इत्यबादिषु कारणतया रसाद्यात्मना स्थितत्वे परिच्छित्तिस्तद्गुणदोषवत्ता जलं मधुरमिति तदधीनसत्तावत्ता च तत्सत्त्वे सति सत्त्वं तन्नाशे नाश इति विकारित्वं चेत्याद्यनर्थागमः प्रसज्यत इति तन्निवृत्तये स्वस्य दृश्यसंबन्धाभावसिद्धये चास्थूलमनण्वह्रस्वमित्यादिश्रुतिसिद्धनिर्विशेषस्वरूपत्वावधारणाय पूर्वोक्तसमाधिनिष्ठया परिशुद्धात्मनां यतीनां निर्विशेष एव परे ब्रह्मण्यात्मत्वधीसिद्धये चाबादिषु रसाद्यात्मनावस्थितत्वं निषेधति—**नत्वहमिति** । ननु ब्रह्मणो जग-

त्कारणत्वे निषिद्धे सति, 'यतो वा' इत्यादिश्रुतीनां 'अहं कृत्स्नस्य जगतः' इत्यादिस्मृतीनां च ब्रह्मणो जगदुपादानत्ववादिनीनामप्रामाण्यमेव स्यादिति चेन्न । तासामद्वैतावधारणतत्परत्वात्प्रामाण्योपपत्तेः । द्वैतिनः केचित्प्रकृतेरण्वादेश्च जगत्कारणत्वं वदन्तस्तत्कार्यं जगद्ब्रह्मणो व्यतिरिक्तं कल्पयित्वा श्रुतिसिद्धमद्वैतमपाकुर्वन्ति । तेनाद्वैतश्रुतीनां व्याहतिस्तां स्वयमसहमाना 'यतो वा' इत्यादिश्रुतयो ब्रह्मण एव जगत्कारणत्वं कार्यस्य कारणाव्यतिरिक्तत्वं च बहुदृष्टान्तैः प्रतिपाद्याद्वैतमेव निर्वहन्ति । ततः सृष्टिश्रुतीनामद्वैतसिद्धावेव तात्पर्यं नतु स्वार्थे । 'वायुर्वै क्षेपिष्ठा देवता' इत्यादिश्रुतीनां यथा तद्वत् । विध्येकार्थानामर्थवादश्रुतीनां विधिना सह प्रामाण्यं यथा, तथाऽद्वैतश्रुत्येकार्थानां सृष्टिश्रुतीनां स्मृतीनां च 'एकमेवाद्वितीयं ब्रह्म' इत्याद्यद्वैतश्रुतिभिः 'विज्ञानमेकम्' इत्यादिस्मृतिभिश्च सहैवास्ति प्रामाण्यं नात्र कुशङ्कावकाशः । ननु तर्हि प्रकृतेः परमाण्वादेश्च यथा, तथा ब्रह्मणोऽपि कारणत्वानङ्गीकारे जगन्निष्कारणकमेव स्यादिति चेदस्त्येव जगत्कारणमधिष्ठानाज्ञानलक्षणस्त्वदीयभ्रम इति ब्रूमः, तत एव श्रीभगवानाह—**नत्वहमिति** । तुशब्दो व्यावृत्त्यर्थश्चार्थो वा । एतद्योनीनीत्युक्तत्वादेतेषु मायामयेषु रज्जुसर्पवत्प्रतीतिमात्रेष्वबादिषु रसादिरूपेण नाहं कारणमस्मि किंतु मायैवास्ति । मायया खलु मयि निर्विशेषे विशेषाकारेण तेषां प्रतीतिर्यथा मरौ जलप्रतीतिस्तथा । तत एवम् 'विकल्पो नहि वस्तु', 'मायामात्रमिदं द्वैतम्', 'असत्त्वादन्यस्य' इत्यादिश्रुतिभिः 'यथा स्वप्नप्रपञ्चोऽयम्' इत्यादिस्मृतिभिः 'इदं सर्वं मिथ्या, मायाकार्यत्वात्, ऐन्द्रजालिकवत्' इत्यादियुक्तिभिश्च जगतो मायाकार्यत्वादेव मिथ्यात्वं नियमेन प्रतिपाद्यते, जाग्रत्स्वप्नयोर्व्यभिचरितस्य प्रपञ्चस्य प्रत्यक्षेण सुषुप्तावभावदर्शनाच्च जगतो मायाकार्यत्वं प्रतीतिमात्रत्वं च युक्तम् । ततस्तेषु मरुजलवत्प्रतीतिमात्रेष्वबादिषु परिपूर्णस्याप्रमेयस्य निष्कलस्य निष्क्रियस्यासङ्गस्यामूर्तस्याविकारिणस्तदेकाधारतया तत्रावस्थानं न संभवति । तदभावे तद्गुणदोषपरिच्छित्त्यादिर्न संभावयितुं शक्यते । यथा भ्रमकल्पितसर्पे रज्जोरवस्थानं तद्धर्माणां क्रौर्यादीनां विषस्य वाऽन्यस्य वा संबन्धः कल्पयितुं न शक्यते तद्वत् । ननु भूतेष्वबादिषु तव परिपूर्णस्यासङ्गस्यापरिच्छिन्नस्यैवैकदेशे स्थितिर्मास्तु भूतानां तु त्वयि स्थितिः संभवेदित्यत आह—**ते मयीति** । ते चाबादयो भावा मय्यदृश्यत्वादिगुणके कूटस्थासङ्गचिद्रूपे परे ब्रह्मणि वस्तुतो न सन्ति । 'नेह नानास्ति किंचन', 'नहीदं सर्वं कदाचित्', 'नह्यस्ति

द्वैतसिद्धिः' इति च श्रुतेः । यत एवं ततस्त्रिष्वपि कालेषु सजातीयविजातीयस्वगतभेदरहितं नित्यशुद्धबुद्धमुक्तस्वभावमद्वितीयमानन्दैकरसं परं ब्रह्मैकमेवास्तीति सिद्धम् । 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतेः ॥ १२ ॥

ननु त्वां परिपूर्णं सच्चिदानन्दैकरसमद्वितीयं परं ब्रह्म कस्मादयं लोको निःशेषसंसारदुःखविच्छित्त्यै न विजानातीत्याकाङ्क्षायां तत्कारणमाह—

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥

त्रिभिर्गुणमयैरिति । गुणमयैः सत्त्वादिगुणपरिणामैस्त्रिभिस्त्रिप्रकारैः सात्त्विकै राजसैस्तामसैश्च भावैर्भोग्यपदार्थैरेतैरनुभूयमानैः शब्दादिविषयैर्बन्धकैस्तत्प्रवृत्तिकारणै रागद्वेषादिभिश्च मोहितम् । मोहः सदसद्विवेकाभावस्तं प्रापितम् । 'इन्द्रियाभ्यामजय्याभ्यां द्वाभ्यामेव हतं जगत् । अहो उपस्थजिह्वाभ्यां ब्रह्मादिमशकावधि ॥' इति न्यायेनानाद्यविद्यया विषयभोगलाम्पट्यमेवानुगमिदमिदं जगज्जंगमप्राणिजातं सर्वं च एभ्यः सत्त्वादिगुणेभ्यो गुणकार्येभ्यश्चाकाशादिभूतेभ्यः सर्वेभ्यो दृश्येभ्यः परं भिन्नम् । नित्यत्वेन निर्गुणत्वेन शुद्धत्वेन बोधैकरसत्वेनानन्दघनत्वेन विलक्षणं चाव्ययमविक्रियं शाश्वतं परिपूर्णमद्वितीयं मां परं ब्रह्म नाभिजानाति । तत्र कश्चिच्छ्रुत्वा मत्वापि ब्रह्म परोक्षमेव जानाति न त्विदमेवाहमित्याभिमुख्येन स्वात्मना वेत्तीत्यर्थः । यद्वा गुणमयैः सत्त्वादिगुणविकारैर्मनोमयो विज्ञानमयश्च ज्ञानेन्द्रियाण्यग्न्यादिदेवाश्च सत्त्वविकाराः; प्राणादयः कर्मेन्द्रियाणि च रजोविकाराः, आनन्दमयश्चान्नमयश्च तमोविकारौ, एवं सत्त्वादिगुणमयैस्त्रिविधैर्भावैरात्मन उपाधित्वेन भाव्यन्ते इति भावाः स्थूलसूक्ष्मकारणदेहास्तैः । इत्थंभावे तृतीया । देहत्रितयात्मना स्थितमिदं जगत् प्राणिजातं सर्वं मोहितं पञ्चकोशात्मकमिदं शरीरमेवाहमित्यनाद्यविद्यया आवरणात्मिकया वासनात्मिकया च त्रिगुणमय्या देह एवात्मबुद्धिं प्रापितं सत् स्वयमेभ्यः स्थूलसूक्ष्मकारणदेहेभ्यः परं नित्यत्वशुद्धत्वसूक्ष्मत्वान्तरत्वकूटस्थत्वासङ्गत्वचिद्रूपत्वानन्दैकरसत्वसर्वज्ञत्वसर्वसाक्षित्वसर्वप्रकाशकत्वादिधर्मैर्विलक्षणमनावृततया सर्वदा प्रकाशमानमहमर्थतया प्रत्यक्षेण सुषुप्तावपि प्रतीयमानमेकात्मकमेकरूपं निर्विशेषं मां प्रत्यग्रूपं परं ब्रह्म नाभिजानाति । अयमेवाहमिति क्षुद्रद्रोगवदारोग्यवद्भोजनादिसुखवद्देहेन्द्रियादिभ्यो भिन्नतया स्वात्मना न कोऽपि साक्षात्करोति, अहो इदमेवात्यद्भुततरमिति मन्यते श्रीभगवान् ॥ १३ ॥

नन्वनाद्यविद्यया माययाऽनात्मन्येवात्मभ्रमेण मोहितानां संसारदुःखाग्निना संतप्यमानानां प्राणिनां कथं तरणं सिध्यतीत्याकाङ्क्षायां तत्तरणोपायं विवक्षुरीश्वर आदौ तत्तरणे महान् प्रयत्नः कर्तव्य इति बोधयितुं तस्या दुर्जयत्वमाह—

दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ १४ ॥

दैवीति। कालत्रयेऽप्यन्यानपेक्षया स्वयमेव दीव्यते प्रकाशत इति देवः परमात्मा निर्विशेषस्तस्मिन्नात्मन्याकाशे नीलिमवदाभासरूपेण मयि तिष्ठतीति दैवी। यद्वा 'तथाहि प्राज्ञे सैषा विद्या' इति श्रवणाद्देवे प्राज्ञे तिष्ठतीति दैवी गुणमयी गुणात्मिका माया मम स्वरूपस्य जलस्य शैवालमिवावरणीभूय तिष्ठति, सैषा माया पुंसां दुरत्यया दुःखेनात्ययोऽतिक्रमणं यस्याः सा दुरत्यया। दृष्टादृष्टविषयसुखतत्साधनसर्वस्वपरित्यागयमनियमादिदुःखेनैवात्येतुं शक्यते नान्येन, अतएव दुरत्यया दुर्जया हि खलु। मायाया दुर्जयत्वं लोकशास्त्रप्रसिद्धम्। एवं मायाजये प्रयत्नाधिक्यं बोधयित्वा तत्तरणोपायं च स्वयमेवाह—**मामेवेति**। निष्कामनयेश्वरार्पणबुद्ध्या बहुजन्मस्वनुष्ठितपुण्यकर्मविशेषैः शुद्धात्मानः सन्तो विवेकवैराग्याभ्यां सर्वं संन्यस्य ब्रह्मविद्गुरोः सन्निधौ श्रद्धया तीव्रमोक्षेच्छया प्राप्ततदेकनिष्ठया श्रवणं मननं च कृत्वा षष्ठेनोक्तरीत्या मामेव निर्गुणमदृश्यत्वानात्मत्वादिलक्षणं चिदेकरसं परं ब्रह्म नित्यनिरन्तरनिर्विकल्पकसमाधिनिष्ठया क्रियान्तरानवकाशप्रदयैव ये यतयः प्रपद्यन्ते विपरीतप्रत्ययराहित्येन सर्वदा स्वात्मनानुसंदधते त एव गुर्वात्मेश्वरप्रसादातिशयात्सम्यगुत्पन्नाऽप्रतिबद्धपरावरैकत्वविज्ञानेनैवैतामावरणविक्षेपात्मिकां सर्वानर्थकारणभूतां सत्त्वरजस्तमोगुणमयीं मायां तत्कार्यं च विपरीतदर्शनलक्षणं तरन्ति। सर्वमिदमहं च ब्रह्मैवेत्यप्रतिबद्धब्रह्मैकत्वप्रत्ययेन विध्वंसयन्ति। नित्यनिरन्तरब्रह्मनिष्ठया रजोगुणान्रागादीन्, तमोगुणान्विपरीतभावादीन्, सत्त्वगुणाञ्शमादींश्च तत्कार्याणि च प्रवृत्तिनिवृत्त्यहंममेत्यादीनि सर्वाण्यतीत्य इहैव संसारान्मुक्ता भूत्वा विदेहमुक्तिसुखमखण्डमात्मीयं प्राप्नुवन्ति नान्ये श्रवणमात्रेणात्मानं कृतार्थं मन्यमाना इत्यर्थः। अत्र 'मामेव ये प्रपद्यन्ते' इत्यस्मच्छब्देन सगुणवस्तु न विवक्षितम्। तथात्वे तदुपास्त्या गुणमय्या मायाया अतिक्रमासंभवात्। नहि गुणवदुपास्त्या सत्त्वादिगुणातिक्रमणं भेददर्शननिवृत्तिश्च सिध्यति विषसेवयाऽमृतत्वसिद्धिवत्। अमृतसेवयैवामृतत्वसिद्धिर्दुःसाध्या कथं सा विषसेवया

सिध्येत् । तद्वन्निर्गुणोपास्त्या मायायास्तत्कार्यस्य निःशेषनिवृत्त्यसंभवेऽनर्थकया सगुणोपास्त्या कथं तन्निवृत्तिः संभवेत् । तत एव 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति' इति निर्विशेषोपासिनः क्वचिदीषद्भेदं पश्यतो विदुषोऽपि तद्भेददर्शनस्य संसारलक्षणं भयं श्रूयते किमुत सर्वदाभेदैकनिबन्धनां सगुणोपास्तिं कुर्वतः । उपास्त्यनुरूपत्वात्फलसिद्धेः । नह्युपास्तिभेदे फलाभेदोऽस्ति । नहि पिचुमन्दसेवावत आम्रसेवाफलमस्ति तद्वत् । तथाच श्रुतिः—'यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति तं यथायथोपास्ते तथैव भवति', 'असन्नेव स भवति असद्ब्रह्मेति वेद चेत्' इत्यादिः । तथा स्मृतिश्च 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' इति । माया खलु ब्रह्मात्मनोर्ब्रह्मजगतोश्च भेददर्शनहेतुस्तस्या एव प्रवर्धकमत्यन्तभेददर्शनलक्षणमयमुपास्यो ममाऽहमेनमुपासे इत्यहंममपदप्रत्ययार्थभेदाश्रयं द्वैतोपासनमेव कुर्वतो यदि मायानिवृत्तिः स्यात्तदा प्राचीं दिशं गच्छतः कैलासप्राप्तिः स्यात् । यस्मादेवं तस्मादत्रास्मच्छब्दार्थो निर्गुणमेव परं ब्रह्म तस्यैवोपास्तिं कुर्वत एव मायात्यय इति सिद्धम् ॥ १४ ॥

ननु त्वदुपास्त्या सर्वानर्थकरीं मायां यदि तरन्ति तर्हि मीमांसकतार्किकादयो महापण्डिताः सर्वे कस्मात्त्वां नोपासत इत्याकाङ्क्षायामाह—

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५ ॥

न मामिति । क्रियत इति कर्म दुष्टं जननमरणादिदुःखप्रदं काम्यलक्षणं कर्म एषामस्ति ते दुष्कृतिनो मीमांसकाः पण्डिता अप्यपहृतज्ञानाः मायया कामादिरूपिण्यापहृतं तिरोभावितं ज्ञानं सदसद्विवेकलक्षणं येषां ते अपहृतज्ञानास्तत एवासुरं भावं 'इदमद्य मया लब्धम्' इत्युक्तप्रकारमेवाश्रिताः सन्तो वेदान्तानां कर्तृस्तावकतया 'आम्नायस्य क्रियार्थत्वात्' इति न्यायेन कर्मशेषत्वमेवाभ्युपगम्याविश्वासेन तद्विचारमेव न कुर्वन्ति कुतस्तेषां मज्ज्ञानं तदसत्त्वे कुतो मदुपास्तिप्रसक्तिस्तत एव मां न प्रपद्यन्ते । तार्किका वैशेषिकाश्च पण्डिता अपि माययापहृतज्ञानास्तत एव मूढाः सन्तो जगदुपादानमणव एवेति मामुपसर्जनं कृत्वा स्वस्वाभिमतपदार्थज्ञानादेव मुक्तिरित्यभिमानेन मद्विचारज्ञानशून्या भूत्वा मां न प्रपद्यन्ते । अन्ये चार्वाकजैनबौद्धादयो नराधमा अपि न मां प्रपद्यन्त एवेत्यर्थः ॥ १५ ॥

ननु महापण्डितानामप्येवंविधत्वे के पुनस्त्वां प्रपद्यन्ते इत्याकाङ्क्षायां

ये शुद्धात्मानः शास्त्रतो गुरुतश्च मत्तत्त्वं श्रुत्वा मामेव सर्वेश्वरं सर्वार्थदं जानन्ति ते मां प्रपद्यन्ते तथापि तेषां मद्भजनपराणां भेदोऽस्तीत्याह—

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६ ॥

चतुर्विधा इति । इह जन्मनि जन्मान्तरेष्वनेकेषु च 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इत्यादिशास्त्रेण तदर्थज्ञेन च गुरुणा शिक्षिताः सन्तः ईश्वरार्पणबुद्ध्या सुष्ठु मन्त्रतन्त्राद्यलोपं यथा तथाऽनुष्ठितानि कृतानि श्रौतस्मार्तादीनि कर्माणि येषां सन्ति ते सुकृतिनः सत्कर्मानुष्ठानपरा विवेकिनो ये ते आर्तादिभेदेन चतुर्विधाश्चतुःप्रकारा भूत्वा मां भजन्ते। तत्प्रकारमेवाह—**आर्त इत्यादिना**। आर्त आध्यात्मिकाद्युपद्रवेण निष्पीडितस्तदुपद्रवनिवृत्त्यै, नित्यानित्यपदार्थविवेकेनात्मतत्त्वं ज्ञातुमिच्छुर्जिज्ञासुर्मत्प्रसादसिद्ध्यै, ऐहिकामुष्मिकसुखतत्साधनकाम्यर्थार्थी कामसिद्ध्यै, ज्ञानी ब्रह्मविदुत्पन्नज्ञानस्याप्रतिबद्धत्वसिद्धये । एवं चतुर्विधा जना भजन्ते मां सगुणमीश्वराख्यमार्तादयस्त्रयोऽपि । ज्ञानी तु निर्गुणं परं ब्रह्माख्यं मां भजति । इदमेवाहमिति स्वात्मनानुसंधत्त इति ज्ञातव्यम्। ज्ञानीति विशेषणसामर्थ्यात् ॥ १६ ॥

नन्वत्र परोक्षज्ञानी विवक्षित इति चेन्न । परोक्षज्ञानिनः 'एकभक्तिर्विशिष्यते' इति, 'ज्ञानी त्वात्मैव मे मतम्' इत्येकभक्तित्वपरमात्माभिन्नत्वप्रतिपादनायोगात् । तर्हि ब्रह्मविदपि तत्प्रसादातिशयसिद्धये सगुणमीश्वरमेवोपास्त इति चेन्न । अयथार्थस्वरूपं भजतो भक्तगणस्यापेक्षया स्वस्य यथाभूतस्वरूपासंधानपरे ब्रह्मविद्येव परमेश्वरस्य समग्रानुग्रहकरणसंभवात्। पितुः पुत्रेभ्यः सर्वेभ्योऽप्रयोजकेभ्यो विद्याविनयशीलवित्तार्जनकीर्तिप्रतिष्ठावति सत्पुत्र एव प्रीत्यतिशयकरणदर्शनात्तद्वत् 'ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात्' इति ब्रह्मविदां ध्येयवस्तुनो मायातत्कार्यलेशसंबन्धशून्यत्वश्रवणाच्च । 'अथ योऽन्यां देवतामुपास्ते' इति स्वभिन्नत्वेन देवतान्तरोपासिनः पशुतुल्यत्वश्रवणाच्च । 'जीवेशावाभासेन करोती'तीश्वरस्यापि मायाभासत्वश्रवणात्तत्रासत्त्वबुद्ध्या तद्विलक्षण एव सच्चिदानन्दैकरसे परे ब्रह्मण्येव सदा तदात्मना तिष्ठतस्तदानन्दामृतरसपायिनो ब्रह्मविदः सगुणे रुच्यसंभवात् सविशेषोपासनानुपपत्तेः । ब्रह्मविद उपासनमेवानुपपन्नमिति चेन्न । 'तमेव धीरो विज्ञाय' इति ब्रह्मविद एव ज्ञानस्याप्रतिबद्धत्वसिद्धये प्रज्ञा-

करणश्रवणात्। प्रज्ञाकरणं नाम सर्वत्र ब्रह्मदर्शनमेव। यत एवं ततो निर्विशेषमेव परं ब्रह्मविद् उपास्यमिति सिद्धौ निर्विशेषपरत्वादेव महात्मानं ब्रह्मविदमार्तादिभ्यः सविशेषपरेभ्यो बहुभिर्विशेषणैः विशेषयति—

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥ १७॥

तेषां ज्ञानीति। नित्ययुक्तः नित्यं क्रियान्तरानवकाशं यथा तथा युक्तः। सर्वदा ब्रह्मण्येव समाहितचित्त इत्यर्थः। यद्वा नित्ये मायातत्कार्यसंबन्धशून्यत्वादविक्रियेऽक्षरे परमात्मन्येव युक्तो नत्वनित्यपरः सर्वत्र ब्रह्मैव पश्यति नत्वन्यदित्यर्थः। द्रष्टा दृश्यमिति भेदे इदमाह—**एकभक्तिरिति**। स्वविषयीभूतवस्त्वाकारं भजतीति भक्तिरन्तःकरणवृत्तिः एका अहमिदमिति द्वैविध्यनिर्मुक्ता स्वस्य च ब्रह्मणश्चोभयोरेकत्वावगाहिन्यखण्डाकारा भक्तिर्वृत्तिर्यस्य स एकभक्तिः। जगद्ब्रह्मणोरात्मब्रह्मणोश्चाभेददर्शननिष्ठ इत्यर्थः। तत एव ज्ञानिनो निर्विशेषः परमात्माहमेवात्मत्वादानन्दरूपत्वाच्चात्यर्थं प्रियः प्रेष्ठो नत्वन्यः। 'तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा' इत्यादिश्रुतिप्रसिद्धिप्रकाशनार्थो हिशब्दः। तथा मम च जगदीश्वरस्यापि स ज्ञान्येव प्रियः प्रेष्ठ उक्तलक्षणत्वात्। यत एवं ततस्तेषामिति पञ्चम्यर्थे षष्ठी। तेभ्यः सविशेषपरेभ्य आर्तादिभ्यो ज्ञानी नित्ययुक्तादिविशेषणैर्विशिष्यते। श्रेष्ठो भवतीत्यर्थः॥ १७॥

ननु ज्ञानिन एव तेभ्यः श्रेष्ठत्वे त्वितरेषां त्रयाणां निकृष्टत्वमेव प्राप्तं त्वद्भक्तानामिदं कथं युक्तमित्याकाङ्क्षायां तेऽपि च श्रेष्ठा एव भवन्तीत्याह—

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्॥ १८॥

उदारा इति। अत्र सर्व इति सर्वशब्देन ज्ञानिनोऽप्यार्ताद्यन्तःपातित्वेऽपि ज्ञानी त्विति विभक्तत्वात्तद्व्यतिरिक्तानामेव सर्वशब्दवाच्यत्वम्। एते पूर्वोक्ताः सर्वे आर्तादयोऽप्युदारा उत्कृष्टत्वमेवाद्दणन्तीत्युदारा उत्कृष्टाः मद्भजनविमुखीभूतमीमांसकादिभ्यः श्रेष्ठा एव भवन्ति। यस्मान्मदर्पणबुद्ध्या कर्मानुष्ठानं चित्तशुद्धिरयमेव परमेश्वर इति ज्ञानं मद्भजनं चात्यन्तदुर्लभमेते एतत्सर्वं प्राप्य मामेव भजन्ते तस्मादेतेषामपि श्रेष्ठत्वमस्त्येव। ननु भजनक्रियाया ज्ञानिनोऽप्येतेषां च समे सति श्रेष्ठत्वे ज्ञानी विशिष्यत इति कथं सर्वसमस्य तव तत्र पक्षपात

इत्यत आह—**आस्थित इति**। हि यस्मात्स ज्ञानी युक्तात्मा प्रत्यग्वृत्त्या सदा सर्वत्र मत्स्वरूपग्रहण एव युक्तोऽभिनिविष्ट आत्मा मनो यस्य स युक्तात्मा सन्। अनुत्तमां यस्याः नित्यत्वेन महत्त्वेन सूक्ष्मत्वेनान्तरत्वेनानन्दत्वेन ज्ञेयत्वेन प्राप्यत्वेन च लोकशास्त्रप्रसिद्ध उत्तमः पदार्थः प्रमाणाबाधितो नास्ति साऽनुत्तमा तां गतिं ज्ञानेनैवैकेन गम्यत इति गतिस्तां केवलतां तदात्मकमेव मामास्थितः। अयमेवाहमिति मामेव परं ब्रह्म चिदेकरसमद्वितीयमहमर्थं कृत्वा आसमन्तात् स्थितः आस्थितः पूर्णात्मना तिष्ठति। न क्वचिदपि देहेन्द्रियादिभिः परिच्छिन्नो भवतीत्यर्थः। तस्मादेव ज्ञानी श्रेष्ठ एवेति न किंतु मे मम परमेश्वरस्य पूर्वोक्तरीत्यात्मैव भवति। ब्रह्मैवाहमिति सर्वदा पूर्णात्मना स्थितत्वात् स्वरूपमेव भवतीति मम मतम्। निश्चय इत्यर्थः। तस्मादेव सगुणभक्तेभ्यः सर्वेभ्यो ज्ञानी विशिष्यत इत्युक्तम्॥ १८॥

एवं ज्ञानिनो ज्ञानाधिकत्वेन सर्वोत्तमत्वं प्रतिपाद्येदानीं कतिपयैर्जन्मभिर्ब्रह्मनिष्ठैकप्रयोजनैः सम्यक् परिपक्वविज्ञानेन विनष्टाशेषप्रतिबन्धकेन सर्वं ब्रह्मैव पश्यतो महात्मन एवं समुत्पन्नज्ञानस्य फलं विदेहमुक्तिं प्रतिपादयति—

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥ १९॥

बहूनामिति। बहूनामनेकेषां द्वित्रिचतुःसंख्याकानां जन्मनां 'तत्र तं बुद्धिसंयोगम्' इत्युक्तप्रकारेण सम्यग्ज्ञानसिद्ध्येकप्रयोजनानां जन्मनामन्ते चरमे जन्मनि प्राक्तनयाप्याधुनिकया च समाधिनिष्ठया निःशेषविनष्टविपरीतभावकारणकोटितया ब्रह्मविद्वासुदेवः सर्वमित्यप्रतिबद्धवृत्त्या सर्वस्य वासुदेवमात्रत्वज्ञानवान्। ननु नामरूपक्रियाजातिविशेषैः पृथिव्यप्तेजोवाय्वादितत्कार्यभेदेन पृथक्सत्तावत्तया प्रत्यक्षेणोपलभ्यमानस्य जगतः सर्वस्य कथं वासुदेवः सर्वमिति तद्विलक्षणवासुदेवाभिन्नत्वं सिध्यतीति चेन्न। श्रुतियुक्तिभिर्विचार्यमाणे नामरूपादेस्तद्विशिष्टस्य जगतोऽपि ब्रह्मसत्ताव्यतिरेकेण सत्ताऽसिद्धेः। मृदि घटवन्मरौ जलवद्ब्रह्मणि कल्पितस्य जगतः सति सत्तासंभवे नामरूपजात्यादिभिरनेकत्वं तद्विलक्षणत्वं च सिध्येत्तदभावात्तदसिद्धेः। नहि घटस्य मृत्सत्ताव्यतिरेकेण प्रमाणैः सत्ता निरूपयितुं शक्यते। ननु पृथुबुध्नकम्बुग्रीवाद्याकारेण मृदोऽभिन्नतया घटस्वरूपस्योपलभ्यमानत्वात्तद्भिन्नस्य घटस्य तत्सत्ताभिन्नसत्तोपपद्यत एवेति चेन्न। पृथुबुध्नत्वाद्याकार-

वत्तया मृद एव स्थितत्वाज्जडत्वगन्धवत्त्वादिमृद्धर्माणामव्यभिचारात् स्थितिभेदाद्भेद एवेति चेन्न । मृद्येव स्थितिभेदस्य कल्पितत्वात्स्थितिभेदानुगतत्वेन मृद एवोपलभ्यमानत्वादुक्तधर्माव्यभिचाराच्च । प्रत्यक्षेण घटस्य मृत्सत्ताभिन्नसत्ताया निरूपयितुमशक्यत्वात्तद्भिन्नत्वासिद्धेर्मृदभिन्नत्वस्य प्रत्यक्षत्वात् । घटस्य तद्भिन्नत्वं साधयितुमनुमानमशक्तं प्रत्यक्षेणासंदिग्धे चानुमानाऽप्रवृत्तेः घटादावप्येतन्न्यायस्य युक्तत्वात्सादृश्यानुपपत्तावुपमानस्याप्यनुपपत्तिः । 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्' इति घटस्य मृण्मात्रत्वश्रवणाच्छब्देनापि घटस्य पृथक्सत्ता संपादयितुं न शक्यते । तद्वज्जगतोऽपि मृदि घटवद्ब्रह्मणि कल्पितस्य सर्वप्रमाणैः पृथक्सत्ता संपादयितुं न शक्यते । कल्पितत्वस्योभयसाधारण्यात्ततः स्वतः सत्ताशून्यस्य जगतो ब्रह्माभिन्नत्वमेव सिद्धम् । पूर्वोक्तरीत्या जगत्सत्ताया बाधितत्वे तदाश्रयनामरूपजात्यादेरपि बाधितत्वात्स्वकार्यनिर्वाहानुपपत्तेः । यत एवं ततो वासुदेवः सर्वमिति भ्रान्त्या प्रतीतस्य सर्वस्याधिष्ठानाऽनन्यत्वेन वासुदेवमात्रत्वात्प्रत्यग्दृष्ट्याऽप्रतिबद्धया सकलमिदमहं च वासुदेव एवेति ज्ञानवान् सन् ब्रह्मविद्वरिष्ठः प्रारब्धशेषसमाप्तौ 'तस्य तावदेव चिरम्' इति श्रुत्युक्तरीत्या पतितेऽस्मिन्विद्वच्छरीरे निरस्ताशेषविशेषमपूर्वमनपरमनन्तरमबाह्यं सच्चिदानन्दैकरसमद्वितीयं मां परं ब्रह्म प्रतिपद्यते । घटे नष्टे घटाकाशो महाकाशात्मना यथा, तथोपाधौ विनष्टे परिच्छित्तिहेतोरभावात्पूर्णात्मना तिष्ठति । विदेहकैवल्यं प्राप्नोतीत्यर्थः । एवमप्रतिबद्धवृत्त्या सर्वत्र ब्रह्ममात्रत्वदर्शी महात्मा पुरुषो ब्रह्मविद्वरिष्ठो लोके सुदुर्लभः शुकादिवत्कश्चिदेव नतु प्रायश इत्यभिप्रायः । यद्वा बहूनामनेकेषां सम्यग्ज्ञानसिद्धिकारणसमाध्येकप्रयोजनानां जन्मनामन्तेऽवसाने तत्तज्जन्मन्यनुष्ठितसमाधिविशेषैरविद्याकामादिप्रतिबन्धकजातस्य निःशेषनिवृत्त्या विशुद्धविज्ञानः सन् ज्ञानवान् ज्ञानी वासुदेवः सर्वं ब्रह्मैवेत्यप्रतिबद्धवृत्त्या मां सर्वात्मकं परं ब्रह्म प्रपद्यते इदमेवाहमिति स्वस्वरूपत्वेन विजानाति । एवं सर्वं स्वं च ब्रह्मैव यो विजानाति स एष महात्मा महान् सर्वदा ब्रह्माकारेणैव वर्तत इति महानुत्कृष्टः आत्मान्तःकरणं यस्य स महात्मा महानुभावः लोके सुदुर्लभः सुतरां दुर्लभः सुदुर्लभो विरलः शतसहस्रेषु कृतश्रवणादिषु कश्चिदित्यर्थः ॥ १९ ॥

ननु स्वस्वरूपमेव प्रत्यग्लक्षणं सर्वात्मकं ब्रह्मेति चेत्सर्वे किमात्मानमेव परिपूर्णमासन्नतरमश्रमलभ्यं न जानन्ति, ज्ञात्वा किमिति मुक्तिं न

प्राप्नुवन्तीत्याकाङ्क्षायां मदीयया माययापहृतविवेकविज्ञानाः सन्तो देवतान्तराराधनपरा भूत्वा मां न जानन्ति न भजन्ति तत्फलं च न प्राप्नुवन्तीत्याह—

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ २० ॥

कामैरिति चतुर्भिः । 'पश्यति पुत्रं पश्यति पौत्रं', 'एतैरायुष्काम आयुराशास्ते राष्ट्रकामः पशुकामो ब्रह्मवर्चसकामः' इत्यादिश्रुत्युक्तैः, 'विष्णुलोकं स गच्छति', 'शिवेन सह मोदते' इत्यादिपुराणवचनोक्तैस्तैस्तैः पुत्रपौत्रपशुस्वर्गविष्ण्वादिलोकविषयैस्तत्तद्देवतामहत्त्वप्रतिपादकवाक्यश्रवणसमुत्पन्नैः कामैर्मम मायालक्षणैर्हृतज्ञानाः हृतं तिरोभावितं ज्ञानं नित्यानित्यपदार्थविवेचने नित्यपदार्थवेदने तदनुसंधाने तत्फलसंपादनेऽशक्तं विवेकज्ञानं येषां ते हृतज्ञानाः सन्तो मीमांसकास्तार्किकाः शैवाः शाक्ता वैष्णवाश्चान्ये सर्वे जनाः स्वया स्वकीयया स्वान्तःकरणस्थया प्रकृत्या तत्तद्देवताराधने भजने तत्फलसंपादने च कृतिकारिण्या वासनया नियताः प्रेरिता भूत्वा तं तं तत्तत्कर्मानुष्ठाने तत्तद्देवताभजने च यो यो नियमस्तत्तच्छास्त्रेणोक्तो वैदिकः स्मार्तः पौराणिकस्तान्त्रिकश्च कर्मानुष्ठानजपहोमदानस्तोत्रपाठादिविषयो विध्यनतिक्रमस्तं तं नियममास्थायाश्रित्यान्यदेवताः अन्याः स्वात्मतत्त्वव्यतिरिक्ताः परस्य ब्रह्मणोऽभिन्ना देवताः सविशेषान् सोपाधिकान् ब्रह्मेन्द्रविष्ण्वादिदेवान्प्रपद्यन्ते । तदुपास्त्या लभ्येषु फलेष्वनित्येषु तुच्छेषु नित्यत्वरम्यत्वेष्टत्वबुद्ध्या मोहितास्तत्सिद्ध्यै इन्द्रादीन्भजन्त इत्यर्थः ॥ २० ॥

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ २१ ॥

किंच **य इति** । तेषां मध्ये शैवो वा वैष्णवो वा शाक्तो वा कर्मी वान्यो वा यो यो भक्तः उपासको यां यां तनुं कामितार्थं तनोतीति तनुर्देवता तां शिवं वा विष्णुं वापीन्द्रमन्यं वा यया श्रद्धया स्वयार्चितुं फलसिद्ध्यै आराधयितुमिच्छति तस्य तस्य भक्तस्य तस्यां तस्यामेव देवतायां शिवादौ तामेव श्रद्धामचलां स्थिरामहमात्मा बुद्धिस्थोऽन्तर्यामी विदधामि । प्रयच्छामीत्यर्थः । अत्रायमभिप्रायः—अङ्कुरस्थं जलमङ्कुरः पैप्पलो वा पैचुमन्दो वाम्रो वा स्वस्ववासनानुरूपेण यथा परिणमते तथास्य शक्तिं प्रयच्छति, तद्वद्बुद्धिस्थ आत्मापि प्राणी स्वकर्मानुरूपवासनया यथा प्रवर्तितुमिच्छति तथा स्वसन्निधिमात्रेण तद्बुद्धेस्तत्प्रवृत्त्यनुरूपां शक्तिं

संभावयति नतु सारथिरश्वमिव चोदयति । अमूर्तस्याविकारिणः क्रियासंभवात् । तद्यथा श्रुतिश्च 'य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं यं आदित्यमन्तरो यमयति य आत्मनि तिष्ठन्' इति ॥ २१ ॥

एवं देवतान्तरभक्तानां तत्तद्देवतायां दृढश्रद्धासिद्धिः स्वस्मादेवेति प्रतिपाद्य तेषां फलसिद्धिरपि तत्तद्देवताद्वारा स्वस्मादेवेत्याह—

स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान्मयैव विहितान् हितान् ॥ २२ ॥

स तयेति । स च भक्तोऽपि तया उक्तरीत्या मया संभावितया श्रद्धया युक्तः सन् । संधिरत्रार्षः । तस्याः स्वस्वदेवताया आराधनं तत्तद्देवताविषयं कर्म मन्त्रजपहोमादिलक्षणमीहते करोति, पश्चान्मयैव तत्तद्देवतान्तर्यामिणा ततस्तत्तद्देवताद्वारा विहितान्दत्तान् । देवतया दापितानित्यर्थः । हितानिष्टान्कामांश्च कामितार्थानपि लभते । 'एष एव साधु कर्म कारयति' इति, 'एको बहूनां यो विदधाति कामान्' इति च श्रवणान्ममैव कर्मकारयितृत्वं तत्तत्कर्मफलदातृत्वं चेति तत्तद्देवतानामनात्मत्वमनीश्वरत्वमस्वायत्तत्वं च सूचितम् । तेन चेतनमीश्वरं सर्वार्थदमात्मभूतमनायासलभ्यं मां त्यक्त्वा मूढा देवतान्तरमुक्तलक्षणं भजन्तीति व्यञ्जितं च ॥ २२ ॥

'काम एष क्रोध एषः' इति कामस्य दुष्पूरत्वं पातकित्वं वैरित्वं च पूर्वमेवोक्तं, ततः काम एव सर्वानर्थबीजं तद्वता कृतं कर्म तत्फलं च ध्वंसप्रतियोगित्वादपुरुषार्थकरमेवेत्याह—

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३ ॥

अन्तवत्त्विति । अल्पमेधसां अल्पा सदसद्विवेचनाऽसत्त्यागसदादानादिक्रियानर्हा मन्दा मेधा विवेकबुद्धिर्येषां तेषां कामिनां, तत्फलं उपवासनियमायासबह्वर्थसाध्ययज्ञदानादिक्रियाप्रसन्नदेवताभ्य उपलब्धं फलं तदन्तवदेव । तुशब्दोऽवधारणार्थः । सेवाया महद्विषयत्वे फलस्यापि महत्त्वं तद्विपरीतत्वे विपरीतत्वं 'महत्सेवां द्वारमाहुर्विमुक्तेः' इति प्रसिद्धं राजभटसेवादौ दृष्टं च, यस्मादेतैः सेविता देवताः सगुणत्वादनित्याः परिच्छिन्नाः सोपाधिकाश्चानीश्वराश्चाल्पविभूतयस्तासां सेवया भटसेवावदल्पमेव फलमनित्यं च तस्मात्तेषां कामिनां तत्तत्फलं 'यो वा एतदक्षरं

गार्ग्यविदित्वास्मिँल्लोके जुहोति यजते तपस्तप्यते अन्तवदेवास्य तद्भवति' इति श्रवणादन्तवन्नाशवदेव भवति नतु मोक्षवन्नित्यम्। नह्यनित्योपासनया नित्यं महत्फलं सिध्यति, यस्मादेवं तस्माद्देवयजो देवान्ब्रह्मादीनिन्द्रादीन्यजन्ति तत्तच्छास्त्रोक्तविधिना भजन्तीति देवयजो देवताभक्तास्तानेव देवान्यान्ति। 'कर्मणा पितृलोको विद्यया देवलोकः' इति, 'देवो भूत्वा देवानप्येति' इति च श्रवणात्तत्तत्सारूप्यं प्राप्य तत्तद्देवतालोकं प्राप्नुवन्ति। एतेन सगुणोपासकानां देहायासक्लेशोऽप्यर्थव्ययक्लेशोऽप्यल्पफलत्वक्लेशश्चेत्यहो कष्टमिति गम्यते। एवं सगुणोपासकानामुपासनाफलं प्रतिपाद्य 'वासुदेवः सर्वमिति', 'ज्ञानवान्मां प्रपद्यते' इत्युक्तमर्थं पुण्यात्मनां श्रोतॄणां विवेकवतां स्वोपास्तावेव श्रद्धा भूयादिति पुनरपि प्रतिपादयति—**मद्भक्ता इति**। अपिशब्दस्त्वर्थः। मद्भक्ताः सदसद्विवेकवैराग्यशमदमसंन्यासाद्युत्तमसाधनसंपत्त्या ब्रह्मविद्वर्यप्रसत्त्या च श्रवणमननाभ्यामात्मानं मां परं ब्रह्म ज्ञात्वाऽजस्रमेकात्मिकया भक्त्या ये भजन्ति ते मद्भक्ता यतयस्तु मां परं ब्रह्मैव यान्ति। 'संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशान्ताः। ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाविशन्ति' इति श्रवणान्नित्यनिरतिशयानन्दं पुनरावृत्तिवर्जितं विदेहकैवल्यं प्राप्नुवन्तीत्यर्थः। 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते' इति, 'यो मद्भक्तः स मे प्रियः' इति च ज्ञानिनोऽपि भक्तत्वप्रतिपादनादत्र मद्भक्ता इति ज्ञानिन एवोच्यन्ते न त्वितरे। पूर्वं 'ज्ञानवान्मां प्रपद्यते' इति स्वभक्तस्यैव ज्ञानिनः स्वप्राप्तिप्रतिपादनादितरभक्तस्य वासुदेवः सर्वमिति ज्ञानासंभवाच्च, 'सर्वारम्भपरित्यागी' इति सर्वकर्मपरित्यागायोगाच्च, 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' इति स्वस्वरूपं तत्त्वतो विज्ञातवत एव वक्ष्यति च विदेहमुक्तिम्। यत एवं ततोऽत्र भक्ता ब्रह्मविद एवेति ज्ञातव्यम्॥ २३॥

ननु महापण्डिता उक्ता भक्ताः सर्वेऽपि शास्त्रार्थं सम्यग्विचार्य ज्ञात्वा त्वामेव प्रत्यग्लक्षणमात्मानं निर्विशेषमविनाभूतमुपास्य कस्माद्विदेहमुक्तिं न प्राप्नुवन्तीत्याकाङ्क्षायामविद्यातत्कार्योपहतचित्तत्वात् मद्विषयकं ज्ञानं विपरीतं विना समीचीनं नोदेति, तदभावान्मत्प्राप्त्यभाव इति बोधयितुमाह—

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।
परं भावमजानन्तो ममाव्ययमनुत्तमम्॥ २४॥

अव्यक्तमिति। अबुद्धय आत्मानात्मस्वरूपविवेचनतत्तत्त्वाध्यवसाया-

क्षमा बुद्धिर्मत्प्रसादजा येषां नास्ति ते स्वल्पबुद्धयो मूढाः पण्डिता अपि सदसद्विवेकशून्याः सन्तो ममात्मनोऽव्ययमव्यक्तादिस्थूलपर्यन्तस्य सर्वस्यापि दृश्यस्य नाशे सत्यपि स्वयं नाशरहितमतएवानुत्तमं 'सा काष्ठा सा परा गतिः' इति श्रवणादुत्तमोत्तमं सर्वतः परिपूर्णं परं चेतनत्वेन सर्वप्रकाशकत्वेन सर्वाधारत्वेन सर्वद्रष्टृत्वेन च बुद्ध्यादेर्विलक्षणं भिन्नं च भावं परमं तत्त्वमजानन्तो भूत्वा, अव्यक्तं न व्यज्यते केनापि प्रमाणेनेत्यव्यक्तः । यद्वा व्यज्यत इति व्यक्तो विकारो देहेन्द्रियादिस्तद्वत्त्वरहितत्वादव्यक्तस्तं मामात्मानमहमर्थं व्यक्तिमापन्नं व्यक्तिर्देहस्तदात्मना स्थितं मन्यन्ते । 'त्वामात्मानं परं मत्वा परमात्मानमेव च । आत्मा पुनर्बहिर्मृग्य अहोऽज्ञजनताज्ञता ॥' इत्युक्तरीत्या मयि च देहं देहे च मामध्यस्यैकीकृत्य देह एवाहमिति देहमेवात्मानं पश्यन्तीत्यर्थः । एवमनात्मानमेवात्मानं पश्यतां कुतो ज्ञानं कुतो मुक्तिरिति सिद्धम् ॥ २४ ॥

सर्वास्ववस्थासु सर्वप्रकाशकतया प्रतीयमानं परिपूर्णं प्रत्यक्षमात्मतत्त्वं कथं न विजानात्ययं जन इत्याकाङ्क्षायामाह—

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥

नाहमिति । अहं प्रत्यग्लक्षणः परात्मा सर्वप्रकाशकोऽपि सर्वगतोऽपि सर्वस्यापि लोकस्य जनस्यात्मेश्वरप्रसादशून्यस्य ब्रह्मविद्दयानुग्रहविधुरस्य प्रकाशो ज्ञानविषयो न भवामि । मामनावृतस्वरूपमपि विना ब्रह्मविदोऽन्यः कोऽपि न जानातीत्यर्थः । लोकस्यात्मस्वरूपाज्ञाने कारणमाह— **योगेति** । स्ववृत्त्या पुरुषं जननमरणदुःखप्रवाहेन योजयतीति योगा सा चासौ माया च योगमाया तया तमोरूपया समावृतः योगमायासमावृतः । यथा सूर्यप्रकाशके चक्षुषि काचपटलेनावृते सत्यहमन्ध इत्यध्यासेन पुमानन्धो भवति तथात्मप्रकाशके ज्ञानचक्षुषि मायया आवरणात्मिकया संवृते सत्यध्यासेनायं लोकोऽप्यज्ञो भवतीत्युच्यते । योगमायासमावृतस्तत एव मूढो विपरीतभावं प्राप्तोऽयं लोको मामात्मभूतं प्रत्यक्षं पुरःस्थं सूर्यमन्ध इव नाभिजानाति । देहेन्द्रियादिभ्यो भिन्नतया स्फुटतरं प्रतीयमानमजमव्ययमात्मानं साक्षादयमहमिति स्वात्मना न वेत्तीत्यर्थः । अजमित्यात्मनः कालत्रयेऽप्यव्याहतनित्यत्वबोधनार्थं विशेषणम् । 'अजामेकाम्' इत्यजत्वहेतुना मायाया अपि तथात्वे प्राप्ते तन्निवृत्त्यर्थमव्ययमिति विशेषणम् । 'ते ब्रह्मलोकेषु परान्तकाले'

इति प्रकृतेरपि लयः श्रूयते विद्वद्भिरनुभूयते च ततोऽव्ययत्वविशेषणमव्याहतम् ॥ २५ ॥

'नाहं प्रकाशः सर्वस्य' इत्युक्त्या स्वस्यापि लोकवदविद्यावृतत्वे सर्वस्य जगतोऽप्यान्ध्यं प्रसज्येत, अतो नाहमविद्ययावृत इति तदभावं प्रतिपादयति—

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥

वेदेति । भोक्तुर्भोगार्थं मत्त एव भवन्तीति भूतानि मनोबुद्ध्यादीनि तत्प्रवर्तनानि च समतीतानि गतानि वर्तमानानि च भविष्याणि चाहं वेद । जाग्रदाद्यवस्थासु तेषां सत्तां स्फूर्तिं प्रवर्तनशक्तिं च प्रयच्छन् सर्वदा प्रकाशमानः सन् प्रत्यग्रूपोऽहं विजानामि । देहेन्द्रियादीनां प्रवृत्तिं निवृत्तिं चावस्थाभेदेन सत्तामसत्तां च साक्षादहं जानामीत्यर्थः । मायावृतत्वे प्राणिनां ज्ञानाभावः प्रवृत्त्यभावश्च ममापि वेदनाभावश्च प्रसज्येत । तत्तदिष्टापत्तिरेवेति चेन्न । प्रत्यक्षविरोधप्रसङ्गात्प्राणिन इष्टमनिष्टं च जानन्ति प्रवर्तन्ते च, तदिदं सर्वप्रत्यक्षं ततः प्राणिप्रवृत्त्या 'जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते' इत्यादि स्मृत्या चात्मनो ममाविद्यावरणाभावः सिद्धस्तत एवाहं सर्वास्ववस्थासु सर्वदा सर्वं जानामि । मां तु दृश्यत्वादनित्यत्वाज्जडत्वाच्च देहेन्द्रियग्रामः प्राणो वा मनो वा बुद्धिर्वाप्यन्यो वा कश्चन न वेद । किंचिन्न जानातीत्यर्थः । 'अहं विजानामि विविक्तरूपो न चास्ति वेत्ता मम चित्सदाहम्' इति श्रुतेः । तत एवाजत्वाव्ययत्वानुत्तमत्वादिविशेषणानि सार्थकानि । यद्वा सर्वप्रकाशकत्वेन सर्वास्ववस्थास्वहमर्थतया देदीप्यमानं बुद्ध्यादिसर्वपदार्थतद्धर्मतत्कर्मणां च ज्ञातारं मां कश्चन पण्डितोऽपि न वेद न जानातीत्यर्थः । यद्वा प्रत्यगभिन्नः परमात्माहं समतीतान्यतिक्रान्तानि वर्तमानानि च भविष्याणि च भूतानि सर्वप्राणिजातानि वेद वेद्मि । मां तु प्रत्यग्लक्षणमात्मभूतमप्यहमर्थं कश्चन कोऽपि न वेद न शृणोति न मनुते न विजानाति न भजति चेत्यर्थः ॥ २६ ॥

पूर्वं 'कामैस्तैस्तैर्हृतज्ञानाः' इति कामस्य ज्ञानप्रतिबन्धकत्वं यद्यप्युक्तं, तथापीदानीं कामादीनां प्रतिबन्धकत्वं प्रवृत्तिदशायां वा उत पूर्वमेवेत्याकाङ्क्षायां पुरुषः प्राचीनपापकर्मवशात्कामरागादिकृतमोहविशिष्टः सन्नेव जायत इत्याह—

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यान्ति परंतप ॥ २७ ॥

इच्छेति । इच्छाद्वेषसमुत्थेन इच्छानुकूले प्रीतिरननुकूले त्वप्रीतिर्द्वेषस्ताभ्यां समुत्थेन समुत्पन्नेन द्वन्द्वमोहेन द्वन्द्वं सुखं दुःखं च तयोस्तत्साधनयोश्च विपरीतबुद्धिर्मोहः । मोहो नाम विचित्तता विवेकाभावस्तेन द्वन्द्वमोहेन सर्वभूतानि सर्वप्राणिनोऽपि सर्गे उत्पत्तिकाल एव संमोहं मूढभावं प्राचीनकर्मदोषेण यान्ति नैवेदानीं, यत एवं ततो जन्मान्तरीयमहापापसंभावितमोहदोषेणैव द्वन्द्वमोहविमूढा मोक्षसाधने वेदान्ते तद्विचारे तज्जन्यज्ञाननिष्ठायां चाश्रद्धया न प्रवर्तन्ते । प्रवृत्तानामपि तज्ज्ञानं नोत्पद्यते । 'ज्ञानं नोत्पद्यते पुंसां पापोपहतचेतसाम्' इति स्मरणात्, किंतु बन्धसाधने काम्ये कर्मणि देवतोपास्त्यादौ श्रद्धया भक्त्या च मोक्षसाधनत्वबुद्ध्या च नियमेन प्रवर्तन्ते । तत्रापि यच्चित्तशोधकं न तत्र प्रवर्तन्ते यन्मालिन्यकारणं जन्मादिदुःखबीजं तत्रैव । एवं स्थूलमेव बाह्यं विविच्य न विजानन्ति किमुतान्तरमतिसूक्ष्ममात्मतत्त्वं यत् द्वन्द्वमोहविमूढानां युक्तायुक्तार्थापरिज्ञानं तदिदं प्राग्भवीयपापकार्यमित्यवगच्छेदित्यर्थः ॥ २७ ॥

तर्हि केन द्वन्द्वमोहनिवृत्तिः के पुनर्द्वन्द्वमोहनिर्मुक्ता भूत्वा त्वामात्मानं यथाभूतं विज्ञाय भजन्तीत्याकाङ्क्षायामाह—

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ २८ ॥

येषां त्विति । पुण्यकर्मणामत्यन्तश्रद्धया भक्त्या चेश्वरप्रीत्यै नियमेन बहुजन्मभिः कृतं सर्वकामविनिर्मुक्तमुक्तलक्षणसंपन्नं यज्ञदानतपोरूपं पुण्यं कर्म वैदिकं येषां तेषां पुण्यकर्मणां सत्कर्मैकनिष्ठानां येषां जनानां पापं प्राग्भवीयमन्तगतं 'धर्मेण पापमपनुदति' इति श्रवणाद्यज्ञादिपुण्यकर्मभिर्येषां पापकर्म निःशेषं विनष्टं भवतीत्यर्थः । त एव पुण्यकर्मभिरीश्वरोपास्त्या च प्रतिबन्धनिवृत्त्या संप्राप्तचित्तप्रसादमहिम्ना द्वन्द्वमोहनिर्मुक्ताः सदसज्ज्ञानोदयप्रतिबन्धो यो द्वन्द्वमोहस्तस्मान्निर्मुक्ता निष्क्रान्ताः सन्तः सर्वकर्मतत्साधनसंन्यासैकसाधनेन श्रुत्याचार्यप्रसादलब्धेन प्रत्यक्तत्त्वविज्ञानेन दृढव्रताः 'सर्वमिदमहं च ब्रह्मैव' इति दृढमप्रतिहतं व्रतं बुद्धिनिश्चयविशेषलक्षणं येषां ते दृढव्रताः श्रुतिस्मृतियुक्तिकोटिभिर्निर्णीतार्थे सनिश्चया भूत्वा मां निष्कलं निष्क्रियं निर्विशेषं

निराकारं निरञ्जनं नित्यशुद्धबुद्धमुक्तस्वभावमानन्दैकरसं प्रत्यगभिन्नं परं ब्रह्माद्वितीयं भजन्ते नित्यनिरन्तरैकनिष्ठयानुसंदधते नान्ये वैषयिकसुखभ्रमभ्रान्ता इत्यर्थः ॥ २८ ॥

'मद्भक्ता यान्ति माम्' इत्यत्र सर्वे किं त्वां न प्राप्नुवन्तीत्याकाङ्क्षायां मायातत्कार्यदोषेण संवृता मूढा मां न जानन्ति न भजन्ति च न प्राप्नुवन्ति । ये तु प्राचीनपुण्यातिशयेन सर्वपापनिवृत्तौ सत्यां सम्यगुदितचित्तप्रसादेन द्वन्द्वमोहान्निष्क्रम्य निरन्तरसमाधिनिष्ठया मां भजन्ते त एव मद्भक्ता यान्ति मामित्युक्तविदेहमुक्तिरेव चैतेषां समाधिनिष्ठासंपन्नसम्यग्ज्ञानस्य फलमिति ज्ञातव्यं, नतु 'जरामरणमोक्षाय' इति वक्ष्यमाणं 'जरामरणमोक्षाय मामाश्रित्य यतन्ति ये । ते ब्रह्म तद्विदुः' इति जरामरणमोक्षमुद्दिश्यैव यत्नं कुर्वतां तन्मोक्षसाधनं सर्वस्य ब्रह्ममात्रत्वदर्शनमुच्यते । तस्मात् 'तेषां ज्ञानी नित्ययुक्तः' इत्यारभ्यैतत्पर्यन्तं ब्रह्मविदां निर्विशेषब्रह्मैकनिष्ठानां 'न तस्य प्राणा उत्क्रामन्ति', 'ब्रह्मैव सन्ब्रह्माप्येति', 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुत्येकप्रमाणानामत्रैव विदेहमुक्तिं प्रतिपाद्याधुना मन्दप्रज्ञानां सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मबुद्धिकरणलक्षणं सगुणोपासनं संक्षेपेणोपदिशति—

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९ ॥

जरेति । जरामरणमोक्षाय जन्ममृत्युप्रवाहनिःशेषनिवृत्तये सर्वकारणं सर्वात्मकं मां परमेश्वरमाश्रित्य भ्रमकल्पितनामरूपाद्यग्रहणेन सर्वदा मत्स्वरूपैकानुसंधानपरा भूत्वा ये मुमुक्षवो यतन्ते 'सर्वं खल्विदं ब्रह्म' इत्यादिश्रुत्यर्थावष्टम्भेन सर्वत्र ब्रह्म प्रत्ययावृत्तिमेव ये कुर्वन्तीत्यर्थः । ते निरन्तरब्रह्मप्रत्ययावृत्तिमहिम्ना कृत्स्नमध्यात्मं ब्रह्मादिस्तम्बपर्यन्तेषु सर्वोपाधिष्वात्मत्वेन स्थितं प्रत्यग्रूपं वस्तु समस्तं कर्म च तस्य सुखदुःखाद्यनुभूतिकारणं कर्मापि समस्तं ब्रह्मैव विदुः । ब्रह्म दृष्ट्वाध्यात्मं कर्म च सर्वं ब्रह्ममात्रत्वेन विजज्ञुरित्यर्थः । यथा तोयात्पृथगिव प्रतीयमानास्तरङ्गबुद्बुदादयो द्रवत्वशीतत्वशुक्लतादिभिर्जलधर्मैर्बहिरन्तर्व्याप्तत्वेन पृथग्रूपादिसंभावितसत्ताभावाज्जलान्न भिद्यन्ते, किंतु जलमात्रा एव भवन्ति तरङ्गाद्याश्रितक्रियापि तरङ्गाद्यभिन्नत्वेन तरङ्गाद्यात्मकतोयमात्रत्वात् तरङ्गादेस्तत्क्रियायास्तोयमात्रत्वमेव तद्वद्ब्रह्मणोऽपि भिन्नानीव प्रतीयमानान्यध्यात्मादीनि वस्तूनि सत्त्वचित्त्वादिभिर्ब्रह्मधर्मैर्बहिरन्तर्व्याप्तत्वेन स्वतः सत्ताभावाद्ब्रह्मणो न भिद्यन्ते, किंतु ब्रह्ममात्राण्येव भवन्ति । तदाश्रितक्रियाप्यध्यात्माभिन्नत्वेन

तदात्मकब्रह्माभिन्नत्वाच्च । अध्यात्मनां च सर्वेषां कर्मणां च ब्रह्ममात्रत्वदर्शनं युक्तमेवेति सिद्धम् ॥ २९ ॥

सर्वस्य ब्रह्ममात्रत्वदर्शनपरास्ते उपासका न केवलमध्यात्मकर्मणोरेवं ब्रह्ममात्रत्वं विदुः किंत्वधिभूतादीनामपीत्याह—

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ३० ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानयोगो नाम सप्तमोऽध्यायः ॥ ७ ॥

साधिभूताधिदैवमिति । कार्यं सर्वमधिभूतं, अधिदैवं हिरण्यगर्भश्चाग्न्यादिकमप्येताभ्यां सह वर्तत इति साधिभूताधिदैवं अधिभूताधिदैवरूपेण स्थितं । अधियज्ञो यज्ञाधिदेवता तेन सह वर्तत इति साधियज्ञमधियज्ञात्मना स्थितं च मां परं ब्रह्म सर्वात्मकं ये विदुः अध्यात्माधिभूताधिदैवाद्याकारेण सर्वात्मना प्रतीयमानं मां परं ब्रह्म ये नित्यनिरन्तरसमाधिनिष्ठया संभावितप्रतिबद्धवृत्त्या ब्रह्मैवेदं सर्वमिति सर्वं ब्रह्मैव विदुस्ते मय्येव ब्रह्मणि युक्तचेतसः समाहितचित्ता भूत्वा प्रयाणकाले उत्क्रान्तिसमयेऽपि च देहेन्द्रियप्राणमनोबुद्ध्यादीनां व्याकुलीभावकालेऽपि विपरीतभावराहित्येन सर्वात्मानमेव मां विदुः पश्यन्ति, नतु मत्तो भिन्नं देहेन्द्रियादिकं वात्मानं वा वेदनक्रियां वा प्राणिजातं वा देवतान्तरं वा न शृण्वन्ति न पश्यन्ति न स्मरन्ति चेत्यर्थः ॥ ३० ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ।

सप्तमाध्यायान्ते त्वदृश्यत्वादिगुणकं निर्विशेषं प्रमाणागम्यं परं ब्रह्म स्वात्मनाधिगन्तुमशक्तानां मन्दप्रज्ञानां भेददर्शनहेतुभूतबाह्यवासनापटलनिःशेषनिवृत्त्या चित्तप्रसादसिद्धौ निर्विशेषज्ञानयोग्यता सेत्स्यतीति सगुणब्रह्मोपासनमुपक्रम्य, 'ते ब्रह्म तद्विदुः' इत्यादिना अध्यात्माधिभूताधिदैवाधियज्ञादीनां ब्रह्माभिन्नत्वदर्शनलक्षणमुपासनं सूचयित्वा, इदानीं ब्रह्मादीनां स्वरूपं विविच्य दर्शयितुं प्रयाणकाले मुमुक्षोः कर्तव्यं ध्यातव्यं प्राप्तव्यं च वस्तु प्रतिपादयितुं पुनरावृत्तिसहितरहितस्थानयोः स्वरूपं बोधयितुं कर्मिणामुपासकानां च मन्तव्यं मार्गं प्रदर्शयितुं चाष्ट-

माध्याय आरभ्यते । तत्रादौ ते ब्रह्मेत्यादिना निर्दिष्टानां ब्रह्मादिपदानामनेकार्थत्वादत्र योग्यमर्थमजानानस्तद्बुभुत्सयार्जुन उवाच—

अर्जुन उवाच ।

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥

किं तदिति । परावरयोरुभयोरपि ब्रह्मशब्दार्थत्वादत्र विवक्षितं परं वा किमपरं वा ब्रह्म तदुच्यताम् । आत्मानं देहमधितिष्ठतीत्यध्यात्मत्वं प्राणेन्द्रियादीनां प्रतीतिश्च संभवति । तस्मात् किमध्यात्मं प्राणो वा श्रोत्रादिर्वा उत आत्मा वा । कर्मणोऽपि श्रौतं स्मार्तं लौकिकं चेति त्रैविध्यात्कर्मशब्देन किं विवक्षितम् । भूतानां कार्यकारणभेदेन पृथिव्यादिभेदेन चानेकत्वसंभवादधिभूतमिति किं प्रोक्तम् । किंचाधिदैवतमित्यग्न्यादयो देवाः सर्वे वा उतैकदेशो वा तत्संबन्धि यत्किंचित्क्रियान्तरं वा किमुच्यते ॥ १ ॥

अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २ ॥

अधियज्ञ इति । 'विज्ञानं यज्ञं तनुते' इति, 'यज्ञो वै विष्णुः' इति यज्ञमधिष्ठायावस्थितेरुभयत्रान्यत्रापि च संभवादत्र विज्ञानात्मा वा विष्णुर्वान्यो वा को विवक्षितः । स चात्र देहे कथं तिष्ठति साकारेण वाप्युत निराकारेण बुद्ध्याद्यन्यतमो वा भिन्नो वा । किंच प्रयाणकालेऽपि नियतात्मभिः समाहितचित्तैस्त्वं कथं केन प्रकारेण ज्ञेयो ज्ञातव्योऽसि । सगुणरूपेण निर्गुणरूपेण वान्येन रूपेण वान्यथा वा सर्वं सम्यग्वक्तव्यमिति पृच्छति ॥ २ ॥

किं तद्ब्रह्मेत्यादिना सप्तानामप्युक्तानां प्रश्नानां क्रमेण प्रष्टुरर्थावबोधसौकर्याय स्वाभिमतमर्थं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥ ३ ॥

अक्षरमिति। अक्षरं 'अजो नित्यः शाश्वतः' इति श्रवणाज्ज्ञानाज्ञानाभ्यां कालेनान्येन वा न क्षरति न नश्यतीत्यक्षरम् । यद्वा अव्याकृतं तत्कार्यं च सर्वं बहिरन्तश्चाग्निरयःपिण्डमिवाक्ष्णोति व्याप्नोतीत्यक्षरं सत्यज्ञानादिलक्षणं परं ब्रह्म 'एतद्वै तदक्षरं गार्गि' इति श्रुतेः । ननु ॐमित्येकाक्षरमिति

संयुक्तमेतत् क्षरमक्षरं चेति प्रणवस्याव्यक्तस्य चाप्यक्षरत्वं श्रूयते कथं ब्रह्मण एवाक्षरत्वमिति चेन्न । अक्षरस्य ब्रह्मणो वाचकत्वात्प्रणवस्याक्षरत्वं नतु नित्यत्वेनाक्षरत्वम्। 'तस्य प्रकृतिलीनस्ये'ति प्रलयश्रवणात् क्षरापेक्षयाऽव्यक्तस्याक्षरत्वं नतु नित्यत्वेन 'क्षरं प्रधानममृताक्षरं हरः' इति प्रकृतेः क्षरत्वं परस्य ब्रह्मण एवाक्षरत्वं च श्रूयते । ततो ब्रह्मैकमेवाक्षरं न ततोऽन्यदक्षरमस्ति । तर्हि विशेषणवैयर्थ्यं स्यादिति चेन्न । ब्रह्मणः सर्ववैलक्षण्यनिर्वाहार्थकत्वाद्विशेषणस्य सार्थकत्वोपपत्तेः क्षरमक्षरमिति पदार्थत्वेनोभयोः समत्वे प्राप्ते परमिति विशेषणं ब्रह्मणो निरवयवत्वनिष्क्रियत्वनित्यत्वनिःसङ्गत्वनित्यशुद्धत्वनिरतिशयत्वातिसूक्ष्मत्वसद्घनत्वचिद्घनत्वानन्दघनत्वसर्वव्यापकत्वसर्वप्रकाशकत्वसर्वाधारत्वादिधर्मैः सर्वोत्तमत्वापादकं भवति। श्रूयते च 'महतोऽव्यक्तमुत्तमम्', 'अव्यक्तात्तु परः पुरुषः' इति एवं विशेषणविशिष्टमक्षरं ब्रह्म पूर्वोक्तब्रह्मपदस्यार्थ इत्यर्थः । एवं ब्रह्मशब्दार्थमुक्त्वाध्यात्मपदस्यार्थमाह— **स्वभाव इति** । आत्मानं देहं बुद्ध्यन्तं ब्रह्माण्डं रविरिव प्रकाशयितुमधिष्ठाय तिष्ठतीत्यध्यात्मं यत्तत्परस्य ब्रह्मणः स्वभावः स्वरूपमेव । स्वभावो नामाध्यात्मं प्रत्यक्त्वं स्वयमेव भवतीति स्वभावः परं ब्रह्म स्वयमेव प्रतिशरीरं प्रत्यग्रूपेणाहमर्थोऽप्यात्मा ज्ञाता भवतीत्यर्थः । यथा घटादिषु विद्यमान आकाशो महाकाशस्वभावस्तथा ब्रह्मादिस्तम्बान्तेषु शरीरेष्वहमर्थत्वेन विद्यमानं चैतन्यं ब्रह्मचैतन्यमेव । तत एव तत्त्वमस्यादिवाक्यानां तयोरेकत्वप्रतिपादने प्रवृत्तिः । यत एवं ततः परस्य ब्रह्मणः स्वभाव एवाध्यात्ममित्युच्यते नतु प्राणेन्द्रियादिः । भूतभावोद्भवकरः भूतान्येव भावा भूतभावाः स्थावरजंगमरूपपदार्थास्तेषामुद्भव उत्पत्तिः । उद्भव इति जरामरणादेरुपलक्षणं तं करोतीति भूतभावोद्भवकरः विसर्गः देवतोद्देशेन द्रव्यत्यागो यज्ञः श्रौतस्मार्तादिलक्षणो वृष्ट्यादिद्वारा सर्वप्राणिजन्मकारणं यस्तदेव कर्मसंज्ञितं कर्मेत्यर्थः । नतु चलनमात्रम् ॥ ३ ॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ४ ॥

अधिभूतमिति । क्षरो भावः क्षरति नश्यतीति क्षरो भावो नश्वरः पदार्थः सर्वोऽप्यधिभूतमित्युच्यते नतु कारणं कार्यमित्यादिभेदोऽत्र विवक्षितः किंतु स्वकर्माधिकृत्य यद्यद्भवति तत्तज्जनिमद्वस्तु सर्वमधिभूतमित्यर्थः । अधिदैवं तु पुरुषः पूर्णमनेन सर्वं कार्यजातमिति, पुरिशयनाद्वा पुरुषो हिरण्यगर्भः । 'हिरण्यगर्भः समवर्तताग्रे भूतस्य' इति श्रुत्युक्तः

समष्टिव्यष्टिसर्वशरीराभिमानी सर्वप्राणिकरणानां शक्तिप्रदाताऽधिदैवमित्युच्यते नतु क्रियान्तरम् । चकारः श्रोत्रादिचतुर्दशकरणप्रवर्तकदिग्वाताकीदीनां समुच्चयार्थः । अधियज्ञः इज्यते क्रियते इति यज्ञः श्रौतस्मार्तक्रियात्मको विसर्गः पूर्वोक्तस्तमधिकृत्य तिष्ठतीत्यधियज्ञोऽहमेव सर्वप्राणिनां कर्म तत्फलविभागं तत्परिपाकं प्रवृत्तिं निवृत्तिं च कुर्वन्नत्र देहे त्वहमेवेश्वरो नियन्तास्मीत्यर्थः । 'यच्च स्वभावं पचति विश्वयोनिः पाच्यांश्च सर्वान् परिणामयेद्यः' इति, 'एषोऽन्तर्याम्येष योनिः', 'एष एव साधु कर्म कारयति' इति श्रुतेः । 'पृथिव्यां तिष्ठन्' इत्यादौ निराकारतया नियम्याभिन्नत्वं स्वरूपेण तु भिन्नत्वं तदगोचरत्वं च मम पृथिव्यादिनियन्तुः श्रुत्यैवोच्यते, ततो न साकारता नापि विकारितादिर्मम एवमेवास्मिन्देहे तिष्ठामीति भावः । एवमध्यात्मकर्माधिभूताधिदैवाधियज्ञस्वरूपेण सर्वात्मना स्थितं परं ब्रह्म निःशेषविसृष्टविपरीतप्रत्ययेन सर्वं ब्रह्मैवेत्येकवृत्त्या जरामरणमोक्षकामेन नित्यमुपासितव्यमिति प्रश्नप्रतिवचनयोस्तात्पर्यार्थः ॥ ४ ॥

'साधिभूताधिदैवं मां साधियज्ञं च ये विदुः । प्रयाणकालेऽपि च मां ते विदुः' इति साधिभूताधिदैवाधियज्ञरूपब्रह्मोपासकानामन्तकालेऽपि ब्रह्मवेदनं स्मरणलक्षणं यत् पूर्वमुपक्रान्तं तदिदानीं सफलं विस्तरेण प्रतिपादयति—

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥

अन्तकाल इति । एकवचनं बहुवचनस्योपलक्षणम् । योऽध्यात्माधिभूतादिभेदप्रत्ययराहित्येनोक्तलक्षणं मामेव परं ब्रह्म जरामरणमोक्षायाविच्छिन्नयोगनिष्ठयाऽजस्रमनुसंधत्ते स ब्रह्मविदन्तकाले च तथैवैकवृत्त्या मामेव स्मरन् ब्रह्मैवाहमिति स्वस्य ब्रह्मतामेव भावयन् नत्वध्यात्मादिकं स्मरन्, तत्स्मरणे त्वहं ममेदमित्यादिव्यामोहः पुनः संसारहेतुः स्यात्, ततः सर्वात्मना परं ब्रह्मैव मां ध्यायन् कलेवरं त्यक्त्वा मद्भावं ब्रह्मभावं याति मामेव प्राप्नोति नास्त्यत्र संशयः । मरणकाले परमेव ब्रह्म ध्यात्वा कलेवरं त्यक्तवतो ब्रह्मविदो ब्रह्मभावापत्तिः परोक्षत्वादस्ति वा न वेत्यस्मिन्नर्थे संशयो न कर्तव्यस्त्वयान्येन वा वैदिकेन । यतो 'ब्रह्म वेद ब्रह्मैव भवति' इति श्रुत्यैवायमर्थो निर्धार्यते । ततो ब्रह्मविद्यतिः सर्वदा ब्रह्मानुसंधानमेव कुर्वन्नन्तकालेऽपि स्वं ब्रह्मैव भावयन् ब्रह्मैव भवतीत्यर्थः । 'पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैर्यच्चित्तस्तेनैष प्राण आयाति प्राणस्तेजसा

युक्तः सहात्मना यथासंकल्पितं लोकं नयती'ति श्रवणात् । ब्रह्मविदोऽन्तकालेऽपि च ब्रह्मात्मनैव स्थातव्यं नतु दृश्यात्मना । तदात्मना तिष्ठतो भाविशरीरविषया स्मृतिः स्मृत्यनुरूपा तच्छरीरप्राप्तिश्च भवति। ननु ब्रह्मविदः कर्माभावात् कुतो भाविशरीरस्मृतिस्तत्प्राप्तिश्चेति चेन्न । कर्मगतेर्विचित्रत्वादवगन्तुं न शक्यते तर्हि तथाविधकर्मगत्या ब्रह्मानुसंधिरपि तदा निरुद्धः स्यादिति चेन्न। प्राकृतचिरस्थिरनित्यनिरन्तराभ्यस्तयोगबलेन प्राणवेदनाज्ञानवत्कर्म तज्ज्ञानं च निरुध्यते । तेनैव रुद्धविपरीतभावः सन् ब्रह्मैव ध्यायति ब्रह्मैव गच्छति । अतएवान्तकाले च मामेवेति चकारैवकाराभ्यां ब्रह्मविदो विषयान्तरभावनाराहित्येनान्तकालेऽपि ब्रह्मात्मनैव स्थातव्यं नियमयति श्रीभगवानिममेवार्थमग्रेऽपि स्पष्टयति। तर्हि 'तीर्थे श्वपचगृहे वा' इत्यादिवचनजातस्य का गतिरिति चेत् पुण्यापुण्यक्षेत्रतीर्थनिवासविचारो ब्रह्मविदो न कर्तव्यो ब्रह्मज्ञानेनैव विमुक्तिर्नतु क्षेत्रनिवासेनेति बोधनमेव गतिः । पुण्यक्षेत्रेऽपि निष्ठाराहित्येनैव विस्मृतिं प्राप्यान्तकाले मृगमेव ध्यात्वा जडभरतो मृगत्वं प्राप्तवान् । तस्मात्पूर्वमप्यन्तकाले च ब्रह्मविदो यतेर्ब्रह्मनिष्ठयैव स्थातव्यमिति सिद्धम् ॥ ५ ॥

ननु पुण्येन पुण्यलोकमिति न्यायेन देवयजां विष्णुयजां शिवयजां चाराधनमात्रेण तत्स्वरूपता सिध्यति यथा, तथा ब्रह्मविदोऽपि निरन्तरश्रवणादिना ब्रह्मभावापत्तिः सिध्यति । किमर्थमन्तकाले प्राणवेदनाप्राचुर्ये त्वन्तकाले च मामेवेति नियमेन ब्रह्मविद्स्त्वद्ध्यानमवश्यं कर्तव्यमित्ययं निर्बन्ध इत्याशङ्कायां । न । विष्ण्वादिभक्तानामपि नित्यं चान्तकाले च तद्ध्यानमेव कुर्वतां तत्स्वरूपापत्तिस्तदितरेषां तु नियमेन भजतां तल्लोकप्राप्तिरेव । सोऽयं नियमः सर्वसाधारणो नतु ब्रह्मविद एवेत्याह—

यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥ ६ ॥

यमिति । भक्तो वान्यो वा पुरुषस्तद्भावभावितः तस्य शिवादेर्वाभीष्टवस्तुनो वा शत्रोर्वान्यस्य वा भावः स्वरूपं भावितः भक्त्या प्रीत्या वा मोहेन वा द्वेषेण वा भयेन वा सर्वदा भावनया बुद्धिवृत्तेर्विषयत्वमापादितो भवति येन स तद्भावभावितः सर्वदा तत्स्वरूपमेव भावयन्नन्तकाले यं यं वापि भावं शिवं वा विष्णुं वाऽन्यं वा प्रियमप्रियं पदार्थं पूर्वसंस्कारबलेन स्मरन् चिन्तयन्नेव कलेवरं त्यजति तं तमेव

भावं स्वेन चिन्तितपदार्थस्वरूपमेवैति पूर्वकालीनोत्तरकालीनध्यानशक्तिमहिम्ना ध्येयस्वरूपमेव प्राप्नोति न त्वाराधनमात्रपुण्यकर्मणा । नहीन्द्रं यष्ट्वा विप्रः इन्द्रत्वं प्राप्नोति तद्वच्छ्रवणमात्रेण ब्रह्मविद्ब्रह्मभावं न गच्छति । तथाच श्रुतिः—'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन' इति । किंतु सदा तद्भावभावित एव । तस्य ब्रह्मणो भावस्तद्भावो ब्रह्मस्वरूपं सदायमेवाहमिति भावितः स्वात्मनानुभवसहितो येन स तद्भावभावितः । यद्वा तद्भावं ब्रह्मभावं भावितो नित्यनिरन्तरसमाधिनिष्ठासंभावितसम्यग्ज्ञानेन प्रापितो यः स तद्भावभावितः सन्नेव ब्रह्मभावं गच्छति । तथाच श्रुतिः—'यमेवैष वृणुते तेन लभ्यः' इति नित्यनिरन्तरध्यानेन ध्यातुर्ध्येयस्वरूपापत्तिर्भ्रमरकीटादौ दृष्टा च । यस्मादेवं तस्माद्ब्रह्मविदां यतीनां विदेहमुक्तिकामानां नित्यं चान्तकाले च ब्रह्मैवानुसंधातव्यं न क्वचिदपि बाह्यमिति सिद्धम् ॥ ६ ॥

ब्रह्मविदां यतीनां ध्यानस्यावश्यकर्तव्यत्वसिद्धये उक्तमेवार्थमर्जुनं विषयीकृत्य पुनर्द्रढयति—

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥ ७ ॥

तस्मादिति । यस्माच्चरमकालीना दृश्यभावना अविद्यामूलकत्वाच्छरीरारम्भहेतुस्तस्मात्त्वमर्जुनः सर्वेषु च कालेष्वाहारविहारशयनासनादिषु सर्वास्ववस्थासु सर्वात्मके मयि ब्रह्मण्येवार्पिते मनोबुद्धी येन सोऽर्पितमनोबुद्धिः । अत्र मयीति विषयसप्तमी । बुद्धिरहंवृत्तिरिदंवृत्तिर्मनस्तयोर्विषयं मामेव कृत्वा समर्पिते मदात्मना स्थापिते मनोबुद्धी येन स मय्यर्पितमनोबुद्धिः सन्नहमर्थमिदमर्थं च मामनुस्मर । यो मां स्मरति विषयीकरोति वृत्तिस्तामन्वेवानुसृत्यैव स्मरतामनुगतयैव सजातीयवृत्त्यानुसंधेहि नतु भिन्नवृत्त्यन्तरालं कुरु । तथा चेत् बाह्यवासना न नश्यति तदभावे संसारो न निवर्तते ततः पुङ्खानुपुङ्खवदविच्छिन्नया सद्वृत्त्या सर्वमिदमहं च ब्रह्मैवेति सर्वदा मामनुसंधेहि । एवं सदानुसंधानं कुर्वन्मामेव परं ब्रह्मैष्यसि पूर्णानन्दैकरसात्मनावस्थानलक्षणं ब्रह्मभावं गमिष्यसि । नतु पुनः शरीरं ममैवं भविष्यति वा नवेति संशयोऽत्र कर्तव्यो मद्वचनं श्रद्धत्स्वेत्यर्थः । ननु विजातीयप्रत्ययराहित्येन सर्वदा सर्वं ब्रह्मैवेति पश्यतो मम कथं जीवनसिद्धिरित्यत आह—**युध्य चेति** । त्वं क्षत्रियः खलु स्वजीवनसाधनं युद्धं च कुरु । ननु ब्रह्मानुसंधेर्युद्धक्रियायाश्च प्रत्ययभेदेन साधनभेदेन स्थितिभेदेन च परस्पर-

विरुद्धत्वात् द्वयोरेककालैकाधिकरणत्वासंभवात् कथं तद्द्वयं युगपत्कर्तुं शक्यत इति न शङ्कनीयम् 'ब्रह्मार्पणं ब्रह्महविः' इति पूर्वोक्तरीत्या कर्ता करणं च कार्यं भोक्ता भोज्यं भोजनं च सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मदृष्ट्या यच्छारीरं केवलं कर्म तत्कर्तव्यं नत्वतिरिक्तम्। विदुषोऽप्यतिप्रवृत्त्या वासनावृत्तिस्तया पुनरपि जन्मादिसंसारस्तस्मात् सर्वदाप्यन्तकाले च ब्रह्मविदो ब्रह्मानुसंधिरेव कर्तव्य इति सिद्धम् ॥ ७ ॥

ननु ब्रह्मविदः स्वज्ञानदग्धाखिलकर्मणः कर्माभावात्कुतो भाविशरीरस्मृतिस्तत्प्राप्तिश्चेति चेत् कर्मगतेर्विचित्रत्वात् तत्तत्त्वमवगन्तुं न शक्यते तर्हि तथाविधकर्मगत्या मरणकाले ब्रह्मानुसंधिरपि निरुद्धः स्यादिति चेन्न। प्राक्कालीनेनाभ्यासयोगबलेन योगी ब्रह्मस्वरूपानुलीनान्तःकरणतया स्वयं प्राणवेदनावत् कर्म तत्कार्यं च न मनुते। यथा मद्यरसवेगेन तत्पायी प्रारब्धकृतं बाह्यं किंचिन्न मनुते किंतु मद्यरसवेगेन प्राप्तमेव कार्यं करोति तद्वदयमप्यभ्यासयोगबलेन ब्रह्मैव ध्यायति ब्रह्मैव गच्छतीत्याशयेनाह—

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ ८ ॥

अभ्यासेति। अभ्यासयोगयुक्तेन तीव्रमोक्षेच्छयाप्यतिवैराग्येण च तदेकपरत्वेन चिरकालं नित्यनिरन्तरं च क्रियमाणविजातीयप्रत्ययानन्तरिता या सजातीयप्रत्यया वृत्तिः सार्वकालिकी स एष एवाभ्यासः समाधिरेतदभ्यासेन प्राप्तो यो निर्विकल्पकसमाधिः स योगस्तेन युक्तेन ब्रह्माकारतां प्राप्तेन तत एव नान्यगामिना अन्यं भाविकर्मकार्यं प्राणेन्द्रियादिविक्षेपं वाऽन्यद्वा गन्तुं मन्तुं च शीलं वासनाशक्तिर्नास्यास्तीति नान्यगामि तेन चेतसाऽनुचिन्तयन् उक्तरीत्या स्वरूपमेव ध्यायन् ब्रह्मवित्परम् निरतिशयमहत्त्वसंपन्नं दिव्यं प्रकाशैकरूपं पुरुषं याति प्राप्नोतीत्यर्थः ॥ ८ ॥

'य एवमेताँल्लोकानात्मन्येव प्रतिष्ठितान् वेदात्मैव भवति' इति श्रुत्या सर्वात्मनः परमात्मन उपासनमुक्त्वा तस्यैवोपासकस्य 'योऽयं विज्ञानघन उत्क्रामन् केन कतरद्वाव स्थानमुत्सृज्योत्क्रामति' इत्युत्क्रमणमुपक्रम्य शरीरादुत्क्रमणप्रकारमेव वर्णयितुम् 'अपुनर्भवाय कोशं भिनत्ति कोशं भित्त्वा शीर्षकपालं भिनत्ति शीर्षकपालं भित्त्वा अक्षरं भिनत्त्यक्षरं भित्त्वा मृत्युं भिनत्ति मृत्युर्वै परे देवे एकीभवति' इत्युक्तक्रमेणोत्क्रान्तस्य परदेवताप्राप्तिरुक्ता। तथैवात्रापि 'साधिभूताधिदैवं मां साधियज्ञं च ये

विदुः' इति भगवता सर्वात्मकस्य स्वस्य परमात्मन उपासनमुक्त्वात्मतत्त्वोपासकस्योपास्तिपरिपाकदशायामन्तकाले च मामेवेत्युत्क्रमणं तदानीं विदुषः कर्तव्यं कार्यं च सूचयित्वा, इदानीमुत्क्रान्तस्योपासकस्य प्राप्तव्यं यदैश्वरं परतत्त्वमुपान्त्यश्लोकनिर्दिष्टं तदेव विशेषणैर्विशिनष्टि—

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात् ॥ ९ ॥

कविमिति । कविमतीतानागतवर्तमानसर्वप्राणितद्धर्मतत्कर्माणि चित्रविचित्राणि तत्फलानि च साक्षादव्यवधानेन कोकवीति विजानातीति कविः सर्वज्ञस्तम् । तत एवानुशासितारं सर्वेषां प्राणिनां हृदये बुद्धिकोशे स्थित्वा तत्तत्प्राणिकर्माण्यनुसृत्य शासितारम् । नियन्तारमित्यर्थः । धातारं च सर्वस्य प्राणिजातस्य तत्कृतकर्मणामनेककोटिकल्पार्जितानां फलं तद्धत्त इति धातारम् । विधातारमित्यर्थः । अणोरतिसूक्ष्मस्याकाशादेरपि कारणत्वादणीयांसमतिसूक्ष्मम्, अत एव सर्वकारणत्वात् पुराणमनादिमतिसूक्ष्मत्वादनादित्वादप्रमेयत्वादचिन्त्यरूपम् । वाङ्मनसागोचरमादित्यवर्णमादित्यस्येवानपायो नित्यो वर्णश्चैतन्यलक्षणः प्रकाशो यस्य स आदित्यवर्णस्तम् । तमसः परस्तात्तमसो मोहात्मकादज्ञानात्तत्कार्याच्च परतः स्थितम् । अज्ञानतत्कार्यसंबन्धरहितमित्यर्थः । एवंरूपं परमात्मानं मां योऽनुस्मरेत् अनेकजन्मार्जितपुण्यपुञ्जपरिपाकासादितपरमेश्वरप्रसादसंपन्नः संस्मरेत् प्रागभ्यस्तयोगबलेनान्तकालेऽनुसंदध्यात्स तं परं पुरुषमुपैतीत्युत्तरेण संबन्धः ॥ ९ ॥

कविं पुराणमित्यादिलक्षणसंपन्नं परमात्मानमुपासीनो योगी कया साधनसंपत्त्या कदा स्वयं प्राप्नोतीत्याकाङ्क्षायामाह—

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्स तं परं पुरुषमुपैति दिव्यम् ॥१०॥

प्रयाणकाल इति । तीव्रमोक्षेच्छावैराग्याभ्यामनन्यवृत्त्या नित्यं निरन्तरं च कविमित्यादिविशेषणसंपन्नं परमात्मानमनुसंदधानः स योगी प्रयाणकाले मृतिकाले संप्राप्ते सति स्वयमचलेन चिरकालनिरन्तरसजातीयप्रत्ययावृत्त्याभ्यासातिशयपटुत्ववशान्निश्चलेन विषयान्तरसंपर्कवर्जितेन मुक्तेः परमसाधनेन मनसा भक्त्या वृत्तेः स्वविषयाकारतापत्तिर्भक्तिस्तया च योगबलेन योगः समाधिस्तेन संभावितं बलं चित्तस्य लक्ष्यैकाकारतापत्तिस्थैर्यलक्षणं तेनैवोत्तमसाधनेन युक्तः सन् 'शतं चैका च हृदयस्य

नाड्यस्तासां मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति' इति श्रुत्युक्तरीत्या पूर्वं कुम्भकेन हृदये प्राणापानावेकीकृत्य स्थापयित्वा, अनन्तरमिडापिङ्गले द्वे नाड्यौ ऊर्ध्वं चोर्ध्वगामिन्या सुषुम्नया नाड्या प्राणं भ्रुवोर्मध्ये लम्बिकान्तं सम्यगानीय, शीर्षकपालं भित्त्वा श्रुत्युक्तरीत्या 'पृथिवीं भित्त्वापो भित्त्वा तेजो भित्त्वा वायुं भित्त्वाऽऽकाशं भित्त्वा मनो भित्त्वा भूतादिं भित्त्वा महान्तं भित्त्वाऽव्यक्तं भित्त्वाक्षरं भित्त्वा मृत्युं भित्त्वा तं कविं पुराणमित्युक्तलक्षणं दिव्यं प्रकाशैकस्वभावं परं पुरुषमुपैति । प्राप्नोतीत्यर्थः । अन्तकाले च मामेवेत्यन्तकाले च ब्रह्मानुसंधानविधिः । सदा तद्भावभावित इति तत्पूर्वमपि सर्वदा ब्रह्मानुसंधानविधिस्तस्मात् सर्वेषु कालेष्वित्युक्तार्थश्च, अभ्यासयोगयुक्तेनेत्यनेनोक्तार्थश्च, ब्रह्मविदां च सगुणोपासकानां चायमुपदेशः सम एव ज्ञातव्यः प्रयत्नेन कर्तव्यश्च । कविं पुराणमित्युक्तार्थस्तूपासकस्यैव नतु ब्रह्मविद इति विवेकः ॥१०॥

यतीनां मुमुक्षूणां सद्गुरोः सकाशाद्यज्ज्ञातव्यं निर्विशेषं परं ब्रह्म तत्तेषां तीव्रमोक्षेच्छया प्रवृत्तिसिद्ध्यऽनेन प्रस्तौति—

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥

यदिति । सर्वे वेदाः स्वस्वोपनिषन्मुखेन ब्रह्मैव प्रतिपादयन्ति 'आत्मा वा इदमेक एवाग्र आसीत्' इति, 'सर्वं तत्प्रज्ञानेत्रं प्रज्ञानं ब्रह्म' इति, 'सत्यं ज्ञानमनन्तं ब्रह्म', 'सत्यं चानृतं च सत्यमभवत्' 'स यश्चायं पुरुषे' इति, 'ईशावास्यमिदं सर्वं', 'अहं ब्रह्मास्मि' इति, 'सदेव सोम्येदमग्र आसीत्', 'ऐतदात्म्यमिदं सर्वं', 'तत्त्वमसि' इति, 'सर्वं ह्येतद्ब्रह्म' 'अयमात्मा ब्रह्म' इत्यतः सर्वेषां वेदानां तात्पर्यविषयभूतोऽर्थः परं ब्रह्मैव भवति । तेन वेदविदो वेदार्थविदः वेदार्थमुक्तलक्षणं परं ब्रह्म साक्षात् स्वात्मना ये विदुस्ते वेदविदो ब्रह्मविदो याज्ञवल्क्यादयः सर्वे यदक्षरं न क्षरति ज्ञानाज्ञानादिना शतसाधनेन न नश्यतीत्यक्षरं नित्यकूटस्थमसङ्गं चिदेकरसमद्वितीयं यत्परं ब्रह्म 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वम्' इति श्रुत्युक्तरीत्याऽशेषविशेषापवादेन निष्कलं निष्क्रियं शान्तमनन्तमभिवदन्ति शिष्येभ्य उपदिशन्ति वीतरागा निःशेषविनष्टरागादिदोषाः सम्यग्ज्ञानसंपन्ना यतयः 'संप्राप्यैनमृषयो ज्ञानतृप्ताः' इति श्रुत्युक्तप्रकारेण यत्परं ब्रह्म विशन्ति प्राप्नुवन्ति यत्परं ब्रह्म गुरोर्ज्ञातुमिच्छन्तः सन्तो महान्तो ब्राह्मणा भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ' इति श्रुत्युक्तरीत्या गुरुसंनिधौ ब्रह्म-

चर्यं चरन्ति । ब्रह्मचर्यं नाम दृष्टादृष्टसर्वविषयसुखवैमुख्येनाहारादिनियमेन स्वधर्मेण च श्रद्धया भक्त्या च सद्गुरुसंनिधौ वेदान्तश्रवणमेव यत्कुर्वन्ति तदक्षरसंज्ञितं पदं ज्ञानेन पद्यते प्राप्यत इति पदं परं ब्रह्म ते तुभ्यं संग्रहेण 'परस्तस्मात्तु भावोऽन्यः' इत्यादिना संक्षेपेणैव प्रवक्ष्ये । प्रकर्षेण कथयिष्यामीत्यर्थः ॥ ११ ॥

'स तं परं पुरुषमुपैति दिव्यम्' इति योगिप्राप्यवस्तुवर्णनप्रसङ्गादागतं ज्ञानिप्राप्यस्य वस्तुनो वर्णनं यत्किंचित्कृत्वा प्रकृतमेव योगिप्रयाणं प्रतिपादयति—

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥ १२ ॥

सर्वेति । सर्वद्वाराणि नासिके चक्षुषी श्रोत्रे मुखमधोबिलं लिङ्गं च वायोर्निर्गमद्वाराणि सर्वाणि संयम्य योगबलेन निरुध्य बहिरन्तर्व्याप्रतिशीलं मनश्च हृदि निरुध्य प्राणवायुमपि सर्वाङ्गीणमाकृष्य हृदयमानीय एतं सुषुम्नया संयोज्य विशुद्धचक्रमनाहतचक्रमाज्ञाचक्रं चातिक्रम्य प्राणं मूर्ध्नि ब्रह्मरन्ध्रे द्वादशान्ते षोडशान्ते चाधाय योगधारणां योगप्रक्रियामुत्क्रमणगतिमास्थितः सन् योगी ॥ १२ ॥

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ १३ ॥

ओमिति । एकं च तदक्षरं चैकाक्षरं ब्रह्मणो वाचकत्वाद्ब्रह्मेत्युच्यते प्रणवस्तमेकाक्षरमेव त्रिमात्रकं च दीर्घघण्टानादवदोमिति व्याहरन्वाचा प्रस्फुटमुच्चरन् तदर्थं कविं पुराणमित्युक्तलक्षणसंपन्नं मां परमेश्वरमनुस्मरन् मनसा ध्यायन् शीर्षकपालं भित्त्वा देहमत्र स्थूलं त्यजन्नेवं देहत्यागं कृत्वा यः सूक्ष्मेण प्रयाति पूर्वोक्तक्रमेण भूम्यादिकं भित्त्वा यो योगी गच्छति स क्रमेण परमां गतिं केवलतां याति । विदेहमुक्तिं प्राप्नोतीत्यर्थः ॥ १३ ॥

एवं परब्रह्मोपासकस्य परां गतिमुक्त्वा इदानीं श्रवणादिना विज्ञातात्मतत्त्वो यतिस्तीव्रमोक्षेच्छासमुदितवैराग्यवेगेन नित्यं निरन्तरं मां परं ब्रह्म योऽनुसंधत्ते तस्याहं सुलभ इति स्वकीयसौलभ्यं प्रतिपादयति—

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥

अनन्यचेता इति । अनन्यचेताः न विद्यते अन्यो ब्रह्मातिरिक्तो विषयो यस्य तदनन्यं विषयान्तरास्पृष्टं चेतो यस्य सोऽनन्यचेताः ब्रह्मण्येव समाहितचित्तः सन् यो ब्रह्मविन्मां नित्यशो नित्यं यावज्जीवं तत्रापि सततमविरामं सर्वदा मामेव परं ब्रह्म स्मरति ब्रह्मैवाहमिति स्वात्मनानुसंधत्ते तस्यैव नित्ययुक्तस्य सर्वदा मामेवानुसंदधतो योगिनो ब्रह्मनिष्ठस्य यतेरहं सुलभः सुतरामनायासेन लब्धुं शक्यः सुलभः । अप्रयत्नेन प्राप्य इत्यर्थः । यस्मादस्य योगिन इव न प्राणायामाभ्यासक्लेशो नेन्द्रियनिग्रहश्रमो नापि मनोनिरोधायासो नापि च सुषुम्नयोर्ध्वगमनदुःखं नैव च शीर्षकपालभूम्याद्यावरणभेदव्यथा चास्तीषदपि, किंत्वत्रैव तिष्ठतः प्रारब्धपरिक्षये स्वत एव प्राणेन्द्रियमनोबुद्ध्यादीनां सुषुप्ताविव ब्रह्मणि विलये सति अप्रयत्नेन जीवः प्राज्ञमिव ब्रह्मविन्मां निर्विशेषं निष्कलं निष्क्रियं शान्तमनन्तमपूर्वमनपरमबाह्यमानन्दघनं परं ब्रह्म प्राप्नोति । तस्माद्ब्रह्मविदो यतेर्ब्रह्मनिष्ठस्य मत्प्राप्तेः सुलभत्वादहं सुलभ इत्युच्यते । सुलभो नाम सुखप्राप्यस्ततस्त्वमनन्यचेताः सन् मां सर्वदा संस्मरेत्यर्थः ॥ १४ ॥

सर्वं कर्म संन्यस्यैकाकी मौनी भैक्ष्यजीवी भूयो यत्रकुत्राप्युपविश्य सर्वमिदमहं च ब्रह्मैवेत्यध्यात्मदृष्ट्या सर्वदा सर्वं ब्रह्मैव यः पश्यति तस्य योगिनो ब्रह्मनिष्ठस्य यतेरहं सुलभ इति स्वप्राप्तिसुलभत्वं प्रतिपाद्येदानीं स्वं प्राप्तवतां फलमाह—

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥

मामिति । मां सच्चिदानन्दैकरसं परं ब्रह्मोपेत्य मदेकरसतां प्राप्य तत एव परमामनुत्तमां केवलानन्दमयीं संसिद्धिं मदात्मना स्थितिलक्षणां विदेहमुक्तिं गता महात्मनो महानुभावा यतयः । यद्वा महात्मानः महान्नित्यनिरन्तरब्रह्मनिष्ठया निःशेषविनष्टरजस्तमोगुणकार्यत्वादतिस्वच्छतरत्वेन प्रकृष्टः केवलः शुद्धसत्त्वभावापन्न आत्मा मनो येषां ते महात्मानः सुप्रसन्नान्तःकरणाः ततएव परमामुत्तमफलप्रदानोन्मुखीं संसिद्धिं सुखानुभूतौ दुःखानुभूतौ च वृत्तेर्ब्रह्मात्मना संस्थितिरेव संसिद्धिस्तां बहुजन्माभ्यस्तां सर्वास्वप्यवस्थास्वप्रतिबद्धामखण्डाकारवृत्तिलक्षणां गताः प्राप्ता यतयो ब्रह्मनिष्ठा मां कार्यकारणभावविकलं मायातत्कार्यलेशसंबन्धशून्यं सद्घनं चिद्घनमानन्दघनं परं ब्रह्मोपेत्य मद्भावं प्राप्य घटाकाशो महाकाशतामिव स्वयं ब्रह्मैकतां प्राप्य अशाश्वतं

शाश्वतो ब्रह्माभावस्ततो विलक्षणत्वादशाश्वतं नश्वरं तत्रापि दुःखालयमाध्यात्मिकादिदुःखाश्रयं जन्म । अत्र जन्मना विकारेण विकारि जनिमच्छरीरं गृह्यते । विदेहमुक्तिं प्राप्ता ब्रह्मविदः पुनरनित्यं दुःखभूयिष्ठं शरीरं दैवं प्राजापत्यं वा गान्धर्वं वा मानुषं वान्यद्वा नाप्नुवन्ति । कारणाभावादविद्याकामकर्माणि खलु शरीरप्राप्तिकारणं तेषां सर्वेषां सम्यग्ज्ञानमहाग्निज्वालाभिर्भस्मीभूतत्वात् मुक्ता न पुनरावर्तन्ते । 'नच पुनरावर्तते नच पुनरावर्तते' इति श्रुतेः । अभ्यासः संशयं विच्छिनत्तीत्यर्थः ॥ १५ ॥

एवं ब्रह्मभावापन्नानां ब्रह्मविदां पुनरावृत्त्यभावं प्रतिपाद्य तदितरेषां श्रुतिशून्यानां तद्वतामप्यसम्यग्दर्शनवतां स्वेतरप्राप्तिमतां पुनरावृत्तिरस्त्येवेति सूचयन्, ब्रह्मविदां मुक्तिसिद्धावसंशयसिद्ध्यर्थं यतीनां सम्यग्दर्शनसिद्धौ प्रयत्नसूचनार्थं च उक्तमेवार्थं पुनर्दृढीकरोति—

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १६ ॥

आब्रह्मेति । अत्र ब्रह्मशब्देन चतुर्मुख उच्यते । सहस्रयुगपर्यन्तमिति कालनिर्णयश्रवणात् । आब्रह्मभुवनात् भवन्ति भूतान्यत्रेति, सन्तीति वा भुवनं, ब्रह्मणो भुवनं ब्रह्मभुवनं सत्यलोकः आब्रह्मभुवनात् ब्रह्मलोकमारभ्य सर्वे लोकाः पुनरावर्तिनः पुण्यवशात् प्राप्तान् पुनरावर्तयन्ति पुनर्भवमेव पुण्यक्षयान्ते प्रापयन्तीति पुनरावर्तिनः सत्यलोकादिलोकास्ततस्तल्लोकगतानां पुनरावृत्तिरस्त्येव यावत्संपातमिति । 'नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति' इति श्रवणात् । न विद्यते अकं दुःखं यत्रेति सत्यलोकस्यैव नाकत्वं युक्तं तदन्यत्र विद्यमानानां दैत्येभ्यः क्वचित् प्रलयाग्नेश्च दुःखसंभवादुक्तश्रुतिबलात् सत्यादिलोकगतानामपि पुनरावृत्तिः प्रामाणिकी । ननूक्तश्रुतिबलाद्ब्रह्मभावं गतानां ब्रह्मविदामपि युक्ता पुनरावृत्तिरित्याशङ्कायाम् । न । 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ' इति, 'यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते' इति, 'तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेन' इति, 'सर्वं पाप्मानं तरति' इत्यादिश्रुतिभिर्ब्रह्मविदः सर्वपापप्रदाहो लेपाभावश्च प्रतिपाद्यते यतस्ततः 'कर्मणा जायते जन्तुः कर्मणैव प्रलीयते' इति, 'प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम् । तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे' इत्यादि-

श्रुतिस्मृत्युक्तप्रकारेण निर्दग्धकर्मणामेव शेषकर्मानुभूत्यै पुनरावृत्तिर्न तु ज्ञानाग्निनिर्दग्धाशेषकर्मणां ब्रह्मविदाम् । तेषामावृत्त्यै कर्मशेषाभावान्न पुनरावृत्तिः प्रामाणिकी । 'नच पुनरावर्तते' इत्यनेकधा तन्निषेधाच्च न तेषां पुनरावर्तनमस्तीति तुशब्देनैव व्यावर्तयन्नाह—**मामिति** । हे कौन्तेय शुद्धकुलोत्पन्नार्जुन, मां सत्यज्ञानादिलक्षणं सदानन्दैकरसं परमात्मानमुपेत्य पूर्णात्मना तिष्ठतो ब्रह्मवित्तमस्य तु पुनर्जन्म पुनरावृत्तिर्न विद्यते । नास्तीत्यर्थः । यद्वा मामुपेत्य तु विद्वान् पुनर्जन्म पुनरावृत्तिं न विद्यते न प्राप्नोति । 'विद सत्तायाम्' इति धातोः प्राप्त्यर्थता वा, विन्दतेर्वा दिवाद्यन्तःपातित्वं द्रष्टव्यम् ॥ १६ ॥

एवं स्वं प्राप्तवतः पुनरावृत्त्यभावं प्रतिपाद्येदानीं सत्यादिलोकेषु नित्यत्वनित्यसुखत्वानावर्तत्वबुद्ध्या पुण्यकर्माणि कृत्वा गत्वा पुनरागच्छन्तो निर्गच्छन्तः पुनःपुनर्जायमाना म्रियमाणाः सन्तः प्राणिनः सर्वे सर्वदा दुःखमेवानुभवन्ति प्ररोचनोक्तिभिर्मुह्यमाना अन्धपरम्परावत् गच्छन्तमनुगच्छन्ति च, न कोऽप्यत्र वृत्तं विचारयति न तपति न विरज्यते अहो कष्टमज्ञत्वमिति तेषां सदसद्विवेकवैराग्यासत्त्यागसदुपादानप्रवृत्तिसिद्धये सत्यादिलोकानां कालपरिच्छिन्नानां ब्रह्मणो दिवारात्रिभ्यामाविर्भावं तिरोभावं च तद्दिवारात्रिभ्यां प्राणिनामपि सर्वेषामुत्पत्तिं प्रलयं च प्रतिपादयति—

सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥ १७ ॥

सहस्रेति त्रिभिः । अहोरात्रविदः 'दैविकानां युगानां च सहस्रपरिसंख्यया । ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च ॥' इत्युक्तरीत्या ब्रह्मणः प्रजापतेरहोरात्रयोः कालपरिमाणमियदिति विदन्ति जानन्तीत्यहोरात्रविदो मन्वादयो ये महान्तः ब्रह्मणोऽहर्दिनं सहस्रयुगपर्यन्तं सहस्रसंख्याकैर्युगैर्दिव्यैः पर्यन्तं पर्यवसानं यस्य तत्सहस्रयुगपर्यन्तमुक्तयुगसहस्रपरिमाणकमेव यत् यथा विदुर्जानन्ति विदन्ति तथैव ते मन्वादयो रात्रिमपि युगसहस्रान्तां युगसहस्रपरिमाणवतीमेव विदुर्वदन्ति च । ततो भ्रान्तैर्नित्यत्वेनाङ्गीकृतस्य सत्यलोकस्य प्रतीतिः सहस्रयुगपर्यन्तमेव, ततः सत्यलोकस्यैवमनित्यत्वे सति ततोऽपराणां महरादीनां भूरादीनां चानित्यत्वे चाल्पसुखत्वे च का वार्तेति भावः ॥ १७ ॥

एवं सत्यादिलोकानामनित्यत्वं प्रतिपाद्याधुना तल्लोकगतानां प्राणिनामतिदुःखमेवेत्याह—

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाऽव्यक्तसंज्ञके ॥ १८ ॥

अव्यक्तादिति । कार्येण विनान्येन न व्यज्यत इत्यव्यक्तं ब्रह्मणः सुषुप्तविद्यात्मकं नहि बुद्ध्यादिवत् सुषुप्तं व्यज्यते तत एवाव्यक्तमित्युच्यते । मूलकारणाव्यक्तवद्ब्रह्मसुषुप्ताख्यमप्यव्यक्तं सर्वोत्पत्तिप्रलयकारणमव्यक्तत्वाविशेषात् प्रजापतेरहरागमे दिने प्राप्ते तस्मादुक्तलक्षणादव्यक्ताद्व्यक्तयः प्रमाणैर्व्यज्यन्ते गृह्यन्त इति व्यक्तयः सर्वाः स्थावरजंगमादिप्राणिकोटयः प्रभवन्ति । बीजादङ्कुरवज्जायन्त इत्यर्थः । तथा ब्रह्मणो रात्र्यागमे रात्रौ प्राप्तायां तत्रैवाव्यक्तसंज्ञके अव्यक्तनाम्नि ब्रह्मणः सुषुप्ते प्रलीयन्ते व्रीह्यादयो बीज इव प्रकर्षेण लीयन्ते । अदर्शनं गच्छन्तीत्यर्थः । एतेन प्रजापतेरहोरात्रयोः सर्वप्राणिनामपरिहार्यं जननमरणदुःखमनन्तमिति सूचितम् ॥ १८ ॥

ननु तरङ्गबुद्बुदादिवद्ये ये प्राणिनो यदा यदा जनित्वा यद्यद्दुःखमनुभवन्ति तत्तद्दुःखं तेषामेव भवति नतु नवीनानां तदितरेषां कालान्तरे जातानां जनिष्यमाणानां चेति चेद्भवानत्र प्रष्टव्यः । पूर्वमसत एवेदानीं जातस्य सुखदुःखादिवैचित्र्यं प्रत्यक्षेणोपलभ्यते तत्कालस्वभावो वा प्राणिस्वभावो वा देशस्वभावो वा द्रव्यस्वभावो वा उत आधुनिककर्मस्वभावो वा । नाद्यः । शीतवातादिवदेकदैव सर्वेषामपि तदागमप्रसङ्गात् । न द्वितीयः । श्यामत्वरक्तत्वादिवत्सदानुगमप्रसङ्गात् । न तृतीयः । सर्वेषामपि सर्वदा तदापत्तिप्रसङ्गात् । नापि चतुर्थः । एकमहानदीजलपायिनां नरपशुमृगखगादीनां संततदुःखवैचित्र्यापत्तेः । नैव च पञ्चमः । तर्णकस्याकर्मिणः सुखाद्यभावप्रसङ्गात् । तर्हि प्राक्तनकर्मवशादेवेति चेन्न । प्रागसज्जनिवादिनस्तव तदप्रसक्तेः । प्रत्यक्षप्रमाणवादी खलु भवान् प्रत्यक्षेणोपलभ्यमानस्यैतस्य गतिरुच्यतां तर्हि जीवादीनां प्राक्सद्भावमङ्गीकरिष्यामि सुखादिवैचित्र्यागतेर्गत्यन्तरमपश्यन्नित्यसद्वादिनं जीवजगतोः प्राक्सद्भावमङ्गीकारयितुं कर्ममोक्षशास्त्रयोर्मुमुक्षुप्रवृत्तिसिद्ध्यर्थं जीववत्कर्मणां तत्कृतसंसारस्य चानादित्वं बोधयितुमिदमाह—

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥

भूतग्राम इति । पूर्वकल्पेषु यो भूतग्रामः प्राणिवर्गो जातः सोऽय-

मेवावशोऽस्वतन्त्रः स्वयमविद्ययाऽस्मिताऽभिनिवेशपूर्वकं रागद्वेषाभ्यां कृतपुण्यापुण्यकर्माधीनः सन् तत्तत्कर्मफलानुभूत्यै कल्पे कल्पे भूत्वा भूत्वा तत्तत्फलमनुभूयानुभूय पुनः कृत्वा अहरागमे प्रभवति रात्र्यागमे प्रलीयते नश्यति च। एवं घटीयन्त्रवत्पुण्यापुण्यकर्मवेगेन पुनः पुनर्जायते म्रियते चाध्यात्मिकादिदुःखेन व्यथते तपति च न कदाचिज्जन्ममरणप्रवाहपारं गच्छतीत्यर्थः ॥ १९ ॥

यस्मादेवं विषयसुखमोहग्रहग्रस्तानां दुःखपरम्परा तस्मात् विवेकिभिर्यथा मत्प्राप्तिः स्यात्तथा प्रयतितव्यमिति सूचयन्, स्वं प्राप्तवतां संसारदुःखं पुनरावृत्तिश्च नास्तीति ज्ञापयितुं स्वस्याव्यक्ततत्कार्यलेशसंबन्धराहित्यं नित्यत्वं च प्रतिपादयति—

परस्तस्मात्तु भावोऽन्यो व्यक्तोऽव्यक्तात्सनातनः।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २० ॥

पर इति। तस्मात्पूर्वोक्तात्सर्वव्यक्तीनामुत्पत्तिप्रलयहेतोरव्यक्तात्त्वन्यो भिन्नो विलक्षणश्चाक्षराख्यो भावः परमात्मा स्वयमस्मादव्यक्तात् कारणाद्व्यक्ताच्च भिन्न एव भवति । न व्यज्यते प्रमाणैः सर्वैर्मातुं न शक्यत इत्यव्यक्तोऽप्रमेयश्च । ननु उभयोरप्यव्यक्तत्वाविशेषात्कथमेतस्य तद्विलक्षणत्वमित्यत आह—**पर इति**। परः प्रकृष्टोऽनुत्तम इत्यर्थः। 'अव्यक्तात्तु परः पुरुषः' इति श्रुतेः। ननु कस्माद्धेतोरक्षरस्याव्यक्तात्प्रकृष्टत्वमित्यत आह—**सनातन इति**। सनातनोऽनादिर्नित्य इत्यर्थः। नित्यत्वं नाम भावस्य जन्मादिविक्रियाऽनाश्रयत्वमेव। नैवैतदव्यक्तस्यास्ति सच्छब्दवाच्यमविद्याशबलं ब्रह्म ब्रह्मणो व्यक्तमित्यव्यक्तस्य प्रथमविकारत्वश्रवणाद्विकारित्वाऽवरत्वादिधर्मैरक्षरसालक्षण्यमनुपपन्नमित्यर्थः। यदुक्तमक्षरस्य नित्यत्वं तदेव विस्पष्टयति—**य इति**। यः सनातनोऽव्यक्तोऽक्षरः परमात्मा स सर्वेषु भूतेष्वव्यक्तमहदादिषु कालतो ज्ञानतो वा नश्यत्सु अभावं गतेषु सत्सु स्वतो वा परतो वा न विनश्यति। कदापि नाशं न प्राप्नोतीत्यर्थः ॥ २० ॥

एवं सत्त्वं चाक्षरस्य प्रतिपाद्याधुना यः सनातनो भावो व्यक्तः प्रतिपादितः स एवाक्षरः परमात्मेति तं प्राप्तानामपुनरावृत्तिं च प्रतिपादयति—

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ २१ ॥

अव्यक्त इति । यः परत्वसनातनत्वाविनाशित्वादिधर्मैरविद्याख्यादव्यक्तादन्यो व्यक्तोऽक्षर इत्युक्तमेवाक्षरं 'महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥' इत्यादिश्रुतयः परमां नित्यनिरतिशयाद्वितीयाखण्डचिदानन्दैकरसत्वादनुत्तमां गतिं ज्ञानेनैकेन गम्यत इति गतिस्तां परं तत्त्वमित्याहुर्वदन्ति, अतोऽक्षर एव नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दमद्वितीयं परं ब्रह्मेत्यर्थः । नन्वक्षर एवोक्तलक्षणं परं ब्रह्मास्तु तेन तव मम च किमित्याकाङ्क्षायाम् । स एव परमात्मा तं प्राप्तवतां न पुनरावृत्तिरस्तीति भावसिद्धये त्वादृशैः कृतिभिर्यत्यतामिति सूचयितुं त्वस्य याथात्म्यं च बोधयितुमाह—**यमिति ।** बहुजन्मसंचितपुण्यपुञ्जपरिपाकसंप्राप्तचित्तप्रसादमत्प्रसादपात्रीभूताः शमदमाद्युत्तमसाधनसंपन्ना धन्याः संन्यासिनः संततसमाधिनिष्ठाः संपादितसंसिद्धयः सन्तो यदक्षरं परं ब्रह्म प्राप्य पुनः संसाराय न निवर्तन्ते देहवन्तः पुनर्न भवन्ति, तदेवाक्षरं परं ब्रह्म मायोपाधिकस्य ममेश्वरस्य धाम अप्राकृतमबाधितमनाद्यन्तं प्रकाशात्मकं स्वरूपं नैजमित्यर्थः ॥ २१ ॥

परस्तस्मात्त्वित्यादिश्लोकद्वयेन स्वस्य परस्य ब्रह्मणः स्वरूपं तत्प्राप्तानामपुनरावृत्तिं च प्रतिपाद्याधुना कथं तत्प्राप्स्यामः केन वा साधनेन नियतेनेत्याकाङ्क्षावतां परिशुद्धात्मनां मोक्षैककामानां तत्प्राप्तौ परमसाधनमाह—

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥ २२ ॥

पुरुष इति । परः 'अव्यक्तात्तु परः पुरुषः' इति श्रवणात् सर्वोत्तमः पुरुषः बहिरन्तः सर्वत्रैकरसत्वेन पूर्णत्वात् पुरुषः सोऽक्षरः परमात्मा । अनन्यया न विद्यतेऽन्यः परमात्मातिरिक्तो विषयो यस्याः साऽनन्या सर्वत्र ब्रह्ममात्रग्राहिणी अहमिदंप्रत्ययनिर्मुक्ता तयान्यया भक्त्या सर्वमिदमहं च ब्रह्मैवेति भजति वेत्ति विद्वाननयेति भक्तिर्ज्ञानम् । भजतिरत्र ज्ञानार्थः । तुशब्दोऽवधारणार्थः । भक्त्या ज्ञानेनेवाचार्यप्रसादलब्धेन समाधिनिष्ठया शुद्धेन लभ्यः प्राप्तव्यः परमात्मा नतु कर्मणा योगेन सांख्येन च ब्रह्म प्राप्तुं शक्यमित्यर्थः । ननु परं ब्रह्माऽतिसूक्ष्ममतीन्द्रियं च कथं मुमुक्षुरिदमेवाहमिति ज्ञातुं शक्नुयादित्याकाङ्क्षायामाह—**यस्येति ।** यस्य निर्विशेषस्य परिपूर्णस्याऽद्वितीयस्य ब्रह्मणोऽन्तः-

स्थानि अन्तरन्तर्देशे नगरमिवाभासरूपेणेमानि भूतानि स्थितानि भवन्ति । यद्यपि दर्पणे नगरं स्थितमिव प्रतीयते तथापि सन्निहितदृष्ट्या सम्यग्विलोक्यमाने दर्पणमेवास्ति नतु तत्र नगरं स्वयं स्वरूपेण विद्यते। तद्वद्ब्रह्मण्यपि जगदस्तीव भाति । ज्ञानदृष्ट्याऽधिष्ठानग्राहिण्या परिशील्यमाने ब्रह्मैकमेवास्ति नतु तत्र जगत् । ननु यदुक्तं तत्सत्यमेव दर्पणे नगरं नास्तीति तथापि दर्पणस्य स्वच्छत्वात्तत्र प्रतीतेः पुरतो नगरमस्त्येव तद्वद्ब्रह्मणि स्वरूपेण जगतोऽभावोऽपि तत्र प्रतीत्यै तदन्यत्र जगदस्त्येवेति चेदस्त्येव ब्रह्मण्यद्वितीये जगत्कल्पयतः पुरुषस्य मलिनात्मनो बुद्धौ यथा स्वनेत्रस्थं पीतिमानं शङ्खे कल्पयति, यथा स्वबुद्धिस्थं प्रपञ्चं स्वप्ने कल्पयति, तथा पुरुषः स्वबुद्धिस्थमेव वासनामयं प्रपञ्चं निष्प्रपञ्चे ब्रह्मणि कल्पयति पश्यति च मूढः । नहि स्वप्ने स्वरूपेण जगदस्ति विना बौद्धं वासनामयं, तस्य सत्यत्वे बोधाभावप्रसङ्गात् । तद्वद्ब्रह्मण्यपि पुरुषान्तःकरणवासनाकल्पितमेव नामरूपात्मकमिदं जगत् नतु वस्तुतोऽस्ति तस्य सत्यत्वे नास्तीति निषेधायोगात् । यतः श्रुतिः 'अथात आदेशो नेतिनेत्यात्माऽगृह्यो नहि गृह्यते' इति चाऽरोपितं जगन्निषिध्यैव ब्रह्माधिगमयति । ततो वासनया प्रतीयमानं नामरूपात्मकं जगत्सर्वं मिथ्यैवेत्यधिष्ठानसंदर्शनसंजातविज्ञानेन नेदं जगत्किंतु ब्रह्मैवेत्यधिष्ठानमात्रत्वाविशेषं निषिध्य तन्निषेधावधिभूतं दर्पणवत्स्वच्छं वस्त्वन्तरशून्यं चिदेकरसं परं ब्रह्म इदमेवाहमिति शुद्धात्मना बुद्धिमता सद्गुर्वनुग्रहवता ज्ञातुं शक्यत एवेत्यभिप्रायेणोक्तं यस्यान्तःस्थानि भूतानीति। एवं ज्ञातुमशक्तस्य यतेरुपायान्तरमाह—**येनेति** । इदं परिदृश्यमानं जडं जगत्सर्वं येन प्रकाशैकरूपेण ब्रह्मणा ततं बहिरन्तश्च सर्वतो व्याप्तं प्रकाशितं च भवति । 'स पर्यगाच्छुक्रमकायम्' इति, 'तस्य भासा सर्वमिदं विभाति' इति च श्रुतेः । ततः प्रकाश्यस्य प्रकाशव्यतिरेकेण पृथक् स्वरूपाभावादग्निव्याप्तायःपिण्डादौ तद्दर्शनाद्ब्रह्मव्याप्तमिदं सर्वं ब्रह्मैवेति सर्वस्य ब्रह्ममात्रत्वविज्ञानेन स्वस्यापि ब्रह्ममात्रत्वं ज्ञातुं शक्यत एवेत्यर्थः ॥ २२ ॥

'पुरुषः स परः पार्थ' इति परस्य ब्रह्मणो ज्ञानैकप्राप्यत्वं उक्तलक्षणेन ज्ञानेन ब्रह्मभावापन्नानां यतीनां 'यं प्राप्य न निवर्तन्ते' इत्यपुनरावृत्तिलक्षणां विदेहमुक्तिं च तत्फलं प्रतिपाद्येदानीमुक्तप्रकारेण ब्रह्म ज्ञातुमशक्तानामशुद्धबुद्धीनां मुमुक्षूणां चित्तशुद्धये 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः' इति परापरयोर्ब्रह्मणोरुपास्तौ प्रण-

वस्य प्रतीकत्वं सूचयित्वा तत्र 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' इति श्रुत्युक्तरीत्या प्लुतेनोच्चार्यमाणे ॐकारे परब्रह्मबुद्धिं कृत्वा तमेव ब्रह्मेति ये ध्यायन्ति तेषां प्रणवावेशितब्रह्मबुद्धीनामन्येषां च 'तपःश्रद्धे ये ह्युपवसन्त्यरण्ये' इत्यादिश्रुत्युक्तसगुणोपासकानां क्रमेण विदेहमुक्तिं प्राप्स्यमानानां संन्यासयोगवतां प्रयाणकाले प्राप्ते तेषां का गतिरित्याकाङ्क्षायां 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्केति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयत्येष देवयानः पन्थाः' इति 'अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभि प्राप्नुवन्ति, मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति, तस्मिन् यावत्संपातमुषित्वाऽथैतमध्वानं पुनर्निवर्तन्ते' इति श्रुत्युक्तेनोत्तरायणेन ब्रह्मप्राप्तिरपुनरावृत्तिलक्षणेति बोधयितुमुत्तरायणं तद्व्यावृत्त्यर्थमित्थं कर्मिणां कर्मफलमिति सूचनार्थं च दक्षिणायनमपीति मार्गद्वयम् । तत्रैकेन गतानामपुनरावृत्तिमन्येन मार्गेण गतानां पुनरावृत्तिं च प्रतिपादयति—

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

यत्रेति । योगिन इत्यत्र योगिनः योगिनः इति जसि सरूपाणामेकशेषे कृते योगिन इति रूपसिद्धिः । तत्रैकेन योगिन इति पदेन संन्यासिन उच्यन्ते, द्वितीयेन तु कर्मिणः । कर्मिणां कर्मफलसंन्यासयोगाद्गौणवृत्त्या योगित्वम । योगिन उभयविधाः यत्र यस्मिन्काले प्रयाता मृताः सन्तः स्वयमनावृत्तिमावृत्तिं च यान्ति तं कालं वक्ष्यामि शृण्वित्यर्थः ॥ २३ ॥

योगिन इत्युभयविधानां योगिनां सामान्येनैकत्र मृतानामपुनरावृत्तिरन्यत्र मृतानां तु पुनरावृत्तिरित्यनियमेन परलोकप्राप्तौ सत्यामुभयेषां 'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते' इत्यादिश्रुतिबलात् 'क्रियाभेदात्फलभेदः' इति न्यायेन च नियतमयनविभागं दर्शयति—

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥

अग्निरिति । तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरित्यग्र्यनन्तरमहरेव श्रूयते नतु ज्योतिः कथमत्राग्निर्ज्योतिरिति श्रुतिविरुद्धमुच्यत इति शङ्कनीयम । अर्चिःशब्दस्याग्निज्योतिषोरुभयोरपि साधारण्यात् श्रुत्यार्चिरित्युक्तं तदेवात्र विभज्य दर्शितं ततो न कोऽपि विरोधः । अग्निरुत्तरायणकालाभिमानिनी देवता । ज्योतिश्च कालाभिमानिनी देवता । अहरित्यहरभिमानिनी देवता । शुक्लः शुक्लपक्षाभिमानिनी देवता । षण्मासा षण्मासाभिमानिनी देवता । संवत्सरादीनामुपलक्षणमेतत् । यत्रोत्तरायणकाले अग्न्यादयः कालाभिमानिनो भूत्वा तिष्ठन्ति तत्र तस्मिन्नुत्तरायणे प्रयाता मृताः सन्तो ब्रह्मविदः ब्रह्मोपास्यत्वेन ये विदुस्ते ब्रह्मविदो ब्रह्मोपासका योगिन उक्तक्रमेण ब्रह्म गच्छन्ति प्राप्नुवन्ति न साक्षात् । स तेजसि सूर्ये संपन्न इत्युक्त्वाऽनन्तरं 'परस्परं पुरुषमीक्षते' इति ब्रह्मप्राप्तेरन्तरालं श्रावयति श्रुतिः । सूर्य इत्यग्न्यादीनामुपलक्षणम् । तत उक्तक्रमेणैव योगिनो ब्रह्म प्राप्नुवन्तीत्यर्थः । ननु ब्रह्मविद इत्यविशेषश्रवणाद्योगिनामपि क्रममुक्तिरेवेति चेन्न । 'न तस्य प्राणा उत्क्रामन्ति' इति ज्ञानिनामुत्क्रमणाभावश्रवणात् । 'ब्रह्मैव सन् ब्रह्माप्येति' इत्यन्तरालाभावश्च श्रूयते । 'अत्र ब्रह्म समश्नुते' इत्यादिश्रुतिविरोधप्रसङ्गाच्च नाशङ्का कर्तव्या । अत्रोत्तरायणे कालाभिमानित्वेनाग्न्यादिदेवतानामुपन्यासः दक्षिणायने रात्र्यादौ मृतानामप्युपासकानामर्चिरादिमार्गेणैव ब्रह्मप्रापकत्वनियमार्थं ब्रह्मगन्तॄणां तत्तल्लोकेषु विश्रमार्थं तत्रत्यसुखानुभूत्यर्थं च । एवमन्यत्रापि द्रष्टव्यम् ॥ २४ ॥

कर्मिणः स्वकृतकर्मफलमारोहणावरोहणादुःखं श्रुत्वा विवेकवैराग्याभ्यां ब्रह्मवेदनसंपादनपरा भवन्त्विति बोधयितुं दक्षिणायनमृतानां फलमाह—

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५ ॥

धूम इति । धूमो धूमाभिमानिनी देवता । रात्रिः रात्र्यभिमानिनी देवता । कृष्णः कृष्णपक्षाभिमानिनी देवता । षण्मासाः षण्मासाभिमानिनी देवता । एताः यत्र दक्षिणायने कालाभिमानिन्यो भवन्ति तत्र दक्षिणायने प्रयातो मृतो योगी कर्मयोगी चान्द्रमसं लोकं

प्राप्य तत्र चान्द्रमसं चन्द्रमसः प्राप्तं ज्योतिरिष्टापूर्तादिपुण्यकर्मसंभवं फलं प्राप्यानुभूय । 'कृतात्ययेऽनुशयवान्' इति न्यायेन कर्मफलभोगसंक्षये शेषकर्मानुभूत्यै निवर्तते । तेनैव मार्गेण मानवं लोकं पुनरायाति पुनर्गच्छत्येवं यातायातदुःखमनन्तमहो कष्टमविवेकिनामिति सूचितं भवति ॥ २५ ॥

ननु कादाचित्कमेवैतद्दुःखं गृहिणामित्याशङ्कायामाह—

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्यया ऽऽवर्तते पुनः ॥ २६ ॥

शुक्लकृष्णे इति । शुक्लकृष्णे ज्ञानप्रकाशाधिकाग्न्यादिदेवताधिष्ठितत्वाद्विद्याप्राप्यत्वात् प्रकाशलोकभूयिष्ठत्वाद्ब्रह्मप्राप्तिहेतुत्वेनोत्कृष्टत्वाच्च देवयानलक्षणा गतिः शुक्ला भवति । अनतिप्रकाशदेवताधिष्ठितत्वात् धूमप्राचुर्यात् भूयः संसारहेतुत्वेन निकृष्टत्वाच्च पितृयानलक्षणा गतिः कृष्णा भवति । एवं शुक्लकृष्णे निर्मलमलिनस्वभावे एते पूर्वोक्ते गती मार्गौ जगतो लोकस्य । अत्र जगच्छब्देन ज्ञानकर्माधिकारिणो गृह्यन्ते न त्वन्ये केवलप्राकृतास्तेषां ज्ञानकर्मणोरनधिकारात्ततो ज्ञानकर्मस्वधिकारिणामेव मोक्षार्थं कर्मफलानुभूत्यर्थं च 'कर्मणा पितृलोको विद्यया देवलोकः' इत्यादिश्रुतिप्रसिद्धे एते पदव्यौ शाश्वते मते । जीवानामनादित्वान्नित्यत्वादनन्तत्वाच्च तेषां यावत्संसारस्तावत्पर्यन्तं स्वर्गसिद्ध्यै मोक्षसिद्धये च द्वावप्येतौ मार्गौ नित्यावेव भवत इत्यर्थः । एवं तयोर्नित्यत्वं प्रतिपाद्य चोभयोर्नियतं फलमाह—**एकयेति** । एतयोर्द्वयोर्गत्योर्मध्ये एकया गत्या शुक्लया विद्वाननावृत्तिं मुक्तिं याति न तु पुनरावर्तते । 'न च पुनरावर्तते' इति श्रुतेः । अन्यया गत्या कृष्णयाऽविद्वानावर्तते । 'प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम् । तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे' इति श्रुतेः । पुनर्जन्मादिसंसारायागच्छतीत्यर्थः ॥ २६ ॥

शुक्लाया गतेः फलं मोक्षः, कृष्णाया गतेः फलं बन्ध इति द्वयोर्गत्योः स्वरूपं फलं च कारणं च विदितवतो विदुषः प्रमादोऽत्र न कर्तव्य इति सूचयितुमाह—

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥

नैते इति । एते निरुक्तलक्षणोत्तरायणदक्षिणायनसंज्ञिके सृती

पदव्यौ जानन् श्रुतिस्मृतियुक्तिभिस्तयोर्बन्धमोक्षकारणत्वं सम्यग् जानन् कश्चन कश्चिदपि योगी मोक्षेच्छया योगनिष्ठायां प्रवृत्तो हंसो वा परमहंसो वा मुमुक्षुर्न मुह्यति । मोहो नाम मोक्षमार्गविरोधिमार्गस्मरणम् । प्रमादेनापि तदवलम्बनं च न करोति । क्वचिदपि योगनिष्ठायां प्रमत्तो न भवेदित्यर्थः । यस्मादेतयोर्गत्योर्बन्धमोक्षहेतुत्वं प्रसिद्धं तस्मात्त्वं मुमुक्षुश्चेत् सर्वेषु कालेष्वाहारशयनासनादिष्वपि सर्वदा योगयुक्तो भव । ब्रह्मानुसंधानमेव कुरु न क्वचिदपि बाह्यानुसंधानमित्यर्थः ॥ २७ ॥

एवमुत्तरायणं दक्षिणायनं च योगिभिः कर्मिभिश्च गम्यं मार्गद्वयं तत्र गन्तॄणां योगिनां कर्मयोगिनां च फलं सम्यक् प्रतिपाद्याऽधुना सगुणब्रह्मोपासकस्यार्चिरादिलोके प्राप्यं सुखं ब्रह्मप्राप्तिं च विस्पष्टयति—

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥२८॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे महापुरुषयोगो नामाष्टमोऽध्यायः ॥ ८ ॥

वेदेष्विति । वेदेषु ऋगादिषु साङ्गेषु सलक्षणेष्वध्ययनविध्युक्तनियमेन सम्यगधीतेषु सत्सु यज्ञेष्वाधानाद्यश्वमेधान्तेषु यागेषु साद्गुण्येन साङ्गोपाङ्गं सम्यगनुष्ठितेषु तपःसु कृच्छ्रचान्द्रायणादिष्ववैकल्येन सम्यगाचरितेषु दानेषु कन्यागवाश्वादिविषयेषु यथोक्तदेशकालपात्रादिसंपत्त्या सम्यक्कृतेषु सत्सु तत्कर्तॄणां यत्पुण्यफलं यद्यदूर्ध्वलोकेषु भोक्तव्यं सुखं शास्त्रे प्रदिष्टं निर्दिष्टं तत्सर्वमपि इदम् 'अक्षरं ब्रह्म परमम्' इत्यादिना निरूपितमध्यात्मकर्माधिभूताधिदैवाधियज्ञादिभेदनिर्मुक्तं ब्रह्मप्रणवालम्बनं वा विदित्वा श्रद्धाभक्तिभ्यामजस्रं सम्यगुपास्य योगी सगुणब्रह्मोपासकः स्वयमग्न्यादिब्रह्मभुवनान्तेषु लोकेषु गमनकाले स्थाने स्थाने सम्यगग्न्यादिभिः पूज्यमानः सन्, पूर्वोक्तं सुखमत्येति ततोऽप्यतिशयेन प्राप्नोति । नैतावन्मात्रमेव फलं ब्रह्मोपास्तेः किंतु स्थानं सर्वाधिष्ठानमाद्यं सर्वकारणं परं ब्रह्मोपैति प्राप्नोति । मुक्तिं च गच्छतीत्यर्थः ॥ २८ ॥

इति श्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यामष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः ।

मन्दबुद्धेश्चित्तशुद्ध्यर्थं योगमार्गेण ब्रह्मप्राप्त्यर्थं चाध्यात्मादिभेदरहितमक्षरशब्दवाच्यं ब्रह्मोपास्यत्वेनोपदिश्य तदुपासकस्य योगिनोऽर्चिरादिमार्गेण गमनं ब्रह्मप्राप्तिं चाष्टमे प्रतिपाद्येदानीं मुमुक्षूणामनेनैव मार्गेण मोक्षप्राप्तिर्नान्यथेति प्राप्तामाशङ्कां निवर्तयितुमधिकारिणां शुद्धबुद्धीनामिहैव मोक्षसिद्ध्यर्थं च साक्षात् मोक्षकारणं परब्रह्मविषयं ज्ञानं विज्ञानं च ब्रह्मस्वरूपं च परस्य ब्रह्मणः प्रकृतिकर्तृकेषु सृष्ट्यादिषु साक्षित्वासङ्गत्वोदासीनत्वादिधर्मांश्चोपासनाप्रकारभेदांश्च स्वस्य सार्वात्म्यं चान्यच्च प्रतिपादयितुं नवमाध्याय आरभ्यते। तत्रादावपृष्टोऽपि भक्तेषु दयाविष्टचित्ततया स्वयमेव ज्ञानं विज्ञानं तन्माहात्म्यं च प्रतिपादयितुं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥

इदमिति । 'परस्तस्मात्तु भावोऽन्यः' इति, 'पुरुषः स परः पार्थ' इत्युपान्त्याऽध्याये निरूपितनिर्विशेषब्रह्मणः सन्निहितत्वात्तद्विषयत्वेन भक्तानुग्रहेच्छावेगात् बुद्ध्यारूढत्वेन च इदमितीदमा प्रत्यक्षेण ज्ञानं निर्दिष्टम् । तुशब्दो ब्रह्मज्ञानस्य यमनियमादिक्लेशरहितत्वात्साक्षान्मोक्षैकसाधनत्वाच्च सगुणज्ञानाद्विशिष्टत्वद्योतनार्थः । यतः सगुणं ज्ञानं ज्ञातृज्ञेयादिभेदमेव संपाद्यानर्थायैव भवन्ति नतु पुरुषार्थाय 'येऽन्यथातो विदुरन्यराजानस्तेऽक्षय्यलोका भवन्ति' इति ब्रह्मणस्तेषां च भेदं पश्यतामविदुषामीश्वराधीनत्वं जन्मादिबन्धं च ब्रवीति श्रुतिः । इदं तु 'ब्रह्म वेद ब्रह्मैव भवति' इति श्रवणाद्ब्रह्मप्राप्तय एव भवत्यतः सगुणज्ञानात् बन्धकाद्ब्रह्मज्ञानस्योत्पत्त्युत्तरक्षण एव मोक्षहेतोरुत्कृष्टत्वं सूच्यत इत्यर्थः। तुशब्देनोक्तमुत्कृष्टत्वमेव विस्पष्टयति—**विज्ञानसहितमिति** । विज्ञानं नामाऽपरोक्षानुभवः 'ब्रह्मैवेदं सर्वं', 'अहं ब्रह्मास्मि' इत्यादिश्रुत्युक्तरीत्या सर्वस्य स्वस्य च प्रत्यक्षेण ब्रह्ममात्रत्ववेदनं नतु पाताले सूर्यग्रहणमितिवत्तटस्थार्थावबोधनम् । निरुक्तलक्षणविज्ञानसहितं ज्ञानं साक्षान्मोक्षकारणम् । तत एव ब्रह्मज्ञानं विशेषयति—**गुह्यतममिति** । कायसिद्ध्यष्टैश्वर्यसिद्ध्यादियोगचर्याणां यानि रहस्यानि मन्त्रयन्त्रौषधानि तेभ्यः सर्वेभ्यो गुह्येभ्य उत्कृष्टं गुह्यतमम् । परमरहस्यमित्यर्थः । तत एव यस्मै कस्मै चायोग्याय दुर्गुणिने न देयं, किंतु शुद्धात्मन एवेति सूचयितु-

माह—**अनसूयव इति**। परगुणेषु दोषाविष्करणमसूया। सेयं कामक्रोधलोभमोहेर्ष्यादीनामुपलक्षणम्। असूयादिदुर्गुणा यस्य न सन्ति सोऽनसूयुस्तस्मै अनसूयवे सद्गुणाय शिष्याय ते तुभ्यमिदं ज्ञानं प्रवक्ष्यामि। सम्यगुपदेक्ष्यामीत्यर्थः। नन्विदं ज्ञानं प्राप्तवतो मम किं स्यादित्यत आह—**यदिति**। तीव्रमोक्षेच्छावैराग्यशमदमाद्युत्तमसाधनसंपन्नः सन् त्वं मयोच्यमानमुक्तविशेषणविशिष्टं यज्ज्ञानं ब्रह्मात्मैकत्वविषयं ज्ञात्वा प्राप्यानेनाधिगतात्मस्वरूपः सन्। अशुभादनाद्यविद्यासंभावितसंसारदुःखप्रवाहान्मोक्ष्यसे मुक्तो भूत्वाऽखण्डानन्दैकरसब्रह्मात्मना सुखं स्थास्यसीत्यर्थः॥ १॥

उक्तस्यैव ज्ञानस्य जिग्राहयिषया माहात्म्यं प्रतिपादयति—

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्॥ २॥

राजविद्येति। राजविद्या विद्या ज्ञानानि सकलवेदशास्त्राध्ययनसमुत्पन्नानीहलोकपरलोकसाधनानि यानि तानि सर्वाणि पुंसः संसारवर्धकान्येव भवन्ति नतु निवर्तकानि। ब्रह्मविद्या तु स्वोत्पत्तिमात्रेण विदुषो ब्रह्मतां गमयित्वा सकारणं संसारं निःशेषं निवर्तयति। यथा प्रबोधः स्वाप्नं संसारं तद्दुःखं च तथा। ततः सर्वासां विद्यानां राजा श्रेष्ठो भवत्यत उच्यते राजविद्येति। यद्वा सर्वा विद्याः शास्त्रजन्याः सम्यगहंकारं वर्धयित्वाऽऽत्मतत्त्वं तिरोहितं कुर्वन्ति। इयं तु 'स आत्मा तत्त्वमसि' इत्युपनिषद्वाक्यश्रवणमात्रेण संजाता सत्यऽनात्मन्यहंकारं नाशयित्वा सर्वसंसारधर्मनिर्मुक्तमात्मतत्त्वं राजयति प्रकाशयतीति राज्ञी सा चासौ विद्या च राजविद्या। राजगुह्यं च गुह्याः संवरणीया मन्त्रयन्त्रदिव्यौषधादयः पदार्था वाऽमूल्या रत्नादयस्तेषां सर्वेषां राजाऽतिरहस्यत्वेन गोपनीयत्वाद्राजगुह्यम्। राजवत्संवरणीयत्वाद्वा राजगुह्यम्। किंच पवित्रं पुनातीति पवित्रं तत्रापीदं ब्रह्मज्ञानमनुत्तमं पवित्रं सूर्यानलानिलादयो देवा ऋगादयो वेदा गङ्गाद्याः सरितश्च प्रायश्चित्तान्यप्यशेषाणि भजतां नरकदुःखकारणं पापमेव नाशयन्ति, तच्चापि तात्कालिकमेव पापं नतु पुण्यम्। इदं ब्रह्मज्ञानं तु 'तदा विद्वान् पुण्यपापे विधूय' इति श्रवणाच्छतकोटिब्रह्मकल्पार्जितं पापराशिं पुण्यराशिं च बहुजन्ममरणतद्दुःखप्रवाहकारणं तूलपर्वतानग्निरिव ध्वान्तपटलमर्क इव समूलं निर्मूल्य ब्रह्मविदं निष्कर्माणं करोत्यतो ब्रह्मज्ञानमेव ब्रह्मविष्णुशिवादीनामर्कादीनां च पावकत्वादुत्कृष्टतमं पवित्रं शुद्धिकरं वस्त्वित्यर्थः। ज्ञानस्यैतन्माहात्म्यं शास्त्रैक-

गम्यं वा प्रमाणान्तरगम्यं वा कालान्तरगम्यं वेत्याकाङ्क्षायां सूर्यस्य कार्येण सह गाढान्धकारविध्वंसकत्वं न केवलशास्त्रैकगम्यं किंतु प्रत्यक्षावगम्यं च यथा तथा ज्ञानस्यापीत्याह—**प्रत्यक्षावगममिति**। अवगम्यतेऽनेनेत्यवगमं प्रमाणं तत्तु प्रत्यक्षं वैदुष्यं प्रत्यक्षमवगमं यस्य तत्प्रत्यक्षावगमं ज्ञानमाहात्म्यं विद्वत्प्रत्यक्षमित्यर्थः। यद्वा अवगम्यतेऽनुभूयत इत्यवगमः फलं प्रत्यक्षोऽवगमो यस्य तत्प्रत्यक्षावगमं भोजनादिसुखवत् सद्यः प्रत्यक्षं ज्ञानफलं नतु धर्मादिफलवत्परोक्षमित्यर्थः। धर्म्यं च मुमुक्षोर्धर्मवदर्हतीति धर्म्यं सर्वेषामाश्रमिणां स्वधर्मानुकूलमेव ज्ञानं नतु धर्मविरोधीत्यर्थः। यद्यपि गृहिणो धर्म्य एव चयनः सर्वतो मखादिक्रतुस्तस्यापि तस्य श्रमसाध्यत्वमस्ति न तथा ज्ञानस्येत्याह—**सुसुखमिति**। सुतरां देहेन्द्रियादिश्रमं विनैव तत्त्वज्ञप्रसादाद्रत्नादिज्ञानमिव ब्रह्मज्ञानमपि बुद्ध्यारूढं कर्तुं सुखमनायासमेव शुद्धात्मनां सुसंपादमित्यर्थः। ननु कटिकण्डूयनवज्ज्ञानस्याल्पक्रियासाध्यत्वे फलस्याप्यल्पत्वमेव स्यात् क्रियाभूयस्त्वे फलभूयस्त्वं क्रियाल्पीयस्त्वे फलस्याप्यल्पीयस्त्वं सर्वप्रसिद्धमित्याशङ्कायाम। न। अल्पीयस्या अपि चन्द्रालोकनक्रियायास्तद्दर्शिनस्तदाह्लादसुखस्य महत्त्वदर्शनात्तद्वज्ज्ञानस्याल्पक्रियासाध्यत्वेऽपि फलतो महत्त्वमस्तीत्याह—**अव्ययमिति**। फलतो न व्येतीत्यव्ययमव्ययफलम्। 'नह्यध्रुवैः प्राप्यते हि ध्रुवं तत्' इति ज्ञानप्राप्तस्य वस्तुनो ध्रुवत्वश्रवणात् ज्ञानस्याऽश्रमसाध्यत्वेऽप्यस्त्येव नित्यफलजनकत्वमित्यर्थः। ज्ञानस्य मोक्षसाधनत्वे बाधकप्रमाणाभावाद्वाऽव्ययमित्युक्तम् ॥ २ ॥

एवं ज्ञानस्यानायाससाध्यत्वमव्ययफलजनकत्वं च प्रतिपाद्य निःशेषसंसारदुःखध्वान्तविध्वंसनकारणे ज्ञाने रविवदप्रयासलभ्ये विद्यमानेऽप्यन्धवदश्रद्धया मुक्तिमार्गमुत्सृज्य कामनया कर्मोपास्त्यादौ प्रवृत्तान्पुरुषान्दृष्ट्वा क्रोशन्निव दययेदमाह—

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ३ ॥

अश्रद्दधाना इति। अस्योक्तगुणविशेषविशिष्टस्य धर्मस्याविद्यया जननमरणप्रवाहे पात्यमानाः पुरुषा ध्रियन्तेऽनेनेति धर्मो ज्ञानं तस्य मोक्षैकहेतोर्ज्ञानस्य स्वरूपे तत्फले मोक्षे च अश्रद्दधानाः श्रद्धा नाम कृतिहेतुः फलाध्यवसान आस्थाविशेषस्तच्छून्या दुर्विदग्धाः पुरुषा दुष्कर्मणा मोक्षे मोक्षसाधने ज्ञाने च श्रद्धाभक्तिप्रयत्नरहिताः सन्तो मामप्राप्य मामात्मानमानन्दैकरसं हस्तगतं मोक्षाख्यं फलमुत्सृज्य मृत्यु-

संसारवर्त्मनि मृत्युभूयिष्ठः संसारो मृत्युसंसारः नानायोनिषु नरके च पुनः-पुनः पतनलक्षणस्तदेव वर्त्म तस्मिन्नेव निवर्तन्ते नितरां वर्तन्ते मुहुर्मुहुर्जायन्ते म्रियन्ते अहो बत दौर्विदग्ध्यमपारदुःखकारणम्। एतेन निरुक्तमहत्त्वविशिष्टात्मज्ञाने धर्मे ये यतयः श्रद्धावन्तो निष्ठावन्तश्च भवन्ति त एव मुक्ता भवन्तीति सूचितं भवति॥ ३॥

एवं ज्ञानस्य सर्वोत्तमत्वं सुलभत्वं दुर्भगालभ्यत्वं च प्रतिपाद्य 'परस्तस्मात्तु भावोऽन्य' इति, 'यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्' इति पूर्वं यदुक्तं तदिदानीं परस्य ब्रह्मणः स्वरूपं ज्ञानं विज्ञानं च सार्धश्लोकेन प्रतिपादयति—

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥ ४॥

मयेति। न केनापि प्रमाणेन व्यज्यते बोध्यत इत्यव्यक्ताऽप्रमेया मूर्तिः स्वरूपं यस्य सोऽव्यक्तमूर्तिः। ननु न केनापि प्रमाणेन बोध्यत इति यदुक्तं तन्न 'तं त्वौपनिषदम्' इति श्रवणाद् ब्रह्मणः श्रुतिबोध्यत्वमस्त्येवेति चेन्न। श्रुतेरप्यगोचरत्वात्तद्बोधकत्वानुपपत्तेः। श्रुतिः खलु 'अस्थूलम्' इत्यादिना सर्वदृश्यनिषेधं कृत्वा यन्निषेधाविषयं सर्वदृश्यविलक्षणं तद्ब्रह्मेति बोधयति नतु साक्षादिदमिति। ननु 'सत्यं ज्ञानम्' इति 'आनन्दो ब्रह्म' इति च श्रुतिः सत्यादिस्वरूपं ब्रह्मेति बोधयत्येवेति चेन्न। तस्याः श्रुतेर्ब्रह्मणस्त्वसद्वैलक्षण्यप्रतिपादनपरत्वाज्जगतः सकारणस्यानृतजडदुःखात्मकस्य प्रत्यक्षत्वादर्थात्सिद्धं तद्वैलक्षण्यं ब्रह्मणस्तदेव श्रुत्याप्यसद्वैलक्षण्यमुपदेष्टुं 'सत्यं ज्ञानमनन्तं ब्रह्म' 'आनन्दो ब्रह्म' इत्युक्तं नतु साक्षादिदमित्युपदिश्यते। वाग्रूपत्वाच्छ्रुतेस्तद्वृत्तेरविषयत्वाद्ब्रह्मणः ततः सिद्धं सर्वप्रमाणाव्यज्यत्वं तेनाव्यक्तमूर्तिना निर्विशेषेण मया ब्रह्मणा सर्वमिदं जगत्ततं व्याप्तं यथा रूपवद्द्रव्यं जडं सर्वं सर्वत्र सूर्यालोकव्याप्तमेव सच्चक्षुर्ग्राह्यत्वमापद्यते नत्वव्याप्तम्, तद्वन्मया चिदेकस्वरूपेण बहिरन्तः सर्वतो व्याप्तमेव सज्जगत्सर्वं सर्वकरणव्यवहार्यत्वमापद्यते नत्वव्याप्तं स्वतो निरात्मकत्वादप्रकाशत्वाच्च। 'तस्य भासा सर्वमिदं विभाति' इति श्रुतेस्ततः सर्वमिदं जगन्मया सर्वतो व्याप्य प्रकाश्यत इत्यर्थः। एतेन सर्वजगत्प्रकाशकं यत्तद्ब्रह्मेति ज्ञानमुपदिष्टं भवति। किंच सर्वभूतानि सर्वाण्यव्यक्तमहदादीनि स्थूलान्तानि भूतानि चराणि स्थावराणि च सर्वाणि मत्स्थानि मय्यव्यक्तमूर्तौ तिष्ठन्तीति मत्स्थानीत्युच्यते। यथा तोये तरङ्गबुद्बुदादयस्तोयसत्तया सत्तावन्तो भूत्वा तोये तिष्ठन्ति

यथा वा नगरनिवासिनो दर्पणसत्तया सत्तावन्तो भूत्वा दर्पणे तिष्ठन्ति तथा सर्वाणि भूतानि मत्सत्तया सत्तां प्राप्य मयि तिष्ठन्तीत्यर्थः। 'सदायतनाः सत्प्रतिष्ठाः' इति श्रुतेः। एतेन सर्वभूताधारं यत्तद्ब्रह्मेति ज्ञानमुपदिष्टं भवति। 'परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः' इत्यत्राव्यक्तात्परमात्मा पर उत्कृष्ट इति यदुक्तं स्वस्योत्कृष्टत्वव्यक्तस्य तु निकृष्टत्वं तदेव पुनर्विस्पष्टयितुमव्यक्तस्य सकार्यस्य व्याप्यत्वेनाधेयत्वेन च निकृष्टत्वं स्वस्य व्यापकत्वेनाधारत्वेन चोत्कृष्टत्वं दर्शयित्वा, इदानीमेवं व्याप्यव्यापकभावेनाधाराधेयभावेन च भेदेऽङ्गीक्रियमाणे भेदस्य यथार्थत्वं भेददर्शिनां मुमुक्षूणां मोक्षाभावश्चाद्वैतश्रुतिविरोधश्च प्रसज्यत इति तं परिहर्तुं 'अथात आदेशो नेति नेति', 'न सन्नासन्न सदसत्' इत्यादिश्रुतिप्रसिद्धं सर्वदृश्यनिषेधं करोति ब्रह्मणोऽद्वितीयत्वसिद्धये—

न चाहमित्यादिना। चकारोऽवधारणार्थः। तेष्वव्यक्तादिस्थूलान्तेषु भूतेषु ब्रह्मादिस्तम्बपर्यन्तेषु कूटस्थाऽसङ्गचिद्रूपः परमात्माहमन्तःप्रविश्यात्मरूपेण वा व्यापकत्वेन वा नैवावस्थितोऽस्मि। गृहे वायुरिव बिले सर्प इवायःपिण्डोऽग्निरिवाहं विकारीव तेषु भूतेषु प्रविश्य व्याप्य वा नैव तिष्ठामीत्यर्थः। विकारिणः खलु वाय्वग्न्यादेर्गृहायःपिण्डादौ प्रवेशो व्याप्तिश्चोपपद्यते नत्वविकारिणो निरवयवस्याऽसङ्गस्याक्रियस्य मम परिपूर्णस्योपपद्यते यथाकाशस्य तथा। ननु घटाकाश इत्यत्र यथाऽऽकाशस्य घटे प्रविश्य स्थितिरुपयुज्यते तद्वद्भूतेषु तवाप्यस्त्विति चेन्न। आकाशस्यापि घटान्तःप्रवेशकल्पना भ्रम एव निरवयवस्य चलनासंभवात्। ननु 'तत्सृष्ट्वा तदेवानुप्राविशत्' इत्यादिश्रुतिभिर्ब्रह्मणो भूतेषु प्रवेश उच्यत इति चेन्न। तस्याभासविषयत्वान्न ब्रह्मविषयत्वोपपत्तिः 'निष्कलं निष्क्रियम्' इति 'असङ्गो नहि सज्यते', 'आकाशवत्सर्वगतः' इति 'पूर्णमदः' इति च ब्रह्मणो निरवयवत्वनिष्क्रियत्वाऽसङ्गत्वपूर्णत्वश्रवणात्प्रवेशक्रिया वा व्यापनक्रिया वा संयोगो वान्यद्वा संभावयितुं न शक्यते ततस्तेषु प्रविश्याहं नैव स्थित इति सिद्धम्॥ ४॥

नन्वविक्रियस्य पूर्णस्य तव परस्य ब्रह्मणो भूतेष्ववस्थितिर्व्याप्तिश्च मास्तु भूतानि तु त्वयि तिष्ठन्त्येवेत्याशङ्कायामाह—

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥ ५॥

न च मत्स्थानीति। मय्यव्यक्तमूर्तौ चिदेकरसे परिपूर्णे ब्रह्मणि भूतान्यव्यक्तादिस्थूलान्तानि सकार्याणि स्थितानि च न भवन्ति। भूतेषु

च यथा नाहं तथा मयि च भूतानि न सन्तीत्यर्थः। ननु 'सर्वभूतनिवासोऽसि' इति तव सर्वभूताश्रयत्वं स्मर्यते कथं नच मत्स्थानि भूतानीत्युच्यत इति चेद्भवानत्र प्रष्टव्यः। निष्कले निराकारे निर्विशेषे परिपूर्णे ब्रह्मणि किं भूतानि संयोगसंबन्धेन तिष्ठन्ति किं समवायसंबन्धेन वा उत तादात्म्यसंबन्धेन वा तिष्ठन्ति। आद्ये भूतानां ब्रह्मणश्च संयोगः सर्वतो वा उतैकदेशेन वा। नाद्यः। परिच्छिन्नानामपरिच्छिन्नेन सर्वतः संयोगायोगात्। न द्वितीयः। निरवयवस्य देशकल्पनाऽसंभवात्। परमाणौ द्व्यणुकवत्तिष्ठन्त्विति चेन्न। निरवयवसावयवयोः संयोगानुपपत्तेः। नापि समवायः। भूतानां ब्रह्मणश्चाऽयुतसिद्धत्वाभावात्। समवायासिद्धेः। नापि तृतीयः। जडाजडयोस्तादात्म्यासंभवात्। तर्हि कः संबन्ध इति चेदध्याससंबन्ध इति ब्रूमः। ततो यत्र यदध्यस्तं तत्र तन्नाममात्रमेव भवति नतु वस्तुतोऽस्ति शुक्तिकारजतादौ तद्दर्शनात्, यत एवं ततो मयि परिपूर्णे परे ब्रह्मणि निर्विशेषे भूतानि न सन्त्येव, भूतसद्भावे तत्कृतपरिच्छित्त्या पूर्णत्वाऽसंभवात् 'पूर्णमदः पूर्णमिदम्' इति श्रुत्या ब्रह्मणः पूर्णत्वमेवोच्यते। 'तदेतद्ब्रह्माऽपूर्वमनपरमनन्तरमबाह्यम्' इति, 'एकमेवाऽद्वितीयं ब्रह्म' इति, 'एक इव हि रुद्रो न द्वितीयाय तस्थुः' इत्यादि श्रुतिशतैर्ब्रह्मणोऽद्वितीयत्वं नियमेन प्रतिपाद्यते। यस्मान्मयि निष्कले निष्क्रिये निःसङ्गे निरन्तरे निराश्रये निर्विशेषे परिपूर्णे 'नेह नानास्ति किंचन' इत्यादिश्रुतिप्रमाणकः प्रपञ्चाभावः प्रतिपादितस्तस्मान्मे मम पारमार्थिकमप्राकृतमैश्वरं ब्राह्मं योगं युज्यते ज्ञानेन प्राप्यत इति योगं स्वरूपं सद्घनं चिद्घनमानन्दघनमद्वितीयं पश्य इदमेवाहमिति स्वात्मना पश्य। सदिदं ब्रह्मैवाहमिति स्वं ब्रह्मैव विद्धीत्यर्थः। ननु 'नेति नेती'ति सर्वदृश्यनिषेधे कृते तन्निषेधावधित्वेन जगदभाव एवावशिष्यते तत्र किमस्तीदं ब्रह्मैवाहमस्मीति विज्ञानमिति चेत्। सत्यम्। प्रपञ्चाभावोऽत्र प्रतीयते तथापि श्रूयतामत्रोच्यते—दृश्यप्रपञ्चो येन भास्यमानो यदात्मना यत्र तिष्ठति तदभावोऽपि तेनैव भास्यमानस्तदात्मना तत्रैव तिष्ठति नान्यथा, ततो जगत्तदभावयोः स्वरूपभूतं तदवभासकं तदधिष्ठानं निर्विशेषं निर्विकल्पं यद्ब्रह्मेति सूक्ष्मबुद्धिभिर्युक्तिकुशलैरवबुध्यतां तदिदं ब्रह्मस्वरूपं स्वापरोक्षं स्वेनैवं वेद्यं स्वारोग्यवत्तत एव भगवानपि नच मत्स्थानि भूतानीति स्वस्मिन्नारोपितभूतजातं सर्वं निषिध्य तदवधित्वेन स्वमवशेषयति—**पश्य मे योगमैश्वरमिति।** सर्वदृश्यनिषेधावधिभूतं तदभावावभासकं स्वं परं ब्रह्म सर्वे मुमुक्षवः

शुद्धात्मानः स्वात्मना विजानन्त्विति । एतेन सर्वदृश्यनिषेधावधिलक्षणं सर्वाधिष्ठानं निर्विशेषं प्रज्ञानैकरसं यत्परं ब्रह्म तदेवाहमिति वेदनमेव विज्ञानमिति सूचितं भवति । ननु 'सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति, 'सर्वभूतनिवासोऽसि' इति च ब्रह्मणः सर्वभूताधारत्वं श्रयते स्मर्यते च कथं 'न च मत्स्थानि भूतानि' इत्युच्यते इति चेत् । सत्यम् । श्रुत्या स्मृत्या चोच्यते मम सर्वभूताश्रयत्वं तथापि न तत्पारमार्थिकम्, किंतु मायाविलसनमाश्रित्योच्यते लोकदृष्ट्या तत्तु मयाप्यङ्गीक्रियत एवेत्याशयेनाह सार्धेन—**भूतभृदिति** । अर्जुनः स्वयमयमेव साक्षात्परमेश्वर इति मयीश्वरत्वबुद्धिमत्त्वादहमात्मेत्युक्ते मद्देह एव परमात्मत्वबुद्धिं कुर्यादिति श्रीभगवानात्मशब्दार्थं स्वदेहाद्विभज्य भिन्नत्वेन निर्दिशति—**ममात्मेति** । अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वयानन्दः परः प्रत्यगेकरस इत्यादिश्रुत्युक्तो ममास्येश्वरत्वाभिमानिन आत्माऽव्यक्तमूर्तिः प्रत्यग्लक्षणो भूतभावनः भूतान्याकाशादीनि पृथिव्यन्तानि सकार्याणि सर्वाणि भावयति स्वसत्तया स्वप्रकाशेन सत्तावन्ति प्रकाशवन्ति च करोतीति भूतभावनः सन् भूतभृत् स्वस्मिन्नारोपितानि भूतानि स्वसत्तया स्वमात्राणि बिभर्ति दधातीति भूतभृदेव भवति । चकारस्त्वर्थः । ननु भूतस्थः भूतेष्वात्मरूपेणाभिमानितया न तिष्ठतीति न भूतस्थ इत्युच्यते । आत्मनो भूतस्थत्वे 'विशेषणनाशाद्विशिष्टस्यापि नाशः' इति न्यायेन भूतनाशात् स्वस्यापि नाशकथाप्रसङ्गात् तदीयकर्तृत्वभोक्तृत्वादिधर्मानुषङ्गश्च स्यादत उच्यते नच भूतस्थ इति । नन्वात्मनो भूतस्थत्वाभावे तैः परिच्छित्तिः स्यादिति चेन्न । नभसि नीलिमवन्मयि कल्पितत्वात्तेषां स्वतः सत्ताभावात् । परिच्छेदकत्वानुपपत्तेः । यद्वा अधिष्ठानव्यतिरेकेण भूतानां पृथक्स्वरूपाभावात् स्वमात्रेषु तेषु न पुनः स्थातव्यमित्युच्यते नच भूतस्थ इति । तेन सिद्धं भूतान्येव मयि मरौ जलमिव व्योम्नि नैल्यमिव तिष्ठन्ति नतु भूतेष्वहमिति ॥ ५ ॥

ननु महान्ति खल्वाकाशादिभूतानि तेषां महतां सकार्याणां त्वय्यवस्थानं कथमुपपद्यत इत्याशङ्कायां 'स दिवो ज्यायानन्तरिक्षाज्ज्यायान्' इति, 'एतावानस्य महिमाऽतो ज्यायांश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि' इति श्रुति श्रवणात् बृहत्तमे मयि परे ब्रह्मणि चन्द्रे नीलिमवदेकदेश एवाव्यक्तादीनि भूतानि तिष्ठन्तीति सदृष्टान्तमुपपादयति—

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥ ६॥

यथेत्यादिना। सर्वत्रग आकाशमस्पृश्यैव स्वयं सर्वत्र गच्छत्याविर्भावं तिरोभावं च भजन् सर्वश्रेष्ठत इति सर्वत्रगो महान् महत्परिमाणवान् वायुराकाशे भूताकाशे नित्यं सदा यथा स्थितो भवति। तथा सर्वाणि भूतानि महदादिस्थूलान्तानि मत्स्थानि मयि परिपूर्णे निष्क्रिये निराकारे निरन्तरे परे ब्रह्मणि तिष्ठन्तीति मत्स्थानीत्येवोपधारय, अवधारयेत्यर्थः॥ ६॥

एवं सर्वेषामपि भूतानामाकाशे वायुवत् स्वस्मिन्नेव स्थितिमुक्त्वा स्वस्मिन्नेव लयमुत्पत्तिं चाह—

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्॥ ७॥

सर्वभूतानीति। अव्यक्ताद्व्यक्तय इति यत् पूर्वमुक्तं भूतानां प्रलयादिकं तत्तु दैनंदिनम्। इदानीं प्राकृतप्रलयाद्युच्यते। यानि मत्स्थानि तान्येव सर्वाणि भूतान्याकाशादीनि कल्पक्षये कल्पो ब्रह्मकल्पस्तस्य क्षये सति ब्रह्मप्रलये प्राप्ते सति मामिकां मदीयामपराख्यां प्रकृतिं त्रिगुणात्मिकां मायां 'मायां तु प्रकृतिं विद्यात्' इति श्रुतिप्रसिद्ध' यान्ति। स्वोत्पत्तिव्युत्क्रमेण प्रकृतौ प्रलीयन्ते इत्यर्थः। प्रकृतौ यानि लयं गतानि तान्येव भूतानि कल्पादौ ब्रह्मकल्पादौ पुनरप्यहं विसृजामि। स्वप्रकृतिद्वारा यथाक्रमं यथालक्षणं च जगदुत्पादयामीत्यर्थः॥७॥

'य एको वर्णो बहुधा शक्तियोगाद्वर्णाननेकान्निहितार्थो दधाति। विचैति चान्ते विश्वमादौ स देवः स नो बुद्ध्या शुभया संयुनक्तु' इति श्रवणात् स्वयं कूटस्थासङ्गचिद्रूपोऽपि परमात्मा स्वोपाधिधर्मं भूतसृष्ट्यादिकं स्वधर्मत्वेन निर्दिशति 'अयमेव जगदुत्पत्तिस्थितिलयकर्ता सर्वविन्मोक्षप्रदाता च एनमाराध्य वयं कृतार्थाः स्याम इति मुमुक्षवः सगुणं समुपासता'मिति सूचयितुं, केचन जगदनीश्वरं मन्यन्ते तन्मतं निरासयितुं वा—

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनःपुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्॥ ८॥

प्रकृतिमिति। मायाख्यां स्वां स्वोपाधिभूतां प्रकृतिं शुद्धसत्त्वात्मिकामवष्टभ्योपादायाऽयं परमेश्वरः प्रकृतेर्वशात् अविद्यास्मिताभिनिवेशराग-

द्वेषात्मिकायाः प्रकृतेः स्वभावादवशमस्वतन्त्रमनादिसंसारवासनाग्रस्तमिमं परिदृश्यमानं देवतिर्यगादिलक्षणं भूतग्रामं प्राणिजातं सर्वं संहृत्य पुनःपुनर्विसृजामि तदीयकर्मानुरूपेण नानायोनिषूत्पादयामीत्यर्थः । एतेन प्राणिनां कर्म निमित्तमात्रमहमेव स्रष्टा भर्ता संहर्ता नेता च न मत्तोऽन्यः कश्चिदस्तीति सूचितं भवति। तथाच श्रुतिः—'एष सर्वेश्वर एष भूतानाम्' इति ॥ ८ ॥

नन्वेवं भूतग्रामं नानायोनिषु जनयतः पुनःपुनः संहरतः स्वर्गं नरकं च गमयतस्तवापि पुण्यपापकर्मसंश्लेषः स्यादित्याशङ्कायाम् । न । भूतानां संहारः सृष्टिः सुखदुःखादिफलप्रापणं च सर्वं प्रकृतेरेव कर्म नात्मनो ममाविक्रियस्यासङ्गस्याव्यक्तमूर्तेस्तत्कर्मलेशसंबन्धो वस्तुतः किंचिदस्तीति प्रकृतिकर्तृकेषु सृष्ट्यादिषु स्वस्यासङ्गोदासीनत्वमेव प्रतिपादयति—

न च मां तानि कर्माणि निबध्नन्ति धनंजय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥

न चेति । चकारस्त्वर्थः । तानि भूतसृष्टिसंहारादीनि कर्माणि प्रकृतिकर्तृकानि । मां तु परमात्मानमसङ्गमविक्रियं तटस्थं न निबध्नन्ति, मम बन्धाय न भवन्ति । मां न स्पृशन्तीत्यर्थः । स्वस्य तटस्थत्वमेव प्रतिपादयति—**उदासीनवदिति** । तेषु प्रकृतिकर्तृकेषु सृष्ट्यादिकर्मस्वसक्तं सक्तिर्नाम संयोगसंबन्धस्तद्रहितमसङ्गमत एवोदासीनवत् उदासीनस्तूष्णीमवस्थाता तटस्थस्तद्वदासीनं प्रकृतितत्कार्याणां साक्षित्वेन दूरतः स्थितं मां तत्कर्माणि न स्पृशन्तीत्यर्थः। एतेनोपाधितद्धर्मतत्कर्मस्वसक्तं सत्साक्षित्वेन स्थितमाकाशवदसङ्गमविक्रियमात्मानं यो विजानाति ब्रह्मविद्यतिः स कर्मभिरुपाधिकर्तृकैर्विहितप्रतिषिद्धैर्न निबध्यत इति सूचितं भवति ॥ ९ ॥

यदुक्तं स्वस्य प्रकृतिकर्तृकेषु कर्मस्वसङ्गत्वमुदासीनत्वं च तदेव विस्पष्टयति—

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ १० ॥

मयेति । राजवद्यस्य सन्निधिमात्रेण प्रधानादिप्रवृत्तिः सोऽध्यक्षस्तेनाध्यक्षेण साक्षिणा कूटस्थासङ्गचिद्रूपेण मया स्वप्रवृत्तिहेतुनोपहिता सती प्रकृतिरेव सचराचरं चरं जंगममचरं स्थावरं चरं च अचरं च चराचरं तेन सह वर्तत इति सचराचरं जगत्सर्वं सूयते जनयति

स्थापयति संहरते च। अहं तु तत्तत्प्रवृत्तेः साक्षिमात्रः। अनेन साक्षिणो मम सान्निध्यमात्रेणैव हेतुना स्वप्रवृत्तिकारणेनाव्यक्तादिस्थूलान्तं समष्टिव्यष्ट्यात्मकं जगत्सर्वं विपरिवर्तते सर्वतश्चेष्टते। यथा सर्वसाक्षिणः सूर्यस्य सान्निध्यमात्रेण तत्प्रकाशबलेन सर्वेषां प्राणिनां प्रवृत्तिर्निवृत्तिश्च सिध्यति, तथा सर्वसाक्षिणो मम सान्निध्यमात्रेण मत्प्रकाशबलेन देहेन्द्रियप्राणमनोबुद्ध्यादीनां स्वस्वविषये प्रवृत्तिर्निवृत्तिश्च इष्टानिष्टसुखादिज्ञानं च सिध्यति। एतावन्मात्रमेव मम कार्यं न तु कर्तृत्वं कारयितृत्वं भोक्तृत्वं भोजयितृत्वं दातृत्वं दापयितृत्वं वास्ति कूटस्थासङ्गचिन्मूर्तेरिति भावः॥ १०॥

एवं सर्वप्रकाशकं सर्वद्रष्टारं सर्वसाक्षिणं मामात्मानं पापिष्ठतमाः पशुकल्पा अवमन्यन्त इत्याह—

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्।
परं भावमजानन्तो मम भूतमहेश्वरम्॥ ११॥

अवजानन्तीति। 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च।' श्रुतेरयमर्थः—जगतो ब्रह्मादिभेदेन प्राप्तमीश्वरानेकत्वं निरस्यति—एक इति। 'एक एव हि रुद्रो न द्वितीयाय तस्थुः' इति श्रुत्यन्तरप्रसिद्धेः। एतेन तेषामैश्वर्यं प्राकृतमनित्यं चाभासिकं चेति सूचितम्। तत एकत्वं कारणत्वं चाव्याकृते पर्यवसितं निरस्यति—देव इति। कालत्रयेऽपीतरानपेक्षयाऽखण्डचिदात्मना स्वयमेव दीव्यते प्रकाशत इति देवः। अव्याकृतस्य जडत्वेन देवत्वासंभवात् स्वतः कारणत्वानुपपत्तेः। एकत्वदेवत्वसंपत्त्या सूर्यस्य प्राप्तमीश्वरत्वं निरस्यति—सर्वभूतेष्विति। सर्वभूतेषु चिदेकरसात्मना स्थित इत्यर्थः। एतेन सूर्यस्यैकत्वे देवत्वेऽपि चिदात्मना भूतेष्ववस्थितत्वाभावादीश्वरत्वाभावः। सर्वभूतेषु सर्वदैकरूपेण चित्प्रकाशात्मना स्थितत्वे ब्रह्मणः प्राप्तं सर्ववेद्यत्वं निरस्यति—गूढ इति। सर्वभूतेषु प्रकाशात्मना विद्यमानत्वेऽपि मेघैः सूर्यवदविद्यातत्कार्यैस्तिरोहितत्वात् परमात्मा न सर्वेषां वेद्यो भवतीत्यर्थः। भूतेषु गूढत्वे सति ब्रह्मणः प्राप्तं बुद्ध्यादिवत् परिच्छिन्नत्वं निरस्यति—सर्वव्यापीति। घटादिकं मृदिव जगद्बहिरन्तश्च सर्वतः स्वसत्तया व्याप्नोतीति सर्वव्यापी बहिरन्तःपूर्णत्वाद्ब्रह्मणः परिच्छित्त्यभाव इति भावः। गूढात्मना सर्वव्यापकत्वमाकाशे पर्यवसितं निरस्यति—

सर्वभूतान्तरात्मेति । सर्वेषां भूतानामन्तर्बुद्धिगुहायामात्मरूपेण तिष्ठतीत्यर्थः । सर्वव्यापकत्वेऽप्याकाशस्य जडत्वेन सर्वभूतात्मत्वासंभवाद्ब्रह्मत्वं न संभवति । सर्वभूतात्मत्वे ब्रह्मणः कर्मकर्तृत्वं तत्फलभोक्तृत्वं संसारित्वं च प्राप्तं निरस्यति—कर्माध्यक्ष इति । उपाधिमधिष्ठाय तद्धर्मानीक्षत इत्यध्यक्षः । भूतानां तत्कर्मणां तत्फलभोगानां च साक्ष्येव भवत्यात्मा निरवयवत्वान्निष्क्रियत्वाच्च स्वयं कर्म किंचिन्न करोति नापि च भुङ्क्ते इत्यर्थः । ब्रह्मणः सर्वभूतान्तरात्मत्वे सर्वभूताश्रयत्वं तदधीनत्वं च प्राप्तं निरस्यति—सर्वभूताधिवास इति । वसत्यस्मिन् सर्वमिति वासः । अधिकतमश्चासौ वासश्चेत्यधिवासः । अधिवसत्यस्मिन् सर्वमिति वाधिवासः । शुक्तौ रजतवद्दर्पणे पुरवत्स्वस्मिन् कल्पितानां भूतानां परमात्माधिवासोऽधिष्ठानमेव भवति नतु स्वयं तदधिकरण इत्यर्थः । न केवलं कर्मणामेव ज्ञाताऽयं भवत्यात्मा किंतु भूतानां तद्धर्माणां तत्कर्मणां तत्फलानुभूतीनां तदवस्थानां च द्रष्टेत्याह—साक्षीति । बुद्धितद्विकाराणां सर्वेषां साक्षीत्यर्थः । साक्षादीक्षते इति साक्षीत्यात्मन ईक्षणक्रियाकर्तृत्वे प्राप्ते सत्याह—चेतेति । चेतयितृत्वमविक्रियत्वं स्वयमविक्रियात्मना सर्वं पश्यतीत्यर्थः । अविक्रियत्वे हेतुमाह—केवल इति । केवलो निरवयवः । निरवयवत्वादविक्रियः स्वयमविक्रियः सन्नेव सर्वं पश्यतीत्यर्थः । शब्दगुणकमाकाशमिति निरवयवस्याप्याकाशस्य यथा गुणवत्त्वं तथा ब्रह्मणो निरवयवस्यापि सत्त्वचित्त्वादिगुणवत्त्वे प्राप्ते परिहरति श्रुतिः—निर्गुण इति । 'आत्मन आकाशः संभूतः' इति आकाशस्य जनिश्रवणात्तस्य जनिमत्त्वेन सावयवत्वादाकाशस्य गुणवत्त्वं युक्तं—निष्कलमिति । ब्रह्मणो निरवयवत्वश्रवणाद्गुणवत्त्वमनुपपन्नमेव ततः सत्त्वचित्त्वादिस्वरूपमेव भवति नतु गुण इत्यर्थः । परस्य ब्रह्मणः सर्वविशेषाभावप्रतिपादनार्थश्चकारः । एवं श्रुतिनिरूपितलक्षणम् । भूतमहेश्वरं स्वसंनिधिमात्रेण प्रकृतिं प्राकृतं च सर्वमीष्टे चेष्टयतीतीश्वरः । स्वयमविक्रियोऽप्ययसोऽयस्कान्त इव सर्वस्य प्रवृत्तिहेतुः । 'महतो महीयान्' इति श्रवणात् महत्तमत्वान्महांश्चासावीश्वरश्च महेश्वरः । भूतानामव्यक्तादिस्थूलान्तानां महेश्वरो भूतमहेश्वरस्तं भूतमहेश्वरं सर्वस्य चेष्टाकारणं सर्वमहत्तमं परं नित्यत्वकूटस्थत्वासङ्गसत्त्वचित्त्वानन्तत्वसर्वव्यापित्वसर्वज्ञत्वसर्वप्रकाशकत्वादिधर्मैः सर्वदृश्यविलक्षणं मम परस्य ब्रह्मण आकाशकल्पं सच्चिदानन्दैकरसं भावं स्वरूपमहंशब्दार्थमजानन्तः शास्त्राचार्येभ्यः किंचिदप्यविदितवन्तो मूढाः पशुकल्पा मानुषीं तनु-

मिति सर्वप्राणशरीरमात्रस्योपलक्षणम् । तनुं शरीरमाश्रितं स्वदेहे बुद्धिगुहायां सर्वप्रकाशकतया सर्वसाक्षित्वेन विद्यमानं मां प्रत्यग्लक्षणमात्मानमवजानन्ति तिरस्कुर्वन्ति । मय्यहमर्थे स्वात्मन्यानन्दैकरसे मलमांसास्थिपिण्डं देहमारोप्य तद्धर्मान् कर्तृत्वभोक्तृत्वादीन् जरारोगादींश्चाध्यस्यावमन्यन्ते । कर्ताहं भोक्ताहं बालोऽहं मूढोऽहं पापिष्ठोऽहं बधिरोऽन्धः काणः खञ्जः पङ्गुः जीर्णोऽहं हतोऽहं मृतोऽहमित्येवं सर्वदा मम वैपरीत्यमेव संपादयन्तीत्यर्थः ॥ ११ ॥

'असुर्या नाम ते लोकाः' इत्यादिश्रुत्यर्थं प्रकाशयितुमात्मज्ञानविमुखानामात्मनः सर्वदा विपरीतभावमेव संपादयतां मूढानां स्वभावं वर्णयित्वा तेषामात्मज्ञानवैमुख्यस्य फलं श्रुत्युक्तमेव प्रतिपादयति—

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥

मोघाशा इति । ये तु मूढा मत्तत्त्वमविज्ञायात्मानं मामवजानन्ति ते मोघाशाः, मोघा वितथा आशा मनोरथा येषां ते मोघाशाः । 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति प्ररोचनोक्त्या स्वर्गे शतकोटिकल्पपर्यन्तं वत्स्याम इति चातुर्मास्यं कृतवतां कामिनामाशायाः 'श्वोभावा मर्त्यस्य यदन्तकैतत्' इति न्यायेन स्वल्पकालिकत्वात्तेषां वितथाशत्वं युक्तमेव । किंच मोघकर्माणः मोघानि निष्फलानि श्रौतानि स्मार्तानि च कर्माणि येषां ते मोघकर्माणः । बहुतरश्रमसंपादितानां श्रौतादिपुण्यकर्मणां क्षणिकतुच्छजिह्वोपस्थसुखैकप्रयोजनत्वात् मोघकर्मत्वं युक्तम् । किंच मोघज्ञानाः मोघमनर्थसाधकमसद्गोचरं ज्ञानं सकलवेदशास्त्राध्ययनजन्यं येषां ते मोघज्ञानाः 'ब्रह्मचारिवासोष्टाचत्वारिंशद्वर्षाणि' इति स्मरणात् बहुकालिकसकलवेदशास्त्राध्ययनतदर्थविचारजनितं ज्ञानं सर्वं बन्धायैव जातं नतु मोक्षायातो युक्तं मोघज्ञानत्वम् । यतो मोघज्ञानास्तत एव विचेतसो विपरीतबुद्धयः सर्वदा देहमात्रात्मदर्शिनो भूत्वा राक्षसीं 'अग्निहोत्रं च वेदाश्च राक्षसानां गृहे गृहे । दया सत्यं च शौचं च राक्षसानां न विद्यते ॥' इत्येवंलक्षणा राक्षसास्तेषां संबन्धिनीं दया सत्यं शौचं क्षमा ह्रीर्दानमित्यादिसद्धर्मशून्यां क्रौर्यहिंसादम्भदर्पादिदुर्गुणैकप्रधानां राक्षसीं योनिं चाप्यासुरीं 'इदमद्य मया लब्धम्' इत्यादिनोक्तलक्षणवन्त आसुरास्तेषां स्वभावप्रचुरामासुरीं च मोहिनीमुपर्युपरि मूढत्वातिशयसंपादिनीमेव प्रकृतिं योनिं श्रिताः प्राप्ता भवन्ति । भूयोभूयः पुनःपुनरि-

त्यर्थः । यद्वा ये त्वात्ममोक्षणे प्रयत्नमकृत्वा राक्षसीं वासुरीं वा मोहिनीमेव प्रकृतिं संपत्तिमाश्रिता भवन्ति ते जन्मनि जन्मनि मोघाशा मोघकर्माणो मोघज्ञाना विचेतस एव भवन्ति । अर्थस्तूक्त एव ॥ १२ ॥

एवमासुरसंपत्तिमतामविदुषां गतिं प्रतिपाद्याधुना दैवसंपत्तिमतां विदुषां स्थितिं प्रतिपादयितुं तत्रोत्तममध्यमाद्यधिकारिभेदेन ब्रह्मोपास्तेरपि भेदमाह त्रिभिः । तत्र दैवसंपत्तिमत्सूत्तमानाह—

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥

महात्मान इति । तुशब्दो ब्रह्मविदां मूढवैपरीत्यद्योतनार्थः । महात्मानः बहुजन्माराधितपरमेश्वरप्रसादातिशयात् सम्यङ्मृदितकषायत्वेन विषयग्रहवैमुख्यं प्राप्य सर्वदा प्रत्यक्प्रवणशीलत्वान्महानुत्कृष्ट आत्मा चित्तं येषां ते महात्मानः प्रसन्नचित्ताः केचिद्यतयो ब्रह्मविदः स्वयं दैवीं देवस्य परमात्मनः प्राप्तेरन्तरङ्गसाधनत्वाद्दैवी तां प्रकृतिं संपत्तिं तीव्रमोक्षेच्छावैराग्यशमदमतितिक्षोपरमादिसत्त्वगुणपौष्कल्यलक्षणामाश्रिताः सन्तो मां भूतादिमव्ययं च ज्ञात्वा भूतादिर्भूतानामादिराविर्भूतिकारणं भूतादिरित्युक्तिः 'तदनन्यत्वम्' इति न्यायात् । कार्यस्य कारणमात्रत्वेन भूतानां पृथक्स्वरूपाभावाद्ब्रह्मणोऽद्वितीयत्वज्ञापनार्था । कदल्यादेः कार्यनाशेन कारणस्यापि नाशदर्शनात्तद्वद्भूतनाशाद्ब्रह्मणोऽपि नाशप्रसक्तौ तं वारयत्यव्ययमिति । ज्ञानेन वाऽज्ञानेन वा कारणनाशेन वा कार्यनाशेन वा स्वतो वाऽन्यतो वा येन केनापि न व्येतीत्यव्ययं नित्यं सर्वात्मकमद्वितीयमखण्डानन्दैकरसं मां परं ब्रह्म ज्ञात्वा श्रवणादिभिः स्वात्मना सम्यग्विज्ञायानन्यमनसः । मनो नाम बुद्धिवृत्तिः न विद्यतेऽन्यो मद्व्यतिरिक्तो वृत्तेर्विषयत्वेन येषां तेऽनन्यमनसः वस्त्वन्तरदर्शनरहिताः सन्तो मां भजन्ति सर्वमिदमहं च ब्रह्मैवेत्यप्रतिबद्धवृत्त्या सदा सर्वं ब्रह्मैव पश्यन्तीत्यर्थः । तत एव महात्मान इति विशेषणमर्थवत् ॥ १३ ॥

एवमुत्तमानामुपास्तिप्रकारमुक्त्वाथ मध्यमानामुपास्तिप्रकारमाह—

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥

सततमिति । केचन मुमुक्षवः स्वात्मतत्त्वजिज्ञासया तीव्रमोक्षेच्छावैराग्याभ्यां च ससाधनं कर्माखिलं संन्यस्य दृढव्रताः स्वजीवनादावप्यपेक्षाराहित्येन ब्रह्मचर्याऽहिंसाद्युत्तमधर्मेण बहिरन्तरिन्द्रियनिग्रहेण च

दृढं विच्छित्तिरहितं ज्ञानसंपादनपरत्वलक्षणं व्रतं नियमो येषां ते दृढव्रता भूत्वा सततं सर्वदा 'आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया' इति स्मरणादजस्रं मामेव प्रत्यग्लक्षणमात्मानमुद्दिश्य मत्साक्षात्कारसिद्ध्ये सद्गुरुसंनिधौ वेदान्तान्कीर्तयन्तः पठन्तस्तदर्थमुपपत्तिभिर्विचारयन्तो ज्ञानं यथा सिध्येत्तथा यतन्तो यत्नं कुर्वन्तः। 'तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये' इति श्रवणाच्छ्रद्धया भक्त्या च ज्ञानदातारमीश्वरं मां नमस्यन्तः प्रार्थयन्तश्चैवं नित्ययुक्ता निरन्तरनियमोपेताः शुश्रूषवो मामुपासते। यद्वा नित्यो मोक्षस्तत्सिद्ध्ये युक्ता नियता मामुपासते। 'सततं कीर्तयन्तो माम्' इत्यनेन नामकीर्तनं विवक्षितमिति मूढबुद्धिभिर्न मन्तव्यम्, उपक्रमविरोधात्प्रकरणविरोधाद्विशेषणविरोधाच्च तदत्र न सिध्यति ॥ १४ ॥

एवमात्मतत्त्वजिज्ञासूनां यतीनां मुमुक्षूणां वेदान्तश्रवणलक्षणमुपासनमुक्त्वा, श्रवणमननाभ्यां सम्यग्विज्ञाततत्त्वानां यतीनां निदिध्यासादिलक्षणमात्मोपासनं प्रतिपादयति—

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥

ज्ञानयज्ञेनेति। ज्ञानयज्ञेन ज्ञानं ब्रह्मात्मैकत्वविषयं तदेव ब्रह्मोपास्तेः साधनत्वाद्यज्ञ इत्युच्यते। इज्यतेऽनेनेति यज्ञः ज्ञानमेव यज्ञो ज्ञानयज्ञस्तेन ज्ञानयज्ञेन चाप्यन्ये केचिदपक्रान्तरात्मानो यजन्तो ब्रह्मैवाहमहमेव ब्रह्मेति स्वं ब्रह्मैव भावयन्तः सन्तो मां प्रत्यगभिन्नं परं ब्रह्मोपासते विपरीतभावनाविच्छित्त्यै नित्यमनुसंदधते। अपिशब्दः केचन कर्मिणः कर्मयज्ञेनोपासत इति सूचनार्थः। ननु ज्ञानयज्ञेन कथं तवोपास्तिर्भेदेनाभेदेन वा कर्तव्येत्याकाङ्क्षायां 'स यश्चायम्' इति, 'अयमात्मा ब्रह्म' इति, 'अहं ब्रह्मास्मि' इत्यादिश्रुत्यर्थं ब्रह्मविदाचार्यमुखतः सरहस्यं सम्यगवगाह्य तमेवार्थं श्रुत्युक्तविशेषैः स्वात्मना सम्यगनुभूय भूयो भेदमनालम्ब्य तदेकत्वमेव सदा भावयितुं ये तु शक्तास्तैरेकत्वेनोपासितव्यमशक्तैर्भेदेनेति बोधयितुमाह—**एकत्वेन पृथक्त्वेनेति**। ज्ञानयज्ञेन ये तूपासनं कुर्वन्ति मुख्याधिकारिणः परमहंसा यतयस्त एकत्वेनाऽभेदेन ब्रह्मैवाहमिति स्वाभिन्नं मामुपासते। ये तु मध्यमाधिकारिणो हंसकुटीचकादयस्ते तु पृथक्त्वेन भेदेन विश्वतोमुखं सर्वात्मकं मां बहुधानेकप्रकारं 'आदित्यो ब्रह्म' इति, 'मनो ब्रह्म' इति, 'ओमित्येतेनैवाक्षरेण' इत्यादिश्रुत्युक्तरीत्या बहुधा भेदेनोपासते। तत्राप्य-

नधिकारिणः केचन मुमुक्षवो वैदिकाः 'सोमेन यक्ष्ये' इत्यादिना कर्मयज्ञेन मामिन्द्रादिरूपमुपासते, तत्रापि केचन शिवविष्णुब्रह्मादिरूपं मां तन्त्रेण वैदिकेनोपासते ॥ १५ ॥

ननु 'यत्तदद्रेश्यम्' इति 'तदरूपमनामयं', 'दिव्यो ह्यमूर्तः पुरुषः' इति, परस्य ब्रह्मणो नामरूपाद्यभाव एव श्रूयते, कथं नामरूपादिशून्यस्य तव दृश्येष्विन्द्रादिषु शिवादिषु च ब्रह्मबुद्ध्योपास्तिरुपपद्यत इत्याकाङ्क्षायां 'इन्द्रो मायाभिः पुरुरूप ईयते', 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्', 'एकं सद्विप्रा बहुधा वदन्ति', 'इन्द्रं मित्रं वरुणमग्निमाहुः' इत्यादिश्रुतिभिः परस्य ब्रह्मणो ममैव मायया सविशेषत्वं सार्वात्म्यं च प्रतिपाद्यते । तत् इन्द्रादयः शिवादयः क्रतुयज्ञमन्त्रादयश्च जगच्च सर्वमप्यहमेवेति स्वस्य विश्वतोमुखत्वं प्रतिपादयति—

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥

अहमिति चतुर्भिः । यः क्रतुराधानाद्यश्वमेधान्तो यागः श्रुत्युक्तः सोऽहमेव । अद्वितीयार्थे एवकारः सर्वत्रान्वेति । यज्ञ औपासनादीशानबल्यन्तः स्मार्तोऽहमेव । क्रतुयज्ञयोरङ्गिनोर्ब्रह्मत्वे तदङ्गानां देवतायजमानादीनां ब्रह्मत्वमेव बोद्धव्यम् । स्वधाशब्देन पितृभ्यो यत्क्रियते पार्वणश्राद्धादि तत्स्वधाशब्दितमहमेव । यत्प्राणिभिर्भुज्यते व्रीह्याद्योषधिभ्यः समुत्पन्नमन्नं तदौषधमहमेव । भोज्यस्य ब्रह्मत्वे भोक्त्रादीनां ब्रह्मत्वमेव सिद्धम् । येन देवताभ्यः पितृभ्यश्च स्वाहास्वधान्तेन हविर्दीयते स मन्त्रोऽहमेव । आज्यं चरुपुरोडाशाद्यहमेव । अग्निरप्यहमेव । हुतं हवनक्रिया चाप्यहमेव ॥ १६ ॥

पिताऽहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥ १७ ॥

किंच पितेति । 'मायाशबलं ब्रह्म ब्रह्मणोऽव्यक्तमव्यक्तान्महान् महतोऽहंकारः अहंकारात्पञ्चतन्मात्राणि' इति श्रवणादस्याकाशादिप्रपञ्चस्य पिता जनको भूतादिरहमेव । माताऽव्यक्तमपरा प्रकृतिरहमेव । पितामहोऽक्षरसंज्ञको मायोपाधिरीश्वरोऽहमेव । धाता पोष्टाऽहं । यद्यद्वेद्यं शब्दस्पर्शरूपादिलक्षणं वस्तु तत्सर्वमहमेव । अत्र यद्यत्पवित्रं शोधकं

सूर्याग्निवाय्वबादि तत्सर्वमहमेव । ओंकारः परावरयोर्ब्रह्मणोर्वाचकः सोऽहमेव । ऋक्सामयजूंषि चकारादथर्वेतिहासपुराणादिकमहमेव ॥ १७॥

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ १८ ॥

किंच **गतिरिति** । गतिर्गम्यते कर्मणा प्राप्यत इति गतिः कर्मफलं स्वर्गादिरहमेव । भर्ता धर्ता जगतः कूर्मादिरहमेव । प्रभुर्नियन्ताहमेव प्राणिकृतकर्मणां साक्षी 'आदित्यचन्द्रावनिलोऽनलश्च' इत्युक्तः सूर्यादिरहमेव । सर्वाणि भूतानि यस्मिन्निवसन्ति स निवासो भूतधात्र्यहमेव । आर्तानां शरणमार्तिहन्ताऽहमेव । सुहृत् दययैव प्राणिनामुपकर्ता चन्द्रः पर्जन्यो वायुर्वा सोऽहमेव । प्रभवः प्रभवत्यस्मात्सर्वमिति प्रभवः सर्वजगत्सृष्टिकारणं यः सोऽहमेव । प्रलयः सर्वस्य प्रकृष्टो लयो यस्मात्स प्रलयः सर्वजगत्संहर्तापि यः सोऽहमेव । स्थानमिति गर्भितणिजन्तं नाशदशापन्नं सर्वं यः स्थापयति स स्थानं स्थितिकारणमहमेव । निधानं निधीयते सर्वमस्मिन्निति निधानं कार्यकारणप्रपञ्चाधिष्ठानमहमेव । ज्ञानेन विनान्येन न व्येति न नश्यतीत्यव्ययं नाशरहितं जगद्बीजमव्याकृताद्ययमप्यहमेव ॥ १८ ॥

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥

किंच **तपामीति** । आदित्यरूपोऽहं वसन्तग्रीष्मयोस्तपामि जगतस्तापक्रियां करोमि । जगत्सर्वं तापयामीत्यर्थः । कार्तिकाद्यष्टौ मासान् वर्षं निगृह्णामि । वर्षासु चतुरो मासान्वर्षमुत्सृजामि । चकारादतिवृष्ट्यनावृष्टिभ्यां सुभिक्षं दुर्भिक्षं च करोमि । न म्रियन्ते येन देवतास्तदमृतमहमेव । म्रियन्ते प्राणिनो येन स मृत्युरहमेव । यदिदमस्तीति नाम्ना रूपेण च निर्दिश्यते तद्व्यक्तं नामरूपात्मकं कार्यं सदित्युच्यते । तद्विलक्षणमव्यक्तं नामरूपकारणमसदित्युच्यते तदुभयं सच्चाऽसच्चाहमेव । चकारस्तयोरुभयोः सदसतोर्व्यक्ताव्यक्तयोर्निषेधे कृते तन्निषेधावधित्वेन स्थितं कार्यकारणभावविकलं निर्विषयं निर्विशेषं यत्परं वस्तु तदहमिति सूचनार्थः । एतेन क्रतुयज्ञादेः सदसदन्तस्य वस्तुनः सर्वस्य ब्रह्मस्वरूपत्वात् । मुमुक्षुभिर्ब्रह्मबुद्ध्या यद्यद्वस्तूपास्यते तत्तदात्मना तूपास्यब्रह्मत्वान्मुमुक्षोश्चित्तशुद्धिः क्रमान्मोक्षसिद्धिश्च भवतीति सूचितम् । नन्वब्रह्मणि ब्रह्मबुद्ध्या क्रियमाणोपास्तिः कथं फलाय भवति कथं वा दृश्यं ब्रह्म

भविष्यतीति चेद्भवानत्र प्रष्टव्यः । दृश्यं नाम यत्किंचिद्वस्त्वस्ति वा न वेति । न द्वितीयः । सर्वव्यवहारलोपप्रसङ्गात् । आद्ये दृश्यं वस्तु सद्रूपेणास्ति वा किमसद्रूपेणेति । न द्वितीयः । शशविषाणकल्पस्यासतो वस्तुनोऽस्तीति निर्देशायोगात् । तर्हि सद्रूपेणैवेति चेत्तथात्वे सर्वं ब्रह्मैव । ब्रह्मातिरिक्तस्य सत्त्वाभावात् । ननु सर्वस्य ब्रह्मत्वे घटपटादेर्नाशे सति ब्रह्मणोऽपि नाशप्रसङ्ग इति चेन्न । नाशस्य भ्रमकल्पितव्याप्यांशविषयत्वात् यथा दण्डादिना कल्पितकम्बुग्रीवाद्याकारवतो घटस्यैव व्याप्यांशस्य नाशो दृश्यते न तु मृदो व्यापकांशस्य । तथा भ्रमकल्पितनामरूपादेरेव व्याप्यांशस्य नाशो न तु व्यापकांशस्य सतः । तन्नाशे दृश्याभावभानाभावप्रसङ्गात्ततो दृश्यं च दृश्याभावश्च सदात्मनैव तिष्ठतः सर्वं ब्रह्मैवेति सिद्धम् । तेनेष्टे वस्तुनि ब्रह्मबुद्ध्या कृतोपास्तिः फलायैव भवति भावनानुरूपत्वात्फलसिद्धेः ॥ १९ ॥

एवं मुमुक्षूणां मन्दबुद्धीनामुपास्तिसिद्ध्यै ऋत्वाद्यसदन्तं सर्वमहमेवेति सर्वस्य स्वमात्रत्वं प्रतिपाद्य, राजविद्येत्यत्र ब्रह्मविद्याव्यतिरिक्तानां विद्यानां सकलवेदशास्त्राध्ययनजनितानां यदुक्तं संसारवर्धकत्वमेव तदेवाश्रद्दधानाः पुरुषा इत्यत्र निरूप्याधुनापि मुमुक्षूणां विवेकसिद्ध्यै पुनः प्रतिपादयति—

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥२०॥

त्रैविद्या इति द्वाभ्याम् । ऋग्यजुःसामरूपास्तिस्रश्च ता विद्याश्च त्रिविद्यास्ता ये अधीयन्ते ते त्रैविद्या ऋग्यजुःसामाध्ययनवन्तस्तदर्थज्ञानवन्तोऽपि ये कामिनः स्वयं सोमपाः सोमं पिबन्तीति सोमपाः । तत एव पूतपापाः पूतानि निर्गतानि बहुविधानि पापानि येषां ते पूतपापाः सन्तो यज्ञैरग्निष्टोमातिरात्रादिभिः क्रतुभिः अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्चेत्युक्तदेवतास्वरूपं मां परमेश्वरमिष्ट्वा सम्यगाराध्य स्वर्गतिं स्वर्गप्राप्तिं प्रार्थयन्ते । 'स्वर्गे लोके न भयं किंचनास्ति', 'स्वर्गे लोका अमृतत्वं भजन्ते' इति स्वर्गफलं श्रुत्वा स्वर्गो मे भूयादिति स्वर्गसुखमेव कामयन्ते ते स्वर्गकामाः पुण्यमग्निष्टोमादिपुण्यकर्मफलं सुरेन्द्रलोकं स्वर्गस्थानमासाद्य तत्र दिवि स्वर्गे दिव्यान्स्वर्गीयान्देवभोगान्देवानां ये भोगा यच्छरीरं यद्योग्यं यत्सुखं तादृशानेव भोगान्सुखविशेषान् देवैः प्रापितान्वा देवभोगान-

श्नन्ति अनुभुञ्जते। 'यावत्संपातमुषित्वा' इति न्यायेन यावत्पुण्यफलानुभूतिनिर्णयस्तावत्पर्यन्तं स्वर्गभोगाननुभवन्तीत्यर्थः ॥ २० ॥

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥ २१ ॥

किंच ते तमिति। ते सोमपाः स्वर्गकामिनः स्वर्गं गताः सन्तः विशालं स्वपुण्याधिक्येन बहुलं स्वर्गीयं सुखविशेषं भुक्त्वानुभूय पश्चात्तत्सुखभोगकारणे स्वपुण्ये क्षीणे सति मर्त्यलोकं विशन्ति। तं देहं त्यक्त्वा पुनरत्र जायन्त इत्यर्थः। एवं त्रयीधर्मं त्रयो वेदास्त्रयी कर्मकाण्डं तेनोक्तो धर्मस्त्रयीधर्मः 'त्रिकर्मकृत्तरति जन्ममृत्यू', 'दक्षिणावन्तो अमृतत्वं भजन्ते' इत्याद्यर्थवादपूर्वकं वेदैरुक्तं धर्मं कर्मैवानुप्रपन्नाः श्रुत्युक्तं कर्मैव निःश्रेयसाभ्युदयसिद्धौ परमकारणं न शमो न च दमो नापि च संन्यासो नैव ज्ञानं नैवेश्वरश्चेति निश्चयमनुसृत्य केवलकर्मैकनिष्ठाः कामकामाः काम्यन्त इति कामाः भौमा दिव्याश्च विषयास्तानेव कामयन्त इति कामकामा विषयभोगलम्पटा मीमांसकाः पण्डिता अप्येवमुक्तप्रकारेण गतागतं गतं चागतं च गतागतं गमनागमनमेवानुपरतं कर्मफलं लभन्ते। तत आगत्य जायन्ते जाताः पुनर्मृत्वा स्वर्गं गच्छन्त्येवं जननमरणप्रवाहे कामिनो मज्जन्तीत्यर्थः ॥ २१ ॥

एवमनीश्वरवादिनां कर्मैकशरणानां बाह्यज्ञानवतां कामिनां गतिं प्रतिपाद्याधुना निर्द्वन्द्वानां नित्यसत्त्वस्थानां निर्योगक्षेमाणामात्मवतां निष्कामानां निरहंकारममकाराणां मदेकशरणानां ब्रह्मविदां योगक्षेममहमेव वहामीत्याह—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥

अनन्या इति। अनन्याः न विद्यते अन्यो मद्व्यतिरिक्तो विषयस्त्वहंबुद्धेरिदंबुद्धेश्च येषां ते अनन्याः सदाऽद्वैतदर्शननिष्ठाः सन्तो ये यतयो मां निर्विशेषं नित्यानन्दैकरसं परं ब्रह्मैव चिन्तयन्तो बहिरन्तश्चैकवृत्त्या विषयानवगाहिन्या सर्वमिदमहं च ब्रह्मैवेति भावयन्तः पर्युपासते स्वं च सर्वं च सर्वदा ब्रह्मैव ये पश्यन्तीत्यर्थः। नित्याभियुक्तानां नित्यो निरन्तरोऽविच्छिन्नोऽभियोगः आभिमुख्येन बुद्धिवृत्तेर्वस्तुसंयोगः साक्षात्कारलक्षणस्तद्वन्तो ये ते नित्याभियुक्ता निरन्तरसमाहितचित्तास्तेषां नित्याभियुक्तानां ब्रह्मविदां योगक्षेमम्। अप्राप्तस्यापेक्षितस्य वस्तुनः प्रापणं

योगः स्थितस्य परिपालनं क्षेमस्तदुभयमहमेव वहामि । यद्वा तेषां नित्याभियुक्तानां योगक्षेमं योगो निरन्तरब्रह्मनिष्ठा तस्य क्षेममाध्यात्मिकाद्युपद्रवैर्विच्छेदराहित्यं तदहं सर्वदा करोमीत्यर्थः ॥ २२ ॥

नन्वहं क्रतुरित्यादिना क्रतुयज्ञमन्त्रदेवतादिकं सर्वमहमेवेति तवैव सार्वात्म्यं त्वयैव साक्षात्प्रतिपादितम् । कामकामा अपि इन्द्रादिदेवतारूपं त्वामेव क्रतुभिरुपासते । त्वद्भक्तानां तेषां कथं मुख्यफलभ्रंशो जन्माद्यनर्थपातश्चेति चेदुच्यते । 'सर्वं ह्येतद्ब्रह्म', 'सर्वं खल्विदं ब्रह्म', 'इन्द्रं मित्रं', 'एकं सद्विप्रा बहुधा वदन्ति' इत्यादिश्रुतिभिः 'भूतानि विष्णुः' इत्यादिस्मृतिभिः सर्वं ब्रह्मैवेति प्रतिपाद्यते । अहं क्रतुरिति ममैव सर्वात्मत्वं मयाप्युक्तं सर्वदेवात्मक एवाहम् । सत्यं । तेऽपि मामेव क्रतुभिरुपासते तथापि श्रुतौ मदुक्तौ च विश्वासमकृत्वाऽविद्यास्मितादिदोषेण सर्वं ब्रह्मैवेति मामज्ञात्वा स्वेषु देवेषु मन्त्रादिषु भेदबुद्धिममुञ्चमाना मामुपासते । ततस्ते मद्भक्ता न भवन्ति किंतु देवयज एव भवन्ति । तेनैव तेषां मुख्यफलभ्रंशोऽनर्थापातश्चेति सिंहावलोकनन्यायेन तत्पूर्वश्लोकार्थमनुसृत्य प्रतिपादयति—

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ २३ ॥

येऽपीति त्रिभिः । येऽप्यैहिकामुष्मिकफलार्थिनो ब्राह्मणादयः स्वेष्टदेवतासु तदाराधनेषु च श्रद्धया 'एषैव परदेवता त्वेतस्या आराधनेनाहं कृतार्थः स्याम्' इत्यास्तिक्यबुद्ध्यान्विताः समेताः सन्तः स्वयमन्या देवता इयं मम, एतस्या आराधकोऽहमिति स्वभिन्नत्वेन गृहीताया इन्द्रादिदेवताया एव भक्तास्तदाराधने भक्तियुक्ता भूत्वा यजन्ते । वैदिकेनैव तन्त्रेणोपासत इत्यर्थः । तेऽपीन्द्रादिदेवतायाजका यद्यपि मामेवेन्द्रादिदेवतारूपं यजन्ते । ब्रह्मणः सर्वात्मकत्वादिन्द्रादिदेवतारूपेणाहमेव तैराराध्यते । तथापि ते मामविधिपूर्वकं यजन्ति न विद्यते विधिर्विध्यर्थज्ञानं च यत्र तदविध्यज्ञानं तत्पूर्वकं यजन्ति । अहं क्रतुरित्युक्तप्रकारेण इज्यो याजको यजनं यागश्च सर्वं ब्रह्मैवेत्येवंज्ञानशून्या भूत्वा मां यजन्त इत्यर्थः ॥ २३ ॥

ननु शुण्ठास्त्रयो वैष्णवाः 'अग्नेर्घृतं विष्णोस्तण्डुलाः यज्ञो वै विष्णुः' इति त्वां यज्ञेषु भोक्तारं नेतारं च ज्ञात्वैव ते यजन्ते कथमज्ञानपूर्वकं यजन्तीत्यत आह—

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ २४ ॥

अहमिति । हिर्निरुक्तश्रुतिप्रसिद्धिद्योतनार्थः । यद्यपि सर्वयज्ञानां श्रौतानां स्मार्तानां च सर्वेषां यज्ञानामिन्द्रादिदेवतारूपेणाहमेव भोक्ता च प्रभुर्नेता चास्मि, तथैव तेऽपि भोक्तारं प्रभुं च मां जानन्ति तथापि तत्त्वेन नतु जानन्ति 'ब्रह्मार्पणं ब्रह्म हविः', 'सर्वं खल्विदं ब्रह्म' इत्यादिश्रुत्युक्तप्रकारेण मदुक्तरीत्या च यज्ञो यज्ञभोक्ता यज्ञनेता च यजमानो याजकाश्चरुपुरोडाशादि चैतत्सर्वं ब्रह्मैव न ततोऽन्यत्किंचिदप्यस्तीति तत्त्वेन याथात्म्येन यथाभूतस्वरूपेण मां ब्रह्म न जानन्त्यतो मत्तत्त्वाज्ञानादेव ते देवतायाजकाश्च्यवन्ति च्यवन्ते परमपुरुषार्थाद्भ्रश्यन्ति । कदापि न मुक्तिं विन्दन्तीत्यर्थः ॥ २४ ॥

तर्हि तेषां का वा गतिरित्याकाङ्क्षायां मुख्यफलाभावेऽपि तत्तद्देवतोपासनानुरूपं फलं भवतीत्याह—

यान्ति देवव्रता देवान्पितृन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥ २५ ॥

यान्तीति । देवव्रता देवेष्विन्द्रादिषु यज्ञदानादिनियमो व्रतं शिवविष्णवादिषु जपपूजोपवासादिनियमो व्रतं येषां ते देवव्रता देवयाजिनो देवानिन्द्रादीन् शिवविष्णवादींश्च यान्ति । तत्तत्पदं गच्छन्तीत्यर्थः । पितृव्रताः पितृषु व्रतं श्राद्धभूरिभोजनादिनियमो येषां ते पितृव्रताः पितॄनग्निष्वात्तादीन्यान्ति । भूतेज्याः भूतानि विनायकवेतालदुर्गाक्षेत्रपालयक्षिण्यादयस्तानि जपहोमबल्यादिभिर्ये यजन्ति ते भूतेज्या भूतानि यान्ति । मद्याजिनः मां सगुणं ब्रह्म 'आदित्यो ब्रह्म मनो ब्रह्म सर्वं खल्विदं ब्रह्म' इति ये भेदेनाभेदेन च यजन्ति । ते मद्याजिनः सगुणोपासका अर्च्यर्चिरादिक्रमेण मां यान्ति । अत्रत्योऽपिशब्दो निर्गुणं परं ब्रह्म स्वात्मना ये विदुस्तेषामुत्क्रमणाभावं प्राप्त्यभावं च सूचयति । यद्वा मद्याजिनो निर्गुणोपासकाः सगुणोपासका अपि मामेव परं ब्रह्म साक्षात्क्रमेण च यान्ति मद्भावं भजन्तीत्यर्थः । यद्यपि विवेकवैराग्यसंन्यासशमदमादिसंपत्त्या वेदान्तश्रवणादिना ब्रह्मज्ञानं सुलभं तत्फलप्राप्तिश्च सुलभा गमनादिश्रमशून्या, तथापि नित्यश्रमसाध्यैर्जपहोमोपवासस्तोत्रपाठादिभिरतिदुष्करैः श्राद्धनियमैर्बह्वर्थव्ययैकप्रधानैर्देहायाससाध्यैश्च क्रतुयज्ञदानादिभिरुक्तैरनुक्तैश्च क्रियाविशेषैर्बहुश्रममूलैर्लब्धव्यं यत्फलं तदल्पकालिकं क्षयि-

ष्णु सप्रतियोगिकं पुनरावृत्तिकरं च भवति । पण्डितानामपि तत्रैव कामः संकल्पः प्रयत्नः प्रवृत्तिश्च दृश्यते नतु ज्ञाने ज्ञानशास्त्रे स्वल्पश्रमे नित्यफले अहो एषैव पारमेश्वरी माया जगन्मोहिनीति वयं मन्यामहे ॥ २५ ॥

नन्वधिकारिणां महात्मनां ब्रह्मज्ञानं सुलभं तत्फलमप्यनावृत्तिलक्षणमनन्तमखण्डानन्दमद्वयं मोक्षाख्यं चातिसुलभमेव भवति । तत्रानधिकारिणामतिमन्दप्रज्ञानां तु मुमुक्षूणां का वा गतिरित्याकाङ्क्षायां सतामारुरुक्षूणामपि भक्तानामहं सुलभ एवेत्याशयेनाह—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नासि प्रयतात्मनः ॥ २६ ॥

पत्रमिति । पत्रं पुष्पं वा फलं तोयं वा शालग्रामे प्रतिमायां वा मे मह्यं यो मुमुक्षुर्भक्त्या श्रद्धया च प्रयच्छति तस्य प्रयतात्मनः शुद्धवृत्तेः सद्भक्त्योपहृतं समर्पितं तद्वस्त्वहं परमेश्वरः सम्यगश्नाम्यनुगृह्णामि । तेनैव संतुष्टः स्यामित्यर्थः । 'धिगनीशार्चनं जन्म' इतीश्वराराधनशून्यस्य जन्मनो निष्फलत्वश्रवणादीश्वराराधनस्य षट्कर्मान्तःपातित्वाच्चेश्वराराधनं मुमुक्षोरवश्यं कर्तव्यमिति सूचितं भवति । यद्वा 'अभ्यागतः स्वयं विष्णुः' इति स्मरणात्काले प्राप्ताय मे मद्रूपायातिथये पत्रं पक्वं शाकं वा फलं वा पुष्पं पुष्पशब्देन शैलाटुरुच्यते[1] तं वा पक्वं तोयं वा स्वयं यद्भुङ्क्ते तद्भक्त्या श्रद्धया च यः प्रयच्छति दानमेव गृहस्थस्येति नियमात्स्वधर्मनिष्ठस्य भूतदयावतस्तस्य शुद्धात्मनः शुद्धभक्त्या ब्राह्मणमुखे उपहृतं समर्पितं पत्रं वा तोयं तद्द्रव्यमहं परमेश्वरः साक्षात्तन्मुखेनाश्नामि भुञ्ज इत्यर्थः ॥ २६ ॥

यस्मादहं साधूनां भक्तिसुलभस्तस्माद्यद्यत्कर्म करोषि तत्तदखिलं मदर्पणं कुर्वित्याह—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥

यदिति । विहितमलोकविद्विष्टं यल्लौकिकं कर्म करोषि, यच्च शास्त्रीयमनायासलब्धमन्नमश्नासि, यच्च चरुपुरोडाशादिहौम्यमग्न्यादिदेवताभ्यो जुहोषि, यच्च पात्रेभ्य ओदनोदकधनधान्यकन्यागवादिविशिष्टं द्रव्यं ददासि, यच्च तपस्यसि संध्यावन्दनादि वेदाध्ययनादि वा व्रतोपवासादिकं वा तपः करोषि, लौकिकं वैदिकं च यद्यत्कर्म करोषि तत्सर्वं मदर्पणं कुरुष्व । ब्रह्मार्पणबुद्ध्यैव सर्वं कर्म कुरुष्वेत्यर्थः ॥ २७ ॥

---

१ शाकद्वरपकं फलम्.

श्रौतं स्मार्तं वाऽन्यद्वापीश्वरार्पणबुद्ध्या कर्म कुर्वतस्तदनुष्ठितेः फलमाह—

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥

शुभाशुभफलैरिति । एवमीश्वरार्पणबुद्ध्या वैदिकमवैदिकं च युक्तं कर्म कुर्वाणस्त्वं शुभाशुभफलैः सुखदुःखप्रदैः स्वर्गनरकहेतुभिर्वा कर्मबन्धनैः कर्माण्येव बन्धनानि कर्मबन्धनानि तैर्मोक्ष्यसे मुक्तो भविष्यसि । ननु 'कर्मण्येवाधिकारस्ते' इति, 'नियतं कुरु कर्म त्वम्' इति, 'स्वधर्मम्' इति च विहितानामेव कर्मणां कर्तव्यत्वविधानात्कथं विहितानामशुभफलत्वमिति चेन्न । विहितानामप्यनुष्ठानवैकल्ये त्वशुभफलहेतुवोपपत्तेः । 'यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितं च । अहुतमवैश्वदेवमविधिना हुतमासप्तमांस्तस्य लोकान्हिनस्ति' इति, 'स वाग्वज्रो यजमानं हिनस्ति' इत्यादिश्रुतेः स्मृतेश्च मन्त्रतन्त्रस्वरवर्णद्रव्यकालादिनियमवैपरीत्ये स्कन्ने भिन्ने च विहितानामप्यशुभफलकारित्वमुपपद्यते । ततो 'नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते' इति न्यायेनेश्वरार्पणबुद्ध्या श्रद्धाभक्तिभ्यां च कृतानां तु कर्मणां विपर्यासेऽपि प्रत्यवायाद्यसंभवात् । तथा संन्यासयोगयुक्तात्मा संन्यासः परमेश्वरे कर्मफलत्यागः स एव योगः कर्मबन्धमोक्षोपायस्तत्र सर्वफलसंन्यास एव, युक्तः सक्त आत्मा मनो यस्य तथोक्तः सन् कर्मबन्धनैर्विमुक्तः क्रमेण मां परमात्मानमुपैष्यसि । विदेहमुक्तिं प्राप्स्यसीत्यर्थः । यद्वा सिद्ध्यसिद्ध्योः समो भूत्वा चेश्वरार्पणबुद्ध्या चानेनेश्वरो मे प्रसीदत्वित्यादिकामनाराहित्येन चैवं नित्यं नैमित्तिकं च कर्म कुर्वाणस्त्वं स्वानुष्ठितसत्कर्मसमुत्पन्नचित्तशुद्धिद्वारा संप्राप्तात्मविज्ञानः सन् संन्यासयोगयुक्तात्मा नाहं कर्तास्मीति स्वस्य सम्यक् कूटस्थत्वासङ्गत्वविज्ञानेन संचिताद्यशेषकर्मसंबन्धाभावदर्शनमेव संन्यासयोगस्तस्मिन्संचितागामिवर्तमानसर्वकर्मतत्कर्त्रादिसंबन्धाभावदर्शन एव युक्तः समाहित आत्मा मनो यस्य स संन्यासयोगयुक्तात्मा भूत्वा शुभाशुभफलैः स्वर्गनरकसुखदुःखप्रापकैः कर्मबन्धनैः कर्माणि पुण्यापुण्यमिश्ररूपाणि संचितादीनि तान्येव पुरुषो जन्मादिभिर्बध्यते यैस्तानि बन्धनानि तैः कर्मबन्धनैर्मोक्ष्यसे । एवं विमुक्तः संन्यासयोगेन कर्मबन्धनैर्विमुक्तः सन् मां निर्विशेषं परं ब्रह्मान्तरालं विनैवोपैष्यसि । विदेहकैवल्यं प्राप्स्यसीत्यर्थः ॥ २८ ॥

परमात्मा भक्तानां मुक्तिं प्रयच्छति नत्वभक्तानाम्, अतो 'निर्दोषं हि समं ब्रह्म' इति स्मृत्युक्तं परमात्मनो यत्समत्वं तदुक्तिमात्रमेव, वैषम्यं त्वस्त्येवेत्याशङ्कायाम् । न । सर्वसमोऽपि भानुः शीतकाले स्वमनावृतदेशमासाद्य ये सेवन्ते तेषां शीतं नाशयति नत्वसेवमानानाम् । ततस्तद्वैषम्यं भानुकृतं न भवति किंतु पुरुषकृतमेव यथा, तथैव प्रकृतेऽपीति सूचयितुमाह—

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ २९ ॥

समोऽहमिति । सर्वभूतेषु सर्वेषु ब्रह्मादिस्तम्बपर्यन्तेषु प्राणिष्वहं परमात्मा परिपूर्णो निर्विशेषः स्वयं घटमठादिष्वाकाशवत्समस्तुल्यस्वभाव एवास्मि न वाय्वादिवद्विषमस्तत एव मम न कश्चिदपि प्रियोऽस्ति नापि द्वेष्योऽप्रियोऽप्यस्ति । 'अप्राणो ह्यमनाः शुभ्रः' इति श्रवणादमनस्कस्य प्रियाप्रियत्वभावनाऽयोगात् । ननु प्रियाप्रियत्वभावनाभावे कथं तर्हि केषांचिन्मुक्तिः केषांचिदमुक्तिरित्याशङ्कायाम् । न । तत्पुरुषतन्त्रं नतु मत्तन्त्रमित्याह—**ये भजन्तीति** । स्वप्रयत्नेन तीव्रमोक्षेच्छया च शुभान्येव कर्माणि बहुजन्मभिः कृत्वा तत्परिपाकाच्छुद्धात्मानः सन्तः सर्वं संन्यस्य सद्गुरुप्रसादात् श्रवणादिना परतत्त्वं ज्ञात्वा ये पुरुषधौरेया भक्त्याऽखण्डवृत्त्या मां भजन्ति । ब्रह्मैवाहमिति स्वमेव पूर्णात्मना स्थितं पश्यन्तीत्यर्थः । ते यतयो ब्रह्मनिष्ठाः स्वच्छस्वभावत्वात्सर्वदा मय्यानन्दात्मनि ब्रह्मणि स्वयं वर्तन्ते । मयि मद्रूपेण तिष्ठन्तीत्यर्थः । अहं च निर्विशेषः परिपूर्णोऽपि तेषु ब्रह्मवित्सु तद्वृत्तेः सर्वदा चक्षुषो रूपवद्विषयीभूय तिष्ठामि । यथा सर्वव्यापकः सर्वसमोऽप्याकाशः स्वच्छेषु जलदर्पणादिषु प्रतिबिम्बितेन नतु कुड्यादिषु तद्वदहमपि सत्सु भामि नत्वसत्सु । 'तरति शोकमात्मवित्' इति श्रवणाद्ये मां विदुस्ते मुक्ता भवन्ति, ये न विदुस्ते बद्धा भवन्त्यतो मद्वेदनमेव पुंप्रयत्नलभ्यं मुक्तिकारणं तदभावो बन्धकारणं नत्वहं न च गुरुर्नापि च शास्त्रं ततो न मम सर्वसमत्वव्याघात इति भावः । एतेन शीतनिवृत्तिः पुरुषप्रयत्नसाध्या यथा तथा भवमुक्तिरपि पुरुषप्रयत्नसाध्या नतु स्वयमेव सिध्यति । तस्मान्मुमुक्षुभिर्मुक्त्यै प्रयतितव्यमिति सूचितं भवति ॥ २९ ॥

राजविद्येति विशेषणेन सूचितं ब्रह्मविद्याव्यतिरिक्तविद्यानां सकलवेदशास्त्राध्ययनसमुत्पन्नानां बन्धकत्वं 'मोघाशा' इति, 'त्रैविद्या माम्'

इत्यादौ प्रतिपाद्य ब्रह्मविद्यायाश्च मोक्षप्रदत्वं 'महात्मानस्तु' इति, 'यान्ति मद्याजिनोऽपि माम्' इत्यादौ प्रतिपाद्याधुना 'पवित्रमिदमुत्तमम्' इति ज्ञानस्य यत्पावकतमत्वं प्रतिज्ञातं तद्विशदयति—

अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ३० ॥

अपि चेत्सुदुराचार इति। यः कश्चिद्ब्राह्मणो वा क्षत्रियो वान्यो वा सुदुराचारः सुतरां जातितो वर्णतः क्रियातो वा स्वभावतो वात्यन्तदुष्ट आचारो वृत्तं यस्य स दुराचारोऽपि यद्यपि पापिष्ठोऽपि वा स्यात्तथापि जन्मान्तरीयपुण्यकर्मातिशयेन सद्गुरुप्रसादात्परतत्त्वं ज्ञात्वा स्वयमनन्यभाक् अन्यदनात्मस्वरूपं कर्तृत्वभोक्तृत्वादिधर्मविशिष्टं देहेन्द्रियादिकमात्मत्वेन भजतीत्यनन्यभाक् चित्तप्रसादजनितस्वयाथात्म्यविज्ञानेन तथा न भवतीत्यनन्यभाक् सन् मां परं ब्रह्म भजते, ब्रह्मैवाहमित्यविक्रियं ब्रह्मैव सदा स्वमनुसंधत्ते स ब्रह्मवेत्ता साधुरेव सज्ज्ञानात्सदाचारवत्तया सत्पुरुष एवेति पण्डितैर्मन्तव्यः। पौर्विकीयां पापी दुराचार इति बुद्धिं त्यक्त्वा ब्रह्मविदेष पुण्यतम एवेति विज्ञातव्य इत्यर्थः। तस्य पुण्यतमत्वमेव निश्चिनोति —**सम्यगिति।** हि यस्मात्कारणात्स पुरुषः सम्यग् व्यवसितः व्यवसीयते वस्तुयाथात्म्यं निश्चीयतेऽनेनेति व्यवसितं विज्ञानं तत्त्वनिश्चयात्मकं सम्यक् समीचीनं व्यवसितं जातिवर्णतद्धर्मतत्कर्मसंबन्धशून्यमाकाशवदतिनिर्मलं निष्क्रियं नित्यमुक्तस्वभावं यत्परं ब्रह्म तदेवाहमिति तत्त्वसाक्षात्कारजनितं स्वभावनिश्चयलक्षणं यस्य स सम्यग्व्यवसितः। यस्मात्सम्यग्ज्ञानसंपन्नस्तस्मात्साधुरेवेति सर्वैर्ज्ञातव्यः पूजनीयश्चेति भावः। 'न वासुदेवभक्तानाम्' इति, 'न मे भक्तः प्रणश्यति' इत्येतद्वाक्यार्थे विचार्यमाणे त्वस्यार्थ एवमपि भवति। अपि चेत्सुदुराचारः ब्रह्मनिष्ठो ब्रह्मविद्यतिः स्वयं भ्रमप्रमादाभ्यां सुदुराचारोऽप्यतिनिन्दिताचारोऽपि वा यदि स्यात् एकाकितया मौनितया च भिक्षाटनं कुर्वन्नभिशस्तपतितादीनामप्यन्नाद्यशनेन वा सति देशकालवैषम्ये दुष्टान्नभक्षणेन वा क्वचिच्चाण्डालादिसंपर्केण वाप्यत्यन्तदोषी भवेच्चेत् तथाप्यनन्यभाक् विषयाकारं भजतीति भाक् वृत्तिर्न विद्यतेऽन्यो मद्व्यतिरिक्तो विषयो यस्याः साऽनन्या विषयान्तरशून्या भाक् वृत्तिर्यस्य सोऽनन्यभाक् सन् 'अहमन्नमहमन्नमहमन्नादोऽहमन्नादः' इत्येतच्छ्रुत्युक्तरीत्या दाता दानं देयं च भोक्ता भोज्यं भोजनं च सर्वमहमेव ब्रह्मैवेति सर्वत्र ब्रह्मदृष्टिर्भूत्वा यो मां निर्विशेषं परं ब्रह्म भजते प्रत्यग्दृष्ट्या सर्वमिदमहं च ब्रह्मैवेत्यनुसं-

धत्ते एवं सर्वस्य स्वस्य च ब्रह्ममात्रत्वानुसन्धानमात्रेण स ब्रह्मवित्साधुरेव शुद्ध एवेति पण्डितैर्मन्तव्यो ज्ञातव्य इत्यर्थः । ननु तदनुरूपप्रायश्चित्ताभावात् कथं शुद्ध एवेति ज्ञातुं शक्यत इत्यत आह—**सम्यगिति** । आत्मलाभान्न परं विद्यते 'सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते । दर्शनेन विहीनस्तु संस्कारं प्रतिपद्यते ॥ प्रायश्चित्तं ब्रह्मविदो यतेस्तु ब्रह्मवेदनम् । दोषप्रसक्तावन्यत्र शास्त्रदृष्टं विधीयते ॥ अतिपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतम् । भूयस्तपस्वी भवति पङ्क्तिपावनपावनः ॥ प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै । यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितम् । योगेनैव दहेदंहो नान्यत्तत्र कदाचन ॥ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः । विपरीतस्तु दोषः स्यादुभयोरेष निश्चयः ॥' इत्यादिवचनैर्ज्ञानिनो ज्ञानमेव प्रायश्चित्तमिति मन्वादीनां यन्निश्चितं तत्तु व्यवसितं समीचीनं व्यवसितं यस्य स सम्यग्व्यवसितः समीचीनप्रायश्चित्तवानेवेत्यर्थः । 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ', 'यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते' इति, 'न लिप्यते कर्मणा पापकेन', 'उभे ह्येवैष एते तरति' इत्यादिश्रुतिप्रसिद्धिप्रकाशनार्थो हिशब्दः । अतिपापेति वचनस्यायमर्थः—अतिपापप्रसक्तोऽपि ब्रह्मविद्यतिर्भ्रमप्रमादाभ्यां वा देशकालादिवैषम्ये दुष्टान्नभक्षणलक्षणमत्यन्तपापं कृत्वापि निमिषं क्षणार्धमच्युतं नित्यकूटस्थमसङ्गमात्मानं ध्यायन् 'अकर्ताहमभोक्ताहमविकारोऽहमक्रियः' इति कर्तृकरणकार्येभ्यो भिन्नं स्वं निष्क्रियमेव परं ब्रह्म पश्यन्नित्यर्थः । तपस्वी 'शुचिदीनर्षिव्रतिनो वनस्थाश्च तपस्विनः' इत्यभिधानात् भूयः पुनरपि तपस्वी शुचिर्भवति पुनरपि तपःसंपन्नो वा । ननु ब्रह्मध्यानेन शुद्ध एव भवति तथाप्ययं व्यवहारायोग्य एवेत्यत आह—पङ्क्तीति । ये त्रिसुपर्णं पठितारः ये च चतुर्वेदिनः ये वा वाजपेयचयनादिक्रतुकर्तारस्ते सर्वे पङ्क्तिपावनास्तानप्ययं पूजानमस्कारादिभिः पुनातीति पङ्क्तिपावनपावनः सर्वेषां पूज्यश्च भवतीत्यर्थः । प्रायश्चित्तानीत्यस्यायमर्थः—यान्यशेषाणि कृच्छ्रातिकृच्छ्रमहाकृच्छ्रचान्द्रायणादीनि प्रायश्चित्तानि तपोरूपाणि यानि वाजपेयराजसूयाश्वमेधादीनि कर्मात्मकान्यशेषाणि प्रायश्चित्तानि । वै प्रसिद्धौ । शास्त्रप्रसिद्धानीत्यर्थः । तेषामशेषाणामपि प्रायश्चित्तानाम् । पञ्चम्यर्थे षष्ठी । तेभ्यः सर्वेभ्यः कृष्णानुस्मरणं परम् । 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण

इत्यभिधीयते' इति स्मरणात् कृष्णः सदानन्दस्वरूपः परमात्मा परं ब्रह्म तस्यानुस्मरणं अविक्रियं ब्रह्मैवाहमिति गुरूपदेशानुरूपेण स्वात्मनानुभव एव परमुत्कृष्टतमं सुकरं च प्रायश्चित्तम्। अत्रायमभिप्रायः—यत्पापमुद्दिश्य कृच्छ्रादि क्रियते तेन तत्पापमेव गच्छति नत्वन्यत्संचितं चागामि च। कृष्णानुस्मरणं तु 'अहं ब्रह्मेति मां ध्यायन्नेकाग्रमनसा सकृत्। सर्वं तरति पाप्मानं कल्पकोटिशतैः कृतम्॥' इतिन्यायेन शतकोटिकल्पार्जितं भूतं भवच्च भावि च सर्वं पापं पुण्यं च विध्वस्य मोक्षं प्रयच्छत्यतो ब्रह्मानुसंधानं सर्वोत्तमं प्रायश्चित्तमिति॥ ३०॥

कुर्वन्तु नाम कृच्छ्रचान्द्रायणाश्वमेधादीनि तपःकर्मात्मकानि प्रायश्चित्तानि तथापि तेषु यथोक्तदेशकालद्रव्यमन्त्रतन्त्रादिनियमावैकल्येन कृतेष्वेव शुद्धिः सिध्यति, तत्रापि षड्रात्रद्वादशरात्रपक्षमाससंवत्सरादिव्यवधानेन दैर्घकालिकी शुद्धिः सा च पारोक्षिकी न तथा मद्ध्यानेनेत्याह—

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति॥ ३१॥

क्षिप्रमिति। ब्रह्मविद्यतिर्मद्ध्यानेन क्षिप्रं शीघ्रमेवोत्तरक्षणे प्रत्यग्वृत्त्या स्वस्याविक्रियब्रह्मात्मत्वदर्शनसमकाल एव धर्मात्मा पुण्यात्मा शुद्धो भवति न तत्र नियमावैकल्यं कालदैर्घ्यं पापनिवृत्तेः पारोक्ष्यं चास्तीत्यर्थः। एतावन्मात्रमेव न भवत्यपि तु शश्वच्छाश्वतीं शान्तिं मुक्तिं निगच्छति। पुनरावृत्तिरहितां विदेहमुक्तिं प्राप्नोत्यित्येत्येतदर्थनिश्चयार्थो नीत्युपसर्गः। ब्रह्मविद्यतेरन्तरागतदोषविशेषैर्मुक्तिर्न प्रतिबध्यत एवेत्यस्मिन्नर्थे प्रतिज्ञां कुर्वित्याह—**कौन्तेयेति।** ब्रह्मैवाहमिति ज्ञानयोगबलेन ब्रह्मभावं भजतीति भक्तो ब्रह्मवित् हे कौन्तेय, मे मम भक्तो ब्रह्मनिष्ठो ब्रह्मविद्यतिर्न प्रणश्यति, मध्ये प्राप्तब्रह्मनिष्ठाविघ्नदोषेण दुर्गतिं दुर्योनिं वा न गच्छति, किंतु विघ्नकोटीः सर्वा मदनुग्रहेण मन्निष्ठया च निर्मूल्य विदेहमुक्तिं प्राप्नोत्येव नात्र संशयस्त्वमस्मिन्नर्थे प्रतिजानीहि भगवद्भक्तो ब्रह्मविन्न नश्यतीति प्रतिज्ञां कुरु। 'योगक्षेमं वहाम्यह'मिति मया प्रतिज्ञातत्वादीश्वरैकशरणानां ब्रह्मविदां ब्रह्मनिष्ठानां न विघ्नैर्मुक्तिः प्रतिहन्यत इति गजघण्टया घोषयेत्यर्थः॥ ३१॥

एवमुपक्रान्तज्ञानस्य माहात्म्यं तत्फलं च प्रतिपाद्याधुना 'सुसुखं कर्तुम्' इति यदुक्तं तद्विशदयति—

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥ ३२॥

मां हीति द्वाभ्याम् । स्त्रियो वैश्यास्तथा शूद्रा येऽपि स्युरन्ये पापयोनयो नीचजन्मानो ये नीचकर्माणश्च म्लेच्छपुक्कसादयस्तेऽपि मां परमात्मानं सोपाधिकं निरुपाधिकं वा सद्गुरूपदेशजनितज्ञानेन व्यपाश्रित्य सम्यगुपास्य क्रमेण साक्षाद्वा परां गतिं परमपुरुषार्थं कैवल्यं प्राप्नुवन्तीत्यर्थः । हिशब्दः 'किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकङ्का यवनाः खशादयः । येऽन्ये च पापा यदुपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः' इत्यादिशास्त्रप्रसिद्धिद्योतनार्थः । एतेन स्त्रीशूद्रादीनामपि शास्त्रप्रज्ञाशून्यानां ज्ञानतत्फलप्राप्तिप्रतिपादनेन ज्ञानस्यातिसुलभत्वं सूचितं भवति ॥ ३२ ॥

श्रवणमननाद्ययोग्यानामनक्षरमुखानामपि स्त्रीशूद्रादीनां ज्ञानतत्फलसिद्धौ किमुत वेदशास्त्राध्ययननिपुणानां सद्धर्मनिष्ठानां ब्राह्मणादीनां ज्ञानं तत्फलं च सेत्स्यतीति कैमुतिकन्यायेन ज्ञानस्यातिसुलभत्वं सूचयन् शुद्धात्मनः सदसद्विवेकिनो ब्राह्मणादीन् मुमुक्षून् ज्ञानतत्फलसंपादने प्रवर्तयितुमाह—

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥

किं पुनरिति । पुण्या उत्तमजातयः अथवा पुण्यकर्माणः शुद्धात्मानो वा ब्राह्मणाः श्रोत्रियाः पुनस्तथा तथाविधा राजर्षयो राजसत्तमाः श्रवणादिभिर्लब्धज्ञानसंपत्त्या भक्त्या मन्निष्ठासंपन्ना भूत्वा परां निरतिशयानन्दरूपत्वादुत्तमां गतिं ज्ञानेन गम्यत इति गतिर्विदेहमुक्तिस्तां यान्तीति किमु वक्तव्यमित्यर्थः । ननु पुरुषार्थ इत्यत्र बहुव्रीहिर्वा कर्मधारयो वा तत्पुरुषो वा । नाद्यो न द्वितीयश्च । अर्थसांगत्याभावात् । न तृतीयोऽपि । न द्वितीयाचतुर्थीपञ्चमीषष्ठीसप्तमीतत्पुरुषः।अयोग्यार्थत्वात्। ननु पुरुषस्य योग्योऽर्थः पुरुषार्थ इति षष्ठीतत्पुरुष उपयुज्यत एवेति चेन्न । धर्मादौ स्त्रीणामयोग्यत्वप्रसङ्गात्परिशेषात्पुरुषेण साध्योऽर्थः पुरुषार्थ इति मोक्षस्यैव पुरुषार्थत्वं न तु धर्मादेः धर्मार्थकामानां स्त्रीसाध्यत्वसंभवात् । 'भर्तृशुश्रूषणं स्त्रीणामग्निहोत्रनिषेवणम्' इति स्त्रीणामपि स्वधर्मः शास्त्रीयः साध्यो विद्यत एव, ततो धर्मस्यास्त्येव स्त्रीसाध्यतत्तथैवार्थस्य कामस्यापि न तु मोक्षस्य तासां वेदशास्त्राध्ययनतदर्थविचारयोग्यत्वाभावात्तथैव शूद्रजातेरपि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यात्मसाक्षात्कारमुद्दिश्य श्रवणविधानात् । ननु तासां वेदान्ताध्ययनयोग्यत्वाभावेऽपि श्रवणयोग्यतास्त्येवेति चेन्न । 'मन्तव्यश्चोपप-

त्तिभिः' इति मननशक्त्यसंभवात् पदवाक्यप्रमाणज्ञस्यैव वेदान्तविचारमनननतदर्थाध्यवसायसामर्थ्यं युज्यते नेतरस्य पुरुषस्यापि किमुत स्त्रीणां न युज्यत इत्यतः स्त्रीणां मोक्षसाधनसंपादनायोग्यत्वान्न मोक्षाधिकारः यथा पुरुषाणाम् । ततः पुरुषेण साध्योऽर्थः पुरुषार्थ इति मोक्षस्यैव मुख्यं पुरुषार्थत्वं धर्मादेस्तु गौणम् । ननु धर्मोऽपि मोक्षवत्पुरुषेण साध्य एवार्थो भवति । 'उदिते सूर्ये प्रातर्जुहोति', 'अहरहर्यजमानः स्वयमेवाग्निहोत्रं जुहोति', 'विद्वान् यजते' इति धर्मस्यापि पुरुषार्थत्वश्रवणादितिचेन्न । अग्निहोत्रादेः स्त्रीपुरस्कारकत्वेन केवलपुरुषसाध्यत्वासंभवाद्धर्मानुष्ठानस्य ज्ञानसिद्धेरङ्गत्वात्तत्साध्यमोक्षस्यैव प्रधानत्वं धर्मस्य गुणभावस्तेन मोक्ष एव पुरुषार्थ इति स्थितम् । ननु 'स्त्रियो वैश्यास्तथा शूद्रा' इति स्त्रीशूद्राणामपि ज्ञानं तत्फलसिद्धिश्च प्रतिपाद्यत इति चेन्न । तद्वचनस्य स्त्रीशूद्रादीनामपि ज्ञानतत्फलसिद्धौ किमुत ब्राह्मणादीनां ज्ञानं तत्फलं च सिध्यतीति ज्ञानतत्फलसौलभ्यप्रतिपादनपरत्वेन स्वार्थे तात्पर्याभावात्ततो न स्त्रीणां ज्ञानाधिकारः । ननु गार्गीसुलभादिस्त्रीणां धर्मव्याधादिशूद्राणां च ज्ञानसंपत्तिः श्रूयते कथं स्त्रीशूद्रादीनां ज्ञानानधिकार इतिचेदुच्यते । धर्मव्याधः पूर्वं ब्राह्मणो ज्ञाननिष्ठः सन्नेव ब्राह्मणशापेन शूद्रो जातः । तत्रापि प्राक्तनपुण्यकर्मविशेषादेव ज्ञानी च । यथा ज्ञानिन एव ब्राह्मणस्य दुष्कर्मवशात् शूद्रयोनिस्तथा ब्राह्मणानामेव कर्मविशेषात् स्त्रीयोनिरुपयुज्यते । तासामपि तज्ज्ञानं प्राग्भवीयमेव नत्वाधुनिकम् । स्त्रीणां वेदान्ताध्ययनतदर्थविचारानधिकारात् । अतएव ततः सिद्धं पुरुषेण साध्योऽर्थः पुरुषार्थो मोक्ष एवेति । सोऽयं मोक्षः पुंस्त्वसिद्धेः साफल्याय पुरुषेण सदसद्विवेकवता मुमुक्षुणा सत्साधनसंन्यासपूर्वकं प्रयत्नेन संपादनीय इति बोधयितुमिदमाह—**अनित्यमिति** । नित्यो न भवतीत्यनित्यः 'मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना' इति देहस्य मृत्युग्रस्तत्वश्रवणादनित्योऽनिश्चितस्वभावः श्वः स्थास्यतीति विश्वसितुमयोग्य इत्यर्थस्तमनित्यम् । एतेन 'श्वःकार्यमद्य कुर्वीत' इति न्यायेन कालमविलम्ब्य पुरुषार्थसिद्धये धीमता क्षिप्रमेव प्रयतितव्यमिति सूचितम् । किंच असुखं दुःखात्मकमाध्यात्मिकाद्युपद्रवकोटिग्रस्तत्वाद्दुःखस्वरूपम् । एतेन यदा स्वस्थता देहस्य तदैव मोक्षाय यतितव्यमिति सूचितम् । लोक्यत इति वात्मस्वरूपं लोकयतीति वा लोको मानवो देहस्तमिमं मुक्तिसाधनं प्राप्य देहः क्षणभङ्गुरो दुर्लभश्च मानुष इति ज्ञात्वा तीव्रमोक्षेच्छावैराग्याभ्यां तु मां परमात्मानं मुक्तिप्रदातारं सोपाधिकं वा निरु-

पाधिकं वा भजस्व । श्रद्धाभक्तिभ्यामनुसंधेहि । यदि निर्विशेषविषयं ज्ञानमुपदिष्टं तेऽस्ति तदा निर्विशेषमेव मां महात्मानस्त्वित्युक्तरीत्या त्वमभेदेन भजस्व । तदभावे सोपाधिकमेव भेदेन भजस्वेत्यभिप्रायः ॥३३॥

निर्विशेषज्ञानानधिकारिणो मम सोपाधिकस्य तव भजनं कथं कर्तव्यमिति चेदुच्यते शृणु—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥ ९ ॥

मन्मना इति । मन्मनाः भूतानि विष्णुरिति न्यायेन सर्वात्मके मयि लग्नं मनो यस्य स त्वं मन्मना भव । वासुदेवः सर्वमिति जगत्सर्वं मामेव सदा भावय । यद्वा 'मनो मोक्षे निवेशयेत्' इति स्मरणान्मय्यानन्दात्मनि मोक्षस्वरूपे संस्थापितं मनो यस्य स मन्मना मोक्ष एवैकस्मिन्पुरुषार्थेऽतिसंसक्तमना भव । न तु धर्मफले चार्थे च कामे चेत्यर्थः । मुमुक्षोरेवं मोक्षैककामत्वमुक्त्वा तस्य कर्तव्यमाह— **मद्याजीति ।** मामेव परमेश्वरं श्रौतैः स्मार्तैश्च कर्मभिर्यष्टुं शीलमस्यास्तीति मद्याजी भव । मामेव कर्मभिर्यजस्वेत्यर्थः । कर्मकरणे त्वग्न्यादिदेवतासु भेदबुद्धिर्न कर्तव्या किंतु मद्बुद्ध्या भवितव्यमित्याशयेनाह— **मद्भक्त इति ।** ब्रह्मार्पणं ब्रह्महविरिति न्यायेनेज्यो यजनं यजमानो यागश्च सर्वं ब्रह्मैवेति सर्वत्र मद्बुद्ध्या मां भजतीति मद्भक्तो भव । सर्वत्र ब्रह्मबुद्धिं कुर्वित्यर्थः । तथैव मां नमस्कुरु वासुदेवः सर्वमिति सर्वं मामेव मत्वा नमस्कुरु । 'आश्वचण्डालगोखरम्' इति स्मरणात् । यद्वा मातृपितृगुरुदेवतादिभ्यो मद्बुद्ध्या प्रणामं च कुरु । किंच मत्परायणः अहमेव परमयनं गतिर्यस्य स मत्परायणः सर्वावस्थासु सर्वदा परमेश्वर एव मम गतिरिति मच्छरणो भव । यद्वा मत्प्रीतय एव लौकिकं वैदिकं च सर्वं कर्म करोतीति मत्परायणः सन्नेवमुक्तप्रकारेण युक्त्वा योगं कृत्वा कर्मयोगेन मामुपास्यान्ते आत्मानं परमात्मानं मामेव परं ब्रह्मैष्यसि क्रमेण प्राप्स्यसि । विदेहकैवल्यसुखं गमिष्यसीत्यर्थः ॥ ३४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः ।

पूर्वाध्यायान्ते 'मन्मना भव मद्भक्तः' इत्यर्जुनं प्रति मुमुक्षुस्त्वं चित्तशुद्धये तज्जन्यज्ञानद्वारा कैवल्यसिद्धये च सविशेषं मां ब्रह्मोपास्खेत्युक्तं, इदानीं मन्दप्रज्ञस्य मुमुक्षोस्तस्यैव तीव्रमोक्षेच्छया स्वोपास्तौ क्षिप्रप्रवृत्तिसिद्धये स्वोपास्तेः फलं स्वस्य च परमात्मन उपास्यस्य सर्वज्ञत्वं सर्वेश्वरत्वं सर्वार्थप्रदातृत्वं भक्तानुग्राहकत्वं विभूतिविशेषं च प्रतिपादयितुं दशमाध्याय आरभ्यते । तत्रादावर्जुनस्य श्रोतुरुपास्तौ रुच्युत्पत्तये मनो रञ्जयितुमिदं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥

भूय इति । हे महाबाहो, ज्ञातव्यस्य वस्तुनः परमसूक्ष्मत्वाद्दुर्विज्ञेयत्वात् सर्वव्यवहारागोचरत्वाच्च भूयः पुनरपि तदेव बोधयितुमुच्यमानं मे मम परमं परमार्थविषयं तन्निष्ठासिद्धिकारणं वचो वचनं शृणु । इदं श्रुत्वा तदर्थं ज्ञात्वा तरिष्यामीति तच्छ्रवणे प्रीयमाणाय प्रीतिं कुर्वते श्रवणोत्सुकायेत्यर्थः । ते तुभ्यं हितकाम्यया हितं नित्यनिरतिशयं सुखं तस्य संपादनेच्छया यद्वक्ष्यामि तच्छृण्वित्यर्थः । एतेन तच्छ्रुत्वा मत्वा तत्त्वं ज्ञात्वा तरिष्यामीति मोक्षैककामाय श्रद्धावत एव तत्त्वोपदेशः कर्तव्य इति सूचितम् ॥ १ ॥

ननु मम तत्त्वोपदेष्टारो महान्तो व्यासादयः सन्ति तेषां परमं वचः श्रुतवतो ममापि ज्ञानं भविष्यति किमर्थं त्वयैव वक्तव्यमित्यत आह—

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥

न म इति । सुरगणा इन्द्रादयो देवा महर्षयो भृग्वादयो व्यासादयश्च मे मम महदादिसर्वप्रपञ्चस्रष्टुः परमेश्वरस्य प्रभवं प्रभावं सृष्टिस्थित्यदनप्रवेशनियमननिग्रहानुग्रहादिसामर्थ्यं सर्वशः सर्वप्रकारैर्न विदुः न विजानन्ति । ननु देवा भृग्वादयश्चादिमा दिव्यज्ञानसंपन्नाश्च कथं त्वत्प्रभावं न जानन्तीत्यत आह—**अहमिति** । हि यस्मात्कारणाद्देवानां महर्षीणां च सर्वेषामुत्पत्तेर्वैभवसिद्धेस्तपःसिद्धेर्योगसिद्धेर्दिव्यज्ञानसिद्धेश्चाप्यहमेवादिः कारणं 'तस्माच्च देवा बहुधा संप्रसूताः' इति, 'यस्मिन् युक्ता महर्षयो देवताश्च' इति श्रवणान्मत्त एव तेषामुत्पत्तिः सर्वार्थसि-

द्विश्चातो मत्तोऽर्वाचीनास्ते मम महत्त्वं न विजानन्ति यथा पितृमहत्त्वं शिशुस्ततो मम महत्त्वमहमेवोपदेक्ष्यामीति ॥ २ ॥

ननु त्वयैव त्वन्महत्त्वमुपदिश्यतां तच्छ्रुतवतो मम तेन किं स्यादित्याकाङ्क्षायामाह—

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥

य इति । मर्त्येषु मरणशीलेषु शतकोटिसंख्याकेषु पण्डितेषु यो मुमुक्षया सदसद्विवेकवैराग्याभ्यामसंमूढः संमोहो विषयेष्विष्टताबुद्धिस्तद्रहितोऽसंमूढो विषयाशापिशाच्यवशो भूत्वा सुखसाधनं सर्वं संन्यस्य मत्प्रसादसंपन्नः सन् श्रवणमननादिसमुत्पन्नज्ञानेनाजं जन्मादिरहितम् । जन्माद्यसंभवे कारणमाह—**अनादिमिति ।** 'न तस्य कश्चिज्जनिता न चाधिपः' इति श्रवणादादिर्जन्मादिकारणं निमित्तमुपादानं च न विद्यते यस्य सोऽनादिस्तमत एवाजं नित्यम् । नन्वनादित्वाजत्वयोः शशविषाणस्यापि संभवात्तस्यापि नित्यत्वं स्यादित्यतिव्याप्तौ स्वस्य भावत्वमदृश्यत्वं परममहत्त्वं श्रुत्यनुमानगम्यत्वं च सूचयितुमाह—**लोकमहेश्वरमिति ।** यस्य सन्निधिमात्रेण लोको जगत्सर्वं चेष्टते स ईश्वरः यथा रथो जडो रथिकेन चेष्टते तथा जडं जगत्सर्वंचेतनेनैव चेष्टते ततो जगच्चेष्टाक्रियया तद्धेतोश्चेतनस्य सत्त्वभावत्वं परममहत्त्वं चानुमीयते । य ईशः अस्य जगतो नित्यमेवेति श्रूयते च । ततोऽनादिमजं महांश्चासावीश्वरश्च महेश्वरः लोकस्य महेश्वरो लोकमहेश्वरस्तं सर्वप्रपञ्चप्रवर्तकं चकारात्कूटस्थासङ्गचिद्रूपं मां निर्विशेषं परं ब्रह्म वेत्ति यः साक्षादिदमेवाहमस्मीति स्वात्मना विजानाति स ब्रह्मविद्यतिः सर्वपापैः सर्वैर्बुद्धिपूर्वकैरबुद्धिपूर्वकैश्च पापैः पापकार्यैर्दुःखदुर्योनिदुर्गतिश्च प्रमुच्यते । पापैः पापकार्यैश्च न किंचित्संबध्यत इत्यर्थः । ब्रह्मविदः सर्वात्मदर्शिनः बुद्धिपूर्वकं पापाचरणं न संभवति तत्सत्त्वे ब्रह्मवित्त्वासंभवात् । पापपुण्यकर्माचरणस्य देहजातिवर्णाश्रमाद्यभिमानैकमूलत्वात्तत्सत्त्वे त्वमुष्य ब्रह्मवित्त्वमेव न संभवति । ब्रह्मवित्त्वं नाम ब्रह्मण्येव सर्वदृश्यविलक्षणे आत्मत्ववेदनं तत्सत्त्वे देहाद्यहंभावाभाव एव । तत्सत्त्वे तु ब्रह्मण्यात्मत्वभावनाभावः द्वयोर्विपरीतप्रत्यययोस्तेजस्तिमिरयोरिव युगपत्क्रमाद्वाप्येकाधिकरणत्वं न संभवति । असत्येवानात्मन्यहंभावे तदाश्रितजात्याद्यभिमाने च विदुषः कर्मकर्तृत्वं नास्ति । ततो न बुद्धिपूर्वकं विदुषः पापाचरणं संभवति । ननु देहात्मना पापं कृत्वा मया पापं कृतमिति

क्वचित्कर्तृत्वप्रत्ययः पुनरविक्रियब्रह्मात्मना नाहं कर्तास्मीत्यकर्तृत्वप्रत्ययश्चैकस्य क्रमादुपयुज्यत एवेति चेन्न। तथात्वे सार्वात्म्यदर्शनविच्छित्तिप्रसङ्गात्सार्वात्म्यदर्शनं देहाद्यात्मत्वबुद्धिः पापाचरणं च विदुषो न संभवति। अहं ब्रह्मविन्न मे दोषोऽस्तीति प्राणिहिंसां वा यथेष्टाचरणं वा यः करोति स ब्रह्मविदेव न भवति सर्वभूतसुहृच्छान्त इत्यादिब्रह्मविल्लक्षणाभावादतो न बुद्धिपूर्वकं विदुषः पापाचरणं किंत्वबुद्धिपूर्वकं क्वचित्संभवति ज्ञानेन तस्य निवृत्तिस्तथापि ज्ञानस्य माहात्म्यं स्तूयते। द्विविधैरपि पापैः प्रमुच्यत इति। यद्वा अनादिं जन्मादिकारणवर्जितं अतएवाजं जन्मादिसर्वविकारशून्यं लोकमहेश्वरं सर्वेषां लोकानां महान्तमीश्वरं निरतिशयैश्वर्यसंपन्नं निग्रहानुग्रहकर्तारं मोक्षप्रदातारं च मां परमात्मानं यो वेत्ति शास्त्राचार्योपदेशाभ्यां ज्ञात्वा मोक्षेच्छया यो मामुपास्ते स मर्त्येषु मृत्युग्रस्तेष्वयमेवासंमूढः संमूढः सदसद्विवेकशून्यस्तद्विलक्षणत्वादसंमूढः यस्मात्कामाग्निना सर्वेषु दंदह्यमानेषु स्वयं तदविषयो भूत्वा मोक्षमेवापेक्षमाणः सन् श्रद्धाभक्तिभ्यां मामुपास्ते तस्मादसावसंमूढो मद्भक्तः सर्वपापैर्यानि मनोवाक्कायकृतानि जन्मान्तरीयाण्याधुनिकानि च तैः सर्वैः पापैर्ज्ञानोत्पत्तेः प्रतिबन्धकैर्मदुपास्त्या प्रमुच्यते प्रकर्षेण निःशेषं मुच्यते प्रमुच्यते। 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' इति स्मरणात् सत्त्वप्रधानया मदुपास्त्या सर्वपापविनिर्मुक्तः सन् ज्ञानं प्राप्य मुक्तो भवतीत्यर्थः ॥ ३ ॥

स्वोपास्त्या सर्वपापविनिर्मुक्तानां मुमुक्षूणां स्वस्मादेव ज्ञानसाधनं च भवतीत्याह—

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः।
सुखं दुःखं भवो भावो भयं चाभयमेव च ॥ ४ ॥
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥ ५ ॥

बुद्धिरिति द्वाभ्याम्। ज्ञानं ब्रह्मात्मैकत्वविषयं परोक्षमपरोक्षं च। बुद्धिस्तदेवाहमिति ज्ञातुर्ब्रह्ममात्रत्वनिश्चयात्मिका। असंमोहः पुनर्विपरीतभावनानुदयः। क्षमाऽऽध्यात्मिकाद्युपद्रवसहिष्णुता। सत्यं यथार्थवचनम्। सत्यमिति ब्रह्मचर्यादीनामुपलक्षणम्। दमो बाह्येन्द्रियनिग्रहः। शमोऽन्तःकरणस्य विषयप्रवृत्त्युपरमः। अहिंसा ब्रह्मनिष्ठया स्वाऽहिंसनम्। समता सर्वत्र समदर्शनम्। तुष्टिः स्वानन्दानुभवः। तपश्चित्तैकाग्र्यम्। दानं दण्डन्यासः। मनोवाक्कायकर्मभिः प्राणिनामदण्डनमपीडनमित्यर्थः।

'दण्डन्यासः परं दानम्' इति स्मरणात् । यशः ब्रह्मविदयमिति सर्वत्र कीर्तिः । अयशो दुष्कीर्तिः । अयश इत्यबुद्धिरज्ञानं संमोहः । अक्षमा असत्यमदमोऽशमः हिंसा इत्यादीनामुक्तविपरीतानामुपलक्षणम् । सुखं वैषयिकम् । दुःखमाध्यात्मिकाद्युपद्रवनिमित्तकम् । भवः उत्पत्तिः । अभावो विनाशः । भयं भूतेभ्यस्त्रासः । अभयं तदभावः । एवं पृथग्विधा नानाप्रकारा उक्ता अनुक्ताः कामक्रोधलोभमोहदम्भदर्पासूयाहंकारादयो भावा विकारा राजसास्तामसाश्चाबुद्ध्याद्ययशोऽन्ता बन्धहेतवो गुणवद्भ-जनशून्यानां भूतानां प्राणिनां मत्त एवेश्वराद्भवन्ति बुद्ध्यादियशोन्तानि मुक्तिसाधनानि मद्भजनवतां मत्त एव भवन्त्यतो मुमुक्षुभिर्मदुपासनमवश्यं कर्तव्यम् । मदुपास्त्या सर्वपापनिवृत्तिर्ज्ञानं च ससाधनं सिध्यतीति भावः । एतेन 'संसारमोक्षस्थितिबन्धहेतु'रित्यादिश्रुतिप्रसिद्धं संसारबन्धतन्मोक्ष-कारणत्वं स्वस्य प्रतिपादितं भवति । तेन मुमुक्षुभजनीयत्वं च सिद्धमिति द्वयोरर्थः ॥ ४ ॥ ५ ॥

'भवन्ति भावा भूतानाम्' इति स्वस्य मुमुक्षूपास्यत्वे कारणं दुष्टशिष्ट-निग्रहानुग्रहसामर्थ्यं बन्धमोक्षहेतुत्वं सर्वतन्त्रस्वातन्त्र्यं सर्वज्ञत्वं सर्वेश्वरत्वं च सूचयित्वाऽधुना सामान्येन स्वविभूतिं मन्दप्रज्ञानामुपासनीयं वस्तु निर्दिशति—

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥ ६ ॥

महर्षय इति । पूर्वे सर्वेभ्यः प्राक्तनाः सप्त भृग्वादयो वसिष्ठान्ता महर्षयस्तथा पूर्वे प्राचीनाः स्वायंभुवादयश्चत्वारो मनवश्च मम जगत्स्र-ष्टुर्ब्रह्मणः संकल्पात्मकान्मनसो जाता मानसास्तत एव मद्भावा मम पर-मेश्वरस्य स्वरूपत्वेन भाव्यन्त इति मद्भावाः । मम विभूतय इत्यर्थः । लोके लोकत्रितये येषां भृग्वादीनां स्वायंभुवादीनां च संबन्धिन्य इमाः सर्वत्र परिदृश्यन्ते स्थावरजंगमात्मिकाः प्रजाः । एताः सर्वा अपि मम विभूतय एवेत्यभिप्रायः । एतेन चराचरात्मकं विश्वं सर्वं मम ब्रह्मणो विभूतिरेवेति सूचितं भवति ॥ ६ ॥

एवमात्मीयं योगजमैश्वर्यं विभूतिं च प्रतिपाद्यैतद्द्वयं सम्यग्विदितवत-स्तद्वेदनस्य फलमाह—

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥ ७ ॥

एतामिति । मम निर्विशेषस्यैव परस्य ब्रह्मणः एतां प्रतिपादितां

विभूतिं मायया विविधाकारेण भवनं विभूतिस्तां सर्वात्मतां योगं च मायायोगजमैश्वर्यं सृष्टिस्थित्यदनप्रवेशनियमननिग्रहानुग्रहादिसामर्थ्यं चैतत्सर्वं तत्त्वतो याथार्थ्येन यो विचक्षणः शास्त्राचार्योपदेशजन्यविवेकविज्ञानेन वेत्ति नेदं जगत्किंतु परमात्मनः स्वरूपमेवेति सर्वं मत्स्वरूपत्वेन मामेव बन्धमोक्षयोः सर्वस्य च कारणत्वेन सम्यग्विजानाति स मुमुक्षुरविकम्पेन विकम्पो विकल्पस्तद्रहितेन योगेन मदुपास्तियोगेन युज्यते युक्तो भवति। मोक्षेच्छया सर्वत्र विरक्तो भूत्वा श्रद्धाभक्तिभ्यां वासुदेवः सर्वमिति सर्वत्र मद्बुद्ध्या मामेवोपास्ते नात्र संशयः। मुमुक्षुः सर्वं संन्यस्य श्रवणादिनिष्ठया मामेवोपास्त इत्यत्र संशयो न कर्तव्य इत्यर्थः ॥ ७॥

तस्य वस्तुतत्त्वनिश्चयप्रकारं चोपास्तिं च विस्पष्टयति—

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ ८॥

अहमिति। अहं निर्विशेषः परमात्मैव मायाशबलितः सन् सर्वस्य प्रपञ्चस्य प्रभवः प्रभवत्यस्मादिति प्रभव उपादानं कार्यं सर्वं कारणमात्रमेवेति न्यायेन सर्वं परमात्मस्वरूपमेवेति च मत्तः परमात्मनः सकाशादेव बुद्धिर्ज्ञानमित्युक्तरीत्या मोक्षसाधनं मोक्षश्च बन्धसाधनं संसारश्च सर्गश्चाभ्युदयः सर्वं प्रवर्तते। प्राणिनां प्रवृत्तिर्निवृत्तिश्च सिध्यत्यतः सर्वकारणं ममेश्वर एवेति मत्त्वा श्रुतियुक्तिगुरूक्तिभिर्निश्चित्य बुधाः परोक्षज्ञानिनो मुमुक्षवः भावसमन्विताः भावः सर्वं ब्रह्मैवेत्येवंलक्षणस्तेन समन्विताः सर्वत्र मद्भावनायुक्ताः सन्तः सर्वदा मां सर्वात्मकं परमात्मानं भजन्ते शृण्वते मन्वते ध्यायन्त्येवमुपासत इत्यर्थः ॥ ८॥

तदुपास्तिप्रकारमेवाह—

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ ९॥

मच्चित्ता इति। मच्चित्ता मयि सर्वभूतात्मके सविशेषे ब्रह्मणि चित्तं सर्वं ब्रह्मैवेति वासनापन्नं येषां ते मच्चित्ताः, मद्गतप्राणाः मद्गता मत्तत्त्वप्रतिपादकवाक्योच्चारणे तदर्थश्रवणे तन्निश्चितार्थदर्शने च तत्पराः प्राणा वागादीन्द्रियाणि येषां ते मद्गतप्राणा भूत्वा बुधाः परस्परं स्वस्वप्रज्ञानुसारेण वाक्यार्थं बोधयन्तस्तथा परस्परं स्वानुभवं कथयन्तश्च सन्तः स्वानुभवानुरूपेण तुष्यन्ति चानन्दन्ति च सदैवं वेदान्तेषु रमन्ते सर्वं मामेव पश्यन्तः शृण्वन्तो भावयन्तश्च कालं नयन्तीत्यर्थः ॥ ९॥

एवं मुमुक्षूणां श्रवणश्रावणादिभेदेन भजनप्रकारमुक्त्वाऽधुना स्वानुग्रहप्रकारमाह—

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १० ॥

तेषामिति द्वाभ्याम् । सततयुक्तानां सततं सर्वदा वेदान्तश्रवणादिष्वेव परिनिष्ठितानां प्रीतिपूर्वकं स्वस्वरूपसाक्षात्कारसिद्धय आसक्तिविशेषः प्रीतिस्तत्पूर्वकं श्रवणादिजन्यज्ञानानुरूपेण मां भजतां ध्यायतां तेषामहं परमात्मा तमेव बुद्धियोगं बुद्धिः स्वरूपज्ञानं सैव योगो बुद्धियोगस्तं ददामि । तेषां नित्यनिरन्तरश्रवणादिनिष्ठानामत्यन्तप्रीतिपूर्वकया मदुपास्त्या प्रीतः सन्नेवाहं सम्यग्दर्शनलक्षणं सर्वमिदमहं च ब्रह्मैवेति सर्वस्य चिदेकरसब्रह्ममात्रत्वावगाहकं ज्ञानयोगं मत्प्राप्तिप्रतिबन्धनिवर्तकं प्रयच्छामीत्यर्थः । श्रवणादिभिर्मद्भजननिष्ठा मदनुग्रहपात्रीभूतास्ते मद्भक्ता येन यादृशेन बुद्धियोगेन मां निर्विशेषं व्योमवन्निराकारं नित्यकूटस्थासङ्गचिद्रूपं सदानन्दैकरसं परं ब्रह्माद्वितीयमुपयान्ति इदमेवाहमित्यनात्मन्यात्मभावमुत्सृज्य मामेव स्वात्मत्वेन जानन्ति तादृशं मत्साक्षात्कारं प्रयच्छामीत्यर्थः । एतेन दिव्यमणिलक्षणं लक्षणज्ञाच्छृण्वतां तदुक्तिभिर्लक्षणं गृह्णतां लक्ष्ये सूक्ष्मबुद्ध्या युक्त्या च लक्षणमन्वेषयतां लक्ष्यलक्षणयोः साङ्गत्यमालोचयतां तदेव पुनःपुनः शृण्वतामालोचयतां सम्यक्पश्यतामेवेश्वरानुग्रहान्मणितत्त्वं विज्ञायते । न मणिं बहिः कीर्तयतामतत्त्वज्ञाच्छृण्वतामनालोचयतामसूक्ष्मबुद्धीनामयुक्तिकुशलानामसम्यग्दृष्टीनामनीश्वरप्रसादवतां दिव्यमणितत्त्वं गोचरीभवति तथैव ब्रह्मतत्त्वमपीति सूचितं भवति ॥ १० ॥ यद्वा 'मम यो वेत्ति तत्त्वतः' इत्येतद्वाक्यार्थे सम्यग्विचार्यमाणे 'एतां विभूतिम्' इत्यादि, 'येन मामुपयान्ति ते' इत्यन्तानां चतुर्णां श्लोकानामेवमर्थः—एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ॥ सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥ ७ ॥ एतां यथोक्तां विभूतिं महत्त्वविस्तारं योगं च सृष्टिस्थितिलयप्रवेशनियमनादिक्रियासामर्थ्यं च सर्वं मम निर्विशेषस्याविक्रियस्य परस्य ब्रह्मणो माययैव नतु वस्तुतोऽस्तीति तत्त्वतो यथाभूतार्थदर्शनेन यो ब्रह्मविद्यतिः सद्गुरुप्रसादलब्धात्मविज्ञानो वेत्ति सर्वमिदं मायिकं मिथ्यैवेति विजानाति स ब्रह्मविदविकम्पेन विकम्पो विक्षेपस्तद्रहितेन ब्रह्मात्मैकत्वविज्ञानदार्ढ्याद्विकल्पनिर्मुक्तेन योगेन सम्यग्दर्शनलक्षणेन युज्यते देहादावात्मभावमुत्सृज्य ब्रह्मैवाहमिति ब्रह्मण्ये-

वात्मत्वबुद्ध्या निश्चलो भवति न पुनरहमिदं ममेति विकल्पं भजते नात्र संशयः कर्तव्यः ॥ ७ ॥ 'मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्' इत्यादिश्रुतिप्रसिद्धं ब्रह्मात्मैकत्वविज्ञाननिष्ठावतामनुभवमाह—'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते। इति मत्वा भजन्ते मां बुधा भावसमन्विताः' ॥ ८ ॥ प्रतीयमानस्यास्य सर्वस्य जगतोऽहमेव परं ब्रह्म प्रभवः उपादानम्। मय्येव सर्वं प्रतीतमित्यर्थः। मत्तो मत्सन्निधानादेव सर्वं जगत्प्रवर्तत इत्यर्थः। इत्येवं जगत्प्रतीतेस्तत्प्रवृत्तेश्च स्वमेव परं ब्रह्म कारणं मत्वा बुधा ब्रह्मविदो भावसमन्विताः भावो ब्रह्मण्येवात्मभावस्तेन समन्विताः समेताः सन्तो मां परं ब्रह्म भजन्ते ब्रह्मैवाहमहमेव ब्रह्मेत्यनुसंदधत इत्यर्थः ॥ ८ ॥ तद्भजनप्रकारमेवाह—'मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्। कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च' ॥ ९ ॥ शास्त्रार्थं शिष्यान्बोधयन्तः परस्परं स्वस्वानुभवं कथयन्तस्ते बुधा मच्चित्ता मय्येव प्रत्यगभिन्ने परे ब्रह्मणि चित्तं मदाकाराकारितं येषां ते मच्चित्ताः। मद्गतप्राणा मद्गता मद्भावं गमिताः प्रत्यग्वृत्त्या मदात्मना प्रविलापिताः प्राणा इन्द्रियादयो येषां ते मद्गतप्राणाः सन्तः वृत्त्यारूढं मामानन्दैकरसमनुभूय तुष्यन्ति संतोषं वहन्ति नित्यमेवं रमन्ति मय्येव सर्वदा रमन्ते च। मामेव नित्यं बोधयन्तं कथयन्तो ध्यायन्तश्च बुधाः कालं नयन्तीत्यर्थः ॥ ९ ॥ एवं ब्रह्मविदां यतीनां स्वभक्तानां स्वभजनप्रकारमुक्त्वाऽधुना स्वानुग्रहप्रकारमाह—'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १० ॥ सततयुक्तानां सततं सर्वदा युक्तानां मयि परे ब्रह्मण्येव सदा समाहितचित्तानामेव भजतां मामेव भजन्तीति भजन्तो भक्तास्तेषां भजतां भक्तानां तेषां बुधानां ब्रह्मविदां प्रीतिपूर्वकं 'भक्तास्तेऽतीव मे प्रियाः' इति वचनादैहिकामुष्मिकं सुखं तत्साधनजातं च सर्वं संन्यस्य स्वदेहजीवनादावप्याशां परित्यज्य मोक्षैकवाञ्छया मदीयमेव परं तत्त्वं सच्चिदानन्दघनमितरानवगाह्यमजस्रं तदेकप्रीत्या भजत्सु तेषूत्तमभक्तेषु समुत्पन्ना या प्रीतिः एते मद्भक्तवर्या मत्प्राप्तयेऽत्यन्तश्रमं कुर्वन्तीति दयारसार्द्रान्तःकरणवृत्तिविशेषः प्रीतिस्तत्पूर्वकमेवाहं बुद्धियोगं बुद्धिर्निःशेषनिर्मुक्तविपरीतप्रत्ययं सन्मात्रैकविषयं सम्यग्दर्शनं तेन योगं वृत्तेः संयोगं ददामि। अहमिदमद इत्यादिभेदप्रत्ययशून्यां ब्रह्मैकगोचरामखण्डात्मिकां वृत्तिं प्रयच्छामीत्यर्थः। येन यादृशेन मत्प्रसादप्राप्तेन बुद्धियोगेन ते बुधाः मामद्वितीयं निर्विशेषं

सच्चिदानन्दघनं परं ब्रह्मोपयान्ति स्वात्मत्वेन विज्ञाय तद्भावं प्राप्नुवन्ति तं प्रयच्छामीत्यर्थः । एतेन शतधा कृतश्रवणश्रावणानामपि यतीनां सततयुक्तानामेवेश्वरः प्रसीदति प्रसन्नः सन्सम्यग्दर्शनं च प्रयच्छति नेतरेषाम् । अतो मुमुक्षूणां विज्ञातात्मतत्त्वानां यतीनां निरन्तरब्रह्मनिष्ठया भवितव्यमिति सूचितम् ॥ १० ॥

ननु 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रवणादनन्तस्य परिपूर्णस्य ब्रह्मणस्तव प्राप्तिस्तेषामस्त्येव । 'ददामि बुद्धियोगं तं येन मामुपयान्ति ते' इत्युक्तिरयुक्तेति चेत्सत्यम् । सर्वात्मकं मां परं ब्रह्म सर्वे प्राप्ता एव भवन्ति तथाप्यज्ञानेन मां प्राप्तमप्राप्तमेव मन्यन्ते मूढाः । यथा प्रातः प्राप्तमप्यर्कालोकमप्राप्तमेव मन्यन्ते जात्यन्धास्तद्वत्तत एव मद्भजनशीला ये तेषां मत्प्राप्तिज्ञानावरकमज्ञानमहं नाशयामीत्याह—

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

तेषामिति । मच्चित्तत्वादिभिः सततयुक्तत्वादिभिश्च ज्ञानपरिपाकसाधनैर्ये मां भवमुक्त्यै भजन्ति तेषां मद्भजनैकनिष्ठानां ब्रह्मविदामनुकम्पार्थमेते निरन्तरसमाधिनिष्ठालक्षणे मद्भजने श्राम्यन्त्यमीषां श्रमनिवृत्तिः कथं स्यादिति समुत्पन्ना या अनुकम्पा दया तदर्थं तन्निमित्तमेवाहं परमात्माऽऽत्मभावस्थः आत्मनः प्रतीचो मम भावो भावना ध्यानात्मिका वृत्तिस्तत्रस्थः मद्ध्यानवृत्तेश्चक्षुः सूर्य इव सम्यग्विषयीभूयेत्यर्थः । यद्वा आत्मान्तःकरणं तस्य भावो वृत्तिस्तत्र प्रत्यग्रूपेण तिष्ठतीत्यात्मभावस्थः प्रत्यग्वृत्तावाविर्भूतः सन् ज्ञानदीपेन ज्ञायते वस्तुतत्त्वमनेनेति ज्ञानमात्मस्वरूपप्रकाशको बुद्धिवृत्तिविशेषः स एव दीपो ज्ञानदीपस्तेन ज्ञानदीपेन भास्वता नित्यनिरन्तरसमाधिनिष्ठासंभाविताप्रतिबद्धभावेन निरङ्कुशप्रकाशवता ज्ञानदीपेनाज्ञानजमज्ञानमनाद्यविद्यालक्षणं तस्माज्जातमज्ञानजमावरणात्मकं तमो नाशयामि । घटाद्यावरकं तम उदयाचलारूढः सूर्यः स्वप्रभया यथा विध्वंसयति तथा मामेव निरन्तरं ध्यायतां सतां निवृत्तिफलकारूढो भूत्वाऽहं मत्प्रकाशव्याप्तधीवृत्तिविशेषेण मत्स्वरूपावरकमविद्याध्वान्तं निःशेषं विध्वस्य स्वात्मतत्त्वमविद्यातत्कार्यतद्धर्मतत्कर्मतल्लक्षणतदवस्थातदाभाससंबन्धलेशशून्यं आकाशवन्नित्यनिरन्तरं निर्विकल्पं निराकारं निर्विकारं निरञ्जनं निष्क्रियं नित्यशुद्धबुद्धमुक्तस्वभावमात्मानमनाद्यन्तमनन्तमखण्डानन्दैकरसं परिपूर्णमिदमेवाहमिति मय्येव परे ब्रह्मण्यात्मतत्त्वप्रत्ययो विस्पष्टतरो यथा स्यात्तथा प्रकाशयामीत्यर्थः ।

एतेन 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्' इति एतच्छ्रुत्युक्तरीत्या तीव्रमोक्षेच्छातीव्रवैराग्याभ्यां निदिध्याससमाधिषु परिश्रान्तस्यैव यतेरीश्वरप्रसादस्तेनैव सम्यग्दर्शनं तत एवाविद्याध्वान्त-निःशेषनिवृत्तिस्तयैव विदेहकैवल्यसुखसिद्धिरिति सूचितम् ॥ ११ ॥

एवं मन्दप्रज्ञस्य मुमुक्षोः स्वमुपासितुं सामान्येन विभूतियोगं प्रतिपाद्य स्वोपास्त्या विशुद्धात्मनो विज्ञातात्मतत्त्वस्य यतेर्निर्विशेषोपासनं तत्फलं च भगवता सम्यक्प्रतिपादितं तच्छ्रुत्वा स्वयं निर्विशेषस्वरूपस्य मूढानुपास्यत्वं निश्चित्य मुमुक्षोरतिमन्दबुद्धेः सर्वात्मकमीश्वरस्वरूपं सविशेषमप्युपासितुमशक्यमिति मन्वानस्तदनुजिघृक्षया तद्बुद्धेरनुरूपं सोपाधिकस्यैव परमेश्वरस्य स्वरूपविशेषं विस्तरेण प्रष्टुकामः सन्नर्जुनः परमेश्वरं स्तौति—

अर्जुन उवाच ।

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२ ॥
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥

परमिति द्वाभ्याम् । परं सविशेषाद्विलक्षणमप्राकृतमतिसूक्ष्मम-तीन्द्रियमनुदयास्तमयवृद्धिक्षयमाद्यन्तमप्रमेयं धाम केवलकूटस्थासङ्ग-चित्सकृत्स्मृतिमात्रेण शतकोटिकल्पार्जितपापपटलविध्वंसकत्वात्परममु-त्कृष्टतमं वाय्वर्काग्न्यादीनामपि पावकत्वात्तेभ्योऽप्युत्तमं पवित्रं पावनं यत् 'सत्यं ज्ञानमनन्तं ब्रह्म' इति 'पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्' इत्यादिश्रुतिस्मृतिप्रसिद्धं निर्विशेषं ब्रह्म तद्भवानेव नान्य इत्यर्थः । ननु त्वमेव परं ब्रह्मेति निर्धार्यते कथमेतत्त्वया विदितमित्या-काङ्क्षायामाप्तवाक्याद्विज्ञातमिति सूचयिष्यन्नाह—**पुरुषमिति** । देवर्षि-र्नारदस्तथैवासितो देवलो व्यास इत्याद्याः सर्वे ऋषयस्त्वां शाश्वतं नित्यं दिवि स्वे महिम्नि स्थातुं योग्यं दिव्यं दिवि अव्याकृताकाशे बुद्धिगुहायां भवति सत्तां भजतीति वा तं दिव्यमादिदेवं सर्वकारणत्वादादिर्द्योतन-शीलत्वाद्देवः स चासौ देवश्च तमादिदेवमजं जन्मादिविकारवर्जितं विभुं व्यापकं परिपूर्णं पुरुषं परमात्मानमाहुर्वदन्ति । भक्त्या पृष्टा मह्यं कथ-यन्तीत्यर्थः । एतेन बहुभ्यः श्रोतव्यं ज्ञातव्यं वस्त्विति सूचितं भवति । किंच स्वयं चैव त्वमपि । 'भोक्तारं यज्ञतपसाम्' इति, 'सर्वभूतस्थितं

यो माम्' इति च स्वं परमात्मानं मे मह्यं ब्रवीषि कथयसि यस्मात्तस्मात्त्वमेव परं ब्रह्मेति द्वयोरर्थः ॥ १२ ॥ १३ ॥

ननु मयापि शतधाप्युक्तं ऋषिभिरपि सहस्रधा कथितं तदस्तु तव निश्चयः कथमित्यत आह—

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥

सर्वमिति । हे केशव, 'बहूनि मे व्यतीतानि' इति, 'मत्तः परतरं नान्यत्' इति, 'न मे विदुः सुरगणाः' इति, 'महर्षयः सप्त पूर्वे' इति च मां प्रति यद्वदसि तदेतत्सर्वमहमृतं सत्यमेव मन्ये । परमाप्तत्वात्परमेश्वरत्ववेदनकारणत्वाच्च तव वचनं यथार्थमित्येव वा धारय इत्यर्थः । हि यस्मात्कारणाद्देवा दानवाश्चार्वाचीनास्तस्मात्ते व्यक्तिं व्यज्यते सर्वमस्या इति व्यञ्जयतीति वा व्यक्तिस्तां तव स्वरूपमैश्वरमचिन्त्यमनन्तवैभवमप्रमेयप्रभावमनाद्यन्तं देवाः सर्वज्ञा अपीन्द्रादयो न विदुः दानवा मध्वादयोऽपि न विदुस्ततोऽर्वाचीनाः किंचिज्ज्ञा मनुष्या न विदुरिति किमु वक्तव्यमित्यर्थः ॥ १४ ॥

यस्मात्त्वं देवऋष्यादीनामादिस्तस्मात्स्वयमेवात्मानं जानासीत्याह—

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥

स्वयमिति । भूतान्याकाशादीनि स्तम्बान्तानि भावयति स्वस्मादेव संभावयतीति भूतभावन । भूतेश तान्येव भूतानीष्टे स्वयमन्तर्यामिरूपेण प्रवर्तयतीति भूतेश । अग्न्यादयः खलु वागादीन्यधिष्ठाय जगत्प्रवर्तयन्तीत्यत आह—**देवदेवेति** । देवानपि वह्न्यादीन्देवयति चेष्टयतीति देवदेव । 'य आदित्ये तिष्ठन्' इत्यादिश्रुतेः । देवानामपि देव पूज्येति वा देवदेव, स्वेन सृष्टं जगत्सर्वमन्नोदकादिरूपेण नियन्तृरूपेण च पातीति जगत्पते, पूर्णत्वात्पुरुषः सर्वमहत्त्वादुत्तमः पुरुषश्चासावुत्तमश्च हे पुरुषोत्तम, स्वयमेव त्वमात्मना स्वेनैव स्वमात्मानं वेत्थ पुरुषः स्वाङ्गसंपत्तिं बलपुष्टिजवारोग्यानारोग्याङ्गगुणवैकल्यावैकल्यधैर्यादिलक्षणां यथातथात्मीयवैभवं मायायोगविशेषविशेषितं त्वमेव जानासि न त्वन्यः परिच्छिन्नः किंचिज्ज्ञ इति भावः ॥ १५ ॥

यतः स्वेनैकेन वेद्यमहिमा त्वमतः स्वतत्त्वमेवेदं मह्यमुपदिशेत्याह—

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥

वक्तुमिति। दिव्यास्तेजोबलपौरुषशक्तिप्रकाशादिगुणैरप्राकृता आत्मनस्ते परमेश्वरस्य या विभूतयो महत्त्वविस्तारास्ता अशेषेण साकल्येन स्वीयमहत्त्वपारज्ञस्त्वमेव मे मह्यं वक्तुमर्हसि। याभिर्विभूतिभिरात्मनो विविधैर्भावैरिमान् परिदृश्यमानान् लोकान् स्वर्गमर्त्यादीन्व्याप्याऽऽपूर्य तिष्ठसि॥ १६॥

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन्।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया॥ १७॥

किंच **कथमिति**। योगिन् मायायोगजमैश्वर्यं योग इत्युच्यते सोऽस्यास्तीति योगी। हे योगिंस्त्वां सविशेषं परिचिन्तयन् सदा सर्वत्र ध्यायन्स्तुवन्नमस्कुर्वन्नहं शुद्धात्मा सन् त्वामवाङ्मनसगोचरं निर्विशेषं परं ब्रह्म कथं विद्यां केन प्रकारेण जानीयाम्। तादृशमहत्त्वविशिष्टं तव विभूतिविशेषं मे वक्तुमर्हसीति पूर्वेणान्वयः। त्वां कथं विद्यामिति प्रश्नो वा। हे भगवन्, जडाजडभेदेन देवदानवमर्त्यादिभेदेन वा बहुविधेषु भावेषु पदार्थेषु केषु केषु त्वं मया मुमुक्षुणा चिन्त्योऽसि ध्यातव्योऽसि। 'सर्वं विष्णुमयं जगदि'तिन्यायेन त्वदात्मके जगति कुत्रकुत्र तव विशेषस्फूर्तिः कुत्रकुत्र तव ध्यानं विशिष्य मया कर्तव्यमित्यर्थः॥ १७॥

प्रकृतं प्रश्नमुपसंहरति—

विस्तरेणात्मनो योगं विभूतिं च जनार्दन।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम्॥ १८॥

विस्तरेणेति। जायत इति जनो दृश्यवर्गस्तमन्तर्बहिश्च सर्वतोऽर्दति व्याप्नोतीति जनार्दनस्तस्य संबुद्धिर्हे जनार्दन सर्वव्यापिन्। आत्मनः परमात्मनस्तवेश्वरस्य योगं मायाकृतमैश्वर्यविशेषं विभूतिं च भूयः पुनरपि विस्तरेण नामरूपादिभेदैर्विशेषेण कथय। ननु 'अक्षरं ब्रह्म परमम्' इति, 'अहं क्रतुरहं यज्ञः' इति, 'महर्षयः सप्त पूर्वे' इत्यष्टमे नवमे दशमे च समासव्यासाभ्यां विभूतिरुक्ता, पिष्टपेषणन्यायेन पुनरुक्त्या किं साध्यमिष्यत आह—**तृप्तिरिति**। हि यस्मात्कारणात्तव परमेश्वरस्य वागमृतं शृण्वतः श्रोत्राभ्यां पिबतो मे तृप्तिर्नास्ति तस्मात्पुनः कथय। अत्रायमभिप्रायः—अष्टमेऽध्यात्मादिभेदभिन्नं सर्वं ब्रह्मेत्युपास्स्वेत्युक्तं तत्र सर्वात्मनि नामरूपजात्यादिभेदवासनादोषदूषितान्तःकरणस्य मूढबुद्धेर्भेदबुद्धिं विना अभेदबुद्ध्यनुदयादुपास्तिर्न संभवति। नवमेऽप्यहं क्रतुरिति सार्वात्म्यमेव प्रतिपादितं तत्रापि च मनो विशेषालम्बनाभा-

वान्न प्रविशति । दशमेऽपि सामान्येनैवोक्तं न तत्रापि मनसो विशेषालम्बनं दृश्यते । ततो मूढबुद्धेस्तदुपास्तौ बुद्धिस्थैर्याय विभूतिविशेषो विस्तरेण वक्तव्य इति ॥ १८ ॥

स्वयं सर्वज्ञोऽप्यर्जुनप्रश्नवाक्येन मूढबुद्धेः प्रज्ञामान्द्यमुद्दिश्य परितपन्निव दयया मन्दप्रज्ञाननुग्रहीतुमिदं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १९ ॥

हन्त त इति । हन्त बतैवं वा मूढबुद्धेः प्रज्ञा, हे कुरुश्रेष्ठ, तद्बुद्ध्यनुरूपा मम या दिव्या अप्राकृता विभूतयः स्वरूपविशेषास्तास्ते तुभ्यं कथयिष्यामि प्राधान्यतः प्राधान्येन, येषु येषु मम विभूतिभेदेषु तेजःशक्तिबलपौरुषविद्यामहत्त्वगुणविशेषैर्या या विभूतिः प्रधाना श्रेष्ठा भवति तां तां विभूतिं मूढानां प्रीत्युत्साहश्रद्धाभक्तिजनयित्रीं कथयामीत्यर्थः । ननु विशिष्टा अविशिष्टाश्च सर्वा विभूतयः कथ्यन्तामित्यत आह—**नास्तीति** । मे विभूतीनां मायाऽपरिमितशक्तिविजृम्भितानां विस्तरस्य बहुत्वस्यान्तो नास्ति ; गङ्गावालुकानां समुद्रजलकणानां नक्षत्राणां च संख्यापरिसमाप्तिरस्ति नतु मम विभूतिविस्तरस्येत्यर्थः ॥१९॥

मुमुक्षूणां चित्तशुद्ध्यै उपास्यन्विभूतिविशेषान्वक्ष्यामीत्युक्ते मुख्याधिकारिणामेतदुपास्तेरेव कर्तव्यत्वप्राप्तौ तेषां निर्विशेष एवोपास्यो नतु सविशेष इति ज्ञापयितुमादौ ब्रह्मविदुपास्यं वस्तु निर्दिशति—

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥ २० ॥

अहमिति । गुडाका निद्रा तस्या ईशः गुडाकेशः । स्ववशनिद्र इत्यर्थः । हे गुडाकेश, सर्वभूताशयस्थितः सर्वेषां ब्रह्मादिस्तम्बान्तानां प्राणिनामाशये आसमन्तात्सर्वतः शेते शयान इव नैश्चल्येनात्मा तिष्ठति यत्र स आशयो बुद्धिगुहा तत्र स्वरूपत्वेन सर्वप्रकाशत्वेन साक्षित्वेन च तिष्ठतीति सर्वभूताशयस्थितः । सर्वभूतादिवासः कूटस्थासङ्गचिद्रूप आत्मा प्रत्यगात्माहं ब्रह्मविदां यतीनामुपास्य इत्यर्थः । 'अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः' इत्यादिश्रुतेः । एवं मुख्याधिकारिणामुपास्यं निरूप्य मध्यमाधिकारिणामुपास्यमाह—**अहमिति** । भूतानामाकाशादीनामादिरुपादानमव्यक्तं तद्रूपश्च भूतानां

मध्यं स्थितिर्व्यक्तस्वरूपश्च भूतानामन्त एव चान्तः प्रलयस्तद्रूपश्चाहमुपास्यः। प्रपञ्चकारणरूपेण च प्रपञ्चरूपेण च प्रपञ्चप्रलयरूपेणापि च स्थितोऽहं सगुणः परमात्मा मध्यमानामुपास्य इत्यर्थः ॥ २० ॥

एवमुक्तममध्यमानामुपास्यभेदं निरूप्याऽधुनाधमानामुपासनार्थमात्मीयानेव विभूतिविशेषान्निरूपयति—

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ २१ ॥

आदित्यानामिति। द्वादशादित्याः सर्वेऽपि मम विभूतिरेव नामरूपादिभिर्विशेषाय भवतीति विभूतिस्तेषामादित्यानां मध्ये तु विष्णुरहं विष्णुर्नामादित्यः प्रभावातिशयेन मम विभूतिविशेषः। सोऽयं परमेश्वर एवेति मद्बुद्ध्योपास्य इत्यर्थः। ज्योतिश्चक्रे वर्तमानानि ज्योतींषि सर्वाणि च मम विभूतिरेव तेषां मध्ये त्वंशुमान् रविरहं तेजाधिक्येन मम विभूतिविशेषः। सोऽयं परमेश्वर एवेति मद्बुद्ध्योपास्य इत्यर्थः। मरुत इति देवताविशेषा मम विभूतिरेव तेषां मध्ये मरीचिरहं मरीचिर्नामदेवता मम विभूतिविशेषो मद्बुद्ध्योपास्य इत्यर्थः। अश्विन्यादिनक्षत्राणि सर्वाणि मम विभूतिरेव तेषां मध्ये शश्यहं शोभाधिक्येन मम विभूतिविशेषः सोऽयं मद्बुद्ध्योपास्य इत्यर्थः। एवं सर्वत्र षष्ठ्यन्तानां विभूतित्वं प्रथमान्तानां द्वितीयान्तानां च तद्विशेषत्वं चेश्वरत्वेनोपास्यत्वं च द्रष्टव्यम् ॥ २१ ॥

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥

वेदानामिति। भवन्तीति भूतानि शरीराणि जीवाधिष्ठितानि तेषां मध्ये चेतना बुद्ध्यादिस्थूलान्तं सर्वं चेतयतीति चेतना साभासा बुद्धिवृत्तिः साहमस्मीत्यर्थः। शिष्टं स्पष्टम् ॥ २२ ॥

रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम्।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥ २३ ॥

रुद्राणामिति। रुद्राणामेकादशानां मध्ये शंकराख्यो यः कश्चिद्रुद्रः सोऽहं। वित्तेशः कुबेरः। वसूनां मध्ये पावकोऽग्निः। शिखरिणां शिखरवतामत्युन्नतानां मध्ये मेरुरहम् ॥ २३ ॥

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥ २४ ॥

पुरोधसामिति। सरांसि पुण्यतीर्थानि तेषां मध्ये सागरोऽहम् ॥ २४ ॥

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ २५ ॥

महर्षीणामिति । गिरामर्थवाचकपदानां मध्ये एकाक्षरं प्रणवोऽहम् । स्थावराणामचलानां मध्ये हिमालयोऽहम् ॥ २५ ॥

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ २६ ॥
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥ २७ ॥

अश्वत्थ इत्यादिद्वयोः स्पष्टोऽर्थः ॥ २६ ॥ २७ ॥

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥

आयुधानामिति । कामधुक् कामधेनुः । प्रजनयिता कन्दर्पः कामोऽहम् ॥ २८ ॥

अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥ २९ ॥

अनन्त इति । नागानां मध्ये अनन्तः शेषोऽहं । यादसां जलदेवतानां मध्ये वरुणोऽहम् । संयमतां दुष्टनिग्रहं कुर्वतां मध्ये यमोऽहम् ॥ २९ ॥

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥ ३० ॥

प्रह्लाद इति । शुभमशुभं वृद्धिं क्षयं च कलयतां कुर्वतां मध्ये कालोऽहम् ॥ ३० ॥

पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥

पवन इति । पवतां पावनकर्तॄणां मध्ये पवनो वायुरहम् । शस्त्रभृतां मध्ये रामो दाशरथिरहम् । स्रोतसां स्रोतोवतीनां नदीनां मध्ये जाह्नवी गङ्गाहम् ॥ ३१ ॥

आदित्यादिविभूतीनां विष्णवादिविभूतिविशेषाणां च स्वमात्रत्वं सूचयितुं विकाराणां सर्वेषामादिर्मध्यं चान्तश्चाहमेव सर्वात्मा परिपूर्ण इत्याह—

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ ३२ ॥

सर्गाणामिति । सृज्यन्त इति सर्गा महदादिस्थूलान्ता विकारास्ते-

षामादिरुपादानकारणमहमेव । घटकरकादेर्मृद्वत् मत्त एव सर्वं समुत्पन्नमित्यर्थः । 'तस्मात्सर्वमभवत्' इति श्रुतेः । ननु सर्वविकारकारणत्वेनादौ सत्यपि सद्भावे तव कार्यदशायां सत्ताऽदर्शनात्सार्वात्म्यं पूर्णत्वं च न संभवतीत्याशङ्कायामाह—**मध्यं चैवेति** । मृत्कार्ये घटादौ गन्धवत्त्वादेर्मृद्धर्मस्य संदर्शनान्मृद एव समन्वयस्तेन घटादिसर्वं मृदेव यथा तथा महदादिषु सत्तास्फूर्त्यादेर्मृद्धर्मस्य संदर्शनान्ममैव समन्वयस्तेन सर्वमहमेव यस्मादेवं तस्मात्प्रपञ्चस्य मध्यं चाहमेव विकारात्मना स्थितोऽस्मीति सिद्धम् । ननु विकारात्मना स्थितत्वे तव विकारनाशान्नाशप्रसक्तौ सत्ताभावादनित्यत्वमसर्वात्मत्वमपूर्णत्वं च स्यादित्याशङ्कायामाह—**अन्तश्चेति** । कार्यस्यान्तस्त्वदर्शनलक्षणो यः सोऽप्यहमेव । कल्पितरूपस्य घटस्य नाशे सति तत्कारणस्य तदनुवृत्ताया मृदो नाशाभावादस्त्येव कपालतच्चूर्णाद्यनुवृत्ताया मृदः सत्ता तद्वन्महदादिसर्वविकारनाशेऽपि तत्कारणभूततदनुवृत्तमत्सत्ताया नाशाभावादस्त्येव मम सद्भावो नित्यत्वं सार्वात्म्यं पूर्णत्वं च । यतो विकाराणामादिरन्तश्च मध्यं चाहमेव मदतिरिक्तस्य वस्तुनः प्रमाणतो निरूपयितुमशक्यत्वादत आदित्यादिविभूतयो विष्ण्वादिविभूतिविशेषाश्च सर्वेऽप्यहमेवेति सिद्धम् । यद्वा 'सृष्टिस्थित्यन्तकरिणीं ब्रह्मविष्णुशिवात्मिकाम् । स संज्ञां याति भगवानेक एव जनार्दनः' इति वचनात्सृज्यन्त इति सर्गाः प्राणिनस्तेषामादिः सृष्टिकारणं ब्रह्माहमेव । अन्तश्च अन्तं करोतीत्यन्तः संहारकर्ता शिवः सोऽप्यहमेव । तथा मध्यं च । मध्यशब्देनात्र तदुभयमध्यवर्ती स्थितिकर्ता विष्णुर्लक्ष्यते सोऽप्यहमेवेत्यर्थः । विद्याज्ञानहेतवः सर्वे वेदाः शास्त्राणि च तासां मध्ये मोक्षहेतुत्वादध्यात्मविद्या उपनिषदस्त्वहमेव । प्रवदतां विवादं कुर्वताम् । अत्र प्रवदच्छब्देन वादजल्पवितण्डादयो लक्ष्यन्ते तेषां मध्ये त्वर्थनिर्णयहेतुत्वाद्वादोऽहमित्यर्थः ॥ ३२ ॥

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥ ३३ ॥

अक्षराणामिति । वर्णानामकारोऽहं सामासिकस्य समासानां समूहः सामासिकस्तत्र द्वन्द्वः समासोऽहं । विश्वतोमुखः धाता कर्मफलप्रदाताहम् । शिष्टं स्पष्टम् ॥ ३३ ॥

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥

मृत्युरिति । सर्वं हरतीति सर्वहरो मृत्युरहम् । भविष्यतां भाविनां मध्ये उद्भवोऽभ्युदयोऽहम् । नारीणां मध्ये कीर्त्यादिक्षमान्ता देवताः स्त्रियोऽहम् ॥ ३४ ॥

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५ ॥

बृहत्सामेति । सामवेदे यानि सामानि रथन्तरादीनि तेषां मध्ये बृहत्सामाहम् । छन्दसां गायत्र्यादिच्छन्दोयुक्तानां मन्त्राणां मध्ये चतुर्विंशत्यक्षरा गायत्री अहम् । मासानां चैत्रादीनां मध्ये मार्गशीर्षोऽहम् । ऋतूनां शिशिरादीनां मध्ये कुसुमाकरो वसन्तोऽहम् । शिष्टं स्पष्टम् ३५

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥

द्यूतमिति । छलं कपटस्तं कुर्वतां मायया परस्वहारिणां मध्ये द्यूतमहम् । सारिकाभिः क्रीडनं द्यूतं सर्वस्वहरणकारणम् । तेजः प्रागल्भ्यं तद्वतां तेजोऽहम् । जेतॄणां जयोऽहम् । व्यवसाय उद्योगस्तद्वतां व्यवसायोऽहम् ॥ ३६ ॥

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनंजयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥

वृष्णीनामिति । कवीनां तत्त्वज्ञानां मध्ये उशना शुक्रोऽहम् ३७

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥

दण्ड इति । दमयतां दुष्टशिक्षां कुर्वतां दण्डो दण्डनक्रियाहमस्मि । जिगीषतां जेतुमिच्छतां नीतिर्न्यायो धर्ममार्गः शास्त्रीयो यः सोऽहमस्मि । गुह्यानां गोपनीयानां मध्ये मौनं मननशीलत्वं यत्तदहमस्मि । ज्ञानवतां यज्ज्ञानं ब्रह्मात्मैक्यविषयं मुक्तिसाधनं तदहमस्मि ॥ ३८ ॥

एवं विभूतिविशेषमुक्त्वा तदुपक्रान्तमुपसंहर्तुं कार्यं सर्वं कारणमात्रमेवेति न्यायमनुसृत्य सामान्येन सर्वमहमेवेत्याह—

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥

यच्चेति । यच्च सर्वेषामप्याकाशादीनां बीजं संभूतिकारणमव्याकृताख्यं जगद्योनिस्तदहम् । एतेन कार्यस्य कारणमात्रत्वात्सर्वमहमेवेति

सूचितम् । सिद्धमेवार्थं व्यतिरेकमुखेनाह—**न तदस्तीति** । मया सच्चिदानन्दस्वरूपेणानन्तेन ब्रह्मणा विना भूतं मत्सत्ताऽव्याप्तं मद्भिन्नं चरमचरं वा यद्वस्तु स्यात्तज्जगत्त्रयेऽपि नास्ति । मद्व्यतिरिक्तं सद्वाऽसद्वा यत्किंचिद्यत्रकुत्रापि येन केनापि संभावयितुं न शक्यमित्यर्थः । एतेन सर्वमेवेति सिद्धम् । 'ब्रह्मैवेदं सर्वम्' इति श्रुतेः ॥ ३९ ॥

यस्माज्जगत्सर्वं ममैव विभूतिस्तस्मान्मद्विभूतीनामन्तो नास्तीत्याह—

नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥

नान्तोऽस्तीति । निर्विशेषे परे ब्रह्मणि स्वविकारैर्महदादिभिः साकमाविर्भावतिरोभावाभ्यां दीव्यति क्रीडतीति दिव्या त्रिगुणात्मिका माया ततो जाता दिव्या विभूतयस्तासां दिव्यानां मम ब्रह्मणो विभूतीनामन्तो नास्ति मन्मायाशक्तीनां तद्विकाराणां चानन्तत्वान्मम विभूतयोऽनन्तास्ततस्तासामन्त इयत्ता नास्तीत्यर्थः । ननु 'आदित्यानामहं विष्णुः' इत्यादिना कथमुक्तमित्यत आह—**एष इति** । य इदानीं ते विभूतेर्विस्तरो मया प्रोक्तः स एष तूद्देशतस्त्वामुद्दिश्य संक्षेपेण प्रोक्तो नतु विस्तरेण । मम ब्रह्मणो विभूतिः साकल्येन शतकोटिकल्पैरपि वक्तुं ज्ञातुं च न शक्यत इत्यर्थः ॥ ४० ॥

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥ ४१ ॥

यद्यदिति । लोकेऽत्र परत्र यद्यत्सत्त्वं चेतनमचेतनं वा विभूतिमत् विभूतिः प्राजापत्यस्य वा प्रभावस्य वा धनस्य वा पुण्यकर्मणां वा विद्याया वा तपसो वा शौर्यधैर्यौदार्यशमदामादिसद्गुणानां वा ज्ञानस्य वा समृद्धिरस्यास्तीति विभूतिमत् दृश्यते । तथोर्जितमोजसा तेजसा वा तरसा वा बलेन वा पौरुषेण वा सारेण वाकारेण वा दार्ढ्येन वा उत्साहेन वा महत्तरमूर्जितं यद्यद्दृश्यते तथा श्रीमच्छ्रीः शोभा लक्ष्मीर्वा कान्तिर्वा सरस्वती वा बुद्धिर्वा कीर्तिर्वा स्फूर्तिर्वाऽस्यास्तीति श्रीमद्यद्यद्दृश्यते तत्तद्वस्तु मम परमेश्वरस्य तेजोंशसंभवं सद्गुणैर्मे प्रभावं तेजयति प्रकाशयतीति तेजो मम शक्तिस्तस्या अंशः कला स एव संभव उत्पत्तिकारणं यस्य तन्मम तेजोंशसंभवमवगच्छ । एतत्परमेश्वरस्य विभूतिविशेष इति त्वं जानीहीत्यर्थः ॥ ४१ ॥

एवं मुमुक्षूणामतिमन्दबुद्धीनामुपासनार्थमयं परमात्मनो विभूतिविशेषत्वात् परमेश्वर एवेति ज्ञानार्थं च 'आदित्यानामहं विष्णुः' इत्येतदारभ्य 'ज्ञानं ज्ञानवतामहम्' इत्येतदन्तेन ग्रन्थेन स्वविभूतिविशेषान्प्रतिपाद्य, अधुना विभूतिविशेषज्ञानस्य तदुपास्तेरप्यकिंचित्करत्वसूचनद्वारा सविशेषमेव परमेश्वरमधिकारिणां प्रज्ञावतामुपासनीयं वस्तूपदिशन्नध्यायमुपसंहरति—

अथवा बहुनैतेन किं ज्ञानेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ४२ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः ॥ १० ॥

अथवेति । मदीयविभूतयस्त्वनन्तास्ता वक्तुं ज्ञातुं न शक्यन्ते । अथवाऽयमयं मम विभूतिविशेष इति बहवो मम विभूतिविशेषा उक्ता अपि शुद्धात्मनो मुख्याधिकारिणस्तव बहुना बहुप्रकारेण अनेन मद्विषयकेण ज्ञानेन किं किं फलं स्यात् । तज्ज्ञानेन तदुपास्त्या च चित्तशुद्धिर्वा मोक्षो वा न किंचित्फलं सिध्यतीत्यर्थः । ननु विष्ण्वादिव्यक्तिविशेषाणामपि तत्स्वरूपत्वात्तदुपास्त्या तज्ज्ञानेन च मुख्यं फलं स्यादेवेत्याशङ्कायाम् । न । विभूतिविशेषाणामप्यनन्तत्वात्तेष्वीश्वरत्वबुद्धौ सत्यामनेकेश्वरत्वज्ञानं स्यान्न तन्मोक्षहेतुर्भवति विभूतीनामनन्तत्वे तदुपास्तिरेकेन कर्तुं न शक्यते तासां च गुणविशेषतारतम्याच्चित्तस्य रागादिकालुष्यं विना प्रसादोऽपि न सिध्यति, अतो मुमुक्षुर्मुख्याधिकारी त्वं मामेवैकं सर्वात्मकं परमेश्वरं भवमुक्त्यै भजस्वेति सूचयितुमाह—**विष्टभ्येति** । अहं निर्विशेष एव परमात्मा स्वयमिदं परिदृश्यमानं मायाकार्यं स्थावरजङ्गमात्मकं कृत्स्नं जगदेकांशेन यथा निरवयवस्याप्याकाशस्य मेघावच्छेदेन मेघाकाश इति भागकल्पना तथा निरंशस्यापि परस्य ब्रह्मणो मायातत्कार्यावच्छेदेन तदुपहितचैतन्यस्यांशत्वं कल्प्यते । तेन कल्पितेनांशेन 'पादोऽस्य विश्वा भूतानि' इति श्रवणान्मायोपाधिकेन पादेन विष्टभ्य सर्वतो व्याप्य स्थितोऽस्मि विश्वात्मनाऽहमेव तिष्ठामि । 'सहस्रशीर्षा पुरुषः', 'सहस्रशीर्षं देवम्' इत्यादिश्रुतिप्रसिद्धं विश्वरूपं मामेकमेवेश्वरं भजस्व मद्भजनेन कृतार्थो भविष्यसीत्यर्थः ॥ ४२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीमच्छंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः।

दशमे मन्दप्रज्ञानां मनःशुद्धिद्वारा मोक्षसिद्धये स्वविभूतिविशेषानुपासनार्थं प्रतिपाद्य अमन्दप्रज्ञानां तु विष्टभ्याहमित्यादिना विश्वात्मकमैश्वरमेव सोपाधिकं स्वरूपमुपास्यत्वेन सूचयित्वा इदानीमर्जुनप्रार्थनया विश्वरूपं मायाविलासविजृम्भितं स्वरूपमत्यद्भुतं दर्शयितुं स्वत एव सृष्ट्यादिक्रियां प्रकाशयितुं स्वसाक्षात्कारस्यातिदुर्लभत्वं भक्त्येकगम्यत्वं च प्रतिपादयितुमेकादशाध्याय आरभ्यते। तत्रादौ सर्वजगत्कारणं सर्वात्मकं सर्वैश्वर्यसंपन्नं स्वरूपं स्वस्योपास्यत्वेन बोधितं श्रुत्वा तत्साक्षात्कर्तुकामः सन् भगवत्कृतानुग्रहानुवादेन भगवन्तमभिमुखीकर्तुमर्जुन उवाच—

अर्जुन उवाच।

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम्।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम॥ १॥

मदिति। मदनुग्रहाय एते भ्रातृपुत्रादयो मदीया म्रियन्ते हन्तैतेषामहमिति शोकमोहसागरे मज्जतो ममानुग्रहाय। मोहेन शोचन्तं मां कृपयाऽनुग्रहीतुमित्यर्थः। यदध्यात्मसंज्ञितमात्मयाथात्म्यप्रकाशकं 'अशोच्यानन्वशोचस्त्वं', 'नायं हन्ति न हन्यते', 'न जायते म्रियते वा कदाचित्', 'वेदाविनाशिनं नित्यं', 'अच्छेद्योऽयम्' इत्यादिलक्षणं परमं परमार्थविषयमात्मनः कर्तृत्वभोक्तृत्वादिभ्रमापनोदकमतएव गुह्यं गोपनीयमयोग्यानामसद्धर्माणामश्रद्धात्मनामदेयं यद्वचस्त्वयोक्तमुपदिष्टं तेन वचसाऽत्मनात्मस्वरूपप्रकाशकेन मिथ्याज्ञाननिवर्तकेनायं पूर्वोक्तलक्षणो मोहश्चित्तभ्रमो विगतः विशिष्य गतो विगतः। त्वत्कृपया विनष्टमोहो जातोऽस्मीत्यर्थः॥ १॥

एवं भगवत्कृतोपकारानुवादेन भगवन्तं स्तुत्वा तत्स्वरूपदिदृक्षया तन्माहात्म्यं प्रस्तौति—

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम्॥ २॥

भवाप्ययाविति। कं ब्रह्मसुखं स्वरूपानन्दस्तमलति प्रकाशयतीति कमलमात्मज्ञानं यत्तदेव पतनात्त्रायत इति पत्रं कमलं च तत्पत्रं च कमलपत्रं तेनाक्ष्यते प्राप्यत इति हे कमलपत्राक्ष ज्ञानैकगम्य परमात्मन्, हि यस्मात्कारणात् 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा', 'प्रकृतिं स्वामवष्टभ्य', 'अहं सर्वस्य प्रभवः' इति त्वत्तः ईश्वरादेव भूतानामा-

काशादीनां तत्कार्याणां च सर्वेषां भवाप्ययौ उत्पत्तिप्रलयौ विस्तरशो बहुशो मया त्वत्सकाशाच्छ्रुतौ । किंच । 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च', 'सर्वभूतमहेश्वरं', 'मत्तः सर्वं प्रवर्तते' इति माहात्म्यं महान् सर्वव्यापक आत्मा स्वरूपं यस्य स महात्मा तस्य भावो माहात्म्यं सार्वात्म्यमपि चकारात्सर्वेश्वरत्वं च बहुशो मया त्वत्तः श्रुतमित्यर्थः ॥ २ ॥

तस्मात्तत्सर्वं सत्यमेवेत्याह—

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥

एवमिति । सर्वातिशयमहत्त्वात्परमः सर्वव्यापृतिहेतुत्वादीश्वरः हे परमेश्वर, सर्वज्ञस्त्वं मम भूतमहेश्वरमित्यात्मानमात्मस्वरूपं यथाऽऽत्थ येन प्रकारेण स्थितं वक्षि, एतदेवं यथार्थमेव सर्वकारणं सर्वव्यापकं च सर्वनियन्तृ चैव तवैश्वरं रूपं नान्यथेश्वरवचनमस्ति, न तत्र परीक्षा कर्तव्या किंतु त्वदनुग्रहपात्रीभूतस्य ममैवं तृष्णेत्याह—**द्रष्टुमिति** । पुरुषाभ्यां व्याकृताव्याकृताभ्यां स्वमहिम्नोत्तमत्वात् हे पुरुषोत्तम, मज्जन्मसाफल्याय तवैश्वरं समग्रैश्वर्यज्ञानतेजःशक्तिसंपन्नं सर्वात्मकं स्वरूपं द्रष्टुमिच्छामि तथा ममेच्छास्तीत्यर्थः ॥ ३ ॥

तदेव प्रार्थयते—

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४ ॥

मन्यस इति । सृष्टिस्थितिप्रलयप्रवेशनियमनसमर्थत्वात् हे प्रभो, तव स्वरूपं मया द्रष्टुं शक्यमिति यदि मन्यसे जानासीच्छसि वा । ब्रह्मात्मैकत्वदर्शनलक्षणो ज्ञानयोगो योगस्तस्येश्वर हे योगेश्वर, ततो मे त्वं दर्शयात्मानं स्वरूपमव्ययं, अव्ययस्योपाधित्वादव्ययफलहेतुत्वाद्वाऽव्ययम् । यदुपास्त्या शुद्धात्मा सन् पुमान् मुक्तो भवति ॥ ४ ॥

एवं प्रार्थितोऽर्जुनेन श्रीभगवानुवाच—

श्रीभगवानुवाच ।

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५ ॥
पश्यादित्यान्वसून् रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥

पश्येति । दिवो मायाया जातानि दिव्यानि नानावर्णानि नानाकाराणि

च नानाप्रकाराणि शतशः सहस्रशश्च बहून्यथानन्तरमेव पश्य नतु कालान्तरे। ननु'द्रष्टुमिच्छामि ते रूपम्'इति,'दर्शयात्मानम्'इति चार्जुनेन तवैश्वरं रूपं दर्शयेत्युक्ते त्रिविक्रमाकारवत् स्वाकारं वैष्णवं रूपमदर्शयित्वा 'पश्य मे पार्थ रूपाणी'ति बहूनामादित्यादिरूपाणां प्रदर्शनं भगवतस्त्वयुक्तमेव, औषधमानयेत्युक्ते पर्वतानयनवदिति न शङ्कनीयम्। अव्यक्तादिस्तम्बपर्यन्तं स्थूलसूक्ष्मकारणप्रपञ्चरूपेण समष्टिव्यष्टिरूपेण च सर्वात्मना स्थितं 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः। वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा', 'सहस्रशीर्षं देवम्' इत्यादिश्रुतिप्रसिद्धं प्रकृतं प्राकृतं च सर्वमीश्वरस्य कारणब्रह्मणः स्वरूपमेव बहुधा विश्वतोमुखमिति स्वेनैवोक्तत्वात्। ननु केवलशङ्खचक्रादिचिह्नितं रूपं तस्यापि प्राकृतत्वेनात्रैवान्तर्भूतत्वात्ततः सर्वात्मकं सर्वकारणं सर्वोत्तममैश्वरं रूपं यत्तदेवार्जुनस्य द्रष्टुमिष्टत्वाद्भगवता दर्शितम्। न किंचिदत्रानुपयुक्तमस्ति। किंच अदृष्टपूर्वाणि पूर्वं येन केनाप्यदृष्टानि बहून्यसंख्यान्याश्चर्याण्यद्भुतानि रूपाणि पश्येति द्वयोरर्थः ॥ ५ ॥ ६ ॥

कुत्र द्रष्टव्यमित्याकाङ्क्षायामाह—

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥

इहेति। गुडा वर्तुलत्वप्रधाना आसमन्तात्केशा यस्य स गुडाकेशः हे गुडाकेश, सचराचरं स्थावरजङ्गमोपेतं सर्वमेकत्रैव तिष्ठतीत्येकस्थं कृत्स्नं जगदिहास्मिन् मम देहे विश्वात्मके अद्य पश्य। यच्चान्यत्परेषां पराजयं नाशनं वा द्रष्टुमिच्छसि तदपि मय्येव पश्येत्यर्थः ॥ ७ ॥

नतु मां शक्ष्यसे द्रष्टुमनेनैव स्वचक्षुषा।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ८ ॥

किंच **नत्विति**। यथा पूर्वमिन्द्रादीन् दृष्टवानसि तथा मां त्वप्राकृतं दिव्यं तेजःपुञ्जं विश्वरूपधरमप्रमेयमनेन प्राकृतेन चर्ममयेन चक्षुषा त्वं द्रष्टुं न शक्ष्यसे। न शक्नोषीत्यर्थः। तर्हि मम का वा गतिरित्याकाङ्क्षायामाह—**दिव्यमिति**। ते तुभ्यं मद्दर्शनयोग्यं दिव्यं तेजोमयं चक्षुर्ददामि। येन मां द्रष्टुं शक्ष्यसे तेन चक्षुषा मे ममैश्वरमीश्वरत्वकारणं योगं योगमायाविजृम्भितं स्वरूपं पश्येत्यर्थः ॥ ८ ॥

संजय उवाच।

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९ ॥

एवमिति । योगो योगमाया सकार्या तस्याः प्रवृत्तेः कारणत्वादीश्वरः महांश्चासौ योगेश्वरश्च महायोगेश्वरः स्वसाक्षात्कारवतामविद्यां सकार्यां हरतीति हरिः परमात्मा । ऐश्वरमीश्वरसंबन्धि परमं निरतिशयं रूपं दर्शयामासेत्यर्थः ॥ ९ ॥

तद्रूपमेव वर्णयति—

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १० ॥

अनेकेति द्वाभ्याम् । अनेकान्यपरिमितान्यद्भुतान्याश्चर्यकराणि दर्शनान्यूर्ध्वाधस्तिर्यक्पश्यन्त्यो विकृताः सौम्याः साधारणा भयंकराश्चित्रा दृष्टयो यस्य तदनेकाद्भुतदर्शनं दिव्यानि प्रचण्डप्रकाशवन्त्यनेकान्युद्यतान्युद्धृतानि चक्रगदाद्यायुधानि यस्य तद्दिव्यानेकोद्यतायुधं रूपम् ॥ १० ॥

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ११ ॥

किंच **दिव्येति** । सर्वाश्चर्यमयं तेजोबलवीर्यशक्तिरूपगुणावयवावस्थानादिविशेषैः सर्वैराश्चर्यप्रचुरं सर्वतः स्वयमेव दीव्यते प्रकाशत इति देवम् । सर्वतोमुखं सर्वात्मकमत एवानन्तमपरिच्छिन्नं स्वरूपं दर्शयामासेति पूर्वेणान्वयः ॥ ११ ॥

विश्वरूपस्य यद्देवत्वं तदेव विशदयति—

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ १२ ॥

दिवीति । दिव्याकाशे युगपदेकदैवोत्थितस्य सूर्याणां सहस्रस्य युगपदुत्थिता समकालोदिता मेघाद्यावरणवर्जिता च या भाः प्रभा विद्यते सा विश्वरूपस्य भासः प्रकाशस्य स्फुरणसंपत्त्या स्वयं यदि सदृशी स्यात् समानकक्षा भवेच्चेत्तदा विश्वरूपप्रकाशस्य सदृशीति वक्तुं शक्यते । द्वयोः स्फुरणसंपत्तौ विचार्यमाणायां सूर्यसहस्रप्रभापेक्षया विश्वरूपप्रकाश एवाधिको भविष्यतीति मन्य इति भावः ॥ १२ ॥

इहैकस्थं जगत्कृत्स्नमिति यथोक्तं भगवता तथैवार्जुनोऽपि दृष्टवानित्याह—

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ १३ ॥

तत्रेति । यदा यस्मिन् क्षणे दिव्यं चक्षुर्दत्तं तदा पाण्डवो देव-

देवस्य तत्रैव विश्वात्मके शरीरे एकस्थमपि देवर्षिगन्धर्वादिभेदेनानेकधा प्रविभक्तं कृत्स्नं जगदपश्यत् ॥ १३ ॥

दृष्ट्वा किं कृतवानित्यत आह—

ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥ १४ ॥

तत इति। स्पष्टम् ॥ १४ ॥

'पश्य मे पार्थ रूपाणि', 'पश्यादित्यान्वसून्' इति त्वया यथोक्तं तथैव पश्यामीत्याहार्जुनः—

अर्जुन उवाच।

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान्।
ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥१५॥

पश्यामीति। हे देव, तव देहे भूतविशेषसङ्घान् भूतविशेषा देवतिर्यगादिविभेदभिन्नाः प्राणिविशेषास्तेषां सङ्घान्। तानेव विशेषयति—**देवानिति**। तत्रापि विशेषयति—**ब्रह्माणमिति**। ईशं सर्वप्राणिनां नियन्तारं कमलासनस्थं ब्रह्माणं चतुर्मुखं ऋषीन् नारदसनकादीन् दिव्यानुरगान् शेषवासुक्यादीन्पश्यामीत्यर्थः ॥ १५ ॥

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम्।
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥१६॥

किंच **अनेकेति**। अनेकबाहूदरवक्त्रनेत्रमनन्तरूपं अनन्तानि रूपाणि यस्य तं त्वां सर्वतः पश्यामि। हे विश्वेश्वर विश्वरूप, तव नान्तं न मध्यं पुनरादिं च न पश्यामि ॥ १६ ॥

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम्।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् १७

किंच **किरीटिनमिति**। तेजोराशिं तेजःपुञ्जमतएव सर्वतो दीप्तिमन्तं प्रकाशयुक्तमतएव दीप्तानलार्कद्युतिं जाज्वल्यमानसूर्यानलसन्निभमतएवाप्रमेयं परिच्छेदरहितं चक्षुःप्रमाणागोचरमतएव समन्तात्सर्वतो दुर्निरीक्ष्यं दुःखेन द्रष्टुं अशक्यं पश्यामि। शिष्टं स्पष्टम् ॥ १७ ॥

त्वदीयैतन्महामायायोगसंभाविताद्भुतस्वरूपमहत्त्वदर्शनेनैव त्वामेवमहं मन्य इत्याह—

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥१८॥

त्वमक्षरमिति। अक्षरं निरवयवत्वान्निराश्रयत्वात्क्रियानाश्रयत्वात्क्रि-

याऽविषयत्वादनन्तत्वाच्च न क्षरतीत्यक्षरं नित्यकूटस्थं 'एतद्वै तदक्षरं गार्गि' इति श्रुतेः । तत एव परममुत्तमोत्तमं 'अव्यक्तात्तु परः पुरुषः' इति श्रुतेः । तत एव परमार्थत्वात्परमपुरुषार्थत्वाच्च वेदितव्यं मुमुक्षुभिर्ज्ञातव्यं 'स आत्मा स विज्ञेयः' इति श्रुतेः वेदितव्यं परमं यदक्षरं निर्विशेषं परं ब्रह्म तत्त्वमेव । तथापि जगद्बीजं मत्तोऽन्यदस्तीत्यत आह—**त्वमस्येति** । अस्य महदादिस्थूलपर्यन्तस्य विश्वस्य सर्वविकारजातस्य यन्निधानं निधीयते सर्वमस्मिन्निति निधानं जगद्बीजमव्याकृताख्यं त्वमेव 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इति । परस्मात् 'न सन्नासन्न सदसदिति आत्मन एव त्रैविध्यं सर्वत्र योनित्वमपि' इति श्रुतेः । 'मत्तः परतरम्' इति स्मृतेश्च । ननु यद्यप्यहमेव परं ब्रह्म निर्विशेषं जगत्कारणं चाहमेव तथापि मत्तोऽन्यः कश्चिदीश्वरोऽस्ति ज्ञातव्य उपास्यश्चेत्यत आह—**त्वमव्यय इति** । न विद्यते व्ययो ज्ञानाज्ञानाभ्यामन्यैर्वा विनाशो यस्य सोऽव्ययो नित्यः शाश्वतधर्मगोप्ता शश्वद्भवतीति शाश्वतो वेदस्तेनोक्ता ये धर्मा ज्ञानकर्मादयस्तेषां गोप्ता वर्णाश्रमधर्मरक्षकः सृष्ट्यादिकर्ता ईश्वरोऽपि त्वमेव । 'एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय' इति श्रुतेः । ननु निर्विशेषं परं ब्रह्म सविशेषमपरं ब्रह्माप्यहमेव तथापि मत्तोऽन्यो जीवोऽस्ति भेदायेत्यत आह—**सनातन इति** । न जीवो म्रियत इति श्रवणात् सनातनो नित्यः पुरुषः पुरि शयनात्पुरुष आत्मापि त्वमेव 'अयमात्मा ब्रह्म' इति श्रुतेः ॥ १८ ॥

ननु 'सत्यं ज्ञानमनन्तं ब्रह्म', 'यतो वा इमानि', 'एष सर्वेश्वरः', 'प्रज्ञानं ब्रह्म' इत्यादिश्रुतिप्रामाण्यं त्वया यदुक्तं तत्सत्यमेव । तथापि मत्तोऽभिन्नं जगदस्तीत्याशङ्कायां 'सर्वं खल्विदं ब्रह्म' इत्यादिश्रुत्यर्थमवष्टभ्य तदपि त्वमेवेत्याह—

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम् ॥ १९ ॥

अनादीति । अनादिमध्यान्तमादिमध्यान्तरहितं वीराणां कर्म वीर्यमनन्तमपारं वीर्यं यस्य तमनन्तवीर्यं अनन्तबाहुं अनन्ताः संख्यातीता बाहवो यस्य तमनन्तबाहुम् । शशिसूर्यौ नेत्रे यस्य तं शशिसूर्यनेत्रम् । दीप्तः शिखाभिर्जाज्वल्यमानो हुताशो वक्त्रं यस्य तं दीप्तहुताशवक्त्रम् । स्वतेजसा सूर्यवत्तपन्तं प्रज्वलन्तं त्वामिदं विश्वं पश्यामि इदं विश्वं त्वमेवेति त्वदभिन्नं विश्वं पश्यामि । त्वां विश्वात्मना स्थितं पश्यामीत्यर्थः ॥ १९ ॥

तदेव विस्पष्टयति—

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ २० ॥

द्यावेति । हि यस्मात्कारणात् द्यावापृथिव्योः भूम्यन्तरिक्षयोरन्तरमन्तरालं सर्वं त्वयैकेन विश्वात्मना स्थितेन व्याप्तं पूर्णम् । यथा प्राच्याद्याः सर्वा दिशश्च व्याप्ताः पूर्णाः । उपलक्षणमेतत् । चराचरात्मकं विश्वं सर्वं त्वया व्याप्तम् । 'येन यद्व्याप्तं तत्तन्मात्रमेव' इति न्यायेन त्वद्व्याप्तं विश्वं त्वन्मात्रमेवातः सर्वं विश्वं त्वमेवेत्यर्थः । 'ब्रह्मैवेदं सर्वम्' इति श्रुतेः । एवं सार्वात्म्यं प्रतिपाद्य प्रकृतं विश्वरूपं प्रस्तौति—**दृष्ट्वेत्यादिना** । महात्मन् । महान्महत्तरो विश्वमय आत्मा देहो यस्य स महात्मा तस्य संबुद्धिर्हे महात्मन् । अद्भुतमाश्चर्यकरमुग्रमतिभयंकरं च तदेवंरूपं दृष्ट्वा लोकत्रयं त्रिलोकस्थं प्राणिजातं सर्वं प्रव्यथितं क्षुब्धं व्याकुलं च भवतीत्यर्थः ॥ २० ॥

अमी हि त्वां सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घास्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः

किंच **अमी हीति** । हि यस्मात्त्वं शाश्वतधर्मगोप्ता तस्मादुग्रमप्यत्यद्भुतस्वरूपं त्वां द्रष्टुं केचिद्बलाधिकाः सुरसङ्घाः सुराणां देवानां सङ्घाः सुरसङ्घास्तव समीपं विशन्ति । केचिदबला भीताः सन्तो दूरादेव प्राञ्जलयो भूत्वा गृणन्ति स्तुवन्ति । तत्र महर्षिसिद्धसङ्घाः महर्षयो भृग्वादयः सिद्धाः कपिलादयस्तेषां सङ्घाः स्वस्तीत्युक्त्वा पुष्कलाभिः शब्दार्थपुष्टियुक्ताभिः स्तुवन्ति ॥ २१ ॥

एवं सामान्येनोक्त्वा विशेषमाह—

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥

रुद्रेति । रुद्रादित्या वसवस्तथान्ये ये च साध्या देवताभेदा विश्वे विश्वेदेवा अश्विनौ मरुतो देवविशेषाश्चोष्मपाः पितरस्ते च 'ऊष्मभागा हि पितरः' इति श्रवणात् । गन्धर्वा यक्षा असुराः सिद्धास्तेषां सङ्घाश्च सर्वे विस्मिता आश्चर्यवन्तो भूत्वा त्वां वीक्षन्ते ॥ २२ ॥

एवं देवादीनां प्रवेशनं स्तवनं विस्मयदर्शनं चोक्त्वाऽधुना भयंकराकारदर्शनेन लोकानां भयकार्यं प्रतिपादयति—

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥ २३ ॥

रूपमिति त्रिभिः । बहूनि बहुविधानि च वक्त्राणि च नेत्राणि च यस्मिन् तद्बहुवक्त्रनेत्रम् । बहवो बाहव ऊरवश्च पादाश्च यस्मिन् तद्बहुबाहूरुपादम् । बहुभिर्दंष्ट्राभिः करालं विकृतं महदतिपरिमाणं ते रूपं स्वरूपं दृष्ट्वा लोकाः प्राणिनः सर्वे प्रव्यथिताः प्रकर्षेण व्यथिताः प्रव्यथिता महाव्यथां प्राप्तास्तथैवाहमपि व्यथितोऽस्मीत्यर्थः ॥ २३ ॥

व्यथाप्राप्तिकारणमेव स्पष्टयति—

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥

नभःस्पृशमिति । हिशब्दोऽवधारणार्थः । हे विष्णो सर्वव्यापिन् । नभःस्पृशमभ्रंकषम् । यद्वा नभोवत्सर्वं स्पृशतीति नभःस्पृशं सर्वव्यापकं तेजोविशेषेण दीप्तं जाज्वल्यमानम् अनेकवर्णं वर्ण्यन्त इति वर्णा रूपाण्यनेकान्यनेकविधानि यत्र तदनेकवर्णं ब्रह्मादिनानाविधविचित्ररूपविशेषविशिष्टम् व्यात्तानि विस्फारितान्याननानि यत्र तं व्यात्ताननम् सूर्यमण्डलवद्दीप्तानि विशालानि विकृतानि च नेत्राणि यत्र तं दीप्तविशालनेत्रं त्वां दृष्ट्वैव प्रव्यथितान्तरात्मा भयक्षुब्धान्तरङ्गः सन् धृतिं धैर्यं शमं मनःस्वास्थ्यं च न विन्दाम्यतिचकितोऽस्मीत्यर्थः ॥ २४ ॥

उक्तमेवार्थं प्रकारान्तरेण वदन् भगवत्प्रसादं प्रार्थयते—

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसंनिभानि ।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥

दंष्ट्रेति । जगतां निवासो यः स हे जगन्निवास, देवेश अन्यानपेक्षया स्वयमेव दीप्यते प्रकाशत इति देवः । स्वसन्निधानात्सर्वमीष्टे चेष्टयतीति ईशः । दिशो न जाने भयेन चित्तस्वास्थ्यजं शर्म सुखं च न लभे न प्राप्नोमि भीतोऽस्मि। प्रसीद प्रसन्नो भव। शिष्टं स्पष्टम् ॥२५॥

यच्चान्यद्द्रक्ष्यसीति यदुक्तं स्वजयं परेषां पराजयं च द्रष्टासीति तदप्यत्र दृष्ट्वाह—

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥

अमी चेति चतुर्भिः । चकारस्य सर्वपदेन संबन्धः । अमी पुरो दृश्यमाना धृतराष्ट्रस्य पुत्रा दुर्योधनादयः सर्वे चावनिपालसङ्घैः सहैव

त्वा त्वां विशन्ति। विशधातोरत्रापि संबन्धः। भीष्मो द्रोणस्तथासौ सूतपुत्रः कर्णश्चास्मदीयैरपि योधमुख्यैः द्रुपदधृष्टद्युम्नादिभिःसह ॥२६॥

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ २७ ॥

वक्त्राणीति । त्वरमाणाः सन्तः भयानकानि भयंकराणि दंष्ट्राकरालानि ते वक्त्राणि विशन्ति प्रविशन्ति । तत्र केचिद्योधमुख्याश्चूर्णीकृतैरुत्तमाङ्गैः शिरोभिरुपलक्षिताः सन्तो दशनान्तरेषु दन्तविवरेषु संदृश्यन्ते ॥ २७ ॥

पुनरपि तेषां भगवद्वक्त्रप्रवेशनमेव सदृष्टान्तं प्रतिपादयति—

यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥२८॥

यथेति । नरलोके मर्त्यलोके वीराः शूरा नरलोकवीरा भीष्मादयः। शिष्टः स्पष्टार्थः ॥ २८ ॥

किमर्थं वक्त्राणि प्रविशन्तीत्याकाङ्क्षायां प्रवेशनप्रयोजनं सदृष्टान्तमुपपादयति—

यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥२९॥

यथेति । समृद्धवेगाः प्रचण्डवेगाः पतङ्गाः शलभाः । लोकाः शत्रुजनाः । शिष्टं स्पष्टम् ॥ २९ ॥

एवं प्रवेशनप्रयोजनमुक्त्वा तद्दशायां परमेश्वरस्य कृत्यमाह—

लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥ ३० ॥

लेलिह्यस इति । ज्वलद्भिर्बहिः प्रवर्ग्याग्निवज्जाज्वल्यमानैर्वदनैः समन्तात्सर्वतः प्रविष्टान् समग्रानशेषान् लोकान् शत्रुजनान् ग्रसमानोन्तर्गिलन् सन् त्वं च जिह्वाभिर्लेलिह्यसे तालुलेहनं करोषि । हे विष्णो, तेजोभिः स्वप्रकाशैः समग्रं सर्वं जगदापूर्य व्याप्य तवोग्राः प्रचण्डा भासो दीप्तयः प्रतपन्ति ग्रीष्मार्कवत्तापं कुर्वन्ति ॥ ३० ॥

यस्मात्कल्पान्ते प्राणिनः कालान्तक इव महाशूरानपि प्रज्वलद्वदनैर्गिलसि । विचार्यमाणे महाद्भुतं तव कृत्यं तस्मात् को भवानिति पृच्छन्तं मां तव स्वरूपं ब्रूहीत्याह—

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं नहि प्रजानामि तव प्रवृत्तिम् ॥ ३१ ॥

आख्याहीति । हे देववर देवताश्रेष्ठ, ते नमोऽस्तु त्वां नमस्कृत्य पृच्छामि । प्रसीद औग्र्यं त्यक्त्वा प्रसन्नो भव । उग्ररूपः उग्रस्य प्रलयकालरुद्रस्य रूपमिव रूपमाकारो यस्य । यद्वा उग्रं सर्वलोकभयंकरं रूपं यस्य स उग्ररूपः । को भवान् प्रलयकालरुद्रो वा प्रलयाग्निर्वा महामृत्युर्वा कालान्तको वा परमपुरुषो वाऽन्यो वा तव स्वरूपं प्रवृत्तिं च मे मह्यमाख्याहि कथय । आसमन्तादत्तुं प्रवृत्त आद्यः । यद्वा आदौ भव आद्यस्तं जगतः संहारकर्तॄणामग्रेसरं जगदाद्यमीश्वरं वा भवन्तं विज्ञातुमिच्छामि कथयेत्यर्थः । ननु मदीयं स्वरूपं मच्चेष्टादर्शनेनैव ज्ञातुं शक्यते को भवानिति कोऽयं प्रश्न इत्यत आह—**नहीति** । हि यस्मादहं मनुष्यः किंचिज्ज्ञश्च तस्मात्तव प्रवृत्तिं न प्रजानाम्यतस्त्वमेव ब्रूहीत्यर्थः ॥ ३१ ॥

स्वं स्वप्रवृत्तिं चाख्यातुं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां नभविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥

कालोऽस्मीति । लोकक्षयकृल्लोकानां भूमेर्भारायमाणानां प्राणिनां क्षयं नाशनं करोतीति लोकक्षयकृत्प्रवृद्धः प्रचण्डः कालोऽस्मि । सर्वप्राणिसंहारहेतुः कालोऽहमित्यर्थः । इति स्वं ख्यापयित्वा स्वप्रवृत्तिमाह—**लोकानिति** । इहात्र समवेतान् लोकान् जनान् समाहर्तुं प्रवृत्तोऽस्मि । ननु लोकसंहारार्थं प्रवृत्तेन त्वया मां विना संहारः कर्तुं न शक्य इत्यत आह—**ऋतेऽपीति** । प्रत्यनीकेषु प्रतिपक्षसेनास्ववस्थिताः सज्जीभूय वर्तमानास्तव दुर्जया भीष्मद्रोणकर्णादयस्ते च सर्वे त्वामृतेऽपि त्वत्प्रवृत्त्यभावेऽपि नभविष्यन्ति न स्थास्यन्ति । मयि महामृत्यौ समुपस्थिते के नु जीविष्यन्ति । सर्वेऽपि म्रियन्त इत्यर्थः ॥ ३२ ॥

एवं स्वं स्वप्रवृत्तिं चोक्त्वा फलितमाह—

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥

तस्मादिति । महामृत्युना मयैव सर्वेष्वेतेषु म्रियमाणेषु सत्सु न योत्स्य इति तव प्रवृत्त्यभावो निष्फलो यस्मात्तस्मात्त्वमुत्तिष्ठ युद्धाय सन्नद्धो भव । यशो लभस्व देवानामप्यजय्यान् भीष्मादीनर्जुनो जितवानिति

कीर्तिमाप्नुहि । शत्रून् दुर्योधनादीन् जित्वा शत्रुजयेन लब्धं समृद्धं सर्वैश्वर्यसंपन्नं राज्यं भुङ्क्ष्व । भीष्मादिष्वतिरथेषु सत्सु शत्रुजयो दुर्लभ एवेत्यर्जुनस्याशङ्कां निःशेषयितुमाह—**मयैवेति** । यद्यपि शस्त्रास्त्रबलपराक्रमसंपत्त्या भीष्मादयो दुर्जया एव तथाप्येते त्वत्प्रवृत्तेः पूर्वं मयैवेश्वरेण तेजोबलपौरुषमाकृष्य निःसारतां गमयित्वा निहताः जीर्णपर्णवत्पतनोन्मुखीकृता भवन्तीत्यर्थः । सव्येन वामहस्तेन शरान् संचितुं प्रयोक्तुं शीलमस्यास्तीति सव्यसाची तस्य संबुद्धौ हे सव्यसाचिन्, पर्णपातने वायुवत्तेषां पातने त्वं निमित्तमात्रं भव । न तत्र तव प्रयत्नविशेषोऽस्तीत्यर्थः ॥ ३३ ॥

उक्तमेवार्थं निर्विचिकित्सत्वाय विस्पष्टयति—

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान् ३४

द्रोणमिति । द्रोणं भीष्मं कर्णं जयद्रथं च तथान्यानपि भगदत्तसौमदत्त्यादींश्च योधवीरान्मया तेजोबलपौरुषाकर्षणेन हतान् हतप्रायांस्त्वं जहि बाणैः पातय । तत्र मा व्यथिष्ठाः द्रोणो दिव्यास्त्रसंपन्न इति, तथाविधः स्वच्छन्दमरणो भीष्म इति वा, सर्ववीर्यशक्तियुक्तः कर्णो दुर्जय इति, पितृवरेणावध्यः सैन्धव इति चेतसीषदपि व्यथां मा कुरु, किंतु मदनुग्रहेण रणे सपत्नान् दुर्योधनादीन् शत्रून् जेतासि जेष्यस्यत्र न संशयः । यस्मादेवं तस्माद्युध्यस्वेति नात्र विधिः । किंतु मुक्तेः कारणं ज्ञानं तत्कारणं च चित्तशुद्धिस्तत्कारणं स्वधर्मानुष्ठितिरिति सूचयन्निव वक्ति—**युध्यस्वेति** । मुमुक्षुस्त्वं स्वधर्ममनुवर्तस्वेति तात्पर्यार्थः । एतेन भक्त्या समाराधितः परमेश्वरः स्वभक्तानां दुर्लभमपि कार्यं सुलभं करोतीति सूचितं भवतीत्यर्थः ॥ ३४ ॥

प्रवृत्तमर्थं सर्वं धृतराष्ट्राय संजय उवाच—

संजय उवाच ।

एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥ ३५ ॥

एतदिति । किरीट्यर्जुनो भयभक्तिभ्यां वेपमानः कम्पमानः सन् कृताञ्जलिर्भूत्वा केशवस्यैतदुक्तप्रकारकं वचनं श्रुत्वा हस्ताभ्यां नमस्कृत्वा साष्टाङ्गं च भूमौ प्रणम्य सगद्गदं हर्षातिशयेनानन्दाश्रुजलवेगेन च कुण्ठितकण्ठध्वनि यथा तथा भीतभीतोऽत्यन्तभययुक्तः सन् भूय एवेदं वचनं कृष्णमाह ॥ ३५ ॥

अर्जुन उवाच ।

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः ३६

स्थाने इति । हे हृषीकेश, तव प्रकीर्त्या त्वन्महत्त्वकीर्तनेन श्रुतेन सर्वं जगत् प्रहृष्यति प्रकृष्टं हर्षं वहतीति यत्तत् स्थाने युक्तं तव सर्वजगद्धर्षविषयत्वमित्यर्थः । तव प्रकीर्त्या जगत्त्वय्यनुरज्यते अनुरागं चोपैतीति यत्तत् स्थाने युक्तं तव तदनुरक्तिविषयत्वमित्यर्थः । तव प्रकीर्त्या भीतानि रक्षांसि दिशो द्रवन्तीति यत्तत् स्थाने युक्तं तव रक्षःपलायनहेतुत्वमित्यर्थः । सिद्धसङ्घाः सिद्धानां देवताविशेषाणां सङ्घास्त्वां नमस्यन्तीति यत्तत् स्थाने युक्तं तव सर्वदेवनमस्कारविषयत्वमित्यर्थः । यद्वा हे हृषीकेश, 'कालोऽस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः' इति भूमेर्भारायमाणसर्वदुष्टलोकसंहारार्थं प्रवृत्तोऽस्मीत्युक्तलक्षणया तव प्रकीर्त्या प्रकृष्टवचनेन श्रुतेन जगत्साधुलोकः प्रहृष्यति संतोषमुपैतीति यत्तत् स्थाने युक्तम् । सर्वेश्वरेण सर्वलोकत्राणपरायणेन भवता सर्वदुष्टसंहारे क्रियमाणे साधूनां प्रहर्षणं युक्तमेवेत्यर्थः । तव प्रकीर्त्या जगत् साधुलोकस्त्वयि भक्तवत्सले सर्वभूतसुहृदि परमात्मन्यनुरज्यते अनुरागं वहतीति यत्तत् स्थाने युक्तम् । लोकोपद्रवनिवारणोद्युक्ते परमकृपालौ परमेश्वरे त्वयि साधूनामनुरागजननं युक्तमेवेत्यर्थः । तव प्रकीर्त्या दुष्टान् संहर्तुं प्रवृत्तोऽस्मीति तव प्रकृष्टवचनेन श्रुतेन रक्षांसि भीतानि राक्षसाः सर्वे भीताः सन्तो दिशो द्रवन्ति दिक्कोणान् प्रति पलायन्ते । तव प्रकीर्त्या सर्वलोकसुखकाङ्क्षिणः सिद्धसङ्घाः सर्वे त्वां नमस्यन्ति । सिद्धा इति देवजात्युपलक्षणम् । देवऋषिसिद्धगन्धर्वचारणादयः सर्वे स्वामिन्, तत्तथैव कर्तव्यमिति प्रार्थनापूर्वकं त्वां प्रणमन्तीत्यर्थः ॥ ३६ ॥

भगवतः सर्वदेवनमस्कार्यत्वे हेतून्वदन् काका सर्वनमस्कार्यत्वमापादयति—

कस्माच्च ते न नमेरन्महात्मन्गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥

कस्मादिति । चकारस्त्वर्थः । महान्महत्तरः सर्वोत्कृष्ट आत्मा स्वभावो यस्य स हे महात्मन्, ते तुभ्यं सिद्धादयः सर्वे देवाः कस्मात्तु हेतोर्न नमेरन् केन हेतुना त्वां न नमेयुः । सर्वप्रकारैर्विचार्यमाणे त्वामेव नमस्करिष्यन्तीत्यर्थः । नन्वहमपि लोकसाधारणः केन विशेषेण

मह्यं नमस्कुर्युरित्याशङ्कायां न ज्ञानैश्वर्यबलवीर्यतेजःशक्तिविशेषैः परमार्थतश्च भवानेव सर्वोत्तमः सर्वनमस्कार्य इति। सर्वनमस्कार्यत्वे हेतूनाह—**गरीयसे इत्यादिना** । गरीयसे ज्ञानादिभिरुत्कैर्विशेषैर्यः सर्वोत्तमः सर्वगरीयान् तस्मै गरीयसे गुरुतराय । ज्ञानादिभिः सर्वेभ्यो गरीयस्त्वादित्यर्थः । किंच ब्रह्मणोऽप्यादिकर्त्रे ब्रह्मणो हिरण्यगर्भस्य सर्वभूतपतेरपि सर्वाराध्यस्यादिकर्त्रे आदिर्जनिकारणं कर्ता नियामकः स चासौ कर्ता च तस्मै । तस्यापि स्रष्टृत्वादीश्वरत्वाच्च तव सर्वनमस्कार्यत्वे किं वक्तव्यमित्यर्थः । पुनरपि हेत्वन्तराण्याह—**अनन्तेति** । हे अनन्त देवेश जगन्निवासेत्यनन्तत्वाद्देवानामीश्वरत्वाज्जगन्निवासत्वाच्च सर्वदेवनमस्कार्योऽसीत्यर्थः । अनन्तश्चात्मा 'यो देवानामधिपो यस्मिंल्लोका अधिश्रिताः' इति श्रुतेः । ननु ममानन्तत्वं न संभवति जगत्तत्कारणाभ्यां व्यवधानादित्याशङ्कायामाह—**सदसदिति** । नामरूपाभ्यामस्मीति यन्निर्दिश्यते तत्सत्कार्यं जगत्, तद्विलक्षणमसज्जगत्कारणमव्याकृतं तदुभयं सदसच्च त्वमेव। 'सर्वं ह्येतद्ब्रह्म' इति श्रुतेः। ननु सदसद्रूपत्वेऽपि ममानन्तत्वं न संभवति परेण ब्रह्मणा व्यवधानादित्यत आह—**त्वमक्षरमिति** । तत्परं तयोर्जगदव्याकृतयोः कार्यकारणयोर्नित्यत्वेन सच्चिदानन्दरूपत्वेन निरतिशयमहत्त्वेनातिसूक्ष्मत्वेन परं विलक्षणं कारणं च 'यो वा एतदक्षरं गार्ग्यविदित्वा' इत्यादिश्रुतिप्रसिद्धं यदक्षरं कदापि केनापि कथंचिदपि न क्षरतीत्यक्षरं नित्यकूटस्थं सच्चिदानन्दैकरसमद्वितीयं निर्विशेषं तत्परं ब्रह्म त्वमेव त्वत्तो नान्यत्ततोऽनन्तत्वं सिद्धम्, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः। यत एवं ततः सर्वदेवनमस्कार्यत्वं तव युक्तमिति तात्पर्यार्थः ॥३७॥

ब्रह्मैवेदं सर्वमित्यादिश्रुत्यर्थावष्टम्भेन सविशेषं निर्विशेषं च सर्वं त्वमेवेति भगवतः सार्वात्म्यं प्रतिपादयति—

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ॥ ३८ ॥

त्वमिति । पूर्णत्वात्पुरुषः । स्वयं निर्विकारत्वात् पुराणः सनातनः । आदिदेवः जगत्कारणत्वादादिः स्वयमेव दीव्यत इति देवः । आदिश्चासौ देवश्चादिदेवः सृष्ट्यादिकर्ता मायोपाधिकः परमेश्वरस्त्वमेवास्य परिदृश्यमानस्य विश्वस्य निधानम् । मृदि घटादय इव जले तरङ्गादय इव यत्र महदादयो विकाराः सर्वे निधीयन्ते तन्निधानं जगद्बीजं माया च त्वमेवासि । बुद्धिं तद्विकारानहंकारममकारादीन् साक्षादव्यवधानेन सर्वदा यो वेत्ति जानाति स वेत्ता सर्वसाक्षी प्रत्यगात्मापि त्वमेवासि । तद्वेद्यं बुद्धितद्वि-

कारादिसर्वदृश्यजातं त्वमेवासि । किंच परं सर्वदृश्यविलक्षणतया सर्वमहत्तमं मायातत्कार्यलेशसंबन्धशून्यं जीवेशजगदाभासकल्पनाधिष्ठानं नित्यशुद्धबुद्धमुक्तस्वभावं निर्विशेषं निराभासं नित्यानन्दैकरसमद्वितीयं यत्तुरीयं परं धाम परं ज्योतिः परं ब्रह्म तच्चापि त्वमेवासि । अनन्तमन्तशून्यं रूपं चिदात्मकं स्वरूपं यस्य स हे अनन्तरूप, यतस्त्वया ब्रह्मणा सद्रूपेण भ्रमकल्पितमिदं सर्वं ततं व्याप्तम् । येन यद्व्याप्तं तत्तन्मात्रमेवेति न्यायेन त्वया व्याप्तमिदं सर्वं त्वन्मात्रमेव, अतः सर्वं त्वमेव तेनैवानन्तरूपोऽसि त्वमद्वितीय इत्यर्थः ॥ ३८ ॥

यस्मादेवं तस्मात्सर्वं त्वमेवेति 'त्वं यज्ञस्त्वं विष्णुस्त्वं वषट्कारः' इत्यादिश्रुतिप्रसिद्धमर्थं प्रतिपादयति—

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥ ३९ ॥

वायुरिति । वायुः यमः अग्निः वरुणः शशाङ्कश्चन्द्रः प्रजापतिः सर्वलोकपितामहश्चतुर्मुखश्च प्रपितामहस्तत्पिता विष्णुरपि त्वमेवेत्यर्थः । एवं सर्वं त्वमेवेति भगवतः सार्वात्म्यं सार्धेन प्रतिपाद्याधुना श्रद्धाभक्तिवेगेन सर्वात्मानं परमेश्वरं नमस्करोति सार्धेन नमो नमस्तेऽस्त्वित्यादिना । स्पष्टोऽयमर्थः ॥ ३९ ॥

भक्तिवेगोत्थसंतोषातिशयेन स्तुवन् पुनः सर्वतो नमस्करोति—

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥ ४० ॥

नम इति । हे सर्व सर्वात्मन्, सर्वात्मने ते पुरस्तात्पृष्ठतो नमः । सर्वतः सर्वत्रापि ते नमोऽस्तु । हे सर्वेति विशेषणात्सर्वात्मनः प्रागादिदिग्विभागो यद्यपि न संभवति दिग्विभागहेतोः सूर्यस्यापि सर्वात्मन्यन्तर्भूतत्वात्तथापि नमः पुरस्तादिति स्वदृष्टिगत्योक्तं न तु वस्तुगत्या न तु हे सर्वेति नाम्नोक्तं नत्वर्थत इति मन्तव्यम् । तथात्वे अनन्तजगन्निवासेति त्वमादिदेव इत्यादिवाक्यार्थव्याघातप्रसंगात्तत एव सर्वशब्दार्थं स्वयमेव निर्वक्त्यानन्तेत्यादिना तत्सिद्धौ हेतुमाह—**अनन्तवीर्यामितविक्रम इति** । सर्वतो विशिष्य ईरयितुं प्रसारयितुं योग्यं वीर्यं तेजः । विक्रमशब्देन व्यापनशीलत्वं लक्ष्यते । अनन्तं वीर्यं यस्य सः । अमितो विक्रमो यस्य सः । उभयोः कर्मधारये अनन्तवीर्यामितविक्रमः । हेतुगर्भितमिदं विशेषणम् । अनन्तवीर्यामितविक्रमत्वात्त्वं सर्वं जगद्यतः समाप्नोषि बहिरन्तःसर्वतो वह्निरयःपिण्डमिव वीर्येण तेजसा स्फूर्त्या विक्रमेण सत्तया

च सम्यग्व्याप्तवानसि तत एव सर्वोऽसि । सर्वात्मकोऽसीत्यर्थः । एतेन नामरूपात्मकं जगत्सर्वं त्वमेव त्वत्तोऽन्यदणुमात्रमपि निरात्मकत्वान्निरूपयितुं न संभवतीति सूचितम् ॥ ४० ॥

एवं स्तुत्वा नत्वा प्राक्तनं स्वापराधं क्षमापयति—

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥ ४१ ॥

सखेति द्वाभ्याम् । तवाऽपरिमिततेजोबलवीर्यसमग्रैश्वर्यसंपन्नस्य सर्वोत्तमस्य सृष्ट्यादिकर्तुः परमेश्वरस्य इदं परिदृश्यमानं महिमानं विश्वात्मकं स्वरूपमजानताऽज्ञातवता मया ममायं सखा स्निग्ध इति मातुलेय इति च मत्वा हे कृष्ण हे यादव हे सखेति प्रमादाद्वा प्रणयेन स्नेहेन वापि प्रसभं हठादुच्चावचं वचनं यद्यदुक्तं तत्सर्वं क्षामये क्षम्यतामिति प्रार्थय इत्युत्तरेण संबन्धः । अत्र हे सखेति संधिरार्षः । महिमानं तदेवमिति प्रचुरः पाठः । तवेममिति पाठान्तरमप्यस्ति । तवेदं महिमानमितीदंपदस्य महिमानमित्यस्य च 'कन्येयं कुलभूषण'मितिवल्लिङ्गव्यत्ययेन सामानाधिकरण्यम् । इदंशब्दस्य पुंलिङ्गत्वेन विचारः ॥ ४१ ॥

यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।
एकोऽथवाप्यच्युत तत्समक्षं तत् क्षामये त्वामहमप्रमेयम् ४२

किंच **यच्चेति** । न च्यवते सदैकरूपेणाविक्रियात्मना कूटवत्तिष्ठतीत्यच्युतः हे अच्युत परमात्मन् । विहारशय्यासनभोजनेषु विहारः क्रीडा । शय्या शयनम् । सिंहासनपरिस्तरणादिषूपवेशनमासनम् । भोजनमन्नोदकादिस्वीकारस्तेषु त्वमेकः रहस्येक एव स्थितः सन् । अथवा बहूनां समक्षं मया मातुलेय इति बुद्ध्याऽवहासार्थं परिहासाय यद्यच्चकाराद्यावदसत्कृतोऽवमानितोऽसि तत्तदपराधजातं सर्वं त्वामप्रमेयमचिन्त्यमहिमानं परमेश्वरं क्षामये । क्षमस्वेति प्रार्थय इत्यर्थः ॥ ४२ ॥

ननु यथा गदादयस्तव तथैवाहमपि किं क्षामये त्वामिति प्रार्थनेत्याशङ्कायाम् । न । भवान् सर्वलोकपूज्यः परमेश्वर इति सहेतुकं पूज्यत्वमेव प्रतिपादयति—

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभावः ४३

पितेति । चराचरस्य स्थावरजंगमात्मकस्यास्यानुभूयमानस्य लोकस्य सर्वप्राणिजातस्य त्वं पिता जनकोऽसि । 'यतो वा इमानि' इति

श्रवणात् त्वं सर्वेषां भूतानां जनयितेत्यर्थः । न केवलं पितैव त्वं सर्वलोकस्य किंतु महान् गुरुरप्यसीत्याह—**गुरुरिति**। सकालानर्थबीजभूताविद्यातत्कार्यविध्वंसकत्वज्ञानोपदेशेन गरीयान् सर्वोत्तमो गुरुश्चासि यस्मात्तस्मात्त्वं पूज्यः सर्वलोकानां किमुत ममैवेति । ननु मत्तोऽप्यधिका ब्रह्मादयो महनीयाः सन्त्येवेत्यत आह—**न त्वत्सम इति** । 'आत्मन आकाशः संभूतः' इति, 'अस्य महतो भूतस्य' इति च श्रवणादाकाशादिसर्वभूतजनकत्वे धर्मज्ञानमूलसकलवेदोपदेष्टृत्वे च लोकत्रयेऽपि गरीयान् महत्तमस्त्वत्समोऽन्यो नास्ति । तत्सत्त्वे चेश्वरान्तरसिद्ध्या सर्वव्यवहारलोपप्रसङ्गात् । नहीश्वरे द्वितीये सत्येकस्य सिसृक्षायामन्यस्य संजिहीर्षायां सत्यां व्यवहारः सिध्यत्यतस्त्वत्समो न कश्चिदस्तीत्यर्थः । त्वत्समस्यैवाऽसंभवे सत्युक्तधर्मैरभ्यधिकस्त्वत्तो महत्तमोऽन्यः कुतः स्यात् । न कुत्रापि संभवतीत्यर्थः । 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति श्रुतेः । त्वत्समस्यैव पुरुषस्यासंभवे हेतुमाह—**अप्रतिमेति** । प्रतिमीयतेऽनयेति प्रतिमा सादृश्यं न विद्यते यस्यासावप्रतिमः प्रभावः सामर्थ्यं मायायोगजं प्रपञ्चबन्धमोक्षादिकार्यघटनाघटनपटीयस्त्वलक्षणं यस्य सोऽप्रतिमप्रभावस्तस्य संबुद्धिर्हे अप्रतिमप्रभाव । निरतिशयमहत्त्वसंपन्नेत्यर्थः ॥ ४३ ॥

जगद्गुरुत्वेन जगज्जनकत्वेन च सर्वलोकपूज्यस्य तव परमेश्वरस्य मया नापराद्धव्यं प्रमादेन यदपराद्धं तत् क्षन्तव्यमिति प्रार्थय इत्युक्त्वा प्रणामपूर्वकं प्रसादयति—

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥४४॥

तस्मादिति । यस्मान्निरतिशयमहत्त्वसंपन्नः परमेश्वरस्त्वं तस्मात् कायं प्रणिधाय अष्टभिरङ्गैः संश्लेषो यथा स्यात्तथा भूमौ स्थापयित्वा प्रणम्य ब्रह्मादिभिरीड्यं स्तुत्यमीशं परमेश्वरं त्वां प्रसादये प्रसन्नो भवेति प्रार्थये । हे देव, मया प्रार्थितस्त्वं पुत्रस्यापराधं पितेव, सख्युरपराधं सखेव, प्रियायाः प्रेयस्याः स्त्रियोऽपराधं प्रिय इव, ममापराधं सोढुं क्षन्तुमर्हसीत्यर्थः । प्रियायार्हसीत्यत्र संधिरार्षः ॥ ४४ ॥

देवेश जगन्निवासेति प्रसादयन् स्तुवन् विश्वरूपोपसंहारं प्रार्थयते—

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥ ४५ ॥

अदृष्टपूर्वमिति । अदृष्टपूर्वं कदाचिदप्यदृष्टं विश्वरूपं दृष्ट्वा हृषितो

हृष्टः संतुष्टोऽस्मि तथापि बहूदरवक्रादिभिर्विकृतत्वाद्भयेन मे मनो व्यथितं व्याकुलं च भवति । हे देव, प्रसीद प्रसन्नो भव । तदेव प्राक्तनमेव सौम्यं कार्ष्णं रूपं मे मह्यं दर्शय । दृष्टिविषयं कुर्वित्यर्थः ॥ ४५ ॥

तदेवेत्युक्त्वाप्यनिर्धारितत्वात् द्रष्टव्यं रूपं विशेषणैर्विशिनष्टि—

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥

किरीटिनमिति । पूर्वं यथा तथैव किरीटिनं गदिनं चक्रहस्तं त्वामिदानीं द्रष्टुमिच्छामि । यत इदं रूपं भयानकं ततश्चतुर्भुजेन भुजचतुष्टयवता तेनैव वासुदेवेन रूपेण शान्तेन युक्तो भव । तदा चतुर्भुजविशिष्टरूपाभावं सूचयितुमाह—**सहस्रेति** । सहस्रं बाहवो यस्य हे सहस्रबाहो । विश्वं मूर्तिर्यस्य हे विश्वमूर्ते । सर्वात्मन् । एतद्रूपमुपसंहृत्य प्राचीनं शान्तं रूपं दर्शयेत्यर्थः ॥ ४६ ॥

'स्थाने हृषीकेश' इत्यादिना स्तुवन्तं विश्वरूपसंदर्शनेन प्रहृष्टं तद्भयेन च क्लिष्टमर्जुनमाश्वासयितुं विश्वरूपसंदर्शनमतिदुर्लभं मदनुग्रहेण ते लब्धमित्युपश्लोकयितुं च श्रीभगवानुवाच—

श्रीभगवानुवाच ।

मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥४७॥

मयेति । हे अर्जुन, त्वदीयभक्त्यतिशयात्प्रसन्नेन त्वय्यनुग्रहवता मया तेजोमयं कोटिसूर्यप्रकाशं विश्वं विश्वात्मकं तत एवानन्तमन्तवर्जितमिदं दृश्यमानं रूपमात्मयोगादात्मनः स्वस्य योगात् मायायोगसामर्थ्यात्ते भक्ताग्रगण्यस्य दर्शितम् । इतरेषां श्रवणविषयमेव तवैव दृष्टिविषयं गमितमित्यर्थः । ननु धृतराष्ट्रगृहे भीष्मादीनां बाल्ये यशोदायाश्चाक्रूरस्यापीदं त्वया दर्शितमेव । मया प्रसन्नेन दर्शितमिति कथमित्याशङ्कायां तदवान्तरं रूपमुत्तमं न भवति । इदं तु सर्वाग्र्यमन्यैरदृष्टं चेत्याह—**यन्म इति** । त्वदन्येन भक्तवर्यात्त्वत्तोऽन्येन येनकेनापि न दृष्टपूर्वं मे मम परमेश्वरस्य यत्स्वरूपमाद्यमादिकालीनमीश्वरत्वकारणं सर्वोत्तमं तदेवैतत्ते दर्शितं तव भाग्याल्लब्धम् । ममैतद्रूपसंदर्शनेन कृतार्थोऽसीत्यर्थः ॥ ४७ ॥

एतद्रूपदर्शनस्य दुर्लभत्वमेव प्रतिपादयति—

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८ ॥

न वेदेति । वेदयज्ञाध्ययनैः । द्वन्द्वान्ते श्रूयमाणस्याध्ययनशब्दस्य प्रत्येकं संबन्धः । वेदाध्ययनैर्यज्ञाध्ययनैरिति नियमेन ऋगादीनां चतुर्णां वेदानामध्ययनानि वेदाध्ययनानि तैर्यज्ञियमन्त्रदेवताप्रयोगप्रतिपादकवेदार्थज्ञानाध्ययनानि यज्ञाध्ययनानि तैः । ननु वेदाध्ययनेनैव यज्ञाध्ययनस्य संभवात् पुनर्यज्ञार्थमध्ययनं न कर्तव्यमेवेति चेन्न । वेदाध्ययनकाल एव बहूनां तदर्थविचारयोग्यत्वासंभवात् । पदप्रमाणाध्ययनपूर्वकत्वाद्विचारस्य । 'अथातो धर्मजिज्ञासा' इति धर्मजिज्ञासाया वेदतदङ्गाध्ययनानन्तरभावित्वश्रवणात् प्रथममक्षरग्रहणार्थमनन्तरमर्थज्ञानार्थं चाध्ययनं कर्तव्यमेवेति सिद्धम् । दानैः कन्यागवादिभिः, क्रियाभिः श्रौतस्मार्तकर्मानुष्ठानैरुग्रैः कर्तुमशक्यैस्तपोभिः कृच्छ्रचान्द्रायणादिभिरपि पुण्यकर्मविशेषैरपि एवंरूपो विश्वात्मकोऽहं परमेश्वरो नृलोके भूलोके त्वदन्येन मद्भक्तवर्येणान्येन द्रष्टुमशक्योऽस्मि । मत्प्रसादविमुखानां द्रष्टुमशक्योऽहमित्यर्थः । 'शक्यतेऽहं नृलोके' इति सिद्धे सत्यपि संधौ कारकक्रियायामर्थगौरवं बुद्ध्वा वा शक्य इत्युक्तम् । आर्षत्वात् संध्यभावो न दोषाय ॥ ४८ ॥

यद्रूपसंदर्शनेन तव मनसो व्यथाऽऽसीत्तद्रूपमुपसंहरिष्यामि व्यथा मास्त्वित्याह—

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥

मा त इति । बहुबाहूदरादियुक्तमीदृगेवंलक्षणं घोरं भयंकरं रूपं दृष्ट्वा ते व्यथा परितापो मास्तु । विमूढभावश्चित्तव्यामोहश्च मास्तु । किंतु व्यपेतभीः गतभयो भूत्वा प्रीतमनाः सन् तत्कार्ष्णमेव ममेदं रूपं पुनरपि पश्य । दृष्ट्वा प्रशान्तो भवेत्यर्थः ॥ ४९ ॥

संजय उवाच ।

इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥५०॥

इत्यर्जुनमिति । महानप्रमेय आत्मा स्वभावो यस्य स महात्मा वासुदेवस्तथा तदेव व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव रूपं मे पश्येत्युक्त्वैव तत्क्षणे स्वकं रूपं दर्शयामास । उपसंहारदर्शनयोर्निमीलनोन्मीलनवत्स्वायत्तत्वज्ञापनार्थं तथेत्युक्तम् । पुनः सौम्यवपुर्भूत्वा धैर्यवचनैरेनमाश्वासयामासाभयं चकार ॥ ५० ॥

---

१ इयं पङ्क्तिर्यद्यपि न सम्यगन्वेति तथापि बहुषु पुस्तकेषूपलभ्यमानत्वात्तथैव स्थापिता ।

मानवरूपदर्शनेनाश्वासवचनेन च स्वस्थः सन्नर्जुन उवाच—

अर्जुन उवाच ।

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ५१ ॥

दृष्ट्वेति । सौम्यं शान्तं तवेदं रूपं दृष्ट्वेदानीं विकृतिं भयकम्पादिलक्षणां त्यक्त्वा प्रकृतिं स्वभावं गतोऽस्मि । सचेताः स्वस्थचित्तः संवृत्तो जातोऽस्मीत्यर्थः ॥ ५१ ॥

प्रशान्तमर्जुनं दृष्ट्वा प्राह्लादयितुं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥ ५२ ॥

सुदुर्दर्शमिति । अपरिमिततेजोमयत्वाद्दुःखेन दर्शनं यस्य तद्दुर्दर्शं सुतरां दुर्दर्शं सुदुर्दर्शं यदिदं दर्शितलक्षणं मम विश्वाख्यं रूपं तत्त्वं दृष्टवानसि खलु । एतद्दर्शनमलभ्यं भाग्यात्तव लब्धमित्यर्थः । अलभ्यत्वमेव विशदयति—**देवा इति ।** तेजोबलपौरुषैरुत्कृष्टा देवा इन्द्रादयोऽपि ममाऽस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः सर्वदैवंरूपं द्रष्टुमपेक्षन्ते नतु त्वं यथा दृष्टवानसि तथा दृष्टवन्तो भवन्ति । देवानामपि दुर्लभं मद्दर्शनमित्यर्थः ॥ ५२ ॥

जन्मान्तरेषु भोगेच्छया यथोक्तविधिना वेदाध्ययनादिपुण्यकर्मातिशयानुष्ठानाद्देवभावं गतानां मद्भक्तिशून्यानां तेषामिन्द्रादीनां मद्दर्शनमलब्धमिति सूचयितुं वेदादीनां स्वस्वरूपसाक्षात्कारे साधनत्वं निषेधति—

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५३ ॥

नाहमिति । न वेदैः सकलवेदाध्ययनैर्न तपसा कृच्छ्रादिना न दानेन कन्यादिना न चेज्यया श्रौतस्मार्तकर्मभिरप्येवंविधो विश्वरूपोऽहं द्रष्टुं शक्योऽस्मि । यथा मां त्वं दृष्टवानसि तथा वेदाध्ययनादिपुण्यकर्माणो मां सविशेषमेव द्रष्टुं न शक्नुवन्ति कुतो निर्विशेषं साक्षात्कुर्युरित्यर्थः । एतेन 'न वेदयज्ञाध्ययनैः' इति प्रतिपादितस्यैवार्थस्य 'नाहं वेदैः' इति पुनः प्रतिपादनेन कर्मणां मोक्षं प्रति साक्षात्साधनत्वं कथंचिदपि न सिध्यतीति सम्यक्सूचितं भवति ॥ ५३ ॥

ननु वेदादीनामसाधनत्वे तर्हि केन तव साक्षात्कार इत्याकाङ्क्षायामाह—

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ५४ ॥

भक्त्येति । तुशब्दोऽन्यस्यासाधनत्वनिर्धारणार्थः । 'सर्वं खल्विदं ब्रह्म' इत्यादिशास्त्रार्थोपदेशजन्यज्ञानसमुत्पन्नयाऽनन्यया श्रुतं दृष्टं स्पृष्टं मतं विज्ञातं च सर्वं ब्रह्मैवेति सर्वस्य स्वस्य च ब्रह्ममात्रत्वावगाहिन्या प्रत्ययान्तरशून्यया भक्त्या त्वनुसंधानेनैव एवंरूपो विश्वात्मकोऽहं परमात्मा सम्यगाराधितः सन् तत्त्वेन यथार्थस्वरूपेण इदमेव परमार्थं वस्त्विति ज्ञातुं, निश्चेतुं, द्रष्टुमिदमेवाहमिति स्वात्मना साक्षात्कर्तुमपि, प्रवेष्टुं च विदेहीभूय मदात्मनाऽवस्थातुमपि च शक्योऽस्मि । निर्विशेषब्रह्मात्मना ज्ञानस्य विषयो भवामीत्यर्थः । अत्रायमभिप्रायः—मुमुक्षोर्मुख्याधिकारिणश्चित्तशुद्धये सविशेषविश्वरूपस्य ब्रह्मण उपास्तौ श्रद्धाभक्तिभ्यामजस्रं ब्रह्मैवेदं सर्वमिति कृतायां तया भेदप्रत्ययनाशात्परिशुद्धात्मनो निर्विशेषं परं ब्रह्म ज्ञातुं साक्षात्कर्तुं तदात्मनावस्थानलक्षणां विदेहमुक्तिं च प्राप्तुमपि त्वयमेव विषयो भवतीति ॥ ५४ ॥

इत्येवं भक्तेर्ब्रह्मप्राप्तौ कारणत्वमुक्त्वाऽधुना वक्ष्यमाणसाधनपञ्चकसम्पत्त्या यो मां भजति तस्यैव चित्तप्रसादः सम्यग्ज्ञानं मोक्षश्च सिध्यतीति सूचयन्नध्यायमुपसंहरति—

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ ५५ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनो नामैकादशोऽध्यायः ॥ ११ ॥

मत्कर्मकृदिति । मत्कर्मकृत् मदर्थमेव कर्म लौकिकं वैदिकं च चेष्टामात्रं सर्वमपि करोति नतु स्वार्थमीषदपि यः स मत्कर्मकृत् । मत्परमः यदर्थं पुरुषः कर्म करोति तदेव फलं प्रतिपद्यते नान्यत्तद्वदयमपि मदर्थं कर्म कुर्वन् सन् मामेव प्रतिपद्यते । ततोऽहमेव कृतकर्मणां फलभूता परमानुत्तमा गतिरस्येति मत्परमः । यद्वा स एव रक्षकः स एवाश्रयणीयः स एव प्रार्थनीयः स एव प्राप्तव्यः स एवाधारः स एव गतिश्चास्माकमिति निरतिशयप्रीत्याहमेव परमो रक्षकत्वादिधर्मैरुत्कृष्टतमो यस्य स मत्परमः । यद्वा मीयते पदार्थोऽनयेति मा मानामेन्द्रियाणां वृत्तिः । मत्परा सर्वत्र मत्स्वरूपग्रहणपरा मा इन्द्रियवृत्तिर्यस्य स मत्परमस्तत एव मद्भक्तः । सर्वात्मानं मां सर्वत्र सर्वदा भजति चक्षुरा-

दीनां विषयभूतं वस्तु सर्वं ब्रह्मैवेत्यनुसंदधातीति मद्भक्तः । सङ्गवर्जितः पुत्रमित्रकलत्रादिषु रक्तिहेतुष्वसद्बुद्ध्यानुषक्तिरहितः । तर्हि तेष्वनुरागाभावे द्वेषस्तु स्यादेवेत्याशङ्कायामाह—**निर्वैर इति** । सर्वभूतेषु स्वस्योपद्रवकारिषु सत्स्वपि निर्वैरः वैरं शत्रुत्वबुद्धिः सर्वत्र ब्रह्मभावनया सा निर्गता यस्य स निर्वैर उपशान्तसर्वविकारो यो मुमुक्षुर्भवति स भक्तवर्यो निर्विशेषब्रह्मविज्ञानेनात्मप्रसादसंपन्नः सन्मां परं ब्रह्मैति । विदेहकैवल्यं प्राप्नोतीत्यर्थः ॥ ५५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यामेकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ।

नवमाध्यायान्ते 'मन्मना भव मद्भक्तः' इति चित्तशुद्धये स्वोपास्तिः कर्तव्येत्युक्ते तव स्वरूपे ज्ञाते स्वद्युपास्तिः कर्तुं शक्यत इत्याकाङ्क्षायां मन्दप्रज्ञानामुपासनार्थं विष्ण्वादिविभूतिविशेषानुपदिश्य तत्र मुख्याधिकारिण 'एकांशेन स्थितो जगत्' इति विश्वात्मकमैश्वरं रूपमुपास्यमिति सूचयित्वा यदेतद्रूपं मुमुक्षूपासनीयं तदहं पश्येयमिति प्रार्थितवतेऽर्जुनाय तद्दर्शयित्वा ममैतद्रूपमुक्तसाधनसंपत्त्या यः समुपास्ते स ज्ञानेन कैवल्यं परमपुरुषार्थं प्राप्नोतीति स्वोपास्तेर्महाफलवत्त्वं प्रतिपाद्य, अधुना सगुणनिर्गुणोपासकानां तारतम्यविशेषं सगुणोपासकानां स्वोपास्तेः साधनान्तराणि च निर्गुणब्रह्मविदां समुत्पन्नज्ञानरक्षार्थं साधनविशेषं च निरूपयितुं द्वादशाध्याय आरभ्यते । तत्रादौ 'न जायते म्रियते वा' इत्यादिना परं ब्रह्म ज्ञेयत्वेनोक्त्वा 'निस्त्रैगुण्यो भवार्जुन' इति, 'तद्बुद्धयः' इति, 'महात्मानस्तु मां पार्थ' इति, 'मद्भक्ता यान्ति मामपि' इति च परस्य ब्रह्मण उपासनं तत्फलं च निरुक्तं सप्तमेऽष्टमे नवमे दशमे एकादशे च सगुणब्रह्मणोऽपि स्वरूपमुपासनं च सफलं प्रतिपादितं; तदेतद्रूपद्वयं श्रुत्वा द्वयोरेतयोः पक्षयोर्विशेषे ज्ञाते सुकरे मुमुक्षवः प्रवर्तेरन्निति बुद्ध्या सगुणनिर्गुणोपासकानां तारतम्यविशेषं ज्ञातुमिच्छया भगवन्तं प्रष्टुमर्जुन उवाच—

अर्जुन उवाच ।

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥

एवमिति । एवमेवंप्रकारैस्त्वत्कर्मकृत्त्वत्परमत्वत्द्भक्तत्वासङ्गत्वनि-

वैरत्वलक्षणैः साधनैः सततयुक्ताः सततं सर्वदाऽभिन्नतया युक्ता विशिष्टा भूत्वा ये भक्ताः सगुणनिष्ठास्त्वां विश्वरूपं सर्वज्ञं सर्वकारणं परमेश्वरं पर्युपासते भजन्ते । किंच अव्यक्तं शब्दादिविशेषाभावान्न व्यज्यत इत्यव्यक्तं सर्वेन्द्रियागोचरं 'अस्थूलमनण्वह्रस्वम्' इत्यादिश्रुतिप्रसिद्धमक्षरं स्वस्मिन्नध्यस्तं सर्वं महदादिस्थूलान्तमश्नुत इत्यक्षरमपि निर्विशेषं त्वां परं ब्रह्म ये च ब्रह्मविदः शमदमादिभिरद्वेष्टृत्वादिभिः सत्साधनैः संपन्नाः सन्तः पर्युपासते निरन्तरमनुसंदधते तेषामेतेषामुभयेषां मध्ये के योगवित्तमाः योगः समाधिस्तं विदन्ति प्राप्नुवन्तीति योगविदस्तेषां मध्ये के विशिष्टयोगिन इत्यर्थः । अत्रायमभिप्रायः— मुमुक्षूणां सगुणोपासनं निर्गुणोपासनं चोभयमपि मोक्षसाधनं त्वयोपदिष्टं तत्र सुकरं किं साक्षान्मोक्षहेतुः किं तद्वक्तव्यमिति ॥ १ ॥

एवं पृष्टवते आरुरुक्षोः प्रथममेवोत्तमं साधनं सुकरं द्वितीयं त्वारूढस्येति सूचयन्नारुरुक्षवेऽर्जुनायादिममेव प्रोचनपूर्वकमुपदेष्टुं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥

मयीति । मोक्षस्वरूपे मयि मनः सम्यगावेश्य मोक्षमेव वाञ्छन्तः सन्त इत्यर्थः । यद्वा मयि मत्स्वरूपे दृष्टं स्पृष्टं श्रुतं मतं च सर्वं ब्रह्मैवेति सर्वस्य मन्मात्रत्वग्रहण एव मन आवेश्य सम्यङ्निधाय । यद्वा मयि मद्ध्यान एव नतु विषयचिन्तने मन आवेश्य नित्ययुक्ता मत्कर्मकृत्त्वादिधर्मेषु नित्यमजस्रं युक्ता नियता भूत्वा परया निश्चलया श्रद्धया उक्तसाधनैः परमेश्वरोपास्तौ कृतायां चित्तशुद्धिस्ततो ज्ञानं च तेन मोक्षोऽपि सिध्यति वा न वेत्यादिसंशयनिर्मुक्तयाऽस्तिक्यबुद्ध्या समुपेताः सन्तः स्वधर्मं स्वाश्रमं स्वजनं स्वलक्षणं चापरित्यज्यैवातिभक्त्या ये मां विश्वरूपं सर्वज्ञं सर्वात्मकं परमेश्वरमुपासते सदा सर्वत्र सर्वं मामेव भावयन्ति त एव युक्ततमा योगिश्रेष्ठा इति मे मताः । मया निश्चिता इत्यर्थः । गृह एव वर्तमाना मोक्षैककामनया मत्कर्मकृत्त्वादिमोक्षसाधनपरिनिष्ठिता भूत्वा सदा सर्वं मामेव भावयन्तः सन्तो ये कालं नयन्ति तेषामेव युक्तं योगिवरिष्ठत्वमित्यभिप्रायः । एतेन स्वाधिकारानुरूपं सगुणोपासनमेवारुरुक्षोर्मुमुक्षोः सुकरं स्वार्थदं साधनमिति सूचितं भवति ॥ २ ॥

मुमुक्षूणां मन्दप्रज्ञानां सगुणोपास्तौ प्रवृत्तिसिद्धये 'ते मे युक्ततमाः' इति कर्मयोगिनः स्तुत्वाऽधुना परस्य ब्रह्मणः स्वरूपं साधकानां साधनसंपत्तिं च प्रतिपादयन्निर्गुणोपासकानां युक्ततमत्वं तदुपास्तेः साक्षान्मोक्षैकसाधनत्वं च फलप्रकाशनेन स्वयमेव सिध्यतीति ब्रह्मविदां ब्रह्मोपास्तेः फलमाह—

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्॥ ३॥
संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥ ४॥

ये त्विति द्वाभ्याम्। उपासकानामुपास्तेरुपास्यस्य च क्रमात्साधनतः फलतः स्वरूपतश्च। पूर्वस्माद्वैलक्षण्यद्योतनार्थस्तुशब्दः। इन्द्रियग्रामं संनियम्य संनिरुध्य विषयग्रहणायेन्द्रियेषु चलितेषु मनोऽपि चलति तेन समाधिर्भिद्यते तत इन्द्रियाणां विषयग्रहणवैमुख्यं संपाद्येत्यर्थः। सर्वभूतहिते मशकपिपीलिकादीनां च सर्वेषां भूतानां हिते उपद्रवानाचरणे 'जनकूपानैष्ठुर्यमुत्सृज्यताम्' इतिन्यायेनाहितानाचरणे च रता निरताः। यद्वा सर्वेषां ब्रह्मादिस्तम्बान्तानां भूतानां प्राणिनां हिते परमप्रेमास्पदत्वात्प्रियतमे प्रत्यगात्मनि रताः सर्वत्र प्रत्यग्रूपेण स्थितमात्मानं सर्वात्मकोऽहमिति स्वात्मना पश्यन्त इत्यर्थः। तत एव सर्वत्र प्रपञ्चे समबुद्धयो ब्रह्मदृष्टयः सन्तो ये तु यतयो ब्रह्मविदः स्वयमव्यक्तं शब्दस्पर्शरूपाद्यभावान्न व्यज्यत इत्यव्यक्तं सर्वेन्द्रियागोचरं तत एवानिर्देश्यं वागादिभिरिदमिति निर्देष्टुमशक्यं सर्वत्रगं गगनवन्निराकारं परिपूर्णमव्यक्तत्वादचिन्त्यमत एव कूटस्थं कूटवदकम्प्यतया तिष्ठतीति कूटस्थं तत एवाचलं चलनवर्जितं ततएव ध्रुवं शाश्वतमेवंलक्षणमक्षरं परं ब्रह्म पर्युपासते सर्वदानुसंदधते। सर्वं निर्विशेषं ब्रह्मैव ये पश्यन्तीत्यर्थः। ते ब्रह्मनिष्ठा मामेव सच्चिदानन्दैकरसं परं ब्रह्म प्राप्नुवन्ति। सगुणोपासकाः पूर्वोक्ता भक्तास्त्वग्न्यादिदेवान् प्राप्य क्रमेण मां प्राप्नुवन्ति। अक्षरोपासकास्तूत्क्रान्तिं देवतान्तरप्राप्तिं च विना साक्षाद्ब्रह्मैव मां प्राप्नुवन्तीत्यर्थः। यत एवं ततः साक्षाद्ब्रह्मप्राप्तिरेव ब्रह्मविदामब्रह्मविदां च युक्ततमत्वमयुक्ततमत्वं च विस्पष्टयति। यथा परानपेक्षया तदपेक्षया च राजसान्निध्यं प्राप्तवतामाप्ततमत्वमनाप्ततमत्वं च तत्प्राप्तिरेव विशदयति तद्वत्तेन युक्ततमत्वं पूर्वेषामौपचारिकमिति सिद्धम्। निर्गुणोपास्तेरेव साक्षात्साधनत्वं ब्रह्मप्राप्त्या सूचितं भवति। एतेन सदसद्विवेकवतां पण्डितानां शुद्धा-

त्मना तीव्रमोक्षेच्छावतां सर्वकर्मसंन्यासपूर्वकं श्रवणादिना ब्रह्म ज्ञात्वा तदुपास्तिरेव कर्तव्या विदेहकैवल्यसिद्धय इति सूचितं भवति ॥३॥४॥

अपक्वचित्तानामक्षरोपास्तौ क्लेशाधिक्यमिति सूचयितुमाह—

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥

क्लेश इति। यद्यपि व्यक्तस्य ममेश्वरस्योपासकानामपि मत्कर्मकृत्त्वादिधर्मसिद्धावस्त्येवाधिकक्लेशस्तथाप्येतदपेक्षया अव्यक्तासक्तचेतसां अव्यक्ते सर्वेन्द्रियागोचरे अदृश्यादिगुणकेऽतर्क्येऽचिन्त्येऽप्रमेये परे ब्रह्मण्यासक्तं तद्भावापत्त्यै यतमानं चेतो येषां तेषामव्यक्तासक्तचेतसां निराकारं परं ब्रह्म निदिध्यासयतां यतीनां विषयत्यागकृत आश्रमधर्मकृतो यमनियमाद्यभ्यासकृतोऽसत्प्रत्ययनिरासकृतो निराकारे ब्रह्मणि मनःस्थापनकृतश्च क्लेशोऽधिकतरो भवति । एकैकस्य साधनस्य सिद्धेर्दुष्करत्वात्त्राप्यनात्मन्यहंभावपरित्यागो ब्रह्मणापि कर्तुं न शक्यते । तथा ब्रह्मणि जगत्प्रत्ययपरित्यागोऽपि तत्त्यागस्य निरन्तरक्लेशसाध्यत्वाद्ब्रह्मविदामधिकतर एव क्लेश इत्यर्थः । इममर्थं स्वयमेव विस्पष्टयति श्रीभगवान्—**अव्यक्तेति** । हि यस्मात्कारणादव्यक्ताऽव्यक्तात्मिका गतिस्तद्भावापत्तिर्देहवद्भिर्देहतादात्म्यवद्भिः पुंभिर्दुःखं यथा तथाऽवाप्यते । दुःखेनात्यन्तक्लेशेन प्राप्यत इत्यर्थः । नहि सामान्यप्रयत्नेन देहाद्यहंकारः पुंसो निवर्तते चिरकालनित्यनिरन्तरनियतनिर्विकल्पसमाधिनिष्ठाविशेषाधिक्येन विना सति यस्मिन्निःशेषविनष्टे ब्रह्मण्येवात्मत्वं सिध्यति, अतो युक्तमव्यक्तासक्तचेतसां क्लेशाधिकतरत्वम् । तेषां या देहाद्यहंकारविच्छित्तिः साधनसंपत्तिः साऽग्रे कथ्यते ॥ ५ ॥

यस्मादेवं तस्मादनायासेनाक्षरोपास्तिसिद्धेः कारणं सगुणोपास्तिः सावश्यं मुमुक्षुभिः कर्तव्या । ये तु तन्निष्ठास्ते सुखेनाक्षरोपास्तिं तत्प्राप्तिं च गच्छन्तीत्युभयसाध्यसाधनभावमङ्गीकृत्य साधनस्यैवावश्यकर्तव्यतां सूचयितुमाह—

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६ ॥

ये त्विति । तुशब्दः पूर्वोपासकव्यावृत्त्यर्थः । ये तु सगुणोपासका मद्भक्ताः सर्वाणि वैदिकान्यवैदिकानि च कर्माणि मयि परमेश्वरे संन्यस्य मदर्पितानि कृत्वा मत्पराः मदेकप्रवणाः सन्तः । यद्वा अहमेव विश्वरूपः परमात्मा परः स्वस्मादन्यः श्रोतव्यो द्रष्टव्यः स्प्रष्टव्यो मन्तव्यो

ज्ञातव्यश्च पदार्थो येषां ते मत्पराः । स्वव्यतिरेक्ते वस्तुनि सर्वत्र मद्बुद्धय इत्यर्थः । तत एवानन्येन न विद्यते मद्यतिरिक्तं बुद्धेरालम्बनं यत्र सोऽनन्यस्तेनैव योगेन समाधिना मां विश्वरूपं सर्वात्मकं परमेश्वरं ध्यायन्त उपासते । मदाकारवृत्त्या सदा मामेव ये भजन्तीत्यर्थः ॥ ६ ॥

एवं सगुणोपास्त्या शुद्धात्मनामक्षरोपास्तिस्तत्फलप्राप्तिश्च सुलभेति सूचयितुं सगुणोपास्तेः फलमाह—

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥ ७ ॥

तेषामिति । मयि विश्वरूपे 'एष सर्वभूतान्तरात्मा' इत्यादिश्रुतिप्रसिद्धे परमेश्वर एवावेशितं सर्वं ब्रह्मैवेति भावनायामेव स्थापितं चेतो येषां तेषां सर्वदा सर्वथा मामेव भजतां मद्भजनेन संप्राप्तसत्त्वशुद्धीनां तेषां मद्भक्तानां नचिराच्छीघ्रं मदुपास्त्या सम्यक् चित्तशुद्ध्युत्पत्त्युत्तरक्षण एव 'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥' इत्युक्तप्रकारेणाहं परमेश्वरः सम्यग्दर्शनलक्षणं ज्ञानयोगं दत्त्वा ज्ञानदीपेनाज्ञानध्वान्तविध्वंसनं च कृत्वा । सम्यङ्निर्गुणब्रह्मनिष्ठां संपाद्येत्यर्थः । मृत्युसंसारसागरात् म्रियन्ते पुनःपुनः प्राणिनो यस्मात्स मृत्युरज्ञानं सर्वानर्थकारणं तेन युक्तस्तत्कार्यभूतोऽहंममेत्यादिप्रवृत्तिलक्षणः संसारः सोऽयं निरवधिकत्वात् दुस्तरत्वात्तापत्रयवडवानलमयत्वाच्च सागरवद्भवतीति मृत्युसंसारसागरस्तस्मादुद्धर्तास्मि समुद्धरणकर्ता भवामि । ब्रह्मज्ञानं तन्निष्ठा तत्प्राप्तिश्च यथा सिध्येत्तथाऽनुग्रहं करोमीत्यर्थः । एतेन सगुणोपास्तिरङ्गं निर्गुणोपास्तिरङ्गी तयोः फलं तु मोक्ष एवं मत्प्रसादैकलभ्य इति सूचितं भवति ॥ ७ ॥

यस्मादक्षरज्ञानं तत्फलं च मत्प्रसादैकलभ्यं मत्प्रसादोऽपि मदुपास्त्येकलभ्यस्तस्मान्मदुपासनं कुर्वित्याह—

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८ ॥

मय्येवेति । मकारं प्रयुज्य संधिः कर्तुं शक्यते, तथापि स्वस्य बहुव्याकरणज्ञत्वप्रकाशनार्थमत ऊर्ध्वमित्युक्तम् । मय्येव विश्वरूपे सगुणे नतु निराकारे केवलेऽक्षरे मदुपास्त्या विना तज्ज्ञानस्य तदुपास्तेश्चातिदुर्लभत्वात् । मन आधत्स्व सर्वत्र वृत्तेर्विषयं मामेव कुरु नतु शब्दादिकमित्यर्थः । किंच मय्येवोक्तलक्षणे बुद्धिं वस्तुतत्त्वावधारणशी-

लामन्तःकरणवृत्तिं विशेषात्मिकां निवेशय। इदं सर्वं ब्रह्मैवेति निश्चयवत्त्या बुद्ध्या सदा मामनुसंधेहीत्यर्थः । अत ऊर्ध्वं निर्विशेषज्ञानं प्राप्य तद्बलेन देहसंबन्धमुत्सृज्य निर्विशेषात्मना मय्येव निर्विशेषे परे ब्रह्मणि निवसिष्यसि विदेहकैवल्यं प्राप्स्यसि । नास्त्यत्र संशयः । मद्भक्तस्य तव प्रतिबन्धासंभवात् कैवल्यं सिध्यति वा न वेति संदेहो न कर्तव्यः किंतु मदेकाश्रयस्य मदुपास्त्या चित्तशुद्धिस्तया ज्ञानं तेन विदेहकैवल्यं च निष्प्रत्यूहेनैव सिध्यतीत्यर्थः ॥ ८ ॥

विश्वरूपोपासनमनेकविपरीतप्रत्ययकोटिप्रतिबन्धकमुक्तरीत्या कर्तुमशक्तानामतिमन्दप्रज्ञानां साधनान्तराण्युपदिशति—

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥ ९ ॥

अथेति । प्रज्ञाबलेन ज्ञानधनं जयतीति हे धनंजय, अथवोक्तरीत्या मयि विश्वरूपे परमात्मनि स्थिरं निश्चलं यथा तथा चित्तं समाधातुं सम्यक् स्थापयितुं यदि न शक्नोषि तर्हि त्वमभ्यासयोगेन विपरीतप्रत्ययान् तिरस्कृत्य सजातीयप्रत्ययावृत्तिरभ्यासः घटपटादिप्रत्ययप्रविलापनपूर्वकं सर्वमिदं भौतिकमेवेति सर्वप्रमाणसिद्धे सर्वस्य भौतिकत्वप्रत्यये चिरकालं नित्यं निरन्तरं तात्पर्येण समभ्यस्यमाने सदा सर्वत्र भौतिकप्रत्ययो विपरीतप्रत्ययानन्तरितो दृढतरः समुदेति । तेन मनश्चलनहेतूनां घटादिप्रत्ययानां सवासनानां संशये सति मनः सुस्थिरं भवति । एवं सर्वस्य भौतिकमात्रत्वप्रत्ययाभ्यासः सगुणब्रह्मोपास्तिसिद्धेरुपायत्वाद्योग इत्युच्यते । स चासौ योगश्च तेनाऽभ्यासयोगेन मनसि निश्चले सति ततस्तदनन्तरं विश्वरूपं मां परमेश्वरमाप्तुं सर्वत्र भौतिकत्वप्रत्ययं त्यक्त्वा सर्वं ब्रह्मैवेति सगुणं ब्रह्म मां विश्वरूपं ब्रह्मप्रत्ययैरुपासितुमिच्छ त्वमिच्छां कुरु । सर्वं ब्रह्मैवेति सर्वं मामेव भावयेत्यर्थः ॥ ९ ॥

उक्तलक्षणाभ्यासयोगेनापि ब्रह्मोपासितुमशक्तस्यातिमन्दबुद्धेः साधनान्तरमाह—

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥ १० ॥

अभ्यासेऽपीति । अभ्यासेऽपि सजातीयप्रत्ययावृत्तिलक्षणाभ्यासेऽपि यदि त्वमसमर्थोऽशक्तोऽसि तर्हि त्वमभ्यासयोगमकृत्वैव नियमेन मत्कर्म वैदिकं लौकिकं च सर्वं कर्म मदर्थमेव न तु स्वार्थमीषदपि तत् परमं प्रधानं तात्पर्येण कर्तव्यं नतु ध्यानादिकं यस्य स मत्कर्मपरमो भव ।

यथा राजार्थं भटस्तथा मदर्थमेव सर्वं कर्म कुर्वित्यर्थः । एवमीश्वरार्थमेव कर्म कुर्वतस्तदनुष्ठानस्य फलमाह—**मदर्थमिति** । नियमेन श्रद्धया च मदर्थमेव सर्वाणि कर्माणि कुर्वन्नपि तदनुष्ठानसंभावितचित्तशुद्धिजन्यद्वारा सिद्धिं कैवल्यसिद्धिं प्राप्स्यसीत्यर्थः । एतेनाज्ञस्येश्वरोद्देशेन सर्वकर्माचरणमभ्यासापेक्षया मुक्तेः सुखसाधनमिति सूचितं भवति ॥ १० ॥

उक्तलक्षणकर्मानुष्ठानेऽप्यसमर्थस्यात्यन्तमन्दबुद्धेः सर्वदा मदुपासनमेव मुमुक्षोरवश्यं कर्तव्यमिति सूचयितुं साधनान्तरमाह—

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥

अथेति । अथवोक्तरीत्या मामुद्दिश्यैव कर्म प्राधान्येन कर्तुं यदि त्वं न शक्नोषि तर्हि यतात्मवान् यतः संयतः कामसंकल्पविमुखीकृत आत्मा चित्तमस्यास्तीति यतात्मवान् नियतचित्तो भूत्वा मद्योगमाश्रितः कर्मणानेन प्रीयतां भगवानिति मयि परमेश्वरे क्रियमाणानां सर्वेषां कर्मणां योजनं मद्योगः मयि सर्वकर्मसमर्पणं सर्वकर्मसंन्यास इति यावत् । तमाश्रितः सन् ततः समनुष्ठितकर्मणां मत्समर्पणानन्तरमेव सर्वकर्मफलत्यागं कृतानां सर्वेषां कर्मणां यानि फलानि तेषां त्यागः संन्यासस्तं कुरु । कर्मफलेषु कामं परित्यजेत्यर्थः । मयि समर्पितेषु सत्सु कर्मसु परार्थेष्विव फलकामासंभवाद्यथा सर्वकर्मपरित्यागस्तथैव तव मुक्तिरित्यभिप्रायः । एतेन कर्मफलेषु सुतरां कामं परित्यज्येश्वरार्पणबुद्ध्या विध्युक्तकर्माचरणमतिमूढस्यापि मुक्तेः सुखसाधनमिति सूचितम् ॥ ११ ॥

एवं यतात्मत्वपूर्वकं त्वं सर्वकर्मफलत्यागं कुर्वित्युपदिश्यात्रैव मुमुक्षोरपण्डितस्य प्रवृत्तिसिद्धये रुचिमुत्पादयितुं सर्वकर्मफलत्याग एव सर्वेभ्यो मोक्षसाधनेभ्य उत्तमं साधनमिति तं स्तौति—

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥ १२ ॥

श्रेय इति । मुमुक्षोरभ्यासात्सर्वसंन्यासपूर्वकाद्यमनियमादिश्रमसाध्याच्छ्रवणाद्यभ्यासाज्ज्ञानं श्रवणमननसंभावितश्रुतियुक्तिजन्यं ब्रह्मात्मैकत्ववेदनलक्षणं श्रेयो हि मोक्षस्य श्रेष्ठतरं साधनं खल्विति । हिशब्दः सर्वशास्त्रप्रसिद्धिद्योतनार्थः । ज्ञानात् सप्रतिबन्धकात् प्रतिबन्धनिवृत्तिकारणं ध्यानं सजातीयप्रत्ययावृत्तिलक्षणं विशिष्यते जन्मादिहेतोरविद्याकामसंकल्पादिप्रतिबन्धस्य निवर्तकत्वाद्विशिष्टतरं भवति । निरुक्तलक्षणाद्ध्यानात्क-

र्मफलत्यागो विशिष्यते मनोनैश्चल्यस्यातिदुर्लभत्वाद्विपरीतप्रत्ययनिवारणस्याप्यतिदुष्करत्वान्नित्यनिरन्तरप्रयत्नैकसाध्यत्वाच्च ध्यानं महत्तरक्लेशसाध्यं यतस्ततो यथाशक्ति कृतानां कर्मणां फलपरित्यागस्तु निरुक्तश्रमरहितत्वेन मोक्षं प्रत्यन्तरङ्गसाधनत्वेन च ध्यानाद्विशिष्टतरो भवति कामनाशकत्वधर्मस्योभयत्र तुल्यत्वेऽप्युक्तश्रमरहितत्वेन ततः श्रेष्ठतरो भवति । यदनुष्ठानादनन्तरमुत्तरकाल एव तदनुष्ठातुः सर्वकर्मसंन्यासवतो नियतचित्तस्य कामसंकल्पादिदोषनिर्मुक्तस्य शुद्धबुद्धेः कर्मयोगिनः संसारोपशमो मोक्षः सिध्यतीत्यर्थः । ननु कर्मफलत्यागादेव मोक्षे सिद्धे 'तरति शोकमात्मवित्','तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय' इत्यादिबहुश्रुतिविरोधो ज्ञानान्मुक्तिरिति सर्वशास्त्रज्ञसमयविरोधश्च स्यादिति चेन्न । 'त्यागाच्छान्तिरनन्तर'मित्यस्य वाक्यस्य कर्मफलत्यागस्तुतिपरत्वात्, स्तुतेः प्रवृत्तिप्ररोचनार्थत्वाच्च । 'अथ चित्तं समाधातु'-मित्यारभ्य मुमुक्षोरतिमन्दप्रज्ञस्याभ्यासेऽपीश्वरोद्देशेन कर्तव्ये कर्मण्यप्यशक्तस्य चित्तशुद्धिसाधनत्वेन करणीयतया कर्मफलत्यागस्य विधानादस्यैव मुख्यत्वे प्राथम्येनैव निर्देशप्रसङ्गात् 'मत्कर्मकृन्मत्परमः' इत्यादिसाधनपञ्चकविधानवैयर्थ्यापत्तेश्च 'आत्मा वा अरे द्रष्टव्यः' इत्यात्मसाक्षात्कारमुद्दिश्य श्रवणादिविधेरानर्थक्यप्रसङ्गाच्च । ततः कर्मफलत्यागस्तुतिरेवैषा । ब्रह्मण्यर्पितेषु सत्सु कर्मसु पुनस्तत्र तत्फले च संकल्पः कामोऽपि न संभवति तदनुदय एव चित्तस्य शुद्धिस्तया सकृदुपदेशादेव ज्ञानं तेन मोक्षः सिध्यतीत्युपायेन मूढतमं स्वार्थे कर्मणि प्रवर्तयितुं कर्मफलत्यागः स्तूयते श्रेयो हीत्यादिना । ततो नात्र श्रुतिविरोधो नापि समयविरोधश्च । यद्वा 'मय्येव मन आधत्स्व' इत्यारभ्य 'सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्' इत्यन्तेन ग्रन्थेन मुमुक्षूणां चित्तशुद्धेः परमकारणमधिकारिभेदेन गुरुलघ्वादिभेदभिन्नं सगुणोपासनं कर्तव्यत्वेन प्रतिपाद्याधुना सगुणोपास्त्या-परिशुद्धबुद्धेस्तदुपास्तेः फलभूतमक्षरोपासनं कर्तव्यमिति बोधयितुं तदुपासनस्य श्रवणादेरुत्तरोत्तरस्योत्कृष्टत्वं प्रतिपादयति—**श्रेयो हीति** । मुमुक्षोः परिशुद्धात्मनस्त्वभ्यासः श्रवणाद्यभ्यासः श्रेयान् सगुणोपासनेभ्यः सर्वेभ्यः श्रेष्ठो भवति । 'ज्ञानादेव तु कैवल्यम्' इति श्रुत्यैव तुशब्देनेतरव्यावृत्तिपूर्वकं ज्ञानस्यैव साक्षान्मोक्षकारणत्वावधारणात् । तत्सिद्धेः प्रकृष्टं कारणं श्रवणादिरेव ज्ञानहेतोः श्रवणादेरभावे पूर्वोपासनानैष्फल्यमेव यतस्ततो युक्तं श्रवणाद्यभ्यासस्य तेभ्यः श्रेयस्त्वं स एव मोक्षैककामस्य शुद्धात्मनः सर्वकर्मसंन्यासपूर्वकं कर्तव्य इति

श्रेय इत्युक्त्या बोधितं भवति । 'आत्मा वा अरे द्रष्टव्यः', 'सोऽन्वेष्टव्यः' इति, 'संन्यस्य श्रवणं कुर्यात्' इत्यादि श्रुतिस्मृतिप्रसिद्धिद्योतनार्थो हिशब्दः । अभ्यासाच्छ्रवणाद्यभ्यासाज्ज्ञानं तज्जन्यं ब्रह्मात्मैकत्वग्राहकं श्रेयस्ततः श्रेष्ठतरं ज्ञानानुत्पत्तावभ्यासस्य निष्फलत्वाद्युक्तं ज्ञानस्य ततः श्रेष्ठतरत्वम् । अत्रापि श्रेय इत्युक्त्या बहूनां ब्रह्मविदां सन्निधौ बहुधा श्रुत्वावश्यं ज्ञानं संपादनीयमिति बोधितं भवति । तस्माज्ज्ञानादपि सप्रतिबन्धात्तन्निवृत्तिकारणं ध्यानमुक्तलक्षणं विशिष्यते । 'ततस्तु तं पश्यति निष्कलं ध्यायमानः' इति श्रवणाद्ध्यानस्याप्रतिबन्धसाक्षात्कारहेतुत्वाद्युक्तं ज्ञानाद्विशिष्टत्वम् । ध्यानात्कर्मफलत्यागः प्रत्यग्वृत्तेर्वासनायाः कर्मत्वेन यत्फलति दृश्यजातं तत्कर्मफलमित्युच्यते, तस्य त्यागः नित्यनिरन्तरनिर्विकल्पकसमाधिनिष्ठयाऽदर्शनं बहिरन्तः सर्वत्र सर्वथा ब्रह्ममात्रोपलम्भः कर्मफलत्यागो ध्यानाद्विशिष्यते । 'यत्र त्वस्य सर्वमात्मैवाभूत्' इति श्रवणान्निरवशेषितसर्वविशेषत्वात्कर्मफलत्यागस्य त्रिपुटिमतो ध्यानाद्विशिष्टत्वं युक्तं त्यागात्सर्वकर्मफलत्यागान्निर्विकल्पकसमाधेर्निःशेषविनष्टविपरीतवासनाग्रन्थेर्विदुषस्त्वनन्तरमेतद्देहपातानन्तरमेव शान्तिरात्यन्तिकसंसारोपशमो ब्रह्मात्मनावस्थानलक्षणं विदेहकैवल्यं सिध्यतीत्यर्थः । उभयत्रापि विशिष्यत इत्युक्त्या मोक्षैककामस्य ज्ञानस्याप्रतिबद्धत्वसिद्धये सविकल्पको निर्विकल्पकश्च समाधिरवश्यं कर्तव्य इति बोधितं भवति ॥ १२ ॥

निरुक्तशान्तिलक्षणं ब्रह्मभावं विदेहकैवल्यं प्राप्तुमिच्छया यस्त्वद्वेष्टृत्वादिधर्मसंपन्नो भूत्वा ब्रह्मनिष्ठायामेव तिष्ठति स एव मद्भक्तो मम प्रिय इति यतीनां सम्यग्ज्ञानसिद्धये ब्रह्मनिष्ठा कर्तव्येति सूचयितुं सप्तभिर्ब्रह्मविदं स्तौति—

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ १३ ॥

अद्वेष्टेत्यादिना । सर्वभूतानां सर्वेषामपि प्राणिनामद्वेष्टा द्वेषो नामाप्रीतिस्तामात्मन उपद्रवं कुर्वतोऽपि जन्तोर्यस्य कस्यापि न करोति मनोवाक्कायकर्मभिर्नाचरतीत्यद्वेष्टा निर्विकल्पकसमाधिनिष्ठया निर्मूलितभेदप्रत्ययत्वादहमेवेदं सर्वमिति सर्वात्मभावापन्नस्य विदुषो द्वैतप्रत्ययानुत्पत्तौ स्वस्वरूपे सर्वत्र प्रीतिमत्तया द्वेषबुद्ध्यसंभवात्सर्वेषामपि भूतानामद्वेष्टैव भवति ब्रह्मविद्यतिः । सत्येकस्मिन् रागे तदपकारिषु द्वेषः स्यात्सर्वात्मभावापन्नस्यैकत्र रागासंभवाद्विदुषो युक्तं सर्वभूताद्वेष्टृत्वम् । अद्वेष्टेत्युक्त्या विदुषो रागद्वेषाद्यभावस्तेन मुक्तेः प्रतिबन्धाभावश्च सूचितो

भवति । किंच सर्वेषां भूतानां मित्रवदनुकूलतया वर्तत इति मैत्रः स्वात्मभूतेषु भूतेषु सर्वत्र मित्रवद्वर्तनं विदुषो युक्तम् । मित्रत्वसिद्धेः कारणमाह—**करुण इति** । करुणयैव सर्वेषामानुकूल्ये वर्तते नतु गुणबुद्ध्या, गुणस्यापि दोषवद्बन्धकत्वात् । करुण इत्यत्र मतुबर्थेऽच्प्रत्ययः । अद्वेष्टृत्वादिधर्मत्रितयसिद्धेः कारणमाह—**निर्मम इति** । परदेहवत्स्वदेहान्निर्गतो ममभावो यस्य स निर्ममः । रागद्वेषहेतोर्ममताबन्धान्निर्मुक्त इत्यर्थः । तदभावादेवामुष्याद्वेष्टृत्वादिधर्मत्रितयसिद्धिः । निर्ममत्वसिद्धेः कारणमाह—**निरहंकार इति** । ब्रह्मैवाहमिति परे ब्रह्मण्येवात्मभावापत्त्या देहान्निःशेषेण निर्गताहंबुद्धिर्यस्य स निरहंकारः । निरन्तरब्रह्मनिष्ठया ब्रह्मण्येव निरूढात्मबुद्धेरेव देहादावहंभावो विच्छिद्यते तत एव निर्ममत्वं सिध्यति । नहि देहेऽहंबुद्धौ सत्यां ममतेषदपि गच्छति ततो देहेऽहंभावाऽभावादेव विदुषो निर्ममत्वं तत एव समदुःखसुखः समे अनिष्टत्वेष्टत्वबुद्धिं त्यक्त्वैकरूपेण गृहीते दुःखसुखे द्वेषरागयोर्जनके यस्य ब्रह्मनिष्ठया तिष्ठतो यतेः स समदुःखसुखः । सुखदुःखयोः प्राप्तौ हर्षविषादरहित इत्यर्थः । उभयत्र समबुद्धिसिद्धेर्हेतुमाह—**क्षमीति** । तितिक्षुराध्यात्मिकादिदुःखानां संतापविलापराहित्येन सहनशील एव क्षमीत्यर्थः । 'वृक्ष इव तिष्ठासेच्छिद्यमानो न कुप्येत न कम्पेत' इति श्रुतेः ॥ १३ ॥

तर्हि कथं स्थातव्यमित्यत आह—

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १४ ॥

संतुष्ट इति । सततमिति विशेषणपञ्चकेनापि संबध्यते । सुखदुःखयोर्मानावमानयोर्लाभालाभयोश्च सततं सर्वदापि संतुष्टः ब्रह्मानन्दानुभूत्या संतोषयुक्तः सन्नेव प्रसन्नवदनो भवति । सदानन्दयुक्तत्वे हेतुमाह—**योगीति** । सर्वदा ब्रह्मण्येवानन्दात्मनि चित्तनैश्चल्येन स्थितिर्योगः सोऽस्यास्तीति योगी सदात्माराम इत्यर्थः । योगित्वसिद्धेर्हेतुमाह—**यतात्मेति** । सततं यतः संयतः 'समं कायशिरोग्रीवम्' इत्युक्तलक्षणेन स्थापित आत्मा देहो यस्य स यतात्मा सत्येव कार्यकारणसंघातनिरोधे समाधिः समाधिमत एव विपरीतप्रत्ययनाशस्तत एव सम्यक् ज्ञानं तद्वत एव विदेहमुक्तिरतो यतेः सदा समाधिना भवितव्यमिति सूचितम् । यद्वा यतो निरुद्ध आत्मा स्वभावो वासना यस्य स यतात्मा सततं योगी यतात्मेति विशेषणाभ्यां नैश्चल्येन योगसिद्धेः कारणमाह—**दृढनिश्चय इति** । निरन्तरसमाधिसंजातसम्यग्ज्ञानस्य विषयभूते परे ब्रह्मण्येवात्मत्वानुभूत्या समुत्पन्नो ब्रह्मैवाहं नतु सं-

सारीत्येवंलक्षणो दृढः प्रमाणान्तरप्रत्ययान्तरैरच्छेद्यः स्वभावनिश्चयो यस्य स दृढनिश्चयः । मूढो देहे यथा तथा ब्रह्मण्येवारूढाहंबुद्धिरित्यर्थः । यद्वा नित्यनिरन्तरसमाधिनिष्ठासंभूतेनाधिष्ठानयाथात्म्यसंदर्शनेनारोपितवस्तुतत्प्रत्यययोरभावे सिद्धे सर्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य च साक्षाद्ब्रह्ममात्रत्वाधिगमलक्षणो दृढः प्रमाणान्तराऽकम्पो निश्चयो वस्तुतत्त्वावधारणरूपो यस्य स दृढनिश्चयः । एवं दृढनिश्चयत्वासिद्धेः कारणमाह—**मय्यर्पितमनोबुद्धिरिति** । अहंवृत्तिर्बुद्धिरिदंवृत्तिर्मनः इदमहमात्मिके मनोबुद्धी मय्येव प्रत्यगभिन्ने पूर्णे ब्रह्मण्यर्पिते सर्वदा मदेकविषयत्वेन स्थापिते येन स मय्यर्पितमनोबुद्धिः । अहंबुद्धेरिदंबुद्धेश्च मामेव विषयं कृत्वा यः सर्वदा मामनुसंधत्ते मद्भक्तो मदनुसंधानपरः सदा सर्वत्र ब्रह्ममात्रदर्शी ब्रह्मवित्यतिः स मे ईश्वरस्य प्रियः आत्मभूतत्वात्सर्वेषामात्मैव खलु प्रियः । 'ज्ञानी त्वात्मैव मे मतम्' इति ज्ञानिनः स्वात्मत्वेनावधृतत्वादात्मभूतो ज्ञान्येव मम नित्यप्रियस्तदन्ये तु नैमित्तिकप्रिया इत्यर्थः । 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इत्युक्त एवार्थः पुनरप्यत्र शुद्धात्मनां विवेकवतां सूक्ष्मबुद्धीनां वयमपि ब्रह्मीभूयेश्वरस्य प्रिया भविष्याम इति श्रवणमनननिदिध्यासससमाधिषु प्रवृत्तिसंभूत्यर्थं प्रतिपादितः ॥ १४ ॥

अद्वेष्टृत्वादीनि स्थिरमतित्वान्तानि त्रयस्त्रिंशत्सिद्धस्य लक्षणानि साधकस्य तु ज्ञातपरिपाकसाधनान्यवश्यं संपादनीयानीति सूचयितुमध्यायसमाप्त्यन्तं तानि प्रतिपादयति—

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥

यस्मादिति । लोको जनो यस्मान्नोद्विजते उद्वेगं यथा न भजते । यस्य ब्रह्मविदः आगमनश्रवणदर्शनादिना प्राणिवर्गो न विक्षिप्यत इत्यर्थः । लोकादुपद्रवकारिणश्चोरसर्पव्याघ्रादेर्यः स्वयं च नोद्विजते । तेषामागमनदर्शनादिभिरुद्वेगं यथा न प्राप्नोतीत्यर्थः । हर्षामर्षभयोद्वेगैर्मुक्तः इष्टप्राप्तौ हर्षः रोगाद्युपद्रवप्राप्तावमर्षोऽसहिष्णुता चोरसर्पादेः क्रूरजन्तोर्दर्शनादिना भयं प्राणहरणहेतोरनर्थस्य प्राप्तावुद्वेगोऽप्यथ सर्वैरेतैश्चित्तविकारैः स्वाज्ञानकृतैर्मुक्तः सन् हर्षादीनां विपरीतधर्मेषु परिनिष्ठितो भूत्वा यो मन्निष्ठायामेव तिष्ठति स मम प्रिय इत्युक्त एवार्थः ॥ १५ ॥

ब्रह्मविदो लक्षणान्तराण्याह—

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥

अनपेक्ष इति । दृष्टे श्रुतेऽपि च वस्तुनि सर्वत्र देहजीवनादावप्यसद्बुद्ध्या जीवत एव मुक्तत्वान्मोक्षेऽप्यपेक्षा न विद्यते यस्य ब्रह्मनिष्ठस्य यतेः सोऽनपेक्षः । सर्वकामनिर्मुक्त इत्यर्थः । शुचिः 'कर्मस्वसंगमः शौचम्' इति न्यायेन देहेन्द्रियादिभिरेव नतु स्वेन क्रियमाणेष्वन्नादानविसर्गादिषु दुष्टेष्वदुष्टेषु च कर्मसु कर्मण्यकर्मत्वदर्शनेन स्वस्य तैः संबन्धाभावादकर्त्रात्मदर्शी ब्रह्मविदेव शुचिः । नित्यशुद्ध इत्यर्थः । दक्षः श्रुतिस्मृतीतिहासपुराणन्यायमीमांसादिसर्वशास्त्राणामध्ययनाध्यापनतदर्थप्रकाशनानुष्ठानानुष्ठापनेषु सर्वेष्वपि च कर्मसु स्वयं बोद्धुं बोधयितुं कर्तुं कारयितुं च समर्थ इत्यर्थः । तथापि सर्वारम्भपरित्यागी । आरभ्यन्त इत्यारम्भाः सर्वे च ते आरम्भाश्च सर्वारम्भाः कर्माणि लौकिकानि वैदिकानि च सर्वाणि कर्माण्यविद्याकामसंकल्पाहंकारादिदोषप्रवर्धकत्वेन ज्ञानतत्फलप्रतिबन्धकत्वात् तानि परित्यक्तुं शीलमस्यास्तीति सर्वारम्भपरित्यागी सर्वकर्मसंन्यासीत्यर्थः। ननु विहिताचरणं धर्मस्तत्त्यागस्त्वधर्मः अधर्मे धर्मबुद्धिर्धर्मे त्वधर्मबुद्धिश्च श्रोत्रियस्य विवेकिनः संतापायैव भवति । कथं धर्मं त्यक्त्वा स्वयमधर्मं कृत्वा श्रोत्रियो न संतपतीत्याशङ्कायाम् । न । कर्मणां मोक्षं प्रत्यसाधनत्वात्समुत्पन्नज्ञानस्य प्रतिबन्धकत्वाच्च मुमुक्षोस्तत्त्यागस्य न्यायसिद्धत्वात् न्यायानुवर्तित्वाद्विद्वान्न तपतीत्याह—**गतव्यथ इति ।** गता चित्तान्निर्गता व्यथा कृत्याकृत्याननुष्ठानानुष्ठानकृतः संतापो यस्य स गतव्यथः । कृत्याकृत्ययोरनात्मकर्तृकयोरकर्त्रात्मदर्शी ब्रह्मविन्न तपतीत्यर्थः । 'नैनं कृताकृते तपतः' इति श्रुतेः । तर्हि कथं तिष्ठतीत्यत आह—**उदासीन इति ।** आहारादौ कर्मणि युक्तेऽयुक्ते च देहेन्द्रियादिषु स्वारब्धानुरूपेण प्रवृत्तेषु सत्सु स्वयं तटस्थवदुदासीनः साक्षी भूत्वाऽविक्रियात्मना तूष्णीं तिष्ठतीत्यर्थः । एवंलक्षणो यो मद्भक्तः स मे प्रिय इत्युक्तार्थः ॥ १६ ॥

रागद्वेषातिरिक्तो मुक्तेः प्रतिबन्धो न कश्चिदस्ति अतस्तौ मुमुक्षोस्तावदवश्यं परिहर्तव्याविति सूचयितुं मुक्तस्य तद्राहित्यं लक्षणमित्याह—

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १७ ॥

य इति । यो ब्रह्मविद्यतिः स्वयं परेच्छया अनिच्छया वा प्राप्तेऽपीष्टे वस्तुनि न हृष्यति । परप्रयत्नेनापि तत्र हर्षं न करोतीत्यर्थः । तथैवानिष्टं

प्राप्य न द्वेष्टि। स्वानिष्टप्रापकेऽप्यनिष्टेऽर्थे अप्रीतिं न करोतीत्यर्थः। महत्यनर्थे संप्राप्ते सति न शोचति। स्वनिष्ठया धैर्येण च तदविषयात्मज्ञानबलेनापि च स्वयमश्रुमोक्षं विलापं च न करोतीत्यर्थः। तथा प्राप्तस्यानर्थस्य निवृत्तिं न काङ्क्षति। प्रारब्धभोगक्षयमन्तरा वाञ्छामात्रेण तन्निवृत्तेरसंभवात्तितिक्षया तत्प्रतीकाराय न किंचिद्यतत इत्यर्थः। किंच शुभाशुभपरित्यागी शुभानि पुण्यान्यशुभानि पापान्यज्ञानसहभावीनि इच्छयाऽनिच्छया वा चिदाभासेन क्रियमाणानि कर्माण्यकर्मत्वज्ञानेन नाहं कर्तास्मीति परित्यक्तुं स्वस्माद्विश्लेषयितुं शीलमस्यास्तीति शुभाशुभपरित्यागी। देहेन्द्रियादिभिरेव कृतैः कर्मभिः प्रत्यग्दृष्ट्या स्वयं न श्लिष्यत इत्यर्थः। 'तद्यथा पुष्करपलाश' इत्यादिश्रुतेः। य एवंलक्षणो भक्तिमान् ज्ञानवान्यतिः स मे प्रिय इत्युक्त एवार्थः॥ १७॥

इदं ब्रह्मविद्यतेर्लक्षणं विशिष्टतरं विकारहेतुष्वप्यविकारात्मनावस्थानरूपं सर्वप्रत्यक्षमित्याह—

समः शत्रौ च मित्रे च तथा मानापमानयोः।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः॥ १८॥
तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येनकेनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः॥ १९॥

सम इति द्वाभ्याम्। लोके त्वपकर्ता शत्रुरुपकर्ता तु मित्रं लोकदृष्टिमनुसृत्य तन्न्यायमत्राह नतु विद्वद्दृष्टिम्। अहमेवेदं सर्वमिति सर्वात्मदर्शिनो विदुषः शत्रुमित्रादिभेदप्रत्ययासंभवात्प्रारब्धवशाद्देहस्य कश्चिदपकारी भवति कश्चिदुपकारी भवति। तत्र शत्रौ मित्रे च स्वयं विद्वान् समः समदर्शनस्तथा तत्कृतयोर्मानापमानयोः पूजातिरस्कारयोः संतोषविषादहेत्वोरपि समो निर्विकार एव भवतीत्यर्थः। तथैव शीतोष्णसुखदुःखेषु प्राप्तेषु समः समदर्श्येव भवति। किंच तुल्यनिन्दास्तुतिः निन्दा विद्यमानानामविद्यमानानां वा दोषाणां प्रत्यक्षेण वर्णनं, स्तुतिस्तु तथाविधगुणानां प्रत्यक्षेण कीर्तनम्। निन्दा च स्तुतिश्च निन्दास्तुती अनात्मगोचरे तुल्ये समे यस्य स तुल्यनिन्दास्तुतिः। तयोः समो निर्विकार इत्यर्थः। मानापमानयोः शीतोष्णादिषु च समदर्शनसिद्धेर्हेतुमाह—**सङ्गविवर्जित इति**। मानापमानशीतोष्णादीनामनुभविता साभासोऽहंकारस्तत्तादात्म्याध्यास एव सङ्गस्तेन विवर्जितः विज्ञानात्मविषयकमानापमानादेरविषये परे ब्रह्मण्यात्मभावापन्नतया स्वयं तत्संबन्धरहित एव सन् सर्वत्र समदर्श्येव भवतीत्यर्थः। तत एव मौनी वाचंयमो वाच्या-

भावात् । नहि सर्वं ब्रह्मैव पश्यतो विदुषो वाच्यमस्ति तदभावादेव विद्वान्मौनी । 'विजानन्विद्वान् भवते नातिवादी' ति श्रुतेः । प्रारब्धवशात्प्राप्तेन येन केन शिष्टेन वाऽशिष्टेन वा सदसत्त्वभावनानिर्मुक्तेन भैक्षेण वस्तुनाल्पेन महता वा संतुष्टः संतृप्तः । संप्राप्तालंप्रत्यय इत्यर्थः । 'येन केनचिदाशितः' इति स्मृतेः । अनिकेतः निकेतो निवासो नियतो न विद्यते यस्य यतेः सोऽनिकेतः । ग्रामैकरात्र इत्यर्थः । 'अष्टौ मास्वेकाकी यतिश्चरेत्' इति श्रुतेः । स्थिरमतिः विपरीतभावनाजनकेषु मानापमानशीतोष्णादिषु सुखदुःखादिषु प्राप्तेष्वपि सर्वमिदमहं च ब्रह्मैवेति सर्वदा सर्वत्र ब्रह्माकारापन्नैकवृत्त्या स्थिरा निश्चला मतिर्मननशीला चित्तवृत्तिर्यस्य स स्थिरमतिः । स्थिरप्रज्ञ इत्यर्थः । दृढनिश्चय इति ज्ञानस्य मानान्तरबाधराहित्यं, स्थिरमतिरिति वृत्तिनैश्चल्यमिति तयोर्भेदः । भक्तिमान् 'एकान्तभक्तिर्गोविन्दे यत्सर्वत्र तदीक्षणम् । अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे । लक्षणं भक्तियोगस्य निर्गुणस्य उदाहृतम्' । अस्यार्थः—अहैतुकी निमित्तरहिता विपरीतप्रत्ययनिवृत्त्यादिप्रयोजनवर्जिता ब्रह्मविदां स्वभावसिद्धा चाव्यवहिताऽविच्छिन्ना च वृत्त्यन्तरवर्जिता पुरुषोत्तमे प्रत्यगभिन्ने परमात्मनि या भक्तिरखण्डाकारवृत्तिस्तदेव निर्गुणस्य निर्गुणविषयस्य भक्तियोगस्य भक्तेर्लक्षणं स्वरूपं महद्भिरुदाहृतमुक्तमित्यर्थः । निरुक्तलक्षणा मुख्या भक्तिरस्यास्तीति भक्तिमान् ब्रह्मनिष्ठो यो नरः स्वनिष्ठया स्वं ब्रह्मैव नारयति प्रापयति नतु योन्यन्तरं लोकान्तरं चेति नरो ब्रह्मविद्यतिः स मे प्रिय इत्युक्त एवार्थः ॥ १८ ॥ १९ ॥

'अद्वेष्टा सर्वभूताना' मित्यारभ्यात्र यदुक्तं ब्रह्मनिष्ठस्य ब्रह्मविदो लक्षणजातं तत्सर्वं मोक्षैककामैः सर्वतो विरक्तैः साधकैर्यतिभिः श्रवणमननाभ्यां समुत्पन्नज्ञानस्य परिपाकैकसाधनमवश्यं संपादनीयमिति बोधयितुं तत्संपादननिष्ठान् साधकान् प्रस्तुवन्नध्यायमुपसंहरति—

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः ॥ १२ ॥

ये त्विति । तुशब्दः सिद्धेभ्यः साधकानां व्यावृत्त्यर्थः । ये तु मद्भावापत्तिमेव प्रार्थयमानाः सुखसाधनं सिद्धं सर्वं संन्यस्य श्रवणादिना संपन्नज्ञानवन्तो यतयः श्रद्दधाना इदं मुक्तेः परमसाधनमवश्यमनुष्ठेय-

मिति विश्वासवन्तः सन्तो मत्परमा अहं निर्विशेषं परं ब्रह्मैव परमं निरतिशयस्थानं प्राप्तव्यमिति येषां ते मत्परमा मय्येव परमार्थत्वबुद्ध्यो भूत्वा, यद्वा अहमेव परमो निरतिशयैश्वर्यसंपन्नो विश्वाधिकोऽनुलङ्घ्याज्ञ ईश्वर इति धीर्येषां ते मत्परमा मयि परमेश्वरत्वबुध्या मदाज्ञावशवर्तिनो भूत्वा । यथोक्तं 'अद्वेष्टा सर्वभूतानाम्' इत्यादिना मया प्रतिपादितं धर्म्यामृतं यतीनां स्वधर्मत्वेन प्रयत्नादनुष्ठेयत्वाद्धर्म्यम् । यद्वा मुमुक्षुत्वधर्मेण प्राप्यं धर्म्यम् । अमृतस्य मोक्षस्य नियतसाधनत्वादमृतमिदमद्वेष्टृत्वादिसाधनजातं पर्युपासते नित्यं समनुतिष्ठन्ति ते मद्भक्ता मद्भावनानिष्ठा मे परमेश्वरस्यातीवात्यन्तं प्रियाः परप्रेमाश्रया भवन्ति । लोके सर्वेषां यथोक्तकारिणस्त्वत्यन्तप्रियाः सन्तो दृष्टास्तद्वद्यथोक्तकारिणो ये तु यतयो भवन्ति ते ममात्यन्तप्रिया इति स्वोक्ते मोक्षसाधने तेषां प्रवृत्तिसिद्ध्य इयं स्तुतिः ततः परमेश्वरस्यातिप्रियत्वसिद्ध्ये भवबन्धविमुक्तये च यथोक्तमिदं धर्म्यामृतं यतिभिः कृतश्रवणैर्मोक्षैककामैः प्रयत्नेनानुष्ठातव्यमिति सिद्धम् ॥ २० ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीमच्छंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः ।

मुमुक्षूणां सत्त्वशुद्ध्यर्थमीश्वरोपास्तिरवश्यं कर्तव्येति तेषां मन्दातिमन्दात्यन्तमन्दप्रज्ञावतामुपासनाभेदं चोपास्त्या परिशुद्धात्मनामक्षरोपास्तिर्विदेहमुक्त्यै कर्तव्येति सूचयितुं श्रवणादेरुत्तरोत्तरस्योत्कृष्टत्वं च प्रतिपाद्य ब्रह्मात्मैकत्वविज्ञानेनात्मबन्धनिर्मुक्तानां जीवन्मुक्तानां ब्रह्मविदामद्वेष्टृत्वादिकं लक्षणं साधकानां तु तदेव साधनमनुष्ठातव्यमिति बोधयित्वाधुना जिज्ञासोर्मोक्षैककामस्य कथं ब्रह्मात्मैकत्वविज्ञानं किं ब्रह्म कस्त्वात्मा कः पुनरनात्मा तत्कृतो बन्धश्च कः स कथं ज्ञानेन निवर्तते किं ज्ञानं ज्ञानसाधनं च कथं वा जीवन्मुक्तिश्चेत्याकाङ्क्षायां क्षेत्रक्षेत्रज्ञयोरनात्मात्मशब्दार्थयोः प्रकृतिपुरुषयोर्विवेचनं विविक्तस्यात्मनः क्षेत्रज्ञस्य ब्रह्मणैकत्वं विविक्तयोरपि क्षेत्रक्षेत्रज्ञयोर्वैलक्षण्यज्ञानदार्ढ्यार्थं पुनःपुनर्विवेचनं प्रकृतेर्बन्धकत्वमात्मनोऽप्यध्यासकृतो बन्ध इति बोधयितुमात्मनोऽद्वितीयत्वं च सम्यक्प्रतिपादयितुं त्रयोदशाध्याय आरभ्यते । तत्रादौ क्षेत्रज्ञं क्षेत्रात् संक्षेपेण विविच्य विविक्तस्यात्मनो ब्रह्मणैकत्वं बोधयितुं श्रीभगवानुवाच—

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ १ ॥

इदमिति। सत्त्वादीनां त्रयाणां गुणानां साम्यावस्थालक्षणा या त्वपरा प्रकृतिः सैव भोक्तुः पुरुषस्यादृष्टद्वारेश्वरप्रेरणया गुणवैषम्यं प्राप्य सुखदुःखानुभूतेर्बन्धस्य च मोक्षस्यापि च साधनतया स्वयमेव देहेन्द्रियप्राणमनोबुद्ध्यादिरूपेण रागद्वेषादिरूपेण शमदमादिरूपेण च शब्दादिविषयरूपेणापि जागराद्याकारेणापि च बहुधा परिणमते। तदेवेदं कार्यकारणसंघातलक्षणं प्रत्यक्षेणानुभूयमानं शरीरं क्षेत्रं रागद्वेषादिदोषविशिष्टः पुमान् क्षीयतेऽनेनेति वा, क्षितेः क्षयात्संसारात्मकादनर्थाच्छमादियुक्तं पुरुषं त्रायत इति वा, सर्वदा दीपशिखावत् स्वयं क्षिणोतीति वा सुखदुःखादिफलोत्पादने क्षेत्रवदाचरतीति वा, क्षेत्रमिति क्षेत्रशब्देनाभिधीयते विद्वद्भिरित्यर्थः। प्रकृतिः प्राकृतं च दृश्यजातं सर्वं क्षेत्रं तदेवेदं शरीरमिति क्षेत्रशब्देनानात्मस्वरूपं निरूप्याथात्मस्वरूपं बोधयितुमाह— **एतदिति**। एतदनुभूयमानं शरीरलक्षणं क्षेत्रं यो वेत्ति स्वाभाविकेन ज्ञानेनापादतलमस्तकं विषयीकृत्याहमिति गुरूपदेशजन्येन च स्वस्य विषयभूतं बुद्ध्यादिस्थूलान्तमिदं शरीरमिदं चक्षुरयं प्राणोऽयं शब्दोऽयं गन्ध इति यः प्रत्यक्षेणेदंशब्दप्रत्ययार्थं कृत्स्नं दृश्यजातं विजानाति तं क्षेत्रस्यानात्मनो दृश्यजातस्य वेदितारमहंपदप्रत्ययार्थं चेतनं पुरुषं क्षेत्रज्ञ इति क्षेत्रं प्रकृतिं प्राकृतं च सर्वं दृश्यं स्वतोऽभिन्नं जानातीति क्षेत्रज्ञ आत्मेति प्राहुः। बहिरन्तः सर्वत्र दृश्यं सर्वं प्रत्यक्षादिप्रमाणैः साक्षाद्व्यवधानेन विना च यो विजानाति स एव क्षेत्रज्ञ आत्मेति तद्विदः आत्मस्वरूपज्ञाः सन्तो वदन्ति। यद्वा तयोः क्षेत्रक्षेत्रज्ञयोः स्वरूपं ज्ञेयत्वज्ञातृत्वप्रकाश्यत्वप्रकाशकत्वविकारित्वाविकारित्वादिलक्षणैः परस्परविलक्षणं ये विजानन्ति ते तद्विद आत्मानात्मस्वरूपज्ञा वसिष्ठादयो ज्ञेयं सर्वमनात्मा तज्ज्ञाता त्वात्मैवाहंपदार्थ इति निगदन्तीत्यर्थः। ननु कार्यकरणसंघातव्यतिरिक्तो न कश्चिदहंपदार्थो ज्ञातोपलभ्यते, कथमिदं शरीरं क्षेत्रमेतद्यो वेत्ति स क्षेत्रज्ञ इत्युच्यते। प्रत्यक्षादिप्रमाणविरोधात्। अहं गच्छाम्यहं भुञ्ज इति गन्तव्यभोक्तव्यपदार्थज्ञातृत्वं क्रिया करणं च संघातस्यैव दृश्यते। अयमेतस्य पुत्रो भवति एतत्सदृशत्वादित्यनुमानेनोपमानेन चेदंशब्दार्थः संघात एव भवति। आयुराशास्ते यजमानोऽसाविति संघातस्यैवायुराद्याशासा श्रूयते। असावित्यदःशब्दस्य प्रत्यक्षार्थवाचकत्वादिति चेद्भवानत्र प्रष्टव्यः—ज्ञातात्र देहो वा, इन्द्रियगणो वा,

प्राणो वा, मनो वा, बुद्धिर्वा, अहंकारो वा, उत समुदायो वेति। नाद्यः। स्वापपारवश्यादौ देहस्य ज्ञानादर्शनात्, पादे मे वेदना शिरसि मे सुखमिति देहस्य सुखदुःखज्ञातुर्देहान्यत्वेनोपलभ्यमानत्वाच्च। न द्वितीयः। दृष्टिर्मे मन्दा वाङ्मे स्पष्टेति तत्सौष्ठवासौष्ठवपरिज्ञातुस्तद्भिन्नत्वेनावगमात्। न तृतीयः। निद्रादौ स्वपरज्ञानादर्शनात्। न चतुर्थो न पञ्चमो नापि षष्ठश्च। मनो मे व्यथितं बुद्धिर्मे चपला दुष्टो मेऽहंकार इति मनआदीनां स्वान्यज्ञेयत्वावगमात्। यज्ज्ञेयं तज्जडमिति ज्ञेयस्य घटादेर्जडत्वदर्शनात्। जडस्य मनआदेर्ज्ञातृत्वासंभवात् तेषां तु तथात्वे घटस्यापि तथात्वं स्यात् ज्ञेयत्वस्योभयसाधारण्यात्। नैव च सप्तमः। अवयवानामचेतनत्वे त्ववयविनोऽपि काष्ठभारवदचेतनत्वात् ज्ञातृत्वानुपपत्तेः। तर्हि चैत्रेण ज्ञातस्य मैत्रस्याप्यचेतनत्वं प्रसज्येतेति चेत्तदिष्टापत्तेः। चैत्रेण मैत्रशरीरस्यैव ज्ञातत्वाच्छरीरादेरचेतनत्वस्य साधितत्वान्नास्माकमेतदनर्थाय भवति। किंच 'देहादेर्ज्ञाता देहादिभ्यो भिन्न एव भवति ज्ञातृत्वात् घटज्ञातृवत्' इत्यादियुक्तिभिः, 'चक्षुषो द्रष्टा श्रोत्रस्य द्रष्टा वाचो द्रष्टा मनसो द्रष्टा बुद्धेर्द्रष्टा तमसो द्रष्टा सर्वस्य द्रष्टा' इत्यादिश्रुतिभिश्च सम्यग्विचार्यमाणे क्षेत्रस्यानात्मनस्तद्धर्माणां तदवस्थानां च ज्ञाता क्षेत्राद्भिन्न एव भवति, नतु क्षेत्रं देहेन्द्रियादिलक्षणम्। तथात्वे ममेदं शरीरं चक्षुरिति शरीरादिषु स्वभिन्नत्वज्ञानं न स्यात्। स्वभिन्नत्वज्ञानस्य विवेकिप्रसिद्धत्वात् क्षेत्रात् क्षेत्रज्ञो भिन्न एव। तत एवोच्यते भगवता सर्वज्ञेन इदं शरीरं क्षेत्रमेतद्यो वेत्ति स क्षेत्रज्ञ इति। त्वदुक्तं प्रत्यक्षादिप्रमाणमविवेकिविषयमतो न कश्चिदत्र विरोधः। ननु क्षेत्राद्व्यतिरिक्तः क्षेत्रज्ञो नाम क्षेत्रज्ञाता अयमिति न कश्चिदुपलभ्यते उपलम्भाभावात्तदभाव एवेति चेद्भवानत्र प्रष्टव्यः—किं क्षेत्राभाव उच्यते उत क्षेत्रज्ञाभाव इति। नाद्यः। प्रत्यक्षेणोपलभ्यमानस्य क्षेत्रस्याभावकथनायोगात्। न द्वितीयः। क्षेत्रोपलब्धुः क्षेत्रज्ञस्याभावे इदं शरीरमयं घटः पटोऽयमित्यादिदृश्यप्रत्ययाभावप्रसङ्गात्। सूर्याभाववत् क्षेत्रज्ञाभावे जगदान्ध्यं प्रसज्येत। क्षेत्रज्ञेन खलु सूर्यवत् स्वमहसा महदादिस्थूलान्तं दृश्यजातं बहिरन्तर्व्याप्येदं सर्वं भास्यते, इदमिदमिति सर्वं ज्ञायते च। अन्यथा त्वान्तरमहदादीनां बहिर्घटादिपदार्थानां सुखादिप्रत्ययानां जाग्रदाद्यवस्थानां च स्वरूपविवेकविज्ञानाभावप्रसङ्गात्। प्रत्यक्षादिसर्वप्रमाणानामहमादिप्रमेयाणां च सर्वेषां प्रामाण्यं यतः सिध्यति तदभावः केन संपादयितुं शक्यते। तदभावे स्वाभावप्रसङ्गात्।

ननु चिदाभासोऽस्त्येव प्रमाता सर्वप्रमाणानां प्रामाण्यनिर्वोढेति चेन्न। तस्यापि विकार्यन्तःपातित्वेन सर्वज्ञत्वानुपपत्तेः, अन्तःकरणविकारैः सार्धं क्षणेक्षणे विकृतिं गच्छतश्चिदाभासस्यापि विकारित्वात्तद्भावानुसारित्वाच्च जाग्रदाद्यवस्थास्वस्य सर्वस्य व्यवहारस्य विज्ञानायोगात्। ननु विश्वादयः सन्त्येवावस्थाविज्ञातार इति चेन्न। क्षेत्रज्ञानेकत्वप्रसङ्गात्। एतद्यो वेत्तीत्येकवचनेन क्षेत्रज्ञैकत्वश्रवणादभिमानस्य विकारित्वाज्जाग्रदाद्यवस्थाभिमानवतां विश्वादीनां विकारित्वेन नित्यत्वासंभवादेकस्यावस्थात्रितयज्ञानानुपपत्तेः। यो जागरमन्वभूवं यः स्वप्नमद्राक्षं यः सुखमस्वाप्सं सोऽहं तिष्ठामीति अवस्थाज्ञातुर्विश्वादिभ्यो भिन्नत्वावगमात् तेषामविकारित्वं नित्यत्वं च न सिध्यति। तदसिद्धौ अवस्थात्रितयज्ञानं च न सिध्यति। अतस्तेभ्यो भिन्नोऽविकारी नित्यश्चैकश्चेतनश्च क्षेत्रस्य सर्वस्यापि ज्ञाता क्षेत्रज्ञ आत्मैवेति सिद्धम्। नन्वात्मनः क्षेत्रज्ञत्वमस्तु तथाप्ययमिति स्वयं क्षेत्रज्ञाता नोपलभ्यते। तत्कथमिति चेदुच्यते। ज्ञात्रन्तराभावात् तदुपलम्भाभावः। ज्ञात्रन्तराभ्युपगमे त्वनवस्थाप्रसङ्गात्। क्षेत्रज्ञस्यायमिति ज्ञानत्वे क्षेत्रभावापत्त्या क्षेत्रज्ञत्वं हीयेत। अनित्यत्वाचेतनत्वादिदोषश्च स्यात्। 'एको देवः' इति, 'एक एव साक्षी स्वप्रकाशः' इति, 'अजो नित्यः शाश्वतः' इत्यादिश्रुतिविरोधप्रसक्तेश्च। अत आत्मा घटादिवन्न ज्ञानविषयः। ननु 'तरति शोकमात्मवित्' इत्यात्मवेदनवतः शोकतरणं श्रूयते कथमयमस्मीत्यात्मन्यविज्ञाते शोकतरणं विदुषः सिध्येत्। अतोऽयमित्यात्मा कथं ज्ञायत इति चेच्छ्रौतेनैव ज्ञानेनात्मा ज्ञातव्यस्तत्कथमिति चेदुच्यते। 'नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञमदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः' इति श्रुत्या नान्तःप्रज्ञमित्यादिना तैजसविश्वादिभ्योऽभिन्नत्वं तेषामनात्मत्वं च प्रतिपाद्य अदृश्यमित्यहमादिसर्वदृश्यभिन्नत्वमव्यवहार्यमिति कर्मेन्द्रियाविषयत्वमग्राह्यमिति ज्ञानेन्द्रियाविषयत्वमलक्षणमित्यनुमानागम्यत्वमचिन्त्यमिति मनसोऽप्यगोचरत्वमव्यपदेश्यमिति वागविषयत्वमेकात्मप्रत्ययसारमिति चिदेकरसत्वं स्वगतभेदराहित्यं च प्रपञ्चोपशममिति विजातीयभेदराहित्यमद्वैतमिति सजातीयभेदराहित्यं च शिवमिति आनन्दघनत्वं चतुर्थमिति स्वाभासविश्वादित्रितयमपेक्ष्य तुर्यत्वं सर्वदृश्यवैलक्षण्यं च सम्यगात्मनः प्रतिपाद्य, य एवं सर्वदृश्यविलक्षणश्चिदानन्दैकरस एवात्मा स्वलक्षणलक्षितः सोऽयमहमस्मीति

विद्वद्भिः स्वात्मना ज्ञेयो ज्ञातव्य इति बोध्यते। अनेन श्रौतेन ज्ञानेनाविद्यातत्कार्यसंबन्धरहितमात्मानं स्वं ज्ञात्वा विद्वान् संसारान्मुक्तो भवति। अतः सर्वदृश्यविलक्षणत्वं क्षेत्रज्ञत्वं चात्मनो लक्षणमिति सिद्धम्॥१॥

एवमिदं शरीरं क्षेत्रमेतद्यो वेत्ति स क्षेत्रज्ञ इत्यनात्मनोऽप्यात्मनश्च स्वरूपं गृहप्रदीपवत् विभज्य दर्शयित्वा ब्रह्मणः परोक्षत्वसद्वितीयत्वनिवृत्तये आत्मनोऽप्यात्यन्तिकसंसारनिवृत्तये चानन्दरूपत्वसिद्धये च क्षेत्रज्ञस्यात्मनः श्रुत्यादिप्रमाणसिद्धं ब्रह्माभिन्नत्वं प्रतिपादयति—

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम॥ २॥

क्षेत्रज्ञमिति। भायामखण्डवृत्तावेव सदा रमत इति हे भारत, सर्वक्षेत्रेषु सर्वेषु ब्रह्मादिस्तम्बपर्यन्तेषु क्षेत्रपूक्तलक्षणेषु शरीरेषु यः क्षेत्रज्ञस्तत्तत्क्षेत्रतद्धर्मतत्कर्मतदवस्थानां च ज्ञाता एकः परिपूर्णोऽपि स्वयं घटादिभिराकाशवदविद्यया स्वात्मनि कल्पितैस्तैस्तैरुपाधिभिः सुखदुःखादिप्रत्ययैश्च विभक्त इव प्रतिशरीरमहमहमित्यहंप्रत्ययार्थत्वेन स्थितः सर्वप्रत्ययसाक्षी प्रत्यग्लक्षणस्तमुक्तलक्षणेन सर्वेभ्यः क्षेत्रेभ्यः सम्यग्विभक्तं तत्तदुपाधितद्धर्मतत्कर्माद्यस्पृष्टं तत्तच्छब्दप्रत्ययागोचरमाकाशवन्निराकारं निर्विकारं निरञ्जनं कूटस्थासङ्गचिद्रूपमात्मानं मां सर्वश्रुतिप्रसिद्धं सत्यज्ञानादिलक्षणं निर्विशेषं परं ब्रह्म विद्धि। 'अयमात्मा ब्रह्म' इति श्रवणादात्मानं परं ब्रह्मेत्यवगच्छेत्यर्थः। सर्वशरीरेष्वात्मैकत्वं पूर्वमेव प्रतिपादितं सर्वक्षेत्रेष्वहमर्थत्वेन स्थित आत्मा ब्रह्मैवेति अवेहीत्यर्थः। एवं क्षेत्राद्विभक्तं क्षेत्रज्ञं च मामेव यथा वेत्सि तथा क्षेत्रस्याविद्याकार्यत्वेन स्वतः सत्ताभावान्मयि ब्रह्मण्यधिष्ठाने कल्पितं क्षेत्रमपि मामेव विद्धि अवेहि। अत्रापि हि क्षेत्रस्य क्षेत्रज्ञवत् ब्रह्माभिन्नत्वं बोधयति। अन्यथा द्वैतहेतोर्देहादिप्रपञ्चस्य पृथग्विद्यमानत्वे ब्रह्मणोऽद्वितीयत्वं न सिध्यति तदभावे अद्वैतश्रुतिविरोधः स्यात्ततः क्षेत्रज्ञं च क्षेत्रमपि मां विद्धीति द्वयोरपि ब्रह्मत्वप्रतिपादनं युक्तम्। तेन च स्वापेक्ष्यं च प्रयोजनं तयोर्ब्रह्माभिन्नत्वज्ञानदृढीकरणमेव। ततः क्षेत्रं क्षेत्रज्ञश्च सर्वं ब्रह्मैवेति सिद्धम्। तथाच श्रुतिः स्मृतिश्च 'भोक्ता भोज्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्' 'वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च' इति। ननु क्षेत्रक्षेत्रज्ञयोरुभयोरपि यदीष्टं ब्रह्ममात्रत्वं तर्हि सर्वं ब्रह्मैवेत्युक्त्या सर्वस्य ब्रह्ममात्रत्वं सिध्यति किमिदं शरीरं कौन्तेयेत्यादिग्रन्थगौरवेणेति न शङ्कनीयम्। इदं

शरीरं क्षेत्रमिति प्रकृतिं प्राकृतं च सर्वं दृश्यं क्षेत्रमेवेत्यनात्मस्वरूपं निरूप्य एतद्यो वेत्ति स क्षेत्रज्ञ इति क्षेत्रज्ञस्यात्मनः क्षेत्रतद्धर्मतत्कर्मतदवस्थासंबन्धलेशराहित्ये प्रतिपादिते क्षेत्राद्विभिन्नमकर्तारमभोक्तारमविकारमविक्रियं कूटस्थासङ्गचिद्रूपं क्षेत्रज्ञमेव स्वं साक्षाद्विदितवतः सतामसतां च देहेन्द्रियादिव्यापाराणां सर्वदा तटस्थमेवात्मानं प्रत्यग्वृत्त्या पश्यतो विदुषः क्षेत्रधर्मैः कर्तृत्वभोक्तृत्वादिभिर्जरारोगादिभिश्च तत्कर्मभिः पुण्यपापैस्तद्गोचरैर्मानावमानैश्च विक्षेपो न संभवत्येवं जीवन्मुक्तिसुखं चागामिसंचितादिसर्वकर्मक्षयश्च सिध्यति । 'क्षेत्रज्ञं चापि मां विद्धी'ति न्यायेन क्षेत्रं क्षेत्रज्ञं स्वं सर्वं च ब्रह्मैव पश्यतस्तु द्वैतप्रत्ययाभावात् सर्वदा वासनाक्षयो मनोनाशश्च । ततः प्रारब्धक्षयान्ते विदेहकैवल्यं तत्सुखं च सिध्यतीतीममर्थं सूचयितुं क्षेत्रक्षेत्रज्ञयोर्विभजनं तयोर्ब्रह्ममात्रत्वं च प्रतिपाद्याधुना क्षेत्रक्षेत्रज्ञयोर्ब्रह्माभिन्नत्वदर्शनलक्षणमेव ज्ञानं मुक्तेः परमकारणमिति निश्चिनोति—**क्षेत्रक्षेत्रज्ञयोरिति**। यद्यपि पुरुषः प्रकृतेर्भिन्नस्तद्गुणकर्मसंबन्धलेशशून्यः सदाऽसङ्गचिद्रूप एवेत्येवंलक्षणं प्रकृतिपुरुषयोः परस्परभिन्नत्वविज्ञानं मुक्तेः परमकारणमिति सांख्या मन्यन्ते तथापि प्रकृतिसान्निध्यात् बाधितानुवृत्त्या पुरुषस्य पुनःपुनः संसारः प्रतीयते नतु निःशेषेण निवर्तते । निःशेषसंसारनिवृत्तिः खलु मोक्षो ब्रह्मात्मनावस्थानलक्षणः । 'निरञ्जनः परमं साम्यमुपैति' इत्यादिश्रुतिप्रसिद्धः । स एष परावरैकत्वज्ञानैकलभ्यः । 'तस्मिन् दृष्टे परावरे' इति श्रवणात्ततः परावरैकत्वविषयकमेव ज्ञानं निःशेषसंसारध्वान्तविध्वंसकं विदेहमुक्तेः परमकारणमिति मत्वोच्यते—**क्षेत्रक्षेत्रज्ञयोरिति**। क्षेत्रक्षेत्रज्ञयोः प्रकृतिपुरुषयोर्ज्ञानं यत्तयोर्याथात्म्यवेदनं सर्वमिदमहं च ब्रह्मैवेति प्रत्यग्दृष्ट्या क्षेत्रस्य क्षेत्रज्ञस्य च ब्रह्ममात्रत्वदर्शनलक्षणं तदेव सम्यग्ज्ञानमात्यन्तिकसंसारनिवृत्तिकारणमिति सर्वज्ञस्य ममेश्वरस्य मतमभिमतं निश्चय इत्यर्थः । यद्वा येन ज्ञानेन क्षेत्रक्षेत्रज्ञयोस्तत्त्वं ज्ञाता ज्ञेयं च सर्वं ब्रह्मैवेत्यवगम्यते तदेव मम ब्रह्मणो ज्ञानमिति मतम् । क्षेत्रक्षेत्रज्ञयोरप्रतिबद्धवृत्त्या ब्रह्ममात्रत्वावगमनमेव ब्रह्मज्ञानं कैवल्यकारणमिति ऋषीणामभिमतं निश्चितमित्यर्थः । ननु सर्वक्षेत्रेषु क्षेत्रज्ञ आत्मा ब्रह्मैवेति जीवेश्वरयोरेकत्वमनुपपन्नं प्रत्यक्षादिसर्वप्रमाणविरोधात् प्रत्यक्षेण हि जीवस्य जन्ममृत्युसुखदुःखादिलक्षणः संसारः कर्मैकनिबन्धन उपलभ्यते । तद्वता जीवेनेश्वरस्यैकत्वे त्वीश्वरव्यतिरेकेण भोक्रन्तराभावादीश्वरस्यैव संसारप्रसङ्गात् तथात्वे तु 'अनश्नन्नन्योऽभिचाकशीति' इत्यादि-

श्रुतिविरोधः प्रत्यक्षविरोधश्च स्यात्। जीवस्य वापीश्वराभिन्नत्वे जीवव्यतिरिक्तेश्वराभावात् जीवस्यैव सर्वनियन्तृत्वं स्यात्। स्वतन्त्रस्य तस्य संसारानुपयोगात् संसारस्यात्यन्ताभावः प्रसज्येत। संसारसंसारिणोरुभयोरप्यभावे प्रत्यक्षविरोधश्च कर्मानुगान्यनुक्रमेण देही स्थानेषु रूपाण्यभिसंप्रपद्यते 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इत्यादिश्रुतिविरोधश्च। 'द्वा सुपर्णा सयुजा' इत्यादिभेदशास्त्रविरोधोऽपि च स्यात्, 'मन्त्रेषु कर्माणि कवयो यान्यपश्यन् तानि त्रेतायां बहुधा संततानि। तान्याचरथ नियतं सत्यकामाः' इत्यादिकर्मशास्त्रस्य 'तरति शोकमात्मवित्', 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः' इत्यादिज्ञानशास्त्रस्य चानर्थक्यं स्यात्। जीव ईश्वराद्भिन्नः जननादिमत्त्वात् किंचिज्ज्ञत्वात् निकृष्टोपाधिमत्त्वात् नित्यदुःखित्वात् नियम्यत्वाच्चेत्यनुमानविरोधाच्च तयोरेकत्वं न सिध्यतीति चेन्न। बहुश्रुतिस्मृतिविरोधापत्तेः। तथाहि 'अयमात्मा ब्रह्म', 'प्रज्ञानं ब्रह्म', 'अहं ब्रह्मास्मि', 'तद्वा एतत् ब्रह्माद्वयं सदानन्दचिन्मात्रामात्मैव तदेतत्सत्यमात्मा ब्रह्मैव ब्रह्मात्मैव', 'अत्र ह्येव न विचिकित्स्यं', 'सूक्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत्', 'तत्त्वमसि स एकः' इत्यादिबहुश्रुतिभिः। 'सोऽहं स च त्वं स च सर्वमेतत्', 'आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति'। 'एकस्त्वमात्मा पुरुषः पुराणः', 'सकलमिदमहं च वासुदेवः', 'जीवो ब्रह्मैव नापरः', 'सर्वे वयमतः परम्', 'भोक्तारं यज्ञतपसाम्', 'क्षेत्रज्ञं चापि मां विद्धि', 'उपद्रष्टानुमन्ता च' इत्यादिस्मृतिभिश्च ब्रह्मात्मनोरेकत्वमेव नियमेन प्रतिपाद्यते। आत्मा ब्रह्मैव भवति सद्रूपत्वाच्चिद्रूपत्वादानन्दरूपत्वादविक्रियत्वादसङ्गत्वात् परिपूर्णत्वाच्च यन्नैवं तन्नैवं यथा बुद्ध्यादिः। जीवेश्वरयोर्भेदोऽसत्यः उपाधिकल्पितत्वात् घटाकाशमहाकाशवत्। जीवोपाधिर्मिथ्या मायाकार्यत्वात् स्वप्नार्थवदित्यादिभिर्युक्तिभिश्च सम्यग्विचार्यमाणे तयोरभेद एवावगम्यते नैवेषदपि च भेदः। सति तु तयोर्भेदे भेददर्शननिषेधायोगात्। नात्र काचन भिदास्ति नैवात्र काचन भिदास्ति। अत्र भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो 'मृत्योः स मृत्युमाप्नोति' इति श्रुत्यैव पौनःपुन्येन भेददर्शनं निषिध्यते भेदद्रष्टुर्महाननर्थोऽप्युच्यते ततस्तयोरभेद एव सम्यग्विज्ञातव्यो मुमुक्षुभिः। नन्वहं सुखी दुःखीति प्रत्यक्षेण जीवस्य संसार उपलभ्यते कथं संसारिणोऽप्यसंसारिणश्चैक्यं सिध्यतीति चेन्न। आत्मनः संसारो मिथ्या अविद्याध्यारोपितत्वात् जरादिवदित्यात्मनि प्रतीतसंसारस्याविद्याकार्यत्वेन मिथ्यात्वोपपत्तेः। अमूढो मूढ इव व्यवहरन्नास्ते माययैवेति श्रवणा-

दात्मा स्वयमसंसार्येव सन्नविद्यया संसारीव प्रतीयते । करणदोषाच्छङ्खः पीत इव यथा तद्वत् । वस्तुतस्तु अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वयात्मानन्दः परः प्रत्यगेकरस इति श्रवणान्नित्यशुद्धबुद्धमुक्तस्वभाव एव भवति । संसारस्त्वनात्मधर्मः सन्नेवाविद्ययात्मन्यध्यारोपितश्चक्षुर्धर्मः पीतिमा शङ्ख इव संसारो नात्मधर्मः ज्ञेयत्वाद्रूपवदिति संसारस्यानात्मधर्मत्वमेवावगम्यते न त्वात्मधर्मत्वम् । तस्यात्मधर्मत्वे त्वात्मनः कदापि मोक्षो न स्यात् । श्रूयते च हि मोक्षः 'तरति शोकमात्मवित्', 'विमुक्तश्च विमुच्यते' इति, 'ब्रह्मैव सन् ब्रह्माप्येति' इति च । यत एवं तत आत्मनोऽविद्यारोपितसंसारित्वप्रतीतिदशायां स्वप्न इव प्रत्यक्षादिप्रमाणसिद्धद्वैतव्यवहारस्य सर्वस्यापि संभवान्न कोऽपि विरोधो न कर्मज्ञानशास्त्रानर्थक्यं च संभवति । विद्याविर्भूतिदशायां प्रबोधे स्वप्नसंसाराभाववदाविद्यकसंसाराभावान्नित्यशुद्धबोधस्वभावस्यात्मनः परिपूर्णस्य ब्रह्माभिन्नत्वं न विरुध्यते । तत एव प्रमाणशिरोमण्या सर्वज्ञया श्रुत्यापि 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इति सर्वस्याप्याकाशादिस्थूलान्तस्यात्मनः संसारनिमित्तस्य द्वैतप्रपञ्चस्याविद्याकार्यस्य अधिष्ठानसत्तैकालम्बनस्य स्वतःसत्ताशून्यस्य ऐतदात्म्यमिति सन्मात्रत्वं बोधयित्वा भेदहेतोर्विशेषस्याभावाच्चिदेकरसस्यात्मनः तत्त्वमसीति ब्रह्मत्वं प्रतिपाद्यते ब्रह्मणोऽद्वितीयत्वसिद्ध्यै । सति द्वैते त्वद्वैतश्रुतिस्मृतीनां व्याकोपः स्यात् 'सत्यं ज्ञानमनन्तं ब्रह्म', 'एकमेवाद्वितीयं ब्रह्म', 'एको रुद्रो न द्वितीयोऽवतस्थे', 'एको देवो नारायणः', 'एक एव हि भूतात्मा', 'एकं सद्विप्रा बहुधा वदन्ति', 'एकः सन् बहुधा विचचार', 'एकं सन्तं बहुधा कल्पयन्ति', 'एको दाधार भुवनानि विश्वा', 'एको देवो बहुधा संनिविष्टः', 'त्वमेकोऽसि बहूननुप्रविष्टः', 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यं', 'ईशावास्यमिदं सर्वं', 'सद्धीदं सर्वं चिद्धीदं सर्वं', 'पुरुष एवेदं सर्वं', 'ब्रह्मैवेदं विश्वमिदं वरिष्ठं', 'मायामात्रमिदं द्वैतं', 'नेह नानास्ति किंचन', 'नह्यस्ति द्वैतसिद्धिः' इत्यादिश्रुतिभिः । 'तस्मान्न विज्ञानमृतेऽस्ति किंचित्', 'ज्ञानं विशुद्धं विमलं विशोकं', 'एकः समस्तं यदिहास्ति किंचित्', 'विशुद्धं ज्ञानमेवैकं' 'मत्तः परतरं नान्यत्', 'वासुदेवः सर्वमिति', 'सर्वभूतस्थितं यो मां', 'वेदार्थः परमाद्वैतम्' इत्यादिस्मृतिभिश्च ब्रह्माद्वितीयमनन्तत्वात् सर्वात्मकत्वात् यन्नैवं तन्नैवं यथा नभः, ब्रह्माद्वितीयं वस्त्वन्तरशून्यत्वात् सुषुप्तवदित्यादियुक्तिभिश्च ब्रह्मणोऽद्वितीयत्वं प्रतिपाद्यते । तस्मात्सर्व-

श्रुतिस्मृतिप्रसिद्धमेव क्षेत्रज्ञस्यात्मनो ब्रह्मत्वम् । तत एव 'क्षेत्रज्ञं चापि मां विद्धी'ति भगवतोच्यते सर्वज्ञेन । ननु नात्र जीवेश्वरयोरेकत्वं प्रतिपाद्यते भगवता किंतु 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इति न्यायेन सर्वक्षेत्रेष्वन्तर्यामित्वेन तिष्ठतः स्वस्वरूपस्यैवैकत्वं प्रतिपाद्यते । सर्वभूतेष्वन्तर्यामीश्वर एक एवेति मूढानामीश्वरैकत्वविज्ञानायेति चेद्भवानत्र प्रष्टव्यः—किमीश्वरः स्वयं सावयवो भूत्वा भूतानि यमयति, किं निरवयवः सन्नेव वा, उतोभयात्मको वेति । नाद्यः । सावयवत्वे त्वीश्वरस्य विकारित्वानित्यत्वादिदोषप्रसङ्गाच्छ्रुतिविरोधाच्च । 'यस्यादित्यः शरीर'मित्यादिश्रुत्यातिरिक्तशरीराभावश्रवणात्सावयवत्वे परिच्छित्तिस्तया पूर्णत्वव्याघातश्चैकत्वानुपपत्तिश्च स्यात् । न द्वितीयः । 'यः प्राणेन प्राणिति', 'स त आत्मा सर्वान्तरः', 'एष त आत्मा सर्वान्तर' इति श्रवणादीश्वरस्य प्राणित्वप्राणनक्रियावत्त्वप्रसक्त्याऽशरीरत्वानुपपत्तेः । तथात्वे तु 'अशरीरं शरीरेषु' इति, 'अप्राणो ह्यमनाः शुभ्रः' इत्यादिश्रुतिविरोधोऽपि स्यात् । न तृतीयः । निरवयवत्वतदन्यत्वयोः सामानाधिकरण्यासिद्धेः, ईश्वरस्यैव क्षेत्रज्ञत्वे पुरुषः सुखदुःखानामित्युक्तन्यायेन जीवत्वं सुखदुःखादिभोक्तृत्वं च स्यात्, 'कारणं गुणसङ्गोऽस्ये'त्युक्तेः सदसद्योनिजन्मप्रसङ्गाच्च । ननु क्षेत्रज्ञ आत्मेति पक्षेऽप्ययं दोषः स्यादेवेति चेन्न । अविद्यया त्वात्मनो जन्माद्यनर्थाङ्गीकाराद्विद्यया तन्निवृत्त्युपपत्तेश्च तेन ब्रह्मत्वं न विहन्यते । 'बन्धो मोक्ष इति व्याख्या गुणतो मे न वस्तुतः । गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम् ॥' इतीश्वरेणैवोक्तत्वात्, तत आत्मनस्त्वविद्यया जीवत्वे त्वयोक्तविकल्पानवकाशः विद्यया ब्रह्मत्वं च सिध्यति ततो नात्र काचिदनुपपत्तिरिति सिद्धम् ॥ २ ॥

एवं 'एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञः' इत्यनेन क्षेत्रज्ञस्यात्मनो ज्ञत्वमेव धर्मो नत्वहंकारममकारकर्तृत्वभोक्तृत्वादिलक्षणः संसारः स तु ज्ञेयत्वेन क्षेत्रस्यैव धर्म इति सूचयित्वा । 'क्षेत्रज्ञं चापि मां विद्धि' इत्यनेन सर्वक्षेत्रेभ्यो विभक्तस्यात्मनश्चिदेकरसस्य परिच्छित्त्यभावे पूर्णत्वात् 'अयमात्मा ब्रह्म' इति न्यायेन ब्रह्मत्वं प्रतिपाद्याधुना श्रुतियुक्तिभिः क्षेत्रक्षेत्रज्ञयोर्विवेके सम्यक्कृत एव पुंसः संसारित्वभ्रमो निःशेषेण निवर्तते नान्यथेति बोधयितुं पुनरपि क्षेत्रक्षेत्रज्ञयोः स्वरूपं विशेषतः सम्यग्विभज्य प्रदर्शयितुमाह—

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥

तदिति । इदं शरीरमिति यदुक्तं तत्क्षेत्रं स्वयं स्वरूपेण । यच्च यत्स्वरूपकं स्वाभाविकेन रूपेण यादृग्भवति । यद्विकारि च यैर्विकारैर्महदादिलक्षणैः स्वपरिणामात्मकैर्विकार्यवयवि भवति । स्वधर्मैर्यादृक्च यादृशधर्मकं यैर्धर्मैः स्वयं धर्मि भवति । यतश्च यत् यतो यस्मात् क्षेत्रशब्दितात् कारणाद्यच्च कार्यं पुंसः संभवति क्षेत्रज्ञस्योपाधिर्भूत्वा स्वयं यत्कार्यं जनयतीत्यर्थः । तत् क्षेत्रं क्षेत्रज्ञस्य संसारकारणं मुमुक्षुणा सम्यग् ज्ञातव्यम् । यस्मिन् ज्ञाते स्वयं संसारी न भवति । किंच 'एतद्यो वेत्ती'त्युक्तः क्षेत्रज्ञः स्वरूपेण यश्च यादृशो भवति । स्वयाथात्म्येन यत्स्वरूपको भवतीत्यर्थः । यत्प्रभावश्च उपाधियोगाद्यादृशस्वभाववान् भवति ततः स विज्ञातव्यः । यस्मिन् विज्ञाते स्वयं मुक्तो भवति तत्तयोः क्षेत्रक्षेत्रज्ञयोः स्वरूपं समासेन संक्षेपेणैव नतु विस्तरत उच्यमानं मे मत्तः शृणु । श्रुत्वा तदर्थं सम्यगवधारय तन्निष्ठो भव । तदेव श्रवणस्य फलं न तूपेक्षणं विस्मरणं वा ॥ ३ ॥

श्रोतुः श्रद्धयाऽऽस्थया च प्रवृत्तिसिद्धये श्रुतिभिः सूत्रैर्महर्षिभिश्चायमर्थः सुनिश्चित इति विवक्षितार्थस्य सर्वशास्त्रतदर्थज्ञप्रसिद्धत्वमाह—

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४ ॥

ऋषिभिरिति । क्षेत्रक्षेत्रज्ञयोः स्वरूपं वासिष्ठविष्णुपुराणादिषु ऋषिभिर्वसिष्ठपराशरादिभिर्बहुधा बहुप्रकारं गीतं प्रतिपादितम् । विविधैः शाखाभेदेन बहुप्रकारैः छन्दोभिः ऋगादिवेदैः । 'स ऐक्षत कथं न्विदं मदृते स्यात्' इति, 'स वा एष पुरुषोऽन्नरसमयः, अन्योन्तर आत्मा प्राणमयः', 'एतस्मिन्नदृश्येऽनात्म्ये' इत्यादिना तयोः स्वरूपं पृथग्विभज्य गीतं कथितमित्यर्थः । हेतुमद्भिः हेतवोऽर्थसाधका युक्तयस्तद्वद्भिर्विनिश्चितैस्तत्त्वनिश्चायकैर्निश्चितार्थैः । ब्रह्मसूत्रपदैः ब्रह्मणः सूचकानि ब्रह्मसूत्राणि तान्येव पदानि पद्यते वस्तुतत्त्वं ज्ञायते एभिरिति पदानि तैर्ब्रह्मसूत्रपदैर्वेदान्तसूत्रैः 'जन्माद्यस्य यतः' इत्यादिभिस्तयोर्याथात्म्यं गीतम् । विविच्य सम्यक् प्रकाशितमित्यर्थः ॥ ४ ॥

एवं क्षेत्रक्षेत्रज्ञयोः स्वरूपविवेचनस्य सर्ववेदशास्त्रतदर्थज्ञप्रसिद्धत्वं प्रतिपाद्य तत्र प्रथमोद्दिष्टं क्षेत्रं प्रतिपादयति—

महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः॥ ५॥

महाभूतानीति द्वाभ्याम्। महाभूतानि भवन्तीति भूतान्याकाशादीनि सूक्ष्माण्यपञ्चीकृतानि। स्थूलानि तु 'पञ्च चेन्द्रियगोचराः' इति वक्ष्यति ततोऽत्र तन्मात्राण्येव गृह्यन्ते। भूतशब्देन महान्ति च तानि भूतानि च महाभूतानि। सर्वकार्यव्यापकत्वात् भूतानां महत्त्वम्। अहंकारो महाभूतकारणम् 'अहंकारात्पञ्चतन्मात्राणि' इति श्रुतेः। बुद्धिर्महत्तत्त्वमहंकारकारणं 'महतोऽहंकारः' इति श्रुतेः। महतः कारणमव्यक्तं मूलप्रकृतिर्महदादिवन्न व्यज्यत इत्यव्यक्तमव्याकृतं जगद्बीजं त्रिगुणात्मकं परमेश्वरशक्तिरपरा 'भिन्ना प्रकृतिरष्टधा। अपरेयम्', इति च 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' इत्युक्तलक्षणाष्टधा भिन्ना त्वपरैव प्रकृतिरिति प्रकृतिस्वरूपावधारणार्थ एवकारः, चकारः समुच्चयार्थः। अव्यक्तमेव क्षेत्रस्य स्वाभाविकं रूपं महदादिभिः सप्तभिः 'इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः' इति वक्ष्यमाणैश्च षोडशभिर्विकारैर्यद्विकारीत्युक्तविशेषणवतः क्षेत्रस्यैव वैकारिकं रूपम्, चक्षुरादीनि वागादीनि च दशेन्द्रियाणि एकमन्तरिन्द्रियं मनश्चैकादशं तथेन्द्रियगोचराः शब्दादयः पञ्च च मिलित्वा षोडशविकाराः पञ्चमहाभूतानि महदहंकारावव्यक्तं च चतुर्विंशतिपदार्थाः। 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः॥' इति सांख्यानां चतुर्विंशतितत्त्वानि भवन्ति॥ ५॥

यादृक्चेत्युक्तविशेषणं स्फुटयति—

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम्॥ ६॥

इच्छेति। भोग्यानीच्छत्यनयेति इच्छा रागः विषयेषु प्रीतिः द्वेषोऽप्रीतिः इच्छा द्वेष इति सत्त्वगुणानां शमदमदयाक्षान्त्यादीनां तमोगुणानां निद्रालस्यमोहादीनामुपलक्षणम्। इच्छाद्वेषादयो राजससात्त्विकतामसाः सर्वे क्षेत्रान्तःपातिनोऽन्तःकरणस्य धर्मत्वात् क्षेत्रं स्वयमेतैर्जन्मादिभिश्च धर्मि भवति इच्छाद्वेषादिभिः पुण्यापुण्यकर्महेतुत्वात् स्वयमेव कर्मि च भवति। इच्छादीनां पुण्यादिकर्मणां च क्षेत्रधर्मत्वेन ज्ञेयत्वेन

च क्षेत्रत्वमेव इष्टानिष्टवस्तुसान्निध्यात्प्रतीयमानं सुखं दुःखं चान्तःकरणपरिणामविशेषत्वात्तद्धर्मावेव न त्वात्मधर्मौ । अयं रागोऽयं द्वेष इति इदं सुखमिदं दुःखमिति ज्ञायमानत्वात्सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मादीनामात्मधर्मत्वे ज्ञेयत्वानुपपत्तेः । ज्ञायन्ते हि घटवत्सुखदुःखेच्छादयो धर्मास्ततस्तेषां रूपवदनात्मधर्मत्वमेव । यद्यपि तार्किकैः सुखदुःखादय आत्मधर्मा इत्युररीकृतं तर्ह्यप्यात्मनोऽन्तःकरणस्यैव धर्मा नतु प्रतीचः । निरवयवसावयवयोः संयोगसमवायान्यतरासंभवात्तयोरयुतसिद्धत्वाभावाच्च न ह्यात्मा गुणी भवति । 'केवलो निर्गुणश्च' इति श्रुतेः । नापि क्रियावान् । 'निष्कलं निष्क्रियम्' इति श्रुतेः । निष्कलत्वान्नाप्यवयवी असङ्गत्वादात्मनो न येन केनापि संयोगः समवायश्च संभवति । तेषां यदि आत्मधर्मत्वं तर्हि नित्यत्वं चैतन्यवत्सदोपलभ्यमानत्वं च स्यात्ततो रागद्वेषसुखदुःखादिधर्मकं जन्मजरादिधर्मकं च क्षेत्रमेवेति सिद्धम् । तत एव भगवतापि इच्छा द्वेषः सुखं दुःखमितीच्छादीनां क्षेत्रान्तःपातित्वमेव प्रतिपादितम् । किंच संघातः करचरणादिसंहतिरूपो देहोऽपि क्षेत्रमेव । बुद्धौ तप्तायःपिण्डे अग्निरिव य आत्मचैतन्याभासो बुद्धिवृत्तिविशिष्टः शब्दादिविषयावभासकः स एव चेतना सा च बुद्ध्या सह साक्षिणो विषयत्वेन ज्ञेयत्वात्तद्भावभावित्वाच्च क्षेत्रमेव । धृतिः धैर्यलक्षणो बुद्धिवृत्तिविशेषः सापि ज्ञेयत्वात् क्षेत्रमेव । धृतिरिति कामसंकल्पविचिकित्सादीनामिदंकारममकारादिसर्वप्रत्ययानामुपलक्षणम् । तेन यद्यदात्मनो ज्ञेयं तत्तत्सर्वं क्षेत्रमेवेति सिद्धम् । सविकारं विकारैर्महदादिभिः शब्दादिभिश्च सह वर्तत इति सविकारं सधर्मं चैतत् क्षेत्रं समासेन ते समुदाहृतम् । सम्यङ्निरूपितमित्यर्थः ॥ ६ ॥

एवं 'महाभूतान्यहंकार' इत्यादिना क्षेत्रस्य स्वरूपं निरूप्याथ क्षेत्रज्ञे निरूपितव्ये सति तज्ज्ञानं तत्साधनाभावे न सिध्यति जिज्ञासोस्तन्नियतसाधनसंपत्तिमतस्तज्ज्ञानं सुलभमित्यादावेवात्मज्ञानोत्पत्तिसाधनान्याह पञ्चभिः—

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७ ॥

अमानित्वमिति । स्वस्मिन्नुत्कृष्टत्वबुद्धिर्मानः प्रतिष्ठार्थमात्मन्युत्कर्षारोपणहेतुः सोऽस्यास्तीति मानी तस्य भावो मानित्वं तदभावस्त्वमानित्वम् ।

ज्ञानोत्पत्तिहेतोश्चित्तशुद्धेः प्रतिबन्धो मानस्तथैव दम्भित्वादयश्च तदभावेन मुमुक्षोर्भवितव्यमित्यर्थः। वेषभाषाक्रियाचातुर्यादिभिः स्वमहत्त्वप्रकटनं दम्भस्तद्वत्त्वं दम्भित्वं तद्रहितत्वमदम्भित्वम्। मनोवाक्कायकर्मभिः प्राणिपीडानाचरणम्। अहिंसा भूतदयैकलभ्या। ब्रह्मचर्यादीनामिदमुपलक्षणम्। चिन्ताविलापराहित्येनाध्यात्मिकाद्युपद्रवसहनं क्षान्तिः। स्वधर्मे मनोवाक्कायप्रवृत्तेः सदैकरूपत्वमार्जवम्। आचार्योपासनं ज्ञानोपदेष्टुराचार्यस्य श्रद्धाभक्तिभ्यां शुश्रूषादिक्रिययाराधनमुपासनम्। शौचं द्विविधम्-बाह्यमाभ्यन्तरं च। बाह्यं मृज्जलाभ्यामस्पृश्याभक्ष्याग्राह्यत्यागेन च। आभ्यन्तरं रागद्वेषलोभमोहगर्वकाठिन्यादिमलानां तत्प्रतिकूलगुणावष्टम्भेन क्षालनमन्तःशौचम्। आत्मनोऽन्तःकरणस्य विषयभोगवासनाग्रस्तस्य विषयध्यानश्रवणदर्शनादौ सुतरां प्रवृत्तिनिरोध आत्मविनिग्रहः। निगृहीतस्य मनसो नैश्चल्येन मोक्षेच्छया श्रवणादावेव स्थापनं स्थैर्यम् ॥७॥

स्थैर्यसिद्धेः साधनमाह—

इन्द्रियार्थेषु वैराग्यमनहंकार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ८ ॥

इन्द्रियार्थेष्विति। इन्द्रियार्थेषु शब्दादिषु भोग्यपदार्थेषु तेषु श्रुतेषु दृष्टेषु च सर्वत्र वैराग्यं निःशेषरागत्याग एव मनोनिग्रहे तन्नैश्चल्ये च कारणम्। यतेरिदमेव सम्यक्संपादनीयम्। तथैवानहंकारश्च जातिवर्णाश्रमाचारविद्याकुलशीलादिभिः श्रेष्ठत्वाभिमानोऽहंकारः। जात्यादिष्वहंकारहेतुषु सत्स्वपि बन्धकत्वबुद्ध्या तद्रहितत्वमनहंकारः। अयमेव ज्ञानसिद्धौ मुख्यकारणमिति निश्चयार्थ एवकारः। चकारः समुच्चयार्थः। सर्वत्र वैराग्यसंजनने तत्कार्यनिष्पत्तौ च परमकारणं जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनमेव जन्मनि मृत्यौ जरायां व्याधिषु दुःखस्य दोषस्य चानुदर्शनम्। शास्त्रं स्वानुभवं चानुसृत्यालोचनं जन्मपदेन तत्सन्निहितो गर्भवासोऽपि गृह्यते। गर्भे नवमासं पिण्डीभूत्वावस्थानं मलक्रिमिदंशनं मातुर्जठराग्निदहनं तदीयविषमशयनगमनादिना संघट्टनं सुदृढं जरायुवेष्टनादिमहद्दुःखं मलमूत्रमध्येऽवस्थानं तद्रसपानं च दोषः। जन्मनि प्रसववायुनाकर्षणं योनियन्त्रनिष्पीडनं महद्दुःखं तद्द्वारागमनं दोषः। मरणे सर्वनाड्याकर्षणं मर्मकृन्तनं प्राणाकुञ्चनमूर्ध्वश्वासो मरणतापश्च महद्दुःखम्। याम्याकर्षणेन व्यथया घ मलजलपातादिदोषो मृत्युपदेन तत्संनिकृष्टो नरकवासोऽपि गृह्यते। कुम्भीपाकरौरवासिपत्रवन-

वैतरण्यादिषु याम्यपातनं महद्दुःखं श्लेष्मरक्तपूयरेतोमलमूत्रह्रदेषु वासो महद्दुःखं श्लेष्मादिपानदोषश्च । जरायां सर्वगात्रशैथिल्यं मान्द्यं बाधिर्यं गद्गदवाक् कम्पादिकं व्युत्थानादौ पतनस्वपरजनपरिभवश्च महद्दुःखं मलजलल्लालापातश्च दोषः । व्याधिषु दौर्बल्यं शीतज्वरादिवेगपरितापादिकं कषायपानादिकं महद्दुःखं देहदौर्गन्ध्यस्वेदादिर्दोषः । एवं जन्मादिषु पुनःपुनर्दुःखदोषानुदर्शनेन विवेकिनः पुण्यशीलस्य सर्वत्र तीव्रं वैराग्यं मोक्षेच्छा च तत्सिद्ध्यै प्रवृत्तिश्च सिध्यत्यत एतद्दर्शनं मुमुक्षोः सम्यक्कर्तव्यमित्यर्थः ॥ ८ ॥

जन्मादिषु दुःखदोषदर्शनस्य फलमाह—

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥

असक्तिरिति । असक्तिः सक्तिर्भोगेष्वन्तःकरणस्य सङ्गो रागस्तदभावोऽसक्तिः । अप्राप्त इव प्राप्ते वस्तुनि सर्वत्र विषयमात्रे प्रीतिराहित्यमसक्तिशब्दार्थः । अनभिष्वङ्गः नाभिष्वङ्गोऽनभिष्वङ्गः समीचीनत्वबुद्ध्या ममतया चाजस्रमिष्टं विषयमालिङ्ग्य चित्तस्यावस्थानमभिष्वङ्गस्तदभावोऽनभिष्वङ्गः मुमुक्षूणां सुसंपाद्यः । कुत्रेत्याकाङ्क्षायामाह—**पुत्रदारगृहादिषु ।** आदिशब्देन धनक्षेत्रादि गृह्यते । तेषु चित्तस्य लग्नता न कर्तव्येत्यर्थः । ननु अनभिष्वङ्गः पुत्रदारगृहादिष्वित्यनेन गृहस्थानामेव श्रवणाद्यधिकारो नतु यतीनामितरेषां च । तेषामधिकारित्वे पुत्रादिष्वभिष्वङ्गो न कर्तव्य इति व्यतिरेकेण निषेधायोगात् । सत्स्वेव पुत्रादिष्वभिष्वङ्गः प्रसज्यते । प्रसक्तस्यैव निषेधो युक्तो न त्वप्रसक्तस्य । नहि नानलं पिबेदिति निषेध उपयुज्यते । ततः प्रसक्तप्रतिषेधबलात् गृहस्थानामेव श्रवणाधिकारो नाश्रमान्तरनिष्ठानामिति चेद्भवानत्र प्रष्टव्यः । गृहिणां वेदान्तश्रवणं मोक्षाय वा, उत अक्षरलाभाय वा, विलासार्थं वेति । नाद्यः । साधनानुपपत्तौ साध्यासिद्धेः श्रवणस्य व्यङ्गत्वे तत्साध्यज्ञानसिद्ध्यसंभवात् मोक्षाभावः । 'संन्यस्य श्रवणं कुर्यात्' इति संन्यासस्य श्रवणाङ्गत्वं स्मर्यते । 'अथातो ब्रह्मजिज्ञासा' इत्यत्राप्यथशब्दस्य संन्यासादिसाधनसिद्ध्यनन्तरमेव जिज्ञासा कर्तव्येत्यन्तानर्यार्थकत्वं कथ्यते । ततः संन्यासाद्यन्तरङ्गसाधनशून्यानां गृहिणामेव श्रवणानधिकारो नतु मोक्षेच्छया संन्यस्तसर्वकर्मतत्साधनानां यतीनां ब्रह्मात्मैकत्वविज्ञानं वेदान्तश्रवणादिना जायते परमहंसस्य यतेर्मुख्याधिकारिणः नाश्रमान्तरनिष्ठस्येत्यङ्गशून्यानां कृतेऽपि श्रवणे ज्ञानानुत्पत्तिस्मरणात्ततो यतीनामेव परमहं-

सानां श्रवणाधिकारो ज्ञानतत्फलप्राप्त्यधिकारश्च। 'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोकेषु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' इति श्रुतेः। न द्वितीयः। निरन्तरविक्षेपवतां संसारिणां यथावदक्षरलाभासिद्धेः। नापि तृतीयश्च। काव्यनाटकादिवदत्र चमत्काराभावात्। यत एवं ततो यतीनामेव श्रवणादियोग्यत्वमिति सिद्धम्। ननु मोक्षेच्छया संन्यस्तसर्वकर्मणां यतीनामेव श्रवणाधिकारित्वे पुत्रदारादिष्वभिष्वङ्गो न कर्तव्य इति निषेधवचनस्यानर्थक्यमिति चेन्न। तेषामपि पूर्ववासनया त्यक्तेष्वपि पुत्रदारादिष्वभिष्वङ्गप्रसङ्गात्तन्निषेधपरत्वोपपत्तेः। 'मनसो वशे सर्वमिदं बभूव भीष्मो हि देवः सहसः सहीयान्' इति, 'बन्धाय विषयासक्तम्' इति, 'प्रमाथि बलवद्दृढम्' इति, 'ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते' इति, 'विद्ध्येनमिह वैरिणम्' इति, 'ज्ञानिनो नित्यवैरिणा' इति च कामसंकल्पादिविकारवतोऽनादिदुर्वासनावासितान्तःकरणस्य दुर्धर्षत्वं दुर्निग्रहत्वं बन्धकत्वं विषयस्मृतिमात्रेणानर्थकारित्वं ज्ञानिषु बद्धवैरत्वं च श्रूयते स्मर्यते च। ततः संन्यासिनामपि त्यक्तेषु तेषु तेषु दुर्वासनया क्वचिदभिष्वङ्गस्तद्वार्ताश्रवणादिभिः प्रसज्यते। यथा विद्यमानेषु तुच्छेष्वपि कौपीनकन्थादिष्विदं समीचीनमिदमसमीचीनमिति सक्तिस्तथा। ततस्तद्द्वयं प्रमादेनापि न कर्तव्यमिति व्यतिरेकमुखेनोपदिश्यते 'असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु' इति। गृहस्थानामधिकारित्वे त्विदं विशेषणमनुपपन्नम्। 'नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु' इति इष्टानिष्टोपपत्तिषु इष्टं सुखं तत्साधनं च, अनिष्टं दुःखं तत्साधनं च तेषामुपपत्तिषु संप्राप्तिषु नित्यं सर्वदा समचित्तत्वं समं हर्षविषादमुखविकासवैवर्ण्यादिबाह्याभ्यन्तरविकारनिर्मुक्तं चित्तं यस्य विदुषस्तस्य भावः समचित्तत्वमविक्रियात्मनावस्थानं न संसारिणामुपपद्यते। नहि पुत्रोत्पत्तौ हर्षो वारयितुं शक्यते, नापि तन्मरणे विषादादिश्च। ततो नैवैषामत्राधिकार इति सिद्धम्॥ ९॥

किंच—

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि॥ १०॥

मयीति। अनन्ययोगेन न विद्यते परमेश्वरादन्यः शरणं ममेत्येवं निश्चयलक्षणस्त्वनन्यः योगो भक्तियोगः अनन्यश्चासौ योगश्च तेनाऽनन्ययोगेन मयि सर्वेश्वरे सर्वलोकशरण्ये सर्वात्मन्यव्यभिचारिणी नियता भक्तिर्भजनं च ज्ञानसाधनम्। मत्प्रसादैकलभ्यत्वाज्ज्ञानस्य। अतो

मदेकशरणेन मुमुक्षुणा मद्भजनं सर्वदा कर्तव्यमित्यर्थः । यद्वा विविक्तदेशसेवित्वमिति वचनसामर्थ्यादयमर्थः । अनन्ययोगेन अन्यो विजातीयप्रत्ययो न विद्यते यत्र सोऽनन्ययोगः समाधिः । अनन्यश्चासौ योगश्च तेनानन्ययोगेन सजातीयप्रत्ययावृत्तिलक्षणेन मयि मां निर्विशेषं परं ब्रह्म विषयीकृत्य ब्रह्मैवाहमहमेव ब्रह्मेति भक्तिर्भजनमनुसंधानं सर्वदा करणीयं ज्ञानस्याप्रतिबन्धकत्वसिद्धिकारणत्वाज्ज्ञानमित्युच्यते । किंच विविक्तदेशसेवित्वं विविक्तान् जनसंमर्दरहितान् नदीपुलिनगिरिकुहराराग्मारण्याद्येकान्तप्रदेशान् निदिध्याससिद्ध्यर्थं सेवितुं शीलमस्यास्तीति विविक्तदेशसेवी । शून्यागारे 'देवतागृहतृणकूटवल्मीकवृक्षमूलकुलालशालाऽग्निहोत्रनदीपुलिनगिरिकुहरकन्दरकोटरनिर्झरस्थण्डिलेष्वनिकेतवासी' इति श्रुतेः । तस्य भावो विविक्तदेशसेवित्वम् । जनसंसदि जनानां बहिर्मुखानां संसदि संघाते वसितुमरतिररुचिश्च ॥ १० ॥

किंच—

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ११ ॥

अध्यात्मेति । 'आत्मा वा इदमेक एवाग्र आसीत्', 'आत्मैवेदमग्र आसीत् पुरुषविधः', 'आत्मा वा अरे द्रष्टव्यः' इत्यादिना आत्मानमधिकृत्य प्रवृत्तमध्यात्मं,ज्ञायते आत्मतत्त्वमनेनेति ज्ञानम्, अध्यात्मं च तज्ज्ञानं चाध्यात्मज्ञानं वेदान्तशास्त्रं तत्र नित्यत्वं निरतत्वं तदेकप्रावण्यमेव ज्ञानोत्पत्तेर्मुख्यं साधनं तत एव ज्ञानमित्युक्तम् । तत्त्वज्ञानार्थदर्शनं तत्त्वज्ञानस्यार्थः फलरूपो मोक्षस्तस्य दर्शनं तत्सिद्धिप्रक्रियालोचनं च । मोक्षः खलु ब्रह्मात्मनावस्थानम् । स श्रवणेन श्रावणेन वा मननेन वा निदिध्यासया वा समाधिना वा सर्वकामप्रमोकेन वान्यथा वा सिध्यतीति युक्त्या स्वानुभूत्या च ज्ञानपौष्कल्यसिद्धिसाधनसंपत्तिमालोच्य स्वाधिकारानुरूपं तत्साधनं क्रमेण समनुतिष्ठेदिति बोधयति तत्त्वज्ञानार्थदर्शनमिति भगवान् । ततो मोक्षैककामस्य यतेरमानित्वादिज्ञानसाधनं प्रयत्नेन संपादनीयम् । यत्सिद्ध्या ज्ञानं सिध्यति ज्ञानसिद्ध्यैव मोक्षो यतः । निरुक्तमन्तरङ्गसाधनं ज्ञानस्योपसंहरति—**एतदिति** । अमानित्वमारभ्य तत्त्वज्ञानार्थदर्शनान्तं यदुक्तं तदेतद्विंशतिसंख्याकं ज्ञानसाधनं ज्ञानोत्पत्तिकारणत्वात् ज्ञानमिति महर्षिभिः प्रोक्तम् । अत एतस्मादमानित्वादिलक्षणाज्ज्ञानसाधनादन्यथा यदन्यद्विपरीतं मानित्वदम्भित्वहिंसाऽक्षान्त्यनार्जवादिकं रजस्तमोगुणजातं सर्वमज्ञानमज्ञानवृद्धिसाधनं संसारकारणं

ज्ञानप्रतिबन्धकं च । ततोऽमानित्वादिकं सम्यग्ज्ञातव्यं ज्ञात्वा मुमुक्षुभिः सम्यक् परिहरणीयमित्यर्थः ॥ ११ ॥

एवं ज्ञानोत्पत्तिसहकारिकारणसामग्रीममानित्वादिलक्षणां निरूप्य निरुक्तसाधनसंपत्त्या कृतेन श्रवणादिना समुत्पन्नज्ञानस्य यतेर्यज्ज्ञातव्यं वस्तु तन्निरूपयति—

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥

ज्ञेयमिति । मुमुक्षोः कृतश्रवणस्य तदुत्पन्नज्ञानवतो यतेर्यत् ज्ञेयं श्रीगुरोर्मुखाद्यत् ज्ञातव्यं वस्तु तत्प्रवक्ष्यामि उपदेक्ष्यामि । ननु तज्ज्ञानेन किमस्माकमित्यत आह—**यदिति** । तत्त्वमस्यादिवाक्यार्थं विचार्य विचारजन्यज्ञानेन यद्वस्तु ज्ञात्वाऽमृतं वक्ष्यमाणलक्षणं परं ब्रह्माश्नुते । 'एतदमृतमभयमेतद्ब्रह्म' इति श्रवणादमृतं ब्रह्म विद्वान् प्राप्नोति । 'ब्रह्मविदाप्नोति परम्' इति श्रुतेः । एवं फलवादेन श्रोतारमभिमुखीकृत्य यत्प्रतिज्ञातं प्रवक्ष्यामीति तत्प्रतिपादयति—**अनादिमदिति** । मुमुक्षुणा ज्ञातव्यं तद्ब्रह्म अनादिमत् आदिः कारणं जन्म वा यस्यास्ति तदादिमत्कार्यं महदादिस्थूलान्तं स्वयं ततो विलक्षणत्वाद्ब्रह्म अनादिमत् सर्वस्माद्विकारजातादन्यदित्यर्थः। अनादिमत्त्वमक्षरत्वान्मूलप्रकृतेरविकृतेरव्याकृतस्याप्यस्ति ततो व्यावर्तयितुं विशेषणं परमिति । निरवयवत्वेन नित्यकूटस्थासङ्गचिद्रूपत्वेन ज्ञत्वेनान्तरत्वेन परममहत्त्वेन च ब्रह्म स्वयमव्यक्तात्परमन्यदेव । 'अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः' इति श्रुतेरनादिमत्त्वात्परत्वाच्च ब्रह्म व्यक्ताव्यक्ताभ्यां कार्यकारणाभ्यामन्यदेवेति सिद्धम् । 'अन्यदेव तद्विदितादथो अविदितादधि' इति श्रुतेः । ननु 'तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् । स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥' इति क्षेत्रक्षेत्रज्ञयोर्याथात्म्यप्रतिपादनमुपक्रम्य महाभूतानीत्यादिना क्षेत्रस्वरूपं प्रतिपादितम् । ततः क्षेत्रज्ञस्य स्वरूपे प्रतिपादितव्ये तत्त्यक्त्वा उपक्रान्तमनादिमत्परं ब्रह्मेति कथमनुपक्रान्तं ब्रह्मस्वरूपं प्रतिपाद्यते, उपक्रमविरोधः स्यादितिचेन्न । तयोरभेदावधारणाद्विरोधानुपपत्तेः । 'नायं हन्ति न हन्यते' इति क्षेत्रज्ञस्यात्मनोऽविक्रियत्वं बोधयितुमुपक्रम्य, तदेव 'न जायते' इत्यादिना विस्पष्टीकृत्य, 'नित्यः सर्वगतः' इति नित्यकूटस्थासङ्गचिद्रूपत्वं व्यापकत्वं च प्रतिबोध्य, 'येन भूतान्यशेषेण' इति ब्रह्माभिन्नत्वं सूचयित्वा, 'भोक्तारं यज्ञतपसाम्' इति, 'सर्वभूतस्थमात्मानं', 'यो मां पश्यति सर्वत्र' इति च

तयोरेकत्वमेवानुभाव्य, 'ज्ञानी त्वात्मैव मे मतम्' इति कण्ठरवेणैक्यमेवोक्त्वा श्रुतिस्मृतिकोटिप्रसिद्धमुक्तमेव ब्रह्मात्मैक्यं 'क्षेत्रज्ञं चापि मां विद्धि' इति सुविस्पष्टतरं प्रतिपाद्य भगवता क्षेत्रज्ञ एव ब्रह्म ब्रह्मैव क्षेत्रज्ञ इति तयोरभेद एव मूढैरप्यमूढैश्च सर्वैर्ज्ञातव्य इति 'स च यो यत्प्रभावश्च तत्समासेन मे शृणु' इति ज्ञेयत्वेनोपक्रान्तमेव क्षेत्रज्ञं विधेयप्राधान्येन नपुंसकलिङ्गेन 'ज्ञेयं यत्तत्प्रवक्ष्यामि' इति परामृश्य तद्याथात्म्यं बोधयितुम् 'अनादिमत्परं ब्रह्म' इत्युक्तं । तेन क्षेत्रज्ञब्रह्मशब्दयोरर्थ एक एवेत्युपक्रान्तोपपादितवाक्यार्थविवेकज्ञाननिपुणैर्विद्वद्भिर्ज्ञातव्य इति सिद्धम् । एवमनादिमत्परं ब्रह्मेति ब्रह्मणः सर्वदृश्यवैलक्षण्यं सूचयित्वा, 'स च यो यत्प्रभावश्च' इत्यत्र यच्छब्दविवक्षितं तद्याथात्म्यं 'नेतिनेतीत्यात्मा गृह्यो नहि गृह्यते' इति, 'अथात आदेशो नेतिनेति' इत्यादिश्रुत्यर्थमनुसृत्यातन्निषेधद्वारा बोधयितुमाह—**न सत्तन्नासदुच्यत इति ।** यदिदमिदमिति नामरूपक्रियाजातिगुणविशेषैर्निर्देष्टुमर्हति तदभिव्यक्तनामरूपादिविशेषं महदादिकार्यजातं सर्वं सदित्युच्यते । तद्विलक्षणत्वात्तत्कारणमव्यक्तमसदित्युच्यते निरुक्तलक्षणं सद्ब्रह्म न भवति जनिमत्वान्नामरूपादिमत्त्वाद्दृश्यत्वाच्च घटवत्तद्विलक्षणत्वाद्ब्रह्मणः । नहि ब्रह्मणो जनिरस्ति । 'अजो नित्यः' इति श्रुतेः । नापि नामरूपादिकमस्ति । 'अग्राह्यमगोत्रमशब्दमस्पर्शमरूपम्' इति च श्रुतेः । नापि च दृश्यत्वम् । 'अदृश्यमव्यवहार्यम्' इति श्रुतेः । यतस्ततो ब्रह्म महदादिसर्वविकारजाताद्भिन्नमेवेत्यर्थः । एवं 'न सत्तत्' इति कार्यस्य ब्रह्मत्वं निषिध्य कारणस्यापि तद्भावं निषेधयति—**नासदुच्यत इति ।** सद्विलक्षणं सर्वजगत्कारणं यदव्याकृतं तद्ब्रह्म न भवति सावयवत्वाज्ज्ञेयत्वाज्जडत्वाच्च । बीजवत्कार्यस्य सावयवत्वादिधर्मवैशिष्ट्यदर्शनात्कारणस्यापि तद्धर्मवैशिष्ट्यं युक्तं मृदादिषु तद्दर्शनात् । 'कारणगुणा हि कार्यगुणानारभन्ते' इति न्यायाच्च यत्सावयवं तद्विकारि यद्विकारि तदनित्यमित्यनित्यत्वाच्च ज्ञेयत्वाज्जडत्वम् । अहमज्ञ इत्यव्यक्तस्य ज्ञेयत्वं स्पष्टं तद्विलक्षणमेव परं ब्रह्म । नहि ब्रह्मणः सावयवत्वमस्ति । 'निष्कलं निष्क्रियम्' इति श्रुतेः । नापि जडत्वम् । 'साक्षी चेता' इति श्रुतेः । नापि च ज्ञेयत्वं । 'स वेत्ति वेद्यं न च तस्यास्ति वेत्ता' इति श्रुतेः । ननु सदसच्छब्दवाच्ययोर्व्यक्ताव्यक्तयोः कार्यकारणयोरुभयोरपि ब्रह्मत्वे निषिध्यमाने तदभावं विना तन्निषेधावधितया स्थितं वस्तु यत्किंचिन्न पश्यामः । तत् ज्ञेयशब्दार्थोऽप्रामाणिक एवेति चेद्भवानत्र प्रष्टव्यः । तयोर्निषेधावधिभू-

तोऽभावः सन्वा, किमसन्वा, उतोभयविधो वा, स स्वयं स्वत एव भाति वा, उत परतो वेति। नाद्यः। तस्य सद्भावेन सदन्तःपातित्वात्। न सदिति निषेधे सति पुनः स्वनिषेधावधित्वानुपपत्तेः। न द्वितीयः। स्वतः सत्तारहितस्य तस्यासतः शशविषाणवत् शून्यत्वान्निषेधावधित्वासंभवात्। न तृतीयः। सत्त्वासत्त्वयोः परस्परविरुद्धयोरेकाधिकरणत्वानुपपत्तावेकस्य तद्वत्तासिद्धेरभावोऽस्तीत्यभावस्यास्तिमत्त्वे सत्तावत्त्वेन भावत्वादभावोऽस्तीति निर्देशोऽनुपपन्न एव। अयमस्तीति प्रत्यक्षेण निर्देशो भावस्यैव नत्वभावस्य युज्यते। विषयविषयिणोरन्योन्यावयवसंयोगाभावात् सत्येवान्योन्यावयवसंयोगे घटादेर्विषयत्वं दृष्टं नासतः। योस्तिमान् चक्षुर्विषयः स भाव एव नत्वभावः। अस्तिमत्त्वाभावत्वयोरेकाधिकरणत्वायोगात्तदङ्गीकारेऽपि। नापि चतुर्थः। अभावस्य ज्ञेयत्वेन जडत्वात् घटस्येव स्वतो भानासंभवात्। तर्ह्यन्यत एवेति चेदभावस्य भासकं वस्तु विद्यते वा न वा। न द्वितीयः। तदभावे सूर्याभावे घटादिवदभावस्य भानाभावप्रसङ्गात्। अस्त्येवेति चेद्यदभावस्य भासकं वस्तु तदेव ब्रह्मेति ब्रूमः। तत्सद्भावे त्वमेवास्माकं प्रमाणम्। श्रुतिश्च 'अन्यदेव तद्विदितात्', 'अन्यत्र धर्मादन्यत्राधर्मात्' इत्यादिः। 'न प्रकृतिर्न विकृतिः पुरुषः' इति। 'सुषुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनन्ति' इत्यादिस्मृतयश्च। यस्मात् 'अदृश्येऽनात्म्ये' इति, 'अस्थूलमनणु' इत्यादिश्रुतिभिरध्यस्ताशेषविशेषनिषेधेनैव ब्रह्मणोऽधिगमितत्वात्तदिदं ज्ञेयं सर्वश्रुतिप्रसिद्धं प्रामाणिकमेव। तस्मात् सदसतोर्भिन्नं तन्निषेधावधिभूतं तदभावभासकं निर्विशेषं नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वितीयमेव परं ब्रह्म इदमेवाहमस्मीति मुमुक्षुभिः स्वात्मना ज्ञातव्यं वस्तु न तु सन्नाप्यसच्चेति सिद्धम्॥ १२॥

एवं 'स च यो यत्प्रभावश्च' इत्यत्र यच्छब्दविवक्षितं क्षेत्रस्यात्मनो नैजं तत्त्वं प्रकृतिप्राकृतविलक्षणं यतिभिर्विदेहमुक्त्यै स्वात्मना ज्ञातव्यमिति निरूप्याधुना सर्वश्रुतिप्रसिद्धस्यापि ब्रह्मणो विदिताविदितान्यत्वेन परोक्षत्वात्तत्सद्भावस्य संशयितत्वे यत्सन्निधिमात्रेण देहेन्द्रियादयश्चेष्टन्ते तच्चेष्टाकारणं ब्रह्मेति युक्त्या तत्सत्त्वमनुमानतो ज्ञातुं शक्यत इति बोधयितुं क्षेत्रज्ञस्य यत्प्रभावश्चेति विशेषणविवक्षितं सर्वप्राणिकरणोपाधिमत्त्वलक्षणं विशेषितं श्रुतिप्रसिद्धं प्रतिपादयति—

सर्वतःपाणिपादं तत्सर्वतोक्षिशिरोमुखम्।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥ १३॥

सर्वत इति। यत् ज्ञेयत्वेनोपक्रान्तमनादिमत्त्वादिलक्षणं तद्ब्रह्म। सर्वतःपाणिपादं सर्वतः पाणयः पादाश्च सर्वप्राणिसंबन्धिनो यस्य तत्सर्वतःपाणिपादम्। पाणिपादपदमनुक्तकर्मेन्द्रियाणामुपलक्षणम्। सर्वतोऽक्षीणि शिरांसि मुखानि च यस्य तत्सर्वतोक्षिशिरोमुखम्। अक्षिपदमनुक्तज्ञानेन्द्रियाणां मनोबुद्ध्यादीनां चोपलक्षणम्। सर्वतःशिरोग्रहणं देहानेकत्वसूचनार्थम्। घटमठादिविशेषणैराकाशो यथा तथा ब्रह्मादिपिपीलिकान्तदेहविशेषणैर्नामरूपाभ्यां स्वयं विशेष्यत इत्यर्थः। सर्वतः श्रुतयः श्रोत्राणि यस्य तत्सर्वतःश्रुतिमत्। लोके लोक्यत इति लोकः प्राणिवर्गस्तस्मिन्। लोक इति द्वितीयार्थे सप्तमी। लोकं प्राणिसमुदायं प्रकृतिं प्राकृतं च सर्वं बहिरन्तः सर्वतः स्वरूपेण चैतन्येनावृत्य घटमठादिकमाकाश इव व्याप्य तिष्ठति। स व्याप्तदेहेन्द्रियादिकमयोऽयस्कान्त इव चेष्टयति स्वयं न चलतीत्यर्थः। निर्विशेषस्य ब्रह्मण इदं पाणिपादादिविशेषणविशेषितं रूपमौपाधिकं मायिकं च नतु स्वाभाविकम्। स्वाभाविकत्वे निषेधायोगात्। निषिध्यते हि वैशेषिकं रूपं 'न सत्तन्नासदुच्यते' इति। तर्हीदमप्रामाणिकमिति चेन्न। 'सर्वतःपाणिपादं तत्सर्वतोक्षिशिरोमुखम्। सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति। सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्'। 'सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत्' इत्यादिश्रुतिप्रमाणकत्वादैश्वरं रूपं व्यवहारे सत्सत्यमेव। यदेतदाराध्य तत्प्रसादेन मुमुक्षुर्मुक्तिं गच्छति। तदुक्तं च 'मत्कर्मकृन्मत्परमः' इति। निर्विशेषस्य क्षेत्रज्ञस्यात्मनः सविशेषस्वरूपोपन्यासस्तत्सद्भावद्योतनार्थः। सर्वतःपाणिपादादिलक्षणं प्रतिपादितम्। क्षेत्रं जानातीति वा क्षेत्रधर्मैः स्वयं ज्ञायत इति वा क्षेत्रज्ञः। तथाहि पाणिपादबुद्धीन्द्रियादयश्चेतनशक्तिनिमित्तस्वव्यापाराः स्वतो जडत्वाच्चर्मदारुमयप्रतिमादिवत् देहेन्द्रियादयः स्वतो जडाश्चेतनाधिष्ठात्रन्तर्बुद्धिपूर्वकं प्रवृत्तिमत्त्वाद्रथादिवत्। एवं सर्वप्राणिदेहेन्द्रियाद्युपाधिभिर्ज्ञेयस्य ब्रह्मणोऽस्तित्वमवगम्यते। एतदर्थमेव क्षेत्रज्ञस्यात्मनोऽसङ्गस्यापि पाणिपादादिमत्त्वमौपाधिकं मिथ्याभूतमप्युररीकृत्योच्यते भगवता मुमुक्षूणां स्वतत्त्वाभिगमाय शाखाग्रे चन्द्र इतिवत्। ततस्तदेव पारमार्थिकं रूपं यत् 'न सत्तन्नासदुच्यते' इत्युक्तम्। एतेन सर्वक्षेत्रेषु परस्परभिन्नेषु क्षेत्रज्ञस्यात्मन एकत्वं स्वसन्निधिमात्रेण तत्तद्देहेन्द्रियादिप्रवृत्तिनिमित्तत्वं प्रवर्तकत्वेन प्रवर्त्येभ्यस्तेभ्यो भिन्नत्वं निरवयवत्वं नित्यत्वं चेतनत्वमसङ्गत्वमसंसारित्वं पूर्णत्वं च बोधितं भवति॥ १३॥

ननु तर्हि क्षेत्रज्ञस्येवेश्वरत्वं प्राप्तमिति चेत्तदर्थमेव खलु गीताशास्त्रारम्भः । यस्मात् 'क्षेत्रज्ञं चापि मां विद्धि' इति बोधयति । क्षेत्रलक्षणसंपत्तिमेव प्रतिपादयति—

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १४ ॥

सर्वेन्द्रियेति चतुर्भिः श्लोकैः । स्वस्वविषयान् शब्दादीन् इन्दयन्ति बोधयन्तीतीन्द्रियाणि सर्वाणि श्रोत्रादीनि वागादीनि बाह्यान्यन्तरिन्द्रियं मनश्च । आत्मोपाधित्वाविशेषात् बुद्धिश्चाध्यवसायलक्षणा । एतेषामिन्द्रियाणां गुणाः स्पष्टत्वास्पष्टत्वदुष्टत्वादुष्टत्वादयः श्रवणस्पर्शनवचनादानसंकल्पाध्यवसायादयोऽवभास्यन्ते येन तत्सर्वेन्द्रियगुणाभासम् । बुद्ध्यादयः स्वान्यप्रकाशाः स्वतो जडत्वात्तप्तायःपिण्डवत् । बुद्ध्यादयो जडाः ज्ञेयत्वात् घटादिवदिति बुद्ध्यादीनां तद्गुणानां यत्प्रकाशकं ज्ञातृ तद्ब्रह्मेत्यवगन्तुं शक्यते । यद्वा सर्वेन्द्रियगुणैः श्रवणादिभिरवभासत इति सर्वेन्द्रियगुणाभासम् । इन्द्रियाण्यधिष्ठातृप्रयोज्यानि प्रयोज्यकरणत्वाद्दास्यादिवदिति करणक्रियया क्षेत्रज्ञसद्भावोऽधिगम्यत इत्युक्तं सर्वेन्द्रियगुणाभासमिति । नन्वसङ्गस्याक्रियस्याऽऽत्मनः कथं करणप्रयोक्तृत्वमिति चेन्न । तस्यात्मन्यारोपितत्वेन विरोधानुपपत्तेः, यथा पद्मविकासः पद्मधर्मः सूर्ये आरोप्यते पद्मं विकासयति सूर्य इति, तथैवोपाधिधर्मः श्रवणादिरात्मन्यध्यस्यते आत्मसद्भावाधिगमाय । आत्मा करणानि प्रवर्तयतीति तेन तद्व्यापारैर्व्यापारीव भाति । यथा वृक्षचलनेन नभश्चलितमिव 'ध्यायतीव लेलायतीव' इति श्रुतेः । ननु 'पश्यत्यचक्षुः स शृणोत्यकर्णः' इत्यात्मनः स्वतः श्रवणादिरहितत्वेऽप्युपाधिद्वारा श्रवणादिक्रियावत्त्वं श्रूयते तत्कथं श्रवणादिव्यापाराभाव उच्यत इतिचेन्न । श्रुतेस्तत्र तात्पर्याभावात् । 'वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च' इतीश्वरस्य वशित्वं सर्वलोकनिग्रहानुग्रहकारित्वं तेन देहेन्द्रियादिवैशिष्ट्ये प्राप्ते तद्राहित्यं प्रतिपादयति श्रुतिः, नतु परमात्मनः क्रियावत्त्वम् । तथात्वे 'निष्कलं निष्क्रियं', 'वृक्ष इव स्तब्धो दिवि तिष्ठति', 'स्थाणुरचलोऽयं सनातनः', 'सर्वमावृत्य तिष्ठति' इत्यादिश्रुतिस्मृतिविरोधप्रसङ्गात् । तत आत्मा वृक्षे चलिते आकाशवदुपाधौ चलति सति चलतीव भाति । नतु स्वयं चलति । निरवयवत्वात्पूर्णत्वान्निराकारत्वान्निरिन्द्रियत्वाच्च । तत एवात्मनः सद्भावाधिगमायाङ्गीकृतोपाधिसंबन्धराहित्यमेव बोधयितुमाह—**सर्वेन्द्रियविवर्जितमिति** । सर्वैरुक्तैरिन्द्रियै-

स्तदाश्रयेण च तत्कृतैः पुण्यपापादिकर्मभिरपि वर्जितं रहितमित्यर्थः । आत्मनो देहेन्द्रियादिसंबन्धासिद्धेर्हेतुमाह—**असक्तमिति** । निरवयवत्वाद्येनकेनापि संयोगादिसंबन्धवर्जितमसक्तमसङ्गमित्यर्थः । 'असङ्गो ह्ययं पुरुषः' इति श्रुतेः । 'सर्वेन्द्रियविवर्जितम्' इत्युक्तया त्वात्मनो देहेन्द्रियादयः सन्ति । किंत्वसङ्गत्वात्तैर्वर्जित इति प्राप्ते तत्सद्भावमप्यपनुदति—**निर्गुणमिति** । गुणाः गुणकार्यभूता देहेन्द्रियादयस्तद्रहितत्वान्निर्गुणम् । 'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम् । नित्यं विभुं सर्वगतं सुसूक्ष्मम्' इति । 'अशरीरं शरीरेषु', 'सशरीरो निरिन्द्रियोऽप्राणोऽमनाः सच्चिदानन्दमात्रः' इत्यादिश्रुतेः । एतेन सर्वतःपाणिपादमिति ब्रह्मणः सत्त्वाधिगमायैव पाणिपाद्युपाध्युपन्यासो नतु स्वरूपाधिगमायेति सूचितम् । तथात्वे निर्गुणमिति निषेधानुपपत्तेः । यद्वा निर्गुणं गुणरहितं सतः केवलस्य गुणानभ्युपगमात् । नहि ब्रह्मणः सत्त्वादयो रूपादयो वा सुखादयो वा । यद्योगात् स्वयं गुणि स्यात्सत्त्वादिभिर्गुणित्वे गुणनाशाद्गुणिनोऽपि नाश इति नाशः प्रसज्येत । गुणिनो नित्यत्वे तद्गुणानामपि नित्यत्वमिति चेन्न । तन्नित्यत्वे मानाभावात् । 'सत्यकामः सत्यसंकल्पः' इति श्रुतिरेव मानमिति चेन्न । अत्रत्यसत्यशब्दस्यामोघार्थकत्वेन नित्यत्वबोधकत्वाभावात् नित्यत्वे सृष्टिकामस्य सर्वदा सृष्टिप्रसङ्गात्, 'विकल्पो नहि वस्तु' इति गुणानां गुणकार्याणामप्यवस्तुत्वश्रवणात् । नापि च रूपादयः । 'अशब्दमस्पर्शम्' इति ब्रह्मणो रूपाद्यभावश्रवणात् रूपादिमत्त्वे सावयवत्वेनानित्यत्वं प्रसज्येत । सुखादयस्तु ज्ञेयत्वेन क्षेत्रधर्मत्वात्तज्ज्ञातुरात्मनो न संभवन्ति । 'साक्षी चेता केवलो निर्गुणश्च' इति श्रुत्यैव निर्गुणत्वावधारणाच्च गुणरहितमेव परं ब्रह्मेत्यर्थः । यद्यपि ब्रह्म स्वयं सत्त्वादिगुणतत्कार्यशून्यमेव । तथापि **गुणभोक्तृ च** गुणानां सत्त्वादिगुणकार्याणां देहेन्द्रियादीनां शब्दादीनां सुखादीनां च भोक्तृ । उपलब्धृबुद्ध्यादिसान्निध्यात् ज्ञेयजातं सर्वं जानातीत्यर्थः । उपलब्धृब्रह्मेत्युक्त्या ब्रह्मणः प्राप्तं परिच्छिन्नत्वं सद्वितीयत्वं चापनुदति—**सर्वभृच्चेति** । स्वस्मिन्नारोपितं सर्वमव्यक्तादिस्थूलान्तं स्वसत्तास्फूर्तिभ्यां सत्तावत्स्फूर्तिमच्च । कृत्वा स्वमात्रत्वेन बिभर्तीति सर्वभृत् । प्रपञ्चे सर्वत्र सदन्वयाच्चिदन्वयाच्च । 'सद्धीदं सर्वं', 'चिद्धीदं सर्वम्' इति श्रवणाच्च सर्वं ब्रह्मैवेत्यर्थः । 'सत्यं चानृतं च सत्यमभवत्' इति श्रुतेः । ततो ब्रह्मव्यतिरिक्तवस्त्वभावात् न ब्रह्मणः परिच्छिन्नत्वं नापि सद्वितीयत्वमिति सिद्धम् ॥ १४ ॥

ननु नामरूपात्मकस्य द्वैतप्रपञ्चस्य सतः पृथक्तया प्रत्यक्षेणोपलभ्यमानत्वात्कथं सर्वं ब्रह्मैवेत्याकाङ्क्षायाम् । न । बहिरन्तश्चाग्निना व्याप्तायसः पृथक् सत्ताभावाद्वह्निमात्रमेव यथा तथा बहिरन्तश्च ब्रह्मणा व्याप्तस्य जगतोऽपि स्वतःसत्ताभावाद्ब्रह्ममात्रत्वमेवेत्याह—

बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥ १५ ॥

बहिरिति । यन्मुमुक्षोर्ज्ञेयत्वेनोपक्रान्तं तद्ब्रह्म भूतानामव्यक्तादिस्थूलान्तानामन्तश्च बहिश्च वह्निरयःपिण्डमिव सर्वतो व्याप्य स्थितं भवति नतु केनापि परिच्छिन्नम् । निरवयवत्वादतिसूक्ष्मत्वाच्चाकाशवन्न केनापि परिच्छेत्तुं शक्यते । नहि निरवयवमतिसूक्ष्मं चाकाशं घटादिभिः परिच्छेत्तुं शक्यं परमसूक्ष्मत्वेन तेषामविषयत्वात् । किंतु सर्वं बहिरन्तः सर्वतो व्याप्य तिष्ठति तद्वद्ब्रह्मापीत्यर्थः । तथाच श्रुतिः 'तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः' इति, 'मया ततमिदं सर्वम्' इत्युक्तं च । नन्वयःपिण्डमग्निवद्भूतानामन्तर्बहिश्च व्याप्यावस्थितत्वेनापरिच्छिन्नत्वेऽपि ब्रह्मणस्त्वग्नेरयःपिण्डवद्व्याप्यांशो द्वैतभावो विद्यत एव, सत्येतस्मिन् कथमद्वैतसिद्धिरित्याशङ्कायाम् । न । 'प्राणो ह्येष सर्वभूतैर्विभाति' इति श्रवणाद्ब्रह्मविवर्तत्वाज्जगतः पृथक्सत्ताभावात्प्रत्यग्दृष्ट्या समीक्ष्यमाणे सर्वं ब्रह्मैवेत्याह—**अचरमिति** । यत्क्रियावत्तच्चरं तद्विलक्षणमचरं स्थावरं जंगमं च सर्वभूताभासं ब्रह्मैव रजताभासो यथा शुक्तिस्तद्वदित्यर्थः । 'सर्वं ह्येतद्ब्रह्म' इति श्रुतेः । ननु सर्वात्मकं परिपूर्णमद्वितीयं च ब्रह्म तर्हि सर्वैरिदमिति गृह्येत तत्कथं न गृह्यत इत्याकाङ्क्षायामाह—**सूक्ष्मत्वादिति** । यद्यपि सर्वात्मकं परिपूर्णमद्वितीयं च परं ब्रह्म, तथापि स्वयमाकाशादप्यतिसूक्ष्मं 'सूक्ष्मात्सूक्ष्मतरं नित्यम्' इति श्रुतेः । महदव्यक्तादेरपि सूक्ष्मत्वात्तद्ब्रह्माविज्ञेयं स्वात्मभूतमपि श्रुत्याचार्येश्वरात्मप्रसादशून्यानामविशुद्धबुद्धीनां विज्ञातुमशक्यमेव यथान्धानां स्वरूपं तद्वत् । इममेवार्थं विस्पष्टयति—**दूरस्थमिति** । विवेकवैराग्यशमदमादिनियतसाधनशून्यानां कृतश्रवणानामपि मलिनान्तरात्मनां स्वरूपमपि तद्ब्रह्म । दूरस्थं चक्रवाला[1]दतिदूरगतमेव भवति । जन्मशतकोट्यापि प्राप्तुमशक्यमित्यर्थः । यदशुद्धबुद्धीनां दूरतरं तदेव ब्रह्म विद्वदनुग्रहवतां प्रशान्तात्मनामन्तिके । चकारोऽवधारणार्थः । समीप एव हृदये स्वात्मनाऽवगन्तुं शक्यमित्यर्थः । 'दूरात्सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम्' इति श्रुतेः ॥ १५ ॥

---

१ लोकालोकपर्वतात्.

यदुक्तमचरं चरमेव चेति ब्रह्मणः सर्वात्मकत्वं तन्न । सर्वत्र तल्लक्षणादर्शनात् जंगमेष्वेव प्राणिशरीरेष्वहं ममेदमित्यादिवेदनलक्षणं चेतनत्वमवगम्यते नतु स्थावरदेहेष्वतः परिच्छिन्नमेव ब्रह्मेत्याशङ्कायाम् । न । ब्रह्मणः परिपूर्णस्यैव प्राणिनामन्तःकरणेष्वतिनिर्मलेषु स्फूर्तिर्न तु तदतिरिक्तेषु यथा सर्वगतस्याप्याकाशस्य निर्मलेषु जलादिष्वेव प्रतिबिम्बता, यथैवातपाग्नेः सर्वगतस्यापि सूर्यकान्तेष्वेव स्फुरणं, यथा सर्वगतस्यापि रूपस्य चक्षुष्षूपलम्भो नत्वन्यत्र नैतावताप्यपरिच्छित्तिः संभवति, तथैव ब्रह्मणोऽपि परिच्छिन्नवद्भानं न तत्प्रामाणिकं परिच्छेदे मानाभावात् । अस्त्येव प्रत्यक्षप्रमाणमिति चेन्न । प्रादेशमात्रश्चन्द्रः नीलं नभ इत्यादौ तद्व्यभिचारात् । 'यदल्पं तन्मर्त्यम्' इति न्यायेन परिच्छिन्नत्वे त्वनित्यत्वप्रसङ्गात्ततः 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रवणाद्ब्रह्म पूर्णमेवेत्याह—

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६ ॥

अविभक्तमिति । विभक्तेषु नामरूपगुणक्रियाजातिस्वभावविशेषैः परस्परं भिन्नेषु ब्रह्मादिस्तम्बान्तेषु प्राणिष्वहमहमित्यहंपदार्थत्वेन प्रतीयमानत्वात्तैर्विभक्तैः प्राणिशरीरैर्विभक्तमिव स्थितं च भवति । तेनैव सांख्या आत्मनोऽसङ्गचिद्रूपत्वं परस्परभिन्नत्वमनेकत्वं च मन्यन्ते । तदसत् । श्रुतिन्यायविरोधात् । भ्रान्तानां घटादिभिराकाशवत्परिच्छिन्नमिव प्रतीयमानमिति तद्ब्रह्म स्वयं स्वरूपेणाविभक्तमेव नतु भूतैर्विभक्तुं शक्यते निरवयवत्वादतिसूक्ष्मत्वादविषयत्वाच्च । तैर्विभक्तत्वे सावयवत्वानित्यत्वादिदोषप्रसङ्गात् । सर्वप्रपञ्चस्फूर्त्यभावप्रसङ्गाच्च । श्रुतिविरोधश्च प्रसज्यते । यतः 'एको देवः सर्वभूतेषु गूढः', 'आकाशवत्सर्वगतश्च नित्यः', 'पूर्णं पुरुषेण सर्वं','तदेतद्ब्रह्मापूर्वम्' इत्यादिश्रुतयो ब्रह्मण एकत्वं सर्वगतत्वं नित्यत्वमद्वितीयत्वं च नियमेन प्रतिपादयन्त्यतोऽविभक्तमेव, सर्वप्रकाशकत्वेनाप्यविभक्तमेव भवति । सौरालोकेनाविभक्तेनैव खलु विभक्तं घटपटादिभास्यं सर्वं व्याप्य ब्रह्माण्डं प्रकाश्यते नतु विभक्तेन। तथात्वे सर्वत्र सर्वेषां सर्वपदार्थस्फुरणासंभवात् । तद्वद्ब्रह्मणाप्यविभक्तेनैव बहिरन्तश्च सर्वतो व्याप्तेन स्थूलं सूक्ष्मं चाव्यक्तमहदादिदृश्यं सर्वं प्रकाश्यते । परिच्छिन्नत्वे बाह्यपदार्थभानाभावप्रसङ्गात् । भाति हि सर्वत्र सर्वं सर्वस्य 'तस्य भासा सर्वमिदं विभाति' इति श्रुतेः । तत एव विभक्तमिव च स्थितमित्युक्तं भगवतापि । तेन ब्रह्मापरिच्छिन्नमेवेति

सिद्धम् । तत एव ब्रह्मणोऽपरिच्छिन्नत्वाद्वितीयत्वसिद्धये जगतो ब्रह्मविवर्तत्वं सूचयति—**प्रभविष्णिवति** । अज्ञानदशायां तदेव ज्ञेयं ब्रह्माध्यात्मादिरूपेण प्रभवितुं रज्जुरिवारोपिताकारेण प्रत्येतुं शीलमस्यास्तीति प्रभविष्णु भ्रान्तानां प्रपञ्चाकारेण ब्रह्मैव भातीत्यर्थः । 'सत्यं चानृतं च सत्यमभवत्' इति श्रुतेः । भूतभर्तृ च तदेव ब्रह्म स्वस्मिन्नारोपितानां व्योमादिभूतानां सत्तास्फूर्तिप्रदानेन भरणं करोतीति भूतभर्तृ च भवति । स्वस्मिन्नारोपितं सर्वं मूढव्यवहारार्थं बिभर्तीत्यर्थः । 'व्यक्ताव्यक्तं भरते विश्वमीशः' इति श्रुतेः । तदेव ब्रह्म ग्रसिष्णु च प्रबोधदशायामधिष्ठानयाथात्म्यसंदर्शनकाले त्वारोपितं सर्वं स्वात्मना ग्रसितुं स्वस्मिन्नेव तिरोभावयितुं शीलमस्यास्तीति ग्रसिष्णु च भवति । 'परेऽव्यये सर्व एकीभवन्ति', 'सर्वे वेदा यत्रैकं भवन्ति' इति श्रवणाद्रज्जुरिवारोपितं सर्वं स्वात्मनोपसंहृत्य विपरीतभावमुत्सृज्य बोधमयीमविकारिणीं केवलामद्वैतां स्वसत्तां भजतीत्यर्थः ॥ १६ ॥

प्रभविष्णुत्वादेर्ब्रह्मलक्षणस्य प्रकृतेरप्यव्याकृतस्य संभवात्तस्या अपि ब्रह्मत्वे प्राप्ते परत्वादिविशेषणैः परिहरन् ब्रह्मणोऽवगत्यर्थं स्वरूपं तत्प्राप्तिनियतसाधनं तदुपलब्धिस्थानं च बोधयति—

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्टितम् ॥ १७ ॥

ज्योतिषामिति । तज्ज्ञेयं ब्रह्म तमसः प्रकृतेरज्ञानाज्जगद्बीजात्परं भिन्नमेव । यतोऽज्ञोऽहमित्यज्ञानं स्वस्मिन्नध्यस्तं प्रत्यग्लक्षणेन ब्रह्मणानुभूयते ततो ज्ञातृज्ञेयाद्भिन्नमेव भवति तत एव 'अक्षरात्परतः परः' इति, 'आदित्यवर्णं तमसः परस्तात्' इति, 'अव्यक्तात्तु परः पुरुषः' इत्यादिश्रुतिभिर्ब्रह्मजगद्बीजादज्ञानादव्याकृताद्भिन्नमित्येवोच्यते । तमसोऽभिन्नत्वे ब्रह्मणो विशेषणान्तरमाह—**ज्योतिरिति** । हेतुगर्भितमिदं विशेषणम् । ब्रह्म तमसः प्रकृतेर्भिन्नं ज्योतिष्ट्वात् यन्नैवं तन्नैवं यथा घट इति युक्त्यापि ब्रह्मणोऽव्याकृताद्भिन्नत्वमेव सिध्यति । ज्योतिष्ट्वं प्रकाशस्वरूपत्वं प्रकाशकत्वं वा । यो जागरमन्वभूवं यः स्वप्नमद्राक्षं यः सुखमस्वाप्सं सोऽहमस्मीति व्यक्ताव्यक्तप्रकाशकत्वेनात्मनस्तदुभयभिन्नत्वे प्रत्यक्षम् । आत्मा व्यक्ताव्यक्ताभ्यां कार्यकारणाभ्यां भिन्नस्तदुभयसाक्षित्वाद्यन्नैवं तन्नैवमित्यनुमानं च । 'अन्यदेव तद्विदितात्' इत्यादिश्रुतिश्च प्रमाणम् । ननु सूर्यादेर्बहिरन्तर्बुद्ध्यादेश्चाप्यस्ति ज्योतिष्ट्वमितरप्रकाशकत्वं कथं ब्रह्मण एवेत्याशङ्कायाम् । न । तेषामपि प्रकाशकत्वाद्ब्रह्मणो ना-

तिव्याप्तिरित्याह—**ज्योतिषामिति** । परप्रकाशकानामप्यादित्यादीनां बुद्ध्यादीनां च ज्योतिषां तद्ब्रह्म ज्योतिः प्रकाशकं भवति । आत्मज्योतिषैव खलु चैतन्यात्मकेन प्रकाशवन्तः सूर्यादयो बुद्ध्यादयश्च तप्तायःपिण्डवत्स्वातिरिक्तं प्रकाशयन्ति नतु स्वतः । 'येनादित्यस्तपति तेजसा भ्राजसा च' इति, 'श्रोत्रस्य श्रोत्रं मनसो मनः' इति, 'तस्य भासा सर्वमिदं विभाति' इति च श्रुतेः । एतेन बहिरन्तरर्थप्रकाशकानामादित्यादीनां मनोबुद्ध्यादीनां च भौतिकज्योतिषां प्रकाशकमाविर्भावतिरोभाववृद्धिक्षयपरिच्छेदादिरहितं नित्यं निरतिशयं स्वप्रकाशमप्राकृतज्योतिःस्वरूपं ब्रह्मेत्युपदिष्टं भवति । एवं मुमुक्षूणां ज्ञातव्यं ब्रह्मस्वरूपं 'न सत्तन्नासदुच्यते' इति अतन्निषेधमुखेन बोधयित्वा तदेव साकल्येन 'ज्योतिषामपि तज्ज्योतिः' इति अप्राकृतज्योतिःस्वरूपं ब्रह्मेत्युपदिश्य नैतावन्मात्रोपदेशेन ब्रह्मसाक्षात्कारः सिद्ध्यति विना विशेषोपदेशेनेति मत्वास्मत्प्रत्ययार्थतया विद्वद्भिरनुभूयमानं बुद्धिगुहायामव्याकृताकाशे देदीप्यमानं बुद्ध्यादिसाक्षिलक्षणं सर्वान्तरं सर्वप्रकाशकं कालत्रयाबाध्यमसङ्गमविक्रियं प्रत्यग्रूपं यदखण्डचैतन्यं तदेव ब्रह्मेति साक्षाद्विधिमुखेन बोधयितुमाह—**ज्ञानमिति** । बहिरन्तः सर्वत्र परिपूर्णं स्वप्रकाशं सर्वप्रकाशमनाधारमनाधेयमखण्डितमवाङ्मनसगोचरमनाद्यन्तं नित्यकूटस्थं निर्विशेषं नित्यं शुद्धं निराभासं यत्केवलं ज्ञानं तदेव ब्रह्म मुमुक्षोर्यतेः स्वात्मना ज्ञेयमवगन्तव्यमित्यर्थः । 'सत्यं ज्ञानमनन्तं ब्रह्म', 'विज्ञानमानन्दं ब्रह्म' इति च श्रुतेः । 'ज्ञानं विशुद्धं विमलं विशोकम्' इति स्मृतेश्च । एवं यत्सर्वेन्द्रियगुणाभासं यत्सर्वभृत् यद्गुणभोक्तृ यत्प्रभविष्णु यद्भूतभर्तृ यद्ग्रसिष्णु यत्तमसः परं यच्च ज्योतिषां ज्योतिस्तद्ब्रह्मेति तटस्थलक्षणेन परोक्षतयोपदिष्टस्य वस्तुन एवापरोक्षत्वसिद्धये ज्ञानं ब्रह्मेति स्वरूपलक्षणेन ज्ञातव्यं ब्रह्मोपदिश्याधुना तदधिगमाय नियतं साधनं सूचयितुमाह—**ज्ञानगम्यमिति** । सदसद्विवेकवैराग्यशमदमसंन्यासामानित्वाद्यन्तरङ्गसाधनसंपत्त्या ब्रह्मविद्गुरुसन्निधौ नित्यनिरन्तरसमनुष्ठितश्रवणमननिदिध्यासाद्यनुष्ठानेन समुत्पन्नमनाद्यविद्यावासनाजातं संक्षिप्य, सर्वविकल्पनिर्मुक्तं यज्ज्ञानं तेनैवैकेन श्रुत्याचार्येश्वरात्मप्रसादसंजातेन गम्यमवगम्यं ज्ञानेनाधिगम्यं नतु सांख्येन न योगेन न कर्मणा नाप्युपास्त्या चाधिगम्यं भवति । किंतु सर्वाङ्गीणं स्वारोग्यसुखं यथा तथा स्वज्ञानेनैव स्वात्मना ब्रह्म ज्ञातव्यमित्यर्थः । 'मनसैवानुद्रष्टव्यम्', 'मनसैवेदमाप्तव्यम्' इतिच श्रुतेः । एवं वस्तुस्वरूपं तत्प्राप्तिसाधनं चोक्त्वा

तदुपलब्धिस्थानमाह—**हृदीति** । सर्वस्य ब्रह्मादिस्तम्बान्तस्य प्राणिजातस्य हृदि हृदये बुद्धिगुहायामव्याकृताकाशे धिष्ठितं सर्वप्राणिनां बुद्धितद्व्यापारतदवस्थासाक्षितयाऽहमहमित्यहंपदप्रत्ययार्थत्वेन विशिष्य स्थितं तत्र विशिष्योपलभ्यमानं प्रत्यग्रूपं ब्रह्म ज्ञातव्यमित्यर्थः । यद्यपि ब्रह्माकाशवत्सर्वगतं परिपूर्णं तथापि निरवयवत्वान्निराकारत्वादतिसूक्ष्मत्वाच्च सर्वत्र नोपलभ्यते । किंतु सर्वगतोऽप्यातपाग्निः शुद्धस्फटिक इव निर्मलायां बुद्धावेवोपलभ्यते । 'गुहाहितं प्राणिभिर्गुह्यमानमाविःसन्निहितं गुहाचरम्' इति च श्रवणात्तत्रस्थं ब्रह्म ज्ञातव्यमित्युच्यते । हृदि सर्वस्य धिष्ठितमिति हृच्छब्दवाच्या बुद्धिरेव ब्रह्मोपलब्धिस्थानमित्यर्थः ॥ १७ ॥

उपक्रान्तमुपसंहरति—

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥

इतीति । इत्येवं समासतः संक्षेपेणैव क्षेत्रं क्षेत्रज्ञस्यात्मनः क्षेत्रतद्विकारतद्धर्मतत्कर्मतदवस्थासंबन्धापवादेन विशुद्धत्वसिद्ध्येकप्रयोजनं महाभूतादिधृत्यन्तं हेयवस्तुस्वरूपं, तथा ज्ञानं श्रवणमननादिद्वारात्मज्ञानसिद्ध्येकसाधनममानित्वादिलक्षणं, ज्ञेयं च 'अनादिमत्परं ब्रह्म' इत्यादिना ज्ञानमित्यन्तेन ग्रन्थेन तटस्थस्वरूपलक्षणाभ्यां प्रत्यगभिन्नस्य ब्रह्मणः स्वरूपमप्युक्तं जिज्ञासोर्मुमुक्षावतः स्वस्वरूपाधिगमाय सम्यक् प्रतिपादितमित्युक्त्वा, एवंविशेषणविशिष्ट एवात्राधिकारीत्यधिकारिलक्षणं वदन्नुक्तलक्षणं ब्रह्म स्वात्मना विदितवतो विदुषस्तद्वेदनस्य फलमाह—**मद्भक्त इत्यादिना** । 'मत्कर्मकृन्मत्परमः' इति, 'ये तु सर्वाणि कर्माणि' इत्याद्युक्तलक्षणलक्षितो यः स मद्भक्तः मद्भजनेनैव शुद्धान्तःकरणः सन् सदसद्विवेकसंन्यासशमदमाद्यमानित्वादिसाधनसंपन्नो भूत्वा, ब्रह्मविदनुग्रहात् क्षेत्रक्षेत्रज्ञयोः स्वरूपं सम्यग्विविच्य क्षेत्रतद्धर्मादीन् परित्यज्य विशुद्धं केवलं चिन्मात्रं क्षेत्रज्ञलक्षणमेतन्निर्विशेषं परं ब्रह्म इदमेवाहमिति स्वात्मना विज्ञाय, तत्तादात्म्यापत्त्या तत्रैवाहंबुद्धिं प्रतिष्ठाप्य ब्रह्मविद्यतिर्मद्भावाय मम ब्रह्मणो भावो मद्भावः कैवल्यं निर्विशेषब्रह्मात्मनावस्थानलक्षणं तस्मै उपपद्यते । पतितेऽस्मिन्नुपाधौ पूर्णात्मना तिष्ठतीत्यर्थः ॥ १८ ॥

सर्वेषां वेदान्तानां गीतायाश्चार्थोऽत्र पर्यवसितस्तथापि सप्तमे 'एतद्योनीनि भूतानि' इति यत्परावरप्रकृत्योः संसारकारणत्वं जन्मादि तत्कारणत्वं च सूचितं तदिदानीं 'कार्यकारणकर्तृत्वे' इति, 'यावत्संजायते किंचित्सत्त्वं स्थावरजंगमम्' इति विस्पष्टयितुं क्षेत्रक्षेत्रज्ञयोर्विवेके कृते सत्य-

प्यविदितं प्रकृतिपुरुषयोरनादित्वं, विकाराणां गुणानां च प्रकृतिकार्यत्वं क्षेत्रस्य क्षेत्रज्ञे प्रतीयमानसंसारस्य गुणाध्यासमूलकत्वं, संसृतेः प्रकृतिधर्मत्वमात्मनो निर्विकारत्वमसङ्गत्वमकर्तृत्वमभोक्तृत्वमसंसारित्वं च विस्पष्टीकर्तुमुत्तरग्रन्थ आरभ्यते—

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ १९ ॥

प्रकृतिमिति । 'भिन्ना प्रकृतिरष्टधा । अपरेयम्' इति या प्रतिपादिता सर्वविकारकारणमीश्वरस्य शक्तिस्त्रिगुणात्मिका माया तां प्रकृतिं, पुरुषं च । पुरुषस्त्वविद्योपाधिकः क्षेत्रज्ञः 'प्रकृतिं विद्धि मे पराम्' इत्युक्तलक्षणः । राज्यसंबन्धान्मनुष्यस्य राजत्वं प्रभुत्वं च यथा तथा प्रकृतिसंबन्धात् क्षेत्रज्ञस्यापि प्रकृतित्वं जीवत्वं च । प्रत्यक्त्वेन चेतनत्वेन प्रकाशकत्वेन च मूलप्रकृतेरुत्कृष्टत्वात्परा प्रकृतिरिति संज्ञां प्राप्तो यः पुरुषस्तं च । तावेतौ प्रकृतिपुरुषावनादी न विद्यते आदिः कारणं वाप्यादिमत्त्वं वा प्राक्कालपरिच्छेदो ययोस्तावनादी सर्वस्यादिभूतौ, स्वयमादिरहितावेवेति । एवकारस्तयोरपीश्वरवन्नित्यत्वावधारणार्थः । नित्यं हीश्वरस्येश्वरत्वं तच्चेशितव्यापेक्षमीशेशितव्ययोर्नित्यत्वे सत्येवेश्वरस्येश्वरत्वं नित्यं स्यान्नान्यथा । ननु नक्षत्रान्तरयोगेनार्कस्य नक्षत्रित्ववत्प्रकृतेरनित्यत्वेऽपीश्वस्य क्षणेक्षणे जायमानप्रकृत्यन्तरयोगे सतीश्वरस्य नित्यत्वसंभवात् किमर्थं तयोर्नित्यत्वाभ्युपगम इतिचेन्न । 'अजामेकाम्' इति मूलप्रकृतेरजत्वैकत्वश्रवणात्प्रकृत्यन्तरायोगात् । 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' इति परमात्मनः प्रकृतिद्वयेश्वरत्वश्रवणाच्च । तत ईश्वरत्वनिमित्तयोस्तयोरपीश्वरवन्नित्यत्वमेव । तयोरनित्यत्वे त्वीश्वरस्य कचिदीशितव्याभावे ईश्वरत्वं भज्येत, सृष्ट्यादौ पुण्यपापाद्यनपेक्ष्य निर्निमित्तं च जीवानां नानायोनिप्राप्तिप्रसङ्गस्तथा सुखदुःखादिकल्पना च स्यात्, तथात्वे जगत्स्रष्टुरीश्वरस्य वैषम्यनैर्घृण्ये च प्रसज्येयातां, प्रकृत्या बद्धो बद्धस्तन्मुक्तो मुक्त इति नियतयोर्बन्धमोक्षयोरव्यवस्था च स्यात्, तथा सति बद्धानामपि मुक्तिर्मुक्तानामपि जन्मादिबन्धः प्रसज्येत । बन्धमोक्षप्रतिपादकशास्त्रानर्थक्यं च स्यात् । तयोरनित्यत्वे एवमाद्यनर्थपरम्परा संभवति । ननु पुरुषशब्दवाच्यस्य जीवस्याधुनिकत्वान्नैवोक्तानर्थागम इति चेन्न । प्रत्यक्षादिप्रमाणविरोधापत्तेः । प्रत्यक्षेण खलु जीवानां सुखदुःखादिवैचित्र्यमुपलभ्यते तद्वैचित्र्यं कर्मनिबन्धनमेव नतु पुरुषस्वातन्त्र्यनिबन्धनम् । तथात्वे सर्वेषां तदैकरूप्यापत्तेः । तदन्यथानुपपत्त्या

च धर्माधर्मनिमित्तः संसारो ह्यनुमीयते, ततोऽनुमानेन 'यत्कर्म कुरुते तदभिसंपद्यते' इत्यादिश्रुतिभिरपि सुखादेः कर्मैकनिबन्धनत्वमभ्युपगन्तव्यम्। तद्धेतुरपि कर्म जन्मान्तरीयमेव नत्वाधुनिकम्। तर्णकादौ कर्मादर्शनात् कर्मणामनाधुनिकत्वे तत्कर्तुर्जीवस्य नित्यत्वमेवेति सिद्धम्। 'अजामेकाम्' इति, 'न जीवो म्रियते' इत्यादिश्रुतिभिस्तयोर्नित्यत्वे न काचिदनुपपत्तिरस्ति। 'नन्वीश्वरवत्प्रकृत्योरपि नित्यत्वे तद्वत आत्मनः कदापि मोक्षो न स्यात् ब्रह्मणोऽप्यद्वितीयत्वं च न सिध्यति ब्रह्मणस्त्वद्वितीयत्वं तद्विज्ञानवतो मोक्षं च प्रतिपादयतः शास्त्रस्याप्यप्रामाण्यं च स्यादितिचेन्न। सर्वस्याप्येतस्य मायाकार्यत्वेन सम्यग्ज्ञानदशायां स्वप्नार्थवन्मिथ्यात्वोपपत्तेः। नहि प्रबोधदशायां निद्रायास्तत्कार्यस्य च सत्यत्वं दृष्टम्। तद्वत् 'न सत्तन्नासदुच्यते' इत्युक्तरीत्यात्मयाथात्म्यविज्ञानदशायां मायातत्कार्ययोरसत्यत्वमेव 'जीवेशावाभासेन करोति', 'माया चाविद्या च स्वयमेव भवति', 'मायामात्रमिदं द्वैतं', 'विकल्पो नहि वस्तु' इति मायायास्तत्कार्यस्याप्यसत्त्वश्रवणात्ततो ब्रह्मणोऽद्वितीयत्वं तद्विज्ञानवतो मोक्षश्च तत्प्रतिपादकशास्त्रस्य प्रामाण्यं च सिध्यति। 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इति न्यायेनाज्ञानदशायां सर्वमर्थवदेव भवति। विवेकदशायां विचार्यमाणे सर्वं मिथ्यैवेति बोधयितुं भगवता प्रकृतिपुरुषविवेकमारभ्योच्यते 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इति प्रकृतिपुरुषावुभावप्यनादी नित्याविति विद्धि विजानीहि। किंच विकाराः देहेन्द्रियप्राणमनोबुद्ध्यहंकारादयश्च शब्दादीनि तन्मात्राण्यपि चैते सर्वे विकारास्तानेतान् गुणांश्च, गुणाः सुखदुःखेच्छाद्वेषलोभमोहकामसंकल्पादयो ये च शमदमादयो ये च भ्रमप्रमादादयः पुण्यपापादिलक्षणा इन्द्रियव्यापारास्तानेतान् सर्वानपि प्रकृतिसंभवान् प्रकृतिस्त्रिगुणात्मिकाऽव्यक्तशब्दवाच्या बीजादङ्कुरस्कन्धशाखापत्रपुष्पफलादिवत्तस्याः सकाशादेव समुत्पन्नान् विद्धि न त्वात्मसंभवान्। निरवयवत्वादसङ्गादविक्रियत्वाच्चात्मनस्ततः कस्याप्युत्पत्त्यनुपपत्तेः। किंतु भोक्तृदृष्टवशात्प्रकृतिः स्वयमेव गुणवैषम्यं प्राप्य महदादिविकारात्मना गुणात्मना च परिणमत इति विजानीहीत्यर्थः। विकाराणां गुणानां च प्रकृतिकार्यत्वे सिद्धे पुरुषस्यात्मनस्त्वकर्तृत्वमविकारित्वं निर्गुणत्वं च सिद्धमिति सूचितं भवति ॥ १९ ॥

विकाराणां गुणानां च प्रकृतिकार्यत्वमेव विशदयन् हेतुफलोत्पादकत्वेन प्रकृतेश्च तत्फलभोक्तृत्वेन पुरुषस्य चोभयोरपि संसारकारणत्वं सूचयितुमाह—

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥

कार्येति । कार्यकारणकर्तृत्वे कार्यं शरीरं कार्यस्य कारणानुमापकत्वादत्र कार्यपदेन महदादयः सप्त विकृतयः शब्दादयश्च तत्कारणानि गृह्यन्ते । करणानि दशेन्द्रियाणि मनश्च बुद्ध्यहंकारचित्तानि च चतुर्दश । करणपदेन वचनादयो दर्शनादयः कामसंकल्पाहंकरणसुखदुःखमोहात्मका बुद्धिप्रत्ययाश्च प्रकृतिसंभवाः सर्वेऽपि गृह्यन्ते । कार्यं च करणानि च तेषां कार्यकरणपदगृहीतानां कर्तृत्वे । कर्तृत्वं जनकत्वं तस्मिन् कार्यकरणकर्तृत्वे हेतुरुपादानकारणं प्रकृतिरेवेति तत्त्वज्ञैरुच्यते । अग्निसान्निध्यादय इवात्मसान्निध्यात्प्राण्यदृष्टानुरूपेण प्रकृतिरेव कार्यकरणात्मना विषयरूपेण सुखादिप्रत्ययरूपेण च हेतुफलात्मना परिणमत इति मुनयो वदन्तीत्यर्थः । कार्यकारणकर्तृत्व इति पाठे तु दशेन्द्रियाणि मनश्च शब्दादयः पञ्च चैते षोडश विकाराः कार्यपदेन गृह्यन्ते । सप्त विकृतयः कारणपदेन गृह्यन्ते । तेषां कार्यकारणानां कर्तृत्वे आरम्भकत्वे मूलप्रकृतिरेव हेतुरुच्यते । यद्वा कार्यकारणानां देहेन्द्रियमनोबुद्ध्यादीनां कर्तृत्वे कर्ता नियोक्ता तद्भावे विषयभोगवासनारूपा कर्मरूपा च प्रकृतिरेव कारणं निरवयवत्वान्नात्मेत्यर्थः । स्वभावस्तु प्रवर्तत इत्युक्तत्वात् । एवं प्रकृतेः संसारकारणत्वमुक्त्वा अविकारिणोऽप्यात्मनः संसारकारणत्वमाह—पुरुष इति । पुरि शयनात्पुरा सदैकरूपेणास्त इति वा स्वाज्ञानात्पुरमुषतीति वा पुरुषः बुद्धिकोशे सर्वसाक्षित्वेन वर्तमानः प्रत्यगात्मा । सुखदुःखानां सुखदुःखादिप्रत्ययानां भोग्यानां भोक्तृत्वे उपलब्धृत्वे हेतुः स्वाभासानुविद्धान्तःकरणद्वारा सुखदुःखादिप्रत्ययानुभूतेः कारणमित्युच्यते । देहेन्द्रियाद्याकारेण विषयाकारेण सुखदुःखादिप्रत्ययाकारेण च प्रकृतेः परिणामे सति स्वाविद्यया कृतानात्माध्यासेनात्मनोऽपि स्वाभासद्वारा तदुपलब्धृत्वे सत्यहंममेति संसारः संभवति । तथा प्रकृतेः परिणामाभावे क्षेत्रज्ञस्योपलब्धृत्वाभावे चोक्तलक्षणः संसारो न संभवति । तददिदं जाग्रदादौ सुषुप्तौ च प्रत्यक्षं ततो यावद्देहेन्द्रियविषयसुखादिप्रत्ययसंबन्धः स्यादात्मनस्तावन्न संसारोपरमः सिध्यतीत्यर्थः ॥ २० ॥

१ व्याख्यातुरस्य 'कार्यकरण' इति पाठोऽभीष्टः प्रतीयते ।

ननु प्रकृतिपुरुषयोर्नित्यत्वात् तत्संबन्धोऽप्यात्मनो नित्य एव भवति। तेन संसारोऽपि नित्य एव स्यात्कदा कथं वात्मनः संसारमोक्षः सिध्यतीत्याकाङ्क्षायामात्मनो बुद्ध्यादिसंबन्धो नित्यो न भवति। निरवयवसावयवयोः संयोगसमवायादिसंबन्धासंभवात्। किंत्वाध्यासिकः। सोऽयं स्वाज्ञानैकनिबन्धनः सति विवेकविज्ञाने निवर्तत एवेति बोधयितुमात्मनः प्रकृतिसंबन्धात्संसारं तत्कारणं च विशदयति—

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ २१ ॥

पुरुष इति। पुरुष उक्तलक्षण आत्मा स्वयं कूटस्थासङ्गचिद्रूपोऽपि प्रकृतिस्थः प्रकृतिः कार्यकारणसंघातः स्वाविवेकेनायमेवाहमिति तदात्मना तिष्ठतीति प्रकृतिस्थो नतु स्वस्थः शरीरतादात्म्यमापद्येत्यर्थः। तत एव तद्धर्मतत्कर्मवान्सन् प्रकृतिजान् प्रकृतेर्बुद्ध्यादिस्थूलान्तरूपायाः सकाशाज्जातान् प्रकृतिजान् प्राकृतान् गुणान् देहगुणा बाल्यस्थौल्यादयः, इन्द्रियगुणाः काणत्वखञ्जत्वादयः, प्राणस्य गुणाः क्षुधितत्वादयः, मनोगुणाः समीचीनत्वादयः, बुद्धिगुणाः कर्तृत्वभोक्तृत्वादयस्तानेतान् स्थूलसूक्ष्मकारणदेहधर्मान् सुखदुःखादिप्रत्ययांश्च स्वीयत्वेनानुभुङ्क्ते। मनुष्योऽहं ब्राह्मणो गृही यतिर्मूढः पण्डितः शिष्टो भ्रष्टः कर्ता भोक्ता सुखी दुःखीति ममेदमिति च स्वयं प्रकृत्यात्मको भूत्वा तद्धर्मान् जन्मजराजातिवर्णाश्रमादीन् पुण्यपापादींश्च स्वधर्मत्वेनानुभवतीत्यर्थः। 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इत्यादिश्रुतिप्रसिद्धिद्योतनार्थो हिशब्दः। अयमेव क्षेत्रज्ञस्यात्मनः संसारो यत्स्वयमन्यात्मको भूत्वा अन्यधर्मान् सतोऽप्यसतश्चात्मीयत्वेन मन्यते। नन्वक्रियस्यासङ्गस्यात्मनः प्रकृतितादात्म्यापत्तौ तदीयधर्मकर्मस्वात्मीयत्वानुभूतौ च को हेतुरित्याकाङ्क्षायामाह— **कारणमिति।** अस्य साक्षाद्विद्वद्भिरात्मत्वेनानुभूयमानस्य कूटस्थासङ्गचिद्रूपस्यात्मनः सदसद्योनिजन्मसु सद्योनयो देवऋषिब्राह्मणादिपुण्ययोनयः, असद्योनयो रक्षःपिशाचश्वपाकपश्वादिपापयोनयस्तासु जन्मानि तेषु सदसद्योनिजन्मसु। अहंममेत्यादिसंसारस्य कारणं गुणसङ्गः गुणेषु दृष्टादृष्टेषु भोग्येषु सज्यते पुमान् सक्तो भवत्यनेनेति सङ्गः कामः। कामः खलु पुरुषस्य बन्धः। सत्यामविद्यायां पुमान् कामेनैवोच्चावचानि कर्माणि करोति तत्फलं च सुखदुःखात्मकं नानाजन्मभिः प्राप्नोति। तथाच श्रुतिः 'स यथाकामो भवति' इति 'कामान्यः कामयते मन्यमानः' इति च, यत एवं ततः स्वाविद्यैकमूलः काम एव पुरुषस्य नानायोनिषु जन्मजरामरणादिदुःखानुभूतिकारणमिति सिद्धम्। यद्वा गुणसङ्गः

सज्जते बध्यतेऽनेनेति सङ्गः गुणेषु देहेन्द्रियादिष्वहमित्यहंत्वाभिनिवेशलक्षणः शब्दादिष्विदं भोग्यमिति संयोग्याभिनिवेशरूपोऽप्यध्याससंबन्धः सङ्गः एतमेवाविद्यामाहुः पण्डिताः। अविद्यावत एव हि पुरुषस्य कामः कर्माणि सदसद्योनिषु जन्मादिदुःखकारणं तन्निवृत्तिकारणमात्मयाथात्म्यविज्ञानमेव। तच्च 'न सत्तन्नासदुच्यते' इत्यात्मनः प्रकृतितद्विकारतद्धर्मतत्कर्मसंबन्धलेशशून्यत्वसिद्धये, अतन्निषेधद्वारा सद्भावसिद्धये, 'ज्ञानं ज्ञेयं ज्ञानगम्यम्' इति स्वरूपनिरूपणद्वारा च सम्यक् प्रतिपादितम् ॥२१॥

पुनरपि तदेव परं तत्त्वं मुमुक्षून् सम्यगधिगमयितुमात्मनः प्रकृतितत्कार्यसंबन्धराहित्यं तद्रहितत्वेन शुद्धस्य चिदेकरसस्य ब्रह्माभिन्नत्वं च बोधयति—

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥ २२ ॥

उपद्रष्टेति। अस्मिन् देहे कार्यकरणसंघातलक्षणे योऽस्मत्पदप्रत्ययार्थः पुरुष आत्मा स देहेन्द्रियादिभ्यः परो भिन्न एव भवति। तत्कुतः। यस्मादुपद्रष्टा सर्वस्य द्रष्टा चिदाभासस्तं च तद्व्यापारं च साक्षित्वेनोपरि पश्यतीत्युपद्रष्टा। यद्वा उप समीपे बुद्धेरपि अन्तरतया प्रत्यक्त्वेन स्थितः सन् बुद्धिं तद्व्यापारं च दृश्यजातं च सर्वं साक्षादविक्रियात्मना पश्यतीत्युपद्रष्टा। हेतुगर्भितमिदं विशेषणम्। आत्मा बुद्ध्यादेर्भिन्न उपद्रष्टृत्वात् यज्ञोपद्रष्टृवदिति। नहि यज्ञोपद्रष्टा यजमानादिष्वन्यतमो भवति तदन्यतमत्वे उपद्रष्टृत्वानुपपत्तेः। उपद्रष्टृत्वं नाम व्यापार्यन्यत्वे सत्यव्यापृततया ताटस्थ्येन व्यापारितद्व्यापारदर्शनमात्रैकपरत्वम्। तत उपद्रष्टा द्रष्टव्येभ्यः सर्वेभ्यो यजमानादिभ्यो भिन्न एव भवति यथा तथायमात्माप्युपद्रष्टृत्वाद्बुद्ध्यादिभ्यो भिन्न एव भवति। एतेनात्मनोऽविकारित्वं नित्यत्वमकर्तृत्वमभोक्तृत्वं च सूचितं भवति। किंच अनुमन्ता स्वस्वविषयेषु प्रवृत्तान्निवृत्तांश्च बुद्ध्यादीननु पश्चादेव मनुते बुध्यत इति अनुमन्ता बुद्ध्यादीनां प्रवृत्तिं निवृत्तिं तत्फलं चान्य एव जानातीत्यर्थः। 'उपद्रष्टानुमन्तैष आत्मा' इति श्रुतेः। आत्मा देहादिभ्यः पर एव अनुमन्तृत्वात्तटस्थवदित्यात्मनः प्रकृतिप्राकृतेभ्यो भिन्नत्वसाधकमनुमानं सूचितम्। चकारः समुच्चयार्थः। किंच भर्ता स्वाविद्यया स्वस्मिन्नध्यस्तान् महदादिसर्वविकारान् सत्तास्फूर्तिप्रदानेन बिभर्तीति भर्ता। जलतरङ्गफेनबुद्बुदादीनां मरुरिव स्वस्मिन्नारोपितानां देहादिशब्दादिप्रत्ययानां स्वयमेवार्थो भूत्वा सत्तां स्फूर्तिं च तनोत्यात्मेत्यर्थः। भर्ता

भरणीयेभ्यः पर एवेति भर्तृत्वमप्यात्मनो देहेन्द्रियादिभ्यो भिन्नत्वे पूर्ववद्व्यावर्तकं विशेषणम्। किंच भोक्ता स्वस्मिन्नध्यस्तमव्यक्तादिस्थूलान्तं सर्वं स्वमहसा चैतन्यात्मकेन तिमिरं रविरिव भुङ्क्ते स्वस्मिन्नेव तिरोभावयतीति भोक्ता। भ्रान्तिदशायां नानात्मना स्वयमेव प्रतीतोऽपि सम्यग्बोधदशायां स्वमात्रावशेषो भवतीत्यर्थः। भोक्ता भोज्यात्पर एवेति भोक्तृत्वमप्यात्मनो देहादिभिन्नत्वे पूर्ववद्व्यावर्तकं विशेषणम्। किंच महेश्वरः अव्यक्तादपि स्थूलतमत्वान्महान्। 'महतो महीयान्' इति श्रुतेः। महत्त्वमप्यात्मनो देहादिभिन्नत्वे हेतुः। आत्मा देहादिभ्यो भिन्नः महत्त्वादाकाशवत्। महत्त्वमपरिच्छिन्नत्वम्। नहि परिपूर्णस्य वस्तुनः परिच्छिन्नत्वं देहाद्यन्यतमत्वं च संभवति सर्वप्रमाणविरोधात्। किंच ईश्वरः चुम्बकस्य सन्निधौ अय इव यस्य सन्निधिमात्रेण बुद्ध्यादिसर्वं जडं चेष्टते स आत्मा ईश्वर ईशनशीलः सर्वप्रवृत्तिहेतुः 'ईशानो भूतभव्यस्य' इति श्रुतेः। आत्मा प्रकृतितत्कार्येभ्यो भिन्नः ईश्वरत्वाद्राजवदितीश्वरत्वमप्यात्मन इतरभिन्नत्वे हेतुस्तेन प्रकृतितद्विकारतद्धर्मतत्कर्मतदवस्थालेशराहित्यमात्मनः सिद्धम्। महांश्चासावीश्वरश्च महेश्वरः परिपूर्णः कूटस्थोऽसङ्गश्चिदेकरस आत्मेति विशेषणषट्केन व्यवस्थापितम्। ननु प्रत्यगात्मा परमात्मेति द्वैविध्ये कथमद्वैतसिद्धिरित्याशङ्कायां न। ब्रह्मण एव परिपूर्णस्यारोपिताविद्याकार्यैः परिच्छित्तिभानात्परिच्छिन्नत्वं क्षेत्रज्ञत्वं च कल्पितम्। यथैकस्यैवाकाशस्य कल्पितघटोपाधिना परिच्छिन्नत्वं घटाकाशत्वं च कल्पितं, तद्वद्ब्रह्मणि प्रकृतिः प्राकृतं च सर्वमविद्यया कल्पितं मिथ्यैव भवति नतु सत्यम्। त्रयमप्येतत्सुषुप्तं स्वप्नं मायामात्रं 'चिदेकरसो ह्ययमात्मा' इति, 'विकल्पो नहि वस्तु' इति, 'असत्त्वादन्यस्य' इत्यादिश्रुतिभिरिदं सर्वं मिथ्या मायाकार्यत्वादैन्द्रजालिकवदित्यादियुक्तिभिश्च विचार्यमाणे देहादिद्वैतप्रपञ्चस्य सर्वस्य मायाकार्यत्वेन मिथ्यात्वात् द्वैतकारणत्वानुपपत्तेः ब्रह्मात्मनोर्भेदस्य महाकाशघटाकाशयोरिवोपाधिपरिकल्पितत्वादुपाधेरप्यविद्याकार्यत्वेन मिथ्यात्वाच्च तदसत्त्वे तयोरभेद एव। ततस्त्वद्वितीयत्वं ब्रह्मणो निरङ्कुशमिति बोधयितुं ब्रह्मात्मनोरेकत्वमाह—**परमात्मेति चाप्युक्त इति**। योऽस्मिन्देहे पुरुषोऽस्मत्प्रत्ययार्थो बुद्धितद्वृत्तिसाक्षिलक्षणो यस्मिन् प्रकृतिसान्निध्यात्कर्तृत्वभोक्तृत्वादिसंसारः कल्पितः उपद्रष्टृत्वादिलक्षणैर्विचार्यमाणे यः प्रकृतितद्विकारतद्धर्मतत्कर्मसंबन्धलेशशून्योऽसंसारी नित्यकूटस्थासङ्गचिद्रूपः 'स आत्मा परमात्मा ब्रह्मैव' इति सर्वश्रुभिरुक्तः 'तदेतदात्मानमोमित्य-

पश्यन्तः पश्यत तदेतत्सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवात्र ह्येव न विचिकित्स्यम्' इति, 'स आत्मा तत्त्वमसि श्वेतकेतो' इति, 'अयमात्मा ब्रह्म' इति चेत्यादिभिर्ब्रह्मात्मनोरभेद एव सम्यक् प्रतिपादित इत्यर्थः। ततः क्षेत्रज्ञस्य ब्रह्मभावः स्वाभाविक एव न तु कल्पितः। यतः सर्वज्ञया सत्यवादिन्या प्रमाणशिरोमण्या श्रुत्या तदेतत्सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवेति तयोरेकत्वमुच्यते। तथैवेश्वरेणापि 'क्षेत्रज्ञं चापि मां विद्धि' इति 'देहेऽस्मिन्पुरुषः परः' इति च। ततो ब्रह्मात्मनोरेकत्वे द्वैतहेतोरन्यस्याभावात् ब्रह्मणोऽद्वितीयत्वं च निर्विचिकित्सं सिद्धम् ॥ २२ ॥

एवं प्रकृतिपुरुषयोर्विभागं पुरुषस्य प्रकृतिसंबन्धराहित्यं ब्रह्माभिन्नत्वं च प्रतिपाद्य एवंलक्षणमात्मानं यो विजानाति स विदेहकैवल्यं प्राप्नोतीत्याह—

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २३ ॥

य एवमिति। जन्मानेकसहस्रसमाराधितपरमेश्वरप्रसादसंपन्नः शुद्धात्मा यो मुमुक्षुरधिकारी ब्राह्मणः स्वयं सदसद्विवेकतीव्रवैराग्यशमदमसंन्यासाद्यन्तरङ्गसाधनसंपत्तिविशिष्टो भूत्वा ब्रह्मविद्गुरुसन्निधौ समनुष्ठितश्रवणादिजन्यज्ञानेनैवमुक्तप्रकारेण प्रकृतिमधिष्ठानाज्ञानतः कार्यकरणकर्तृकर्मफलरूपेण विजृम्भितामनाद्यनिर्वाच्यां सर्वानर्थमूलभूतामविद्यां गुणैर्महदादिस्थूलान्तैर्गुणकार्यैर्भोक्तृभोग्यात्मना स्थितैः सह मरोर्दर्शनेन जलप्रवाहमिवाधिष्ठानसंदर्शनेन मिथ्याभूतां वेत्ति। तथा पुरुषं क्षेत्रज्ञं च चिदाभासकर्तृककर्तृत्वभोक्तृत्वादिधर्माध्यारोपाधिष्ठानभूतं विद्यया सम्यक् निरस्ताशेषविशेषं सर्वोपाधिविनिर्मुक्तमुपद्रष्टृत्वादिलक्षणलक्षितमाद्यन्तरहितमाकाशवदत्यन्तविशुद्धमानन्दघनं चिदेकरसमात्मानं परं ब्रह्म वेत्ति, अयमेवाहमस्मि नतु कर्ता भोक्ता संसारीत्येतन्निरसनपूर्वकं प्रत्यगभिन्नं परं ब्रह्म प्रत्यग्दृष्ट्या स्वात्मना यो विजानाति स ब्रह्मविद्यतिः सर्वथा सर्वप्रकारेण वर्तमानोऽपि। यद्यपि सर्वात्मदर्शिनो विदुषः शुद्धात्मनः स्वव्यतिरेकेणान्यस्य ग्राह्यादेरभावात्प्रवृत्तिरेव न संभवति। भेददर्शिनो रागादिमतः खलु प्रवृत्तिर्न तु विशुद्धवृत्त्या सर्वं ब्रह्मैव पश्यतः संभवति, तथापि दुष्टादुष्टप्रारब्धवशाद्देहे तदनुरूपेण प्रवृत्ते सति परदृष्ट्या विविधं प्रवृत्तवद्भाति, तथापि स्वदृष्ट्या स्वयमप्रवृत्त एव सन्निष्क्रियत्वान्नित्यमुक्तत्वान्निर्लेपत्वान्निर्मूलिताशेषकर्मत्वाच्च प्रारब्धक्षयात्पतितेऽस्मिन् देहे भूयः पुनर्नाभिजायते नोत्पद्यते। पुनरुत्पत्तेः कारणभूतानामवि-

द्याकामादीनां सम्यग् ज्ञानाग्निनिर्दग्धत्वेन कारणाभावात्केवलभावं प्राप्नोतीत्यर्थः । किमु वक्तव्यं सद्वृत्तो नाभिजायत इत्यपेरर्थः । प्रकृति-पुरुषयोः स्वरूपं क्षीरनीरवत्सम्यक् विविच्य विज्ञाय प्रकृतिं च गुणैः सह विद्यया प्रविलाप्य ब्रह्मैवाहमित्यविक्रियब्रह्मात्मना तिष्ठतो यतेः सर्वथा वर्तनं यथेष्टाचरणं न संभवति । अनात्मन्यहंममाभिमानाभा-वात् । सत्येवानात्मनि देहेन्द्रियादावहंममाभिनिवेशे इदं कर्तव्यमिदं भोक्तव्यमिति इच्छावेगे च पुंसः कर्मणि दुष्टेऽदुष्टे च प्रवृत्तिर्दृश्यते नासति । ततस्तद्विहीनस्य सर्वं ब्रह्मैव पश्यतो ब्रह्मविदः सत्यसति च प्रवृत्तिर्नोपयुज्यते । एवं सर्वत्र ब्रह्मदर्शनप्रपञ्चदर्शनयोः परस्परविरुद्ध-त्वात् । तर्हि 'सर्वथा वर्तमानोऽपि' इति वचनस्य व्याहतिः स्यादिति चेदु-च्यते । ब्रह्मविदोऽपि ब्रह्मात्मना तिष्ठतो देहप्रारब्धवशात् क्वचिदाहारादौ नियमोल्लङ्घनं प्रसज्यते । तेनैतस्य ज्ञानं तत्फलं च प्रतिहन्यत इति मूढानां प्रतिपत्तिस्तां वारयतीदं वचनं भागवतं 'सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते' इति । अतो नैतस्य व्याघात इति ॥ २३ ॥

एवं 'ज्ञेयं यत्तत्प्रवक्ष्यामि' इत्यादिना निरूपितस्य ब्रह्मणः स्वरूपं विज्ञाय प्रकृतिं च विलाप्य सर्वमिदमहं च ब्रह्मैवेति सर्वं ब्रह्मैव पश्यतो यतेस्तद्वि-ज्ञानस्य फलं विदेहकैवल्यं प्रतिपाद्याऽधुना मुमुक्षूणामेवोत्तममध्यमाधमा-धिकारिणां निर्विशेषब्रह्मप्राप्तये तत्तदधिकारानुरूपाणि साधनान्याह—

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ २४ ॥

ध्यानेनेति द्वाभ्याम् । केचिदुत्तमाधिकारिणो यतयः 'वि-विक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरःशरीरः' इत्यादिना । 'एकान्ते सुखमास्यतां परतरे चेतः समाधीयताम्' इत्युक्तरीत्या तीव्रमोक्षे-च्छावैराग्याभ्यां,सर्वेभ्यो विषयेभ्य इन्द्रियाण्युपसंहृत्य मनसः प्रत्यगात्मन्ये-काग्रतामापाद्य, ध्यानेन श्रवणादिसंस्कारजन्यज्ञानसाध्येन ध्यानेन विजा-तीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहीकरणलक्षणेनात्मनि बुद्धावेव स-र्वदृश्यप्रकाशकतया स्थितं निर्विशेषं निराकारमाकाशवत्परिपूर्णं चिदेकरस-मात्मानं परमात्मानं स्वात्मना स्वस्वरूपत्वेन पश्यन्ति भेदवासनानिवृत्तये श्रवणादिना ज्ञातं ब्रह्मैवाहमहमेव ब्रह्मेत्यात्मानं सर्वदा ब्रह्मैव भावयन्ती-त्यर्थः । यद्वा 'सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति माया-कार्यस्य सर्वस्य सदास्पदत्वश्रवणात् भ्रान्त्या कल्पितं सर्वमव्यक्तादि-स्थूलान्तमात्मनि परमात्मनि सर्वाधिष्ठाने प्रातिलोम्येन प्रविलाप्य तेन

प्रत्यस्तमिताशेषविशेषं सद्धनं चिद्धनमानन्दघनमात्मानं परमात्मानं परं ब्रह्म, ध्यानेन ब्रह्माकाराकारितान्तःकरणवृत्त्या तैलधारावदविच्छिन्नया वृत्त्यन्तरनिर्मुक्तया ब्रह्मैवाहमित्यात्मना स्वस्वरूपत्वेन पश्यन्ति । स्वमेव ब्रह्म सर्वदा भावयन्तीत्यर्थः । अन्ये मध्यमाधिकारिणो निरुक्तध्यानयोगाक्षमाः यतयः सांख्येन, सांख्यं नाम बुद्धेः सर्वास्वप्यवस्थास्वहं नित्यकूटस्थासङ्गचिद्रूप एवास्मि, न कदापि चले न कुर्वे न भुञ्ज इति स्वस्य चैतन्याकारमात्रस्य प्रत्यग्वृत्त्या सर्वदा प्रकृतितद्गुणतद्विकारतद्धर्मतत्कर्मतदवस्थासंबन्धराहित्यदर्शनमेव, संसारमोक्षस्योपायत्वेन सांख्यमेव योगस्तेन सांख्येन योगेनात्मनि बुद्धावात्मानं पश्यन्ति । स्वमकर्तारमभोक्तारं निष्क्रियमेव सर्वदा भावयन्तीत्यर्थः । अपरे च ध्यानसांख्ययोगयोः सदसद्विवेकवैराग्यसंन्यासैकसाधनयोरनधिकारिणो गृहिणोऽपि कर्मयोगेन 'मत्कर्मकृन्मत्परमः' इत्युक्तरीत्या परमेश्वरार्थं सकलकर्मानुष्ठानं कर्मयोगः मोक्षोपायत्वात्कर्मैव योगः कर्मयोगस्तेन चित्तशुद्धिसंपादनकारणेनाराधयन्तः सन्तः आत्मानं परमात्मानं विश्वरूपमात्मनि बुद्धौ पश्यन्ति, वासुदेवः सर्वमिति बुद्ध्या सर्वं विष्णुं भावयन्ति । यद्वा परमेश्वरार्पणबुद्ध्या श्रद्धाभक्तिभ्यां समनुष्ठितेन कर्मयोगेन चित्तशुद्धिं प्राप्य तत्संपादितश्रवणादिजन्यज्ञानेनात्मनि बुद्धावात्मानमात्मना पश्यन्ति क्रमेणेत्यर्थः ॥ २४ ॥

इत्थं ध्यानसांख्ययोगयोः कर्मयोगे चाप्यधिकारिणां यतीनां गृहस्थानां च ब्राह्मणादीनां यथाधिकारं मोक्षसाधनमुपदिश्य, परमदयालुतया श्रीभगवान् कर्मस्वप्यनधिकारिणां मुक्तिसाधनमाह—

अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥

अन्ये त्विति । कर्माधिकारिभ्यस्त्रैवर्णिकेभ्यो ब्राह्मणादिभ्योऽन्ये तु कर्मस्वनधिकारिणः केवलपामराः स्त्रीशूद्रादयः किंचिदप्येवमुक्तेषु साधनेष्वेकमपि साधनमजानन्तः शास्त्राध्ययनतदर्थज्ञानयोग्यताभावादुक्तसाधनान्यतरं यथावत् ज्ञातुं कर्तुं चासमर्थाः सन्तः स्वयमन्येभ्यो ब्राह्मणादिभ्यो गुरुभ्यस्त्वमिदमेवं कुरु इदमेवमनुसंधेहीति श्रुत्वा श्रद्धया भक्त्या च श्रुतिपरायणाः श्रूयत इति श्रुतिः श्रुतोऽऽर्थस्तत्परायणास्तदेकप्रवणाः सन्त उपासते श्रुतमर्थं सम्यगनुतिष्ठन्ति तेऽपि परोपदेशानुवर्तिनः ईश्वरप्रसादचित्तशुद्धितत्फलसिद्ध्यादिक्रमेण मृत्युं मृत्युदुःखप्रधानं संसारमतितरन्त्यतिक्रामन्ति । क्रमेण मुक्तिं गच्छन्तीत्यर्थः ॥ २५ ॥

'एतद्योनीनि भूतानि' इति यदुक्तं भूतानां संसारस्य क्षेत्रक्षेत्रज्ञलक्षण-प्रकृतिद्वयसंबन्धकारणत्वं तदिदानीं विशदयति—मोक्षैककामैः पण्डितैः प्रकृतिद्वयसंबन्धः प्रयत्नेन परिहर्तव्य इति सूचयितुम्—

यावत्संजायते किंचित्सत्त्वं स्थावरजंगमम्।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ २६ ॥

यावदिति। स्थावरजंगमं स्थावररूपं जंगमरूपं यावद्यावत्परिमाणकं यत्किंचित् यद्यत्सत्त्वं प्राणि संजायते त्रिलोक्यां समुत्पद्यते तत्सर्वं क्षेत्रक्षेत्रज्ञसंयोगात् क्षेत्रक्षेत्रज्ञयोः संयोगात्संबन्धादेव संजायते। यत्किंचिदित्यविशेषग्रहणं देवमनुष्यादिषु सर्वत्रापि जनैः साधारणत्वसूचनार्थम्। क्षेत्रक्षेत्रज्ञयोः प्रकृतिपुरुषयोः संबन्धे सत्येव प्राणिजातं सर्वं समुत्पद्यते। जननादिदुःखमपरिच्छिन्नमनुभुङ्क्ते नान्यथेति विद्धि विजानीहि त्वं भरतर्षभ। प्रकृतिपुरुषयोः संबन्धे सत्येवाविद्यास्मितादयो विजृम्भन्ते जन्मादिदुःखहेतवस्ततः कर्माणि च जन्मबीजानि नासत्यतस्तयोः संबन्धः प्रयत्नेन तत्त्वज्ञैर्मोक्षसुखेच्छुभिर्यतिभिः परिहर्तव्य इत्यर्थः। ननु प्रकृतिपुरुषयोः संबन्धः को यस्मिन् सति पुंसः संसारो यदभावे तदभाव इति चेदुच्यते। न तयोः परस्परावयवसंश्लेषैकनिबन्धनः संयोगः संभवति सावयवनिरवयवयोः संयोगायोगात् निष्कलं निष्क्रियमिति पुरुषस्यात्मनो निरवयवत्वश्रवणात्। ननु निरवयवस्याप्याकाशस्य विभुत्वसिद्धये सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वमिति सर्वमूर्तद्रव्यैः संयोगोऽङ्गीकृत एवेति चेत्तथात्वे त्वाकाशस्य सावयवत्वं वर्षवाय्वग्न्यादिसंयोगात् क्लेदशोषप्लोषाद्यनर्थश्च स्यादनित्यत्वं च सूक्ष्मत्वात्स्थूलैर्न संयुज्यत इति चेन्न। जलादीनां सूक्ष्मावयवैः सूक्ष्मस्यापि संयोगश्चोक्तानर्थश्च स्यात्ततो मूर्तद्रव्यसंयोगित्वकल्पनं भ्रम एव। किंतु निरवयवस्याकाशस्य सर्वमूर्तद्रव्यव्यापकत्वस्यैव तत्संयोगित्वव्यपदेशो न तु साक्षादवयवसंश्लेषित्वस्य निरवयवत्वेनाकाशस्य तदसंभवात्तद्वत् क्षेत्रज्ञस्यापि क्षेत्रेण संयोगो न संभवति। नापि समवायश्च। तयोरयुतसिद्धत्वाभावात्। उभयोरप्यसंभवे संबन्धान्तराभावात्। तर्हि कः संबन्ध इत्यत्रोच्यते। युष्मदस्मत्पदप्रत्ययार्थयोर्विषयविषयिणोरन्योन्यविरुद्धस्वभावयोः प्रकृतिपुरुषयोर्विपरीतगृहीतयोरन्योन्यस्मिन्नन्योन्यधर्माध्यासलक्षणस्तद्विवेकज्ञानाभावैकनिबन्धनः संबन्धः। शुक्तिरजतयोरिव संभवत्यनादिसंस्कारजन्यस्तत्स्वरूपाज्ञानमूलको मिथ्याज्ञानलक्षणः सोऽयमेव पुंसः संसारकारणं तन्निवृत्तिकारणं तयोः स्वरूपविवेचनमेव तदुच्यते। घटतद्द्रष्ट्रोरिव

विषयविषयिणोः प्रकृतिपुरुषयोरन्योन्यविलक्षणयोः स्वरूपं ज्ञेयत्वज्ञातृत्वाभ्यां प्रकाश्यप्रकाशकत्वाभ्यां विकारित्वाविकारित्वाभ्यामनित्यत्वनित्यत्वाभ्यां सावयवत्वनिरवयवत्वाभ्यामनेकत्वैकत्वाभ्यां च परस्परविलक्षणमिदं शरीरं क्षेत्रम् । 'एतद्यो वेत्ति स क्षेत्रज्ञ' इति, 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्' इति, 'ज्योतिषामपि तज्ज्योतिः' इति, 'तमसः परम्' इति, ज्ञानमिति 'हृदि सर्वस्य धिष्ठितम्' इत्युक्तरीत्या क्षेत्रज्ञः क्षेत्राद्भिन्नः ज्ञातृत्वाद्घटज्ञातृवदित्यादियुक्तिभिर्विविच्य तिलतन्दुलवद्विभज्य क्षेत्राद्विभक्तं क्षेत्रज्ञं चिदेकरसमयमहमिति स्वात्मना विज्ञाय ततः प्रकृतिं 'न सत्तन्नासदुच्यते' इत्युक्तरीत्यात्मनि प्रविलाप्य पुनराभासरूपायाः प्रकृतेस्तद्धर्मतत्कर्मणां चाहारादौ संश्लेषो यथा न स्यात्तथा सदात्मनिष्ठायामेव तिष्ठतो ब्रह्मविदः पुनरविद्यास्मितादयो दुःखहेतवस्तत्कार्याणि च कर्माण्यपि जन्मबीजानि न संभवन्ति । विदेहमुक्तिश्च करस्था भवत्यतः क्षेत्रक्षेत्रज्ञयोः संयोगो यथा न स्यात्तथा ब्रह्मविद्भिर्ब्रह्मनिष्ठयैव स्थातव्यमिति सूचयितुं क्षेत्रक्षेत्रज्ञयोः संयोग एव विदामप्यविदां च सर्वेषां जन्मादिदुःखकारणमित्युच्यते जगद्गुरुणा 'यावत्संजायते किंचिदि'त्यादिना । तस्मात्सर्वदा सदात्मना स्थातव्यमिति सिद्धम् ॥ २६ ॥

कृतमपि क्षेत्रक्षेत्रज्ञयोर्विवेचनं पुनरपि तद्विवेकदार्ढ्यार्थं तत्तन्नियतविशेषणैः कुर्वन्नेवं विविक्तमात्मानं यः साक्षाद्विजानाति स यतिरेव जीवन्मुक्त इति सूचयितुमाह—

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ २७ ॥

सममिति । भवन्ति जनिलक्षणं विकारं भजन्तीति भूतानि ब्रह्मादिस्थावरान्तानि । भूतानीत्युक्त्या भूतानामेव भवनं नत्वात्मन इत्यात्मनो नित्यस्य भवनाभावस्तन्निमित्तकास्तित्वाभावश्च सूचितः । तेषु भूतेषु नामरूपजातिक्रियागुणविशेषैः परस्परं विभक्तेषु विषमेषु सर्वेष्वपि प्राणिशरीरेष्वविभक्तं सममेकरूपमुत्कर्षापकर्षवर्जितं समरसं निर्विशेषमित्यर्थः । आत्मन्यारोपितभूतेष्वेव नामरूपजातिगुणादिकृतो विशेषः नत्वधिष्ठाने आत्मनि । निरवयवत्वान्निर्गुणत्वादात्मनः केवलस्योत्कर्षापकर्षानुपपत्तेः । सममित्युक्त्या वृद्ध्यपक्षयलक्षणौ भावविकारावात्मनो न स्त इति सूचितं भवति । किंच तिष्ठन्तं 'क्षरः सर्वाणि भूतानि' इति न्यायेन क्षरस्वभावेषु भूतेषु प्रतिक्षणं विपरिणममाणेषु सत्सु

स्वयं तद्रहिततया सर्वदैकरूपेण वर्तमानं निरवयवत्वादक्षरमाशैशवादापातं तत्तद्देहेन्द्रियादिषु विपरीतेषु सत्स्वहमस्मीत्यात्मसत्तायाः सदैकरूपत्वावगमात्सर्वदैकरूपेण स्थितमित्यर्थः। 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्' इति श्रुतेः। भूतानामेव विपरिणामो नत्वात्मन इत्यात्मनो विपरिणामाभावः सूचितः। किंच अविनश्यन्तं जनिमत्त्वात् भूतेषु नश्यत्सु सत्सु स्वयमविनश्यन्तं चरमविकारवर्जितं नित्यमित्यर्थः। सुषुप्तौ सर्वभूतप्रलये सुखमहमस्वाप्समित्यात्मसद्भावावगमादात्मनित्यत्वे प्रत्यक्षम्। आत्मा नित्यः अजत्वादित्यनुमानम्, 'अविनाशी वा अरेऽयमात्मा' इति श्रुतिश्च प्रमाणम्। ततएव परमेश्वरं देहेन्द्रियप्राणमनोबुद्ध्यव्यक्तेभ्यः परमं नित्यत्वे नातिसूक्ष्मत्वेनान्तरत्वेन व्यापकत्वेन चेतनत्वेन प्रकाशकत्वेनाधिष्ठानत्वेनानन्दत्वेन चोत्कृष्टतममित्यर्थः। 'इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यः' इति श्रुतेः। ईश्वरमीशनशीलं अयसश्चुम्बकवत्स्वसन्निधिमात्रेण प्रकृतेः प्रवृत्तिहेतुत्वमीश्वरत्वमात्मनो नतु राजादिवन्नियन्तृत्वं 'नैव कुर्वन्न कारयन्' इति, 'स्वभावस्तु प्रवर्तते' इत्युक्तत्वात्। एवं समत्वकूटस्थत्वनित्यत्वचेतनत्वादिभिः स्वधर्मैर्विषमत्वसविक्रियत्वविनाशित्वजडत्वादिधर्मवतः क्षेत्राद्विलक्षणत्वेनोपलभ्यमानं निर्विशेषमस्मत्पदप्रत्ययार्थमात्मानं क्षेत्रज्ञं क्षेत्रतद्धर्मतत्कर्मास्पृष्टं यः पश्यति नित्यनिरन्तरश्रवणमननिदिध्याससमाधिभिः क्रमेण समनुष्ठितैः संभावितसम्यग्ज्ञानेन नित्यकूटस्थासङ्गचिद्रूपः प्रत्यगेवास्मि नतु कचित्संसारीति संसारिविलक्षणमात्मानं यः साक्षात्पश्यति स ब्रह्मविद्यतिर्यथाभूतस्वरूपं कर्तृत्वभोक्तृत्वादिसर्वसंसारधर्मवर्जितं सर्वोपाधिविनिर्मुक्तमाकाशवदत्यन्तनिर्मलं परिपूर्णमात्मानं स्वं मुक्तमेव सर्वावस्थासु सर्वदा पश्यति नत्वन्यः श्रवणमात्रेण स्वं कृतार्थं मन्यमान आत्मानं मुक्तं पश्यतीत्यर्थः। एतेन घटमठादिष्वाकाशस्येव ब्रह्मादिस्तम्बान्तशरीरेष्वात्मनो व्यापकत्वं समत्वमसङ्गत्वं नित्यत्वं निष्क्रियत्वं पूर्णत्वं च दृष्ट्वा प्रारब्धानुरूपेण देहेन्द्रियादिषु प्रवृत्तेषु सत्सु निवृत्तेषु वा स्वस्य तदुभयराहित्यमेव यः सर्वदा पश्यति स्वयमविकारात्मना पूर्णवृत्त्या तिष्ठति स एव जीवन्मुक्त इति सूचितं भवति॥ २७॥

ब्रह्मविद्यतिः सर्वत्र परिपूर्णमात्मानमेवैकरूपेण सदा यत्पश्यति तेनैव नैरन्तर्यदर्शनेन मुक्तो भवतीत्याह—

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्॥ २८॥

सममिति। श्रवणमननादिभिः समुत्पन्नविज्ञानेन इदमेवाहमस्मी-

त्यपरोक्षीकृतात्मतत्त्वो यतिः सर्वत्र ब्रह्मादिस्तम्बान्तेषु भूतेषु बहिरन्तश्च सर्वतः समवस्थितं सम्यगुत्कर्षापकर्षराहित्येनैकरीत्या घटमठादिष्वाकाशवन्नैरन्तर्येण व्याप्यावस्थितमत एव सममेकरसं निर्विशेषमीश्वरं रविवत्सर्वप्राणिप्रवृत्तिकारणमात्मानं परिपूर्णं पश्यन् हि यस्मात्कारणादात्मानं स्वमात्मना स्वेनैव न हिनस्ति न निहन्ति । स्वयमेव स्वस्य हननं न करोतीत्यर्थः । आत्मनात्मनो हननं नाम निष्क्रियस्य निःसङ्गस्य निराकारस्य निर्लेपस्य चात्मनः स्वस्य पुनर्देहेन्द्रियादितादात्म्याध्यासेन कर्ताहं भोक्ता सुखी दुःखी शिष्टो भ्रष्टः सुकृती दुष्कृतीत्याद्यतद्धर्मतत्कर्मारोपणं कृत्वा यदप्रतीत्यापादनं तदेव हननं, येनात्महननदोषेण स्वयं कूटस्थासङ्गचिद्रूपोऽपि सदानन्दोऽपि देहीभूय कर्तृत्वभोक्तृत्वादिधर्मवान्सन् जन्ममृत्युदुःखसागरे मज्जति । तदेतदात्महननं विदेहकैवल्यार्थी सम्यग्विदितात्मतत्त्वो यतिर्न करोति किं बाह्यवासनाकृतामसत्प्रवृत्तिमुत्सृज्य सदात्मनिष्ठयैव तिष्ठति । ततः सदात्मज्ञाननिष्ठयैव निरस्तज्ञानतत्कार्यः सन् परां नित्यनिरतिशयानन्दलक्षणां गतिं विदेहमुक्तिं याति प्राप्नोति । 'ब्रह्मसंस्थोऽमृतत्वमेती'ति ब्रह्मनिष्ठस्यैव स्वस्वरूपादप्रमाद्यतो यतेरमृतत्वसिद्धिश्रवणात् सर्वदा स्वरूपनिष्ठायामेव तिष्ठतो यतेर्मुक्तिरिति सिद्धम् । यद्वा सर्वेषु भूतेषु तिष्ठन्तमिति न्यायेन सर्वभूतेषु समवस्थितं सम्यगुत्कर्षापकर्षरहितत्वेन बहिरन्तः सर्वतो व्याप्य स्थितमीश्वरमुक्तलक्षणमात्मानं स्वस्मिन् सर्वत्र सममेकरसं परिपूर्णमेव पश्यन् हि यस्माद्ब्रह्मविद्यतिरात्मानं परिपूर्णं न हिनस्ति ब्राह्मणोऽयं शूद्रः शिष्टोऽयं भ्रष्ट इति । इदं शुद्धमिदमशुद्धमिति भेददर्शनेन पूर्णस्यात्मनस्तिरोभावनमेव हिंसनम् । सम्यग्दर्शी विद्वान् मोक्षेच्छया सदा सर्वत्र समदर्शनममुञ्चानः सन् तदेतन्न करोति, किंतु सर्वमिदमहमेवेति सदा पूर्णमेवात्मानं पश्यति । ततस्तेनैव सर्वत्र ब्रह्मदर्शनेन निर्दग्धभेदगन्धो भूत्वा परां गतिं याति । यस्मात्सर्वत्र परिपूर्णमेवात्मानं सर्वदा पश्यन्नेव विद्वान्मुक्तो भवति । तस्मात् क्वचित्प्रमादेनाप्यनात्मनि तद्धर्मतत्कर्मस्वप्यहंममेत्यध्यासो जन्मादिदुःखहेतुर्विज्ञातात्मतत्त्वैर्यतिभिर्विदेहकैवल्यसुखार्थिभिर्न कर्तव्य इति सूचितं भवति ॥ २८ ॥

ननु सुखदुःखविवेकाविवेकशूरत्वभीरुत्वादिगुणैः स्वकृतकर्मविशेषैरहमहमिति प्रत्ययभेदैश्च प्रतिशरीरमात्मसु भिन्नेषु सत्सु कथं सर्वेषु भूतेष्वात्मानं समं पश्यति यतिरित्याशङ्कायां । न । 'विज्ञानं यज्ञं तनुते, कर्माणि तनुतेऽपि च' इति 'एष द्रष्टा स्प्रष्टा श्रोता कर्ता विज्ञानात्मा

पुरुष' इति च श्रवणाद्विज्ञानात्मन एव कर्मकरणं तत्फलानुभवः विवेकादिगुणाश्च प्रतिशरीरमहमहमित्यभिमानकृतो भेदश्च न त्वात्मनस्तस्यामनस्कत्वान्निरिन्द्रियत्वान्निरवयवत्वाच्च गुणानुपपत्तेः कर्मानुपपत्तेर्भेदानुपपत्तेश्च। ततः सर्वं कर्म प्रकृतिरेव करोति नत्वात्मा तेनास्य सर्वभूतसमत्वं सिध्यतीति बोधयितुमाह—

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।
यः पश्यति तथात्मानमकर्तारं स पश्यति ॥ २९ ॥

प्रकृत्यैवेति। प्रकृतिस्त्रिगुणात्मिका माया देहेन्द्रियप्राणमनोबुद्ध्यादिरूपेण परिणता कार्यकारणकर्तृत्वे हेतुरित्युक्तलक्षणा या तया प्रकृत्यैव। एवकारोऽन्ययोगव्यवच्छेदार्थः। कर्माणि श्रवणदर्शनस्पर्शनवचनादानविसर्गादीनि, सर्वशः सर्वप्रकारैर्विहितानि प्रतिषिद्धानि च सर्वाणि क्रियमाणानि चकारात्तत्फलानुभूतिं च तथैव क्रियमाणानि यः पश्यति श्रुतियुक्त्यनुभूतिभिरात्मानात्मनोः प्रकृतिपुरुषयोः स्वरूपमुक्तरीत्या सम्यग्विविच्यानात्मनः सकाशादात्मनः स्वरूपं मुञ्जादिषीकामिव पृथग्विभक्तं स्वात्मत्वेन साक्षाद्विज्ञाय तदात्मना सदा स्थितवतो ब्रह्मविद्यतेरेव स्वतो विभक्तया प्रकृत्यैव सर्वाणि कर्माणि क्रियमाणान्युपलभ्यन्ते तथैव क्रियमाणा तत्फलानुभूतिरप्युपलभ्यते नान्यस्य। एवमात्मानात्मविवेकज्ञानशक्त्या प्रकृतिकर्तृतामेव सर्वचेष्टां फलानुभूतिं च। तथाशब्दश्चार्थः। तथात्मानमकर्तारं चाभोक्तारं निष्क्रियं नित्यकूटस्थं साक्षाद्यो यतिः पश्यति स एव स्वानुभूत्या प्रत्यग्दृष्ट्या ब्रह्मादिस्तम्बान्तेषु भूतेषु सर्वत्रात्मानमकर्तारमभोक्तारं सर्वोपाधिविनिर्मुक्तं सममेकरसमेव पश्यति तेन परां गतिं च याति नान्य इत्यर्थः। श्लोकत्रयेणापि सर्वभूतस्थमात्मनमिति श्रुतन्यायेन साक्षात्सर्वभूतेष्वात्मानं सममेव पश्यतो यतेर्मुक्तिरिति सूचितं भवति ॥ २९ ॥

ननु 'समं सर्वेषु भूतेषु' इति, 'समं पश्यन् हि सर्वत्र' इति भूतानामात्मनश्चाधाराधेयत्वप्रतिपत्तौ सत्यां द्वैतमेवापतति कथमेवं द्वैतदर्शिनस्ततो याति परां गतिमिति कैवल्यसिद्धिः प्रतिपाद्यत इत्याशङ्कायां न। केदारे कल्पितसेतूनामन्तराले भूमिस्तिष्ठति, सेतवोऽपि भूमावेव तिष्ठन्ति, विचार्यमाणे भूमयः सेवतोऽपि सर्वं मृदेव भवति यथा, तथा कल्पितभूतेष्वात्मा तिष्ठति भूतान्यप्यात्मनि तिष्ठन्ति। श्रुतियुक्तिभिर्विचार्यमाणे सर्वमात्मैव भवत्यत आत्मव्यतिरिक्तवस्त्वभावादात्मैकत्वदर्शनं विदुषः संभवति तेन ब्रह्मसंपत्तिश्चेति बोधयति—

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३० ॥

यदेति । नित्यनिरन्तरसमाधिनिष्ठानिर्मूलितद्वैतप्रत्ययो ब्रह्मविद्यतिर्यदा यस्मिन् काले भूतपृथग्भावं भूतानामाकाशादीनां तत्कार्याणां च सर्वेषां पृथग्भावं भिन्नपदार्थवत्प्रतीतिविषयत्वं पृथक्त्वमेकस्मिन्नेवात्मनि कल्पितं सत्पटे चित्रमिव दारुणि गजमिव प्रतीयमानमपि आत्मसत्ताव्यतिरेकेण पृथक्सत्ताभावादात्ममात्रमेवानुपश्यति श्रुत्याचार्योपदेशजन्यज्ञानानुरूपेणात्मैवेदं सर्वमिति पश्यति । प्रकृतिं तत्कार्यं च सर्वमारोपितमधिष्ठाने आत्मनि स्वस्वरूपे सद्वृत्त्या प्रविलाप्यात्मानमद्वितीयं पश्यतीत्यर्थः । 'यस्माद्यदुत्पद्यते तत्तन्मात्रमेव' इति न्यायेन प्रतीतिदशायामपि प्रपञ्चस्यात्ममात्रत्वं दर्शयितुमाह—**तत एवेति ।** 'तस्मात्तत्सर्वमभवत्' इति श्रवणात्तत एव तस्मादात्मनः सकाशादेव विस्तारं द्वैतप्रपञ्चस्य विस्फुरणं च पश्यति । मृदः सकाशादुत्पन्नघटादेर्मृण्मात्रत्वं प्रत्यक्षेण दृष्टं तद्वदात्मनः सकाशादुत्पन्नभूतविस्तारस्य प्रतीतिदशायामप्यात्मसत्ताव्यतिरेकेण स्वतःसत्ताभावादात्ममात्रत्वं पश्यति । अहमेवेदं सर्वमिति सर्वं स्वमेव पश्यति यदा तदैव सूर्यागमतमोपगमयोरिव ब्रह्मवेदनतत्फलयोरन्तरालाभावाद्यस्मिन् क्षणे सर्वमात्मानं पश्यति तत्क्षण एव ब्रह्मवित्तमो यतिर्ब्रह्म संपद्यते ब्रह्मभावं गच्छति । स्वस्योपाधिकृतपरिच्छेदराहित्येन पूर्णात्मना स्थितिरेव ब्रह्मभावस्तं प्राप्नोतीत्यर्थः ॥ ३० ॥

ननु 'समं सर्वेषु भूतेषु तिष्ठन्तम्' इति भूतेष्वात्मनो व्याप्य स्थितत्वे सति 'आश्रयनाशादाश्रितस्यापि नाशः' इति न्यायेन स्वाश्रयभूतेषु भूतेषु नश्यत्सु सत्स्वाश्रयिणोऽप्यात्मनो नाशप्रसङ्गात् दारुणि नष्टे दहनस्यापि नाशो दृष्टस्तद्वदुपाधिनाशादुपहितस्यापि नाशः स्यात् । अश्वगत्या तदधिष्ठितसारथेरपि गमनदर्शनात् प्रकृत्या कर्मसु क्रियमाणेषु सत्सु तास्थस्याप्यात्मनः कर्मकरणं तत्फलानुभूतिश्च स्यात्कथमात्मनोऽकर्तृत्वं नित्यत्वं चेति सिंहावलोकनन्यायेनातीतश्लोकद्वयार्थमाशङ्क्यात्मनोऽजत्वान्निर्गुणत्वाच्च भूतानां नाशे सत्यपि न विनाशोऽस्ति कूटस्थत्वादात्मनो विक्रियासंभवात्कर्तृत्वादिरपि न संभवतीत्याह—

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ ३१ ॥

अनादित्वादिति । न विद्यते आदिः उत्पत्तिकारणं निमित्तमुपा-

दानं वास्येत्यनादिरयमात्मा 'न तस्य कश्चिज्जनिता न चाधिपः' इति जनयित्रभावश्रवणान्निष्कारणकः। यद्वा न विद्यते आदिरादिमविकारो जनिलक्षणो भावधर्मो यस्य सोऽनादिर्निरवयवत्वादजः 'अजो नित्यः' इति श्रुतेः। अनादेर्भावोऽनादित्वं तस्माद्यत्सावयवं तदादिमत् यदादिमत्तद्विकारि यद्विकारि तद्व्येति भूतजातं तस्मिन् स्वोपाधौ भूतजाते नष्टे सत्ययमात्मा निरवयवत्वेनानादित्वान्न व्येतीत्यव्ययः। सति कारणे 'कारणनाशात्कार्यस्यापि नाशः' इति न्यायेन भूतानामिवात्मनोऽपि नाशः प्रसज्ज्येत तदभावादाश्रयनाशे सत्याकाशवन्न व्येतीत्यव्ययो नाशरहित इत्यर्थः। 'अविनाशी वा अरेऽयमात्मा' इत्यात्मन उपाधिनाशेऽपि नाशाभावश्रवणात् निर्गुणत्वाच्च गुणाः सत्त्वादयः शब्दादयो ग्रापीच्छादयस्तेभ्यो निर्गतो यः स निर्गुणः। यद्वा गुणा गुणकार्यभूताः वाणादयः षोडशकलाशब्दवाच्यास्तेभ्यो निर्गतत्वान्निर्गुणो निरवयव इत्यर्थः। निर्गुणस्य भावो निर्गुणत्वं तस्माद्यः सगुणः सगुणव्ययाद्व्येति भूतगणः। अयं तु निर्गुणत्वान्न व्येत्यात्मा सति गुणव्यये कारणव्यये च वीयात्तदभावान्न व्येतीत्यव्ययो नित्य इत्यर्थः। 'नित्यो नित्यानाम्' इति श्रुतेः। नन्वात्मनोऽनादित्वेन निर्गुणत्वेन च कारणगुणनाशद्वारकनाशासंभवेऽपि घटादिवत्परतो वा वायुवत्स्वतो वा नाशः स्यादित्याशङ्कायामाह—**परमात्मेति**। परमश्चासावात्मेतीदं हेतुगर्भितं विशेषणद्वयम्। आत्मा खड्गाग्न्यादिभ्यो न नश्यति परमत्वात् यन्नैवं तन्नैवं यथा देह इति। परमत्वव्यक्तादपि निरवयवत्वेनातिसूक्ष्मत्वं निरतिशयमहत्त्वं च तस्मान्नाशयितुरविषय इत्यर्थः। आत्मत्वात्स्वतो नाशरहितः आत्मत्वं प्रत्यक्त्वमहंप्रत्ययार्थता सर्वावस्थासु सर्वदा सर्वैरहमस्मीत्यात्मसत्ताया अनुभूयमानत्वात्। बुद्ध्यादिषु स्थूलान्तेषु प्रतिक्षणं विपरीतभावं गतेषु सत्स्वपि यस्मादेवं तस्मान्निरवयवो निराकारो नित्यो निष्क्रियः परिपूर्णश्चायमात्मा शरीरस्थोऽपि, यद्यप्यात्मनः स्वे महिम्नि तिष्ठतः परममहतोऽधिकरणं नास्ति तथापि शरीरेष्वेवात्मोपलब्धेर्दर्शनाच्छरीरस्थ इत्युच्यते। ब्रह्मादिस्तम्बपर्यन्तशरीरेषु घटादिष्वाकाशवद्वर्तमानोऽप्यात्मा स्वयं तेषु प्रवृत्तेष्वपि पुण्यापुण्यलक्षणं कर्म यत्किंचिन्न करोति किंतु शरीरेषु बुद्धितद्वृत्तिसाक्षित्वेन तूष्णीं तिष्ठति। वायुना चलत्सु वृक्षेषु तत्स्थ आकाश इव न किंचिच्चेष्टते। निरवयवस्य परिपूर्णस्य चलनासंभवादित्यर्थः। 'वृक्ष इव स्तब्धो दिवि तिष्ठति' इति श्रुतेः। ननु कूटस्थस्यात्मनः स्वतः कर्मकरणाभावेऽपि देहे तिष्ठतस्तत्संयोगाद्देहेन्द्रियादिभिः

क्रियमाणैः कर्मभिर्लेपः स्यात् 'तत्संयोगी च पञ्चमः' इति पापकर्त्रा सह स्थितिमात्रेणाकर्तुरपि पापलेपप्राप्तिः स्मर्यते तन्न्यायेनात्रापि स्यादित्याशङ्कायां । न । तत्संयोगीति सङ्गित्वस्य पापलेपापत्तिहेतोस्तत्र श्रूयमाणत्वात्तत्संगिनः पापलेपः संभवेत् नत्वसंयोगिनो दूरवर्तिनः तथात्रापि निरवयवत्वेनातिसूक्ष्मत्वादात्मनो देहेन्द्रियादिभिस्तत्कृतकर्मभिश्च संयोगासंभवात् न तत्कृतकर्मलेप इत्याह—**न लिप्यत इति** । देहेन्द्रियतद्विकारतदवस्थातद्व्याप्रृतिसाक्षित्वेनाविक्रियात्मना स्थित आत्मा स्वयमसङ्गत्वान्न तत्कृतकर्मभिर्लिप्यत इत्यर्थः ॥ ३१ ॥

सर्वथाप्युपाधिः स्वप्रारब्धानुसारेण वर्ततां तत्रस्थोऽप्यात्मा तदीयधर्मकर्मावस्थाभिः किंचिदपि क्वचिन्न स्पृश्यत एवेति दृढनिश्चयवद्भिर्ब्रह्मविद्भिरात्मन्येवात्मभावापन्नैः स्वेषां कर्तृत्वभोक्तृत्वादिभ्रममुत्सृज्य मौनेन सदात्मानन्दरसास्वाद एव क्रियतामिति सूचयितुं श्रीभगवानुक्तमप्यात्मन उपाधिकृतकर्मलेपाभावमेव पुनरपि सदृष्टान्तं प्रतिपादयति मन्दप्रज्ञानामपि कर्तृत्वभोक्तृत्वभ्रमविच्छित्तये—

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ३२ ॥

यथेति । सर्वगतं आकाशस्य निरवयवत्वेन गमनासंभवात्सर्वं येन गतं व्याप्तं तत्सर्वगतं सर्वेष्वपि घटमठादिषु मूर्तद्रव्येषु दुष्टेष्वदुष्टेषु च सर्वत्र बहिरन्तश्च व्याप्य वर्तमानमप्याकाशं सौक्ष्म्यात् स्वव्याप्तद्रव्यापेक्षया स्वयमतिसूक्ष्मत्वात्तत्तद्द्रव्यगुणदोषैः सुगन्धादिभिश्च वर्षवातातपवह्निधूमरजःपङ्कादिभिरपि यथा नोपलिप्यते लेप्यलेपकलेपनक्रियाऽविषयत्वात् येन केनापि लिप्तं न भवति । न स्पृश्यत इत्यर्थः । तथा सर्वत्र सर्वेषु देहेषु । जातावेकवचनम् । देवमनुष्यतिर्यगाद्युच्चावचशरीरेषु सर्वतो बहिरन्तर्व्याप्य वर्तमानोऽप्यात्मा सौक्ष्म्यात् 'सूक्ष्माच्च तत्सूक्ष्मतरं विभाति' इति श्रवणात् अव्यक्तमहदादेरपि परमसूक्ष्मत्वाद्देहेन्द्रियप्राणमनोबुद्ध्यादिभिरधुना पूर्वं शतकोटिजन्मभिश्च कृतैः कर्मभिः पुण्यपापैर्नोपलिप्यते । न किंचित्स्पृश्यत इत्यर्थः । एतेन सम्यग्दर्शनविध्वस्ताविद्यातत्कार्याणां ब्रह्मविदां यतीनां क्वचिदाहारादिनिमित्तकेन कर्मणा येन केनापि च लेपो नास्ति । अतः कैवल्यसिद्धिप्रतिबन्धकद्वैतवासनानिःशेषनिवृत्तये स्वानन्दानुभूतये च 'समं पश्यन् हि सर्वत्रे'त्युक्तरीत्या सर्वदा समदर्शननिष्ठयैव स्थातव्यमिति सूचितं भवति । ननु यथेष्टाचरणं निरुक्त-

वचनविरोधापत्तेः संन्यासश्रवणादिश्रमफलाभावापत्तेश्च। अतः सदा पूर्णवृत्त्या स्थातव्यमिति सिद्धम् ॥ ३२ ॥

श्रुतियुक्त्यनुभूतिभिरात्मनः प्रकृतिवैलक्षण्यं ज्ञात्वा प्रकृतिमात्मनि प्रविलाप्यात्मनः साम्यमेव सर्वदा पश्यतो यतेर्विदेहमुक्तिरिति निश्चित्य प्रकरणमुपसंहर्तुकामः श्रीभगवान् मुक्तेरात्मनः प्रकृतिवैलक्षण्यज्ञानमेवादिकारणमिति मन्दप्रज्ञानामुक्तज्ञाने निर्विचिकित्सत्वाय पुनरपि 'एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञः' इत्युक्तलक्षणस्यात्मनः क्षेत्रज्ञस्य क्षेत्रवैलक्षण्यं रविदृष्टान्तेन विस्पष्टयति—

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३३ ॥

यथेति। एक एव रविस्तेजोघनः इमं भूर्भुवरादिभेदभिन्नं कृत्स्नं लोकं ब्रह्माण्डं सर्वतो व्याप्य स्वतेजसा यथा प्रकाशयति सर्वेषां पदार्थानां स्वत एव सत्तां स्फूर्तिं च प्रयच्छति, सूर्येणैव हि जडानां घटादिसर्वपदार्थानां घटोऽस्त्ययमिति सत्ता च स्फूर्तिश्च संभाव्यते, ततः कृत्स्नं नामरूपविशेषैरनेकधा भिन्नं ब्रह्माण्डं स्वयमभिन्नस्वभाव एक एव सूर्यः स्वभास्यविलक्षणस्तत्संबन्धरहितः सन् यथा प्रकाशयति तथा क्षेत्री क्षेत्रमव्यक्तादिस्थूलपर्यन्तं समष्टिव्यष्टिलक्षणं शरीरमस्यास्ति ज्ञेयत्वेन प्रकाश्यत्वेन च विषयीभूय तिष्ठतीति क्षेत्री क्षेत्रज्ञ आत्मा स्वयमेक एव चिद्घनः। क्षेत्रीत्युक्तिः क्षेत्रतत्स्वामिनोरिव क्षेत्रक्षेत्रज्ञयोरचेतनत्वचेतनत्वज्ञेयत्वज्ञातृत्वभास्यत्वभासकत्वादिधर्मैर्वैलक्षण्यद्योतनार्था। यतः क्षेत्रज्ञस्ततः क्षेत्राद्भिन्न आत्मापि क्षेत्रं महदादिसर्वविकारोपेतं नामरूपजातिक्रियागुणविशेषैरनेकभेदभिन्नं कृत्स्नं तदवस्थातद्धर्मतत्कर्मभिः सह सर्वं प्रकाशयति स्वस्मिन्नध्यस्तानां महदादिस्थूलान्तानां सर्वविकाराणां सत्तां स्फूर्तिं च प्रयच्छतीत्यर्थः। एतेन क्षेत्रज्ञस्यात्मनः क्षेत्रतद्विकारतद्धर्मतत्कर्मतदवस्थाज्ञातृत्वं चेतनत्वं नित्यत्वं सर्वक्षेत्रेष्वेकत्वं बुद्ध्यादिसर्वजडपदार्थप्रकाशकत्वं प्रकाशस्वरूपत्वं स्वप्रकाशत्वं वृद्धिक्षयाद्यविषयत्वमेकरूपत्वं सर्वव्यापकत्वमसङ्गत्वमविक्रियत्वमकर्तृत्वमकारयितृत्वमभोक्तृत्वमभोजयितृत्वं सर्वद्रष्टृत्वं सर्वदृश्यधर्मशून्यत्वं स्वसन्निधिमात्रेण सर्वप्रवृत्तिहेतुत्वं सर्वभास्यगुणदोषास्पृष्टत्वं सर्वसाक्षित्वं स्वसाक्षात्कारेण तमस्तत्कार्यनिवर्तकत्वं च प्रतिपादितं भवति। एतेनोक्तलक्षणैः क्षेत्राद्भिन्नः क्षेत्रज्ञ आत्मा स्वात्मना सूक्ष्मबुद्धिभिर्युक्तिकुशलैर्यतिभिः सम्यगवगन्तुं शक्यत इति सूचितं भवति ॥ ३३ ॥

यावानध्यायार्थस्तावन्तमर्थं संक्षेपेण प्रतिपादयन्नध्यायमुपसंहरति—

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥ ३४ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञनिर्देशयोगो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

क्षेत्रक्षेत्रज्ञयोरिति । क्षेत्रक्षेत्रज्ञयोः 'इदं शरीरं कौन्तेय क्षेत्रं', 'एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञः' इति प्रतिपादितयोः प्रकृतिपुरुषयोरेवं 'महाभूतानि' इति, 'ज्ञेयं यत्तत्' इत्यादिवाक्यैः प्रतिपादितप्रकारेणान्तरं ज्ञेयत्वज्ञातृत्वादिविशेषणैर्वैलक्षण्यं स्वात्मतया तत्र क्षेत्रज्ञं च भूतप्रकृतिमोक्षं च। अत्र भूतशब्देन व्यक्तनामरूपात्मकं सच्छब्दितं जगदुच्यते । प्रकृतिपदेनाव्यक्तमस्पष्टनामरूपमसच्छब्दितं तत्कारणमुच्यते । तयोर्भूतप्रकृत्योर्मोक्षं 'न सत्तन्नासदुच्यते' इत्युक्तप्रकारेणाभावापादनं च ज्ञानचक्षुषा निरुक्तामानित्वादिसाधनसंपत्त्या तीव्रमोक्षेच्छया च सम्यक्कृतश्रवणादिना समुत्पन्नं यत् ज्ञानं क्षेत्रक्षेत्रज्ञयोर्याथार्थ्यग्रहणक्षममतिसूक्ष्मं तदेव चक्षुस्तेन ज्ञानचक्षुषा ये मुमुक्षवो यतयो विदुः प्रकृतितत्कार्यविलापनाधिष्ठानभूतं निर्विशेषं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं सदानन्दैकरसमपूर्वमनपरमनन्तरमबाह्यमद्वितीयं परं ब्रह्माहमेवेदमिति स्वात्मना विदुस्ते परमपुरुषार्थं विदेहकैवल्यं यान्ति । प्राप्नुवन्तीत्यर्थः ॥ ३४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः ।

पूर्वाध्याये मुमुक्षोरात्मानात्मतत्त्वं विज्ञातुमिच्छत इदं शरीरं क्षेत्रमनात्मा, क्षेत्रज्ञ एवात्माहंपदार्थ इति बोधयित्वा, क्षेत्राद्विभक्तस्यात्मनः 'क्षेत्रज्ञं चापि मां विद्धि' इति ब्रह्माभिन्नत्वं प्रतिपाद्य, प्रकृतेरेव कर्तृत्वं भोक्तृत्वं चात्मनः प्रकृतितत्कर्मसाक्षिणस्तद्गुणसंगत एव संसारो नतु वस्तुत इत्युक्तम् । तत्र के गुणास्तेषु पुरुषस्य कथं सङ्गः कथं वा गुणाः पुरुषं बध्नन्ति गुणेभ्यो मोक्षणं च कथं गुणमुक्तस्य च किंलक्षणमित्याकाङ्क्षायां प्रकृतेः प्रवृत्तिसामर्थ्यं तद्गुणविभागं गुणानां स्वरूपं कार्यं च बन्धकत्वं स्वस्वोत्कर्षेण परस्पराभिभावकत्वं तत्फलभेदं च गुणबद्धस्य फलं तन्मुक्तस्यापि फलं च गुणमुक्तस्य लक्षणं गुणातिक्रमणोपायं चैतत्सर्वं 'कारणं गुणसङ्गोऽस्य' इति वाक्यार्थं विस्पष्टीकर्तुं

चतुर्दशाध्याय आरभ्यते । तत्रादौ क्षेत्रक्षेत्रज्ञयोर्भिन्नत्वं क्षेत्रज्ञस्य स्वस्य ब्रह्माभिन्नत्वं च विदितवतो ब्रह्मविद्यतेर्विदेहकैवल्यार्थिनः समुत्पन्नज्ञानरक्षार्थं वक्ष्यमाणज्ञानकार्य एव प्रवृत्तिसिद्धये गुणतत्कार्यज्ञानमेवोत्कृष्टं मुक्तेः परमकारणमिति बोधयितुं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १ ॥

परमिति । 'त्रिभिर्गुणमयैर्भावैः' इति, 'इच्छाद्वेषसमुत्थेन' इति, 'राक्षसीमासुरीं चैव' इति असकृत्पूर्वमुक्तमपि तद्विशेषप्रतिपत्तये भूयः पुनरपि ज्ञानं गुणतत्कार्यज्ञानं ज्ञानानां सांख्ययोगकर्मादिविषयकाणां मध्ये परं श्रेष्ठम् । परत्वे हेतुमाह—**उत्तममिति** । उत्तमस्य परमपुरुषार्थस्य मोक्षस्य कारणत्वादुत्तममिदं ज्ञानं प्रवक्ष्यामि । मद्भक्ताय मुमुक्षवे ते सम्यगुपदेक्ष्यामीत्यर्थः । यद्वा क्षेत्रमनात्मा क्षेत्रज्ञस्त्वात्मा सत्यादिलक्षणं ब्रह्म ब्रह्मैव क्षेत्रज्ञ इत्येवंरूपाणि मोक्षविषयाणि यानि ज्ञानानि तेषां ज्ञानानां मध्ये इदं गुणतत्कार्यज्ञानं परं श्रेष्ठमुत्तमं च भवति । यद्यप्यात्मानात्मनोः पृथक्त्वज्ञानमात्मनो ब्रह्माभिन्नत्वज्ञानं प्रकृतिप्रविलापनज्ञानं च मुक्तेर्नियतमसाधारणमेव कारणं तथाप्यविद्याकामादिदोषवतस्तज्ज्ञानमविद्यादिभिः प्रतिबध्यते स्वफलं च न प्रयच्छति तत्प्रसिद्धं भरतादिषु, इदं गुणतत्कार्यज्ञानं तु ब्रह्मविदं गुणवासनाकृतबहिःप्रवृत्तेर्विमुखीकृत्य येन ज्ञानं तत्फलं च न प्रतिबध्यते तत्रैव सम्यग्दर्शननिष्ठायां प्रतिष्ठाप्य गुणेभ्यो मोचयित्वा विदेहमुक्तिं गमयति । तत इदं ज्ञानमात्मानात्मविवेकादिज्ञानेभ्य उत्तमं भवति यथा रोगज्ञानादौषधज्ञानादनुपानज्ञानात्पथ्यज्ञानाच्चायमपथ्यपदार्थः एतल्लक्षणमौषधस्याप्यारोग्यस्य च प्रतिबन्धकं भवतीति विज्ञानमपथ्याचरणनिवृत्तेरारोग्यासिद्धेश्च कारणमुत्तमं भवति । अपथ्याभावैकबलवत्त्वादौषधस्याप्यारोग्यसिद्धेश्च । तद्वत् ज्ञानतत्फलप्रतिबन्धकानां गुणानां तत्कार्याणां च ज्ञानं पूर्वोक्तज्ञानानामुत्तमं भवति । गुणतत्कार्यसंबन्धाभावैकबलवत्त्वात् ज्ञानस्य च तत्फलसिद्धेश्च । ततो युक्तं गुणतत्कार्यज्ञानस्य ज्ञानानामुत्तमत्वम् । तदेव विस्पष्टयति—**यज्ज्ञात्वेति** । श्रवणादिजन्यज्ञानसंरक्षाहेतुत्वेन गुणातिक्रमणहेतुत्वेन च मुक्तेः परमकारणं यद्गुणतत्कार्यज्ञानं ज्ञात्वा प्राप्य तज्ज्ञानेन यत्कर्तव्यं तत्कृत्वेत्यर्थः । मुनयो ब्रह्मविदः शुकादयो यतयः इतोऽस्मात्प्रकृताद्गुणत्रितयान्मुक्ताः सन्तः परां पुनरावृत्तिरहितत्वेन नित्य-

निरतिशयानन्दरूपत्वेन च सर्वसिद्धिभ्य उत्तमां सिद्धिं विदेहमुक्तिं गताः पूर्णत्वं प्राप्ता इत्यर्थः ॥ १ ॥

यदुक्तं पुनरावृत्तिरहितत्वादिविशेषणैर्विदेहमुक्तेः परत्वं तदेव विस्पष्टयति, मुमुक्षुभिस्तत्सिद्धय एव यत्नः कर्तव्य इति सूचयितुं—

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ २ ॥

इदमिति। इदं वक्तुमुपक्रान्तं ज्ञानं गुणतत्कार्यविषयं मुक्तेः परमकारणमुपाश्रित्य गुणतत्कार्यज्ञानेन यदनुष्ठेयं तदुपाश्रित्य गुणत्रयतत्कार्यज्ञानेन निरन्तरब्रह्मनिष्ठया गुणत्रयातिक्रमणं कृत्वेत्यर्थः। 'सत्यं ज्ञानमनन्तं ब्रह्म' 'अस्थूलमनण्वह्रस्वम्' इत्यादिश्रुतिप्रसिद्धस्य निर्विशेषस्य मम परस्य ब्रह्मणः साधर्म्यं पूर्णत्वं नतु समानजातिरूपादिमत्त्वं निरवयवस्य निर्गुणस्य निर्विशेषस्य ब्रह्मणो जात्यादिधर्मासंभवात्। सजातीयरूपे चतुर्भुजत्वादिधर्मवत्त्वे विदुषोऽपि ब्रह्मणा समानधर्मत्वं वक्तुं शक्यते। अजातमभूतमप्रतिष्ठितमशब्दमस्पर्शमरूपमरसमगन्धमव्ययमिति। अप्राणममुखमश्रोत्रमवागमनोऽतेजस्कमचक्षुष्कमगोत्रमशिरस्कमपाणिपादमिति च सर्वधर्मनिषेधश्रवणाद्ब्रह्मणो दृश्यधर्मानुपपत्तेः। तद्वत्त्वे परिच्छिन्नत्वसावयवत्वानित्यत्वादिदोषप्रसङ्गात्। 'आकाशवत्सर्वगतश्च नित्यः', 'साक्षी चेता केवलो निर्गुणश्च' इत्यादिश्रुतिविरोधप्रसङ्गाच्च। तस्माद्ब्रह्मसाधर्म्यं पूर्णत्वमेव। 'पूर्णमदः पूर्णमिदम्' इति श्रुतेः। मम चाधर्म्यं पूर्णत्वमागताः मद्भावं प्राप्ता मुनयो ब्रह्मविद्यतयः सर्गेऽपि महदादिप्राकृतसृष्टावपि नोपजायन्ते जनिबीजं प्रकृतिमतीत्य चिदेकरसतां प्राप्तत्वात्तेषां प्रकृतिसंबन्धाभावान्महासृष्टावपि नोत्पत्तिरित्यर्थः। तथा प्रलये महाप्रलये हिरण्यगर्भनाशेऽपि न व्यथन्ति न नश्यन्ति। परमसूक्ष्मब्रह्मभावं गतानां तेषां प्रलयक्रियाऽविषयत्वान्न किंचिच्चलनमस्तीत्यर्थः। ननु ब्रह्मभावं प्राप्तानां मुक्तानां ब्रह्मविदामयमप्राप्तप्रतिषेधः क्रियते सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चेति न शङ्कनीयम्। शिवविष्ण्वादिलोकेषु सारूप्यादिमुक्तिं गतानां महासृष्टौ सृष्टिर्महाप्रलये प्रलयश्च संभवति। तद्वद्ब्रह्मभावं गतानामपि जन्मादि स्यादिति पण्डितानामपि संशयस्तन्निवृत्त्यर्थं मुमुक्षूणां निर्विचिकित्सतया विदेहमुक्तौ प्रवृत्त्यर्थं चेदमुच्यते सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चेति। ब्रह्मविद्व्यतिरिक्तानां मुक्तानामपि जन्मादिसंभवे इदमेव वचनं प्रमाणं वीतहव्यजयविजयादयश्च प्रमाणम् ॥ २ ॥

एवं गुणतत्कार्यज्ञानस्य समुत्पन्नज्ञानस्य रक्षाहेतुत्वेन गुणातिक्रमणोपायत्वेन विदेहमुक्तेः कारणत्वं प्रतिपाद्य प्रकृतेस्तद्गुणानां च मच्छक्तिसामर्थ्यादेव स्वकार्यनिर्वाहक्षमत्वं नतु स्वत इति सूचयितुं प्रकृतेः स्वशक्तिसंबन्धवत्त्वं सर्वभूतोत्पादकत्वं च प्रतिपादयति—

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
संभवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥

ममेति । ममेश्वरत्वोपाधिभूता मदात्मिका माया गुणत्रयसाम्यावस्थालक्षणा प्रकृतिर्योनिः सर्वभूतोत्पत्तिकारणं या सा सर्वेभ्यः स्वकार्येभ्यो महत्त्वेन महदिति स्वकार्याणां बृंहकत्वेन वा ब्रह्मण उपाधित्वेन वा ब्रह्मेत्युच्यते । तस्मिन् जगद्बीजे ब्रह्मणि अव्यक्ते साक्षात्परम्परया च कार्यकारणात्मना परिणामसिद्ध्ये तदवच्छिन्नचैतन्यैकलक्षणोऽहमीश्वरस्तदुपहितानन्तशक्तिसंपन्नो गर्भं स्वाभासलक्षणं प्रकृतितद्गुणविकारविजृम्भणकारणं दधामि निदधामि । निक्षिपामीत्यर्थः । ततो मदाभाससंभावितसामर्थ्यादेव मदाभासशक्तिसमन्विताद्वा महतो ब्रह्मणः प्रकृतेः सकाशात्सर्वभूतानां महदादिक्रमेणाकाशादिसकलभूतानां भूतकार्याणां चतुर्विधप्राणिशरीराणां च संभव उत्पत्तिर्भवति । सर्वाणि भूतानि संभवन्तीत्यर्थः ॥ ३ ॥

प्रकृतेः स्वानुग्रहबलेन सर्वजगदुत्पादकत्वं प्रतिपाद्य तस्याः सर्वभूतप्रसवित्रीत्वेन सर्वस्य जगतो जननीत्वं गर्भाधानकारणत्वेन स्वस्य जनकत्वं च सूचयितुमाह—

सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥

सर्वयोनिष्विति । सर्वयोनिषु देवमनुष्यतिर्यगादियोनिषु या मूर्तयः प्राणिदेहाः संभवन्ति समुत्पद्यन्ते तासां मूर्तीनां प्राणिनामित्येतत् महदुक्तलक्षणं ब्रह्म प्रकृतिर्योनिर्जननी भवति । बीजप्रदो गर्भप्रदाताहमीश्वरः पिता भवामीत्यर्थः । एतेन मातुः प्रकृतेः पितुरीश्वरस्य च मम प्रसादादेव मोक्ष इति सूचितम् । 'ज्ञानप्रसादेन विशुद्धसत्त्वः' इति, 'तं ह देवमात्मबुद्धिप्रकाशम्' इति च श्रुतेः । 'बुद्धिप्रसादाच्च शिवप्रसादाद्गुरुप्रसादात्पुरुषस्य मुक्तिः' इति स्मृतेश्च ॥ ४ ॥

प्रकृतेस्तद्गुणानां च स्वानुग्रहबलेनैव कार्यक्षमत्वं प्रतिपाद्य गुणविभागपूर्वकं गुणानां बन्धकत्वमाह—

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ ५ ॥

सत्त्वमिति । मुक्तेः परमसाधनत्वेनोत्कृष्टत्वात्सत्त्वस्य प्रथमोद्देशः सर्वप्रवृत्तेः कारणत्वात्ततो रजसस्ततो निकृष्टत्वात्तमसश्च निर्देशः । सत्त्वमिति रज इति तम इत्येवंनामानो गुणाः प्रकृतिसंभवाः । संभवत्यस्मादिति संभव उपादानम् । प्रकृतिरेव संभवो येषां ते प्रकृतिसंभवाः । सत्त्वादयो रूपादिवद्द्रव्यमात्राश्रया न भवन्ति किंतु कार्यकारणयोरभेदन्यायेन प्रकृत्यात्मकत्वात्सर्वगता भवन्ति, तेन सर्वं गुणमयमेव जगत्तत एव बहिर्विषयरूपेणान्तश्च रागद्वेषलोभादिरूपेण निद्रालस्यप्रमादादिरूपेण च शमदमसत्यदयादाक्षिण्यादिरूपेण च वर्तमानाः सत्त्वादिगुणाः स्वयमव्ययं नाशरहितमपि देहिनम् । आत्मानमात्मविदमित्यर्थः । स्वविकारव्याप्त्या तिरोहितप्रत्यग्भावं देह एवात्मभावापन्नं च कृत्वा देहे निबध्नन्ति । देहतद्धर्मतत्कर्मस्वहंममाभिमानाभिनिवेशं कारयित्वा जन्ममरणादिभिः संयोज्य नाशयन्तीत्यर्थः । ननु 'सर्वेन्द्रियविवर्जितम्' इति, 'असक्तम्' इति, 'प्रकृत्यैव च कर्माणि' इति, 'न करोति न लिप्यते' इति चात्मनः क्षेत्रज्ञस्य क्षेत्रतद्धर्मतत्कर्मरहितत्वमसङ्गत्वमकर्तृत्वमलिप्तत्वं च प्रतिपादितम्, कथं कूटस्थासङ्गचिद्रूपस्य गुणैर्बध्यमानत्वमिति चेदुच्यते—निष्कलस्य निष्क्रियस्यासङ्गस्य चात्मनस्त्वज्ञानदशायां ज्ञानदशायां वाप्यध्यासत एव बन्धो नतु वस्तुतोऽस्ति, तथात्वे मोक्षाभावप्रसङ्गात्ततो निरवयवस्यासङ्गस्याविरोधिनः प्रतीचः सूर्यस्य तमःसंबन्धवदविद्यातत्कार्यसंबन्धः कदापि न संभवति किंतु स्वानुभूतौ प्रमाद्यतो ब्रह्मविद्यतेरनात्माध्यासः सत्त्वादिभिर्बिद्यमानत्वं च संभवति, नित्यनिरन्तरात्मानुभूत्या तमकुर्वत एव विदुषो दृष्टदुःखाभावः सदात्मानन्दरसानुभूतिश्च गुणातिक्रमणं च विदेहमुक्तिश्च सिध्यति । गुणदोषेण तं कृतवतस्तु यतेः संप्राप्तज्ञानसंकोचो विक्षेपश्च जन्मादिबन्धश्च भवति । तस्माद्देहेन्द्रियादिष्वन्यत्र वाहंममाध्यासराहित्यमेव विदुषो जीवन्मुक्तिस्तत्राहंममाध्यास एव बन्धः सत्त्वादिगुणदोषेण तं कृत्वा विद्वानपि बध्यते यथा सत्त्वगुणकृतदयादोषेण दूषितान्तरङ्गः सन्ननात्मन्यात्मभावं कृत्वा विद्वानपि भरतः कुरङ्गे च पोष्यत्वममत्वाध्यासं कृत्वा स्नेहपाशेन बद्धो जन्मादिबन्धं प्राप्तवान् । तस्मात्सत्त्वादिगुणतत्कार्यैरकम्पितेनैव विदुषा विदेहकैवल्यार्थिना सदात्मनिष्ठयैव स्थातव्यमिति बोधयितुमेव चतुर्दशाध्यायारम्भः ॥ ५ ॥

सामान्येनैवं गुणसमष्टिकार्यं दर्शयित्वा प्रत्येकं गुणानां स्वरूपं कार्यं च त्रयोदशभिः प्रतिपादयति—

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ ६ ॥

तत्रेति । तत्र तेषु त्रिगुणेषु सत्त्वं सत्त्वगुणो निर्मलत्वात् मलाभ्यां रजस्तमोभ्यां निर्गतत्वेनातिस्वच्छत्वात्प्रकाशकं प्रत्यग्वस्तुस्वरूपावभासकम् । अनामयं च । सत्त्वस्यामयो नाम विक्षेपो जाड्यं च तत्कारणयो रजस्तमसोरभावादनामयमविक्षिप्तमजडं चैवंलक्षणमपि सत्त्वं स्वोपसृष्टं ब्रह्मविदमपि सुखसङ्गेन शब्दादीष्टविषयेन्द्रियसंपर्कजन्यं यत्सुखं तत्र सङ्गः सक्तिस्तेन बध्नाति । विषयसुखलम्पटं करोतीत्यर्थः । यद्वा शमदमदयाऽहिंसाक्षान्त्यादिसाधनसंपत्त्या ब्रह्मविदं सुखसङ्गेन यदुपास्तिसाध्यं ब्राह्मं वैष्णवं शैवं वा पारलौकिकं सुखं तत्सङ्गेन तत्कामेन बध्नाति । ब्रह्मज्ञानतत्सुखानुभूतिभ्यां च्यावयित्वा बहिर्मुखं करोतीत्यर्थः । किंच ज्ञानसङ्गेन ज्ञानं नानाशास्त्रार्थविचारजन्यं तत्र सङ्गः सज्जतेऽनेनेति सङ्गः कामस्तेन बध्नाति । तर्कमीमांसासांख्ययोगागमतन्त्राणामर्थज्ञानासक्तं ब्रह्मविदं च करोतीत्यर्थः । यद्वा ज्ञायते परमेश्वरोऽनेनेति ज्ञानमीश्वरमहत्त्वप्रतिपादकं शास्त्रं तत्र सङ्गस्तत्प्रतिपाद्यमानपरमेश्वरगुणकथाश्रवणभजनकीर्तनादिष्वासक्तिस्तेन बध्नाति ब्रह्मनिष्ठायाः प्रच्याव्य तत्प्रवणं करोतीत्यर्थः ॥ ६ ॥

एवं निर्मलत्वं प्रकाशकत्वमविक्षिप्तत्वं च सत्त्वस्य स्वरूपं सुखसंयोजनं ज्ञानसंयोजनं च तत्कार्यमपि निरूप्य रजसः स्वरूपं कार्यं चाह—

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ ७ ॥

रज इति । यत्सत्त्वं रज इत्युपक्रान्तं तद्रजो रजोगुणो रागात्मकं स्रगादिविषयेषु रज्यते पुमाननेनेति रागो रक्तिः स एवात्मा स्वरूपं यस्य तद्रागात्मकं रागस्वरूपकं रागैकवेद्यं च । तृष्णासङ्गसमुद्भवं च । अप्राप्तेष्वर्थेष्वाशा तृष्णा, प्राप्तेषु ग्रहणेच्छा सङ्गस्तयोः समुद्भव उत्पत्तिर्यस्मात्तत्तृष्णासङ्गसमुद्भवं देशकालाभ्यां व्यवहिताव्यवहितार्थस्पृहाजनकं च रजो विद्धि । रजोगुणं विजानीहीत्यर्थः । एवंलक्षणो रजोगुणो देहिनमात्मानम् । आत्मविदमिति यावत् । कर्मसङ्गेन कर्माण्यैहिकामुष्मिकार्थैकप्रयोजनानि लौकिकानि वैदिकानि च तेषु सङ्गः सक्तत्वं तत्परत्वं तेन बध्नाति । स्वस्वरूपानुभूतेः प्रतार्य ब्रह्मविदमपि कर्मठं करोतीत्यर्थः ॥ ७ ॥

तमसोऽपि स्वरूपं कार्यं च प्रतिपादयति—

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८ ॥

तम इति। रजःसत्त्वाभ्यां दोषाधिकेन बन्धकत्वेन विशिष्टत्वात्तमसस्तदुत्कृष्टत्वबोधनार्थस्तुशब्दः। तमस्त्वज्ञानजं यत्र ज्ञानं सत्तां न लभते तदज्ञानं नतु ज्ञानाभावः। अभावस्य कार्यकारित्वासंभवात्। तस्माज्जातमज्ञानजम्। यद्यपि 'गुणाः प्रकृतिसंभवाः' इति त्रयाणां गुणानां प्रकृतिजन्यत्वस्य तुल्यत्वं, तथापि तमस्त्वज्ञानस्वभावाव्यभिचारादज्ञानजत्वविशेषणविशिष्टं, तत एव सर्वदेहिनां सर्वेषां ब्रह्मादिस्तम्बान्तानां प्राणिनां स्वोपसृष्टानामविशेषेण मोहनं मोहयति स्वाविर्भूत्या विद्यमानमेव सदसद्विवेकज्ञानं तिरोभावयतीति मोहनं, तमस्त्वज्ञानजं मोहकं स्वरूपतः ज्ञानावरकं च विद्धीत्यर्थः। तमसः संभवं स्वरूपं चोक्त्वा कार्यमाह—**प्रमादेति।** अज्ञानं जडं तदुत्पन्नत्वादेव विवेकविज्ञानावरकं तमः स्वयम्। प्रमादालस्यनिद्राभिः। प्रयत्नेन कर्तव्ये कार्ये विस्मृतिः प्रमादः, कर्तव्येऽपि च कार्ये श्रद्धावैधुर्येणोत्साहाभाव आलस्यं, बुद्धिजाड्याधिक्येन कर्तव्यं परित्यज्य स्वापो निद्रा। निरुक्तैरनर्थैः प्रमादादिभिर्देहिनमात्मानमात्मज्ञमपि तन्निबध्नाति नितरां स्वगुणेन मोहयित्वा ब्रह्मविदमपि स्वनिष्ठाविमुखं करोतीत्यर्थः। बुद्धेर्नैर्मल्येन विषयसुखासक्त्या च सत्त्वाविर्भावं ज्ञात्वा, विषयेषु रागाविर्भूत्या कर्मासक्त्या च रजआविर्भावं ज्ञात्वा, बुद्धिजाड्येन विपरीतप्रत्ययाविर्भूत्या प्रमादनिद्रालस्यादिभिश्च तमआविर्भावं च ज्ञात्वा, ब्रह्मविद्यतिः स्वयं सत्त्वादिगुणविकाराणामवशो भूत्वा, तत्तद्विकारप्रतियोगिगुणावलम्बनेन गुणदोषान् पराभाव्य, सदात्मानुभूतावेव तिष्ठेदिति सूचितं भवति ॥ ८ ॥

ज्ञाननिष्ठापरिपन्थीभूतगुणकार्यनिरूपणं कुर्वता स्वेन उक्तमेव गुणकार्यं परिजिहीर्षोर्ब्रह्मविद्यतेस्तज्ज्ञानदार्ढ्याय पुनरप्याह—

सत्त्वं सुखे संजयति रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥

सत्त्वमिति। पुरुषं सत्त्वं सत्त्वगुणः सुखे वैषयिके संजयति सक्तं करोति। रजः कर्मणि वैदिके चान्यत्र च संजयति लगयति। तमस्तु ज्ञानं स्वरूपज्ञानमावृत्य प्रमादे नियमेन कर्तव्यज्ञाननिष्ठाविस्मरणे संजयति। उतापीत्यर्थः। आलस्यादावपि संजयतीत्यर्थः ॥ ९ ॥

ननु वेणीकरणे केशभागानामिव त्रयाणामपि गुणानां साम्येन प्रवृत्तौ सत्यां समष्ट्या स्वकार्यारम्भकत्वं विना कथं तेषां प्रत्येकं कार्यारम्भः संभवतीत्याकाङ्क्षायां प्राणिकर्मफलानुरूपेण गुणानां ह्रासो वृद्धिश्च भवति नतु साम्येन प्रवृत्तिस्तथात्वे कर्मतत्फलवैचित्र्यासंभवात्ततोऽमीषां गुणप्रधानभावेन प्रवृत्तिरिति बोधयितुमाह—

रजस्तमश्चाभिभूय सत्त्वं भवति भारत।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा॥ १०॥

रज इति। प्राण्यदृष्टेन सुखे साध्ये सति रजः रजोगुणं तमः तमोगुणं चाभिभूय ह्रस्वीकृत्य सत्त्वं स्वयमुत्कृष्टं भवति। गुणद्वयमङ्गीकृत्य स्वयमङ्गीभूय स्वकार्यं करोतीत्यर्थः। कर्मणि साध्ये सति सत्त्वं तमश्चाभिभूयैव रजोगुण उत्कृष्टो भवति। गुणद्वयमङ्गीकृत्य स्वयमङ्गीभूय स्वकार्यं करोतीत्यर्थः। तथा ज्ञानावरणे साध्ये सति रजः सत्त्वं चाभिभूय तमः स्वयमुत्कृष्टं भवति। तद्द्वयमङ्गीकृत्य स्वयमङ्गीभूय स्वकार्यं करोतीत्यर्थः॥ १०॥

ननु सत्त्वादिगुणानां ह्रासो वृद्धिश्च कथं केन लिङ्गेन ज्ञायते, ज्ञाते खलु तदुत्कर्षे तदुपशमाय यतितुं शक्यते नाज्ञात इत्याकाङ्क्षायामाह—

सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत॥ ११॥

सर्वेति। यदा यस्मिन्काले सर्वद्वारेषु सर्वेष्वन्तःकरणप्रवृत्तिद्वारेषु त्वक्चक्षुःश्रोत्रजिह्वाघ्राणेष्वस्मिन्देहे च ज्ञानं ज्ञानप्रसादलक्षणः प्रकाशः स्फुरणमुपजायते विजृम्भते तदा सत्त्वं सत्त्वगुणं विवृद्धं प्रवृद्धमुतापि रजस्तमसोर्ह्रासमपि विद्यात्। अन्तःकरणप्रसादातिशयेन लिङ्गेन सत्त्वस्य वृद्धिं तदन्यह्रासं च जानीयादित्यर्थः॥ ११॥

रजोवृद्धेरेतानि लिङ्गानि जायन्त इत्याह—

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ॥ १२॥

लोभ इति। लोभो विद्यमानवस्तुत्यागासहिष्णुता, प्रवृत्तिः सामान्येन सर्वेन्द्रियचेष्टा, लौकिकानां वैदिकानां च कर्मणामारम्भ उपक्रमः, अशमः कामसंकल्पादिभिरन्तःकरणस्योपशमाभावः, स्पृहा विषयेषु वाञ्छा, रजसि रजोगुणे विवृद्धे सत्येतानि कार्याणि जायन्ते। एतैर्लिङ्गै रजोवृद्धिमन्यह्रासं च जानीयादित्यर्थः॥ १२॥

तमोवृद्धेर्लिङ्गान्याह—

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १३ ॥

अप्रकाश इति । अप्रकाशो बुद्धेः स्फूर्त्यभावः, अप्रवृत्तिरालस्यं, प्रमादः कर्तव्यानवधानता, मोहो मूढता, चकारान्निद्रापारवश्यं चैतान्येव तमःप्रवृद्धेर्लिङ्गानि । एतैस्तमोवृद्धिं तदन्यह्रासं च विजानीयादित्यर्थः १३

गुणानुषङ्गानुरूपेणैव मृतानां पारलौकिकी गतिर्नतु वर्णाश्रमाद्यनुरूपेणेति गुणानामेव मृत्यनन्तरं गतिकारणत्वं बोधयति—

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥ १४ ॥

यदेति । तुशब्दस्तमोरजसोर्व्यावृत्त्यर्थः । यदा यस्मिन्काले सत्त्वे तु सत्त्वगुणे प्रवृद्धे सति देहभृत्प्राणी प्रलयं याति म्रियते तदोत्तमविदां हिरण्यगर्भादय उत्तमास्तान् विदन्त्युपासत इत्युत्तमविदस्तेषां प्राप्यानमलान् मलं जन्मजरादिदुःखमेव तद्रहितान् लोकान् हिरण्यगर्भादिलोकान् प्रतिपद्यते प्राप्नोतीत्यर्थः । ननु 'यत्कर्म कुरुते तदभिसंपद्यते' इति पुण्यापुण्यकर्मानुरूपेण परलोकगतिः श्रूयते, कथं गुणानुगुण्येन गतिरुच्यते श्रुतिविरुद्धेति चेत्सत्यम् । प्राणिनां स्वकर्मानुरूपेणैव शुभाशुभगतिर्न तु वर्णाश्रमाद्यनुरूपेण, नापि पाण्डित्यानुरूपेण संभवति, तथाप्यसुभृतां मृतिकाले जन्मान्तरीयपुण्यापुण्यकर्मवशादेव सत्त्वादिगुणोत्कर्षस्तदनुरूपेणैव ब्रह्मादिलोकप्राप्तिस्ततो न श्रुतिविरोधो न स्मृतिविरोधश्चेति सिद्धम् ॥ १४ ॥

रजसस्तमसश्च उत्कर्षे मृतस्य गतिमाह—

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥

रजसीति । रजसि रजोगुणो प्रवृद्धे सति देहभृत्प्रलयं गत्वा रजःप्रवृद्धिवेगेन पुनः कर्मसङ्गिषु कर्मयोगयुक्तेषु मनुष्येषु जायत इत्यर्थः । तथा तमसि तमोगुणे प्रवृद्धे सति प्रलीनो मृतः प्राणी तमःप्रवृद्धिवेगेन मूढयोनिषु पश्वादिषु जायत इत्यर्थः ॥ १५ ॥

एवं गुणानां स्वरूपं बन्धकत्वं वृद्धिं वृद्धिकार्यं च प्रतिपाद्य सत्त्वादिगुणप्रधानानां कर्मणां फलमाह—

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १६ ॥

कर्मण इति । सुकृतस्य शमदमश्रद्धादिसत्त्वगुणसंपत्त्या चेश्वरार्पणबुद्ध्या च सम्यगनुष्ठितस्य सात्त्विकस्य कर्मणः सात्त्विकं सत्त्वोपबृंहितं निर्मलं मलं दुःखं गुणवैषम्यकृतं ततो निर्गतं निर्मलं ब्राह्मं वैष्णवं वा सुखं फलमाहुर्मुनयो वदन्ति । रजसो राजसस्य रजोगुणप्रधानस्य कामसंकल्पादिपूर्वकं समनुष्ठितस्य कर्मणो दुःखं गमागमसंतापादिदुःखभूयिष्ठं स्वर्गसुखं फलं प्राहुः । तमसः तमोगुणनिष्पन्नस्य विधिनियमश्रद्धाशून्यस्य तामसस्य कर्मणस्त्वज्ञानं भोक्तृभोग्यगुणरसज्ञानशून्यं निद्रामयं सुखं फलं प्राहुरित्यर्थः ॥ १६ ॥

सत्त्वादिगुणानां कार्येण कारणज्ञानाय कार्यान्तरमाह—

सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७ ॥

सत्त्वादिति । सत्त्वात्सत्त्वगुणाविर्भूतेर्ज्ञानं कार्याकार्यविवेकज्ञानं संजायते समुत्पद्यते । रजसो रजोगुणाविर्भूतेर्लोभः पदार्थादितृष्णा संजायते । तमसः तमोगुणाविर्भूतेः प्रमादमोहौ भवतः । अज्ञानं बुद्धिजाड्यमितिकर्तव्यतानभिज्ञत्वं च संजायत इत्यर्थः ॥ १७ ॥

गुणानां ज्ञानादिकार्यमुक्त्वा सत्त्वादिगुणनिष्ठानां गतिमाह—

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ १८ ॥

ऊर्ध्वमिति । सत्त्वस्थाः मोक्षेच्छया सत्त्वगुणोत्पन्ने सदसद्विवेकज्ञाने ज्ञानकार्ये च परमेश्वरोपास्त्यादौ ये तिष्ठन्ति ते सत्त्वस्थाः पुरुषाः ऊर्ध्वं ऊर्ध्वलोकं ब्रह्मविष्ण्वादिस्थानं गच्छन्ति । राजसा रजोगुणनिष्पन्ने ज्ञाने कामसंकल्पादिगुणयुक्ते ज्ञानकार्ये च श्रौतादौ कर्मणि भोगेच्छया ये तिष्ठन्ति ते राजसाः पुरुषाः मध्ये ब्रह्मतिर्यग्लोकयोरन्तराले गमागमाभ्यां देवलोके मनुष्यलोके च तिष्ठन्ति । जघन्यो निकृष्टो यस्तमोगुणस्तद्वृत्तौ तमःप्रधाने ज्ञाने सदसद्विवेकवर्जिते कर्मणि वा ये तिष्ठन्ति ते जघन्यगुणवृत्तिस्थास्तामसाः पुरुषाः कृत्याकृत्यविवेकज्ञानशून्या अधो गच्छन्ति तिर्यग्योनिषु जायन्ते पुनःपुनर्म्रियन्त इत्यर्थः ॥ १८ ॥

'त्रिभिर्गुणमयैर्भावैः' इति, 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' इति, 'कारणं गुणसङ्गोऽस्य' इति च यदुक्तं गुणानां मोहकत्वं दुर्जयत्वं सदसद्योनिषु जन्मकारणत्वं च तस्यैव विस्पष्टत्वाय पुनरपि 'सत्त्वं रजस्तमः' इत्यादिना गुणानामेव सुखज्ञानतृष्णासक्तिकर्मप्रवृत्तिप्रमादालस्यनिद्रादिषु संयोजकत्वेन पुरुषस्याविद्यादिदोषवतो गुणतत्कार्ये-

ष्वहंममेति मिथ्याज्ञानेन तिष्ठतो देवमर्त्यतिर्यग्योनिषु जन्माद्यनर्थकारणत्वं प्रतिपाद्याधुना 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' इत्युक्तरीत्या शास्त्राचार्यप्रसादेन मदनुग्रहेण च सम्यग्विविच्य, विज्ञातात्मानात्मस्वरूपो ब्रह्मविद्यतिर्गुणसङ्गकृतानर्थं विज्ञायानात्मवासनायाः स्वयमवशो भूत्वा प्रत्यग्दृष्टिमसुञ्चानः सन् सर्वास्ववस्थासु सर्वदा गुणानामेव कर्तृत्वं कारयितृत्वं भोक्तृत्वं च स्वस्यासङ्गत्वं गुणतत्कार्यतदवस्थासाक्षित्वं च पश्यन् सदात्मनिष्ठया सकार्यांस्त्रीन् गुणानतीत्य मुक्तो भवतीति प्रतिपादयति—

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥

नान्यमिति द्वाभ्याम्। 'चक्षुषो द्रष्टा श्रोत्रस्य द्रष्टा वाचो द्रष्टा मनसो द्रष्टा बुद्धेर्द्रष्टा प्राणस्य द्रष्टा तमसो द्रष्टा सर्वस्य द्रष्टा' इति, 'साक्षी चेता केवलो निर्गुणश्च' इति, 'अप्राणो ह्यमनाः शुभ्रः' इत्यादिश्रुतिभिः आत्मा देहेन्द्रियमनोबुद्ध्यादिभ्यो भिन्नः द्रष्टृत्वाद्घटद्रष्टृवदित्यादियुक्तिभिश्च देहेन्द्रियादिभ्यो भिन्नत्वेन स्वात्मना च सम्यग्विज्ञातात्मस्वरूपः स्वस्याविक्रियत्वद्रष्टा यतिर्यदा यस्मिन् काले समाधिना ज्ञानपरिपाकदशायां गुणेभ्यो गुणकार्यभूतदेहेन्द्रियादिभ्यस्त्वन्यं व्यतिरिक्तं कर्तारं नानुपश्यति कायिकवाचिकमानसिकानां विहितानां प्रतिषिद्धानां सामान्यानां च सर्वेषामपि कर्मणां कर्तारं देहेन्द्रियातिरिक्तं नानुपश्यति, तत्तत्कर्मनिष्पत्त्युत्तरक्षण एव तत्तत्कर्मकर्तारं देहेन्द्रियादिकमेवावगच्छति चक्षुरेव पश्यति श्रोत्रमेव शृणोति मन एव मनुते बुद्धिरेव विजानाति वागेव वदति नाहमनिन्द्रिय इत्यात्मानमकर्तारमेव पश्यति, गजारूढो गजस्यैव गमनं पश्यति नत्वात्मनो यथा तथा ब्रह्मवित्स्वयं स्वतो भिन्नतया गृह्यमाणदेहेन्द्रियादीनामेव कर्तृत्वं, सत्त्वादिगुणकार्याणामविद्याकामादीनां कारयितृत्वं, विज्ञानात्मन एव तत्फलभोक्तृत्वं च पश्यति नतु स्वस्य, यानारूढो यथा तद्वत्। यदैवं ब्रह्मविद्यतिरात्मानात्मविवेकविज्ञानेन स्वान्यस्यैव देहेन्द्रियादेः कर्तृत्वं भोक्तृत्वं चानुपश्यति तदैव गुणेभ्यो गुणकार्येभ्योऽहंकारादिभ्यश्च परं विलक्षणमकर्तारमभोक्तारमगन्तारममन्तारमबोद्धारमविकारमविक्रियं क्षेत्रतद्धर्मतत्कर्मास्प्रष्टारमात्मानं वेत्ति निष्कलं निष्क्रियं शान्तमाकाशवत्परिपूर्णं पश्यति। एवं देहेन्द्रियादेरेव कर्तृत्वमात्मनश्चाकर्तृत्वं यः स्वयं साक्षात्पश्यति स विद्वान्मद्भावं मम निर्विशेषस्य परस्य ब्रह्मणो भावो

मद्भावः मत्स्वरूपतां परिपूर्णत्वमधिगच्छति । नित्यनिरन्तरसमाध्यासादितसम्यग्ज्ञानेन सर्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य च ब्रह्ममात्रत्वमेव पश्यन् गुणतत्कार्यलक्षणमनर्थव्रातमतीत्य जीवन्नेव ब्रह्मात्मना तिष्ठति । मुक्तो भवतीत्यर्थः ॥ १९ ॥

कर्तृत्वभोक्तृत्वादिधर्मवद्भ्यो देहेन्द्रियादिभ्यो भिन्नमेवात्मानमविक्रियं विदित्वा ब्रह्मविद्यतिरजस्रं स्वानुभूत्या गुणत्रयातिक्रमणं कृत्वैव मुक्तो भवति नान्यथेति बोधयितुमाह—

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥

गुणानिति । मेघाद्भिन्नमादित्यं मेघतत्कार्यैरस्पृष्टं च यथा, तथा देहेन्द्रियादिभ्यो भिन्नं देहतत्कार्यैरस्पृष्टमेवात्मानमकर्तारमभोक्तारं च विदित्वा, देही ब्रह्मविद्यतिरेतान् चित्तप्रसादरागमोहलोभादिभिर्लिङ्गैर्ज्ञायमानान् सुखज्ञानकर्मप्रवृत्तिप्रमादादिष्वेव पुरुषस्य तात्पर्यमापाद्य ज्ञानं तत्फलं च प्रतिबध्नतस्तत एव देहसमुद्भवान् देहस्य समुद्भवो येभ्यस्ते देहसमुद्भवा देहारम्भकाः स्वपरिणामविशेषैर्दयासत्यशौचविनयदानशीलत्वादिभिः सात्त्विकै रागद्वेषलोभासूयादिभी राजसैर्मोहाभिनिवेशाहंकारममकारादिभिस्तामसैश्च विकारैः पुण्यपापाभ्यां च सत्त्वादिगुणा एव देहोत्पत्तिहेतवो भवन्ति । तानेतानुक्तलक्षणान् त्रीन् सत्त्वादिगुणान् गुणकर्मजांश्चाविद्याकामादीनतीत्य प्रत्यग्वृत्त्या सर्वमिदमहं च ब्रह्मैवेति सर्वत्र ब्रह्ममात्रदर्शनाग्निना गुणान् गुणकार्यभूतानहंममेदमित्यादिविपरीतप्रत्ययान् सर्वान् निर्दह्य सत्तामात्रात्मको भूत्वा जन्ममृत्युजरादुःखैर्देहसंबन्धसंभावितैर्विमुक्तः जन्मादिदुःखैरस्पृष्टः सन्नमृतं विदेहकैवल्यमश्नुते नित्याखण्डानन्दैकरसाद्वितीयब्रह्मात्मना तिष्ठतीत्यर्थः ॥ २० ॥

देहव्यतिरिक्तात्मवेत्ता यतिर्जीवन्नेव त्रीन् गुणानतीत्य मुक्तो भवतीति श्रुत्वातिविस्मितः सन् गुणातीतस्य लक्षणान्याचारं च गुणातिक्रमणोपायं च पृष्टा ज्ञातुमर्जुन उवाच—

अर्जुन उवाच ।

कैर्लिङ्गैस्त्रीन् गुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं त्वेतांस्त्रीन् गुणानतिवर्तते ॥ २१ ॥

कैरिति । प्रकृष्टभास्वररूपत्वात्प्रभुश्चिद्घनस्तस्य संबुद्धिः हे प्रभो, एतानुक्तलक्षणान् त्रीन् गुणान् अतीतः समतिक्रम्य ब्रह्मात्मना स्थितो ब्रह्मविद्यतिः कैर्लिङ्गैर्लक्षणैर्ज्ञातो भवति । गुणातीतस्य सिद्धस्य कानि

लक्षणानि यैरयं गुणातीत इति ज्ञातुं शक्यत इत्यर्थः । गुणातीतस्य किमाचारः कीदृग्विध आचारः । किमयं वैदिकमाचरति किं लौकिकमाचरतीति वा उत यथेष्टमाचरतीत्यर्थः । एतान् स्वस्वविकारैः सागरोपमान् त्रीन् सत्त्वादिगुणान् । तुशब्दः साधनस्य दुर्लभत्वद्योतनार्थः । कथं तु केन प्रकारेणातिवर्तते केनोपायेनायं गुणत्रयातिक्रमणं करोतीत्येतत्प्रश्नत्रयं सम्यग्वक्तव्यमित्यर्थः ॥ २१ ॥

तत्र प्रथमप्रश्नस्योत्तरं वक्तुं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ॥ २२ ॥

प्रकाशमिति । गुणानां गुणकार्याणां च स्वयमविषयीभूय तदुभयं च चिद्वृत्त्या समतिक्रम्य ब्रह्मण्येव सदा तदात्मना यस्तिष्ठति स गुणातीतो ब्रह्मविद्यतिः । प्रकाशं च । प्रकाशः सत्त्वविकारः विषयसुखज्ञानयोरासञ्जकश्चित्तेन्द्रियप्रसादः रसास्वादलक्षणः समाधेरन्तरायस्तं प्रकाशं च । प्रवृत्तिं च । प्रवृत्तिः रजःकार्यं रागमूलकं मनसश्चेन्द्रियाणां च बहिःप्रावण्यं विक्षेपलक्षणः समाधेरन्तरायस्तामिन्द्रियाणां विषयप्रवृत्तिं च । मोहमेव च । एवशब्दोऽप्यर्थः । मोहस्तमोविकारः निद्रालस्यप्रमादासञ्जकः लयः कषाय इत्येवंलक्षणः समाधेरन्तरायस्तं मोहमपि च तान्येतानि सत्त्वरजस्तमःकार्याणि संप्रवृत्तानि सम्यक् प्रसक्तानि न द्वेष्टि । प्राप्तेषु प्रकाशादिषु प्रतिकूलत्वबुद्ध्या द्वेषबुद्धिं न करोति, चिदाभासविषयत्वात्तेषां स्वस्य च संबन्धाभावान्न किंचिद्विक्षेपं प्राप्नोति यथा साधको निदिध्यासुः रसास्वादविक्षेपलयकषायरूपाणि प्रकाशादीनि समाधेर्विघ्नभूतानि सत्त्वादिगुणकार्याणि संप्रवृत्तानि द्वेष्टि ममैते समाधिविघ्नाः प्राप्ता इति विक्षिपति, निवृत्तानि काङ्क्षति च तेषां निवृत्त्यै दृश्यनिन्दादिप्रतिक्रियां च करोतीत्यर्थः । न तथायं गुणातीतः संसिद्धप्रकाशादीनि संप्रवृत्तानि द्वेष्टि न निवृत्तानि काङ्क्षति च । तेषां चिद्विलसितत्वेन ब्रह्मदृष्टावन्तर्भूतत्वात् निवृत्तिमपि नापेक्षत इत्यर्थः । सत्यध्यासतोऽप्यनात्मतादात्म्ये रागद्वेषादयः संभवेयुः । नित्यनिरन्तरनिर्विकल्पकसमाध्यग्निनिर्दग्धाहंममाध्यासबन्धत्वाद्विदुषो रागद्वेषाद्यनात्मगुणाविर्भावाभावो युक्त इति भावः । एतेन विक्षेपकेषु गुणकार्येषु प्राप्तेष्वपि द्वेषाद्यभावो गुणातीतस्य लिङ्गमान्तरं स्वप्रत्यक्षमिति सूचितं भवति ॥२२॥

ननु गुणातीतो विद्वान् सत्त्वादिगुणकार्येषु संप्रवृत्तेषु सत्सु यदि द्वेषं न करोति तन्निवृत्तिं च न काङ्क्षति तर्हि सर्वं मिथ्येति तत्तद्गुणवृत्त्यनुरूपेण किं यथेष्टं वर्तेत इत्याशङ्क्य, न तस्य प्रवृत्तिहेतोरविद्याया वासनाख्यायाः सकार्याया निर्विकल्पकसमाध्यग्निनिर्दग्धत्वाद्वैदिके लौकिके चान्यत्रापि प्रवृत्तिर्न संभवति किंतु स्वानन्दानुभूत्या स्वस्मिन्निश्चल एव तिष्ठति न किंचिद्विक्रियत इत्याह—

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥ २३ ॥

उदासीनवदिति । वादिप्रतिवादिनोरुभयोः कस्यापि पक्षमनवलम्ब्य तदुभयव्यापारद्रष्टा तटस्थः पुरुष उदासीन इत्युच्यते । तद्वद्विषयेषु प्रवर्तकानां प्रकाशदयादाक्षिण्यसत्यविनयरागद्वेषलोभमोहादीनां सत्त्वादिगुणानां तथा प्रवर्त्यानां देहेन्द्रियादीनां तद्व्यापाराणां च द्रष्टा स्वयमुदासीनवत्तेषां तद्व्यापाराणां च साक्षित्वेनासीनो दूरे वर्तमानः यो विद्वान् गुणैः प्रकाशादिभिः सात्त्विकै रागादिभिः राजसैर्मोहादिभिस्तामसैश्च न विचाल्यते स्वनिष्ठाया न प्रच्याव्यते, यथा बाह्यवासनाबद्धस्तथा ब्रह्माकारवृत्तेश्चालयितुं न शक्यत इत्यर्थः । ननु यद्येवं तर्ह्ययं विद्वान् देहयात्रायां कथं प्रवर्तेत इत्याकाङ्क्षायामाह—**गुणा इति** । चिरकालं नित्यनिरन्तरनिर्विकल्पसमाधिनिष्ठया स्थिरीभूतप्रज्ञो यः संसिद्धो ब्रह्मविद्यतिः स गुणा देहेन्द्रियादय एव फलानुभावककर्मणा यथाकालं प्रेर्यमाणाः सन्तो गुणेषु विषयेषु प्रवर्तन्ते भोजनादिक्रियां कुर्वन्ति तेषां तद्व्यापाराणां च साक्षी प्रत्यग्रूपोऽहं तु न प्रवर्ते सदा निष्क्रिय एवासीत्यवतिष्ठते ब्रह्माकारवृत्त्या ब्रह्मण्येव सदा तदात्मनावस्थानं करोति नतु स्वयं गुणेभ्यो गुणकार्येभ्यश्च किंचिदपीङ्गते चलति, कर्ताहं भोक्ताहं ममेदं भोग्यमिति कर्तृत्वभोक्तृत्वाध्यासं न करोतीत्यर्थः । अवतिष्ठतीति परस्मैपदं छान्दसम् । एवंलक्षणो यो ब्रह्मवित्तमः स गुणातीत इत्युच्यत इत्युत्तरेणान्वयः । एतेन गुणप्रेरणया देहेन्द्रियादीनां विषयेषु प्रवृत्तौ सत्यामप्यौदासीन्यमविकारित्वं च विदुषो गुणातीतत्वे लिङ्गमिति सूचितम् । किमाचार इति प्रश्नस्योत्तरं च दत्तं भवति ॥ २३ ॥

ननु देहेन्द्रियादेः स्वस्थत्वदशायामयं गुणैः स्वनिष्ठातो न विचाल्यते परंतु दुःखं आध्यात्मिके चाधिभौतिके च निन्दाद्यनर्थे च संप्राप्ते गुणैर्निष्ठायाश्चालितः खेदमोहादिकं भजत्येवेत्याशङ्कायाम् । न ।

बाह्यसुखदुःखादीनां निन्दास्तुत्यादीनां च विषयो नात्मैव नत्वहमात्मा-निर्विशेषो निराकारश्चिदेकरस इति धीनैश्चल्येन बाह्यसुखदुःखाद्यवस्थायामपि स्वात्मन्येव तिष्ठति नत्वनात्मन्यहंममेति बुद्ध्याध्यासं मूढवत्करोतीत्याह—

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥ २४ ॥

समेति द्वाभ्याम् । यत्र शोभनानि हृष्टानि खानि भवन्ति तत्सुखं, यत्र दुष्टानि खानि भवन्ति तद्दुःखम् । समे दुःखसुखे यस्य स समदुःखसुखः समचित्तः । सुखदुःखयोः समत्वं नाम चित्तस्येष्टानिष्टभावनावैधुर्यमेव तदेव समचित्तत्वम् । परे इव तद्भोक्तर्यहमित्यध्याससंबन्धरहित इत्यर्थः । तत एव स्वस्थः सर्वावस्थासु सर्वदा स्वस्मिन्नेव परे ब्रह्मणि तदात्मना तिष्ठतीति ब्रह्मविदेक एव स्वस्थ इत्युच्यते । तत एव जन्मादिदुःखैराध्यात्मिकादिदुःखैश्च नाभिभूयते । तदन्ये त्वस्वस्था एव भवन्ति बहिर्मुखास्तत एव जन्मादिदुःखैराध्यात्मिकदुःखैश्चानात्मधर्मैरन्यैश्चाधिभौतिकादिभिरभिभूयन्ते । सति विक्षेपे ब्रह्मात्मना स्थितवृत्तेरप्रच्युतत्वमेव स्वस्थत्वं नतु धैर्येण तत्सहिष्णुत्वम् । तत एव तुल्यप्रियाप्रियः प्रियमिष्टमप्रियमनिष्टं तुल्ये प्रियाप्रिये यस्य स तुल्यप्रियाप्रियः । उभयत्र सम इत्यर्थः । ननु प्रियाप्रिययोः सुखदुःखयोश्च विदुषः समत्वं न संभवति, अत्यन्तमधुरमतिकटु च द्रव्यं भुञ्जतश्चण्डातपाऽनातपयोस्तिष्ठतश्च विदुषोऽपीष्टानिष्टत्वोपलब्धेर्दुर्वारत्वात्तदनुभूत्या विषमबुद्धिः स्यादेवेति चेत्सत्यम् । सुखदुःखयोः प्रियाप्रिययोः प्राप्तयोः सतोर्विदुषोऽपि विषमबुद्धिः स्यादेव । ग्राह्यभेदाद्ग्रहणभेदोपपत्तेस्तथापि ब्रह्मनिष्ठस्य विषमबुद्धिर्न संभवति कारणाभावात् । विषमबुद्धेः खलु कारणं बुद्धेर्विषमपदार्थसंयोगः । सत्येवैतस्मिन्निष्टानिष्टत्वज्ञानं संपद्यते । सत्येवेष्टानिष्टत्वज्ञाने विषमबुद्धिः स्यान्नासति । नहि चिरकालनित्यनिरन्तरसमाध्यभ्यासबलेन ब्रह्माकारतामापद्य बुद्धिवृत्तौ सर्वदा ब्रह्मण्येव निश्चलतया संस्थितायां बुद्धेर्विषयैर्विषमैः संयोगः संभवति । तदसंभवे त्विष्टानिष्टत्वज्ञानं संभावयितुं न शक्यते । तदभावे विदुषो ब्रह्मनिष्ठस्य विषमबुद्धिश्च न संभवति । ततः सुखदुःखयोः प्रियाप्रिययोश्च विदुषः समत्वं न विरुद्धम् । ननु बलवति विक्षेपकारणे प्रसक्तेऽपि बुद्धेर्ब्रह्मात्मनावस्थितिः कथमुपपद्यत इति चेदभ्यासातिशय एव तत्र कारणमिति ब्रूमः । नत्वौषधं नापि मन्त्रो न च लययोगश्च । अनभ्यासवशादेव सतामपि

बहिर्मुखत्वं न त्वविवेकवतः। 'अभ्यासेन तु कौन्तेय' इत्युक्तत्वाच्छ्रद्धाभक्तिपूर्वकं समाध्यभ्यासेन बाह्यानालम्बिनी ब्रह्मनिष्ठा सिध्यति। सर्वत्राप्यभ्यास एव बलवत्कारणम् 'अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः' इति स्मृतेः। यदुक्तं तुल्यप्रियाप्रियः इति प्रियाप्रिययोः समत्वं तद्विस्पष्टयति—**समलोष्टाश्मकाञ्चन इति** । समानि प्रीत्यप्रीत्योरविषयाणि लोष्टाश्मकाञ्चनानि यस्य सः समलोष्टाश्मकाञ्चनः। यद्वा समानि प्रत्यग्दृष्ट्या समभावं गतानि ब्रह्मात्मना दृष्टानि लोष्टाश्मकाञ्चनानि यस्य समलोष्टाश्मकाञ्चनः। सर्वत्र ब्रह्मबुद्धिरित्यर्थः। विदुषः सुखदुःखप्रियाप्रियादिषु सर्वत्र समदर्शनसिद्धौ हेतुमाह—**धीर इति**। आभासवासनया बहिर्मुखायमानां धियं राति निगृह्णाति स्वाकारेणैव स्थापयतीति धीरः। स्वनिष्ठाऽव्यभिचरितबुद्धिवृत्तिरित्यर्थः। तत एव तुल्यनिन्दात्मसंस्तुतिः। निन्दा दूषणम्। आत्मनो देहादेर्गुणकीर्तनं स्तुतिरात्मसंस्तुतिः तुल्ये अनात्मगोचरे निन्दात्मसंस्तुती यस्य स तुल्यनिन्दात्मसंस्तुतिः । अनात्मैकगोचरयोर्निन्दास्तुत्योरविषयीभूतस्वरूप इत्यर्थः । सुखदुःखप्रियाप्रियादिषु समत्वं विदुषो जीवन्मुक्तत्वे परप्रत्यक्षं लिङ्गमिति सूचितं भवति ॥ २४ ॥

गुणातीतोऽयमिति विदुषो गुणातीतत्वविज्ञानाय लिङ्गान्तरं किमाचार इति प्रश्नस्योत्तरं च वदन् जीवन्मुक्तलक्षणमुपसंहरति—

मानावमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥ २५ ॥

मानेति। मान उपचारैर्बहूकरणं अपचारैर्लघूकरणमवमानस्तयोरुभयोस्तुल्यः स्वप्रारब्धवशात्तयोर्विषयभूते देहे आत्मत्वभावनाभावादुभयत्राप्यविक्रिय इत्यर्थः। पूजावमानयोर्मुखविकासवैवर्ण्यादिविकाररहितत्वेन समचित्तत्वं जीवन्मुक्तस्य लिङ्गम्। यद्यपि सर्वं ब्रह्मैव पश्यतो ब्रह्मविद्यतेः प्रियाप्रियमित्रामित्रादिभेददृष्टिर्न संभवति तथापि यदिष्टमिव भुज्यते तत्प्रियमिति यदनिष्टमिवोदास्यते तदप्रियमिति, यस्तु ब्रह्मविच्चर्यां दृष्ट्वानुमोदते स मित्रपक्षः यस्तु नानुमोदते सोऽपरिपक्ष इति लोकदृष्ट्या संभवति तयोर्मित्रारिपक्षयोः स्वबुद्धिदोषेणैव मित्रामित्रभावं गतयोरुभयोस्तुल्यः समदर्शी। सर्वत्र समदर्शनमेव जीवन्मुक्तस्य परप्रत्यक्षं लिङ्गम्। किंच सर्वारम्भपरित्यागी ममामुना भवितव्यमिति फलकामनयारभ्यन्त इत्यारम्भाः कर्माणि दृष्टादृष्टफलविषयकाणि श्रौतानि स्मार्तान्युपासनालक्षणानि च यानि कान्याश्रमोचितानि च शारीरव्य-

तिरिक्तानि लौकिकान्यपि च कर्माणि सर्वारम्भा इति सर्वपदेन गृह्यन्ते । ब्रह्मभावापन्नतयावाप्तसकलकामत्वात्तान्सर्वारम्भसाध्यशून्यत्वबुद्ध्या परित्यक्तुं शीलमस्यास्तीति सर्वारम्भपरित्यागी । नहि ब्रह्मभावापन्नस्याप्तकामस्य श्रोत्रियस्याकामस्य ब्रह्मविदः कर्मणा साध्यमस्ति यस्मिन्सति कर्मणः कर्तव्यता स्यात्तदभावात्सर्वारम्भपरित्यागो युक्त एव । ननु कर्मसाध्याश्चोपास्तिसाध्याश्च सार्वभौमादिब्रह्मान्ता आनन्दविशेषाः शतोत्तरगुणिताः सन्त्येव विदुषोऽप्याशास्या इतिचेन्न । नित्यनिरतिशयानपायिब्रह्मानन्दरसानुभूतेर्विदुषस्तदाशाऽसंभवात्तेषां क्रियाजन्यत्वेनानित्यत्वादल्पत्वादसत्त्वाच्च विद्वदाशास्यत्वानुपपत्तेः 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति न्यायेन तेषामपि ब्रह्मानन्दान्तर्भूतत्वाद्ब्रह्मानन्दावाप्त्या 'शते पञ्चाश'न्न्यायेन तदवाप्तेश्च संभवाद्ब्रह्मविदो महात्मनः सर्वात्मभावापन्नस्य न प्राप्तव्यशेषोऽस्ति । नहि सार्वात्म्यसिद्धिः प्राप्तव्यशेषश्चैकस्य संभवति । तस्माद्ब्रह्मविदः सर्वकर्मसंन्यासो युक्त एवेति सिद्धम् । एतेन किमाचार इत्यस्य प्रश्नस्य पूर्णवृत्त्या सर्वत्रौदासीन्यं विना न किंचिदस्याचार इत्युत्तरं दत्तम् । निष्कर्मत्वं विदुषो जीवन्मुक्तत्वे परप्रत्यक्षं लिङ्गमिति च सूचितं भवति । गुणातीतः समदुःखत्वादिलक्षणलक्षितो यः स एव गुणातीतः । गुणेषु देहेन्द्रियादिषु प्रतिबिम्बप्रतिच्छायामरदेहेष्विवात्मभावमुत्सृज्य गुणकार्यविलक्षणे तद्धर्मकर्माद्यस्पृष्टे स्वस्वरूपे परे ब्रह्मणि तदात्मना स्थित्वा प्रकाशं च प्रवृत्तिं च मोहं च योऽतिक्रामति स गुणातीत इत्युच्यते । गुणानां गुणकार्याणामविषय इति कृत्वा जीवन्मुक्तो ब्रह्मविद्यतिस्तल्लक्षणज्ञैरयं गुणातीत इति निगद्यत इत्यर्थः ॥ २५ ॥

कथं त्वेतांस्त्रीन् गुणानतिवर्तत इति पृष्टस्य तृतीयप्रश्नस्योत्तरमाह—

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥ २६ ॥

मामिति । चशब्दस्त्वर्थः । यस्तु ब्रह्मविद्यतिस्तीव्रमोक्षेच्छया वासनाकृतं बाह्यं सर्वं परित्यज्यात्यन्तवैराग्येण तद्बुद्धित्वादिसाधनसंपत्त्या च युक्तो भूत्वा, मां प्रत्यगभिन्नं निर्विशेषं निराभासं निराकारमखण्डचिदेकरसं परिपूर्णं परं ब्रह्म भक्तियोगेन ध्येयाकारेणाखण्डात्मना चित्तस्य विषयानुल्लेखिनः परिणामो भक्तिरखण्डाकारवृत्तिः । तदुक्तं 'मत्कथाश्रुतिमात्रेण मयि सर्वगुहाशये । मनोगतिरविच्छिन्ना यथा गङ्गा-

म्भसोऽम्बुधौ । अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे । लक्षणं भक्तियोगस्य निर्गुणस्य उदाहृतम् ॥' इत्युक्तलक्षणा या भक्तिः सैव योगः कैवल्यसिद्धौ परमोपायस्तेनाव्यभिचारेण प्रत्ययान्तरेण व्यवच्छेदो व्यभिचारः क्वचिदपि तद्रहितेन नित्यनिरन्तरसमाधिना सेवते । विषयग्रहणविमुखया निर्मलया निश्चलया चिदाकारापन्नया तैलधारावदविच्छिन्नया वृत्त्या व्युत्थानाव्युत्थानयोर्बहिरन्तश्च परिपूर्णं सर्वोपाधिविनिर्मुक्तं निष्कलं निष्क्रियं शान्तमनन्तं गगनोपममानन्दघनं मां परं ब्रह्म सर्वमिदमहं च ब्रह्मैवेति स्वं च विश्वं च मदाकारमेव पश्यन् यो वेत्ति । सर्वदानुसंधत्त इत्यर्थः । एवं चिरकालनित्यनिरन्तरब्रह्मनिष्ठायामेव प्रतिष्ठितः स यतिः तदाकाराकारितान्तःकरणतया सर्वदा सर्वं ब्रह्मैव पश्यन् स्वयमेतान्पूर्वोक्तलक्षणान् गुणान्सत्त्वादीन् तत्कार्येण प्रपञ्चेन सहातीत्यातिक्रम्य प्रकृतिं प्रकृतिकार्यं च विश्वं सर्वं ब्रह्मण्यधिष्ठाने सन्मात्रत्वेन प्रविलाप्यैवं गुणात्ययं कृत्वा । गुणात्ययो नामाधिष्ठानयाथात्म्यसंदर्शनेनारोपितगुणतत्कार्ययोराभासतः प्रतीयमानयोरधिष्ठानमात्रत्वेनावगाहनशीलया चिदाकारवृत्त्या पुनरहमिदमद इत्यग्रह एवं तं कृत्वा ब्रह्मीभूतसर्वप्रपञ्चो ब्रह्मवित्तमो ब्रह्मभूयाय ब्रह्मभावाय जीवन्नेव ब्रह्मात्मनावस्थानाय कल्पते शक्तो भवति । 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' इत्युक्तन्यायेन स्वस्मिन्सर्वत्र ब्रह्ममात्रदर्शनलक्षणायां भगवत्प्रतिपत्तौ ब्रह्मनिष्ठायां यः प्रतिष्ठितो भवति स एव गुणमयीं गुणतत्कार्यतद्व्यवहाररूपां मायां चैतत्प्रत्ययसंततिमतीत्य विदेहकैवल्यं सुखं प्राप्नोति नान्य इति तात्पर्यार्थः । एतेन सर्वमिदमहं च ब्रह्मैवेति पूर्णवृत्त्या सदा सर्वत्र ब्रह्मदर्शनमेव प्रत्ययान्तरानन्तरितं सत्त्वादिगुणतत्कार्यातिक्रमणोपाय इति सूचितं भवति ॥ २६ ॥

ननु गुणतत्कार्यव्यपोहमात्रेण ब्रह्मविद्ब्रह्म भवितुं नार्हति ब्रह्मविदोऽहमर्थत्वेन ज्ञातृत्वाद्ब्रह्मण इदमर्थत्वेन ज्ञेयत्वाच्च ज्ञातुर्ज्ञेयभावो न संभवति प्रत्यक्षविरोधादित्याशङ्कायां । न । यथा लोके अयमहमित्यत्राहंशब्देदंशब्दार्थयोः शब्दोपाधितो ज्ञातृज्ञेयरूपेण भेदे प्रतीयमानेऽपि विचार्यमाणे तयोरर्थत एकत्वमुपपद्यते नात्र प्रत्यक्षविरोधो दृश्यते तद्वदत्रापि । किंच 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदास्ते' इति । 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इति च श्रुतिर्ब्रह्मण एव नामरूपव्याकरणोपाधौ ज्ञातृरूपेणावस्थितत्वं प्रतिपादयति । अतो ज्ञातुर्विदुष उपाध्युपरमे ब्रह्मभाव उपयुज्यते ।

घटोपाध्यभावे घटाकाशस्य महाकाशत्वं यथा तद्वत् 'नान्योऽतोऽस्ति विज्ञाता' 'अविज्ञातं विज्ञातृ' इति विज्ञातृब्रह्मणोरभेदश्रवणाच्च ब्रह्मणः प्रतिष्ठात्वाच्च प्रत्यग्रूपस्य विदुषो ब्रह्मभाव उपपद्यत इति बोधयितुमाह—

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च॥ २७॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः॥ १४॥

ब्रह्मण इति। अमृतस्य 'एतदमृतमभयमेतद्ब्रह्म' इति श्रवणादमृतस्यामरणधर्मस्य अविनाशिनः जन्मरहितस्यैवाविनाशित्वं युक्तम्। ततोऽमृतस्येत्यनेनाद्यन्तविकाराभावः सूचितः। अव्ययस्य व्ययरहितस्याऽविकारिण इत्यनेन वृद्धिविपरिणामाभावः सूचितः। शाश्वतस्य नित्यस्येत्यनेन आगन्तुकास्तित्वापक्षयाभावः सूचितः। चद्वयं समुच्चयार्थम्। धर्मस्याविद्यया जन्ममरणादिदुःखप्रवाहे पात्यमानः पुरुषो ध्रियतेऽनेनेति धर्मो ज्ञानं तस्य धर्मस्य धर्मावगम्यस्येत्यर्थः। सुखस्यानन्दरूपस्यैकान्तिकस्यात्यन्तं इदमेवमेवेति निश्चीयतेऽनेनेत्यन्तः एकश्चासावन्तश्चेत्येकान्त एकप्रत्ययस्तेनावगम्यत इत्यैकान्तिकं तस्यैकान्तिकस्य सर्वत्राव्यभिचरितसत्ताकस्य परिपूर्णस्य ब्रह्मणो निर्विशेषस्य हि यस्मादहमर्थः प्रत्यगात्मा सर्वदृश्यज्ञाता प्रतिष्ठा प्रतितिष्ठत्यनेन ज्ञातृस्वरूपेण नामरूपव्याकरणाय प्रवर्तते इति प्रतिष्ठा। 'तदेवानुप्राविशत्' इति श्रुतेः। प्रत्यगात्मस्वरूपेणोपाधौ स्थित्वा परं ब्रह्मैव बुद्ध्यादिसर्वदृश्यजातं जानाति प्रकाशयति च तेनात्मनो ब्रह्मत्वं न व्यभिचरति। यथा दीपरूपेणार्थं प्रकाशयतोऽग्नेर्दीपरूपस्याग्नित्वं न व्यभिचरति, तद्वत्ततो ज्ञातुरात्मन उपाध्यभावे ब्रह्मत्वं युक्तम्। ज्ञातैवात्मा विद्वान् तस्माज्ज्ञाता विद्वान् ब्रह्मैव भवतीत्यर्थः। यद्वा निरुक्तलक्षणस्य निर्विशेषस्य परस्य ब्रह्मणोऽहमात्मा प्रतिष्ठा स्वभावस्थितिहेतुत्वात्। प्रत्यगात्मना खलु परं ब्रह्म स्वभावस्थितिं प्राप्नोति। ब्रह्मणः सत्त्वचित्त्वानन्दरूपत्वपरिपूर्णत्वाद्वितीयत्वादिकं बुद्ध्युपाधिकेन प्रत्यगात्मनैव हि चेतनेन सिध्यति नतु स्वतो निर्विशेषत्वात्ततोऽहमर्थोऽस्य प्रतिष्ठा भवति ब्रह्मव्यतिरिक्तचेतनाभावात्। अयमात्मा ब्रह्मेति श्रवणाच्च प्रत्यगात्मन उपाध्यभावे ब्रह्मत्वं युक्तम्। तस्माद्विदुषो ब्रह्मत्वं सिद्धम्॥ २७॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां चतुर्दशोऽध्यायः॥ १४॥

पञ्चदशोऽध्यायः ।

'सत्त्वं रजस्तमः' इत्यादिना सत्त्वादिगुणानां ज्ञानतत्फलप्रतिबन्धकत्वेन ज्ञानिनो व्यपोह्यानां स्वरूपं कार्यं च तद्वतां फलं च गुणातिक्रमणं कृतवतो लक्षणं फलं च सम्यक् प्रतिपाद्याध्यायान्ते गुणातिक्रमणोपायविवक्षया 'मां च योऽव्यभिचारेण भक्तियोगेन सेवते' इति ब्रह्मानुसंधानं गुणात्ययसाधनत्वेनोक्तम् । ते च गुणाः कतिचित् पुंसो मुमुक्षोः कीदृशं ब्रह्म कथं तदनुसंधानमित्याकाङ्क्षायां क्षराक्षरविलक्षणं पुरुषोत्तमाख्यं परं ब्रह्म तदनुसंधानं तत्र महतां प्रवृत्तिं तत्प्रवृत्तिफलं च प्रतिपादयितुं पञ्चदशाध्याय आरभ्यते । तत्रादौ मुमुक्षोः संसारे जुगुप्सावैराग्यसंन्यासादिमोक्षसाधनसिद्धये संसारं वृक्षत्वेन वर्णयति । श्रीभगवानुवाच—

श्रीभगवानुवाच ।

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १ ॥

ऊर्ध्वमिति । ऊर्ध्वमूलं अव्यक्तमहदादेरपि परममहत्त्वेनातिसूक्ष्मत्वेन प्रकाशकत्वेन सर्वास्पदत्वेन सर्वव्यापकत्वेन सर्वकारणत्वेन च परं ब्रह्मोर्ध्वमित्युच्यते । सर्वोत्तमत्वाद्ब्रह्मण ऊर्ध्वमिति व्यपदेशः । ऊर्ध्वमुच्छ्रितमुत्कृष्टतमं यत्परं ब्रह्म तदेव मायाशबलं मूलं बीजं यस्य स ऊर्ध्वमूलः संसारवृक्षः श्रुतिप्रसिद्धः । 'ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः' इति, 'ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद संप्रति' इति च श्रुतेः । यथा वटस्य बीजमव्यक्तमतिसूक्ष्ममविज्ञेयमपारशक्तिसंपन्नं च तथा जगद्बीजमव्यक्तं ब्रह्माप्यतिसूक्ष्ममविज्ञेयमपारशक्तिसंपन्नं च भवति । तत एवातिविस्तरोऽतिविचित्रः संसारवृक्षस्तं अधःशाखं अव्यक्तान्महन्महतोऽहंकारोऽहंकारात्पञ्चतन्मात्राणि पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानीति श्रवणान्महदादिविकाराः सर्वे प्रकृतेरधःस्थत्वादध इत्युच्यन्ते । अधोधःशब्दवाच्या महदादयः शाखा इव शाखा यस्य सोऽयमधःशाखः । महदङ्कुरोऽहंकारः स्कन्धः पञ्चतन्मात्राणि शाखाः पञ्चमहाभूतान्युपशाखा अस्य भवन्तीत्यर्थः । यस्य महदादयः शाखा भवन्ति तमधःशाखमश्वत्थं मायाकार्यत्वेन श्वो न तिष्ठतीत्यश्वत्थः क्षणभङ्गुरः । अनित्य इत्यर्थः । तमेतं क्षणप्रध्वंसिनमश्वत्थं संसारवृक्षमव्ययं व्ययो नाशस्तद्रहितमव्ययं नित्यमिति प्राहुः । प्ररोचनोक्तिप्रमोहिताः कामिनो मीमांसकाः न कदाचिदनीदृशं जगदिति जगन्नित्यमिति वदन्तीत्यर्थः ।

छन्दांसि संसारवृक्षस्यानित्यत्वदुःखरूपत्वव्यामोहकत्वानर्थकारित्वादिदोषजातं छादयन्ति 'ध्रुवा द्यौर्ध्रुवा पृथिवी', 'दक्षिणावन्तो अमृतत्वं भजन्ते', 'स्वर्गे लोके न भयं किंचनास्ति', 'स्वर्गे लोकेऽमृतत्वं भजन्ते', 'एष वः पुण्यः सुकृतो ब्रह्मलोकः' इत्यादिप्ररोचनवाक्यैर्गूहयन्तीति छन्दांसि ऋग्यजुःसामादीनि यस्य संसारवृक्षस्य मायामयस्य पर्णानीव पर्णानि भवन्ति । यथा पर्णानि सर्वतो वृक्षदोषमावृत्याऽक्षतं रक्षन्ति, तथा वेदाः सपुराणेतिहासाः कर्मोपासनयोगागमतन्त्रक्रियापराः सर्वे कर्मतत्साधनतत्फलप्रकाशनेनानित्यत्वदुःखरूपत्वादिदोषं छादयन्तो यं संसारवृक्षं वर्धयन्तीत्यर्थः । तमेतं प्रतिपादितलक्षणं वेदपलाशं धर्माधर्मप्रसवं जन्ममरणादिदुःखैकफलं संसारवृक्षं समूलं यो वेद सम्यग्विजानाति स वेदविद्वेदार्थविदित्यर्थः । नन्वनृतजडदुःखात्मकस्य स्वगुणैर्व्यामोहकतया जन्माद्यनर्थहेतोः संसारवृक्षस्य वेदनेन विदुषः कथं वेदार्थवित्त्वं सिध्यतीति चेदुच्यते । यस्माद्बीजादुत्पन्नो यो वृक्षः स तु तद्रस एव भवति । यथा तिक्तरसान्निम्बबीजादुत्पन्नो निम्बवृक्षस्तिक्तरसात्मक एव भवति नान्यथा । सोऽयं न्यायः सर्वत्रापि प्रसिद्धः । एवं चिदेकरसाद्ब्रह्मणः सकाशादुत्पन्नः संसारवृक्षश्चिद्रस एव भवति । ततः 'सर्वं खल्विदं ब्रह्म' इत्यादिश्रुतिभिः 'संसारवृक्षः स्वबीजरसात्मक एव भवति वृक्षत्वान्निम्बवृक्षवत्' इत्यादियुक्तिभिश्च तदुदितस्वानुभवेन च इमं संसारवृक्षं चिदेकरसं कारणब्रह्ममात्रमेव यः शुद्धात्मा पण्डितो वेद स वेदार्थविदेव स्यात् । 'सर्वे वेदा यत्पदमामनन्ति' इति न्यायेन सर्ववेदार्थो ब्रह्म तद्विद्ब्रह्मविदेव भवति । 'कस्मिन् भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इति न्यायेन सर्वज्ञश्च भवति । सर्वज्ञस्य तस्य कर्तव्यं च वक्ष्यति 'स सर्वविद्भजति माम्' इति । अकारणज्ञानेन कार्यस्य वृक्षस्य कारणमात्रत्वविज्ञानाद्विदुषो वेदार्थवित्त्वं सिध्यतीत्यर्थः ॥ १ ॥

शुद्धात्मन एवेश्वरप्रसादवतः कारणज्ञानेन कार्यस्य वृक्षस्य कारणमात्रत्वविज्ञानाद्ब्रह्मवित्त्वं विदेहमुक्तिश्च सिध्यति, मलिनात्मनस्तु संसारवृक्षस्वरूपं सम्यग्विज्ञायासद्बुद्ध्या ततो विरक्तवत एव ज्ञानं मोक्षश्च सिध्यतीति बोधयितुं पुनः संसारवृक्षं विशिनष्टि—

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसंततानि कर्मानुबन्धीनि मनुष्यलोके ॥ २ ॥

अध इति । तस्योक्तलक्षणस्य संसारवृक्षस्य शाखा उपशाखास्थानीयाः पापपुण्यकर्मफलभूता देहाः अधश्चोर्ध्वं प्रसृताः । मनुष्यादिस्थावरान्तम-

धःशब्दार्थः। मनुष्यान्व्याप्य ब्रह्मलोकपर्यन्तमूर्ध्वशब्दार्थः। अधः स्थावरपर्यन्तमूर्ध्वं च ब्रह्मलोकपर्यन्तमपि प्रसृताः। सर्वतो व्याप्ता इत्यर्थः। वाक्यस्यास्यायमभिप्रायः—क्षणिकस्यास्य देहस्य ध्वंसे सति पुरुषस्य मुक्तिः स्वयमेव सेत्स्यति किं पुंप्रयत्नेनेति न मन्तव्यम्। संचितकर्माणि पुण्यपापलक्षणान्यनन्तानि विचित्राणि विचित्रफलकानि च यानि तान्येव 'नाभुक्तं क्षीयते कर्म' इति न्यायेनास्मिन् देहे नष्टेऽपि स्थावरादिब्रह्मलोकपर्यन्तं तत्र तत्र पुरुषस्य शरीराणि संभावयन्ति। ततः पुंप्रयत्नं विना न मुक्तिः स्वतः सिध्यतीति। ननु तत्कर्मफलानुभवान्ते देहाः स्वयमेव क्षीयन्ते ततः स्वयमेव मुक्तिः स्यादेवेत्याशङ्कायां। न। पुनः पुनः क्रियमाणकर्मभिर्वर्धन्त इति सूचयितुमाह—**गुणप्रवृद्धा इति**। गुणैः सत्त्वादिगुणविकारैः कामक्रोधलोभादिभिस्तत्कारणकैः पापपुण्यादिभिश्च प्रवृद्धाः प्रकर्षेण वृद्धिं प्राप्ताश्च भवन्ति। कामादिभिः कर्मादिभिश्चोपर्युपरि प्रवर्धन्त इत्यर्थः। उपर्युपरि प्रवृद्धेः कारणमाह—**विषयप्रवाला इति**। विषयाः शब्दादयो भोग्यपदार्थाः प्रवाला अङ्कुराः शाखाभ्य इव येभ्यः संभवन्ति ते विषयप्रवाला भवन्ति। शाखाः प्रवालानिव देहास्तत्र तत्र शब्दस्पर्शरूपरसादिभोग्यानिन्द्रियसंनिकर्षद्वारा संभावयन्तस्तेषु रागं द्वेषं कामं क्रोधं लोभं च समुद्भाव्य पुनःपुनः कर्माणि कारयन्तीत्यभिप्रायः। कामादीनां कर्मणां च सिद्धेः कारणमाह—**अधश्चेति**। कर्मानुबन्धीनि यानि काम्यनित्यनैमित्तिकप्रतिषिद्धानि नानाविधशरीरारम्भकाणि तान्येव कर्माण्यनुबध्नन्ति स्वोत्पत्तेरनन्तरमेव कारयन्तीति कर्मानुबन्धीनि कामकर्मसमुत्पत्तेः कारणानि मूलानि पूर्वस्मादवान्तराणि संसारकारणानि विषयवासनाः कर्मवासना इति यावत्। अधोधश्च शरीरेषु चकारादूर्ध्वशरीरेषु लिङ्गाख्येष्वनुसंततानि प्राणिकर्मानुरूपेण सर्वतो व्याप्तानि भवन्ति। मनुष्यलोके प्राणिवर्गे सर्वत्र विषयेषु कामान् जनयन्त्यः कर्माणि कारयन्त्यो भोगवासनालिङ्गेषु सातत्येन तिष्ठन्ति, ततो वासनाः कामान् जनयन्ति, कामाः कर्माण्युच्चावचानि कारयन्ति, कर्माणि सर्वतः पुनःपुनः शरीराण्युत्पादयन्ति, एवं वासनाभिः कामादिभिः पुण्यपापादिकर्मभिश्च सर्वतः शरीरपरम्पराभिवर्धते न क्वचिदपि क्षीयते। ततः संसारवृक्षारूढानां विषयसुखाशापाशबद्धानां जननमरणदुःखप्रवाहपातं विना न कथंचित् न क्वचिन्न कदाचिदपि मोक्षः सिध्यतीत्यर्थः। एतेन कर्मोपासनाफलेषु स्वर्गसत्यलोकवैकुण्ठादिषु तत्सुखेषु चानित्यत्वबुद्ध्या असत्यत्वबुद्ध्या च

मुमुक्षोर्वैराग्यसिद्धये मायोपहितब्रह्मणः सकाशादुत्पन्नस्य संसारवृक्षस्य स्कन्धशाखोपशाखात्वेन वर्णितानां महदादिमायाकार्योपाधिकानां हिरण्यगर्भविराडादीनां गुणत्रयोपाधिकानां ब्रह्मविष्ण्वादीनामिन्द्रादीनां च मायिकत्वमनित्यत्वं सूचितम्। कर्मोपास्तितत्साधनतत्फलप्रतिपादकानां वेदवाक्यानां संसारवृक्षपर्णत्ववर्णनेन मुमुक्षोर्वटाश्वत्थपर्णवदुपेक्षणीयत्वं च सूचितं भवति ॥ २ ॥

यद्यप्यधीतविदितसर्ववेदवेदार्थाः पुरुषाः पण्डिता अप्यविद्याकामपरतन्त्रा भूत्वा प्ररोचनोक्तिभिः संसारवृक्षफलेषु दृष्टेष्वदृष्टेषु च स्वर्गादिषु तत्सुखेषु च रम्यत्वबुद्ध्या नित्यत्वबुद्ध्या च मोहिताः सन्तश्चान्यानुद्भ्रामयन्तः स्वयं च भ्रमन्ति। तथाप्यत्र यः शुद्धात्मा विचक्षणः सूक्ष्मबुद्धिर्मुमुक्षुर्भवति तेन 'तद्यथेह कर्मचितो लोकः क्षीयते', 'श्वोभावा मर्त्यस्य यदन्तकैतत्', 'श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः' इत्यादिश्रुतिभिः, 'इदं सर्वं मिथ्या, मायाकार्यत्वात्, इन्द्रजालवत्' इत्यादियुक्तिभिश्च सदसद्विचार्य तदुदितवैराग्यखड्गेन संसारवृक्षं छित्त्वा सर्वं संन्यस्य मोक्षाय यत्नः कर्तव्य इति बोधयति—

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा।
अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ॥ ३ ॥

न रूपमिति द्वाभ्याम्। यद्यपि संसारवृक्षस्य पामरदृष्ट्योक्तरीत्या विशिष्टपर्णपुष्पफलादिमत्तया रमणीयत्वेनाश्रयणीयत्वं प्रतीयते तथापि पण्डितैः सूक्ष्मबुद्धिभिः इहास्मिन्नर्थे सम्यग्विचार्यमाणे 'ध्रुवा द्यौर्ध्रुवा पृथिवी'इति, 'स्वर्गलोका अमृतत्वं भजन्ते' इत्यादिप्ररोचनश्रुत्या यथा रूपं स्वरूपं नित्यत्वेन सुखरूपत्वेन च वर्णितं भवति तथा तेन प्रकारेण नोपलभ्यते। ननु (ध्रुवा द्यौ)रित्यन्तरिक्षादेर्नित्यत्वं श्रूयते कथं नित्यत्वं नोपलभ्यत इति चेद्वाक्यशेषेण ध्रुवेण हविषेति क्षणिकस्य हविषोऽपि ध्रुवत्वश्रवणात्तन्न्यायेनान्तरिक्षादीनामपि ध्रुवत्वमौपचारिकमिति ज्ञापितं भवति। 'यत्सावयवं तदनित्यम्' इत्यादियुक्तिबलेन 'त्रयमप्येतत्सुषुप्तं स्वप्नं मायामात्रम्' इति, 'यथा स्वप्नप्रपञ्चोऽयम्' इत्यादिश्रुतिस्मृतिन्यायेन च संसारवृक्षस्य स्वप्नार्थवदनियतसत्ताकत्वात् ज्ञेयत्वाज्जन्मलयादिमत्त्वाच्चास्य प्रत्यक्षेणोपलभ्यमानस्य नित्यत्वं सुखरूपत्वं चाप्रामाणिकमित्यर्थः। एतेन स्वर्गादेर्नित्यत्वं नित्यसुखत्वं च बुद्धिभ्रम इति सिद्धम्। ननु संसारवृक्षस्यानित्यत्वं दुःखरूपत्वमिति यदि निश्चयस्तर्हि तस्याभ्रच्छायावत्क्षणिकत्वात्किंचित्कालं दुःखं सोढ्वा तदपाये सुखं भोक्तुं शक्यत इत्या-

शङ्कायामाह—**नान्त इति**। अस्य जननमरणदुःखप्रवाहसान्तत्वेनाजस्रं वर्तमानस्यादिस्तत्प्रवृत्तेरादिमत्त्वं नोपलभ्यते अनादित्वादविद्यातत्कार्यप्रवृत्तेरित्यर्थः। तत एव प्रतिष्ठा च प्रतिष्ठा मध्ये स्थितिरपि नोपलभ्यते। अयमस्यादिरिदमस्य मध्यमिति ज्ञातुं न शक्यत इत्यर्थः। तथैवान्तश्चास्य पर्यवसानमपि नोपलभ्यते, इदमत्र समाप्तमिति समाप्तिरपि न विज्ञायत इत्यर्थः। ननु तर्हि मुमुक्षोः सदसद्विवेकिनः किं कर्तव्यमित्याकाङ्क्षायां 'श्वःकार्यमद्य कुर्वीत' इति न्यायेन सर्वं संन्यस्य मोक्षाय यतितव्यमिति बोधयितुमाह—**अश्वत्थमिति**। अनेकजन्मसमाराधितेश्वरप्रसादवता मुमुक्षुणा विपश्चिता असङ्गशस्त्रेण सज्जते विषयेषु पुमाननेनेति सङ्गो वैषयिको रागस्तदभावोऽसङ्गो विरागस्तीव्रमोक्षेच्छया सदसद्विवेकविज्ञानेन च समुत्पन्नं वैराग्यं तदेव शस्त्रं तेन दृढेन पुनःपुनर्विषयेषु दोषदर्शनेन विषयाणां बन्धकत्वबुद्धिजनितभयेन च तीव्रमोक्षेच्छया च मुहुर्मुहुः कृतविवेकबलेनापि दृढतमोऽयं तेन दृढेनासङ्गशस्त्रेण अश्वत्थं सुविरूढमूलं सुतरामेरण्डतैललेपेन तत्पात्रवत्सर्वतो विरूढानि विशिष्य व्याप्तानि मूलानि विविधविषयवासनाजालानि यस्य तं सुविरूढमूलं अनेककोटिब्रह्मकल्पनानुस्यूतनानाविधवासनापटलजटिलमश्वत्थं संसारवृक्ष मूलं छित्त्वा पुत्रादिसर्वैषणाभ्यो व्युत्थाय, सर्वसंन्यासं कृत्वेत्यर्थः ॥ ३ ॥

एवं सदसद्विवेकसमुद्भूतवैराग्यतीव्रमोक्षेच्छावेगेन पराक्प्रवाहायमानमन्तःकरणं प्रत्यगभिमुखीकृत्य मोक्षैककामो यतिरात्मज्ञानैकतत्परो भवेदित्याह—

ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥

तत इति। ततः 'संन्यस्य श्रवणं कुर्यात्' इति न्यायेन सद्गुरोः सन्निधौ पदं परतत्त्वं परिमार्गितव्यम्। श्रुतियुक्तिभिः सम्यग्विचारणीयमित्यर्थः। यद्वा षष्ठ्यर्थस्तसिः। ततस्तस्य संसारवृक्षस्य यत्पदं प्रवृत्तिमूलकारणं परं ब्रह्म तदेव परिमार्गितव्यं। ब्रह्मवित्सन्निधौ सम्यग्विचार्य विज्ञातव्यमित्यर्थः। तज्ज्ञानस्य फलमाह—**यस्मिन्निति**। परमेश्वराचार्यप्रसादसंपन्ना यतयो महात्मानः श्रवणमननादिसंजातविज्ञानेन यस्मिन्निर्विशेषे चिदेकरसे ब्रह्मणि गताः स्वात्मभावं गताः ब्रह्मतां प्राप्ताः सन्तो भूयः पुनः संसाराय न निवर्तन्ते, पुनः शरीरत्वाय न कल्पन्त इत्यर्थः। सदसद्वि-

वेकवैराग्याभ्यां मोक्षेच्छया च सर्वं संन्यस्य ज्ञानसिद्ध्यै श्रवणादिकुर्वतो यतेरेवं भवितव्यमित्याह—**तमेवेति** । यतो यस्माज्जगज्जन्मादिहेतोरीश्वरात्पुराणी चिरंतन्यनादिकालीनेयं संसारवृक्षप्रवृत्तिः प्रसृता सर्वतः प्राणिनां प्रवृत्ता । ह्यर्थश्चकारः । योऽस्य संसारवृक्षस्य बीजभूतः पदशब्देनोक्तस्तमाद्यमादौ भवमाद्यं मायया सृष्ट्यर्थं सगुणभावं प्राप्तं भक्तवत्सलं पुरुषं परमेश्वरमेव हि शरणं प्रपद्ये । हिशब्दस्तत्परत्वावधारणदार्ढ्यार्थः । 'तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये' इति श्रवणात्संसारबन्धमोक्षाय परमेश्वरमेव हि शरणं गच्छामीतीश्वरैकशरणेन मुमुक्षुणा श्रवणादिकर्तव्यमित्यर्थः ॥ ४ ॥

एवमविद्याकामकर्मभिः संसारचक्रे भ्राम्यमाणानां ब्राह्मणानां मुमुक्षूणामीश्वरप्रसादसंप्राप्तसदसद्विवेकविज्ञानसंजाततीव्रवैराग्यसंन्यस्तसर्वकर्मतत्साधनानां श्रवणादिजन्यज्ञानेन जगत्कारणं निर्विशेषं परं ब्रह्म स्वात्मना ज्ञातव्यमित्युपदिश्य तेषामेव विज्ञातात्मस्वरूपाणां यतीनां 'स सर्वविद्भजति माम्' इति वक्ष्यमाणन्यायेन समुत्पन्नज्ञानस्य तत्फलसिद्धेश्च प्रतिबन्धायमानानात्मतद्धर्माध्यासरहितत्वाय सर्वदा ब्रह्मदृष्ट्यैवावस्थातव्यमिति बोधयितुमेवंलक्षणसंपन्ना एव यतयो विदेहमुक्तिं गच्छन्तीत्याह—

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥ ५ ॥

निर्मानेति । मानोऽभिमानो देहेन्द्रियादिष्वहमित्यभिनिवेशलक्षणोऽहंकारस्तत्कारणं मोहोऽज्ञानमावृत्तिलक्षणोऽनात्मन्यात्मधीहेतुस्तावुभौ मानमोहौ स्वरूपज्ञानेनात्मन्येवात्मभावापत्त्या च ताभ्यां मानमोहाभ्यां निर्गतास्ते निर्मानमोहाः श्रवणादिसमुत्पन्नेनायमहमस्मीति विज्ञानेनात्मन्येवात्मत्वधीव्यवस्थया चानात्मन्यहंभावशून्या इत्यर्थः । मानमोहयोर्वक्ष्यमाणाविद्याकामादेश्च निःशेषनिवृत्तौ कारणमाह—**अध्यात्मनित्या इति** । अध्यात्मं आत्मज्ञानं सर्वत्र ब्रह्ममात्रदर्शनलक्षणं तत्रैव नित्या निरता आत्मारामा ये ते ह्यध्यात्मनित्याः । सर्वमिदमहं च ब्रह्मैवेति स्वस्मिन्सर्वत्र च ब्रह्मप्रत्ययदार्ढ्याय निरन्तरं ब्रह्मनिष्ठायामेव परिनिष्ठिता इत्यर्थः । तत एव विनिवृत्तकामाः काम्यन्ते विषया एभिरिति कामाः वासनाः । वासनया खलु विषयान् कामयते ततो वासनानां कामत्वव्यपदेशः । निरन्तरं ब्रह्मनिष्ठयान्तःकरणसकाशाद्विशिष्य निवृत्ताः कामा बाह्यवासना येषां ते विनिवृत्तकामाः । निरन्तरसमाधिनिष्ठा-

निर्दग्धाहमादिसर्ववासनाग्रन्थय इत्यर्थः। सर्ववासनानाशस्य फलमाह— **जितेति**। इन्द्रियाणां मनसश्च विषयैः संसर्गः सङ्गः स एव कामसंकल्पादिदोषहेतुत्वाद्दोष इत्युच्यते। ध्यानश्रवणदर्शनादिभिश्चित्तस्येन्द्रियाणां च सति विषयसंसर्गे कामसंकल्पादयो दोषा जायन्ते। ततो भोक्तृभोगाद्याध्यसस्ततः प्रवृत्तिस्ततः प्रत्यग्दर्शनविच्छित्तिस्ततो, 'ध्यायतो विषयान्पुंसः' इत्युक्तानर्थपरम्परापत्तिस्ततस्तदभवाय जितो वर्जितः सङ्गदोषो यैस्ते जितसङ्गदोषाः। बहिःप्रावण्यरहिता इत्यर्थः। यतो नित्यमध्यात्मनित्यास्तत एव निर्मानमोहास्तत एव विनिवृत्तकामास्तत एव जितसङ्गदोषास्तत एव सुखदुःखसंज्ञैः सुखमिति दुःखमिति संज्ञा संज्ञानं येभ्यो जायते तानि सुख दुःखसंज्ञानि शीतोष्णप्रियाप्रियशत्रुमित्रादीनि द्वन्द्वानि तैर्द्वन्द्वैः सुखदुःखसंज्ञैर्विमुक्ताः। गुणातीता इत्यर्थः। यत एवंलक्षणा अतएवामूढाः अहंममेदमिति भेदप्रत्ययवन्तो मूढास्तद्विलक्षणास्त्वमूढा निःशेषनिवृत्ताविद्याः ब्राह्मणाः 'अमौनं च मौनं च निर्विद्याथ ब्राह्मणः' इत्युक्तलक्षणा यतयो ब्रह्मविदः। अव्ययं न केनापि व्येति नश्यतीत्यव्ययम् 'नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययम्' इति श्रुतेः। अव्ययमित्युक्त्या निर्विशेष ब्रह्मव्यतिरिक्तानां व्ययः सूचितस्तेन मुमुक्षूणां निर्विशेषमेव परं ब्रह्म ज्ञातव्यं स्मर्तव्यं वक्तव्यमिति ज्ञापितं भवति। यत्सर्ववेदान्तप्रसिद्धं यत्प्राप्य मुक्ता न निवर्तन्ते तदव्ययं शाश्वतं नित्यशुद्धबुद्धमुक्तस्वभावं सच्चिदानन्दैकरसमद्वितीयं पदं परं ब्रह्म गच्छन्ति। उपाधिविच्छित्त्या भासपरिच्छित्तिं परित्यज्य पूर्णत्वं गच्छन्तीत्यर्थः ॥५॥

ननु ब्रह्मविष्ण्वादिलोकप्राप्तानामिव निर्विशेषब्रह्मभावं प्राप्तानामपि पुनरावृत्तिः किं न स्यादित्याशङ्कायां 'न स पुनरावर्तते न स पुनरावर्तते' इति दहराद्युपासनं कृतवतः क्रमेण मुक्तिं गच्छतः सगुणोपासकस्यैव पुनरावृत्त्यभावः श्रूयते किमु वक्तव्यमुपाधिविलये साक्षान्निर्विशेषमेव परं ब्रह्म सच्चिदानन्दैकरसं स्वात्मभावेन प्राप्तवतां ब्रह्मविदां पुनरावृत्तिर्नास्तीतीममर्थं बोधयितुमर्थाद्ब्रह्मणः सूर्याद्यभास्यत्वं स्वयंज्योतिष्ट्वं तस्यैव निजस्वरूपत्वं च बोधयति—

न तद्भासयते सूर्यो न शशाङ्को न पावकः।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ ६ ॥

न तदिति। तत्पूर्वोक्तं मुक्तोपसृप्यं धाम परं ज्योतिःस्वरूपं पदशब्दार्थं परं ब्रह्म परमज्योतिष्ट्वात्सर्वप्रकाशनशक्तिसंपन्नः सहस्रांशुरपि

सूर्यो न भासयते न प्रकाशयितुं शक्नोतीत्यर्थः । 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः' इति श्रुतेः । न शशाङ्कश्चन्द्रोऽपि भासयते । पावकोऽग्निरपि न भासयते । चक्षुरादीनां मनसश्च ब्रह्मानवभासकत्वे इदमुपलक्षणं न चक्षुरादीनामपि भास्यं ब्रह्मेत्यर्थः । 'न तत्र चक्षुर्गच्छति', 'न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैः' इति च श्रुतेः । एतेन बहिर्भौतिकस्य भास्करादेश्चक्षुरादेश्चान्तर्बुद्ध्यादेश्चाभास्यत्वे ब्रह्मणस्त्वभौतिकत्वमतिसूक्ष्मतमत्वं सर्वान्तरत्वमन्यानवभास्यत्वं सर्वप्रकाशकत्वमदृश्यत्वमजडत्वमप्रमेयत्वं निरवयवत्वं निष्क्रियत्वं निर्विकारत्वं नित्यशुद्धत्वं च सिद्धम् । 'न सन्नासन्न सदसत्' इति, 'तस्मात्तमः संजायते' इति, 'सूक्ष्मात्सूक्ष्मतरम्' इति, 'एष त आत्मा सर्वान्तरः' इति, 'न तत्र सूर्यो भाति' इति, 'तस्य भासा सर्वमिदं विभाति' इति, 'अत्रायं पुरुषः स्वयंज्योतिः' इति, 'स्वप्रकाशानन्दघनम्' इति, 'अदृश्यमव्यवहार्यम्' इति, 'साक्षी चेता केवलः' इति, 'अप्रमेयं ध्रुवम्' इति, 'निष्कलं निष्क्रियम्' इति, 'चिद्रूप एवाविकारो ह्युपलब्धा' इति, 'नित्यं शुद्धं बुद्धं मुक्तं सत्यं परिपूर्णमद्वयं सदानन्दचिन्मात्रम्' इत्यपि च श्रुतेः । एवं परमज्योतिषो ब्रह्मणः सूर्याद्यभास्यत्वेन अभौतिकत्वादिलक्षणसंपत्तिं सूचयित्वा यदुपक्रान्तं तत्प्रतिपादयति—**यद्गत्वेति** । निर्मानमोहत्वादिमुक्तलक्षणलक्षिता महात्मानो यतयो यदभौतिकत्वादिलक्षणं धाम परमज्योतिःस्वरूपं पदशब्दार्थं परं ब्रह्म गत्वा तद्भावं प्राप्य न निवर्तन्ते । पुनरहंममेति संसाराय नावर्तन्त इत्यर्थः । यदादित्यादीनामभास्यं यद्भावापन्नानामपुनरावृत्तिः यदपूर्वमनपरमनन्तरमबाह्यमखण्डानन्दैकरसमद्वितीयं तद्धाम परं ज्योतिर्मम विष्णोर्नैजं तत्त्वमायिकं स्वरूपमित्यर्थः । ननु 'सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामहे' इति सत्संपन्नानामपि पुनरावृत्तिः श्रूयते, कथं 'यद्गत्वा न निवर्तन्ते' इति सत्संपन्नानां पुनरावृत्त्यभावः प्रतिपाद्यत इति चेत्सत्यम् । सत्संपन्नानामपि श्रुत्या यद्यपि सतः पुनरावृत्तिरुच्यते तथापि तत्र विशेषोऽस्ति स उच्यते । 'प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्' इति विद्वदविदुषोरुभयोरपि सत्संपत्तौ समानायामप्यविद्याकामादिसंसारबीजविशिष्टस्त्वविद्वान् सत्संपद्यापि संसारहेतोरविद्यादेर्विद्यमानत्वात्तद्वेगेन सतः पुनरुत्क्रामति । तथाच श्रुतिः—'तेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा

अनूत्क्रामन्ति', 'स विज्ञानो भवति स विज्ञानमेवान्ववक्रामति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च', 'अविद्यां गमयित्वान्यं नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वान्येषां वा भूतानाम्' इति, 'तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य' इति, 'कामान् यः कामयते मन्यमानः स कामभिर्जायते तत्रतत्र' इति, 'पुण्यः पुण्येन कर्मणा भवति पापः पापेन' इति, 'नाभुक्तं क्षीयते कर्म' इत्यादिस्मृतिश्च। ततोऽविद्याकामादिबलेन शेषकर्मानुभूत्यै अविद्याकामादिमन्तोऽनात्मज्ञाः सत्संपद्यापि पुनरावर्तन्ते यथा सुषुप्तेः न तथा ब्रह्मवित्तमो यतिरावर्तते। सदेकत्वविज्ञानाग्निना अविद्याकामादेर्निःशेषदाहादुपाधिविलये स्वस्वरूपमेव निर्विशेषं नित्यशुद्धं परं ब्रह्म प्राप्तवतो ब्रह्मविदः पुनर्व्युत्थानहेतोरभावाद्ब्रह्मात्मनावस्थितिं विना पुनरुत्क्रमणं न संभवति तथा अविद्यादिमतः। तथा श्रुतिः—'गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति', 'योऽकामो निष्काम आप्तकाम आत्मकामः', 'न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति', 'पर्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः' इति, 'यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्' इति च कूटस्थत्वादात्मनो निर्गमागमायोगाच्च। यथा महाकाशस्यैवं सतो घटाकाशस्य घटोपाधिना भिन्नवत्प्रतीयमानस्य घटनाशे स्वरूपेण महाकाशात्मभावस्थितिं विना पुनरावृत्तिर्न संभवति, तथा ब्रह्मण एव सत आत्मनोऽप्यविद्योपाधिना भिन्नवत्प्रतीतस्योक्तरीत्या, अविद्यातत्कार्यविनाशे स्वरूपेण ब्रह्मात्मनावस्थितिं विना पुनरावृत्तिर्न संभवति। कूटस्थत्वात्क्रियाश्रयत्वानुपपत्तेर्यतस्ततः सम्यग्दर्शनेन ब्रह्मनिष्ठया चाविद्यादिविनाशादुपाधिविलये निर्विशेषनित्यशुद्धब्रह्मभावं गतानां महात्मनां नास्ति पुनरावृत्तिरिति सिद्धम् ॥ ६ ॥

एवं संसारवृक्षस्वरूपं ज्ञात्वा विरक्तस्य सदसद्विवेकिनो मोक्षैककामनया संन्यस्तसर्वकर्मणो यतेः सद्गुरुप्रसादजन्यज्ञानेन ब्रह्मावाप्तिमपुनरावृत्तिं च प्रतिपाद्याधुना अकृतश्रवणानामेव यतीनामनात्मन्यात्मत्वभ्रमविशेषनिवृत्तये ब्रह्मण एवाविद्योपाधिवशाज्जीवत्वमिति बोधयितुं जीवस्य ब्रह्मांशत्वमात्मनो देहेन्द्रियादिव्यतिरिक्तत्वमसंसारित्वं च प्रतिपादयति—

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ ७ ॥
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ ८ ॥

ममैवेति त्रिभिः । ममैव निर्विशेषस्य चिदेकरसस्य ब्रह्मणोंऽश इवांशोऽविद्यया कल्पितो भागः । जीवलोके संसारे । यद्वा जीवेन लोक्यते अनुभूयत इति जीवलोकः क्षेत्रं तत्र जीवभूतः नामरूपव्याकरणाय क्षेत्रज्ञतां गतः । प्रमाता भूत्वा तिष्ठतीत्यर्थः । ननु निरवयवस्य निर्विशेषस्य परस्य ब्रह्मणोंऽशो जीव इत्यंशांशित्वकल्पना न युज्यते। सांशत्वे सावयवत्वमनित्यत्वं सद्वितीयत्वं च स्यात्। 'निष्कलं निष्क्रियम्' इति, 'एकमेवाद्वितीयम्' इत्यादिश्रुतिविरोधश्च स्यादिति चेत्त्वमत्र प्रष्टव्यः। त्वया किं ब्रह्मणोऽन्यः कश्चिज्जीवोऽस्तीत्युच्यते, उत ब्रह्मण एव जीवत्वमुच्यते, किंवा जीव एव नास्तीत्युच्यते। न तृतीयः। तथैवाहमस्मीति पुरोविद्यमानस्याभावप्रसङ्गात् । तदिष्टापत्तिरेवेति चेन्न । प्रत्यक्षविरोधापत्तेः । आद्ये सचेतनो वा किमचेतनो वेति। न द्वितीयः। अहं ममेदमिति तवैव ज्ञानाभावप्रसङ्गात्, सुषुप्तिवत्सदा सर्वत्र व्यवहारलोपप्रसङ्गाच्च। नाद्यः। 'साक्षी चेता केवलः' इति ब्रह्मण एव चेतनत्वश्रवणात्तदतिरिक्तस्य चेतनत्वायोगात्। तर्हि ब्रह्मण एव जीवत्वमिति चेन्न। सर्वस्यापि प्राणिमात्रस्य ब्रह्मैवाहमिति पूर्णत्वासंसारित्वज्ञानप्रसङ्गात्, संसाराभावप्रसङ्गाच्च । तथात्वे प्रत्यक्षादिसर्वप्रमाणविरोधप्रसङ्गात् । तर्ह्यविद्यया ब्रह्मण एव जीवत्वमिति चेत्त्वमायुष्मान् भव । अयमेवार्थो गत्यन्तरमपश्यता भगवताप्युच्यते ममैवांशो जीवलोके जीवभूत इति । ननु ब्रह्मण एवास्त्वविद्यया जीवत्वं तथापि निरवयवस्यैकस्यैव ब्रह्मणः कथमंशांशिभाव उपपद्यत इति चेदविद्योपाधितः संभवति, यथा निरवयवस्यैकस्यैव महाकाशस्य घटोपाधिवैशिष्ट्याद्घटाकाशत्वं कल्पयित्वा घटाकाशो महाकाश इत्येकस्यैव महाकाशस्यांशांशिभावः कल्पित उपपद्यते तद्वद्ब्रह्मणोऽप्येकस्याप्यविद्याप्रत्युपस्थापितबुद्ध्याद्युपाधिवैशिष्ट्यात्तदवच्छिन्नस्यांशत्वं कल्पयित्वा जीवो ब्रह्मांश इति ब्रह्मण एकस्यैवांशांशिभावः कल्पित उपपद्यते नतु वस्तुनोऽस्तीत्युच्यते । तथात्वे त्वदुदीरितो दोषः प्रसज्येत श्रुतिविरोधश्च स्यात्तदभावान्न काचिदप्यनुपपत्तिर्यतस्ततो ब्रह्मण एव उपाधिविशिष्टस्य जीव इति व्यपदेशः यथाग्नेरेव स्नेहाक्तवर्तियोगेन दीप इति व्यपदेशस्तद्वत् । नन्वसङ्गस्य ब्रह्मणः कथमुपाधिसंबन्धः, कथं वा

विकारित्वमिति चेदुच्यते । यथाऽङ्गस्यैव शङ्खस्य नेत्रस्थपीतिम्ना संबन्ध आध्यासिकस्तेनैव पीतः शङ्ख इति पीतत्वं च सिध्यति, तद्वद्ब्रह्मणोऽप्युपाधिना संबन्ध आध्यासिकस्तेनैवात्मा करोति भुङ्क्ते इति संसारित्वं च सिध्यत्यात्मन आध्यासिकं तन्न वास्तवं 'ध्यायतीव लेलायतीव' इति श्रवणात्। इममेवाध्यासिकं संसारमात्मनः प्रतिपादयति प्रकृतिस्थानि कर्षतीति श्लोकद्वयस्याप्यन्वयानुरूपेणैकमत्येनार्थो वर्णनीयः । सनातनः ब्रह्मत्वात्सनातनो नित्यस्तत एवेश्वरः देहेन्द्रियादेः प्रवृत्तिहेतुत्वात्तत्स्वामी जीवः । चस्त्वर्थोऽपिर्वार्थः । यत्तु यदातु वा उत्क्रामत्युपात्तदेहान्निष्क्रामति तदा मनःषष्ठानि मनः षष्ठं येषां तानि मनःषष्ठानीन्द्रियाणि चक्षुरादीनि वागादीनि इन्द्रियाणीति प्राणानामप्युपलक्षणम्। प्राणांश्च प्रकृतिस्थानि त्याज्यदेहनिष्ठानि कर्षत्याकर्षति । प्राप्तव्यशरीरे विषयोपभोगार्थं गृह्णातीत्यर्थः । एतच्छरीरादन्यच्छरीरं यत् यदावाप्नोति तदा वायुराशयात् पुष्पस्थानात् गन्धानिव कुसुमावयवानतिसूक्ष्मानिव एतानि मनःप्राणोभयेन्द्रियाणि गृहीत्वा संयाति शरीरान्तरं गच्छतीति द्वयोरर्थः ॥ ७ ॥ ८ ॥

इन्द्रियाणि संगृह्य शरीरान्तरं गत्वा तत्र किं करोतीत्याकाङ्क्षायामाह—

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९ ॥

श्रोत्रमिति। श्रोत्रं चक्षुः स्पर्शनं त्वगिन्द्रियम्। चकारः समुच्चयार्थः। रसनं जिह्वां घ्राणमपि । एवोऽप्यर्थः । चकारात्कर्मेन्द्रियाण्यपि मनः षष्ठमन्तरिन्द्रियं चकाराद्बुद्धिमहंकारं चाधिष्ठायोपादाय भोगसाधनानि कृत्वा स्वयमयं जीवः क्षेत्रज्ञ आत्मा शरीरे वर्तमानः सन् विषयान् शब्दादीनुपसेवते उपलभते । 'एतस्मिन् बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च' इति श्रवणादिन्द्रियार्थसन्निकर्षात्समुत्पद्यमानां पुण्यपापक्रियामिन्द्रियाण्यर्थांश्च पश्यतीत्यर्थः । अत्र 'शरीरं यदवाप्नोति यच्चाप्युत्क्रामति' इति शरीरादुत्क्रमणतत्संक्रमणप्रतिपादनेनात्मनो जीवस्य सूक्ष्मशरीरविशिष्टत्वं हेयोपादेयात् स्थूलाद्भिन्नत्वं च प्रतिपादितं मनःषष्ठानीन्द्रियाणि कर्षति गृहीत्वा संयातीत्युक्त्या ग्राह्यग्राहकयोर्भेदस्य प्रत्यक्षत्वाद्बुद्धिमात्रोपाधिमत्त्वमिन्द्रियेभ्यो मनसोऽपि भिन्नत्वं च प्रतिपादितम् । श्रोत्रं चक्षुरित्यादिना श्रोत्रादीन्द्रियाणि मनो बुद्धिं चोपादाय विषयानुपलभत इत्युक्त्या चोपलब्धुरुपादेयेभ्यश्चोपलब्धेभ्यश्च भिन्नत्वस्य प्रत्यक्षत्वादिन्द्रियेभ्य इन्द्रियार्थेभ्यो मनसो बुद्धेश्च भोगायतनाद्देहादपि च व्यतिरिक्तत्वमेव सम्यक्प्रतिपादितम् । एतेन 'चक्षुषः साक्षी श्रोत्रस्य

साक्षी वाचः साक्षी मनसः साक्षी बुद्धेः साक्षी प्राणस्य साक्षी तमसः साक्षी सर्वस्य साक्षी ततोऽविक्रियः' इत्यादिश्रुतिप्रसिद्धमात्मनः सर्वसाक्षित्वमेवाविक्रियत्वं च सूचितं भवति ॥ ९ ॥

एवं देहेन्द्रियमनोबुद्ध्यादिभ्यो भिन्नमविक्रियमकर्तारमभोक्तारमेवात्मानं स्वं सर्वसाक्षित्वेन स्थितं महात्मानो ब्रह्मविदः सर्वदा पश्यन्त्यब्रह्मविदो मूढा न पश्यन्तीत्याह—

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ १० ॥

उत्क्रामन्तमिति । आद्यो वाशब्द इवार्थः । द्वितीयस्त्वप्यर्थः । उपाधावुत्क्रामति भिक्षादिकार्यमुद्दिश्य गच्छति सति 'ध्यायतीव लेलायतीव' इति न्यायेन स्वयमुत्क्रामन्तं गच्छन्तमिव प्रतीयमानं स्थिते सति स्थितमिव भुञ्जाने सत्यपि भुञ्जानमिव गुणान्विते गुणैः सत्त्वादिगुणविकारैः सुखदुःखकामक्रोधमोहभयादिभिरन्विते सति स्वयमपि गुणान्वितमिव प्रतीयमानं स्वभावेन निष्कलं निष्क्रियं निर्विकारं निर्विकल्पं चिदेकरसमानन्दघनमात्मानं स्वमविक्रियमेव ज्ञानचक्षुषः ज्ञानं प्रत्यग्भावापन्नशुद्धबुद्धिवृत्तिस्तदेव चक्षुः रूपादिग्रहणे चक्षुरिव स्वरूपग्रहणे येषां ते ज्ञानचक्षुषः शुद्धात्मानो यतयः पश्यन्ति । आहारादिषु सर्वेष्वपि कर्मसु सर्वदा स्वमात्मानं निष्कलं निष्क्रियं नित्यशुद्धं सर्वोपाधिविनिर्मुक्तं परिपूर्णमेव पश्यन्तीत्यर्थः । विमूढाः दृष्टादृष्टविषयाशावशीभूतात्मानो दुर्विदग्धा बहिर्मुखाः सदसद्विवेकवैराग्यसंन्यासशमदमादिसाधनसपत्त्या तीव्रमोक्षेच्छया च सद्गुरूपसत्त्या च सम्यक्संपादितविशेषज्ञानाभावादहमेवेदं सर्वमित्येतद्वाक्यार्थानुरूपमात्मानं न पश्यन्ति । किंतु कर्ता भोक्ता सुखी दुःखी हतोऽहं म्रिये ममेदं नष्टमित्येवात्मानं संसारिणं पश्यन्तीत्यर्थः ॥ १० ॥

ननु ये तु संसिद्धाः प्रबुद्धाः शुद्धात्मानस्त एवात्मानं सर्वोपाधिविनिर्मुक्तं केवलं पश्यन्ति नत्वन्ये इत्याशङ्कायां । न । येतु मत्प्रसादसंपत्त्या यतयो योगनिष्ठा भवन्ति तेपि पश्यन्ति नत्वन्य एवंलक्षणा इत्याह—

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥ ११ ॥

यतन्त इति । शास्त्राचार्यात्मेश्वरप्रसादसंपन्ना भूत्वा सदसद्विवेकतीव्रवैराग्यशमदमादिसाधनसंपत्त्या यतन्तः श्रवणमननादिभिर्ज्ञानसिद्धौ

प्रयत्नवन्तः सन्तस्तेन लब्धज्ञाना ये यतयो योगिनो भवन्ति 'लक्ष्यैकतां समासाद्य निर्विकारतयात्मनि। मनसो निश्चलत्वेन स्थितिर्योग इतीर्यते॥' इत्युक्तलक्षणास्तीव्रमोक्षेच्छावैराग्याभ्यां बहिः प्रावण्येनैव मुख्येन चित्तस्यात्मन्यविकारात्मना स्थितिरूपो योगो येषां ते योगिनः स्वात्मन्येवाहितचित्ता भवन्ति। तेऽपि चात्मनि बुद्धाववस्थितं बुद्ध्यादिप्रकाशकमात्मानं पश्यन्ति। अयमेवाहमिति स्वात्मना साक्षात्कृत्य स्वमकर्तारमभोक्तारमसंसारिणमेव पश्यन्तीत्यर्थः। मत्प्रसादरहिता ये तु यतन्तः श्रवणमननादिभिरात्मसाक्षात्कारसिद्धये बहुधा प्रयत्नं कुर्वन्तः शृण्वन्तः श्रावयन्तोऽप्यकृतात्मानः अकृतो बाह्यवासनाभिर्विषयकर्मशास्त्रादिगोचराभिरवशीकृतो बहिरेव प्रवाहायमान आत्मा चित्तं येषां ते अकृतात्मानः अविद्यास्मितारागद्वेषाभिनिवेशविशिष्टास्तत एवाचेतसो विवेकशून्या बहिर्मुखा न पश्यन्ति। अयमेवाहमस्मीत्यात्मानं निर्विशेषं परं ब्रह्म स्वात्मत्वेन न जानन्तीत्यर्थः॥ ११॥

यस्माद्यत्नवतामप्यकृतात्मनां मत्प्रसादाभावादात्मसाक्षात्काराभावस्तस्मान्मुमुक्षोर्मत्प्रसादसिद्ध्यै मदुपास्तिरवश्यं कर्तव्या, सर्वत्र मद्बुद्ध्या मदुपास्तिं कुर्वतां रागादिदोषा न भवन्ति, तेन चित्तप्रसादो ज्ञानं च सिध्यतीति बोधयितुं स्वस्य सार्वात्म्यं प्रतिपादयति—

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥ १२॥

यदिति चतुर्भिः। आदित्यगतं आदित्यस्य बहिरन्तश्च सर्वतो व्याप्य वर्तमानं यत्तेजोऽखिलं जगत् भासयते। तथा यच्चन्द्रमसि तेजः जगद्भासयते, तथा यदग्नौ तेजः जगद्भासयते तत्तेजो मामकं विद्धि। 'यदग्ने रोहितं रूपम्' इति न्यायेनादित्यादीनां तेजोव्यतिरेकेण पृथक्स्वरूपाभावात्तेजोमात्रत्वमेवेति सिद्धम्। सूर्यचन्द्राग्न्यात्मकं तेजो मामकमित्यत्र राहोः शिर इतिवत् मच्छब्दतेजःशब्दार्थयोरेकत्वमेव। तेन सूर्यचन्द्रादयस्त्वहमेव मम विभूतित्वात्तत्र मद्बुद्धिः कर्तव्येति बोधितं भवति १२

गामाविश्य च भूतानि धारयाम्यहमोजसा।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः॥ १३॥

किंच **गामिति।** अहमीश्वर एवौजसाऽपरिमितमायाशक्तिबलेन गां भूमिं जलं स्वस्नेहसंभावितचिक्कणत्वबलेन भित्तिमिवाविश्य सर्वतो व्याप्य भूतानि स्थावरजङ्गमानि सर्वाणि धारयामि। यथा वायुः

स्वशक्त्या मेघमण्डलं प्रविश्य जलानि धारयति तद्वदित्यर्थः । यद्यप्यतीन्द्रियत्वाद्वायुर्मेघमण्डले न दृश्यते तथापि योगिदृष्ट्या युक्त्या च विचार्यमाणे वायुव्यतिरेकेण मेघस्य पृथक्स्वरूपं न विद्यते एवमयोग्यादौ व्याप्यस्य व्यापकेऽन्तर्भावदर्शनं च तद्वच्छक्तिद्वारा मद्व्याप्ताया भूमेर्मद्व्यतिरेकेण पृथक्स्वरूपं न विद्यते । ततो भूम्यां सर्वत्र मद्बुद्धिः कर्तव्येत्यर्थः । रसात्मकोऽमृतरसात्मकः पयःस्वरूपो वा यः सोमः स एव भूत्वा चन्द्रस्वरूपेण स्थितः सन्नहं व्रीहियवगोधूमाद्या वृक्षलतातृणगुल्माद्याश्च सर्वौषधीः पुष्णामि । पुष्टिमतीः करोमीत्यर्थः । एतेन चन्द्रोऽपि, चन्द्रामृतरसपुष्टाः सर्वा ओषधयोऽपि मम विभूतिस्तत्र मद्बुद्धिः कर्तव्येति सूचितं भवति ॥ १३ ॥

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४ ॥

किंच **अहमिति** । 'अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते' इति श्रुत्युक्तो यो जाठरोऽग्निः स एव भूत्वा अहं वैश्वानररूपेण प्राणिनां सर्वेषां देहमाश्रितः 'तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः' इति, 'नाभ्यामुपरि तिष्ठति' इति च श्रवणात्प्राणिनामुदरे स्थित्वा प्राणापानसमायुक्तः प्राणापानाभ्यामुच्छ्वासनिश्वासरूपाभ्यां पाकसहकारिभ्यां प्रज्वाल्यमानः सन् भक्ष्यभोज्यलेह्यचोष्यभेदेन चतुर्विधं प्राणिभिर्भुक्तमन्नं पचामि । यद्वा प्राणिनामिति सामान्योक्त्या सर्वैरपि प्राणवद्भिर्भुज्यमानमन्नं अद्यत इत्यन्नं पार्थिवमाप्यं तैजसं वायव्यं चैवंरूपेण चतुर्विधं पचामि । मनुष्यादीनां पार्थिवं, चातकादीनामाप्यं, वालखिल्यादीनां तैजसं, सर्पादीनां वायव्यं, एवंलक्षणं तत्तत्प्राणिजठरे स्थित्वा तैरशितमन्नं पक्वं करोमीत्यर्थः । एतेनाग्निस्वरूपेण मयाऽऽपादतलमस्तकं व्याप्तानां प्राणिनां मद्व्यतिरेकेण पृथक्स्वरूपाभावात्तेषु मया व्याप्तेषु प्राणिषु सर्वत्र मद्बुद्धिः कर्तव्येति सूचितं भवति ॥ १४ ॥

एवं जाठराग्निस्वरूपेणेश्वरेण व्याप्तानां सर्वप्राणिनामीश्वरविभूतित्वेनेश्वरमात्रत्वे सिद्धेऽपि भ्रमप्रमादाभ्यामप्ययं शिष्टोऽयं भ्रष्टोऽयं शूद्रोऽयं पुल्कस इति भेदबुद्धिरीश्वरोपासकैर्मुमुक्षुभिर्न कर्तव्येति तेषां सर्वत्र परमेश्वरत्वबुद्धिदार्ढ्याय पुनरपि सर्वेषां प्राणिनां स्वव्याप्त्या स्वमात्रत्वं स्वोपास्त्या शुद्धात्मनां ज्ञानं तद्विपरीतानामज्ञानं च मत्त एव सिध्यतीति प्रतिपादयति—

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥ १५ ॥

सर्वस्येति। 'ममैवांशो जीवलोके जीवभूतः' इति, 'ईश्वरो जीवकलया प्रविष्टः' इत्युक्तरीत्या सर्वस्य च ब्रह्मादिस्तम्बान्तस्य प्राणिजातस्य। चकारः सन्निवेशस्य सर्वसमत्वसूचनार्थः। हृदि बुद्धिगुहायामहं परमात्मा क्षेत्रज्ञरूपेण सन्निविष्टः सन्निहितो भूत्वा तिष्ठामि। अतः प्राणिवर्गः सर्वो ह्यहमेवेत्यर्थः। एतेन भेददृष्टेरनवकाश इति सूचितम्। एवं सर्वं परमेश्वर एवेति सर्वत्र तद्बुद्ध्या परमेश्वरोपास्तिं कुर्वतां तामकुर्वतां च फलमाह—**मत्त इति**। मत्तः परमेश्वरादेव मदुपास्त्या शुद्धात्मनां शास्त्राचार्यानुग्रहात्स्मृतिः, 'स आत्मा तत्त्वमसि' इति श्रीगुरुभिर्यो निर्विशेषस्त्रिविधपरिच्छेदशून्य आत्मा त्वमिति बोधितः स एवाहमिति तस्मिन्नेवात्मनि स्वात्मत्वस्मृतिः, सर्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य च ब्रह्ममात्रत्वज्ञानं च भवति। मदुपास्तिविहीनानां मलिनबुद्धीनां रागादिदोषदुष्टानां मत्त एवेश्वरात्तदपोहनं तयोः स्मृतिज्ञानयोरपोहनमसंभवश्च भवति। किंच वेदान्तकृत् 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रवणाद्ब्रह्मणे वेदान्तानुग्रहकर्ताहमेव। यद्वा लोके शिष्येभ्य आचार्यरूपेण वेदान्तार्थप्रकाशनकर्ताहमेव। वेदवित् वेदार्थं ब्रह्म निर्विशेषं मदनुग्रहाद्गुर्वनुग्रहाच्च यः स्वात्मना वेत्ति स वेदवित् ब्रह्मवेत्ताहमेव। सर्वस्य चाहं हृदि सन्निविष्ट इति सर्वस्य प्राणिमात्रस्यात्मव्याप्त्या स्वमात्रत्वे सिद्धे वेदान्तकृद्वेदविदेव चाहमिति विशेषोक्तिर्मूढानाममूढानां च वेदान्तोपदेष्टरि गुरौ च ब्रह्मविद्यपि च परमेश्वरत्वबुद्धिरवश्यं कर्तव्येति बोधनार्था। 'यदादित्यगतं तेज' इत्यादिना मुमुक्षूपासनार्थं स्वविभूतौ प्रतिपादितायां सत्यामिदमेव परमेश्वरस्य पारमार्थिकं रूपमिति प्राप्ते स्वयाथात्म्यं बोधयितुमाह—**वेदैरिति**। 'सर्वे वेदा यत्पदमामनन्ति' इति न्यायेन सर्वैर्ऋगादिभिर्वेदैर्वेदान्तैर्वेद्यः 'सत्यं ज्ञानमनन्तं ब्रह्म', 'विज्ञानमानन्दं ब्रह्म', 'आनन्दो ब्रह्म', 'तदेतद्ब्रह्मापूर्वं', 'अस्थूलमनण्वह्रस्वमप्राणममुखमश्रोत्रमवागमनोऽतेजस्कमचक्षुष्कमनामगोत्रं', 'अशब्दमस्पर्शमरूपमव्ययं', 'निष्कलं निष्क्रियं शान्तं', 'नित्यं शुद्धं बुद्धं मुक्तं सत्यं सूक्ष्मं परिपूर्णमद्वयं सदानन्दचिन्मात्रं शान्तं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः', 'तत्त्वमसि' इत्यादिभिर्ज्ञातव्यो यो निर्विशेषनित्यशुद्धबुद्धमुक्तस्वभावः सच्चिदानन्दैकरसोऽद्वितीयः परमात्मा स एवाहं परमार्थतो नैवैष उक्तलक्षणो मायोपाधिक इत्यर्थः ॥ १५ ॥

विचक्षणानां युक्तिकुशलानां सूक्ष्मबुद्धीनामेव मुमुक्षूणां शुद्धात्मनां विवेकवैराग्यसिद्धये संसारं वृक्षत्वेन वर्णयित्वा, तदारूढानामविवेकिनामविरक्तानां मूढानां पतनं विना न कदापि च मोक्षफलं सिध्यतीत्यतो विवेकोत्थितवैराग्यखड्गेनैनं वृक्षं छित्त्वा, सदसद्विविच्य परं तत्त्वं ज्ञातव्यमिति तज्ज्ञाने प्रवृत्तिसिद्धये ब्रह्मविदां ब्रह्मप्राप्तिं तत्प्राप्तिसाधनं तत्फलं च निरूप्याधुना तेषां ज्ञातव्यस्य ब्रह्मणः स्वरूपमतन्निरासपूर्वकं बोधयति त्रिभिः । तत्राद्येन परस्य ब्रह्मणः पुरुषोत्तमाख्यस्य यदपेक्ष्य पुरुषोत्तमत्वं तौ पुरुषौ प्रकृतितत्कार्यलक्षणावुपाधी निर्दिशति । यदपवादेन ब्रह्मणोऽसंसारित्वं निर्विशेषत्वं शुद्धत्वं नित्यमुक्तत्वमद्वितीयत्वं च सिध्यति तदाह—

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १६ ॥

द्वाविमाविति । क्षरश्च । चकारः समुच्चयार्थः । क्षरः स्वकाले क्षरति नश्यतीति क्षरः नश्वरो महदादिस्थूलान्तः संसारलक्षणः कार्यवर्गः सर्वोऽपि एकः पुरुषः । अक्षरश्च । चः समुच्चयार्थः । पुरुषो द्वितीयः क्षरो यथा स्वकाले क्षरति तथा अयं न क्षरतीत्यक्षरः परमात्मविज्ञानेन विना न विनश्यति । मूलप्रकृतिः संसारकारणलक्षणः पुरुषः । पुरुषस्यात्मन उपाधित्वेन द्वयोरपि क्षराक्षरयोः पुरुषत्वं नतु वस्तुतः । परिच्छिन्नत्वादनित्यत्वादसत्त्वाच्च । एवकारोऽत्रानुसंधातव्यः । अर्थानुसारित्वात् पदविनियोगस्य । ताविमौ क्षराक्षरौ द्वावेव पुरुषौ लोके संसारे पुरुषस्यात्मनः संसारित्वसिद्धये क्षराक्षरौ द्वावेव पुरुषौ पुरुषोपाधी नान्यस्ततः कश्चिदित्येवकारस्यार्थः । कौ तौ क्षराक्षरावित्याकाङ्क्षायामाह—**क्षर इत्यादिना** । भवन्तीति भूतान्याकाशादीनि भूम्यन्तानि देहेन्द्रियादीनि भूतकार्याणि च सर्वाणि क्षर इत्युच्यन्ते । अभिव्यक्तनामरूपात्मकं महदादिविकारजातं देहान्तं सर्वं क्षराख्यः पुरुष इत्यर्थः । महादादिपृथिव्यन्तः समष्टिव्यष्ट्यात्मकः स्थूलसूक्ष्मप्रपञ्चलक्षणकार्यराशिः कूट इत्युच्यते सर्वोऽपि विकारमात्रः । तत्र कूटे स्वकार्ये सर्वत्र कारणत्वेन घटादिषु मृदिव बहिरन्तश्च सर्वतो व्याप्य तिष्ठतीत्यव्यक्तं प्रकृतिशब्दवाच्यं कूटस्थ इत्युच्यते । यद्वा पुत्रसन्ततेः पुत्रिकासन्ततेश्च मूलभूतः पुरुषः कूटस्थ इत्युच्यते । तद्वद्रजःकार्यसन्ततेस्तमःकार्यसन्ततेः सत्वकार्यसन्ततेश्च मूलभूता त्रिगुणात्मिका प्रकृतिः कूटस्थ इत्युच्यते । यद्वा कूटसाक्षीत्यत्र कूटशब्दः कपटवाची । तत्र कूटे कपटे पुरुषस्य विपरीतभावाचरणे

तिष्ठतीति कूटस्थो माया सैवाक्षर इत्युच्यते । क्षरश्चाक्षरश्चैतत् द्वयमेवात्मनः संसारित्वस्य कारणम् । एतन्निवृत्तिकारणं तु 'न सत्तन्नासदुच्यते' इति न्यायेन तयोर्निरसनमेव । एवं निरस्ताशेषे परे ब्रह्मण्येवात्मभावापत्त्या पुनरनात्माऽनालम्बनमेव विदेहमुक्तिकारणमिति पूर्वमेवोक्तं तन्न विस्मर्तव्यम् ॥ १६ ॥

एवं क्षराक्षरयोः कार्यकारणयोरुभयोः पुरुषशब्दवाच्यत्वं प्रतिपाद्य, एताभ्यामेवोपाधिभ्यामुभाभ्यां भिन्नं तद्धर्मकर्माद्यस्पृष्टं नित्यशुद्धबुद्धमुक्तस्वभावं पदशब्दार्थं मुक्तोपसृप्यं परं तत्त्वं निर्दिशति—

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १७ ॥

उत्तम इति । उत्तमः सर्वोत्कृष्टतमः । 'दिवो ज्यायानन्तरिक्षाज्ज्यायान्' इति, 'अतो ज्यायांश्च पूरुषः' इति सर्वोत्कृष्टतमत्वश्रवणादात्मा स्वयमुत्तमः सत्तया स्फूर्त्या च महत्तमो निरतिशयवैभवः परिच्छेदरहित इति यावत् । तत एव सर्वतः परिपूर्णत्वात्पुरुष उत्तमस्त्वन्यः । उत्तमत्वे सति पुरुषत्वस्यात्मानन्यगामित्वसूचनार्थस्तुशब्दः । उत्तमत्वविशेषणविशिष्टः पुरुषस्त्वन्यः क्षराक्षरशब्दवाच्याभ्यां संसारसंसारकारणाभ्यामुभाभ्यां पुरुषाभ्यामन्यः परममहत्त्वेन चेतनत्वेन ज्ञातृत्वेन प्रकाशकत्वेन प्रकाशस्वरूपत्वेन चोत्कृष्टत्वादुत्तमत्वविशेषणविशिष्टः पुरुषोऽसंसारी प्रत्यगात्मा ताभ्यां पुरुषाभ्यामुक्तलक्षणो भिन्न एव भवति । यथा स्थावरजंगमाभ्यां तत्प्रकाशको ज्ञाता च भानुस्ताभ्यां भिन्नस्तद्धर्मकर्माद्यस्पृष्टश्च भवति, तथैवाहमज्ञ इति दुष्टो ममायमहंकारादिरिति स्वप्रकाश्याभ्यामज्ञानतत्कार्याभ्यां ज्ञाता तत्प्रकाशकश्चात्मा भिन्न एवानुभूयते । ततो ज्ञातृत्वेनातिसूक्ष्मत्वेनासङ्गत्वेन च ताभ्यां भिन्न एव सन् तद्धर्मकर्मादिभिश्च न स्पृश्यत इति ज्ञातव्य इत्यर्थः । ननु महतोऽप्यतिसूक्ष्मस्यापि च वायोः स्वभिन्नैर्दुष्टादुष्टद्रव्यैः संयोगे दुष्टादुष्टगन्धलेपो दृश्यते दुर्गन्धिः सुगन्धिर्वायुरिति, तद्वदात्मनोऽपि पुरुषोत्तमस्य क्षराक्षरभिन्नत्वेऽपि तद्योगात्तद्धर्मकर्मादिलेपः स्यादित्याशङ्कायां । न । सावयवत्वाद्वायोः सर्वं संभवति निरवयवत्वादिधर्मैरात्मा ताभ्यामपि परमत्वान्न तद्धर्मकर्मादिभिर्लिप्यत इति बोधयति—**परमात्मेति** । 'अन्योऽन्तर आत्मा प्राणमयः' इत्यन्नमयादीनां कूटस्थान्तानां कोशानामात्मत्वश्रवणात् आत्मशब्दवाच्याभ्यां क्षराक्षराभ्यां निरवयवत्वेनातिसूक्ष्मत्वेनान्तरत्वेन प्रत्यक्त्वेन ज्ञातृत्वेन भासकत्वेन व्यापकत्वेनासङ्गत्वेन च निरतिशयत्वा-

दात्मा प्रत्यग्लक्षणः प्रकृतितत्कार्यैः स्प्रष्टुं शक्यत्वेन परम इत्युच्यते। परमश्चासावात्मा च परमात्मेत्युदाहृतः। 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इति, 'दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः। अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः' इति, 'अतो ज्यायांश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि' इत्यादिश्रुतिभिः प्रतिपादित इत्यर्थः। परमत्वचेतनत्वज्ञातृत्वप्रकाशकत्वादिधर्मैरुत्तमस्य पुरुषस्य यत् क्षराक्षराभ्यां संसारितद्धेतुभावापन्नाभ्यां पुरुषाभ्यामन्यत्वं प्रतिपादितं तदेवं पुनर्विशेषणैर्विस्पष्टयति—**यो लोकत्रयमिति**। क्षराक्षराभ्यामात्मनो भिन्नत्वमेवाह—**अव्यय इति**। सुषुप्तिसमाध्योः क्रमात्तयोर्व्यये नाशे सत्यपि स्वयं न व्येतीत्यव्ययः। हेतुगर्भितमिदं विशेषणम्। आत्मा पुरुषाभ्यामन्यः अव्ययत्वात् यन्नैवं तन्नैवं यथा बुद्ध्यादिः सुषुप्तिसमाध्योस्तद्वयसाक्षितया विद्यमानत्वादात्मनो व्ययाभावात्ततो नित्यत्वेन ताभ्यामन्यत्वमुत्तमत्वं च सिद्धम्। किंच ईश्वरः स्वसन्निधिमात्रेण तयोर्व्यापृतिहेतुत्वादीश्वरः। हेतुगर्भितमिदं विशेषणम्। आत्मा ताभ्यां भिन्नः तत्प्रवृत्तिहेतुत्वाद्राजवत् स्वप्रवर्त्यप्रधानादिभ्यो राज्ञो यथा भिन्नत्वमुत्तमत्वं च तद्वदात्मनोऽपि स्वप्रवर्त्याभ्यां ताभ्यां भिन्नत्वमुत्तमत्वं च सिद्धम्। किंच यो लोकत्रयमाविश्य बिभर्ति। लोक्यन्ते ज्ञायन्त इति लोकाः समष्टिव्यष्टिलक्षणाः स्थूलसूक्ष्मकारणदेहाः साभिमानिनः सावस्थास्तेषां त्रयं लोकत्रयं स्थूलसूक्ष्मकारणाख्यं शरीरत्रयं स्वाधारमाविश्य बहिरन्तश्च सर्वतो व्याप्य। बिभर्ति सत्तास्फूर्तिं च प्रयच्छन् धारयति। 'व्यक्ताव्यक्तं भरते विश्वमीशः' इति श्रुतेः। आत्मा स्वधार्याल्लोकत्रयाद्भिन्नः आधारत्वात् चित्राधारकुड्यवदित्यात्मनस्ताभ्यां भिन्नत्वमुत्तमत्वं च सिद्धम्। यद्वा लोक्यन्ते दृश्यन्त इति लोका जाग्रत्स्वप्नसुषुप्तयः साभिमानिभोग्यार्थास्तासां त्रयं लोकत्रयमाविश्य व्याप्य यो बिभर्ति प्रकाशयति 'जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते' इति श्रुतेः। आत्मा स्वप्रकाश्याल्लोकत्रयाद्भिन्नः प्रकाशकत्वात्सूर्यवदित्यनुमानात्। यो जागरमन्वभूवं यः स्वप्नमद्राक्षं यः सुखमस्वाप्सं सोऽहं तिष्ठामीति प्रत्यभिज्ञाया विद्यमानत्वादात्मनः प्रकाशकस्य लोकत्रयाभिन्नत्वे श्रुतिरनुमानं प्रत्यक्षं च प्रमाणं आत्मनो लोकत्रयप्रकाशकत्वसिद्ध्या नित्यत्वं परममहत्त्वं चेतनत्वं प्रकाशस्वरूपत्वमकर्तृत्वमभोक्तृत्वमविक्रियत्वं च सिद्धम्। अव्ययत्वेनेश्वरत्वेन

भर्तृत्वेन च क्षराक्षराभ्यां द्वाभ्यामपि पुरुषाभ्यामुत्कृष्टतमत्वादात्मनः पुरुषोत्तमत्वं सर्वप्रमाणसिद्धमिति भावः ॥ १७ ॥

अव्ययत्वेश्वरत्वभर्तृत्वादिधर्मैः पुरुषोत्तमत्वसिद्धिप्रकारमेव विशदयन् तादृशी नाम सिद्धार्थवत्ता मम वेदशास्त्रप्रसिद्धेति प्रतिपादनद्वारा स्वस्याविक्रियत्वमसंसारित्वं सच्चिदानन्दैकरसत्वमद्वितीयत्वं च सूचयति—

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १८ ॥

यस्मादिति । यस्मान्नित्यत्वज्ञातृत्वादिधर्मैः क्षरं महदादिस्थूलान्तमुत्पत्तिलयादिविकारविशिष्टं कर्तृत्वभोक्तृत्वादिसंसारधर्मकं कार्यलक्षणं पुरुषमहमतीतोऽतिक्रान्तोऽस्मि । नित्यत्वादिधर्मैर्विलक्षणत्वेनोत्कृष्टत्वादुत्तमोऽस्मीत्यर्थः । तथा प्रकाशस्वरूपत्वप्रकाशकत्वाधारत्वादिधर्मैर्महत्त्वादक्षरात्संसारबीजादव्यक्तादपि चोत्तमोऽस्मि यस्मादतोऽस्मादेव लोके पुराणे वेदे च वेदेषु च पुरुषोत्तमः पुरुषाभ्यामुक्तलक्षणाभ्यां निष्कलत्वनित्यत्वनिर्गुणत्वचेतनत्वादिधर्मैरुत्तमत्वात्पुरुषोत्तम इति । पुरुषतद्धर्मतत्कर्मतदवस्थासंबन्धलेशशून्यत्वान्नित्यशुद्धबुद्धमुक्तस्वभावः केवलसच्चिदानन्दैकरसः परमात्मेति प्रथितः प्रख्यातः । 'महतो व्यक्तमुत्तमं अव्यक्तात्तु परः पुरुषः' इति, 'पुरुषान्न परं किंचित्' इति, 'अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यगेकरसः' इति, 'तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः' इत्यादिश्रुतिभिः, 'कार्यकारणसंबन्धरहितः केवलः शिवः' इत्यादिस्मृतिभिश्च प्रतिपादित इत्यर्थः । चित्रमतीत्य भित्तिस्तिष्ठतीत्यत्र युक्त्या सूक्ष्मबुद्ध्या च विचार्यमाणे भित्तिव्यतिरेकेण चित्रस्य स्वरूपं न दृश्यते भित्तिसत्ताव्यतिरेकेण चित्रस्य पृथक्सत्ताभावात्तद्वत् क्षराक्षराख्यौ पुरुषावतीतोऽहमित्यत्र 'विकल्पो नहि वस्तु', 'मायामात्रमिदं द्वैतं', 'असत्त्वादन्यस्य' इत्यादिश्रुतिभिरिदं सर्वमसन्मायाकार्यत्वादिन्द्रजालवत्सर्वं सदेव सदनुवृत्तत्वान्मृदनुवृत्तघटादिवदित्यादियुक्तिभिश्च विचार्यमाणे परमात्मसत्ताव्यतिरेकेण तयोः पृथक्सत्ताभावात् 'सर्वं ह्येतद्ब्रह्म' इत्यादिश्रुतिवाक्यबलाच्च पुरुषोत्तमाख्यं परं ब्रह्माद्वितीयमेव भवति ततः सर्वं ब्रह्मैवेति ज्ञातव्यमिति सिद्धम् ॥ १८ ॥

एवं स्वमायातत्कार्यसंबन्धराहित्येन स्वस्य नित्यशुद्धबुद्धमुक्तस्वभावत्वं प्रतिपाद्य, मामेवंलक्षणं यो विजानाति स मुक्तो भवतीत्याह—

यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥

यो मामिति । जन्मानेकसहस्रेषु श्रद्धाभक्तिभ्यां सत्कर्माराधितपरमेश्वरप्रसादपात्रीभूतः शुद्धात्मा दैवीसंपद्विशिष्टो यो मुमुक्षुरधिकारी शमदमसंन्यासादिसाधनसंपत्त्या कृतश्रवणादिजन्यज्ञानेनैवं प्रतिपादितलक्षणं नित्यत्वेश्वरत्वादिधर्मवत्त्वेन क्षराक्षरविलक्षणं पुरुषोत्तमं सर्वसंसारधर्मनिर्मुक्तं सदानन्दैकरसमद्वितीयं मां परमात्मानं जानात्ययमेवाहमिति स्वात्मना साक्षाद्विजानाति स सर्ववित्सर्वं ब्रह्मैवेत्यपरोक्षतया सर्वं ब्रह्मैव वेत्तीति सर्ववित्सर्वज्ञस्तत एवासंमूढः देहेन्द्रियादिष्वहंममेति बुद्धिर्यस्य स संमूढस्तद्विलक्षणोऽसंमूढः देहादावहंभावममभावनिर्मुक्तः सन् । सर्वभावेनाहमेवेदं सर्वमिति भावः सर्वभावस्तेन सर्वभावेन सार्वात्म्येन सर्वात्मभावापत्त्या मां भजति प्राप्नोति । पतितेऽस्मिन् देहे पूर्णात्मना तिष्ठतीत्यर्थः । यद्वा यो मुमुक्षुरसंमूढः विषयाशाग्रहग्रस्तः संमूढस्तद्विलक्षणोऽसंमूढः सर्वैषणाभ्यो व्युत्थितः सन् मामेवंलक्षणं पुरुषोत्तमं स्वात्मना जानाति स सर्ववित् सर्वभावेन सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मैकदृष्ट्या मां भजति ज्ञानतत्फलप्रतिबन्धराहित्याय सदा मामनुसंधत्ते ब्रह्मज्ञानस्य तन्निष्ठायाः फलं निर्मानमोहत्वादिसाधनसंपत्त्या सर्वभावेन मां सदा भजमानस्तदव्ययं पदं गच्छतीति पूर्वमेवोक्तमिति बोद्धव्यम् ॥१९॥

'अशोच्यानन्वशोचस्त्वम्' इत्यारभ्योपदिष्टगीताशास्त्रस्येदमुपलक्षणं कृत्वा पञ्चदशाध्यायलक्षणमिदं शास्त्रमतिरहस्यमेतदर्थं बुद्ध्वा पुमान् कृतार्थो भवतीति प्रतिपादयन्नध्यायमुपसंहरति—

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥ २० ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ॥ १५ ॥

इतीति । इत्येवंप्रकारेण मयोक्तमिदमेतच्छास्त्रं निर्विशेषं परं तत्त्वं शास्ति बोधयतीति शास्त्रं पञ्चदशाध्यायरूपं गुह्यतमं ब्रह्मस्वरूपप्रतिपादनपरत्वादत्यन्तगोप्यं यस्मैकस्मैचिदनधिकारिणे दुष्टायासुरसंपत्तिमते न वक्तव्यं न श्रावयितव्यं च । यः कश्चित् ब्राह्मणादिः शुभाचारनिरतः सुशीलः सर्वैषणावैमुख्येन मोक्षैककामो भवति स एतत् पञ्चदशाध्यायरूपं शास्त्रं तत्प्रतिपादितमर्थं सद्गुरोरनु-

ग्रहाद्बुद्ध्वा सम्यग् ज्ञात्वा । बुद्धिमान् ब्रह्मैवाहमिति ज्ञानमेवात्र बुद्धिशब्दार्थस्तद्वान् ब्रह्मज्ञानसंपन्नस्तत्फलवांश्च स्यात् । कृतकृत्यश्च स्यात्कृत्यं ब्राह्मणादेः शुद्धात्मनो यत् कर्तव्यमग्निहोत्राद्यश्वमेधान्तमौपासनादीशानबल्यन्तं यच्चान्यच्छ्रौतं स्मार्तं च कर्म तत्सर्वं कृतमनेन ब्रह्मविदेति कृतकृत्यः सर्वकर्मानुष्ठाता स्यात् । सर्वात्मनि ब्रह्मणि विज्ञाते विदुषा सर्ववेदशास्त्रपुराणेतिहासागमप्रसिद्धं सर्वं कृतं भवति । तज्जन्यसुखं सर्वमनुभूतं च भवति । ब्रह्मानन्दे सर्वानन्दानामन्तर्भावात् । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः तस्माद्ब्रह्मविदेव कृतार्थ इति सिद्धम् ॥ २० ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः ।

ॐ सत्त्वादिगुणत्रयातिक्रमणाय यन्निष्ठा कर्तव्या तस्य निर्विशेषस्य परस्य ब्रह्मणः स्वरूपं तद्वेदनप्रकारं ज्ञानं तत्फलं च विदेहकैवल्यं प्रतिपाद्याधुना 'यो मामेवमसंमूढो जानाति पुरुषोत्तमम्' इत्यसंमूढस्यैव पुरुषोत्तमस्वरूपवेदनाधिकार इत्यधिकारिणो योगिनो मुमुक्षोरसंमोहत्वसिद्धये दैवी संपत्संपादनीया आसुरसंपद्वर्जनीयेति संपदोरुभयोः स्वरूपप्रदर्शनाय षोडशाध्याय आरभ्यते । तत्रादौ तयोरुभयोः संपदोर्दैवसंपद एव मोक्षसाधनत्वेनोत्तमत्वादेतस्या एव मुमुक्षोरुपादेयत्वाच्च प्रथमं दैवीं संपदं प्रतिपादयितुं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥

अभयमिति । अभयं भयाभावः आध्यात्मिकाद्युपद्रवेषु प्राप्तेष्वपि मनसि भयराहित्यं परेषां भयानुत्पादनं वा सर्वशास्त्रज्ञतया निर्विचिकित्सं सर्वकर्मानुष्ठातृत्वं वा अभयशब्दार्थः । सत्त्वसंशुद्धिः सत्त्वस्यान्तःकरणस्य संशुद्धिः शुद्धता रागद्वेषलोभमोहासूयामत्सराहंकारादिदोषाणामाश्रयत्वम् । ज्ञानयोगव्यवस्थितिः ज्ञानयोगः श्रवणमननादिस्तत्रैव मनसो विशिष्यावस्थितिर्व्यवस्थितिः सदा तदेकप्रावण्यम् । दानमर्थिभ्यः श्रद्धया यथाशक्त्या अन्नाद्यर्थसमर्पणम् । दमो दुर्वृत्तेर्बाह्यकरणानामुपरमश्चेतसो दण्डनं वा दमः । चकारः समुच्चयार्थः । यज्ञः श्रौतोऽग्निहोत्रदर्शपौर्णमा-

ससोमयागादिः । चकारात् स्मार्तः स्थालीपाकादिश्च गृह्यते । स्वाध्यायः ब्रह्मयज्ञदेवयज्ञादीनामप्युपलक्षणम् । तपः देवद्विजगुरुप्राज्ञपूजनादि शारीरं वाचिकं मानसिकं च वक्ष्यमाणं त्रिविधमपि । आर्जवं मनोवाक्कायकर्मसु सर्वत्र सदैकरूपता ॥ १ ॥

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ २ ॥

किंच—**अहिंसेति** । अहिंसा तीर्थेभ्योऽन्यत्र प्राण्यहिंसनं । सत्यं यथार्थभाषणं । अक्रोधो न क्रोधोऽक्रोधस्ताडनपीडनाद्यपकारेणाग्रहानुदयः । त्यागः नित्यं क्रियमाणकर्मणां श्रौतादीनामीश्वरार्पणबुद्ध्या फलत्यागः । शान्तिः अन्तःकरणस्य सर्वत्रोपरतिः । अपैशुनं परोक्षे परमर्माप्रकाशनम् । दया भूतेषु दीनेष्वार्तान्धादिषु करुणा । अलोलुप्त्वं विषयसन्निधाविन्द्रियाणां विकारराहित्यम् । मार्दवं चित्तस्य काठिन्यराहित्यं शीतलता । ह्रीर्लज्जा अकार्याचरणे चित्तस्य संकोचः अप्रवृत्तिकारणं । अचापलं मनस इन्द्रियाणां च निर्निमित्तव्यापारशून्यता ॥ २ ॥

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ॥ ३ ॥

किंच—**तेज इति** । तेजसस्तेजस्त्वं बुद्धेः सूक्ष्मता प्रकाशाधिक्यं वा । क्षमा क्षान्तिरविकारित्वेनागतोपद्रवसहिष्णुत्वम् । धृतिर्धैर्यं सति विक्षेपे देहेन्द्रियमनोबुद्धीनां निश्चलत्वापादनशक्तिः । शौचमान्तरं बाह्यं च । तत्र बाह्यं मृज्जलाभ्यां देहमलापनयनम् । आन्तरं सदसद्विवेकविज्ञानेन चित्तस्य दुर्वासनामलापनयनम् । अद्रोहः द्रोहः स्वापकारिणं हन्तुमिच्छा तदभावोऽद्रोहः । नातिमानिता च स्वस्यातिपूज्यत्वाभिनिवेशोऽतिमानस्तदभावो नातिमानः सोऽस्यास्तीति नातिमानी तस्य भावो नातिमानिता । स्वस्य प्रतिष्ठानपेक्षित्वं च । अभयादिनातिमानितान्ताः षड्विंशतिरेते सात्त्विका धर्माः । दैवीं संपदम् 'तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्' इत्युक्तत्वात् दीव्यते निर्मलत्वेन प्रकाशत इति देवः सत्त्वगुणस्तस्य संबन्धिनी दैवी संपत्समृद्धिरुत्कर्षस्तां दैवीं संपदमभिजातस्य पूर्वजन्मकृतपुण्याधिक्यात्सत्त्वाधिक्यमभि अनुसृत्य जातस्य । यद्वा देवानां संपदं दैवीमभिजातस्य भविष्यत्परमपुरुषार्थस्य पुण्यपुरुषस्य भवन्ति संभवन्तीत्यर्थः ॥ ३ ॥

दैवीं संपदमभिजातस्याभयादयो मोक्षहेतवः सात्त्विका गुणाः प्रभवन्तीति प्रतिपाद्यासुरीं संपदमभिजातस्यैते गुणा भवन्तीत्याह—

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ ४ ॥

दम्भ इति । वेषभाषाचारादिभिः स्वस्य महत्त्वसिद्धये स्वेनैव कुलशीलविद्याचारमहत्त्वप्रकटनं दम्भः । विद्यारूपकुलधनकर्मादिनिमित्तश्चित्तोद्रेकः सतामवमानहेतुर्दर्पः । स्वस्मिन्नेवोत्कृष्टत्वबुद्धिरभिमानः । परापकारनिमित्तो महानर्थसंपादने हेतुश्चित्तक्षोभः क्रोधः । परुषो निष्ठुरभाषा तस्य भावः पारुष्यम् । चकारः समुच्चयार्थः । एवकारः स्वप्रेऽप्यस्य न मृदूक्तिरितीतरव्यवच्छेदार्थः । अज्ञानं सदसद्विवेकाभावः चकारात्तत्कार्यं च । दम्भादयोऽज्ञानान्ताः षडेते रजस्तमोधर्माः । आसुरीं संपदं 'रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्' इति 'तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्' इति चोक्तत्वाद्धोरं कर्म कारयितुं पुरुषस्यासून् प्राणानिन्द्रियाणि च रात्याकर्षतीत्यसुरः रजोगुणस्तमोगुणश्च तस्य संबन्धिन्यासुरीसंपत्समृद्धिरुत्कर्षस्तामासुरीं संपदमभिजातस्य प्राग्भवीयपापाधिक्याद्रजस्तमोगुणोत्कर्षाधिक्यमभ्यनुसृत्य जातस्य । यद्वा असुराणां संपदासुरी संपत्तां संपदमासुरीमभिजातस्य दुरात्मनो भाव्यनर्थपात्रस्य पुरुषस्य भवन्ति संभवन्तीत्यर्थः ॥ ४ ॥

द्वयोरपि संपदोः कार्यमाह—

दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव ॥ ५ ॥

दैवीति । 'अभयं सत्त्वसंशुद्धिः' इत्यादिना या दैवी संपदुक्ता सा विमोक्षाय संसारबन्धमोक्षाय भवत्यतो दैवसंपद्युक्त एवासंमूढो ज्ञानाधिकारी भवति न त्वासुरसंपद्युक्त इति सूचयितुमासुरसंपत्तेर्बन्धकत्वमाह—**निबन्धायेति** । दम्भो दर्प इत्यादिना प्रोक्ता या आसुरसंपत् सा बन्धायैव भवतीति मता मया निश्चिता न क्वचिदपि मोक्षायेत्यर्थः । तर्ह्यहमासुरसंपत्तिमानुत दैवसंपत्तिमान्वेति संदिह्यमानमर्जुनमालक्ष्य तत्संशयं परिहर्तुमाह—**मा शुच इति** । हे पाण्डव, त्वं दैवीमेव संपदमभिजातोऽसि । तद्युक्तः संसारान्मोक्ष्यसे । मा शुचस्त्वमस्मिन्नर्थे चिन्तां मा कुर्वित्यर्थः ५

ननु 'राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः' इति, 'दैवीं प्रकृतिमाश्रिताः' इति, 'प्रकृत्या नियताः स्वया' इति च बह्व्यः प्रकृतयः प्रोक्ताः कथमेतासां निर्णय इत्याकाङ्क्षायां राक्षस्यासुर्यामेवान्तर्भवति दैव्यासुरी चेति प्रकृतिर्द्विप्रकारैव भवति । 'प्रकृत्या नियताः स्वया' इति दैव्यासुरी चोच्यते न तदतिरिक्तोच्यत इति प्रकृतिद्वैविध्यमेव निदर्शयन्ना-

सुरीमेव प्रकृतिं विशिष्य प्रतिपादयति, हेयांशे परिज्ञाते उपादेयांशस्तद्विलक्षणत्वेन ज्ञातुं शक्यत इति सूचयितुम्—

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥

द्वाविति। लोकेऽस्मिन् संसारमण्डले भूतसर्गौ भूतानां प्राणिनां सर्वेषां च सर्गौ। सृज्यते संसृज्यते गन्धः पुष्पमिव प्राणिचित्तमनुबध्य तिष्ठतीति सर्गः स्वभावस्तौ सर्गौ प्रकृती दैव आसुरश्चेति द्वावेव नातिरिक्तोऽस्तीत्यर्थः। तयोः सर्गयोर्मध्ये अभयमित्यादिना दैवो भूतसर्गो विस्तरशो विस्तरेण प्रोक्तः। नत्वासुरस्तं मुमुक्षोर्हेयत्वेन विज्ञातव्यं मे मया वक्ष्यमाणं शृण्विति ॥ ६ ॥

तामेवासुरीं संपदं प्रतिपादयति द्वादशभिः। तत्राद्येन तेषां शीलमाह—

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥

प्रवृत्तिमिति। शास्त्रदृष्टे कर्तव्ये धर्मे प्रवृत्तिं च शास्त्रदृष्टानर्थहेतोरधर्मान्निवृत्तिं च आसुरा आसुरस्वभावा रजस्तमोगुणप्रधाना जना न विदुः। धर्ममधर्मं च न जानन्तीत्यर्थः। ननु 'सत्यं वद। धर्मं चर' इत्यादिश्रुतौ विद्यमानायां कथं ते धर्ममधर्मं च न जानन्तीत्याशङ्कायां तेषां तत्राप्रमाणत्वबुद्ध्या विश्वासो नास्तीति सूचयितुमाह—**न शौचमिति।** कर्तव्याकर्तव्यार्थज्ञानशून्यत्वेन निषिद्धरतेषु तेषु शौचं बाह्यमाभ्यन्तरं च नास्ति। तथैव आचारोऽपि नास्ति। चकाराद्दयापि नास्ति। सत्यं यथार्थभाषणं च नास्ति। दयासत्यशौचाचाररहिता आसुरा इत्यर्थः ॥ ७ ॥

स्वभावानुरूपं तेषां निश्चयमाह—

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥ ८ ॥

असत्यमिति। दयातपःसत्यशौचरहितास्ते आसुरा जना यथा स्वयमसत्यपरास्तथा जगत्सर्वमप्यसत्यं आहुः प्राहुः। वेदाः वेदोक्तधर्मास्तत्फलभूता लोकाश्च सर्वं मिथ्यैवेति वदन्तीत्यर्थः। ननु सुखदुःखादिभेदलक्षणं जगद्वैचित्र्यं दृश्यते यतस्तत्कारणं धर्माधर्मौ तन्मूलभूतौ वेदाश्च लोकाश्च सर्वं सत्यमित्यवगन्तुं शक्यत इत्यत आह—**अप्रतिष्ठमिति।** प्रतितिष्ठत्यनयेति प्रतिष्ठा कारणं सुखदुःखादिवैचित्र्य-

हेतुभूतौ धर्माधर्मौ न प्रतिष्ठाऽस्येत्यप्रतिष्ठं प्राहुर्न धर्माधर्मनिमित्तकं जगद्वैचित्र्यं। किंतु वस्तुस्वभावादेव सुखदुःखादिवैचित्र्यमिति वदन्तीत्यर्थः। तथा अनीश्वरं च न यस्येश्वर उत्पत्तिकारणं तदनीश्वरं जगदाहुरित्यर्थः। नन्वीश्वरस्य जगदुत्पत्तिकारणत्वाङ्गीकारे कथं प्रजासर्ग इत्यत आह—**अपरस्परसंभूतमिति**। अपरश्च परश्च अपरस्परं मिथुनं तस्मात्संभूतमपरस्परसंभूतं प्राहुः। स्त्रीपुंसयोः संयोगाज्जगत्सर्वं जातमिति वदन्तीत्यर्थः। ननु तयोरपि प्रेरकं निमित्तकारणमीश्वरोऽभ्युपगन्तव्य इत्यत आह—**कामहैतुकमिति**। प्रजासर्गे काम एव हेतुर्यस्य तत्कामहेतुकं कामहेतुकमेव कामहैतुकम्। तयोः प्रेरणे प्रजासृष्टौ काम एव कारणं किमन्यत्ततोऽन्यत्कारणं किमस्तीति प्राहुः। दृष्टं त्यक्त्वा अदृष्टस्य धर्मादेरीश्वरस्य वा कारणत्वकल्पना न युक्तेति वदन्तीत्यर्थः॥ ८॥

एवं तेषामासुराणां प्रत्यक्षैकमानवतां निश्चयमुक्त्वा निश्चयस्य कार्यमाह—

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः॥ ९॥

एतामिति। प्रागुपदिष्टामेतां लोकायतिकदृष्टिमवष्टभ्याऽवलम्ब्य नष्टात्मानः कामक्रोधलोभमोहादिलक्षणेन रजस्तमोदोषेण नष्टस्तिरोहित आत्मा विवेकबुद्धिर्येषां ते नष्टात्मानः। तत एवाल्पबुद्धयः अल्पे तुच्छे स्रगादिविषयभोगे बुद्धिर्येषां तेऽल्पबुद्धयः। यद्वा अल्पे मलमांसास्थिमये देहे अहमिति बुद्धिर्येषां ते देहमात्रात्मदर्शिनः। अतएवोग्रकर्माणः उग्रं क्रूरं शास्त्रविरुद्धं देहपोषणैकप्रयोजनं परहिंसाप्रधानं कर्म येषां ते उग्रकर्माणः। अतएवासुरास्तत एवाहिताः साधूनां शत्रवः। स्वयं जगतो नाशाय जगतः स्थितिहेतुभूतवेदतदुक्तधर्मनाशायैव प्रभवन्ति समर्था भवन्ति नतु रक्षणायेत्यर्थः॥ ९॥

जगन्नाशाय कथं प्रभवन्तीत्यत आह—

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः।
मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः॥ १०॥

काममिति। दुष्पूरं वर्षशतकोट्यादिविषभोगेन पूरयितुं तर्पयितुमशक्यत्वात् दुष्पूरं काममेकमेवाश्रित्य नतु धर्मं। दम्भमानमदान्विताः दम्भो बहिर्धर्मिष्ठत्वचिह्नं। मानः स्वस्मिन्नेवोत्कृष्टत्वाभिनिवेशः। मदो विद्यैश्वर्यादिकृतश्चित्तविकारः विवेकनाशहेतुः। स्वयमेतैरन्विता

आसुरा मोहादसति सद्बुद्धिर्मोहोऽविवेकस्तस्मादसद्ग्राहान् असदनर्थमेव ग्राहयन्ति संभावयन्तीत्यसद्ग्राहास्तान्निश्चयान् वेदशास्त्रविरुद्धान् गृहीत्वा अशुचिव्रताः अशुचीन्यमङ्गलकराणि नरकाद्यनर्थकारणानि व्रतानि नियमा येषां तेऽशुचिव्रता भूत्वा जगतो नाशाय प्रवर्तन्ते ॥ १० ॥

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥ ११ ॥

किंच—**चिन्तामिति**। अपरिमेयां परिमातुमशक्याम्। इयत्ताशून्यामित्यर्थः । प्रलयान्तां प्रलयश्चरमश्वासोऽन्तोऽवधिर्यस्यास्तां मरणावधिकचिन्तां भोग्यसौष्ठवासौष्ठवसिद्ध्यसिद्ध्यालोचनरूपामाश्रिताः कामोपभोगपरमाः काम्यन्त इति कामा भोग्यपदार्थास्तेषामुपभोग एव परमः निरतिशयः पुरुषार्थः पुरुषत्वसिद्धेः फलं येषां ते कामोपभोगपरमाः । एतावदिति निश्चिताः पुमान् जनित्वा मरणान्तं सम्यग्विषयाननुभुङ्क्त इति यत्त्वेतावदेव पुंजन्मनः फलं देहपातस्यैव मोक्षत्वान्नातः परमं फलमिति निश्चितं सिद्धान्तो येषां ते एतावदिति निश्चिताः सन्तः कामभोगार्थमीहन्ते इत्युत्तरेणान्वयः ॥ ११ ॥

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसंचयान् ॥ १२ ॥

किंच—**आशेति**। आशापाशशतैर्बद्धाः आशा अप्राप्तार्थाभिलाषास्ता एव पाशा बन्धनरज्जवस्तेषां शतैर्बद्धाः । कामक्रोधपरायणाः आसुराः कामभोगार्थं कामानां स्रगादिविषयाणां भोगार्थमेव नतु दानार्थं नापि धर्मार्थं च । किंतु विषयानुभवायैव अन्यायेन शास्त्रविरुद्धेन मार्गेण कपटवञ्चनादिरूपेणार्थसंचयान् संपाद्यानीहन्ते कुर्वन्तीत्यर्थः ॥ १२ ॥

अन्यायेनार्थसंपादनपराणामासुराणां हृदये संकल्पप्रकारमाह—

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १३ ॥

इदमिति त्रिभिः। स्पष्टार्थः ॥ १३ ॥

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ॥ १४ ॥

किंच—**असाविति** । ईश्वरो विद्याधनादिभिः समर्थः सिद्धः पुत्रैः पौत्रैः पशुभिर्धनधान्यैः संपन्नः कृतकृत्यः । शिष्टं स्पष्टम् ॥ १४ ॥

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ १५ ॥

किंच—**आढ्य इति** । आढ्यो बहुधनसंपन्नः । अभिजनवाननूचानः । यक्ष्ये प्रतिष्ठार्थं धनार्थं जीवनार्थं वा यागं करिष्यामि । दास्यामि स्तावकेभ्यो नटविटादिभ्यो नतु श्रोत्रियेभ्यो बन्धुभ्यश्च । मोदिष्ये दत्त्वा भुक्त्वा संतोषं प्राप्स्यामीत्येवमज्ञानविमोहिताः सदसद्विवेकाभावोऽज्ञानं तेन विविधं मोहिताः मोहं प्राप्ताः ॥ १५ ॥

एवं कामसंकल्पैर्विविधभावापन्नानां कामपराणां तत्प्रवृत्तेः फलमाह—

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥ १६ ॥

अनेकेति । अनेकचित्तविभ्रान्ताः इदमद्य मया लब्धमित्येवंरूपैरनेकविधैश्चित्तविकारैर्विभ्रान्ता विविधं भ्रान्ताः । मोहजालसमावृताः मोहः सदसद्विवेकाभावः स एव जालं मत्स्यानामिवावरणात्मको नाशकश्च तेन सम्यगावृतास्तिरोहितविवेकास्तत एव कामभोगेषु विषयसेवायामेव प्रसक्ताः प्रकर्षेण सक्ताः परिनिष्ठिताः न क्वचित्स्वधर्मे । तत एवाशुचौ श्लेष्मपूयहृदादिरूपत्वादशुद्धे नरके रौरवादौ पतन्ति ॥ १६ ॥

ननु तेषामपि ब्राह्मणत्वेन श्रुताध्ययनाध्यापनसंभवाद्वेदोक्तकर्मानुष्ठानसंभवाच्च कथमेतेषां वैदिकानामशुचिनरकपात इत्याशङ्कायां न 'श्रद्धयाग्निः समिध्यते' इति, 'यो वा एतदक्षरं गार्ग्यविदित्वास्मिँल्लोके जुहोति' इत्यादिश्रुत्युक्तलक्षणाभावात्तैरविधिना क्रियमाणयज्ञैर्यज्ञाभासैर्नेश्वरः प्रीयते तन्नियमोल्लङ्घनप्रवृत्तत्वात्तेषामासुराणां नरकप्रापणमेव सिद्धमिति प्रतिपादयति—

आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ १७ ॥

आत्मेति द्वाभ्याम् । धनमानमदान्विताः मानो गर्वः मदो मत्तता धनोत्कर्षसमुत्पन्नौ मानमदौ ताभ्यां समन्वितास्तत एवात्मसंभाविता आत्मना स्वेनैव नतु क्वचिदपि शिष्टैः संभाविताः बहुकृतास्तत एव स्तब्धा उद्धताः नम्रताशून्यास्ते आसुरा नामयज्ञैर्नाम्ना यज्ञैर्नतु वैदिकक्रियया लक्षणेन वा किंत्वाभासयज्ञैरविधिपूर्वकं नियतकालमन्त्रहोमर्त्विग्विवर्जितं दम्भेन स्वमहत्त्वप्रसिद्ध्यै यजन्ते नत्वीश्वरप्रीतिसिद्ध्यै ॥ १७ ॥

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ १८ ॥

किंच—**अहंकारमिति** । अहमेव कुलशीलसंपन्नः सर्वशास्त्रपारगः सर्वज्ञो धर्मिष्ठः सर्वोत्तम इति येन स्वमुत्कृष्टं मन्यते सोऽसावहंकारस्तम् । बलं कामरागजं दर्पं दृप्ततां कामं क्रोधं चकारान्मोहलोभपारुष्या-

दिबुद्धिदोषान् संश्रिता आत्मपरदेहेषु आत्मदेहेषु परदेहेषु च मामात्मानं प्रत्यग्लक्षणं द्विषन्तः ममान्तर्यामित्वमनङ्गीकृत्य मां द्विषन्तः । यद्वा आत्मनो मम देहादिव्यतिरिक्तत्वं नित्यत्वं चैतन्यमात्रत्वमकर्तृत्वमभोक्तृत्वं चानङ्गीकृत्य प्रकर्षेण द्विषन्तः तत एवाभ्यसूयका आत्मनो देहव्यतिरिक्तत्वनित्यत्वैकत्वपूर्णत्वाविक्रियत्ववादिनां सत्पुरुषाणां गुणेषु दोषारोपकाः लोके य आसुरा बौद्धाचाराः प्रभवन्ति ॥ १८ ॥

तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९ ॥

किंच—**तानिति** । मां द्विषतः स्वदेहपरदेहेषु मामात्मानं द्विषतस्तत एव क्रूरान् क्रूरकर्मणो दयासत्यशौचाचारशून्यानशुभानमङ्गलाचारनिरतानतएव नराधमान् तानासुरान्निरुक्तासुरसंपद्विशिष्टान् जनान् तत्कृतदुष्कर्मभिः संसारेषु संसारमार्गेषु । यद्वा संस्रियन्ते भुज्यन्त इति संसारा जननमरणादिखेदास्तेष्वनुभाव्येषु सत्सु तदनुभूत्यै आसुरीष्वेवातिक्रूरासु शुनकसूकरसर्पव्याघ्रादियोनिषु क्षिपामि । तत्कर्मानुरूपामेव शुनकादियोनिमजस्रं पुनःपुनः प्रापयाम्यहमीश्वरो मदाज्ञाच्छेदिनो जनानित्यर्थः १९

ननु शुनकादियोनिषु प्रवेशितानामपि तेषां बहुजन्मनामन्ते मोक्षः स्यादेवेत्याशङ्कायां न । इमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति । जायस्व म्रियस्वेति श्रवणाद्वेदविरुद्धाचारनिरतानां पापिष्ठानां तेषां पुनःपुनर्जननमरणे विना न कदाचिदपि मत्प्राप्तिरस्तीत्याह—

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥ २० ॥

आसुरीमिति । अनेकचित्तविभ्रान्ताः कामभोगप्रसक्ता अशुचिव्रता मूढाः स्वकीयदोषातिशयादेव जन्मनि जन्मनि प्रतिजन्माप्यासुरीमेव योनिमापन्नाः सन्तो मामप्राप्य । अत्र मामिति मच्छब्देन स्वप्राप्तिसाधनं लक्ष्यते । मां मत्प्राप्तियोग्यं मानवं देहमप्राप्यैव ततोऽप्यासुरयोन्यपेक्षयाधमां निकृष्टां वृक्षपाषाणादिरूपां वा पैशाचीं वा गतिं गम्यत इति गतिस्तनुं यान्ति । नतु तामेव पुनः शुनकादियोनिमपि प्राप्नुवन्तीत्यर्थः । 'प्रवृत्तिं च निवृत्तिं च जना न विदुः' इत्यारभ्य, 'ततो यान्त्यधमां गतिम्' इत्यन्तेन ग्रन्थेन रजस्तमोदोषदूषितान्तरङ्गाणामासुराणां या संपत्तस्याः फलमधोधःपतनं विना कदाचिदपि श्रेयःप्राप्तिर्यस्मान्नास्ति तस्माद्बुद्धिमान् सदा सदसद्विवेकी पुरुषः पुरुषत्वसिद्धेः साफल्याय स्वयं

विवेकभ्रंशहेतोर्दुर्योनिप्राप्तेः पूर्वमेवासुरसंपत्तेरविषयो भूत्वा सदा सदसद्विवेकवैराग्याभ्यां परमपुरुषार्थाय यतेतेति सूचितं भवति। तेनासुरसंपद्बन्धायैव न क्वचिन्मोक्षायेति सिद्धम् ॥ २० ॥

प्रतिपादितायास्त्वासुरसंपत्तेः सर्वस्वमत्रैव पर्यवसितमेतत्त्रितये परित्यक्ते प्रधानमल्लनिबर्हणन्यायेनाऽसुरीसंपत्सर्वापि परित्यक्ता स्यात्ततो मुमुक्षोरवश्यमेतत्त्रितयं त्यक्तव्यम्। एतत्त्यक्त्वा स्वधर्मेण श्रेयःसाधनमनुतिष्ठतः पुंसः परमपुरुषार्थः सिध्यतीति प्रतिपादयति—

त्रिविधं नरकस्यैतद्द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ २१ ॥

त्रिविधमिति। द्वाभ्याम्। नरत्वेनोत्कृष्टजन्मवतां नराणां निरतिशयकं दुःखं यत्र तन्नरकं शुनकसूकरादिनीचयोनिः। नरकमिति शकन्ध्वादिकं रूपम्। तस्य नरकस्य श्वादिनिकृष्टयोनिरूपस्य प्राप्तेः कामः क्रोधो लोभ इति त्रिविधं त्रिप्रकारकमेव द्वारं प्रवेशमार्गः नैवैतादृशं द्वारमन्यदस्तीत्यर्थः। ननु कामादीनां नीचयोनिप्राप्तिद्वारत्वमस्तु ततः का नो हानिरित्याशङ्कायामाह— **नाशनमिति**। जन्मान्तरानेककृतपुण्यातिशयान्मनुष्यत्वपुरुषत्वब्राह्मणत्ववेदाद्यधीतिमत्त्वविवेकित्वलक्षणं मोक्षसौधान्तमारूढस्यात्मनः स्वस्याधिकारिणो मुमुक्षोः कामादित्रयमेतत्पुरुषार्थस्य नाशकं भवति धर्माधर्मकर्तव्याकर्तव्यार्थानर्थबन्धमोक्षविवेकविज्ञानं नाशयतीत्यर्थः। नहि कामाकुलस्य क्रोधाविष्टस्य वा लोभग्रहग्रस्तस्य वा धर्माधर्मादेर्विवेकविज्ञानं भवति। तदभावे पुरुषो विनश्यत्येव। मनुष्यत्वाद्युत्कृष्टमोक्षसाधनसंपत्त्या मोक्षसौधान्तमारूढोऽपि प्रमादेन तालारूढ इव कामादिभिरधः पातितः सन् निःशेषं विनश्यति। नह्युच्चात्पतितस्य स्वरूपनाशं विना किंचिच्छेषं सिध्यत्यत एवोच्यते नाशनमात्मन इति। यस्मादेवं कामादीनां प्रभावस्तस्मान्मुमुक्षुर्विवेकसंपन्नस्तत्स्वभावं ज्ञात्वा स्वाविनाशाय चाण्डालमिव कामं कृष्णसर्पमिव क्रोधं मलमिव लोभं चैतत्त्रयं दूरतस्त्यजेत्। न तेषां गोचरो भवेदित्यर्थः ॥ २१ ॥

एवं कामादीनामधर्मप्रवृत्तिहेतुतया नरकद्वारत्वं मुमुक्षुत्याज्यत्वं च प्रतिपाद्य चैतैर्विमुक्तः श्रेयःसाधननिष्ठो भूत्वा श्रेयः प्राप्नोतीत्याह—

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥ २२ ॥

एतैरिति। नरो मुमुक्षुरधिकारी ब्राह्मणादिर्विद्वान् तमोद्वारैः त-

मसो नरकस्य द्वारैर्द्वारभूतैस्त्रिभिरेतैः कामक्रोधलोभैर्विमुक्तो विशिष्य निर्मुक्तः सन्नात्मनः स्वस्य श्रेयःसाधनत्वं स्वाधिकारानुरूपं स्वाश्रमोचितं धर्मं वैदिकं वा श्रवणादिकं वा यदाचरति सम्यगनुतिष्ठति ततस्तेनैवानुष्ठानेन चित्तशुद्धिद्वारा समुत्पन्नात्मज्ञानेन परां गतिं विदेहमुक्तिं याति गच्छतीत्यर्थः ॥ २२ ॥

एवं दम्भदर्पातिमानाद्यासुरसंपत्तिमतां वेदशास्त्रविधिमुल्लङ्घ्य तदुक्तधर्माधर्मानुदयस्य तत्फलप्रदातारं चापीश्वरमनादृत्य यथेष्टं कामोपभोगेषु परस्वहरणादौ च प्रवृत्तानां पापिष्ठानां पुनरारोहवर्जितमधःपतनं प्रतिपाद्य स्वाज्ञानुल्लङ्घनाय पुनरपि य एवमेव प्रवर्तते सोऽप्यधोलोकमेव गच्छति न मुक्तिवार्तां स्वप्नेऽपि विन्दतीत्युक्तमेवार्थं द्रढयति—

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ २३ ॥

य इति । यः श्रुताध्ययनसंपन्नो ब्राह्मणादिरधिकारी शास्त्रविधिं । विधीयते अपूर्वोऽथ बोध्यतेऽनेनेति विधिः । 'अग्नीषोमीयं पशुमालभेत', 'न कलञ्जं भक्षयेत्' इत्येवं कर्तव्याकर्तव्यार्थप्रकाशकं शास्त्रविधिं चोदनाविधिं निषेधं चोत्सृज्याविचार्य । शास्त्रविधिमुपेक्ष्येत्यर्थः । कामकारतः कामनया यथेच्छं वर्तते शास्त्रनियममुल्लङ्घ्य स्वेच्छानुरूपं श्रद्धाविधुरं धर्मानुष्ठानं यः करोतीत्यर्थः । स कामायत्तप्रवृत्तिः पुरुषः सिद्धिमविधिना कृतत्वात्तैः कर्मभिश्चित्तशुद्धिं नाप्नोति । विध्युक्तस्यैव कर्मणः फलावश्यंभावित्वनियमात्तत एव स्वर्गीयं च सुखं न प्राप्नोति । कर्मणां मुक्तिसाधनत्वाभावात्परां गतिं मोक्षं चापि नाप्नोति । यथेच्छमविधिना कर्म कुर्वाणः स्वर्गापवर्गोभयभ्रष्टो भवतीत्यर्थः ॥ २३ ॥

शास्त्रविधिनैव कर्मणां कर्तव्यत्वं निर्धारयन्नध्यायमुपसंहरति—

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ २४ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगो नाम षोडशोऽध्यायः ॥ १६ ॥

तस्मादिति । यस्मादशास्त्रीयाणां कामैकनिबन्धनानां कर्मणां फलाभावो निश्चितस्तस्मात्ते मुमुक्षोः कार्याकार्यव्यवस्थितौ कर्तव्याकर्तव्यार्थयोर्व्यवस्थापने इदमेवमनेन कर्तव्यमिदं तु न कर्तव्यमित्येवमनुष्ठेयाननुष्ठेयार्थनिर्णये श्रुतिस्मृतिलक्षणमेव शास्त्रं प्रमाणं तत्तदर्थप्रमापकं देशकालमन्त्रतन्त्रदेवताद्रव्यर्त्विगादिज्ञानस्य हेयद्रव्यज्ञानस्य च

कारणमित्यर्थः। यत एवं ततः कर्मभूमौ कर्माधिकारी दैवसंपत्त्या परित्यक्तकामादिदोषस्त्वमधीतविदितवेदवेदार्थः सन् शास्त्रविधानोक्तं शास्त्रविधिदृष्टमेव कर्म ज्ञात्वा ममेदं शास्त्रीयं कर्म कर्तव्यमिति शास्त्रतो विज्ञायैव स्वीयं कर्म कर्तुमर्हसि नान्यथा कर्मफलवैगुण्यापत्तेरित्यनेन स्ववर्णाश्रमोचितं कर्म शास्त्रेण विज्ञाय मुमुक्षुणा कर्तव्यमिति सिद्धम्॥ २४॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां षोडशोऽध्यायः॥ १६॥

सप्तदशोऽध्यायः।

एवं दैवासुरसंपद्विभागं तत्स्वरूपं तत्फलं चासुराणां ज्ञानानधिकारित्वबोधनायासुरसंपत्तिमतां कामसंकल्पगुणकर्माणि च फलं च विशिष्य प्रतिपाद्य मुमुक्षोः शास्त्रज्ञानेनैव कर्म कर्तव्यमिति निरूप्याधुना शास्त्रार्थानभिज्ञानामपि शास्त्रीयमेव कर्म कामकारं विना श्रद्धया कुर्वतामपि मुमुक्षूणां सात्विकेष्वेवाहारयज्ञतपोदानादिषु प्रतिष्ठितानां ज्ञानाधिकारः शमदमादिषट्कसंपत्त्या प्राप्तज्ञानेन मोक्षाधिकारश्च युज्यत इति बोधयितुं सप्तदशाध्याय आरभ्यते। तत्रादौ 'यः शास्त्रविधिमुत्सृज्य' इति, 'तस्माच्छास्त्रं प्रमाणं ते' इति शास्त्रविधिं ज्ञात्वापि तमुत्सृज्य कामकारेण यः प्रवर्तते स आसुरस्तस्य न चित्तशुद्धिर्न च ज्ञानं नापि तत्फलं च सिध्यतीति श्रुत्वा शास्त्रार्थमजानतां कामकारं विनैव श्रद्धया कर्माणि कुर्वतां पुरुषाणां दैवी वासुरी वा का वा संपत्तिः का गतिस्तेषामिति जिज्ञासुरर्जुन उवाच—

अर्जुन उवाच।

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः।
तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः॥ १॥

य इति। ये सामान्याः पुरुषाः शास्त्रविधिं श्रुतिस्मृतिलक्षणं शास्त्रं तद्विधिं विधानं श्रौतस्मार्तसूत्राध्ययनतदर्थपरिज्ञानाभावादनुष्ठानविधिमुत्सृज्याविज्ञाय श्रद्धया वृद्धव्यवहारसंदर्शनसमुत्पन्नयास्तिक्यबुद्ध्या विनैव कामकारं वैदिकेषु नियतेषु कर्मस्वत्यन्तविश्वासेनान्विताः सन्तो वैदिकेन कर्मणा देवान् यजन्ते शास्त्रार्थमज्ञात्वाऽपि श्रद्धया भक्त्या च श्रौतं स्मार्तं च कर्म ये कुर्वन्तीत्यर्थः। तेषां श्रद्धया कर्मणि वैदिके प्रवृत्तानां पुरुषाणां निष्ठा स्थितिः का किंलक्षणा सत्वमाहो रजस्तम इति कारणेन कार्यं गृह्यते। तुशब्दः पूर्वव्यावृत्त्यर्थः। तेषां तु निष्ठावृत्तिः

सात्विकी वा उत राजसी किं तामसी वा कथ्यतामिति । अत्र सत्त्वशब्देन दैवसंपत्तिः रजस्तमःशब्देनासुरसंपत्तिर्विवक्षिता । दैवासुरसंपत्तेरधिकारविचारे प्रक्रान्तत्वात्तेषां संपद्दैवी वाप्युत आसुरी वेति प्रश्नार्थः । ननु यः शास्त्रविधिमुत्सृज्येत्यनेनैव वचनेन शास्त्रविधिमुत्सृज्य यः प्रवर्तते स आसुर इत्येतेषामप्यासुरत्वमुक्तमेव पुनस्तेषां निष्ठा तु का कृष्णेत्यर्जुनस्य प्रश्नोऽनुपपन्न एवेति चेत्सत्यम् । यद्यपि शास्त्रविध्युत्सर्जनमुभयत्र सममेव तेषामेतेषां च, तथापि श्रद्धान्वितत्वविशेषणविशिष्टत्वात्तेषामेतेषां च विशेषो विद्यते । कामकारत इति तत्र कामकारत्वविशेषणविशेषोपपत्तेश्च शास्त्रविधिमुत्सृज्येति ज्ञात्वा शास्त्रोल्लङ्घनदोषविशेषाच्च तेषामेतेषां च भेदो विद्यत एव । ननु शास्त्रविध्युत्सर्जनमत्रापि च विद्यत एवेतिचेन्न । शास्त्रविध्युत्सर्जनपदेनात्र शास्त्रार्थापरिज्ञानं विवक्षितं नतु ज्ञात्वा विध्युल्लङ्घनम् । ननु तर्हि शास्त्रार्थानभिज्ञानां मूढानां कथं वैदिके कर्मणि प्रवृत्तिरिति चेदुच्यते । 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति न्यायेन ज्ञानकर्मप्रवृद्धप्रवृत्तिसंदर्शनेन मूढानामपि श्रद्धावतां सद्बुद्धीनां वैदिककर्मप्रवृत्तिरुपपद्यते यतिभ्यो वृद्धेषु नमत्सु सत्सु बालानां नमनक्रिया यथा ततस्तेषामेतेषां च विशेषणभेदाद्भेदः सिध्यति, तत एवार्जुनेन पृष्टं 'तेषां निष्ठा तु का कृष्णे'त्यतो न काचिदप्यत्रानुपपत्तिः ॥ १ ॥

कारणे ज्ञाते कार्यं बोधयितुं शक्यं नत्वज्ञाते सत्यतः कारणश्रद्धाभेदज्ञापनेन निष्ठाभेदं बोधयितुं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्विकी राजसी चैव तामसी चेति तां शृणु ॥ २ ॥

त्रिविधेति । देहिनां प्राणिनां श्रद्धा सात्विकी राजसी तामसी चेति त्रिविधैव त्रिप्रकारा त्रिधैव भिन्ना भवतीत्यर्थः । श्रद्धायास्त्रैविध्यसिद्धौ कारणमाह—**स्वभावजेति** । 'आयुः कर्म च वित्तं च विद्या निधनमेव च । पञ्चैतानि विलिख्यन्ते गर्भस्थस्यैव देहिनः ॥' इत्यनेन प्राग्भवीयपुण्यापुण्यादिसंस्कारः स्वभावः स्वेन सह भवतीति स्वभावस्तस्माज्जाता स्वभावजा । यद्वा स्वभावः सत्वरजस्तमोगुणात्मिका प्रकृतिस्तस्माज्जाता स्वभावजा । ततएव सत्वादिगुणभेदाच्छ्रद्धाया अपि सात्विकी राजसी तामसी चेति भेद उपपद्यत इत्यर्थः । यत्प्रधानक्रि-

यायां वर्तमानानां देहिनां निष्ठां त्वं पृच्छसि तां श्रद्धां मयोच्यमानां शृणु। श्रद्धासंभूतिप्रकारं शृण्वित्यर्थः॥ २॥

तदाह—

सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥ ३॥

सत्वेति। सत्वानुरूपा सत्वमिति रजस्तमसोरुपलक्षणम्। सत्वरजस्तमोगुणानामनुरूपा गुणत्रयभेदानुवृत्ता सर्वस्य प्राणिजातस्य श्रद्धा भवति पुण्यापुण्यकर्मवशादन्तःकरणविजृम्भितसत्त्वादिगुणभेदमाश्रित्यैव पुरुषाणां श्रद्धा भवति नतु पुरुषभेदमाश्रित्येत्यर्थः। ननु सत्त्वादिगुणानुगुण्येन प्राणिनां श्रद्धा भवतु प्रकृते किमायातमित्याकाङ्क्षायामाह—**श्रद्धामय इति।** अयमिति दृष्टव्यवहारो गृह्यते। अयं प्रत्यक्षः व्यवहारविषयः पुरुषः श्रद्धामयः अधिकृते पुरुषे श्रद्धाप्राचुर्येण दृश्यते ततोऽयं श्रद्धामयः श्रद्धाप्रधानत्वाच्छ्रद्धामय इत्युच्यत इत्यर्थः। ननु पुरुषस्य श्रद्धामयत्वे सिद्धेऽपि का निष्ठेत्युक्तेः किमुत्तरमित्याकाङ्क्षायामाह—**य इति।** योऽधिकारी पुरुषः स्वधर्मनिष्ठो यच्छ्रद्धः यद्गुणसंभावितश्रद्धावान् भवति स पुरुषः स एव तद्गुण एव भवति। सत्त्वगुणसंभावितश्रद्धावान् सात्विकः, रजोगुणसंभावितश्रद्धावान् राजसः, तमोगुणसंभावितश्रद्धावान् तामसो भवतीत्यर्थः। यद्यपि श्रद्धा सत्वस्यैव धर्मो नतु रजस्तमसोस्तथापि तयोः प्राधान्ये सत्यपि तत्र सत्वस्योपसर्जनत्वसंभवात्तद्वत्स्वपि तद्धर्माभासः श्रद्धाभासिकी संभवत्यत एवोच्यते यो यच्छ्रद्धः स एव स इति। एतेन सत्वरजस्तमोगुणसंभावितश्रद्धावतां तेषां निष्ठा क्रमात्सात्विकी राजसी तामसी चेत्युत्तरं सूचितं भवति। ततः सिद्धं सात्विकानां दैवीसंपद्राजसतामसानां त्वासुरी संपदिति॥३॥

एवं सत्वरजस्तमःसंभावितश्रद्धावतां पुरुषाणां सात्विकी राजसी तामसी च प्रकृतिरिति सूचयित्वा तेषां प्रकृत्यनुरूपाणि कर्माण्याह कर्मणा लिङ्गेन तेषां स्वभावो ज्ञातव्य इति सूचयितुं—

यजन्ते सात्विका देवान्यक्षरक्षांसि राजसाः।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः॥ ४॥

यजन्त इति। सात्विकाः श्रोत्रिया देवसंपत्तिमन्तो देवानग्न्यादीन् वैदिकेन कर्मणा यजन्ते सात्विक्या श्रद्धया। तदन्ये राजसास्तामसाश्चासुरसंपत्तिमन्तो राजस्या तामस्या च श्रद्धया यक्षरक्षांसि पिशाचान् भूतगणांश्च यजन्ते॥ ४॥

राजसानां तामसानां चासुरमेव धर्मं प्रतिपादयति—

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।
दम्भाहंकारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥
कर्षयन्तः शरीरस्थं भूतग्राममचेतसः ।
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥ ६ ॥

अशास्त्रेति द्वाभ्याम् । दम्भो मन्त्रतन्त्रवेषभाषादिबाह्यपरिकराटोपः । अहंकारः कुलशीलविद्याश्रमादिभिरुत्कृष्टोऽहमित्यन्तःकरणाटोपस्ताभ्यां संयुक्ताः । कामरागबलान्विताः कामाः ऐहिकामुष्मिकभोग्यपदार्थाः रागस्तेषामुपभोगेच्छा बलमिच्छावेगस्तैः सम्यगन्वितास्तत एवाचेतसोऽविवेकिनो ये मूढाः शरीरस्थं स्थूलशरीर उदरे चान्यत्र विद्यमानं भूतग्रामं स्थूलसूक्ष्मरूपप्राणिसमुदायम् । यद्वा प्राणेन्द्रियग्रामं कर्षयन्तोऽन्नरसाद्यभावेन शोषयन्तो मां चैवान्तःशरीरस्थमन्तःशरीरं बुद्धिः तत्र सर्वप्रकाशकतया विद्यमानं मां चापि प्रत्यग्रूपं कर्षयन्तो मनोबुद्धीन्द्रियाणामुपवासकृतातिश्रान्त्या प्रवृत्त्युपरमे सत्यात्मचैतन्यस्य स्फुरणं न भवति । तदभाव एवास्य प्रत्यगात्मनः कृशीकरणं तत्कुर्वन्तः सन्तो ये जनाः अशास्त्रविहितं न शास्त्रविहितं अशास्त्रविहितं घोरं पीडाकरं तपस्तप्यन्ते उपवासव्रतादिना कायशोषणं कामरागबलानुरूपया श्रद्धया ये कुर्वन्तीत्यर्थः । तानासुरनिश्चयान् आसुराणां निश्चयो येषां तानासुरनिश्चयान् विद्धि । दुष्करव्रतानासुरान् विजानीहीत्यर्थः । एतेनाभासश्रद्धावतां राजसानां तामसानां चासुर्येव संपदिति सूचितम् । तेन सात्त्विकानां दैव्येव संपदिति सिद्धम् ॥ ५ ॥ ६ ॥

एवं श्रद्धाभेदेन देवादियजनभेदेन शास्त्रीयाशास्त्रीयकर्मानुष्ठानेन च सात्त्विका राजसास्तामसा ज्ञातव्या इति सूचयित्वाऽधुना त्वाहारेण यज्ञेन तपसा दानेन च ते ज्ञातव्या इति सूचयितुमाहारयज्ञतपोदानादीनां सत्त्वादिगुणभेदेन त्रैविध्यं प्रतिपादयति । सात्त्विकैर्मुमुक्षुभिः सात्त्विका एवाहारादयश्चित्तशुद्धये कर्तव्या न त्वितर इति ज्ञापयितुं च—

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७ ॥

आहारस्त्विति—स्पष्टोऽर्थः ॥ ७ ॥

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥ ८ ॥

आयुरिति। आयुषो ज्योग्[1]जीवनस्य सत्त्वस्यान्तःकरणस्य तत्स्फूर्तेर्बलस्य देहेन्द्रियशक्तेरारोग्यस्य रोगानुदयस्य सुखस्य संतोषस्य प्रीतेश्चक्षुःप्रीतेर्विवर्धनाः वर्धकाः रस्याः रसोपेता मधुराः स्निग्धाः स्नेहयुक्ताः स्थिराः सारवत्तरा हृद्या मनोरमा आहाराः सात्त्विकप्रियाः ॥ ८ ॥

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥

कट्विति। अतिशब्दः कट्वादिभिः प्रत्येकं संबध्यते। अतिकटुरतितिक्तो निम्बादिः कटुकस्तिक्तशब्देनोच्यते। अत्यम्लोऽतिलवणोऽत्युष्णः अतितीक्ष्णो बृहन्मरीचादिः। रूक्षो निःस्नेहः प्रियङ्ग्वादिः। विदाही सर्षपादिः। सद्योदुःखप्रदाः पश्चाच्छोकरोगप्रदा आहारा राजसस्येष्टाः ॥ ९ ॥

यातयामं गतरसं पूति पर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥

यातेति। यातयामं मन्दपक्वं, गतरसं अतिपक्वं, पूति दुर्गन्धि, पर्युषितं पुरातनं, उच्छिष्टं भोजनशेषं, अमेध्यमयज्ञशेषं भोजनं तामसप्रियम् ॥ १० ॥

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥ ११ ॥

अफलेति। यष्टव्यमेवानेन ममेश्वरप्रीतिलक्षणः पुरुषार्थः सिध्यतीति मनः समाधाय मनसो नैश्चल्यमापाद्य श्रद्धाभक्तिभ्यामफलाकाङ्क्षिभिर्निष्कामैः श्रोत्रियैस्तन्त्रमन्त्रार्थवेदिभिर्विधिदृष्टो विध्युक्तनियमोपेतो यो यज्ञ इज्यते स सात्त्विको यज्ञ इत्यर्थः ॥ ११ ॥

अभिसंधाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥

अभिसंधायेति। स्वर्गादिफलार्थं वा दम्भार्थं वा क्रियमाणो यज्ञो राजस इत्यर्थः ॥ १२ ॥

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥

विधिहीनमिति। स्पष्टोऽर्थः ॥ १३ ॥

---

१ ज्योक् चिरम्।

शारीरादिभेदेन तपसस्त्रैविध्यमाह—

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४ ॥

देवेति त्रिभिः । देवा अग्न्यादयः, द्विजाः श्रोत्रियाः, गुरवः पित्राचार्योपाध्यायाद्याः, प्राज्ञाः ब्रह्मविदः । प्राज्ञा इति द्विजातिभ्यः पृथग्ग्रहणं प्राज्ञत्वमीश्वरप्रसादातिशयेन शतकोटिजन्मार्जितपुण्यविशेषातिशयलब्धेन जात्यन्तरीयाणामपि संभवति । धर्मव्याधादिषु तद्दर्शनात् । ततो जात्यन्तरीयाणामपि तेषां भक्त्या समाराध्यत्वबोधनार्थं तेषां पूजनं प्रणामशुश्रूषान्नादिभिराराधनम् । शौचं बाह्याभ्यन्तरशुद्धिः । आर्जवं कर्तव्ये कर्मणि साधुषु च सर्वत्र मनोवाक्कायकर्मणामेकरूपता । ब्रह्मचर्यमनिषिद्धकालरतिः । अहिंसा प्राण्यपीडनम् । चशब्दः समुच्चयार्थः । तदेतत्सर्वं शरीरनिर्वर्त्यत्वाच्छारीरं तप उच्यते ॥ १४ ॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५ ॥

अनुद्वेगेति । अनुद्वेगकरं अपरुषं सत्यं यथार्थभाषणं प्रियं मनःश्रवणानन्दकरं हितं पुरुषार्थकारि वाक्यम् । अनुद्वेगकरं च सत्यं हितं प्रियं चेति वाक्यचतुर्विधविशेषणसमुच्चयार्थश्चकारः । अनुद्वेगकरत्वसत्यत्वप्रियत्वहितत्वविशेषणचतुष्टयविशिष्टस्यैव वाक्यस्योच्चारितत्वे वाङ्मयतपस्त्वं सिध्यति । यथा उदात्तादिस्वरचतुष्टयानुवृत्तस्यैव वेदस्य वेदत्वं नान्यथा तद्वत्तन्नैवैकेन द्वाभ्यां वा त्रिभिर्वा विशेषणैर्वियुक्तस्योच्चारणेन तपस्त्वं संभवति । अतो मुमुक्षुर्विशेषणचतुष्टयविशिष्टमेव वचनं वदेदिति सिद्धम् । ब्रह्मयज्ञस्यापि वाङ्मये तपस्यन्तर्भाव इत्याह—**स्वाध्यायाभ्यसनं चेति** । प्राङ्मुखत्वपवित्रपाणित्वादिनियमविशिष्टं स्वाध्यायस्याभ्यसनमावृत्तिरपि तप एवेत्यर्थः । वाङ्मयं तदपि वाचा निर्वर्त्यमानत्वाद्वाङ्मयं तप उच्यते । चकारात् स्तोत्रपाठादिरपि वाङ्मयं तप एव भवतीत्यर्थः ॥ १५ ॥

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ १६ ॥

मन इति । मनःप्रसादः मनसो विषयेभ्यो विश्लिष्याविकारात्मनैकत्रावस्थानं प्रसादः । सौम्यत्वं उपकारिण्यपकारिण्यपीष्टेऽप्यनिष्टे च पक्षपातरहितत्वेन मनसोऽवस्थानं सौम्यत्वमक्रूरता वा । मौनं मुनेर्भावो मौनं सगुणस्य वा निर्गुणस्य वाप्यनुसंधानपरत्वं मौनं ध्यानपरायण एव मुनिस्तद्भाव एव मौनं नतु वाङ्मात्रनिरोधः । अन्यथा पश्वादीनामपि

तद्वृत्तापत्तेः । आत्मविनिग्रह आत्मनो मनसो विनिग्रहो विषयेषु प्रवृत्तिनिरोधनम् । भावसंशुद्धिः भाव्यतेऽर्थोऽनेनेति भावोऽन्तःकरणं तस्य रागद्वेषादिदोषसंश्लेषाभावापादनं भावसंशुद्धिरित्येतत् सर्वं मनएकसाध्यत्वान्मानसं तप उच्यते । महर्षिभिरित्यर्थः ॥ १६ ॥

उक्तस्यैव तपसस्त्रिविधस्य सत्त्वादिगुणभेदेन त्रैविध्यमाह—

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ १७ ॥

श्रद्धयेति । युक्तैरेकाग्रचित्तैः परमेश्वरभक्तियुक्तैरत एवाफलाकाङ्क्षिभिर्नरैः परया श्रद्धया तप्तं तत्त्रिप्रकारकं तपः सात्त्विकं सत्त्वगुणसंभावितातिश्रद्धया निष्पादितत्वात्सात्त्विकमिति परिचक्षते । कथयन्तीत्यर्थः ॥ १७ ॥

सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १८ ॥

सत्कारेति । सत्कारमानपूजार्थं सत्कारार्थं मानार्थं पूजार्थं च । सत्कारः साधुरयं विद्वान् ब्राह्मण इति स्तुत्यर्थं । मानो बहुमानस्त्वभ्युत्थानादिस्तत्प्रयोजनार्थं । पूजा गन्धपुष्पदक्षिणादिभिः स्वपूजा तदर्थं च । दम्भेन वेषभाषादिप्रकाशनेन दाम्भिकैर्यत्तपः क्रियते तत्तप इहास्मिन् लोके एव फलप्रदं भवति । तच्चाध्रुवं देहमात्रोपयोगित्वादध्रुवं तत्रापि चलं तात्कालिकफलं क्षणिकमेवंलक्षणं यत्तपस्तद्राजसमिति महर्षिभिः प्रोक्तमित्यर्थः ॥ १८ ॥

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९ ॥

मूढग्राहेणेति । मूढग्राहेण अर्थानर्थस्वरूपानभिज्ञो मूढस्तस्य ग्राहस्त्वहमेव बुद्धिमानित्यभिनिवेशो मूढग्राहस्तेनात्यन्तमूढबुद्ध्या स्वस्य पीडया कायक्लेशेन यदुक्तं त्रिविधं तपः क्रियते कायक्लेशमात्रैकप्रयोजनं अथवा परस्योत्सादनार्थमाभिचारिकक्रियया शत्रुविनाशार्थं वा यत्करोति तत्तपस्तामसं तमःसंभावितश्रद्धानिष्पादितत्वात्तामसमिति मुनिभिरुदाहृतमित्यर्थः ॥ १९ ॥

दानस्य त्रैविध्यमाह—

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ २० ॥

दातव्यमिति त्रिभिः । स्पष्टोऽर्थः ॥ २० ॥

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ॥ २१ ॥

यदिति । परिक्लिष्टं लोभातिशयेनान्तःकरणक्लेशसंयुक्तं यत्तद्दानं राजसम् ॥ २१ ॥

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२ ॥

अदेशेति । असत्कृतमर्घ्यपाद्यादिभिरनर्चितम् । अवज्ञातमवमानप्रयुक्तं दानं यत्तत्तामसमिति मुनिभिरुदाहृतम् ॥ २२ ॥

ननु देशकालपात्रद्रव्यमन्त्रतन्त्रादिस्वरूपं ज्ञात्वा यथाशास्त्रं वैदिकं कर्म श्रद्धाभक्तिविनयैः कर्तुं न शक्यते तेन सर्वस्यापि वैदिकस्य कर्मणो वैगुण्यमेव प्रसज्यते, तत्र कथमित्याकाङ्क्षायां 'विद्वान् यजेत' इति श्रवणाद्देशकालादिस्वरूपज्ञेन विदुषैव सर्वं कर्म विज्ञाय श्रद्धया कर्तव्यं तथापि यज्ञदानतपोव्रतादीनामतत्त्वज्ञेन क्रियमाणानामश्रद्धया वा भ्रमप्रमादादिना वा क्वचित्तन्त्रमन्त्रस्वरवर्णादिलोपेन वा वैगुण्ये प्राप्ते ॐतत्सदित्युक्त्या सर्वं सगुणं सफलं च भवतीति बोधयितुमयमुपदेशः क्रियते—

ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥

ओमिति । 'ओमिति ब्रह्म' इति, 'तत्त्वमसि' इति, 'सदेव सोम्य' इति च श्रवणात् । ओमिति तदिति सदिति च परस्य ब्रह्मणो निर्देशः निर्दिश्यते वस्त्वनेनेति निर्देशो नाम त्रिविधस्त्रिप्रकारः स्मृतो वेदान्तविद्भिरुद्दालकादिभिः । ॐतत्सदित्येतानि त्रीणि ब्रह्मणो नामान्युक्तानीत्यर्थः । एवं नामनिर्देशं कृत्वा नाम्नां महत्त्वमाह—**ब्राह्मणा इति ।** पुरा सर्गादौ तेनोक्तेन नामत्रितयेन ब्राह्मणा ऋगादयो वेदाः श्रौताः स्मार्ताश्च सर्वे यज्ञा विहिता निर्मिताः । तेभ्यः समुत्पन्ना इत्यर्थः । एतेन पावनानां वेदादीनां जनिहेतुत्वात्तेषां त्रयाणामपि नाम्नां पवित्रत्वस्येयत्ता नास्तीति सूचितम् । ततस्तदुच्चारणं सर्वपापप्रायश्चित्ततममिति सिद्धम् ॥ २३ ॥

इममेवार्थं प्रतिपादयन्नादौ प्रणवस्य विनियोगमाह—

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ २४ ॥

तस्मादिति । यस्मादेतन्नामत्रितयं ब्रह्मवाचकत्वेन वेदादिजनकत्वेन च पवित्रतममिति मतं, तस्मादोमित्युदाहृत्य कर्मारम्भे तदन्ते चोंकारमुच्चार्य ब्रह्मवादिनां ब्रह्म वेदास्तदर्थं च वदितुं शीलमेषामस्ति ते

ब्रह्मवादिनो वेदवेदार्थपारगा ब्राह्मणास्तेषां ब्रह्मवादिनां विधानोक्ताः विध्युक्ता यज्ञदानतपःक्रियाः सर्वाः कचिदश्रद्धादिनाङ्गवैकल्येऽप्याद्यन्तयोरोमित्युच्चारणेन सततं यथोक्तलक्षणैः संपूर्णं यथा तथा प्रवर्तन्ते प्रकर्षेण वर्तन्ते प्रवर्तन्ते। प्रकृष्टाः साङ्गाः सात्त्विका भवन्तीत्यर्थः ॥२४॥

एवमोंकारस्य कर्मसाद्गुण्यसंपादने विनियोगमुक्त्वा तत्पदस्य विनियोगमाह—

तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥ २५ ॥

तदितीति। उदाहृत्येति पदं पूर्वोक्तमनुवर्तते। मोक्षकाङ्क्षिभिर्मोक्षैककामैः। एतेन पूर्वोक्तानां कामित्वं सूचितम्। मुमुक्षुभिर्ब्राह्मणैः फलं कर्मजन्यमनभिसंधाय संकल्पाननपेक्ष्य चेश्वरार्पणबुद्ध्या चित्तशुद्धये कर्मारम्भादौ तदिति पदमुदाहृत्य समुच्चार्य यज्ञदानतपःक्रियाः श्रौताद्या यज्ञक्रियाः, शारीरादयस्तपःक्रियाः, कन्यागवादिभेदेन विविधा दानक्रियाश्च क्रियन्ते। श्रद्धाद्यङ्गलोपे सति तत्पदप्रयोगेण सगुणाः क्रियन्त इत्यर्थः ॥ २५ ॥

एवमोंतच्छब्दयोर्विनियोगमुक्त्वाथ सच्छब्दस्य विनियोगमाह—

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ २६ ॥

सद्भाव इति द्वाभ्याम्। सद्भावे विद्यमानस्य वस्तुनोऽस्तित्वं सद्भावस्तस्मिन् सद्भावे देवदत्तस्य पुत्रोऽस्तीत्येतस्मिन्नर्थे पण्डितैः सदित्येतत्पदं प्रयुज्यते। यद्वा सतो ब्रह्मणो भावः सद्भावस्तस्मिन् सर्वस्य ब्रह्मभावे विवक्षिते सदिदमिति सच्छब्दः प्रयुज्यते। साधुभावे च सद्वृत्तता साधुभावस्तस्मिन् विवक्षिते साधोः साधुभावे सद्भिः सन्नयमिति सच्छब्दः प्रयुज्यते। तथा च कर्मणः प्रशस्तत्वे विवक्षिते सदिदं कर्मेति सच्छब्दः प्रयुज्यत इत्यर्थः ॥ २६ ॥

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥

किंच **यज्ञ इति**। यज्ञे श्रौतादौ तपसि शारीरादौ दाने च कन्यादानादौ या स्थितिरवस्थानं सा च विद्वद्भिः सदित्युच्यते। यज्ञादीनामश्रद्धादिदोषोपपत्तौ साधुत्वसिद्धये सच्छब्दः प्रयुज्यत इत्यर्थः। तदर्थीयं। अत्र तच्छब्देन लोकशास्त्रप्रसिद्धः परमेश्वरो गृह्यते। तदर्थीयं परमेश्वरार्थकं कर्म च सदित्येवाभिधीयते। अश्रद्धादिदोषप्राप्तौ यज्ञादीनां

साद्गुण्याय ॐ तत्सदिति ब्रह्मणो नामत्रयं प्रयुज्यत इत्युक्त्या सात्त्विक्या श्रद्धयैव मुमुक्षुभिर्यज्ञदानादिकर्म नियमेन कर्तव्यमिति पर्यवसितं नान्यथेत्यर्थः ॥ २७ ॥

श्रद्धाविधुरस्य कर्मणो निष्फलत्वमाह—

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे त्रिगुणविभागयोगो नाम सप्तदशोऽध्यायः ॥ १७ ॥

अश्रद्धयेति । अश्रद्धया श्रौते स्मार्ते च कर्मणि यदग्नौ हुतं, यदन्नोदकादिकं ब्राह्मणेभ्यो दत्तं, यच्छारीरादिलक्षणं तपस्तप्तं, यदन्यत् स्तोत्रमन्त्रजपादिकं कर्म कृतं भवति तत्सर्वमसन्निष्फलमेव भवति । तदेव विस्पष्टयति—**नचेति** । शरीरादिवहुप्रयासेन कृतं भक्तिश्रद्धाविधुरं यत्सर्वं कर्म प्रेत्य परलोकसुखाय न भवति नो इह ऐहिकसुखाय च न भवति श्रद्धावैधुर्यान्मन्त्रादिलोपाच्च तत्कर्म देवा अपि नानुमन्यन्ते नैव च शिष्टा अपि । अतः श्रद्धाशून्यं कर्म निष्फलमेवेत्यर्थः । ननु 'अश्रद्धया देयम्' इति विधिवलादश्रद्धया कृतमपि कर्म दानादि फलवदेव स्यादिति चेत्सत्यम् । यद्यप्यश्रद्धया देयमिति श्रूयते, तथापि 'केवलाघो भवति केवलादी' इति केवलादिनो महापापिष्ठतमत्वप्राप्तौ तन्निवृत्तये त्वश्रद्धया देयमिति दयया श्रुत्योच्यते नतु विधीयते । 'यतिश्च ब्रह्मचारी च विद्यार्थी गुरुपोषकः । अध्वगः क्षीणवृत्तिश्च' इत्यादिषु भिक्षुकेष्वन्येषु वा दोषवत्सु सत्सु न तेषु श्रोत्रियस्य श्रद्धा जायते गृहस्थैकशरणानां तेषां गत्यन्तराभावादश्रद्धयापि च दातव्यमेवेत्युच्यते 'अश्रद्धया देयं ह्रिया देयम्' इति, 'यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः । वर्तन्ते गृहिणं तद्वदाश्रित्येतर आश्रमाः' इति न्यायेन सर्वाश्रमिणां गृहस्थैकशरणत्वात् 'दानमेव गृहस्थस्य' इति गृहिणो दानैकप्रधानत्वस्मरणाच्च यथाकथंचिदर्थिभ्योऽश्रद्धया वा ह्रिया वा भिया वाऽवश्यं दातव्यमिति दानस्यावश्यकरणीयत्वं सूच्यते 'अश्रद्धया देयम्' इत्यादिना । ततो नायं विधिः । अन्यथा 'श्रद्धया देयं' 'श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः', 'श्रद्धां कामस्य मातरम्' इति सर्वस्यापि कर्मणः श्रद्धाप्रधानत्वविधिवैयर्थ्यप्रसङ्गात् । तस्माच्छ्रौतं स्मार्तं च कर्म सर्वं श्रद्धयैव कर्तव्यमिति सिद्धम् ॥ २८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः ।

ॐ सात्त्विक्या श्रद्धया समन्वितस्य सात्त्विकैर्यज्ञतपोदानादिभिः परिशुद्धात्मन एव ब्राह्मणादेर्ज्ञानाधिकार इति सूचयितुं श्रद्धया यज्ञतपोदानादीनां हेयत्वोपादेयत्वविज्ञानाय तेषां सात्त्विकत्वादिभेदं च विभज्य सम्यग् दर्शयित्वा, अधुना त्यागसंन्यासशब्दयोरेकार्थत्वं काम्यनिषिद्धयोरेव त्याज्यत्वं नित्यानां तु यज्ञदानादीनां नियमेन कर्तव्यत्वं त्यागस्य सात्त्विकत्वादिभेदं नैष्कर्म्यसिद्धिलक्षणज्ञानस्य कर्मणश्च कर्तुश्च बुद्धेर्धृतेश्च सुखस्य च सात्त्विकत्वं राजसत्वं तामसत्वं च ब्राह्मणादीनां कर्माणि च तैः प्रसन्नान्तःकरणस्य ज्ञानं तद्वतो यतेर्ज्ञाननिष्ठां च परमात्मस्वरूपवेदनप्रकारं ब्रह्मप्राप्तिं चैवमादिकं सर्वस्य गीताशास्त्रस्य सर्वोपनिषदां चार्थं सर्वं संगृह्यैकत्र प्रतिपादयितुमष्टादशाध्याय आरभ्यते । तत्रादौ 'मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा' इति, 'ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः' इति, 'संन्यासयोगयुक्तात्मा' इति च, 'त्यक्त्वा कर्मफलासङ्गं' इति, 'सर्वकर्मफलत्यागम्' इति च तत्र तत्र कर्मसंन्यासकर्मफलत्यागौ प्रतिपादितौ, कर्मफलत्यागेन कर्मानुष्ठानं कर्मसंन्यासं चोक्तं स्मृत्वा एकस्मिन्नेवाश्रमे तयोरनुष्ठानानुपपत्तिं मन्यमानस्तदनुष्ठानप्रकारं ज्ञातुमिच्छुरर्जुन उवाच—

अर्जुन उवाच ।

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥

संन्यासस्येति । संन्यासस्य संन्यासशब्दार्थस्य त्यागस्य त्यागशब्दार्थस्य च । चः समुच्चयार्थः । पृथग्विभज्य तत्त्वं याथार्थ्यं निश्चितमर्थं त्वत्तो वेदितुमिच्छामि । 'मयि सर्वाणि कर्माणि संन्यस्य' इति, 'योगसंन्यस्तकर्माणम्' इति, 'सर्वकर्मफलत्यागम्' इति, च तत्र तत्र त्वयोक्तयोः संन्यासत्यागशब्दयोः प्रत्येकमर्थविशेषं विज्ञातुमिच्छामि हे केशिनिषूदन, केशिनामानं दैत्यं निषूदितवानिति हे केशिनिषूदनेति संबुद्धिः । गृहमेधिविषये यथा ब्रह्मचर्यशब्दस्य यथावाऽहिंसाशब्दस्य चार्थविशेषस्तथा संन्यासशब्दस्य त्यागशब्दस्य चार्थविशेषो वक्तव्य इत्यर्थः ॥ १ ॥

एतादृशमर्जुनप्रश्नतात्पर्यं विज्ञाय 'संन्यासयोगाद्यतयः' इति, 'त्यागेनैके अमृतत्वम्' इति श्रवणात् मयेदं संन्यस्तं त्यक्तमिति संन्यासत्यागशब्दयोर्लोके वेदे च विसर्ग एक एवार्थो नत्वर्थान्तरमस्ति, तथापि गृहि-

विषये तयोरर्थं केचिदन्यथा वर्णयन्ति तेषां मतमिदं वक्ष्यामि शृण्विति श्रीभगवानुवाच—

श्रीभगवानुवाच ।

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥

काम्यानामिति । 'पुत्रकामो यजेत', 'स्वर्गकामो यजेत', 'पशुकामो यजेत' इति एवं कामोपबन्धनेन विहितानां काम्यानां ज्योतिष्टोमादिकर्मणां न्यासं परित्यागमेव गृहस्थस्य संन्यासमिति केचित्कवयो विद्वांसो विदुर्जानन्ति । काम्यकर्मपरित्याग एव मुमुक्षोर्गृहिणः संन्यास इति वदन्तीत्यर्थः । केचित्पदं सर्वत्रान्वेति । केचिद्विचक्षणाः पण्डिताः सर्वकर्मफलत्यागं सर्वेषां काम्यानामकाम्यानां नित्यनैमित्तिकानां च कर्मणां फलत्यागं फलमात्रस्य परित्यागं त्यागं संन्यासं प्राहुः कामेन वाऽकामेन वा विधिना कर्तव्यत्वेन प्राप्तानि वैदिकानि कर्माण्यनुष्ठायेश्वरार्पणबुद्ध्या तत्फलपरित्याग एव गृहिणोऽधिकृतस्य संन्यासो नतु कर्मत्याग इति केचिद्वदन्तीत्यर्थः । ननु 'यः पशुकामः स्यात्स एतं प्राजापत्यमजं तूवरमालभेत स वा एतस्मै प्रजां पशून् प्रजनयति' इति काम्यकर्मणां यथा फलं श्रूयते न तथा 'अहरहः संध्यामुपासीत', 'सायंप्रातरग्निहोत्रं जुहोति', 'अहरहर्यजमानः स्वयमेवाग्निहोत्रं जुहोति' इत्यादिषु नित्यानां कर्मणां फलं श्रूयते कथमविद्यमानस्य फलस्य त्याग उपपद्यते ब्रह्मचारिणो भार्यात्यागवदिति चेन्न । 'कर्मणा पितृलोकः' इति, 'धर्मेण पापमपनुदति' इति, 'सर्व एते पुण्यलोका भवन्ति' इति, 'अग्नीन्हुत्वा विधानेन यत्पुण्यं फलमाप्नुयात्' इति नित्यानामपि फलश्रवणात् । 'अनिष्टमिष्टं मिश्रं च' इति भगवतापि नित्यानां फलमुच्यते ततोऽस्त्येव नित्यानामपि फलमन्यथा फलत्यागविधानायोगात्तस्माद्युक्तमेवोक्तं 'सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः' इति । ततः सिद्धं गृहिणां कर्मफलत्याग एव त्यागः संन्यासो नतु सर्वकर्मत्याग इति ॥ २ ॥

एवं संन्यासत्यागयोरर्थैकत्वेऽपि मतभेदेन काम्यकर्मत्यागस्य सर्वकर्मफलत्यागस्य च संन्यासशब्दार्थत्वं प्रतिपाद्य पुनरपि त्यागशब्दस्य मतान्तरेणार्थान्तरं वर्णयति—

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ ३ ॥

त्याज्यमिति । एके केचन मनीषिणो विद्वांसः दोषवद्दोषो दूषणं

निषेधलक्षणमस्यास्तीति दोषवद्दोषयुक्तं 'न कलञ्जं भक्षयेत्', 'न सुरां पिबेत्' इत्यादिशास्त्रप्रतिषिद्धम्। दुर्गतेर्दुर्योनेश्च प्रापकं कलञ्जभक्षणादिलक्षणं पातकं यत्तत्कर्म त्याज्यं त्यक्तव्यमिति प्राहुः। दोषवत्कर्मणस्त्याग एव त्यागो नतु काम्यानां नापि कर्मफलस्य च त्यागशब्दार्थस्तेषां दुर्गतिदुर्योनिप्रापकत्वाभावात्फलाभावे प्रेक्षावत्प्रवृत्त्यसंभवाच्च। 'यत्कर्म कुरुते तदभिसंपद्यते' इत्यादिश्रुतिविरोधप्रसङ्गाच्च 'यान्यनवद्यानि कर्माणि तानि सेवितव्यानि' इत्यदुष्टकर्मणां वैदिकानां कर्तव्यत्वश्रवणाच्च। तस्माद्दोषवत्कर्मत्याग एव त्यागः संन्यास इति केचिद्वदन्तीत्यर्थः। यद्वा मनीषिणः प्रकृतिविकृतिविलक्षणमात्मानमसङ्गचिद्रूपं मन्तुं शीलं येषामस्ति ते मनीषिणः केचित्पण्डिताः सांख्याः दोषवत् 'न हिंस्यात्सर्वा भूतानि' इति प्राणिमात्रस्य हिंसानिषेधके श्रुतिवचने जाग्रति सति 'ब्राह्मणो न हन्तव्यः' इति निषेधो बुद्धिपूर्वकहिंसाया दोषाधिकत्वबोधनार्थ एव भवति, नतु बुद्धिपूर्विका भूतहिंसा दोषहेतुर्न कर्तव्येत्येवमर्थो भवति। तथात्वे त्वबुद्धिपूर्विकाया हिंसाया दोषाभावप्रसङ्गाद्विशेषविध्यनर्थत्वप्रसङ्गाच्च। ततो दोषाधिकत्वबोधकत्वमेव विशेषविधेरभ्युपगन्तव्यम्। तेनाग्नीषोमीयपशुहिंसायामपि बुद्धिपूर्वकत्वाद्दोषाधिकत्वमेव भवति। उभयत्रापि बुद्धिपूर्वकत्वविशेषात् 'तर्ह्यग्नीषोमीयं पशुमालभेत' इति विधेर्व्यर्थत्वमेव स्यादिति चेन्न। प्रकारान्तरेणार्थवत्तासिद्धेः। रागतः प्राप्तामिषसेवाया अग्नीषोमीययजनव्याजेनावकाशप्रदानपरत्वाद्विधिः सार्थ एव भवति। यथा रागतः प्राप्तव्यवायस्य धर्मप्रजासंपत्त्यर्थं स्त्रियमुद्वहेदित्येष विधिः कर्माङ्गतया स्त्रीपरिग्रहविधानव्याजेनावकाशं प्रयच्छन्नर्थवान् भवति तद्वत्। यत एवमतः 'सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः' इति न्यायेन सर्वमपि कर्म द्रव्यसाध्यत्वेन हिंसाप्रधानत्वाद्दोषवदेव भवति। दोषवत्त्वेन बन्धकत्वाच्छ्रौतं स्मार्तं च वैदिकं कर्म सर्वमपि त्याज्यमेवेति सर्वकर्मत्यागमेव त्यागं प्राहुरित्यर्थः। ननु विहिताकरणे प्रत्यवायः स्यादिति चेन्न, दोषवत्कर्मानुष्ठाने ततोऽधिकतरः प्रत्यवायः स्यादित्याहुः, ततः कलञ्जभक्षणक्रियावत्सर्वस्यापि कर्मणो दोषवत्त्वेन तत्त्यागो न दोषायेति च ते मन्यन्त इत्यभिप्रायः। एवं सांख्यमतभेदेन त्यागशब्दस्यार्थभेदमुक्त्वा मीमांसकमतभेदेनाप्यर्थभेदं सूचयितुमाह—**यज्ञेति**। 'अकृत्वा वैदिकं नित्यं प्रत्यवायी भवेन्नरः' इति, 'यावज्जीवमग्निहोत्रं जुहोति' इति, 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः' इति, 'सत्यं वद', 'धर्मं चर' इति, 'सत्यान्न प्रमदितव्यं', 'धर्मान्न

प्रमदितव्यम्' इत्यादिश्रुतिभिः 'श्रौतं चापि तथा स्मार्तं कर्मालम्ब्य वसेद्विजः । तद्विहीनः पतत्येव ह्यालम्बरहितान्धवत्' इत्यादिस्मृतिभिश्च वैदिककर्मणो नित्यस्यावश्यकरणीयत्वविधानादकरणे प्रत्यवायविधानाच्च ब्राह्मणस्य यज्ञदानतपः यज्ञो दानं तप इत्येवंलक्षणं वैदिकं कर्म न त्याज्यं न कदापि च त्यक्तव्यं, किंतु निरुक्तश्रुतिस्मृतिबलाद्यावज्जीवं कर्तव्यमेव । 'एकाहं जपहीनस्तु संध्याहीनो दिनत्रयम् । द्वादशाहमनग्निश्च शूद्र एव न संशयः ॥ त्र्यहं संध्याविरहतो द्वादशाहं निरग्निकः । चतुर्वेदधरो विप्रः शूद्र एव न संशयः ॥ तस्मान्न लङ्घयेत्संध्यां सायंप्रातः समाहितः । उल्लङ्घयति यो मोहात्स याति नरकं ध्रुवम् ॥' इति । संध्यापदमौपासनाग्निहोत्रादेरुपलक्षणम् । 'वीरहा वा एष देवानां योऽग्निमुद्वासयते' इत्यादिश्रुतिस्मृतिभ्योऽप्यग्निहोत्रादेः कर्मणः परित्यागे प्रत्यवायाधिक्यश्रवणाद्ब्राह्मणादीनां यज्ञदानादिकं वैदिकं कर्म नित्यं नियमेन कर्तव्यमेव । ननु द्रव्यसाध्यस्य यज्ञदानादेः कर्मणो हिंसावत्त्वेन दोषवत्त्वादोषवत्कर्मणः कथमनुष्ठानमुपपद्येत इतिचेदुच्यते । 'ब्राह्मणो न हन्तव्यः' इत्येतद्वचनं क्रोधतः प्राप्तं ब्राह्मणवधं दोषाधिकत्वं वदन्निषेधति नतु बुद्धिपूर्वकहिंसामात्रे सर्वत्र दोषाधिकं बोधयति । विशेषविधेः स्वविधेयमात्रविषयत्वात् । ब्राह्मणान् सर्वान् भोजयेद्देवदत्तं न भोजयेदित्यत्र निषेधस्य स्वविधेयमात्रविषयत्वदर्शनात्ततोऽग्नीषोमीयपशुहिंसादौ दोषाधिकत्वं बोधयितुं न शक्नोति । स्वविधेयमात्रोपक्षीणत्वाद्विशेषस्य । नापि 'न हिंस्यात्सर्वा भूतानि' इत्ययं निषेधोऽपि यागीयपशुहिंसायां सामान्यतोऽपि दोषमासञ्जयितुं कल्पते । सामान्यतो विशेषस्य बलीयस्त्वात् । 'अन्नं न प्रतिगृह्णीयात् प्राणैः कण्ठगतैरपि' इत्येतन्निषेधापेक्षया 'याचयेच्छ्रोत्रियस्यान्नम्' इत्येतस्य विधेर्बलीयस्त्वावगमात् । 'ब्राह्मणान्सर्वान्वारय देवदत्तं भोजय' इत्यत्र विशेषस्य बलीयस्त्वदर्शनाच्च सामान्यस्य तृणगुल्मच्छेदादौ सावकाशत्वाच्च । 'सावकाशनिरवकाशयोर्निरवकाशं बलीयः' इति निरवकाशस्य बलीयस्त्वस्मरणाच्च । ततो यागीयपशुहिंसायाः सामान्यतो विशेषतश्च दोषगन्धः संपादयितुं न शक्यते । किंच 'मधुपर्के च यज्ञे च पित्र्ये दैवे च कर्मणि । अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः' इति, 'अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः' इति तीर्थेभ्यो यज्ञादिभ्योऽन्यत्र भूतान्यहिंसन्निति भूतहिंसानिषेधस्य यागीयव्यतिरिक्तहिंसाविषयत्वश्रवणान्निषेधाव्याप्तेः 'याचयेच्छ्रोत्रियस्यान्नं तदभावे जलं पिबेत्' इति विध्युक्तायाः

श्रोत्रियान्नादनक्रियाया निर्दुष्टत्वं पावकत्वं च यथा तथा यागीयपशुहिंसाया अपि विध्युक्तायाः निर्दुष्टत्वं पावकत्वं चावगम्यते। तथैव श्रूयते 'धर्मेण पापमपनुदति तस्माद्धर्मं परमं वदन्ति', 'तपसा कल्मषं हन्ति', 'ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा' इति, तस्माद्ब्राह्मणादेर्यज्ञदानादिलक्षणं नित्यं वैदिकं कर्मावश्यकमनुष्ठातव्यमेव न कदापि त्याज्यं किंतु 'नतु काम्यं समाचरेत्', 'न कलञ्जं भक्षयेत्' इत्यादिवचनात्काम्यं निषिद्धं चैतद्द्वयमेव त्याज्यमिति। काम्यनिषिद्धत्याग एव त्यागो नतु कर्मफलत्यागस्त्याग इत्यपरे केचन मनीषिणो वैदिकशिरोमणयो मीमांसकाः प्राहुरित्यर्थः। ननु 'संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्' इत्यर्जुनकृतप्रश्नस्य विषयो मुख्यसंन्यासो वा उत गौणसंन्यासो वा। आद्ये स विद्वत्संन्यासो वा, किं विविदिषासंन्यासो वा। नाद्यः। विद्वत्संन्यासस्य निरुक्तविकल्पासंभवात् 'तामसः परिकीर्तितः' इति वक्ष्यमाणतामसादिभेदानुपपत्तेश्च, सति विदुषः कर्मणि कर्तव्ये तत्संन्यासस्य विकल्पाः स्युर्नासति। 'तस्य कार्यं न विद्यते' इति, 'नैवास्ति किंचित्कर्तव्यम्' इति विदुषः सर्वकर्माभावश्रवणात्। 'ज्ञानयोगेन सांख्यानाम्' इति ब्रह्मविदां यतीनां ज्ञाननिष्ठापरत्वविधानाच्च नास्ति विकल्पावकाशः। ननु 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादिविधिबलाद्विदुषोऽपि कर्म कर्तव्यमेवेति चेन्न। विधेर्मिथ्यात्वोपपत्तेः। 'मायामात्रमिदं द्वैतम्' इति द्वैतस्य सर्वस्य मायामात्रत्वेन मिथ्यात्वे सिद्धे तदन्तःपातिनः कर्मविधेरपि शुक्तिरजतवन्मिथ्यात्वेन बलासंभवात् स्वमिथ्यात्वदर्शिनं प्रति नियोक्तृत्वायोगात्, नहि मिथ्याभूतं रजतं स्वतत्त्ववेदिनं पुरुषमादानादौ प्रवर्तयितुं शक्नोति। तद्वन्मिथ्याभूतः कर्मविधिरपि विद्वांसं न प्रवर्तयितुं शक्नोतीत्यर्थः। न द्वितीयः। सर्वतो विरक्तस्य विदुषः कर्मणां साध्यमपश्यतः काम्यकर्मपरित्यागेन वा कर्मफलत्यागेन वा कर्मानुष्ठानानुपपत्तेः। चित्तशुद्ध्यै कर्म कर्तव्यमेवेति चेन्न। सर्वतो विरत्तयतिरिक्तश्चित्तशुद्ध्यन्तराभावात्। विधिबलादीश्वरप्रीत्यै कर्म कर्तव्यमेवेति चेन्न। 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति त्यागविधेस्ततोऽपि प्रबलत्वात्। 'तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते। जिज्ञासायां संप्रवृत्तो नाद्रियेत्कर्मचोदनाम्' इतीश्वरेणैव जिज्ञासोर्विध्युपेक्षाविधानात्। 'दूरेण ह्यवरं कर्म' इति मुमुक्षोर्विरक्तस्य कर्मनिन्दापूर्वकं श्रवणपरत्वविधानाच्च। आत्मन्यग्नीन् समारोप्य

ब्राह्मणः प्रव्रजेद्गृहात्' इति विविदिषोः सर्वकर्मसंन्यासस्मरणात्ततो विविदिषोरपि कर्मसंबन्धासंभवेन निरुक्तविकल्पानामवकाशः संभवति । ततो गौण एव संन्यासो गृहिनिष्ठः प्रश्नस्य विषयो नतु मुख्य इति सिद्धम् । जिज्ञासितो गौण एव संन्यास इत्यत्र प्रमाणं पूर्वोक्तगीतावचनान्येवेति बोद्धव्यम् ॥ ३ ॥

त्यागगुणेन मुख्यसंन्याससादृश्यसंभवाद्गृहिणः काम्यकर्मत्याग एव संन्यास इति, सर्वकर्मफलत्याग एव संन्यास इति, दोषवत्कर्मत्याग एव संन्यास इति, काम्यनिषिद्धकर्मपरित्याग एव संन्यास इति, त्यागशब्दार्थं संन्यासं पण्डिताः स्वस्वमतानुसारेण बहुधा वर्णयन्तीत्येवं मतभेदेन त्यागशब्दस्यार्थभेदं प्रतिपाद्य, स्वाभिमतमर्थं वक्तुं स्वमतसिद्धस्य त्यागस्याधिकारिभेदेन त्रैविध्यमाह—

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥ ४ ॥

निश्चयमिति । उक्तरीत्या च बहुधा विकल्पिते तत्र तस्मिन् त्वत्प्रश्नविषयभूते त्यागे त्यागशब्दार्थे संन्यासे मे निश्चयं मया निश्चितमर्थं मत्तः शृणु । श्रुतार्थप्रवृत्तिसिद्धये श्रोतारं स्तौति—हे भरतसत्तम हे पुरुषव्याघ्रेति । हि यस्मात्कारणात्त्यागं पण्डिता अपि बहुधा वर्णयन्ति । तस्मात्त्यागो बुद्धिमतामपि दुर्विज्ञेयः । सर्वकर्मफलत्यागं ततः कुर्वित्यत्र नित्यानां नैमित्तिकानां च सर्वेषां कर्मणां फलमात्रपरित्याग एव यथा विवक्षितस्तथा मयि सर्वाणि कर्माणि संन्यस्य, योगसंन्यस्तकर्माणमित्यादावपि कर्मसंन्यासपदस्य कर्मफलत्याग एवार्थो विवक्षितो भवति नतु कर्मसंन्यासः, कर्माधिकारे कर्मसंन्यासविधानायोगात् । य उक्तलक्षणस्त्यागः स एव त्रिविधस्तामसादिभेदेन त्रिप्रकार इति मुनिभिः संप्रकीर्तितो भवति तं मयोच्यमानं शृण्वित्यर्थः ॥ ४ ॥

यत्प्रतिज्ञातं मे निश्चयं शृण्विति तं स्वनिश्चयं प्रतिपादयति—

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५ ॥

यज्ञेति द्वाभ्याम् । यज्ञः श्रौतः स्मार्तश्च, दानं पात्रेष्वर्थसमर्पणं, तपः स्वाध्यायः, 'त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानम्' इति अध्ययनस्य धर्मस्कन्धत्वेन गृहिधर्मत्वश्रवणात्तपो हि स्वाध्याय इति स्वाध्यायस्य तपस्त्वश्रवणात्तपःशब्देनाध्ययनमुच्यते । एवं यज्ञदानतपोलक्षणं त्रिविधं नित्यं वैदिकं कर्म मुमुक्षोर्गृहिणो विरक्तस्य न त्याज्यं न कदाचित्त्यक्तव्यं

किंतु नित्यत्वात्पुरुषार्थहेतुत्वादकरणे प्रत्यवायाच्च यज्ञोऽध्ययनं दानमिति 'अहरहः संध्यामुपासीत', 'उदिते सूर्ये प्रातर्जुहोति' इत्यादिश्रुत्युक्तं कर्म नित्यं मुमुक्षोः कार्यम्। श्रद्धाभक्तिभ्यां नियमेन कर्तव्यमित्यर्थः। उक्ते कर्मणि प्रवृत्तिसिद्धये फलमाह—**यज्ञ इति**। मनीषिणामधीतविदितवेद-वेदार्थानां सदसद्विवेकवतां मुमुक्षूणां परमेश्वरार्पणबुद्ध्या कृतानि यज्ञो दानं तपः। चकारोऽत्र यज्ञदानादीनामुक्तानामनुक्तानां श्रौतानां स्मार्तानां च कर्मणां समुच्चयार्थः। एवकारो यज्ञदानादेर्वैदिकस्यैव कर्मणो वर्णा-श्रमिणां विहितस्य पावनत्वनिर्धारणार्थः। यज्ञदानतपोलक्षणानि श्रौतानि स्मार्तान्येव कर्माणि पावनान्युपात्तसर्वदुरितक्षयकराणि सत्त्वशोधकानि तद्द्वारा ज्ञानस्य तत्फलस्य च कारणानीत्यर्थः ॥ ५ ॥

यज्ञदानादिकर्मणां नित्यानां नियमेनावश्यकर्तव्यत्वं शोधकत्वं फलं चोक्त्वा तेषामनुष्ठानप्रकारमाह—

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ ६ ॥

एतानीति। एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा कर्तव्यानीत्यत्र 'त्वन्ता-थादि न पूर्वभाक्' इति न्यायेन तुशब्दयोगादपिशब्दाच्चोक्तव्यतिरिक्तानि काम्यान्यपि कर्माण्यकामेन कर्तव्यान्येवान्यथा त्वपिशब्दप्रयोगस्य व्यर्थता स्यादिति विद्वद्भिर्न मन्तव्यं, तथात्वे भगवद्वचनवैलक्षण्याभावप्रसङ्गात् 'सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः' इत्यत्र सर्वपदेन पूर्वोक्तकाम्यक-र्माणि गृहीत्वा सर्वेषां काम्यानामकाम्यानां च कर्मणां फलमात्रस्य परि-त्यागं प्राहुरित्युक्तमतभेद एवात्राप्युपन्यस्तः स्यात्। भगवतोऽपि तन्मता-नुसारित्वे स्वातन्त्र्याभावप्रसङ्गात् निश्चयं शृणु मे तत्रेति वचनव्या-घातप्रसङ्गाद्यज्ञार्थात्कर्मणोऽन्यत्रेत्ययज्ञार्थस्य काम्यस्य बन्धकत्व-विधानात् 'कृपणाः फलहेतवः' इति काम्यकर्मणो निन्दितत्वाच्च नैवात्र तेषां प्रसञ्जनमस्ति तर्ह्यपिशब्दतुशब्दयोर्व्यर्थता स्यादिति चेदुच्यते। तुशब्दो नित्यानां काम्यव्यतिरिक्तत्वबोधनार्थः। अपिश-ब्दस्तु संभावनार्थः। एतच्छब्दः सन्निहितपरामर्शार्थस्तत एवैतानि पूर्वो-क्तानि यज्ञदानादीनि नित्यानि नतु काम्यानि। तथापि काम्यव-त्फलाभिसंधियुक्तानि चेद्बन्धायैव भवन्ति नतु मुक्तये। ततस्तान्येतानि यज्ञदानादीनि नित्यानि सङ्गं सज्जतेऽनेनेति सङ्गः कामस्तं सङ्गं फलानि चोक्तानि वक्ष्यमाणानि चानिष्टादीनि त्यक्त्वा मुमुक्षुभिरीश्वरार्पणबुद्ध्या कर्तव्यानीति निश्चितं श्रुतियुक्तिभिर्निर्धारितं ममेश्वरस्य मतं सिद्धान्तमु-

त्तमं चोक्तेभ्यो मतेभ्य उत्कृष्टतमं प्रत्यवायरहितत्वेन नरकाद्यनिष्टनिवृत्तिहेतुत्वात्स्वर्गगमागमक्लेशनिवर्तकत्वाच्चित्तशुद्धिद्वाराभीष्टमुक्तिहेतुत्वाच्च तेभ्यः श्रेष्ठतममित्यर्थः ॥ ६ ॥

'निश्चयं शृणु मे तत्र' इत्युपक्रान्तं स्वसिद्धान्तमुक्त्वाऽधुना मुमुक्षोरविरक्तस्य कर्मसंन्यासं निषेधयन् 'त्रिविधः संप्रकीर्तितः' इत्युक्तं त्यागस्य त्रैविध्यं प्रतिपादयति—

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ ७ ॥

नियतस्येति । नियतस्य श्रुतिस्मृतिविहितस्य संध्योपासनाग्निहोत्रादेः कर्मणः संन्यासः काम्यकर्मवत्परित्यागो मुमुक्षोरशुद्धचित्तस्य नोपपद्यते । नित्यस्य कर्मणः सत्त्वशोधकत्वादकरणे प्रत्यवायाच्चाज्ञस्य कर्मसंन्यासो न कर्तव्य इत्यर्थः । कर्मणस्तत्त्वमविज्ञायापातदृष्ट्या दोष इति त्यागोऽविवेकेन कृतश्चेत्किमित्याह—**मोहादिति** । कृत्याकृत्यज्ञानाभावो मोहोऽविवेकस्तस्मान्मोहात्तस्य नियतस्य स्वानुष्ठानजन्यचित्तशुद्धिद्वारा मोक्षहेतुत्वेनोपादेयस्य नित्यस्य कर्मणः परित्यागस्तामसस्तमोगुणकार्यत्वात्तामस इति सद्भिः परिकीर्तितः । तमोगुणादेव मोहो वैचित्त्यमनिष्टादिकर्मफलाज्ञानं तस्मादेवोपादेयमपि नित्यं कर्म त्यजति त्यक्त्वाऽकरणदोषजं फलं नरकं च प्राप्नोतीत्यर्थः । एतेनाज्ञस्यानिर्विण्णस्य च कर्मत्यागो न कर्तव्य इति सूचितं भवति ॥ ७ ॥

राजसत्यागस्य लक्षणं फलं चाह—

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८ ॥

दुःखमिति । यथोक्तनियमेन यन्नित्यं कर्तव्यं तत्कर्म श्रमसाध्यत्वाद्दुःखं दुःखात्मकमायाससाध्यमित्येवं निश्चित्याऽलसत्वदोषेण कर्मणः कर्तव्यत्वं विजानन्नपि यः कायक्लेशभयाद्देहेन्द्रियादिक्लेशो भवत्यस्यानुष्ठानेनेति भयात्त्यजेत्त्यजति स पुरुषो देहानुगतरागविशिष्टत्वाद्राजसं रजोदूषितबुद्धिदोषादागतं राजसं त्यागं कर्मसंन्यासं कृत्वापि त्यागफलं त्यागस्य कर्मसंन्यासस्य फलं चित्तशुद्धिं तज्जन्यज्ञानं तत्फलं मोक्षं च न लभेत् न लभते, किंतु स्ववञ्चनात्मकस्य राजसत्यागस्यानुरूपं विहिताकरणप्रत्यवायतः प्राप्तं फलं नरकमेव प्रतिपद्यत इत्यर्थः । एतेन 'न सुखाल्लभ्यते सुखम्' इति न्यायेन स्वधर्मानुष्ठानक्लेशसहिष्णोरेव पुरुषार्थः सिध्यतीति सूचितम् ॥ ८ ॥

फलमग्रे विवक्षन् सात्त्विकत्यागमाह—

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥ ९ ॥

कार्यमिति । विध्युल्लङ्घनभीत्या मुमुक्षया च कार्यं ममेदमवश्यं कर्तव्यमित्येव । कर्तव्यताबुद्धेर्विकल्पान्तरनिषेधार्थ एवकारः । मयेदं कर्मेश्वरप्रीत्यै करणीयमेवेति दृढनिश्चयवता मुमुक्षुणा नियतं विध्युक्तं यन्नित्यं तत्कर्म, सङ्गं कर्तृत्वाभिनिवेशं कामं वा फलं च । चः समुच्चयार्थः । यद्यपि स्वर्गकामः पशुकाम इतिवन्नित्यस्य कर्मणः फलं न श्रूयते तथापि फलाभावे 'अहरहः संध्यामुपासीत' इत्यादिकर्मविधेरुन्मत्तवाच इवानर्थक्यं स्यात्ततो यत्किंचित्फलं कल्पनीयमुपात्तदुरितक्षयलक्षणं तादृशफलं च फलकामनां च त्यक्त्वा परित्यज्येत्यर्थः । ननु फलानपेक्षायां सत्यां पुंसः प्रवृत्तिरेव न स्यादिति चेन्न । साधोर्विध्युल्लङ्घनभीत्यैव प्रवृत्तिसंभवात् । 'श्रुतिस्मृतिभ्यां सुजनो नियम्यते' इति स्मृतेर्वैधे दन्तधावने कृते मुखशुद्धिवद्विना फलकामनया कर्मणि कृते कर्तुः 'आपः शुन्धन्तु मैनसः', 'पापेभ्यो रक्षन्ताम्' इत्यादिमन्त्रक्रियाशक्तिबलेन सत्त्वशुद्धिलक्षणं फलमर्थात्स्वयमेव सिध्यति तत्फलं मोक्षश्चातस्तत्र कामसंकल्पादि न कर्तव्यं किंतु सङ्गं फलं च त्यक्त्वैव नित्यं यत्कर्म कुरुते स त्यागः सात्त्विकः सत्त्वगुणनिष्पन्नत्वात्सात्त्विक इति मतः सतामिष्टत्वेनाभिमतः । कर्मफलभ्रंशाभावात्प्रत्यवायकृतानर्थाभावाच्च पूर्वोक्तत्यागद्वयापेक्षया सात्त्विककर्मफलत्यागः श्रेष्ठ इत्यर्थः ॥ ९ ॥

एवं तामसादित्यागत्रयस्वरूपं प्रतिपाद्य बहुजन्मस्वीश्वरार्पणबुद्ध्या फलाभिसंधिरहिततया सात्त्विकत्यागनिष्ठया सम्यगनुष्ठितैर्यज्ञदानादिकर्मभिः सम्यक्संस्कृतत्वेन विशुद्धान्तःकरणस्य शमदमादिसत्त्वगुणसंपन्नस्य सात्त्विकत्यागेनान्तःकरणपरिपाकसिद्धेः फलमाह—

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १० ॥

न द्वेष्टीति । सात्त्विकत्यागनिष्ठया भक्त्याऽनेकजन्मभिः समाराधितपरमेश्वरप्रसादसंपन्नस्त्यागी सात्त्विकत्यागनिष्ठः पुरुषः सत्त्वसमाविष्टः सत्त्वं रजस्तमस्तत्कार्यविनिर्मुक्त आत्मानात्मस्वरूपनिर्धारणसमर्थोऽन्तःकरणपरिपाकविशेषस्तेन समाविष्टः सम्यग्विशिष्टः स एव मेधावी ब्रह्मविद्गुरोः सकृदुपदेशमात्रेण ब्रह्मैवाहमिति संप्राप्तात्मतत्त्वविज्ञानस्तत एव छिन्नसंशयः छिन्नः स्वस्य कूटस्थासङ्गचिदात्मत्वविज्ञानेन विच्छिन्नः

संशयः संचितागामिवर्तमानकर्मभिर्मम लेपोऽस्ति वा न वा, कर्तृत्वभोक्तृत्वादिलक्षणः संसार आत्मनो वाऽनात्मनो वा, मोक्षकारणं योगो वाप्युपास्तिर्वा, कर्म वा ज्ञानं वा तन्निष्ठा वा, मोक्षः सालोक्यादिर्वा निर्विशेषात्मनावस्थालक्षणो वाऽन्यो वा, इत्येवमादिर्यस्य स च्छिन्नसंशयः, तत एवाकुशलं न लभ्यते कुशलं निःश्रेयसं येन तदकुशलं शरीरारम्भकत्वेनेदं संसारलक्षणं बन्धकमिति काम्यं कर्म च नरकहेतुत्वेनेदं दुःखकारणमिति निषिद्धमपि किमनेनेति न द्वेष्टि द्वेषोऽप्रीतिस्तामत्र न करोति । तमःकृतमोहाभावादिदं दुष्टं बन्धकं न कर्तव्यमिति बुद्धिं न करोतीत्यर्थः । कुशले कुशलसाधने यज्ञदानादौ कर्मणि नित्ये मोक्षकारणमिति नानुषज्जते अनुषङ्गः प्रीतिस्तां न करोतीति मुक्तस्य मोक्षेच्छाऽसंभवे साधनापेक्षाभावात्तत्र कर्तव्यत्वबुद्धिं न करोति । किंतु 'दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते । गुणबुद्ध्या च विहितं न करोति यथार्भकः ॥' इति न्यायेन कुशलमकुशलं च कर्म सर्वं संन्यस्य ब्रह्मात्मना तिष्ठतीत्यर्थः । एतेन सर्वकर्मफलकामनात्यागपूर्वकमीश्वरार्पणबुद्ध्या सम्यगनुष्ठितैरेव यज्ञदानादिभिः सत्त्वशुद्धिः । शुद्धसत्त्वस्यैव सम्यग्ज्ञानं ब्रह्मात्मैकत्वविषयकमप्रतिबद्धसम्यग्ज्ञानवत एव संशयादिविच्छित्तिः सर्वकर्मसंन्यासः सन्निष्ठा च सिध्यतीति बोधितं भवति । ततो ज्ञानकर्मणोः साध्यसाधनभाव इति सिद्धम् । यत्सर्वस्यापि गीताशास्त्रस्य सर्वस्यापि च वेदस्य तात्पर्यं तच्चाप्याविष्कृतं भवतीति वेदितव्यमित्यर्थः ॥ १० ॥

इदानीं नित्यनैमित्तिककर्मानुष्ठानेष्वधिकृतो देहात्मबुद्धिः पुरुषस्तस्याशेषकर्मपरित्यागस्याशक्यत्वात्कर्मफलत्यागेन कर्मानुष्ठान एवाधिकारो नतु कर्मत्याग इति प्रतिपादयति—

नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥

नहीति । हि यस्मात्कारणाद्देहभृता देहमयमेवाहमिति स्वात्मना बिभर्तीति देहभृद्देहात्मबुद्धिरज्ञ एव कर्माधिकारी नत्वात्मज्ञस्तस्य कूटस्थमेवात्मानं सर्वदृश्यविलक्षणं पश्यतो विदुषो देहात्मत्वबुद्ध्यसंभवात्कर्माधिकारानुपपत्तेरहं कर्तेति कर्तृत्वाभिमानिन एवं देहाद्यहंबुद्धेः कर्मण्यधिकारस्ततो देहभृताऽनात्मज्ञेन अशेषतोऽशेषाणि नित्यनैमित्तिककाम्यप्रतिषिद्धान्यन्यान्यपि च कर्माणि त्यक्तुं संन्यसितुं न शक्यम् । तस्याकर्त्रात्मज्ञानाभावात् । यस्त्वकर्त्रात्मज्ञानवान् भवति तस्यैवाशेषकर्मसंन्यास

उपपद्यते नत्वन्यस्य। तस्माद्यस्त्वनात्मज्ञः कर्मण्यधिकृतः सन् कर्मफलत्यागी भवति स एव त्यागी सर्वकर्मसंन्यासी निष्काम इत्यभिधीयते। सर्वेषामपि कर्मणां तत्फलानां चेश्वरार्पितत्वे सत्यकर्मिसादृश्यसंभवादयं स्वयं नित्यकर्म्यप्यकर्मीति स्तूयते, मुमुक्षूणामत्रैव सात्त्विकत्यागे प्रवृत्तिसिद्धये। यद्वा सात्त्विकत्यागस्य रूपं सात्त्विकत्यागनिष्ठस्य तन्निष्ठासंजातसत्त्वशुद्धिं तत्संभावितज्ञानं तत्फलं नैष्कर्म्यसिद्धिं च प्रतिपाद्याथ सदसद्विवेकशून्यानां पूर्वोक्तानां राजसतामसत्यागवतामाभासत्यागित्वं वस्तुतः कर्मित्वमनिष्टादिफलवत्त्वं च बोधयितुं यज्ञोऽध्ययनं दानमित्यादिश्रुत्युक्तानां नित्यनैमित्तिककर्मणामीश्वरार्पणबुद्ध्या समनुष्ठितवतः सात्विकत्यागिन एव स्वधर्मानुष्ठानसमुत्पन्नचित्तशुद्ध्या संप्राप्तात्मयाथात्म्यविज्ञानस्य कुशलादिसर्वकर्मसंन्यासिनोऽकर्मित्वमनिष्टादिफलरहितत्वं च प्रतिपादयति—**नहीति** द्वाभ्याम्। कैश्चित्पण्डितैरेव बौद्धस्वभावैर्मोहात्मिकया तमोदूषितबुद्ध्या किमनेन कर्मणेत्यश्रद्धया सर्वस्यापि च कर्मणस्त्यागो राजसोऽश्रुतस्तामसः क्रियते तथा पण्डितैरेव कैश्चिदलसैर्देहसौख्येच्छुभिर्देहायाससाध्यं सर्वं कर्म दुःखमेवेति रजोदोषदूषितबुद्ध्या सर्वस्यापि कर्मणस्त्यागो राजसोऽश्रुत एव क्रियते तेषां राजसतामसत्यागिनां कर्मत्याग आभासिक एव नतु क्रियया सिध्यति। हि यस्मात्कारणाद्देहभृता देहं स्वभावत एव क्रियावत्प्राणेन्द्रियमनोबुद्ध्यादिकरणसंघातविशिष्टमयमेवाहमिति स्वस्वरूपत्वेन बिभर्तीति देहभृत् तेन देहात्मबुद्धिना पुरुषेण कर्माणि कालेकाले कर्तव्यत्वेनाप्रयत्नतः प्राप्तानि पुण्यान्यपुण्यान्यन्यानि चाशेषतोऽशेषेण त्यक्तुं संन्यसितुं न शक्यम्। कर्म त्यक्तमित्याभासमात्रमेव कर्मत्यागो नतु वस्तुतः सिध्यति कर्मकर्तृकारकव्यतिरिक्तात्मज्ञानाभावात्। स्वतएव चेष्टावद्देहात्मबुद्धित्वाच्च बुद्धिपूर्वकमबुद्धिपूर्वकं वाप्यपुण्यपुण्याचरणमस्त्येव। तस्मात्ते त्यागिनः सर्वकर्मसंन्यासिनो न भवन्तीत्यर्थः। तर्हि कः संन्यासीत्यत आह—

यस्त्विति। तुशब्दोऽस्य तामसादिवैलक्षण्यबोधनार्थः। यस्तु कर्मफलत्यागी यज्ञदानादिकर्माणि कृत्वा पूर्वोक्तरीत्या सर्वकर्मफलत्यागं करोति स एव त्यागी संन्यासीत्यभिधीयते। निष्कर्मत्वसिद्धिप्रकारज्ञैः पण्डितैः स एव सर्वकर्मसंन्यासीत्युच्यते। नत्वितरे तामसत्यागादयः। आपातदृष्ट्या ते कर्मसंन्यासिनोऽपि सम्यग्विचार्यमाणे तु कर्मिण एव भवन्ति। विहिताकरणप्रत्यवायत्वाद्भ्रमप्रमादादिषु पुण्यापुण्यकर्मवत्त्वाच्च न तेषामशेषकर्मसंन्यासः संभवति। यत एवं ततः सर्वकर्माणि कृत्वा

तानि तत्फलानि चेश्वरे त्यक्त्वा कामसंकल्पादिदोषशून्यत्वेन विशुद्धचित्ततया विज्ञातकूटस्थात्मस्वभावः सन् सर्वकर्माणि मनसेत्युक्तप्रकारेण कुशलानि अकुशलानि च सर्वाणि कर्माणि संन्यस्य निष्क्रियब्रह्मात्मना यस्तिष्ठति तस्यैव सर्वकर्मसंन्यासः सिध्यति कूटस्थासङ्गचिदात्मत्वविज्ञानवतः सर्वकर्मसंन्याससंभवाद्बहुजन्मसु सात्त्विककर्मानुष्ठानेन सत्त्वसमाविष्टस्य मेधाविनश्छिन्नसंशयस्य विदुषः कुशलाकुशलादिसर्वकर्मसंन्यासस्य प्रतिपादितत्वाच्च । अत उपक्रान्तस्यैव कर्मफलत्यागिनः स्वधर्मानुष्ठानसंभावितचित्तशुद्धिद्वारा संप्राप्तविज्ञानस्य सर्वकर्मसंन्यासित्वप्रतिपादनं युक्तमिति भाति । तथा प्रतिपादिते सत्यश्रद्धादुर्मेधाभ्यामीश्वरार्पणबुद्ध्या ये तु कर्म न कुर्वन्ति तेषां कल्पकोट्यापि चित्तशुद्धिर्ज्ञानं मोक्षश्च न सिध्यति । ये त्वकामनया श्रद्धाभक्तिभ्यामीश्वरप्रीत्यै वैदिकं कर्म कुर्वन्ति तेषां सत्त्वशुद्धिर्ज्ञानं नैष्कर्म्यं मोक्षश्च सिध्यति । अतो मोक्षैककामैर्विचक्षणैः सात्त्विकत्यागनिष्ठया स्वधर्मोऽनुष्ठातव्य इत्युपदेशः सेत्स्यति नान्यथेत्येव भाति ॥ ११ ॥

एवं तामसादित्यागवतामापाततोऽकर्मिणामपि कर्मित्वं सात्त्विकत्यागिनस्त्वकर्मित्वं च प्रतिपाद्य, कर्मिणां कर्मफलमकर्मिणां तदभावं च प्रतिपादयति—

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य नतु संन्यासिनां क्वचित् ॥ १२ ॥

अनिष्टमिति । अनिष्टं पापकर्मफलं नाकित्वं तिर्यक्त्वं वा, पुण्यकर्मफलमिष्टं देवत्वं मिश्रमुभयमिश्रफलं मनुष्यत्वं च 'पुण्येन पुण्यलोकं नयति' इत्यादिश्रुतिप्रसिद्धं त्रिविधं त्रिप्रकारकमपि कर्मफलमत्यागिनां कर्मतत्फलत्यागमकुर्वतां तामसादित्यागिनां प्रेत्य मरणादूर्ध्वं भवत्येव । वाचा त्यागेऽपि क्रियया कर्मणां त्यागाभावात्कृतानां कर्मणां फलावश्यंभावित्वाच्च त्रिविधं कर्मफलमत्यागिनां भवत्येव नतु संन्यासिनां, कर्मफलत्यागसंजातसत्त्वशुद्धिसंभावितात्मज्ञानेन संन्यस्ताकुशलादिसर्वकर्मणां यतीनां क्वचित्किंचिदपि संचितस्यागामिनो वान्यस्य वा पुण्यापुण्यलक्षणस्य कर्मणो ज्ञानाग्निनिर्दग्धस्वरूपस्य फलं न भवति । 'सति कुड्ये चित्रकर्म' इति न्यायेन स्वस्यैव सत्त्वाभावे फलदानासंभवादकर्मिणां विदुषां विदेहमुक्तिरेवेति सिद्धम् ॥ १२ ॥

ननु विदुषामपि संन्यासिनामकर्मित्वं न संभवति । 'शिष्यादीनां तत्त्वोपदेशेन हितोपदेशेन वा पुण्यक्रियासंभवात्तथाहारादिषु क्वचिद्दु-

ष्टान्नभक्षणेन वा संचारादिषु प्राणिपीडया वान्यथा वा पापक्रियासंभवाच्च तत्तत्क्रियाफलमिष्टानिष्टादिलक्षणं स्यादेवेति चेत्सत्यम् । महान्तो ब्रह्मविदो जीवन्मुक्ताः शिष्येभ्योऽन्येभ्यश्च वा साधुभ्यो ब्रह्मतत्त्वमुपदिशन्ति हितं च तेषां क्वचिदाहारादिषु दुष्टान्नसेवा च संभवति भ्रमप्रमादादिना क्वचित्प्राणिपीडा च । तथापि निरन्तरब्रह्मनिष्ठासंपन्नसम्यग्ज्ञानेन निष्कलं निष्क्रियं नित्यकूटस्थासङ्गचिद्रूपमेव परं ब्रह्माहमिदमेवेति स्वात्मना साक्षात्कृतवतां सदा तदात्मनैव तिष्ठतामधिष्ठानादिभ्यः क्रियाकर्तृकारकादिभ्यो भिन्नमेवात्मानमकर्तारमभोक्तारमाकाशवदक्रियं परिपूर्णमेव सर्वदा पश्यतां परमहंसपरिव्राजकानां स्वतोभिन्नैरेवाधिष्ठानादिभिः क्रियमाणपुण्यपापादिक्रियालेशसंबन्धासंभवात्तन्निमित्तकेष्टानिष्टफलं कल्पयितुं न शक्यते इति बोधयितुमादौ कर्मनिष्पत्तेः कारणान्याह—

पञ्चैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३ ॥

पञ्चैतानीति द्वाभ्याम् । सांख्ये सम्यक् ख्यायते निरुच्यते आत्मानात्मनोस्तत्त्वं प्रकाश्यतेऽनेनेति सांख्यं वेदान्तशास्त्रं तस्मिन्, सांख्ये, कृतान्ते 'निष्कलं निष्क्रियं' इति 'उपशान्तोऽयमात्मा' इति, 'शिवं शान्तम्' इति, 'स्वाभाविकी ज्ञानबलक्रिया च' इति, 'नवद्वारे पुरे देही नैव कुर्वन्न कारयन्' इति, 'नित्यः सर्वगतः स्थाणुः' इति, 'प्रकृत्यैव च कर्माणि' इति, 'प्रकृतेः क्रियमाणानि' इति, 'स्वभावस्तु प्रवर्तते' इत्येवं कृतः स्पष्टीकृत आत्मानात्मनोरन्तस्तत्त्वनिश्चयो यत्र तत्कृतान्तम् । यद्वा क्रियत इति कृतं विहितप्रतिषिद्धादिलक्षणं कर्म तस्यान्तः समाप्तिर्येन 'न तेषां धर्माधर्मौ', 'त्यज धर्ममधर्मं च' इत्यादिशास्त्रेण तत्कृतान्तम् । यद्वा कृतस्य कर्मणो वैदिकस्य नित्यनैमित्तिकादेः 'संन्यस्य श्रवणं कुर्यात्' इत्यन्तः समाप्तिर्यच्छ्रवणनिमित्तं तत्कृतान्तं तस्मिन् कृतान्ते सर्वकर्मसमाप्तिकारणे सांख्ये वेदान्ते सर्वकर्मणां सिद्धये यावन्ति कर्माणि चलनात्मकानि तेषां सर्वेषां कर्मणां निष्पत्तये क्रियामात्रस्य सिद्ध्यै इत्यर्थः । एतानि वक्ष्यमाणानि पञ्च कारणानि प्रोक्तानि क्रियासंभूतिप्रकारविद्भिः ऋषिभिः कथितानि वक्ष्यामि । मे मम वचनान्निबोध अधिष्ठानादिस्वरूपं क्रियानिष्पत्तिप्रकारमात्मनोऽकर्तृत्वं च पण्डितानामपि दुर्विज्ञेयं मयोच्यमानं

नितरां बुध्यस्व । क्रियानिष्पत्तिकारणसामग्रीमवबुध्य कर्मणस्तत्कृतत्व-निश्चयेनात्मनि कर्तृत्वभ्रमं परित्यजेत्यर्थः ॥ १३ ॥

तानि कानीत्याकाङ्क्षायामाह—

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥ १४ ॥

अधिष्ठानमिति । अधिष्ठानं सुखदुःखभोगायतनं करणानामाश्रयो वा शरीरम् । तथाशब्दश्चार्थः । कर्ता च कर्ता भोक्ताहमिति सर्वत्राहंमानी साभासाहंकारो विज्ञानात्मा पृथग्विधं बाह्याभ्यन्तरभेदेन द्विधा विभक्तं करणं ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि मनो बुद्धिश्चेति द्वादशविधं करणं च पृथक् दशधा भिन्ना चोर्ध्वादिगतिभेदेन विविधा नानाप्रकारा चेष्टा वायु-चेष्टाविशेषाः प्राणादयो नागादयश्च दश । अत्रैतेषु क्रियानिष्पत्तिकारण-त्वेन प्रोक्तेष्वधिष्ठानादिषु चतुर्षु । चकारस्त्वर्थः । एवकारोऽतिरिक्तव्यव-च्छेदार्थः । पञ्चमं तु दैवमेव श्रोत्रादीन्द्रियप्रवर्तकं दिग्वातार्कादिलक्षण-सर्वकर्मसिद्धिकारणं दैवमेव नान्यदस्तीत्यर्थः । यद्यपि पञ्चैतानीति पञ्च-त्वसंख्ययैव कारणान्तराभावः सिध्यति, तथापि पुनरेवकारः पुरुषस्य मयेदं क्रियत इति दुष्टेऽप्यदुष्टेऽपि च कर्मणि कर्तृत्वभ्रमापनोदनार्थः । नन्वदृष्टेश्वरादीनामपि क्रियासिद्धिकारणत्वसंभवात्पञ्चैतानीति पञ्चसंख्या-वधारणाभ्यामतिरेकव्यवच्छेदोऽनुपपन्न एवेति चेत्सत्यम् । 'बलाद्दैवेन नीयते' इति, 'एष एव साधु कर्म कारयति' इति श्रवणादस्त्येवादृष्टेश्वरा-देरपि कारणत्वं, तथापि 'यो दिक्षु तिष्ठन् दिग्भ्योऽन्तरः' इतीश्वरस्य दिगादीनामन्तर्यामित्वश्रवणात्तदन्तस्थतया तेष्वेव दिगाद्यधिदैवतेष्वन्तर्भावः कर्त्राश्रयत्वाददृष्टस्य कर्तर्यन्तर्भावस्ततो न काचिदनुपपत्तिरतोऽधिष्ठाना-दीनामेव पञ्चानां सर्वकर्मनिष्पत्तिकारणत्वमिति सिद्धम् ॥ १४ ॥

उक्तमेवार्थं विस्पष्टयति—

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ १५ ॥

शरीरेति । नरो बाह्यदृष्ट्या कर्मकर्ता पुरुषः शरीरवाङ्मनोभिः यत्कर्मणा करोतीति श्रवणादत्र शरीरपदेन वाग्व्यतिरिक्तानीन्द्रियाणि गृह्यन्ते । शरीरेणेन्द्रियैर्वाचा मनसा च बुद्धिपूर्वकं न्याय्यं शास्त्रीयं वा विपरीतं प्रतिषिद्धं वा यत्कर्म प्रारभते करोति तस्य करणत्रयनि-र्वर्त्यस्य कर्मणः विहितस्य निषिद्धस्य वान्यस्य वा सर्वस्याप्येते अधिष्ठा-नादयः पञ्च हेतवः कारणानि भवन्ति । ननु सर्वस्यापि कर्मणः

करणत्रयसाध्यत्वे सिद्धे सत्यधिष्ठानादीनां कारणत्वोक्तिर्व्यर्थैवेति चेत्सत्यम्। विहितं प्रतिषिद्धं च यत्क्रियते पुरुषेण तत्सर्वं करणत्रयेणैव सिध्यति तथापि, 'यद्धि मनसा ध्यायति तद्वाचा वदति तत्कर्मणा करोति' इति न्यायेन बुद्धिपूर्वकस्यैव कर्मणः करणत्रयसाध्यत्वं नत्वबुद्धिपूर्वकस्य क्षुतजृम्भणादेस्तत्राप्युच्छ्वासनिःश्वासोन्मेषादेः स्वाभाविकक्रियात्वेन करणत्रयसाध्यत्वासंभवात्कर्त्रैकसाध्यायाः फलानुभूतिक्रियायास्तत्साध्यत्वायोगाच्च करणत्रयस्य चेष्टामात्रकारणत्वं न संभवति। तत एवोच्यते 'शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः', 'तस्याप्येते पञ्च हेतवः' इति तेन शरीरादीनां पृथक्करणत्वाभावात्तत्कृतकर्मणोऽप्येतान्येव कारणानीति सूचितं भवति। ततः पुरुषादृष्टानुरूपेण सर्वकर्मनिष्पादकत्वं पुण्यापुण्यकर्मफलानुभावकत्वमनुभवितृत्वं चाधिष्ठानादीनामेवेति सिद्धम्॥ १५॥

प्रकृत्यैव च कर्माणीतिन्यायेन अधिष्ठानादिपञ्चकस्यैव प्राकृतस्य क्रियामात्रकारणत्वे सिद्धे फलितमाह—

तत्रैवंसति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥ १६॥

तत्रैवमिति। एवमधिष्ठानादीनामेव पञ्चानां सर्वकर्मनिर्वर्तकत्वनिष्कृष्टौ सत्यां यः अकृतात्माऽऽत्मानात्मतत्त्वविचारशून्यः पुरुषस्तत्र प्राकृतैरेवाधिष्ठानादिभिः कृते विहिते निषिद्धे वा कर्मण्यहमेतस्य कर्मणः कर्तेत्यकर्तारमेवात्मानं केवलं त्वेकमेकरसं निष्क्रियं निर्विशेषं कर्तारं पश्यति। मया स्नातं भुक्तमागतं गतमिति दुष्टमदुष्टं कर्म कृतमिति वाऽकृतश्रवणादिः सन् य आत्मानं तत्तत्कर्मणां कर्तारमेव पश्यति मन्यत इत्यर्थः। स एवं निष्क्रिय एवात्मन्यकर्तरि स्वे कूटस्थासङ्गचिद्रूपे कर्तृत्वभोक्तृत्वाद्यन्यधर्मारोपयिता पुरुषः स्वयमकृतबुद्धिर्नित्यनिरन्तरश्रवणमननादिसंस्कारैः सुसंस्कृता निष्क्रियो नित्यशुद्धबुद्धमुक्तस्वभावोऽयमात्माहंपदार्थ इत्येवमाकारेण सम्यग्विषयीकृतात्मतत्त्वा बुद्धिर्यस्य स कृतबुद्धिः प्रबुद्धात्मतत्त्वस्तद्विपरीतस्त्वकृतबुद्धिश्च। तथा कृतश्रवणोऽपि सम्यङ् नापरोक्षीकृतात्मस्वरूपस्तस्य भावोऽकृतबुद्धित्वं तस्मादेव दुर्मतिरविद्याकार्यत्वेन दुष्टे देहेन्द्रियादावेवाहमिति मतिर्यस्य स दुर्मतिः। यद्वा रजस्तमोवासनात्मिकयाऽविद्यया दूषिता मतिर्यस्य स दुर्मतिः। पशुवद्देहात्मबुद्धिरेव भवति यतो नात्मानमेवाधिष्ठानादिकं सक्रियमात्मानं पश्यत्यहं कर्ता भोक्ता गच्छाम्यागच्छामि कुर्वे भुञ्ज इति। यथाभ्रेषु धावत्स्वधावन्तं चन्द्रं धावन्तं पश्यति, यथा वा नावि गच्छन्त्यामगच्छन्तं तरुं

गच्छन्तं पश्यति मूढस्तरुमक्रियं बुद्ध्वापि सक्रियमेव पश्यति यथा, तथायमात्मानमकर्तारमेव श्रुत्वा मत्वा च पुनरपि कर्तारं भोक्तारमेव पश्यत्यतः स आत्मतत्त्वं निष्कलं निष्क्रियं शान्तमिति नित्यं शुद्धं बुद्धं मुक्तं सत्यं सूक्ष्मं परिपूर्णमद्वयं सदानन्दचिन्मात्रमिति 'नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः' इति श्रुतिस्मृत्याचार्यबोधितं न पश्यति । न विजानातीत्यर्थः । नन्वयं पुरुषः आत्मानमकर्तारमेव कर्तारं पश्यतीति यदुक्तं तदनुपपन्नमेव । सर्वप्रमाणविरोधादहं करोमीत्यहंभावस्य कर्तृधर्मस्य प्रत्यक्षत्वान्न त्वयं देहधर्मः । मृतदेहस्याहंभावाद्गमनादिक्रियाभावाच्च देहचेष्टा सर्वाप्यात्मकर्तृका सत्यात्मन्युपलभ्यमानत्वात्सति वायौ वृक्षचेष्टावदिति सर्वस्यापि कर्मण आत्मकर्तृकत्वमेवानुमीयते । 'स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम्' इति श्रूयते च । ततः कर्तृत्वमात्मधर्म एवेति चेत्सत्यम् । कर्तृत्वमात्मनः श्रूयते मृतदेहस्य च तन्न दृश्यते । तथापि श्रुतियुक्तिभिर्विचार्यमाणे निरवयवस्य व्योमवदविक्रियस्यात्मनश्चलनक्रियाऽसंभवात्कर्तृत्वं न सिध्यति । सुषुप्तावात्मानः कर्तृत्वाभावस्य सर्वप्रत्यक्षत्वात् । ननु सुषुप्तावात्मोपलम्भाभावात्तदसत्त्वे तत्कर्तृत्वाभावो युक्त एवेति चेन्न । सुखमहमस्वाप्सं न किंचिदवेदिषमिति सुषुप्तावात्मसद्भावस्य प्रत्यभिज्ञायमानत्वात्तदसत्त्वासिद्धेः । स्वप्नमहमद्राक्षमिति स्वस्य स्वप्नदर्शनवत्सुषुप्तिसुखस्यानुभूयमानत्वात्स्वप्न इव सुषुप्तावात्मास्त्येवाहंपदार्थस्तदसत्त्वे सुषुप्तितत्सुखज्ञानाभावप्रसङ्गात् । सुषुप्तितत्सुखज्ञातुः स्वस्य सद्भावोऽभ्युपगन्तव्यस्तत्र सत्यात्मसद्भावेऽप्यात्मनः कर्तृत्वं न दृश्यते । ननु सुषुप्तावप्यात्मनः सुखमस्वाप्समिति स्वापक्रियाकर्तृत्वमस्त्येवेति चेन्न । निरवयवस्य क्रियानुपपत्तौ तिष्ठत्यास्त इत्यत्र यथा तथा स्वपितीति व्यपदेशमात्रमेव नात्र पुरुषव्यापारः संभवति करणाभावान्निरवयवत्वाच्चात्मनः । किंच 'स्वमपीतो भवति' इति श्रवणात्तत्रात्मा स्वस्य निरुपाधिकस्वरूपप्राप्तिं प्रकाशयत्यस्वाप्समिति नतु बुद्ध्यादिवत्स्वपिति 'असुप्तः सुप्तानभिचाकशीति', 'एष सुप्तेषु जागर्ति' इति च श्रुतेः । यत एवमतः कर्तृत्वमन्यधर्म एव नत्वात्मधर्मः । 'निष्कलं निष्क्रियम्' इति, 'नायं हन्ति न हन्यते' इति, 'अनन्तश्चात्मा विश्वरूपो ह्यकर्ता' इति, 'वृक्ष इव स्तब्धः' इति, 'नित्यः सर्वगतः स्थाणुः' इत्यादिश्रुतिस्मृतिशतमात्मनः कर्तृत्वाभावमेव बोधयति । न किंचिदात्मा चेष्टते निरवयवत्वात्परिपूर्णत्वादित्यादियुक्तयश्चाक्रियत्वमेव साधयन्ति तर्हि कस्य धर्मः कर्तृत्वमिति चेदुच्यते । पुनरपि सतां मुमुक्षूणामात्मनि कर्तृ-

त्वभ्रमविच्छित्त्यै जाग्रत्स्वप्नयोर्देहे चान्यत्राहंममेत्यभिमानवतो विज्ञानात्मन एव साभासस्य कर्तृत्वं भोक्तृत्वं च जाग्रत्स्वप्नयोः खल्वहंममेत्यभिमानी विज्ञानात्मा सर्वाणि कर्माणि करोति, उभयत्रापि तस्यैव कर्तृत्वं विद्वत्प्रत्यक्षं सुषुप्तौ तदभावात्कर्तृत्वधर्मप्रतीत्यभावस्ततोऽन्वयव्यतिरेकाभ्यां विज्ञानात्मन एव कर्तृत्वं यस्मादिदमहं करोमीत्यभिमानेन सामान्यं विशेषं च कर्म करोति। तथाच श्रुतिः 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च' इति। 'मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' इति सर्वप्रमाणैर्विज्ञानात्मन एव कर्तृत्वावधारणान्न त्वात्मा कर्ता भोक्तेति सिद्धम्। 'शरीरमास्थाय करोति सर्वं' इत्यत्र मायापरिमोहितात्मेति लिङ्गान्माययाऽन्यदिव 'स एष आत्मा' इति, 'ध्यायतीव लेलायतीव' इति च श्रवणाद्गजारूढे राजनि राजायं गच्छतीति गमनक्रियाकर्तृत्वं यथारोपितं तथा माययाऽविद्ययाऽमूढैरात्मन्यारोपितं कर्म करोतीवेत्यनुवदति करोति सर्वमिति श्रुतिर्नतु सत्यमिति ब्रूते। तत्सत्यत्वे संसारित्वादात्मनो मोक्षाभावप्रसङ्गात्स्ववचनव्याघातप्रसङ्गाच्च। यतः स्वयमेव मोक्षं वक्ति 'विमुक्तश्च विमुच्यते' इति तस्मादात्मनो न कर्तृत्वमिति व्यवस्थितम्। ननु 'तत्रैवं सति कर्तारमात्मानं केवलं तु' इति तुशब्दयोगात्केवलशब्दस्वारस्याच्चात्मनः केवलस्य तु कर्तृत्वाभावेऽप्युपाधिविशिष्टस्य कर्तृत्वमस्त्येवेति चेद्भवानत्र प्रष्टव्यः। आत्मन उपाधिवैशिष्ट्यसिद्धेः संबन्धः संयोग उच्यते उत समवायो वा। आद्ये संयोगः सर्वत उच्यते किमेकदेशेन वा। न द्वितीयः। निरवयवस्य देशकल्पनायोगात् नाद्यः। परिच्छिन्नस्योपाधेः पूर्णेन सह सर्वतः संयोगायोगान्निरवयवसावयवयोः संयोगासंभवाच्च। सत्यपि सर्वतः संयोगसंबन्धे त्वात्मनोऽपि जडत्वं जगदान्ध्यं च स्यात्। न द्वितीयः। समवायसमवायिनोर्द्वयोः संबन्धसिद्धौ समवायान्तरापेक्षायामनवस्थाप्रसङ्गात्तयोरयुतसिद्धत्वाभावाच्च न समवायः सिध्यति। कर्मानुगान्यनुक्रमेण देहीत्यात्मनो देहित्वश्रवणादुभयोर्देहदेहिनोरवयवावयविभावसंभवादस्त्येवायुतसिद्धत्वमिति चेन्न। यत्रावयवी तत्रावयव इतिवद्यत्रात्मा तत्र देह इति व्याप्त्यभावादयुतसिद्धत्वासिद्धेः। तर्हि देहीति कथमिति चेदविद्यादशायामध्याससंबन्धेनात्मनो देहित्वसंभवाद्देहीत्युक्तिराध्यासिकी नतु वास्तवी। संयोगसमवाययोरन्यतरसंबन्धाङ्गीकारेऽपि 'विशेषणनाशाद्विशिष्टस्यापि नाशः' इति न्यायेनोपाधिनाशादात्मनोऽपि नाशप्रसङ्गादस्य नित्यत्वप्रतिपादकश्रुतिविरोधप्रसङ्गाच्च। संसारित्वमोक्षरहितत्वाद्यनर्थप्रसङ्गाच्च।

'न तदश्नाति किंचन','असङ्गो ह्ययं पुरुषः' इति श्रवणादसङ्गस्य निरवयवस्यात्मनो निर्विशेषस्योपाधिना तद्धर्मेण तत्कर्मभिर्वा संबन्धः कल्पयितुं केनापि न शक्यते । तस्मादात्मनः क्रिया वा क्रियाश्रयत्वं वा क्रियाविषयत्वं वा क्वचित्कदाचित्किंचिदपि न संभवति । तत एवोच्यते भगवताऽविद्यां तत्कार्यं च मोचयित्वा भक्तान् रक्षितुमिच्छता सर्वज्ञेनात्मानं केवलं त्विति । तुशब्द आत्मन उपाधिभिन्नत्वदृढीकरणार्थः । सावयवं सक्रियमुपाधिः कर्तारं भोक्तारं च पश्यतु । नतु केवलं निष्कलं निष्क्रियमात्मानं प्रमादेनापि कर्तारं पश्येत् निरवयवस्यासङ्गस्यात्मनः क्रियाश्रयत्वादेरसंभवात् । य एवंलक्षणमात्मतत्त्वं सद्गुरोर्मुहुः श्रुत्वा मत्वा चात्मानं पुण्यपापक्रियाकर्तारं भोक्तारं वा पश्यति स एव दुर्मतिरविवेकी नत्वजाविपाल इत्यर्थः ॥ १६ ॥

एवमनात्मकर्तृके कर्मण्यकर्तारमेवात्मानं मयेदं कृतमिति यः कर्तारं पश्यति स शतधा श्रुतश्रावितवेदान्तोऽप्यविदितात्मस्वरूपत्वेन दुर्गतिरिति प्रतिपाद्य, यस्तु श्रुत्याचार्येश्वरप्रसादसंपन्नः सततश्रवणमनननिदिध्यासनादिसमुत्पन्नज्ञानेनात्मयाथात्म्यदर्शी विद्वाननात्मकर्तृके दुष्टे शिष्टे वा कर्मण्यात्मानमकर्तारमेव पश्यति स एव सुमतिः पण्डितोत्तमः शरीरयात्रादिलक्षणं वान्यद्वा कर्म दुष्टमदुष्टं कृत्वापि स्वयमकर्तैव भवति न किंचिदप्युपाधिकृतेन कर्मणा लिप्यत इत्याह—

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ॥ १७ ॥

यस्येति । ब्रह्मविदाचार्यप्रसादपात्रीभूतस्य वैदिकैरेव कर्मभिः सात्त्विकैर्बहुजन्माराधितपरमेश्वरानुग्रहवतः शुद्धात्मनः श्रवणादिजन्यज्ञानेन क्षीरनीरवदात्मानात्मनोः स्वरूपं ज्ञातृज्ञेयलक्षणं सम्यग्विभज्य तत्रात्मन्येवात्मभावमापाद्य सदा तदात्मनैव तिष्ठतो यस्य महात्मनो ब्रह्मवित्तमस्याधिष्ठानादिभिरेव स्ववेद्यैरविद्याकार्यैर्विहिते प्रतिषिद्धे वान्यस्मिन् वा कर्मणि क्रियमाणे सति, भावः भाव्यते अहमिति गृह्यतेऽनेनेति भावोऽन्तःकारणं ब्रह्मैवाहमिति स्वस्वरूपे ब्रह्मण्येवाहंभावमुपेत्य तदा तदात्मनैव वर्तमानोऽहमात्मको बुद्धिविशेषो नाहंकृतः कर्मकर्तर्युपाधावहंकरणमहंकृतं ब्रह्माकारतामुत्सृज्य कर्त्राकारेणाहमित्यवस्थानं न विद्यते यस्य भावस्य स नाहंकृतः अधिष्ठानादिलक्षण उपाधिरेव स्ववासनानुरूपेणेदं कर्म करोतीत्यहं तूपाधितत्कर्मणोरुभयोः साक्षी तटस्थो निष्क्रिय एवास्मीति ब्रह्मात्मनैव स्थितः सन् चिरकालं नित्यनिरन्तरसमाध्यभ्यासबलेनाहा-

रादिकर्मकालेऽपि कर्तर्यहंभावरहित इत्यर्थः । तथा यस्योक्तलक्षणस्य ब्रह्मविदो बुद्धिर्वृत्तिरूपा न लिप्यते मयेदं सुष्ठु दुष्टं च कर्म कृतमित्येवंभावनावती न भवति । धर्मशीलस्य बुद्धिर्मयायं धर्मः कृतोऽयमधर्मः कृत इति तेन कर्मणा यथा लिप्यते धर्माधर्मसंस्कारवती भवति तथा मयेदं दुष्टमदुष्टं कृतमिति सामान्येन वा विशेषेण वा तत्संस्कारवती न भवति प्रतिच्छायावत्स्वभिन्नेनैवोपाधिना कृते कर्मण्ययं करोमि मयेदं कृतमिति प्रत्ययो ब्रह्मविद्बुद्धेर्नोदेति कर्तृतत्कर्मतादात्म्यसंबन्धाभावात् । येनाहमिदं करोमीति यत्कर्म क्रियते तद्बुद्धेरेव मयेदं कृतमिति कृतत्वभावनालेपश्च सिध्यति नान्यस्य बुद्धेः । यथा स्नानमहं करोमीति स्नानं कृतवतो देवदत्तस्य बुद्धेरेव मया स्नानं कृतमिति कृतत्वभावना तेन कर्मणा लेपश्च नतु तटस्थयज्ञदत्तस्य बुद्धेरस्ति तद्वत् । नन्वननुरूपदृष्टान्तोपन्यासेनेदं विपरीतमुच्यते, ब्रह्मविदः स्वदेहे तत्कृते च कर्मण्यहमिति मयेदं कृतमिति च प्रत्ययो न जायते इति विदुषोऽपि स्वदेहे स्नाते सत्यहमिति मया स्नातमिति च प्रत्ययो जायत एव विद्वच्छरीरयोः परस्परविभागाभावादिति चेन्न । तयोर्ज्ञातृज्ञेयत्वलक्षणेन परस्परभिन्नस्वभावत्वादेकत्वानुपपत्तेः । सत्येकत्वे तथाविधः प्रत्ययः प्रसज्येत । नहि देह एव विद्वान्नापि विद्वानेव हि देहो भवति । तयोर्ज्ञातृज्ञेयत्वधर्मेण घटतज्ज्ञातृवद्भिन्नस्वभावत्वाद्विभक्तत्वमेव युक्तं नत्वेकत्वम् । प्रत्यक्षादिप्रमाणविरोधात्ततोऽधिष्ठानादिलक्षणोपाधौ वासनया तत्कर्मणि प्रवृत्ते सति तत्राहं करोमीत्यहंप्रत्ययो नोदेति कर्तृतादात्म्याभावात्तत एव मयेदं कृतमिति तद्बुद्धेः कृतत्वभावना च तत्क्रियालेपश्च न संभवति, तत एवोच्यते 'यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते' इति । यदुक्तमनुरूपदृष्टान्तोपन्यासेनेति । तन्न । विद्वच्छरीरयोर्ज्ञातृज्ञेयत्वधर्मेण विलक्षणतया परस्परभिन्नत्वे सति शरीरे तत्कृते च कर्मणि तद्भिन्नस्य विदुषस्त्वहमिति मयेदं कृतमिति प्रत्ययानुत्पत्तौ युक्त एव दृष्टान्तः । एवं ब्रह्मविदः स्वस्योपाधितद्धर्मतत्कर्मसंबन्धलेशाभावज्ञानमेवाप्रतिबद्धं नैष्कर्म्यसिद्धेः परमकारणमिति सूचयित्वा तादृशज्ञानसिद्धेः फलमाह— हत्वापीति । य एवमधिष्ठानादिभिरेव पञ्चभिरनात्मकैर्दृश्यभूतैः क्रियमाणे कर्मणि चेष्टामात्रे वाहंकारममकारशून्यो भवति स विद्वानिमान् त्रीन् लोकान् लोकस्थान् देवर्षिब्राह्मणादीन् सर्वप्राणिनो हत्वापि स्वहस्तेन सर्वसंहारं कृत्वापि न हन्ति न किंचिदपि हिनस्ति । स्वयं तद्धननक्रियायाः कर्ता न भवतीत्यर्थः । नन्विदमतिविरुद्धमुच्यते ब्रह्मवि-

त्स्वयं लोकत्रयं हत्वापि न हन्तीति येन यत्कर्म क्रियते स तस्य कर्मणः कर्ता भवन्नेव दृश्यते कुलालादिः । कथं ब्रह्मवित्स्वयं सर्वप्रपञ्चसंहारं कृत्वाप्यकर्तैव भवतीति किमन्यं प्रयोजयति वा स्वयमेव न करोति वा । नाद्यः । अन्यप्रयोगेऽपि राज्ञ इवैतस्यापि हननक्रियासंभवात् । न द्वितीयः । हत्वापीत्युक्तिविरोधप्रसङ्गात् । ततोऽस्त्येव हननक्रियाकर्तृत्वं विदुष इति चेत्सत्यम् । यो यत्कर्म करोति कारयति वा स तस्य कर्मणः साक्षात्क्रमेण वा कर्तैव भवति । न तथायं विद्वान् स्वान्यत्करणजातं प्रयोजयति नापि स्वयं करोति किंतु मेघस्थश्चन्द्रो मेघकर्मणीव देहस्थो विद्वान् देहेन्द्रियादिभिः कृते कर्मणि कर्तेव दृश्यते । सम्यग्बुद्ध्या विचार्यमाणे मेघानामेव धावनक्रियाकर्तृत्वं न तु चन्द्रस्य यथा, तथा देहेन्द्रियाद्यभिमानिन एव विज्ञानात्मनो हननक्रियाकर्तृत्वं नतु विदुषः । नहि कूटस्थासङ्गचिद्रूपेणैव तिष्ठतो विदुषस्त्वधिष्ठानादिभिः संयोगः समवायो वा संभावयितुं शक्यते । तदसंभवे तत्कर्तृके कर्मणि कर्तृत्वं च न संभवति । तत एवोच्यते परमेश्वरेण 'हत्वापि स इमाँल्लोकान्न हन्ती'ति मूढदृष्ट्या चन्द्रवद्बहिःक्रियावानिव प्रतीयमानोऽपि वस्तुतो ब्रह्मविद्ब्रह्मभावापन्नत्वात् क्रियामात्रस्य तु कर्ता न भवति तत एवाकर्तुर्ब्रह्मविदस्तत्कर्मफलसंबन्धं निषेधति—**न निबध्यत इति** । यस्मान्निष्क्रियब्रह्मभावापत्त्या ब्रह्मवित्तम उपाधिसंबन्धरहितत्वेन स्वयमुपाधिकृतस्य कर्मणः पुण्यस्य पापस्यान्यस्य वा कर्ता न भवति, तस्मादेव न निबध्यते तत्कार्येण फलेन दुष्टेन वाप्यदुष्टेन न संयुज्यते । कर्मणामन्यकर्तृकत्वात् । नैवान्यकर्तृककर्मान्यस्य लेपाय फलाय च भवति । नहि देवदत्तकृतेन कर्मणा यज्ञदत्तो लिप्यते बध्यते वा तद्वन्मयेदं कृतमित्यात्मन्यविद्ययाध्यस्तं पूर्वमिदानीं वा न तदात्मनोऽविक्रियस्याकाशकल्पस्य लेपाय फलाय च भवति । नहि नीलं नभ इत्यज्ञैरारोपितेन नीलिम्ना नभो लिप्यते न नीलं च भवति । नापि चेदं जलमित्यध्यस्तजलेन मरुर्जलवान् भवत्यार्द्रश्च तद्वदारोपितेन कर्मणा दुष्टेनाप्यदुष्टेन वात्मा निरवयवः कूटस्थः क्रियावान्न भवति नापि च तत्फलवान् । यस्मादेवं तस्मादात्मन्येवात्मतामापन्न आत्मवियतिः स्वस्याविक्रियात्मत्वदृष्ट्या मया कूटस्थेन पूर्वं चाधुना च नैव किंचित्कृतमिति मुहुर्मुहुः स्वयाथात्म्यविषयीकरणसमुत्पन्नविज्ञानबलात्संचितादिभ्यः सर्वेभ्यः कर्मभ्यो विनिष्क्रम्य तत्फलेन जन्मादिना दुःखादिना च न किंचित् स्पृश्यत इत्यर्थः । एतेन लोकत्रयस्थिताशेषप्राणिसंघातघाते कृते सत्यपि ब्रह्मविदस्तद्धननक्रिया च तत्कृतप्रत्यवायलेशश्च न

संभवतीत्येवंलक्षणो ब्रह्मज्ञानस्य महिमा महाद्भुततरः संसारबन्धविच्छेद-हेतुरिति ज्ञानस्य माहात्म्यं स्वाभाविकमेव स्तूयते 'हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यत' इति। ननु नित्यनिरन्तरसमाधिनिष्ठानिर्दग्धसर्ववासना-ग्रन्थेर्महात्मनः स्वात्मारामस्य स्वानन्दामृतरसपायिनो नित्यतृप्तस्य सर्वात्मदर्शिनो विदुषः प्रवृत्तिरस्तीति सूच्यते । प्रवृत्तिहेतोरविद्याकामादेः समाधिना निर्मूलितत्वात् किंतु परावरैकत्वविज्ञाननिर्दग्धद्वैतदर्शनस्य ब्रह्मविद्यतेः क्वचिदाहारविहारादिलक्षणेन शरीरयात्रामात्रैकप्रयोजनेन कर्मणा दुष्टेन वाप्यदुष्टेन श्लेषो नास्तीत्युच्यते। तथैव श्रूयते 'तं विदित्वा न लिप्यते कर्मणा पापकेने'ति, 'यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते' इति च ॥ १७ ॥

एवं विहितप्रतिषिद्धादीनां कर्मणां सर्वेषामधिष्ठानादिपञ्चकैकनिर्वर्त्यत्वं तत्कृते कर्मणि कर्तृत्वाभिमानिनो दुर्मतेः कर्मभिर्बद्धत्वं, कृतबुद्धेर्विदुष-स्त्वकर्तुस्तद्रहितत्वं च प्रतिपाद्य, अथ निरुक्तलक्षणं निष्कर्मत्वज्ञानत्वज्ञान-मेवाप्रतिबद्धं कैवल्यसिद्धेः परमकारणमित्यारुरुक्षोर्मोक्षैककामस्य तादृश-ज्ञानसिद्धेः कारणं सत्वशुद्धिस्तत्सिद्धेः कारणं तु कर्मैव सात्त्विकं तदेव कर्तव्यमिति बोधयितुं कर्मप्रवृत्तिहेतुं कर्माश्रयं च ज्ञानकर्मकर्तृबुद्ध्यादीनां सात्त्विकत्वराजसत्वादिभेदं च प्रतिपादयितुमुत्तरग्रन्थ आरभ्यते। यद्यपि सप्तदशे आहारादीनां सात्त्विकादिभेदः प्रतिपादितस्तथापि तत्र श्रद्धादी-नामेव पञ्चानां सात्त्विकादिभेदः प्रतिपादितो ननु ज्ञानादीनां । तेषां सात्त्विकादिभेदे विज्ञाते हेयांशं राजसं तामसं च त्यक्त्वा सात्त्विके ज्ञानादौ प्रवृत्तस्य सत्त्वं शुध्यति । तेन ज्ञानं तत्फलं च सिध्यति। तदर्थमत्र चोदनायाः कर्माश्रयस्य च स्वरूपज्ञानादीनां गुणभेदेन भेदं ज्ञानकर्मणोः साध्यसाधनभावमेव सर्ववेदार्थं गीतार्थं दृढीकर्तुं च द्वाविं-शत्या प्रतिपादयति—

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः॥ १८॥

ज्ञानमिति । ज्ञानमिष्टानिष्टादिरूपं द्रव्यगुणकर्मादिपदार्थजातम्। ज्ञायतेऽनेनेति ज्ञानं साधारणः सर्वपदार्थविषयको बोधः। ज्ञातव्यं द्रव्य-गुणादिपदार्थजातं सर्वं ज्ञेयमित्युच्यते। परिज्ञाता ज्ञेयस्य ज्ञानस्य च ज्ञाता प्रमाता साभासो विज्ञानात्मा । इत्येवंप्रकारेण चोदना चोद्यते प्रवर्ततेऽ-नेनेति चोदना सामान्येन सर्वपदार्थानां हानोपादानादिक्रियाहेतुस्त्रिविधा

त्रिप्रकारा प्रमाणप्रमेयप्रमातृलक्षणस्य यस्य संनिधिमात्रेण हानादिक्रिया जायते सा चोदना त्रिविधेत्यर्थः । एवं प्रवृत्तेः कारणस्य त्रैविध्यमुक्त्वा कर्माश्रयस्यापि त्रैविध्यमाह—**करणमिति** । क्रियतेऽनेनेति करणं बाह्यमाभ्यन्तरं च श्रोत्रादिवागादिबुद्ध्यादिद्वादशविधं कर्मेप्सिततमं कर्तुराप्तिक्रियाविषयभूतं यद्वस्तु द्वितीयान्तं तत्कर्मेत्यर्थः । कर्ता करणानां प्रयोक्ता नतु स्वयं तत्प्रयोज्यः स्वतन्त्रः कर्ता विज्ञानात्मा । एवं कर्मसंग्रहः कर्म सम्यग्गृह्यतेऽस्मिन्निति कर्मसंग्रहः क्रियाश्रयः करणादिस्त्रिविधस्त्रिप्रकार इत्यर्थः । ननु संप्रदानादेः क्रियाश्रयत्वसंभवे कथं क्रियाश्रयस्य त्रैविध्यमिति चेन्न । संप्रदानादेः परम्परया विना साक्षात्क्रियाश्रयत्वासंभवाद्यथा कर्मणः साक्षात्क्रियाश्रयत्वं न तथा संप्रदानादेः संभवति ततो युक्तं क्रियाश्रयस्य त्रैविध्यमित्यर्थः ॥ १८ ॥

यद्विवक्षितं सत्त्वादिगुणभेदेन ज्ञानादीनां त्रैविध्यं तदेव विशदयति—

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥

ज्ञानमिति । गुणसंख्याने गुणाः सत्त्वादयस्तत्कार्याणि च सम्यक्ख्यायन्ते प्रतिपाद्यन्ते यत्र तद्गुणसंख्यानं सांख्यशास्त्रं तस्मिन्गुणसंख्याने कापिले शास्त्रे । ज्ञानमुक्तलक्षणं पदार्थबोधः कर्म च श्रौतस्मार्तादिलक्षणं कर्ता कर्मनिर्वर्तकश्चेत्येतत्त्रयं गुणभेदतः सत्त्वादिगुणभेदेन त्रिधैव त्रिविधमेव भवति । ज्ञानादीनां सत्त्वादिगुणकृतत्रैविध्यव्यतिरेकेण विधान्तराभावनिर्धारणार्थ एवकारः । चकारौ समुच्चयार्थौ । घटः पट इत्यादिज्ञानस्य तामसज्ञान एवान्तर्भावात् । ज्ञायतेऽनेनेति ज्ञानं साधारणं सत्त्वादिगुणभेदात्सात्त्विकं राजसं तामसमिति त्रिधैव भवति । तथैव कर्मापि कर्तापि च त्रिधैव भवतीति कपिलादिभिः प्रोच्यत इत्यर्थः । यथावद्यथाशास्त्रं सांख्यशास्त्रे यथा प्रोक्तं तथा गुणभेदेन भिन्नानि ज्ञानादीन्यपि मया च वक्ष्यमाणानि शृणु । श्रुत्वा सारग्रहणेऽतितत्परो भवेत्यर्थः ॥ १९ ॥

तत्र ज्ञानस्य त्रैविध्यं प्रतिपादयन्नादौ बहुजन्मभिः सत्त्ववृत्त्या सर्वकर्मपरित्यागपूर्वकमीश्वरार्पणबुद्ध्या समनुष्ठितसात्त्विककर्मसमुत्पादितं यच्छुद्धसत्त्वं सकृच्छ्रवणमात्रेण तत्त्वावधारणशक्तं तस्मादुत्पन्नस्यात्मैकत्वदर्शनलक्षणस्य सात्त्विकज्ञानस्य लक्षणमाह—

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ २० ॥

सर्वभूतेष्विति । विभक्तेषु नामरूपजातिगुणक्रियाविशेषैराविद्यकैः परस्परभिन्नेषु सर्वभूतेषु सर्वेष्वव्यक्तादिस्थूलान्तेषु भूतेषु शरीरेषु स्थावरेषु जङ्गमेषु च सर्वत्र घटमठादिष्वाकाशवदविभक्तं निरवयवत्वान्निर्विशेषत्वाच्च विभागवर्जितमखण्डात्मना सर्वतः परिपूर्णमत एकमेकरूपं तदीयधर्मकर्मादिभिरस्पृष्टमत्यन्तविशुद्धं चिदेकरसमव्ययं भूतेषु नश्यत्सु सत्सु स्वयमविनश्यन्तम्, भूतानामाविर्भावतिरोभावागमनिर्गमादिषु स्वयमाविर्भावतिरोभावागमनिर्गमादिधर्मनिर्मुक्तमविक्रियात्मनैकरूपेण सर्वदा तिष्ठन्तं नित्यं शाश्वतमित्यर्थः । एवंलक्षणं भावं नामरूपादिकं सर्वं भाव्यते यत्र येन वा स भावः प्रत्यगात्मा तं सच्चिदानन्दैकरसमात्मानं स्वं येन शुद्धसत्त्वसंभावितेन 'दिव्यो ह्यमूर्तः पुरुषः' इति, 'अशरीरं शरीरेषु' इत्यादिश्रुतिवाक्यार्थश्रवणमात्रात्समुत्पन्नेन ज्ञानेनाखण्डाकारवृत्त्या कृतबुद्धिर्विद्वानीक्षते पश्यति सर्वमिदमहं च ब्रह्मैवेति स्वं च सर्वं च ब्रह्मैवेति पश्यति, तज्ज्ञानमद्वैतात्मविषयकं द्वैतभ्रमविध्वंसकं सात्त्विकं बहुजन्मार्जितपुण्यपुञ्जपरिपाकसमुदितशुद्धसत्त्वसमुत्पन्नत्वात्सात्त्विकं विद्धि । तदेव विदेहमुक्तिकारणमिति विजानीहीत्यर्थः ॥ २० ॥

येनात्मनामनेकत्वं पश्यति तद्राजसमित्याह—

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥

पृथक्त्वेनेति । तुशब्दः पूर्वस्मादस्य वैलक्षण्यबोधनार्थः । नानाविधमलिनवासनया विशिष्टः पुरुषः सर्वेषु भूतेषु देवर्षिमनुष्यादिशरीरेषु पृथक्त्वेन प्रतिशरीरं भिन्नत्वेन स्वभावत एव नानाभावाननेकान् क्षेत्रज्ञान् पृथग्विधान् सुखदुःखादिभेदेन परस्परविलक्षणान् । अत्र ज्ञानस्य करणत्वमेव नतु कर्तृत्वं संभवति । ततः यद्येन ज्ञानेन वेत्ति पश्यति घटमठादिषु स्थितानामाकाशानामनेकत्वं तदीयवक्रत्वादिधर्मैर्वक्रत्वादिमत्त्वं यथा पश्यति तथा देवमनुष्यादिशरीरेषु स्वत एव जीवात्मनामनेकत्वं जन्ममरणादिविकारविशिष्टत्वं सुखादिभाक्त्वं च येन विजानाति तज्ज्ञानमयथाग्राहकत्वाद्राजसम् । यज्ञदानादिकर्मसंभावितरजोदोषविशिष्टान्तःकरणवृत्तित्वाच्च राजसं बन्धस्यैव कारणं नतु मुक्तेरित्यर्थः ॥ २१ ॥

तामसज्ञानस्य लक्षणमाह—

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२ ॥

यदिति । तुशब्दोऽस्य ज्ञानस्योभयविलक्षणत्वद्योतनार्थः । एकस्मिन् कार्ये भूतकार्ये देहे प्रतिमादौ वा कृत्स्नवत्परिपूर्णवत्सक्तमात्मा परमेश्वरश्च स्वयं स्वरूपेणैतावान् देहपरिमाणक एवात्मा प्रतिमापरिमाण एवेश्वरो नैतद्व्यतिरिक्तोऽस्तीति निश्चययुक्तम् । यद्वा कृत्स्नवत् एष घट एष पट इति कृत्स्नपदार्थनिश्चयो यथा । तथा कार्ये देहे प्रतिमादौ वा सक्तं एष देह एवात्माहमिति एष पाषाणादिरेवेश्वर इति निश्चययुक्तमहेतुकं देहस्यैवात्मत्वनिश्चये प्रतिमादेरेवेश्वरत्वनिर्धारणे च हेतुस्तदभावादहेतुकम् । ननु देह एवात्मा अहमर्थत्वादित्यादियुक्तिरस्त्येवेति चेन्न । स्वप्नमहमद्राक्षमित्यादौ व्यभिचारदर्शनाद्देहदाहे त्वात्मदाहप्रसङ्गाच्च । न देहस्यात्मत्वसाधको हेतुरस्ति नापि प्रतिमादेरीश्वरत्वसाधको हेतुरस्ति । ननु प्रतिमाद्याकार ईश्वरः कामान् प्रयच्छति तत एष प्रतिमादिरेवेश्वरः कामप्रदत्वादित्यादियुक्तिरस्त्येवेति चेन्न । अश्वत्थस्याप्यारोग्यप्रदत्वदर्शनात्तत्रातिव्याप्तिः स्यात् । किंतु तत्र भक्त्याराधितः परमेश्वरः सर्वगतस्तत्र स्थितः सन्कामान् प्रयच्छति नतु प्रतिमादिस्तस्य नाशे ईश्वरस्यापि नाशप्रसङ्गात् । ततो देहप्रतिमादेरात्मेश्वरत्वसाधकयुक्तिर्नास्ति । अत एवातत्त्वार्थवदबाधितार्थस्तत्त्वार्थः स यस्य ज्ञानस्य नास्ति तदतत्त्वार्थवदयथार्थविषयकमत एवाल्पं अल्पविषयत्वेनाल्पफलत्वेन चाल्पं निकृष्टमित्यर्थः । यदेवंलक्षणं ज्ञानं तत्तामसं बहुजन्मभिस्तामसयज्ञदानादिकर्मानुष्ठानसंप्राप्ततमोगुणकार्यत्वात्तामसमिति कपिलादिभिरुदाहृतमुच्यत इत्यर्थः । जन्मानेकशतैः समनुष्ठितसात्त्विकयज्ञदानादिसत्कर्मपरिपाकसमुत्पन्नं सात्त्विकं ज्ञानं मोक्षायैव भवति राजसं तु स्वर्गाद्यभ्युदयाय निरुक्तलक्षणम् । तामसं ज्ञानं तु केवलं मूढव्यवहारगोचरं जननमरणदुःखप्रवाहायैव भवति, नतु स्वर्गाय नाप्यपवर्गायेति सूचितं भवति ॥ २२ ॥

सत्त्वादिगुणभेदात्कर्मणस्त्रैविध्यं प्रतिपादयन्नादौ मुमुक्षूणामनुष्ठेयं सात्त्विकं कर्माह—

नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ २३ ॥

नियतमिति । नियतं श्रुतिस्मृतिभ्यामवश्यकर्तव्यत्वेन विहितं यज्ञतपोदानलक्षणं सङ्गरहितं सङ्गः कर्तृत्वाभिनिवेशोऽहंकारस्तच्छून्य-

मनहंकारमरागद्वेषतः सुखसाध्यत्वे तत्फलसाधनत्वे वा कर्मणि रागः, दुःखसाध्यत्वे दुःखफलसाधनत्वे वा कर्मणि द्वेषश्च जायते । रागश्च द्वेषश्च रागद्वेषौ न रागद्वेषौ यस्येष्टानिष्टयोः कर्मणोः समबुद्धेरसावरागद्वेषः । तृतीयार्थे तसिः । तेनारागद्वेषेण सात्त्विकेनाफलप्रेप्सुना निष्कामेन कर्त्रा कृतं यत्तत्कर्म सात्त्विकं सत्त्वशुद्धिकारणमिति महर्षिभिः प्रोच्यते ॥ २३ ॥

राजसं कर्माह—

यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ २४ ॥

यत्त्विति । तुशब्दो वैलक्षण्यार्थः । वा चार्थः । पुनरप्यर्थः । कामेप्सुना काम्यत इति कामः कर्मफलं तमाप्तुमिच्छता कामेप्सुना साहंकारेणापि च अहमिदं कर्म करोमि फलायेत्यभिनिवेशोऽहंकारस्तद्रहितः सात्त्विकः पूर्वोक्तस्त्वयं राजसस्तेनापि च युक्तत्वात्साहंकारोऽहमिदं करोमीत्यभिमानाडम्बरयुक्तस्तेन साहंकारेणापि च कर्त्रा बहुलायासं बाहुभ्यां नदीतरणे यथा तथा बहुलो महानायासः श्रमो यस्मिन्कर्मण्याचमनादौ भवति तद्बहुलायासं यत्तु कर्म क्रियते तत्कर्म राजसं, फलकामनया चाहंकारेणापि रजःकार्येण युक्तेनाधिकारिणा क्रियमाणत्वाद्राजसं तत्कर्मेति त्रिभिरुदाहृतमित्यर्थः ॥ २४ ॥

तामसं कर्माह—

अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ २५ ॥

अनुबन्धमिति । अनुबन्धः उत्तरभाव्यनर्थस्तत्कर्मणः फलभूतस्तमनुबन्धं पश्चाद्भाव्यनर्थम् । क्षयं यस्मिन्कर्मणि क्रियमाणे धनक्षयो वा बलक्षयो वा पुण्यक्षयो वा आयुःक्षयो वान्यस्य वा क्षयस्तं क्षयम् । हिंसां प्राणिपीडां कर्मनिर्वाहे स्वसामर्थ्यं च पौरुषमेव च तत्सर्वमप्यनवेक्ष्य बुद्धिबलेनाविचार्य, बालवन्मोहादविवेकाद्यत्कर्मारभ्यते तत्कर्म संमोहो विवेकाभावस्तमोगुणस्तेन कार्यत इति तामसमित्युच्यत इत्यर्थः ॥ २५ ॥

गुणभेदेन कर्तृभेदं वदन्सात्त्विककर्तारमाह—

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥ २६ ॥

मुक्तसङ्ग इति । मुक्तसङ्गः मुक्तो मनसा संत्यक्तः सङ्गः फलाभि-

संधिलक्षणः कामो येन स मुक्तसङ्गः निष्काम इत्यर्थः । अनहंवादी संकल्पेऽप्यहमिदं करोमीति वदनशीलो न भवतीत्यनहंवादी । अनहंमानित्वेऽपीदमुपलक्षणम् । धृत्युत्साहसमन्वितः धृतिः अर्थव्ययदेहायासादौ, धैर्यमुत्साहश्चिकीर्षावेगस्ताभ्यां सम्यगन्वितः । सिद्ध्यसिद्ध्योरारब्धस्य कर्मणः सिद्धावसिद्धौ च निर्विकारः सम्यगीश्वरार्पितनियन्तृत्वादीश्वरेच्छेति हर्षविषादशून्य इत्यर्थः । एवं सत्त्वगुणसंपन्नो यः कर्ता कर्मणां स सात्त्विक इति ऋषिभिरुच्यत इत्यर्थः । एवंगुणविशिष्टत्वं सात्त्विकस्य लक्षणमिति सूचितं भवति ॥ २६ ॥

राजसकर्तारमाह—

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७ ॥

रागीति । रागी कर्मफलापेक्षत्वात्तत्साधनेषु कर्मसु रागोऽस्यास्तीति रागी, यद्वा रागो विषयभोगेच्छा सोऽस्यास्तीति रागी । तत एव कर्मफलप्रेप्सुः कर्मणां फलं पुत्रकलत्रधनादिसंपत्तिं स्वर्गं च प्राप्तुमिच्छुः । स्वेन्द्रियतर्पणशीलत्वाल्लुब्धः परस्वाभिलाषी देवपितृयज्ञादौ धनत्यागासहिष्णुर्वा लुब्धः। हिंसात्मकः परपीडनशीलः। अशुचिः शास्त्रोक्तशौचरहितः। कर्मणः सिद्ध्यसिद्ध्योर्लाभालाभयोर्वा हर्षशोकान्वितो यः कर्मणां कर्ता स राजसः उक्तलक्षणै रजोगुणैर्विशिष्टत्वाद्राजस इति मुनिभिः परिकीर्तित इत्यर्थः । रागित्वादि राजसस्य लक्षणमिति सूचितं भवति ॥ २७ ॥

तामसकर्तारमाह—

अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८ ॥

अयुक्त इति । अयुक्तोऽस्थिरचित्तश्चञ्चल इत्यर्थः । प्राकृतः पामरः कार्याकार्यज्ञानविहीन इत्यर्थः । स्तब्धोऽनम्रः महत्सु विनयशून्य इत्यर्थः । शठो गूढविप्रियकारी सर्ववञ्चक इत्यर्थः । नैकृतिकः निकृतिर्मनोवाक्कायैः परतिरस्करणं तत्प्रवणो नैकृतिकः परावमानीत्यर्थः । अलसो मन्दः कार्येष्ववश्यकर्तव्येष्वपि प्रवृत्तिरहितः श्रद्धाशून्य इत्यर्थः । विषादी क्लिष्टचित्तः इष्टे वस्तुनि लब्धेऽपि तृप्तिरहितत्वादीषदपि संतोषरहित इत्यर्थः । दीर्घसूत्री च सद्यः कर्तव्यमपि कार्यं पक्षेण मासेन वा यः करोति स दीर्घसूत्री चिरकारीत्यर्थः । य एवंलक्षणः कर्मकर्ता स तामसस्तमोदोषेण जडबुद्धित्वात्तामस इत्युच्यते । अयुक्तत्वादिकं तामसस्य लक्षणमिति सूचितं भवति ॥ २८ ॥

कर्तृवत्करणस्यापि त्रैविध्यं सूचयितुं बुद्ध्यादेस्त्रैविध्यं बोधयितुमाह—

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु।
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय॥ २९॥

बुद्धेरिति। यया पदार्थतत्त्वमध्यवसाय कार्ये पुमान्प्रवर्तते तस्या बुद्धेः अन्तःकरणवृत्तिविशेषस्य धृतेश्च वृत्तिविशेषस्य। चकारः समुच्चयार्थः। एवकारोऽन्यव्यवच्छेदार्थः। पृथक्प्रत्येकं गुणतः सत्त्वादिगुणभेदेन त्रिविधं भेदमशेषेण साकल्येन मयोच्यमानं शृणु। यद्यपि पूर्वं ज्ञानस्य त्रैविध्यं प्रतिपादितं तथापि ज्ञानं वृत्तिसामान्यं बुद्धिस्तु वृत्तिविशेषः। धृतिरपि वृत्तिविशेष एव ततो न पुनरुक्तिप्रसङ्गः॥ २९॥

सत्त्वबुद्धेर्लक्षणमाह—

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी॥ ३०॥

प्रवृत्तिमिति। प्रवृत्तिं च श्रुतिस्मृतिभ्यां विहितं धर्मं निवृत्तिं ताभ्यां निषिद्धमधर्मं च कार्याकार्ये कार्यं देशकालादेरानुकूल्ये कर्तव्यं प्रातिकूल्ये त्यक्तव्यमकार्यं भयाभये भयं भयकारणमनर्थं अभयं भयाभावकारणमनर्थाभावं बन्धं बन्धहेतुं मोक्षं मोक्षहेतुं च बुद्धेर्ज्ञानकर्तृत्वासंभवात्करणार्थता। यया बुद्ध्या पदार्थतत्त्वनिश्चयकारिण्या धर्माधर्मादिकं पुरुषोऽधिकारी विजानाति सा बुद्धिः सात्त्विकी। यद्वा बन्धं मोक्षं चेत्यत्र बन्धमोक्षयोरेव प्रतिपाद्यत्वेन प्रवृत्त्यादिपदानां तद्विशेषणत्वेनान्वयो युक्तः। प्रवृत्तिं प्रवृत्तिः सत्त्वबुद्धेः कारणभूतः कर्ममार्गः यत्र प्रवृत्तः शुद्धात्मा सन्मोक्षाय कल्पते तां प्रवृत्तिं च। निवृत्तिं च निवृत्तिर्निष्कर्मत्वमार्गः संन्यासो यत्र प्रवृत्तः संसारबन्धान्मुक्तो भवति तां निवृत्तिं च। चत्रयं समुच्चयार्थम्। कार्याकार्ये कार्यमारुरुक्षोः कर्मणि विषये काले काले यत्कर्तव्यं तत्कार्यं तथाऽकार्यमारूढस्य यदकर्तव्यं त्यक्तव्यं तदकार्यं ते चोभे कार्याकार्ये। भयाभये यस्माद्बिभेति तद्भयमज्ञानं संसारकारणं यस्मादभयं भयाभावः सिध्यति तदभयं ज्ञानं मोक्षकारणं ते चोभे भयाभये। बन्धमध्यासलक्षणमज्ञानकार्यं मोक्षमध्यासाभावलक्षणं ज्ञानकार्यं च यया बुद्ध्या बुद्धात्मा विचक्षण एतत्सर्वं क्षीरनीरवद्विभज्य विजानाति अज्ञस्येदं साधनं तज्ज्ञस्येदं साधनमारुरुक्षोरिदं कर्तव्यमारूढस्येदं त्यक्तव्यमिदमज्ञानमिदं ज्ञानमयं बन्धोऽयं मोक्ष इति स्वाधिकारानुरूपेण साध्यसाधनभेदं बन्धं मोक्षं च सम्यग्यया वेत्ति पुरुषः, सा बुद्धिः सात्त्विकी

बहुजन्मसुकृतपरिपाकसमुत्पन्नशुद्धसत्त्वकार्यत्वात्सात्त्विकीति बुधैरुच्यत इत्यर्थः। एतेन सात्त्विक्येव बुद्धिर्मुमुक्षोः प्रयत्नेन संपादनीयेति सूचितं भवति ॥ ३० ॥

राजसीं बुद्धिमाह—

यया धर्ममधर्मं च कार्यं चाकार्यमेव च।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥

ययेति। धर्मं विहितमधर्मं प्रतिषिद्धं च, कार्यं चाकार्यं च देशकालादेरानुकूल्ये प्रातिकूल्ये च कर्तव्याकर्तव्ये कर्मणि, चकारादर्थानर्थानेतान्सर्वानयथावदयथार्थवद्यावदर्थार्थनिर्णयेनासाकल्येन संदेहेन यया बुद्ध्या प्रजानाति पुरुषः सा बुद्धिः राजसी रजोगुणसंपन्नत्वाद्राजसीत्युच्यते ॥ ३१ ॥

तामसीं बुद्धिमाह—

अधर्मं धर्ममिति या मन्यते तमसावृता।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥

अधर्ममिति। धर्ममधर्मं कार्यमकार्यमर्थमनर्थं च यया तमसा तमोगुणेनावृतयाऽस्पष्टप्रकाशया बुद्ध्या सर्वार्थान् वैपरीत्येन मन्यते गृह्णाति पुरुषः सा तामसी बुद्धिरित्यर्थः ॥ ३२ ॥

धृतेरपि त्रैविध्यं वदन् सात्त्विकीं धृतिमाह—

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ ३३ ॥

धृत्येति। योगेन ब्रह्मणि चित्तैकाग्र्यलक्षणेन समाधिना अव्यभिचारिण्या अविनाभूतया धृत्या धारणात्मिकया धीवृत्त्या यया मनःप्राणेन्द्रियक्रियाः मनसः प्राणानामिन्द्रियाणां चक्षुरादीनां च क्रियाः या याश्चेष्टाः बहिःप्रवृत्तिरूपास्ताः सर्वा धारयते ब्रह्मनिष्ठो धारयति नियच्छति। ब्रह्मणि चित्तैकाग्रतायां स्थिरायां सत्यां मनःप्राणेन्द्रियक्रियाः सर्वाः स्वयमेव स्थिरा भवन्ति तेनैकाग्रताधारणाशक्तेर्योगाव्यभिचारित्वं मनःप्राणेन्द्रियक्रियाधारकत्वं च सहैव सिध्यति। अतएवोच्यते योगेनाव्यभिचारिण्या यया धृत्या मनःप्राणेन्द्रियक्रिया धारयते सा धृतिर्धारणाशक्तिः सात्त्विकी शुद्धसत्त्वगुणसंभूतत्वात्सात्त्विकीत्युच्यते मुनिभिरित्यर्थः। पुण्यकर्मपरिपाकवशात्संप्राप्तशुद्धसत्त्वस्य पुरुषस्य ज्ञानं सात्त्विकं बुद्धिः सात्त्विकी धृतिरपि सात्त्विकी मनःप्राणेन्द्रियवृत्तयोऽपि सात्त्विक्य एव भवन्ति।

ज्ञानादीनां सात्त्विकत्वं नाम बाह्यानालम्बनमेव ततो मुमुक्षोः सत्त्वशुद्धिरेव संपादनीयेति सिद्धम् ॥ ३३ ॥

राजसीं धृतिमाह—

यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥

ययेति । तुशब्दोऽन्यव्यावृत्त्यर्थः । यया तु धृत्या पुरुषो धर्मकामार्थान् धर्ममर्थं कामं च प्राधान्येन धारयते धरति न विमुञ्चति प्रसङ्गेन धर्मादीनां प्रसक्तौ संपादनकाले फलाकाङ्क्षी भवति । सा धर्मादीनां धात्री राजसी धृतिः ॥ ३४ ॥

तामसीं धृतिमाह—

यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥

ययेति । दुष्टा तमोदोषदूषिता मेधा बुद्धिर्यस्य स दुर्मेधाः दुर्भगः पुरुषः यया धृत्या स्वप्नं निद्रां भयं शोकं विषादं मदमेव च सदा धारयते नतु क्वचिदपि मुञ्चति सा निद्रादीनां धात्री धृतिस्तामसीत्युच्यते । सर्वव्यवहारहेतोर्बुद्धेस्त्रैविध्ये सिद्धे तद्द्वारभूतानां श्रोत्रादिकरणानामपि सात्त्विकत्वादिभेदसद्भावः सूचितः ॥ ३५ ॥

एवं गुणभेदेन कर्तॄणां कारणानां कर्मणां च त्रैविध्यमुक्त्वा कर्मफलस्य सुखस्यापि त्रैविध्यं वदन् सात्त्विकसुखस्य द्वाभ्यां स्वरूपमाह—

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥ ३६ ॥

सुखं त्विति । स्पष्टार्थः ॥ ३६ ॥

यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७ ॥

यदिति । यद्ब्राह्मं सुखं निरन्तरं नित्यप्राप्तमप्यग्रे स्वसिद्धेः पूर्वं स्वसिद्धिसाधनस्य विषवत्स्वीकर्तुं दुष्करत्वात्स्वयमपि विषमिव प्राप्तुमनुभवितुं चाशक्यमेव भवति यतः स्वसाधनं सदसद्विवेको दुर्लभो मुमुक्षुत्वं ततो दुर्लभं वैराग्यं ततो दुर्लभं शमादिसंपत्तिस्ततो दुर्लभा संन्यासस्ततोऽपि दुर्लभः श्रद्धैकमूलः श्रवणादिस्ततो दुर्लभः मुक्तेरसाधारणकारणं तज्जन्यं ज्ञानमपरोक्षमतीव दुर्लभतरं तत्परिपाकहेतुः समाधिर्दुर्लभतमस्तत एव स्वसिद्धिसाधनस्य समाध्येकमूलस्य ज्ञानस्य प्राच्योदीच्याङ्गैस्तीव्रमोक्षेच्छैककारणैः सह दुष्प्रापत्वात्स्वयमपि तद्वद्दुष्प्रापं भोक्तुमशक्यं च भव-

तीत्यर्थः । नन्वेवं सति यतीनां मोक्षसुखापेक्षावतां का गतिरित्याकाङ्क्षायामाह—**परिणामेति** । सद्गुरोश्चेश्वरस्यानुग्रहात्सिद्धस्य तत्प्राप्तिसाधनस्य ज्ञानस्य नित्यनिरन्तरं समाधिना परिणामे परिपक्वत्वे सिद्धे सत्यमृतोपमं भवति । यथा कालकूटापायेन प्राप्तममृतं देवानां जरामृत्युनिवर्तकं भवति, तथा करणदोषापायेन प्राप्तं तद्ब्राह्मं सुखमपि यतीनां महात्मनां जन्ममरणदुःखप्रवाहविध्वंसकत्वादमृततुल्यं परमानन्दकरं च भवति । ततो ब्रह्मविद्भिः परमहंसैर्मोक्षसुखानुभूतिकामैः साधनशुद्धिसिद्धावेव प्रयत्नः कर्तव्यो न तु साध्यसिद्धये । साधने सिद्धे साध्यं स्वयमेव सिध्यति । यथा चक्षुःसौष्ठवे सिद्धे पूर्णचन्द्रदर्शनाह्लादः सिध्यति तद्वद्यत्सुखमात्मबुद्धिप्रसादजं यया बुद्ध्या ज्ञानेनात्मा सच्चिदानन्दैकलक्षणोऽयमहमस्मीति साक्षात्क्रियते, तस्या एव बुद्धेः प्रसादश्चिरकालनित्यनिरन्तरसविकल्पकनिर्विकल्पकसमाध्यभ्यासातिशयेन, रजसो रजःकार्याणां च रागद्वेषलोभमोहदम्भदर्पहर्षविषादासूयाहंकारादीनां, तमसश्च तमःकार्याणां संशयासंभावनाविपरीतभावनाजाड्यालस्यप्रमादादीनां च सम्यग्भावप्रतिबन्धकानां निःशेषनिवृत्त्या समुत्पन्नः शुद्धस्फटिकवद्दर्पणवदवभासमानो यः स्वच्छत्वगुणः शुद्धसत्त्वाभिधानस्तस्माज्जायते । चक्षुषो दोषनिवृत्त्या पूर्णचन्द्रिकावद्बुद्धिवृत्तेः स्वयमेवाविर्भवतीत्यात्मबुद्धिप्रसादजमित्युच्यते नतु विषयसुखवज्जायते । जन्यत्वे त्वनित्यत्वपरिच्छिन्नत्वसातिशयत्वादिदोषप्रसङ्गान्मुमुक्षूणामनाशास्यत्वोपपत्तेश्च । ततश्चक्षुषो नैर्मल्यापत्त्या रूपवद्बुद्धिवृत्तेः शुद्धसत्त्वापत्त्याऽप्रयत्नेन स्वयमेव विषयीभवति । नित्यसिद्धत्वात्स्वरूपसुखस्य । ननु ब्रह्मविदां ब्राह्मं सुखमतिक्लेशसाध्यं विषयसुखं त्वतिसुलभं सुखार्थिभिस्तदेवानुभोक्तव्यमिति चेद्भवानत्र प्रष्टव्यः । किं वैषयिकं सुखं विषयधर्मो वा करणधर्मो वा कर्मधर्मो वा भोक्तृधर्मो वा देशधर्मो वा कालधर्मो वाप्यज्ञानधर्मो वा ज्ञानधर्मो वात्मधर्मो वा स्वयं व्यापाराभावस्वरूपं वा दुःखाभावस्वरूपं वेति । नाद्यः । विषयसंनिधाने पूर्वक्षण इवोत्तरक्षणे सुखादर्शनात् । व्यञ्जकाभावाद्व्यङ्ग्यानुदय इति चेन्न । दुरदृष्टत्वे पूर्वक्षणेऽपि सुखानुदयप्रसङ्गात्तादृगिष्टविषयासिद्धेश्च । न द्वितीयः । विषयव्यवधाने सुखादर्शनात् । नापि तृतीयः । सुखस्य पुण्यकर्मकार्यत्वेन तद्धर्मत्वानुपपत्तेस्तथात्वे धर्म्युत्पत्त्युत्तरक्षण एव सुखोदयप्रसङ्गात् । न चतुर्थः । भोक्तुः सर्वदा विक्षेपदर्शनात् । नापि पञ्चमः । सुखार्थिनः स्वर्गगमनाभावप्रसङ्गात्स्वर्गस्थानामपि दुःखश्रवणाच्च । नापि षष्ठः । शीतातपव-

त्सार्वत्रिकत्वप्रसङ्गात् । नाप्यज्ञानधर्मः । वस्तुनो भोग्यत्वाज्ञाने सुखादर्शनात् । नापि ज्ञानधर्मः । वस्तुरम्यत्वज्ञानेऽपि विरक्तस्य सुखानुदयात् । सुखं करणव्यापाराभावस्वरूपं न भवति स्वप्ने सुखादर्शनात्, करणव्यापारवति भोजनादौ सुखदर्शनाच्च । नापि च दुःखाभावस्वरूपम् । दुःखाभाववति मृत्पिण्डे सुखादर्शनादचेतनत्वात्तत्र तदभिव्यक्त्यभाव इति चेन्न । दुःखाभाववत्यां बुद्ध्यस्फूर्तौ सुखादर्शनात् । यदुक्तं मूढतमेन दुःखाभावः सुखमिति । तन्न । सुखस्य भावत्वेनाभावरूपत्वानुपपत्तेः । नैवैतेन पशुकल्पेन सौषुप्तिकसुखमनुभूतं निर्विषयम् । अत एवोक्तं दुःखाभावः सुखमिति । तर्हि सुखमात्मन एव धर्म इति चेन्न । सुखमात्मनः स्वरूपं नतु धर्मः । धर्मत्वे धर्मनाशादात्मनोऽपि नाशप्रसङ्गात् । ननु स्वरूपत्वेऽपि सुखस्य क्षणिकत्वात्स्वरूपभूतसुखनाशे त्वात्मनोऽपि नाश एवेति चेन्न । 'आकाशवत्सर्वगतश्च नित्यः' इत्यात्मनो नित्यत्वश्रवणात्तत्स्वरूपभूतसुखस्यापि नित्यत्वसिद्धेः । ननु सुखं यथात्मनः स्वरूपं तथा दुःखमप्यात्मन एव स्वरूपं भवतु, सुख्यहं दुःख्यहमिति सुखदुःखप्रत्यययोरेकविषयत्वदर्शनादिति चेन्न । मृतोऽस्मीतिवद्दुःख्यहमिति प्रत्ययस्य संमोहकार्यत्वेन मिथ्यात्वोपपत्तेः । नहि पुत्रे मृते मृतोऽहमस्मीति वक्तुर्मरणमस्ति मोहादारोपणं विना । तद्वद्दुःख्यहमिति दुःखित्वप्रत्ययस्यात्मनि मोहादारोपितत्वान्मिथ्यात्वमेव । दुःखस्यात्मनः स्वरूपत्वे सुषुप्तावुपलभ्यते सुखमहमस्वाप्समिति सुखोपलब्धिवत्तदुपलम्भाभावाद्दुःखमात्मनः स्वरूपं न भवति । सुखमेवात्मस्वरूपं सुखस्यैवात्मस्वरूपत्वे सुखमहमस्वाप्समिति प्रत्यक्षं प्रमाणम् । आत्मा सुखस्वरूपः सुषुप्तौ सुखमात्रोपलम्भात्समाधिवदित्यनुमानं च सच्चिदानन्दमात्रमेकरसं बुद्धसुखस्वरूप आत्मा । 'सद्घनोऽयं चिद्घन आनन्दघनः' इति श्रुतिश्च । मुमुक्षुप्रवृत्त्यन्यथानुपपत्तिप्रसूतार्थापत्तिरपि च प्रमाणम् । तर्हि दुःखं कस्य स्वरूपमिति चेदनात्मन एव स्वरूपमिति ब्रूमः । अनृतजडदुःखात्मकत्वमनात्मनः सर्वप्रसिद्धेः । 'अतोऽन्यदार्तम्' इति, 'नाल्पे सुखमस्ति' इति, 'तदेतज्जडं मोहात्मकं अन्तवत्तुच्छम्' इत्यादिश्रुतिप्रसिद्धेश्च । ननु सुखस्यात्मरूपत्वे सिद्धे विषयसुखमिति व्यपदेशः कथमिति चेदुच्यते । पुण्यकर्मवशात्पुरुषस्येष्टपदार्थसान्निध्ये सत्यन्तःकरणे सत्त्वमाविर्भवति । तत्रानन्दस्वरूप आत्मा प्रतिबिम्बति । प्रतिबिम्बात्मानन्दस्फूर्तिरेव विषयासान्निध्याद्विषयसुखमित्युच्यते । पुण्यतारतम्यात्सत्त्वतारतम्यं सत्त्वतारतम्यात्प्रतिबिम्बस्फूर्तेश्च तारतम्यं तेन सुखस्यापि तरतमभावस्तत एव श्रूयते—'एतस्यै-

वानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति, ततो विषयसुखमाभासिकं महान्तो ब्रह्मविदो नापेक्षन्ते पूर्णानन्दामृतरसपायिनः । नन्वात्मन आनन्दस्वरूपत्वात्परिपूर्णत्वाच्च सदा सर्वत्र सर्वेषामयत्नतः सुखानुभूतिः स्वयमेव स्यादिति चेन्न । वृत्तिशुद्धिसापेक्षत्वादात्मस्वरूपोपलब्धेः । यद्वद्राकाचन्द्रचन्द्रिकायाः परिपूर्णत्वेऽपि तद्दर्शनाह्लादश्चक्षुःसौष्ठवमपेक्षते तद्वदात्मानन्दानुभूतिरपि बुद्धिप्रसादमपेक्षते । तत एवोच्यते भगवताध्यात्मबुद्धिप्रसादजमिति । एवमात्मबुद्धिप्रसादजं नित्यं निरन्तरं निरपेक्षं निरतिशयं निरवधिकं यद्ब्राह्मं सुखं तत् सात्त्विकं सत्त्वाविर्भूत्या आविर्भूतत्वात्सात्त्विकमिति महर्षयो वदन्तीत्यर्थः ॥३७॥

राजसं सुखमाह—

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोऽपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥

विषयेति । विषयेन्द्रियसंयोगाद्विषयाणामिन्द्रियाणां च संसर्गाज्जायमानं यद्वैषयिकं सुखमग्रे पूर्वं स्वानुभूतिकाले स्वानुसेविनः पुरुषस्यामृतोपमं सुधाकल्पं सत्‘भूयोभूयो विवर्धत’इति न्यायेन स्वविषयकाण्येवाविद्याकामकर्माणि प्रवर्धयति । परिणामे स्वकार्यफलकाले स्वानुषक्तं पुरुषं विषमिव हन्ति स्वकार्येण योजयित्वा ‘सकामभिर्जायते तत्र तत्र’ इति न्यायेन नानायोनिषु पातयित्वा मुहुर्मुहुर्मृत्युं गमयतीत्यर्थः । यदेवंलक्षणं वैषयिकं सुखं तद्राजसं रजोगुणेन कामेन संभावितत्वाद्राजसमिति मुनिभिः स्मृतम् । उक्तमित्यर्थः ॥ ३८ ॥

तामसं सुखमाह—

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९ ॥

यदग्र इति । अग्रे स्वोत्पत्तिकाले चानुबन्धे च परिणामकालेऽवसानेऽप्यात्मनः सदसद्विवेकहेतोर्बुद्धेर्मोहनं मोहकारकं विवेकशक्तितिरोधायकं निद्रालस्यप्रमादोत्थं निद्रा प्रसिद्धा, आलस्यं बुद्धिजाड्यं, प्रमादो बुद्धिपारवश्यमेतेभ्यः समुत्पन्नं यत्सुखं तत्तामसं तमोगुणनिष्पन्नत्वात्तामसमिति ऋषिभिरुदाहृतमित्यर्थः ॥ ३९ ॥

क्रियाकारकफलानां विभज्य त्रिगुणात्मकत्वं प्रतिपाद्याविभागेन सर्वं त्रिगुणात्मकमेवेत्याह—

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ ४० ॥

न तदिति। पृथिव्यां भूलोके वाशब्दात्पाताले दिवि स्वर्गे वा देवेषु ब्रह्मादिषु वा। पुनःशब्दो वार्थः। प्रकृतिजैः प्रकृतिसमुत्पन्नैरेभिरुक्तलक्षणैस्त्रिभिस्त्रिविधैर्गुणैः सत्त्वादिभिर्मुक्तं परित्यक्तमस्पृष्टं यत्स्याद्भवेत्तत्सत्त्वं द्रव्यं प्राणि वा त्रिलोक्यां नास्ति। त्रिगुणात्मकमायाकार्यत्वाज्जगत्सर्वमपि त्रिगुणात्मकमेवेत्यर्थः ॥ ४० ॥

एवं सर्वस्यापि जगतो गुणत्रयात्मकत्वे सिद्धे गुणत्रयातिक्रमणं कृतवत एवमुक्तिरिति गुणानत्येतुमिच्छोर्मुमुक्षोस्तदतिक्रमसिद्धेः परमकारणं ज्ञानं तत्सिद्धेः कारणं सत्त्वशुद्धिस्तत्कारणं तु कर्मैव तदेवावश्यं कर्तव्यमिति वैदिकानां कर्मणां सर्वेषां कर्तव्यतायां प्राप्तायां ब्राह्मणादीनां मुमुक्षूणां येषां येषां स्वस्वगुणानुरूपेण यानि यानि कर्माणि विभक्तानि भवन्ति तैस्तैस्तानि तान्येव कर्तव्यानि न त्वितराणीति नियमं दर्शयति—

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥

ब्राह्मणेति। ब्राह्मणाश्च क्षत्रियाश्च विशश्च तेषां ब्राह्मणक्षत्रियविशामित्यत्र जात्या विषमत्वेऽपि उपनयनाध्ययनयजनादिकर्मभिराश्रमेण च समत्वाद्धर्मतः समानानां समासकरणमविरुद्धम्। शूद्राणां चेति पृथक्करणं जात्या धर्मेण क्रियया च विषमत्वान्न विरुद्धम्। एवं तेषां ब्राह्मणादीनां शूद्राणां च नियमेन कर्तव्यानि कर्माणि स्वभावप्रभवैः स्वभावः प्रकृतिस्तत्प्रभवैर्गुणैः सत्त्वादिभिः प्रविभक्तानि प्रकर्षेण विभक्तानि गुणवतां गुणभेदेन कर्माण्यपि भिन्नानि गुणैरसंकीर्णत्वेन व्यवस्थापितानि भवन्तीत्यर्थः। यद्वा स्वभावप्रभवैः ब्राह्मणस्वभावः केवलसत्त्वगुणप्रभवः, क्षत्रियस्वभावः सत्त्वमिश्रितरजःप्रभवः, वैश्यस्वभावः रजोमिश्रिततमःप्रभवः, शूद्रस्वभावः केवलतमःप्रभवः, एवं सत्त्वादिगुणभेदेन तत्तद्गुणवतां ब्राह्मणादीनां शूद्राणां च कर्तव्यानि कर्माण्यपि भिद्यन्त इत्यर्थः। यद्वा 'ब्राह्मणोऽस्य मुखमासीत्' इति श्रुत्युक्तप्रकारेण चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्रास्तेषां पूर्वः पूर्वो जन्मतः श्रेयानिति न्यायेन च भव एव भावो जननं स्वः स्वकीयो भावः स्वभावः। यद्वा स्वेषां भावः स्वभावः मुखबाह्वादिभ्यो जननं प्रभवः कारणं येषां तैः स्वभावप्रभवैः स्वजन्मनिमित्तकैर्गुणैरुत्तमत्वमध्यमत्वनिकृष्टत्वातिनिकृष्टत्वैरुपलक्षितानां ब्राह्मणक्षत्रियवैश्यशूद्राणां नियमेन कर्तव्यानि यानि कर्माणि तानि जन्मत उत्कृष्टत्वादिभेदेन विभक्तानि शास्त्रेण विभज्य विहितानीत्यर्थः ॥ ४१ ॥

तेषां जातिनियमेन विभक्तानि तानि कर्माणि कानीत्यत आह—

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम् ॥ ४२ ॥

शम इति । शमश्चित्तस्योपरमः दृष्टादृष्टविषये सर्वत्र निःशेषभोगाशानिवृत्तिः । दम इन्द्रियाणामुपरमः निषिद्धार्थेष्वप्रवृत्तिः । तपः सप्तदशे प्रोक्तं शारीरादित्रिविधं तपः । शौचं बाह्याभ्यन्तरा च शुद्धिः, अनृतस्य परान्नस्य च त्यागेन वक्त्रस्य जिह्वायाश्च शुद्धिः,प्रतिग्रहत्यागेन पाणिशुद्धिः, विहितब्रह्मचर्येण कच्छशुद्धिः, रागद्वेषादिदोषत्यागेन मनःशुद्धिः, विहिताचरणेन क्रियाशुद्धिरिति षोढा शौचम् । क्षान्तिः क्षमा निन्दाक्रोशताडनादिप्रसक्तावपि चित्तविकारानुदयः । आर्जवं सर्वदा करणत्रयस्यैकरूपत्वम् । ज्ञानं सम्यगधीतवेदशास्त्राणां पदवाक्यार्थज्ञानम् । विज्ञानं त्वनुष्ठानानुष्ठापनक्षमं निरङ्कुशं शास्त्रार्थतत्त्वनिश्चयः । आस्तिक्यमास्तिकत्वमिदमवश्यं कर्तव्यमनेनेश्वरः प्रीयत इति कर्मणि कर्मफले च श्रद्धा । चकारोऽनुक्तयोराचार्यवेदेश्वरेषु भयभक्त्योः समुच्चयार्थः । एवकार एतदेव ब्राह्मणस्य मुमुक्षोः कर्तव्यं कर्मेत्यवधारणार्थः । स्वभावजं केवलसत्त्वप्रकृतितो मुखादुत्पत्तितो वा प्राप्तं ब्राह्मं ब्राह्मणजातेरर्हं कर्तव्यं कर्मेदं शास्त्रेण विहितमित्यर्थः । यद्यपि त्रैवर्णिकानां मुमुक्षूणां सर्वेषां शमाद्यास्तिक्यान्तं कर्म मोक्षसाधनत्वेन सममेव भवति तथापि केवलं सत्त्वप्रभवानां ब्राह्मणानां गुडस्य माधुर्यवन्निरुक्तं कर्म स्वाभाविकं नियतं च भवति तदितरेषां तु यत्नसाध्यमिति बोधयितुं ब्राह्मं कर्मेत्युक्तम् । तेन ब्राह्मणानामेव सत्त्वाधिक्याच्छमादिसंपत्तिस्तदेकसाध्ये ज्ञाने तत्फले मोक्षे चाधिकारो नत्वितरेषामिति सूचितं भवति । ततो मोक्षस्य सन्निकृष्टं ब्राह्मणजन्म प्राप्तवद्भिः पण्डितैः क्षिप्रं मोक्षाय यतितव्यमिति सिद्धम् ॥४२॥

एवं ब्राह्मं कर्मोक्त्वा क्षात्रं कर्माह—

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ ४३ ॥

शौर्यमिति । शूरस्य भावः शौर्यं पराक्रमो वीराणामपि संहरणसामर्थ्यम् । तेजः प्रागल्भ्यं भगवतामपि दुर्धर्षत्वम् । धृतिर्विपदि चित्तस्य वैकल्यराहित्यं धैर्यम् । दाक्ष्यं दक्षस्य भावो दाक्ष्यं प्रातिकूल्यशतेऽपि स्वकार्यनिर्वाहसामर्थ्यम् । युद्धे त्वपलायनं प्राणान्तेऽप्यपराङ्मुखत्वम् । दानं पात्रेभ्यो वित्तसमर्पणम् । ईश्वरभाव ऐश्वर्यं प्रभावातिशयेन सर्वनियन्तृत्वं धर्मेण प्रजापरिपालनमित्यर्थः । चकारोऽपिश्चोक्तसमुच्चयार्थः ।

शौर्याद्यैश्वर्यान्तं सर्वं कर्म स्वभावजं सत्त्वमिश्ररजःप्रकृतितो बाहोरुत्पत्तितो वा प्राप्तं क्षात्रं क्षत्रियजातेरर्हं कर्तव्यं शास्त्रेण विहितमित्यर्थः ॥ ४३ ॥

वैश्यशूद्रयोः कर्माह—

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ ४४ ॥

कृषीति। कृषिः कर्षणम्। गोरक्ष्यं गाः रक्षतीति गोरक्षस्तस्य भावो गोरक्ष्यं पशुपालनम्। वाणिज्यं वणिजः कर्म वाणिज्यं क्रयविक्रयलक्षणमेतत्त्रिविधं कर्म स्वभावजं रजोमिश्रतमःप्रकृतित ऊर्वोरुत्पत्तितो वा प्राप्तं वैश्यं विशो जातेरर्हं कर्तव्यं शास्त्रेण विहितमित्यर्थः। परिचर्यात्मकं त्रैवर्णिकानां शुश्रूषालक्षणं स्वभावजं केवलतमःप्रकृतितः पद्भ्यां जन्मतो वा प्राप्तं शूद्रस्य कर्तव्यं कर्म शुश्रूषा शूद्रस्येति शास्त्रेणोक्तमित्यर्थः। ननु ब्राह्मणक्षत्रियविशां नियमेन कर्तव्यानि कर्माणि वक्ष्यामीत्युपक्रम्य शमो दम इति शौर्यं तेज इति प्राकृत एव धर्म उपदिश्यते नतु वैदिकं कर्म नियमेन कर्तव्यं येन कृतेनेश्वरः प्रीयते। नहि शमशौर्यकृष्यादिकर्मणानुष्ठितेनेश्वरः प्रीयते कथमिदं विपरीतं कर्मोपदिश्यते इति चेत्, सत्यम्। शमादिकं शौर्यादिकं च कर्म संध्यादिवदनुष्ठेयं न भवति, नापीदमीश्वरप्रीतये च भवति तथापि विशेष उच्यते—'अहरहः संध्यामुपासीत', 'सायं प्रातरग्निहोत्रं जुहोति', 'यज्ञोऽध्ययनं दानम्' इति द्विजातीनामध्ययनमिज्या दानमिति ब्राह्मणादीनां नियमेन नित्यं कर्तव्यं कर्म यथा शास्त्रेणैवोक्तं तथा 'शमेन शान्ताः शिवमाचरन्ति', 'दमेन दान्ताः किल्बिषमवधुन्वन्ति', 'तपसा किल्बिषं हन्ति' इति। राज्ञोऽधिकं रक्षणं सर्वभूतानां न्यायदण्डत्वं बिभृयात्संग्रामे संस्थानमनिवृत्तिश्चेति। कृषिवाणिज्ये च स्वयं कृते कुसीदं चेति। शूद्रश्चतुर्थो वर्ण एकजातिस्तस्यापि सत्यमक्रोधः परिचर्या चेतरेषामित्येतान्यपि कर्माण्यनुष्ठेयत्वेन शास्त्रेणैवोक्तानि भवन्ति। किंत्वयमत्र विशेषः। ब्राह्मणादीनां संध्योपासनाग्निहोत्रादिरविभक्तो वर्णाश्रमधर्मः समशौर्यकृष्यादिस्तु प्रत्येकं विभक्तो जातिधर्मस्ततो जातिवर्णाश्रमनिमित्तकौ द्वावप्येतौ धर्मौ नित्यौ श्रौतस्मार्तकर्मवत्प्रधानावेव भवतो नतु तयोरङ्गाङ्गिभावः सिध्यति। उभावपि शास्त्रेण नियतत्वान्मुमुक्षूणां नियमेनानुष्ठातव्यावेव। नैवात्र किंचिद्विपरीतमस्ति गृहीतुं बोधयितुं वा। ततो जातिधर्मे नियमेन वर्तमानैर्ब्राह्मणादिभिः स्वस्ववर्णाश्रमार्हं कर्म वैदिकं नित्यमनुष्ठातव्यं ना-

न्यथा । कर्मणः प्रधानस्यैकदेशानुष्ठानेन साकल्यासंभवान्न तत्फलं सिध्यति । नहि श्रौतस्मार्तयोरन्यतरानुष्ठानेन संस्कारसाकल्यं सिध्यति तद्वत् । ततः स्वधर्मे शमादौ शौर्यादौ सदा वर्तमानैरेव ब्राह्मणक्षत्रियादिभिः संध्याग्निहोत्रादि नित्यं कर्म नियमेन कर्तव्यमिति सिद्धम् ॥ ४४ ॥

एवं ब्राह्मणादीनां नियमेन कर्तव्यानि शमादीनि कर्माणि तदुपलक्षितानि 'यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत्' इति श्रौतानि स्मार्तानि चोपदिश्य सत्त्वशुद्ध्यै तेषामीश्वरार्पणबुद्ध्या कर्तव्यत्वं बोधयितुं प्रवृत्तिसिद्धये फलं प्ररोचयति—

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥ ४५ ॥

स्व इति । नरो ब्राह्मणादिर्मुमुक्षुरधिकारी पुरुषः । स्वे स्वे शमो दम इत्यादिना विभज्य प्रदर्शिते स्वकीये कर्मणि शमादौ श्रौते स्मार्ते चाभिरतो नियमेन परिनिष्ठितो यथाविधि समनुष्ठितसत्कर्मसंक्षालितप्रतीपसर्वपापपटलः सन् संसिद्धिं सत्त्वशुद्धिं सकृदुपदेशमात्रेणात्मतत्त्वावगत्याविर्भावयोग्यतालक्षणां विन्दति । ननु बहुभिर्ब्राह्मणादिभिरजस्रं कर्म क्रियते न तेषां तत्कर्मानुष्ठानेन सत्त्वशुद्धिरुक्तलक्षणा दृश्यते कथं कर्मण्यभिरतः सत्त्वशुद्धिं लभत इत्याकाङ्क्षायां 'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति' इति न्यायेन पूर्वोक्तशमाद्यभावेन कामसंकल्पाहंकाराभिनिवेशेन च कर्माण्यनुतिष्ठतः सत्त्वशुद्धिर्न सिध्यतीति बोधयितुमाह—**स्वकर्मेति** । मुमुक्षुर्ब्राह्मणादिरुक्तशमदमादिसंपन्नः स्वकर्मनिरतः स्वस्य श्रुतिस्मृतिभ्यां विहिते वैदिके कर्मणि निरतो निष्ठितः । सिद्धिं सत्त्वशुद्धिं यथा येन प्रकारेण विन्दति तं प्रकारं शृणु, श्रुत्वा तथानुष्ठाने मतिं कुर्वित्यर्थः ॥ ४५ ॥

'ब्रह्मार्पणं ब्रह्म हविः' इति, 'कर्ता क्रियाणां स स युज्यते क्रतुः स एव तत्कर्मफलं च तस्य । स्रुगादि यत्साधनमप्यशेषं हरेर्न किंचिद्व्यतिरिक्तमस्ति' इत्येतच्छ्रुतिस्मृत्युक्तरीत्या मुख्याधिकारिणो विदुषः कर्तृकर्मतत्साधनस्रुक्स्रुवचरुपुरोडाशाद्यादिषु ब्रह्मदृष्ट्याव्याहतया कर्माण्यनुतिष्ठतः इष्टानिष्टत्वमित्रामित्रत्वदुष्टादुष्टत्वादिविषमबुद्धिः क्रमेण विनश्यति तन्नाशाद्रागद्वेषादिदोषा नश्यन्ति तन्नाशादहंममेत्यभिमानदोषा नश्यन्ति तेषां रजस्तमोदोषाणां सर्वेषां क्रमेण निःशेषविनाशे सत्त्वं स्वयमेव प्रसीद-

तीति बोधयितुं सर्वस्य सगुणब्रह्ममात्रत्वज्ञानवतः पण्डितस्य तथा तदाराधनमेव कुर्वतः सत्त्वशुद्धिः सिध्यतीत्याह—

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ ४६ ॥

यत इति । 'जन्माद्यस्य यतः', 'यतो वा इमानि भूतानि जायन्ते' इत्युक्तप्रकारेण यतो यस्मान्मायोपाधिकाद्ब्रह्मणः सकाशाद्भूतानामाकाशादीनां तत्कार्याणां च प्रवृत्तिरुत्पत्तिर्मृदः सकाशाद्घटादिवद्यस्मादिदं सर्वं समुत्पन्नमित्यर्थः । किंच येन कारणभूतेन ब्रह्मणा तत्कार्यमिदं जगत्सर्वं ततं व्याप्तं मृदा घटवद्बहिरन्तश्च पूर्णं भवति तं सर्वात्मकं परमात्मानं स्रुक्स्रुवाग्निहोत्रमन्त्रतन्त्रादिषु सर्वत्र ब्रह्मदृष्टिर्भूत्वा मानवोऽधिकारी विद्वान् स्वकर्मणा श्रौतस्मार्तादिना सात्त्विकेनाभ्यर्च्य श्रद्धाभक्तिभ्यां नियमेनेष्ट्वा सर्वत्र ब्रह्मदृष्टिं च कृत्वा सिद्धिं सत्त्वशुद्धिलक्षणां विन्दति । सत्त्वशुद्धिं तत्फलभूतां ज्ञानसिद्धिं च प्राप्नोतीत्यर्थः । यतः प्रवृत्तिर्येन सर्वमिति विशेषणद्वयं सर्वत्र ब्रह्मदृष्टिकर्तव्यताबोधनार्थमेवेत्यवगम्यते । अधिकारिणां मध्यमादिभेदे तु 'यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योन्तरः' इत्यादिश्रुत्युक्तरीत्या यतो यस्माद्भूतानां ब्रह्मादिस्तम्बान्तानां प्रवृत्तिश्चेष्टा सिध्यति । यः सर्वं प्रवर्तयतीत्यर्थः । सर्वं जगदिदं येन ततं व्याप्तं यः सर्वात्मक इत्यर्थः । तमग्नीन्द्रादित्यादिदेवतारूपेण वर्तमानं सर्वनियन्तारं परमेश्वरं स्वकर्मणाभ्यर्च्य श्रद्धाभक्तिभ्यामग्न्यादिदेवान्सर्वान्परमेश्वरबुद्ध्या इष्ट्वा तदनुग्रहेण मानवो मुमुक्षुरधिकारी ब्राह्मणादिः सिद्धिं सत्त्वशुद्धिं तत्फलभूतां ज्ञानसिद्धिं च क्रमेण विन्दतीत्यर्थः ॥ ४६ ॥

ननु ब्राह्मणस्य भिक्षणे निमित्तमाचार्यो यज्ञो विवाह इति मुमुक्षोश्चित्तशुद्धिं तत्फलं वाप्तुमिच्छतोर्यज्ञादेः प्रतिग्रहद्रव्यैकसाध्यत्वात्प्रतिग्रहस्यैव पापहेतुत्वात् प्रतिगृहीतद्रव्येण क्रियमाणयागापेक्षया ब्रह्मचारिवदप्रतिगृह्य शुद्धवृत्त्यावस्थानमेव तस्य शोधकं निष्पापकं च भवति । तथा हिंसाप्रधानत्वाद्युद्धस्य तत्साध्येन द्रव्येण क्रियमाणराजसूयादियागाद्यनुष्ठानापेक्षया शुद्धिकामस्य क्षत्रियस्य प्रतिग्रहभीरुब्राह्मणवच्छुद्धवृत्त्यावस्थानमेव शोधकं निष्पापं च भवतीत्याशङ्कायामाह—

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ ४७ ॥

श्रेयानिति । परधर्मात्परो जात्या वर्णेन वाऽऽश्रमेण वा स्वस्माद्भिन्नः स्वविलक्षणस्तस्य धर्मादाचारात्स्वनुष्ठितादङ्गलोपराहित्येन सम्यगा-

चरितात् विगुणोऽपि स्वलक्षणपौष्कल्यहीनोऽपि दोषवानपि ब्राह्मणस्य क्षत्रियस्य वान्यस्य वा स्वधर्म एव श्रेयान् श्रेष्ठो निश्रेयसस्य साधनं भवति नतु सम्यगनुष्ठितोऽपि परधर्मस्तस्याविहितत्वादित्यर्थः। तदेव विस्पष्टयति—**स्वभावेति**। ब्राह्मणस्याधिकारः प्रवचनयाजनप्रतिग्रहाः। न दोषो हिंसायामाहवेन्यत्रेत्येवं स्वभावनियतं स्वभावस्तत्तज्जातिस्तमुद्दिश्य नियतं शास्त्रेण विहितं कर्म प्रतिग्रहं तदुपार्जितद्रव्येण यागाद्यनुष्ठानं च ब्राह्मणः, युद्धादिलक्षणं कर्म तदुपार्जितद्रव्येण यागाद्यनुष्ठानं च क्षत्रियः कुर्वन्किल्बिषं चित्तशुद्धिप्रतिबन्धकं नाप्नोति। स्वजातेः स्ववर्णस्य स्वाश्रमस्य विहितधर्मानुष्ठानेन पुरुषः पापी न भवतीत्यर्थः ॥ ४७ ॥

ब्राह्मणस्य क्षत्रियस्य वा स्वधर्मस्याग्निष्टोमादेर्युद्धस्य च बहिर्दोषवत्प्रतीयमानत्वेऽपि विध्युक्तत्वेन निर्दुष्टत्वात्तदनुष्ठानं मुक्तय एव भवति न तु बन्धायेति बोधयित्वा पुनरपि यागो वा संग्रामो हिंसाप्रधानत्वेन दोषवानेव भवतीति कथं कर्तुं शक्यत इत्याशङ्का सर्वथापि न कर्तव्येत्युक्तमेवार्थं द्रढयितुमाह—

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८ ॥

सहजमिति। सहजं 'कर्मणा जायते द्विजः' इति न्यायेन सह जन्मना द्वितीयेन जायत इति सहजं जातितः प्राप्तं जातिं वर्णं च निमित्तीकृत्य शास्त्रेण विहितं कर्म स्वधर्ममित्यर्थः। सदोषमप्युक्तरीत्या दोषयुक्तमप्यारुरुक्षुर्मोक्षेच्छुर्ब्राह्मणादिर्न त्यजेन्न संन्यसेदित्यर्थः। ननु दोषवत्कर्मणोऽनुष्ठानान्निर्दुष्टस्य परधर्मस्याश्रयणं युक्तमेवेति चेद्भवानत्र प्रष्टव्यः। कर्तव्यस्य कर्मणस्त्यागो दुष्टत्वबुद्ध्या वा किमसाधनत्वबुद्ध्या वा, किमसत्त्वबुद्ध्या वा, परधर्मस्त्वदुष्टः स आश्रयणीय इति वा। नाद्यः। विहितस्य परित्यागे प्रत्यवायप्रसङ्गात्। न द्वितीयः। अविरक्तस्यासाधनत्वबुद्ध्यनुत्पत्तेः विरक्तस्य त्यक्तव्ये कर्मणि गुणदोषविचारासंभवाच्च। न तृतीयः। अनात्मज्ञस्य कर्मतत्साधनफलेष्वसत्त्वबुद्ध्यनुत्पत्तेः। नापि चतुर्थः। परधर्मस्यापि कर्मत्वेन दोषवत्त्वाव्यभिचारादिति कुटीचकस्याप्यविरक्तस्य शिखायज्ञोपवीतादित्वेन कर्मित्वात्तत्कर्मणोऽपि साधनसाध्यत्वेन दोषवत्त्वमेव निश्चित्य सर्वैर्वर्णाश्रमिभिः क्रियमाणं कर्म दोषवदेव 'न हिंस्यात्सर्वा भूतानि' इति श्रुत्या भूतहिंसाया निषिद्धत्वात्सर्वस्यापि कर्मणो वैदिकस्य कुशसमिधादिद्रव्यसाध्यत्वेन हिंसाप्रधानत्वात् सर्ववर्णाश्रमिभिः क्रियमाणं कर्म सर्वमपि हिंसाप्रधानत्वेन दोषयुक्तमेव भवतीति सर्वस्यापि कर्मणो दोष-

वत्त्वं दर्शयितुमाह—**सर्वारम्भा हीति** । यद्वा 'काममय एवायं पुरुषः' इति, 'यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम्' इति, 'रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् । तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्' इति न्यायेन कर्मणः सर्वस्यापि कामसंकल्पादिरजोगुणकार्यत्वेन दोषवत्त्वात्सर्वाण्यपि कर्माणि दोषवन्त्येवेत्युच्यन्ते—**सर्वेति** । हि यस्मात्कारणात्सर्वारम्भा आरभ्यन्ते क्रियन्त इत्यारम्भाः सर्ववर्णाश्रमिभिः क्रियमाणानि कर्माणि सर्वाण्यपि हिंसादोषेण रजोदोषेण वा वृता व्याप्ताः धूमेनाग्निरिव । यथा अग्नेः स्वोत्पत्तौ धूमेन विनाभावाभावस्तथा वैदिकस्य कर्मणोऽपि हिंसया कामेन वा विनाभावाभावात्सर्वमपि कर्म दोषवदेव । यस्मादेवं तस्मात्परधर्मोऽपि दोषवानेव भवति । परधर्माचरणेन स्वाभाविक एको दोषः, स्वधर्मत्यागकृतो द्वितीयश्च, अविहिताचरणं तृतीयः, ईश्वराज्ञोल्लङ्घनं चतुर्थश्चापतति । तस्मादारुरुक्षोरविरक्तस्य मोक्षैककामस्य जातिं वर्णमाश्रमं च निमित्तीकृत्य श्रुतिस्मृतिभ्यां विहितं कर्म सदोषमपि सत्त्वशुद्धयेऽवश्यं कर्तव्यम् । स्वधर्माचरणेनैव शुद्धात्मा ब्राह्मणादिर्मुक्तिं गच्छति । तथाच स्मृतिः—'वेदोदितं स्वयं कर्म नित्यं कुर्यादतन्द्रितः । तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिम्' इति । यत एवं ततो वर्णाश्रमिणां मुमुक्षूणां बन्धमुक्तये स्वधर्म एव कर्तव्य इति सिद्धम् ॥ ४८ ॥

ज्ञानकर्मणोः साध्यसाधनभावं सर्वशास्त्रप्रसिद्धं बोधयितुमेवमारुरुक्षोर्मोक्षैककामस्य कर्तव्यस्य कर्मणो दोषवत्त्वेऽपि चित्तशुद्धेरन्यासाध्यत्वेनावश्यकरणीयत्वं श्रुतिस्मृतिभ्यां विहितत्वेन निर्दुष्टत्वं श्रेयःसाधनत्वं तेन सात्त्विकेन कर्मणा बहुजन्मभिः समाराधितपरमेश्वरप्रसादाच्चित्तशुद्धिं च प्रतिपाद्य सात्त्विक्यैव बुद्ध्या सात्त्विकेन च कर्मणा समाराधितपरमेश्वरप्रसादात्सम्यक्सत्त्वशुद्धिं प्राप्तवतः सद्गुरोः सकृदुपदेशमात्रेण संप्राप्तात्मज्ञानस्यारूढस्य संन्यासयोगेन ब्रह्मप्राप्तिं निर्दिशति—

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९ ॥

असक्तेति । असक्तबुद्धिः सर्वत्र विषयान्तरे कर्मान्तरे देशान्तरे लोकान्तरे देवतान्तरे च भोक्तुं कर्तुं स्थातुं प्राप्तुमुपासितुं च असक्ताऽननुरक्ता तत्तद्विषयैः संबन्धरहिता बुद्धिर्यस्य सोऽसक्तबुद्धिः । सर्वदृश्यमिथ्यात्वं निश्चित्य सर्वत्र विषयमात्रे सम्यग्विरक्त इत्यर्थः । सर्वमिथ्यात्वनिश्चयेन विषयाननुषक्तबुद्धित्वेऽपि चलचित्तस्य ज्ञाननिष्ठाऽसंभवाद्विदुषो वश्यात्मत्वेन भवितव्यमित्याह—**जितात्मेति** । जितस्तीव्रवैराग्येण श्रद्धापूर्वकचि-

रकालिकनित्यनिरन्तरसत्प्रत्ययावृत्त्यभ्यासेन निर्जितो ब्रह्मण्येव स्थिरतां गमित आत्मा मनो यस्य स जितात्मा । वशीकृतचित्त इत्यर्थः । असक्तबुद्धित्वे जितात्मत्वेऽपि च सिद्धे शरीरसौख्यापेक्षावतः परिग्रहवतश्च योगिनो ज्ञाननिष्ठा न सिध्यत्यतस्तद्राहित्येन भवितव्यमित्याह—**विगतस्पृह** इति । देहात्परिग्रहाच्च विशिष्य गता विगता देहपरिग्रहक्षेमविषया स्पृहापेक्षा यस्य स विगतस्पृहः । काले प्रारब्धप्रापितान्नभोजी कौपीनकन्थादण्डकुण्डिकामात्रधारी च भवेदित्यर्थः । एवमुक्तसाधनसंपन्नः सम्यग्विदितात्मतत्त्वस्तीव्रमुमुक्षुरारूढः संन्यासेन सति ब्रह्मणि स्वात्मना विदिते नितरामासः संन्यासः समाधिर्निरन्तरब्रह्मनिष्ठा तेन संन्यासेन निरन्तरज्ञाननिष्ठया । 'यद्वा सत्यं ज्ञानमनन्तं ब्रह्म' इत्युपलक्षणं ब्रह्मैवाहमिति स्वस्वब्रह्माकारेण नितरामितरभावापत्तिराहित्येनावस्थानं येन सिद्ध्यति स संन्यासः सम्यग् ज्ञानमहमेवाधस्तादहमुपरिष्टादहमेवेदं सर्वमित्येवंलक्षणं तेन संन्यासेन स्वयाथात्म्यविज्ञानेन नैष्कर्म्यसिद्धिं न यत्र कर्म तन्निष्कर्म निष्क्रियं परं ब्रह्म 'निष्कलं निष्क्रियं शान्तम्' इति श्रुतेः । निष्कर्मणो भावो नैष्कर्म्यं ब्रह्मभावस्तत्प्राप्तिर्नैष्कर्म्यसिद्धिर्निर्विशेषब्रह्मात्मनावस्थितिलक्षणा तां नैष्कर्म्यसिद्धिं । परमां ब्रह्मभावापत्तेरुत्तमसिद्ध्यन्तराभावादनुत्तमाम् । सर्वा अप्यणिमादिसिद्धयः सालोक्यादिसिद्धयो वा भेदप्रत्ययहेतुत्वेन मोहकतया पुरुषं संसारयन्ति । नैष्कर्म्यसिद्धिस्तु स्वसिद्धिकारणेन सम्यग्दर्शनेन द्वैततत्प्रत्ययहेतुभूताज्ञानध्वान्तविध्वंसनं कारयित्वा संसाराद्विनिवर्त्य ब्रह्मविदं स्वाराज्यसाम्राज्यसुखे संस्थापयत्यतः परमत्वं युक्तं नैष्कर्म्यसिद्धेस्तामेतां नैष्कर्म्यसिद्धिं ब्रह्मवेद्यतिः संन्यासेन निरन्तरब्रह्मनिष्ठासंभावितसम्यग्दर्शनेनैवाधिगच्छति नत्वन्येनेति सिद्धम् । यद्वा नैष्कर्म्यसिद्धिं नैष्कर्म्यं निर्विशेषब्रह्मभावस्तत्प्राप्तिर्नैष्कर्म्यसिद्धिस्तां संन्यासेनाहंकारं बलं दर्पमिति वक्ष्यमाणलक्षणेनाहमादित्यागेनाधिगच्छति । यद्वा 'स्वकर्मणा तमभ्यर्च्य' इति न्यायेन मुमुक्षोः सात्त्विकस्य सात्त्विकैर्बुद्धिश्रद्धादिभिर्युक्तस्य सात्त्विकेनैव कर्मणा वैदिकेनानेकजन्मभिः समाराधितपरमेश्वरानुग्रहात्समुपात्तसत्त्वशुद्धेस्ततः सकृदुपदेशमात्रेण संप्राप्तात्मतत्त्वविज्ञानस्य पण्डितस्य तु 'ते ह स्म पुत्रैषणायाश्च' इत्युक्तप्रकारेण सर्वकर्मसंन्यास एवाधिकारो न कथंचिदपि कर्मणीति बोधयितुमेवंलक्षणस्यैव संन्यासयोग्यत्वमित्यधिकारिलक्षणानि वदन् परिपक्वान्तःकरणस्य नैष्कर्म्यसिद्धिं प्रतिपादयति—**असक्तबुद्धिरिति** । असक्तबुद्धिः सर्वत्र पुत्रमित्रकलत्रधनादिष्वसक्ता सक्तिर्मोहादनुरक्तिस्तद्रहितत्वादसक्ता रागममतादिदोष-

निर्मुक्ता बुद्धिर्यस्य सोऽसक्तबुद्धिः। सर्वतः सम्यग्विरक्त इत्यर्थः। तात्कालिकवैराग्ये सत्यप्यस्थिरात्मनः पश्चाद्रागादयो विषयप्रवृत्तिस्तया पातित्यं च स्यादतस्तदभावेन भवितव्यमित्याह—**जितात्मेति**। जितो निर्जितस्तीव्रमुमुक्षया मुहुर्मुहुर्विषयदोषसंदर्शनेन तदुदिततीव्रवैराग्येण तेषु बन्धकत्वबुद्ध्या भयेन चासत्त्वज्ञानेन च सम्यग्विषयवैमुख्यं गमित आत्मा मनो यस्य स जितात्मा। वशीकृतचित्त इत्यर्थः। तीव्रमोक्षेच्छादिभिर्जितात्मत्वे सिद्धेऽपि औषधवदशनमाचरेदित्युक्तलक्षणाभावे देहसौख्यापेक्षावतो ज्ञानतत्फलासंभवात्संन्यासे नाधिकारोऽतस्तदभावेन भवितव्यमित्याह—**विगतस्पृह इति**। देहसौख्यात्परिग्रहसामीचीन्याद्विशिष्य गता स्पृहा आशा यस्य स विगतस्पृहः। देहभरणापेक्षारहित इत्यर्थः। एवंलक्षणलक्षितः शुद्धात्मा सद्गुरुप्रसादाद्विज्ञातात्मस्वरूपो मुमुक्षुर्विद्वान् नैष्कर्म्यसिद्धिं श्रौतस्मार्तादिसर्वकर्मभ्यो निर्गतो यः स निष्कर्मा तस्य भावो नैष्कर्म्यं विहितप्रतिषिद्धादिसर्वकर्मसंबन्धराहित्येनावस्थानं नैष्कर्म्यं कर्म तद्विध्योरविषयत्वं तस्य प्राप्तिर्नैष्कर्म्यसिद्धिस्तां परमां परमपुरुषार्थस्य मोक्षस्य हेतुभूतज्ञाननिष्ठासाधनत्वात् परमां नैष्कर्म्यसिद्धिम् संन्यासेन हि विहितानां कर्मणां ससाधनानां विधिना परित्यागः। संन्यासस्तेन संन्यासाश्रमेण यतिधर्मेणैव गच्छति। नतु ब्रह्मचर्याश्रमेण नापि गार्हस्थ्येन नापि च वानस्थ्येन नैष्कर्म्यं सिध्यति। अतो ब्रह्मविदो नैष्कर्म्यं संन्यासेनैव प्राप्तव्यमिति सिद्धम्॥ ४९॥

ज्ञानकर्मणोः साध्यसाधनभावं सूचयितुं सात्त्विककर्मानुष्ठानसंभाविता सत्त्वशुद्धिरुक्ता, ततः संप्राप्ततत्त्वविवेकज्ञानारूढस्य यतेर्विदेहकैवल्यसिद्धिकारणस्य ज्ञानस्याप्रतिबद्धत्वसिद्धये नियमेन क्रमेण कर्तव्यां ज्ञाननिष्ठां सप्रकारां ज्ञानफलं च निरूपयितुमाह—

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा॥ ५०॥

सिद्धिमिति। सत्त्वशुद्ध्या सम्यग्विदितात्मतत्त्वो मुमुक्षुरारूढः संन्यासेन सिद्धिं नैष्कर्म्यसिद्धिं प्राप्तः सन् यथा येन प्रकारेण तत्तत्साधनानुष्ठानपूर्वकज्ञाननिष्ठासिद्धिक्रमेण परिपक्वज्ञानेन ब्रह्माप्नोति ब्रह्मभावं गच्छति। विदुषो ब्रह्मप्राप्तिर्नाम संशयासंभावनाविपरीतभावनादिविकल्पराहित्येन सम्यगपरोक्षीकृते स्वात्मनि नित्यशुद्धबुद्धमुक्तसच्चिदानन्दैकरसे निर्विशेषेऽद्वितीये परे ब्रह्मणीदमेवाहमिति आत्मत्वबुद्धिकरणमेव यथारोपितदोषेण स्वमन्यथा गृहीत्वा देवदत्तस्तन्निवृत्त्या देवदत्त एवा-

हमिति स्वात्मनि स्वबुद्धिं करोति एवं स्वाज्ञानेन स्वं ब्रह्म विस्मृत्य गुरुप्रसादादवाप्तविज्ञानेन तन्निवृत्त्याऽस्वात्मनि ब्रह्मणि स्वबुद्धिं करोति, तत्र स्वबुद्धिकरणमेव विदुषो ब्रह्मप्राप्तिर्नतु धनवत्प्राप्तिरुच्यते। देशतः कालतः स्वरूपतश्च प्राप्तव्यस्य ब्रह्मणो व्यवधानाभावात्। 'अयमात्मा ब्रह्म' इति न्यायेनाप्तुर्विदुषः स्वरूपत्वान्नित्याप्तस्य वस्तुनः पुनराप्तिकल्पनायोगात्। अतो विस्मृतकण्ठाभरणस्यावमर्शनेनाऽस्तित्वावधारणं यथाप्राप्तिस्तथाऽज्ञानेनान्यथा गृहीते स्वात्मनि ब्रह्मणि विचारजन्यज्ञानेन पुनः स्वभावावधारणमेवाप्तिः। एवं ब्रह्मविद्यथा येन ब्रह्मनिष्ठासिद्धिप्रकारेण विशुद्धबुद्ध्या ब्रह्माप्नोति तथा तं ज्ञाननिष्ठासिद्धिप्रकारं समासेन संक्षेपेणैव नतु विस्तरेण। विशुद्धबुद्धेः सूक्ष्मग्राहिणो बहुगाथानुपयोगात् स्वल्पग्रन्थेन तं प्रकारं मे निबोध नितरां बुध्यस्व। बुध्वा तदनुष्ठानपरो भव। श्रुतेर्बोधस्य च फलमनुष्ठानमेव। अन्यथाऽऽपणवार्तावदुपदेशो निरर्थक इत्यर्थः। तत्खलु सम्यग्ज्ञानं विदेहमुक्तेः परमकारणम्। या परा निरतिशयपरिपाकलक्षणा निष्ठा परिसमाप्तिर्विकारनिर्मुक्ता निश्चला स्थितिः। कस्य निष्ठेत्यत आह—**ज्ञानस्येति**। 'न जायते म्रियते' इत्यारभ्य 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः'।—'प्रथितः पुरुषोत्तमः' इत्यन्तेन निर्विशेषविषयकेण ग्रन्थेन यादृश आत्मा निर्विशेषो नित्यशुद्धबुद्धमुक्तस्वभावः परः प्रत्यगेकरसोऽद्वितीयः सम्यङ्निरूपितस्तद्विषयं ज्ञानं यादृशं, यादृशज्ञानेनाहमेवेदं सर्वमिदं सर्वमहमिति ब्रह्मविद्यतिः सर्वात्मकं दृश्यसंबन्धरहितं चिदेकरसमाकाशवत्परिपूर्णमद्वितीयमात्मानं पश्यति, तादृशज्ञानसिद्ध्यै कार्या या परा निष्ठा सा येन प्रकारेण सिध्यति तं प्रकारं मत्तो निबोधेत्यर्थः। ननु मुमुक्षोरात्मज्ञानमेव न सिध्यति कुतस्तन्निष्ठा परा सिध्येत्कथं ज्ञानस्यासिद्धिरिति चेदुच्यते। यदाकारं ज्ञेयं तदाकारमेव भवति तज्ज्ञानं, नरश्चेत् ज्ञेयस्तज्ज्ञानं च नराकारमेव भवति, पशुश्चेत्पश्वाकारं नान्यथा। निराकारस्त्वात्मा। नह्यात्मन आकारोस्ति। 'न सत्तन्नासदुच्यते' इति दृश्यत्वनिषेधात्सदसद्विलक्षणस्य वस्तुतोऽप्रसिद्धत्वादनाकारत्वाच्च विषयत्वानुपपत्तेः। आकारवत्ता त्वात्मनस्तदा सिध्येद्यद्यात्मा युष्मत्प्रत्ययार्थः स्यात्। न ह्ययं युष्मत्प्रत्ययार्थो भवति 'अस्थूलमनण्वह्रस्वम्' इत्यात्मनः सर्वदृश्यवैलक्षण्यश्रवणात्। ननु 'तं देवा ज्योतिषां ज्योतिः' इति, 'अत्रायं पुरुषः स्वयंज्योतिः' इत्यात्मनो ज्योतिःस्वरूपत्वं श्रूयते कथमरूपत्वमिति चेन्न। 'अस्थूलम्' इति, 'यत्तदद्रेश्यम्'इति रूपवद्द्रव्यत्वनिषेधे सत्यरूपिद्रव्यत्वापत्त्या जडत्वापत्तौ सत्यां श्रुत्या तन्नि-

रस्यते प्रकाशस्वरूप आत्मेति नतु सूर्यादिवज्ज्योतिःस्वरूप आत्मेत्युच्यते। तथात्वे सत्यात्मनो भौतिकत्वज्ञेयत्वजडत्वानित्यत्वादिदोषः प्रसज्येत। सूर्यादिवदप्रयत्नेन विषयत्वं च स्यात्तदयुक्तम्। 'दिव्यो ह्यमूर्तः पुरुषः' इत्यमूर्तत्वश्रवणात्। 'न संदृशे तिष्ठति रूपमस्य' इति आत्मनो निर्विषयत्वमेव श्रूयते। विषयभूते हि वस्तुनि ज्ञानस्य तदात्मना परिणामो न त्वविषयभूते परिणामः संभवति। ननु 'स आत्मा स विज्ञेय' इत्यात्मा निर्विशेषः श्रूयते श्रुतार्थाकारेण ज्ञानस्य परिणाम उपपद्यत एवेति चेन्न। 'एष वन्ध्यासुतो याति' इत्यादिश्रुतार्थाकारज्ञानप्रसङ्गात्तादृशज्ञानस्य मनोराज्यवन्मिथ्यात्वोपपत्तेश्च। नहि श्रुतं श्रावितं वा मनसा भावितं वा वस्तु तद्विषयकं ज्ञानं च सत्यं भवति, प्रमाणान्तरेण च बाध्यते। यत एवमत आत्मविषयकं ज्ञानमेव न संभवति, तदसंभवे विदुषः कथं तन्निष्ठा सिध्यतीति चेन्न। प्रत्यक्षादिप्रमाणगम्यत्वादात्मसत्तायास्तज्ज्ञानासंभवासिद्धेः। कुत्रचित्प्रत्यक्षं प्रमाणं कुत्रचिदनुमानं कुत्रचिच्छास्त्रं कुत्रचिदर्थापत्तिः। आत्मविषये त्वेतत्सर्वं प्रमाणमेव भवति तदुच्यते। देहेन्द्रियादयोऽधिष्ठातृमन्तः स्वतो जडत्वे सति इष्टानिष्टप्रवृत्तिनिवृत्तिमत्त्वाद्यन्नैवं तन्नैवं यथा शकटः, तदधिष्ठातात्मा देहादिभ्यो भिन्नः नियामकत्वाद्रथिकवदित्याद्यनुमानेन 'नान्तःप्रज्ञं न बहिःप्रज्ञम्' इत्यादिशास्त्रेण चात्मावगन्तुं शक्यते पण्डितैः, यथा चाद्यैकादशीशिवरात्रिरिति शास्त्रेणोक्तमङ्गीकृत्योपोष्यते तथा विदुषा नान्तःप्रज्ञमित्यादिना 'प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा' इत्यन्तेन शास्त्रेण सकलदृश्यसंबन्धं निषिध्यार्पितं केवलमात्मतत्त्वं स्वात्मनावगन्तव्यम्, उभयोः शास्त्रप्रतिपाद्यत्वाविशेषात्। ननु नान्तःप्रज्ञमिति श्रुत्युक्तार्थस्य निर्विशेषत्वेनोपलब्ध्यभावाद्वन्ध्यापुत्रवदसत्त्वमेवेति चेदेकादश्या अपि विशेषाकारादर्शनात्स्वरूपेण तत्तुल्यत्वादननुष्ठेयत्वप्रसङ्गात्। तत उभयोरपि शास्त्रैकगम्यत्वं तदुक्तत्वेनाभ्युपगम्यत्वं च सममेव। नन्वेकादशीवदात्मसद्भावः शास्त्रेणाङ्गीक्रियत एवेति चेदत्र यथा निश्चयेन प्रवृत्तिस्तथा नाहं देहादिरिति निश्चयेनानात्मन्यहंभावं परित्यज्य ब्रह्मैवाहमिति तूष्णीं स्थीयतां न पुनर्विकल्प्यतामिदमेव प्रामाणिकस्य प्रमाणस्य च फलम्। नन्वस्माकं शास्त्रं प्रमाणमेव तथाप्यविषयत्वादात्मनस्तदनुभवाभावात्प्रवृत्त्यभाव इति चेत्तर्हि एकादश्याः प्रत्यक्षत्वं तदनुभूत्या प्रवृत्तिरित्यज्ञतमत्वं स्वीयं प्रकटितं पण्डितानां शुद्धबुद्धीनामेव मुमुक्षूणां मोक्षशास्त्रे तत्प्रतिपादितार्थे च विश्वासो दृढप्रत्ययः प्रवृत्तिश्च सहस्रकोटिजन्मार्जितपुण्यपुञ्जपरिपाकवशादीशप्रसादादेव सिध्यति नान्यथा युक्तिकोटिभिरशुद्धात्मनाम्। यदुक्तम-

विषयत्वादप्रसिद्धत्वाच्चात्मनस्तदनुभवाभावात्प्रवृत्त्यभाव इति । अत्रोच्यते—न तावदयमात्मा स्वयमेकादशीवदेकान्तेनाविषयः । अस्मत्प्रत्ययार्थत्वेन नित्यापरोक्षत्वात्प्रकाशस्वरूपत्वात्सर्गप्रकाशकत्वाच्च प्रत्यगात्मप्रसिद्धेः । नह्यात्मा यस्य कस्यचित्कदाचिदप्रसिद्धो भवति ज्ञातव्यः प्राप्तव्यो वा सत्यप्रसिद्धत्वे आत्मनो लौकिको वैदिकश्च व्यवहारस्तव न सिध्येत्, सर्वेषामात्मानमुद्दिश्यैवेष्टानिष्टयोः प्रवृत्तिर्निवृत्तिश्च दृश्यते, नत्वनात्मानं देहं प्राणं वा बुद्धिं वान्यं वा । मर्त्यः खल्वात्मसुखायैव देहस्यारोग्यमिच्छति बुद्धेः सौष्ठवमाहारस्योपशमं च प्राणनिरोधं योगं च करोति भार्यामुद्वहते देवान् यजते हरिं भजति । ततो देहादिविलक्षण आत्मा प्रसिद्ध एवास्मत्प्रत्ययार्थः । नहि नाहमस्मीति कदापि यस्यकस्यापि प्रत्ययोऽस्ति । स्वप्नमहमद्राक्षं, सुखमहमस्वाप्सं, अहं जागर्मीत्यवस्थात्रयेऽपि सर्वैरहमस्म्येवेत्यात्मसत्तायाः सदानुभूयमानत्वादात्मनो ज्ञेयत्वानुपपत्तेः सर्वदृश्यभिन्नत्वप्रसिद्धेश्च । नहि स्वमेकं साक्षादनुभवतः पण्डितस्य स्वसत्तासिद्धेः प्रमाणमपेक्ष्यते । सर्वेषां प्रमाणानां प्रामाण्यं यतः सिध्यति तं सर्वप्रमाणप्रामाण्यसिद्धिकारणं स्वप्रकाशमात्मानं किंनु प्रकाशयेत् । नह्यचेतनं चेतनं प्रकाशयति स्वसत्त्वं स्वस्यैव प्रत्यक्षं ततः प्रत्यक्षं प्रमाणम् । व्यवहारान्यथानुपपत्तिप्रसूतार्थापत्तिश्च प्रमाणम् । एवं प्रत्यक्षादिप्रमाणसिद्धस्यात्मनो वन्ध्यापुत्रवदसत्त्वं तज्ज्ञानस्य मनोराज्यवत्सगुणध्यानवन्मिथ्याविषयत्वं प्रमाणान्तरबाध्यत्वं च संभावयितुं न शक्यते । तथात्वे तव त्वज्ज्ञानस्य चाभावत्वप्रसङ्गात् । ततो ज्ञातृत्वेनास्मत्प्रत्ययार्थत्वेन सर्वव्यवहारकारणत्वेन परमप्रेमास्पदत्वेन च प्रसिद्धत्वादात्मा नायमत्यन्ताविषयो भवति । किंतु स्वच्छत्वान्निर्मलत्वात्सूक्ष्मत्वाच्च बुद्धिरात्मचैतन्यव्याप्त्या सूर्यप्रकाशव्याप्त्या स्फटिकः सूर्यवद्यथा तथात्मवदवभासते । तादृशबुद्धिव्याप्त्या मनआदिस्थूलान्तं सर्वमात्मवदवभासते । तेन देहेन्द्रियप्राणमनोबुद्ध्यादिष्वनात्मत्वमहमित्यात्मबुद्धिः सर्वेषां मनुष्योऽहं ब्राह्मणो यतिरिति द्रष्टा श्रोता काणः खञ्जोऽहमिति, क्षुधितः पिपासितोऽहमिति, कर्ता भोक्ताहं सुखी दुःखीत्येवमारोपितैरनात्मतत्प्रत्ययैः शैवालैर्जलमिव मेघपटलैश्चन्द्रवत्तिरोहिततया विस्पष्टं न प्रकाशते । शतधा श्रुत्वा मत्वाप्यनाद्यविद्यावासनया पण्डिता अपि बहिरन्तःपरिपूर्णमप्यात्मानमतिसूक्ष्ममतीन्द्रियमनवगाह्य जडमारोपितमेव स्थूलमनात्मानमात्मत्वेन गृह्णन्ति नत्वात्मानम् । ततोऽनाद्यविद्यारोपितानामन्तर्बुद्ध्या-

दीनां बहिर्घटपटादीनां तत्प्रत्ययानां च सर्वमिदमहं च ब्रह्मैवेति सर्वत्र प्रत्यग्दृष्ट्या ब्रह्मैकविषयया निरास एव कर्तव्यः। सन्ततब्रह्मप्रत्ययावृत्त्या विपरीतप्रत्ययानां निःशेषनिवृत्तौ सत्यां शैवालनिवृत्तौ स्वच्छं सुखकरं जलमिव मेघापाये पूर्ण आनन्दकरश्चन्द्र इव स्वच्छः शान्तश्चिद्घन आनन्दघन आत्मा ज्ञानचक्षुषः सम्यग्विषयो भवति। यत एवं ततः आत्मावरकानात्मप्रत्ययनिरसन एव प्रयत्नः कर्तव्यस्तीव्रमुमुक्षया विदुषा, नत्वात्मा कीदृशः किंलक्षणः कथं तिष्ठति कुत्रास्ते कथं प्राप्य इत्यात्मसद्भावे तत्प्राप्तिवेदने च। तस्याहमर्थत्वेन स्वतःसिद्धत्वान्नित्यप्राप्तत्वाच्च। कालदिगादेर्निराकारस्यापि च ज्ञानं शास्त्राचार्योपदेशाभ्यां सिध्यति अद्यैकादशीयं प्राचीति, किमुत स्वस्वरूपत्वेन सिद्धस्यात्मनो ज्ञानं शास्त्राचार्योपदेशेन सिध्यतीति। आत्मज्ञानेनैव हि स्वं च परं च विजानात्यहं ममेदमिति। यः स्वप्नमद्राक्षं यः सुखमस्वाप्सं सोऽहं जागर्मीत्यनुभूयमानस्य स्वस्य देहेन्द्रियादिभिन्नत्वं स्वप्ने सुषुप्तौ बुद्ध्यादिभिन्नत्वं ज्ञातृत्वं च सर्वत्र ज्ञात्वाप्यात्मा कस्तज्ज्ञानं कथमिति वक्तुं पण्डितस्य न युक्तम्। यस्य प्रकाशेनेदं सर्वं बहिरन्तर्विजानाति तज्ज्ञानं न सिध्यतीति वचनमतीव साहसम्, 'एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञः' इति क्षेत्रं क्षेत्रधर्मजातं च सर्वं यो विजानाति सोऽहमात्मेत्यात्मज्ञानं यतेः शुद्धात्मनः परमेश्वरप्रसादात्सुलभतममेव। यस्मादेवं तस्मादात्मा सुप्रसिद्धस्तज्ज्ञानमप्यात्मेश्वरप्रसादात्सुलभतममेवेति कृत्वा शुद्धात्मनो यतेः सद्गुरूपदेशात्संप्राप्तस्यैवात्मज्ञानस्यानात्मवासनाकृतविपरीतप्रत्ययनिःशेषनिवृत्त्या अप्रतिबद्धत्वसिद्धये मुमुक्षोर्ज्ञाननिष्ठा संपादनीयेत्युच्यते भगवता 'निष्ठा ज्ञानस्य या परा' इति। ननु मुमुक्षोर्ज्ञाननिष्ठा संपादनीयेत्युच्यते। ज्ञाननिष्ठा नाम ज्ञाने ज्ञानस्वरूपे ब्रह्मणि चित्तस्य नैश्चल्येन स्थितिर्वा किं ज्ञानाभ्याससमाप्तिर्वा। नाद्यः। चञ्चलत्वान्मनसो ब्रह्मणि स्थित्यसंभवात्। द्वितीये ज्ञानस्य ज्ञानहेतोर्वेदान्तशास्त्राभ्यासस्य परिसमाप्तिर्वा उत ज्ञानस्य प्रत्ययावृत्तेः परिसमाप्तिर्वा। नाद्यः। केवलग्रन्थस्य शुष्कतर्कवदावृत्त्या क्लेशं विना प्रयोजनादर्शनात्। न द्वितीयः। 'तत्त्वमसि' इति तत्त्वंपदार्थशोधनपूर्वकं वाक्यार्थश्रवणमात्रेणैवाहं ब्रह्मास्मीति विदुषो ब्रह्मात्मप्रत्यये संपद्यमाने पुनः पुनस्तदावृत्तेः फलादर्शनात्। 'अहं ब्रह्मास्मि' इति संपन्नज्ञानस्यैव ब्रह्मात्मप्रत्ययस्य दार्ढ्याय पुनःपुनरावृत्तिः कर्तव्येति चेन्न। पट्टाभिषेकेणैव संप्राप्तराजत्वस्य नृपतेः पुनः पुनः राजाहमित्यावृत्तिवच्छ्रुतियुक्तिभिः सम्यक्शोधितयोस्तत्त्वंपदा-

र्थयोरेकत्वावबोधकवाक्यार्थश्रवणमात्रेणाहं ब्रह्मैवेति ब्रह्मात्मभावापन्नस्य यतेः पुनःपुनर्ब्रह्मैवाहमिति प्रत्ययावृत्त्या पुनरुपाधिकृतपरिच्छित्तिं विना फलान्तरादर्शनादराज्ञ आवृत्तिक्रियया राजत्वमिव अब्रह्मणो ब्रह्मत्वमावृत्तिक्रियया कल्प्यं च स्यात् । घटोऽयमित्युपदेशमात्रेण घटविषयकं ज्ञानं झटिति यथा जायते तथैव तत्त्वमसीत्युपदेशमात्रेणाहंब्रह्मेति ब्रह्मात्मत्वापादकं ज्ञानं शुद्धात्मनो जायत एव, नात्र पुनःपुनः प्रत्ययावृत्तिरपेक्ष्यते । नहि चक्षुःसंनिकर्षमात्रेण घटज्ञाने जाते घटोऽयं घटोऽयमिति तज्ज्ञानदार्ढ्याय मुहुर्मुहुरावृत्तिरपेक्षिता भवति । प्रमाणप्रमेयसंबन्धमात्रैकसाध्यत्वात्प्रमायाः नत्वावृत्तिसाध्यत्वमस्ति । वस्तुतन्त्रत्वाज्ज्ञानस्य न पुरुषतन्त्रत्वम् । अतो ज्ञानाभ्यासो निष्प्रयोजन एवेति चेत्सत्यम् । प्रमाणप्रमेयसंबन्धमात्रजन्यमेव ज्ञानं वस्तुतन्त्रं नतु पुरुषतन्त्रं नापि क्रियातन्त्रम् तथापि स्वोत्पत्तौ प्रमाणसौष्ठवमपेक्षते । वास्तवमपि ज्ञानं सति प्रमाणसौष्ठवे समीचीनं जायते न त्वसौष्ठवे । यथा चक्षुषः काचकामलादिदोषेण तैमिरिकत्वे चन्द्रानेकत्वज्ञानमवास्तवमेव जायते । वस्तुनो विस्पष्टत्वेऽपि तस्यैव निरन्तरौषधसेवया तद्दोषनिवृत्त्या निर्मलत्वे सिद्धे वास्तवमेव चान्द्रं ज्ञानं विस्पष्टं तद्दर्शनाह्लादश्च सिध्यति । तथैवानाद्यविद्यावासनाकृतैः सत्त्वरजस्तमोदोषैर्दूषिते सत्यन्तःकरणे समुत्पद्यमानैरहमिदमद इत्याद्यनात्मप्रत्ययैर्व्यवधीयमानमात्मतत्त्वं न विस्पष्टं भाति । तस्यैवान्तःकरणस्य चिरकालनित्यनिरन्तरसमनुष्ठितसमाधियोगेन सजातीयप्रत्ययावृत्तिलक्षणेन निरुक्तदोषाणां तत्कार्याणां च निःशेषनिवृत्त्या केवलशुद्धसत्त्वभावापत्तौ सर्वमिदमहं च ब्रह्मैवेत्यद्वैतात्मविज्ञानं सर्वदृश्यसंबन्धनिर्मुक्तमप्रतिबद्धं च जायते । ततो ज्ञानपरिपाकैकप्रयोजनत्वात्प्रत्ययावृत्तेः । सत्यामेव ज्ञानपरिपाकसिद्धौ उक्तलक्षणं सम्यग्ज्ञानं कैवल्यपदावसानकमखण्डानन्दानुभावकं च सिध्यति । तथाच श्रुतिः—'समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत्' इति, 'आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः' इति, 'अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः' इति च, 'नास्ति ज्ञानात्परं किंचित्पवित्रं पापनाशनम् । तदभ्यासादृते नास्ति संसारोच्छेदकारणम्' इति । ज्ञानस्य परिपाको नाम चिरकालनित्यनिरन्तरसमभ्यस्यमानसजातीयप्रत्ययावृत्त्या सम्यग्ज्ञानोत्पत्तिप्रतिबन्धकानां सत्त्वरजस्तमोगुणानां तत्कार्याणां चाहमिदमद इष्टमनिष्टमित्यादिविपरीतप्रत्ययानां रागद्वेषमोहादिविकाराणां च निःशेषनिवृत्त्या समुत्पद्यमानोऽन्तःकरणस्य केवलशुद्धसत्त्वभाव एव प्रसा-

दलक्षणाः । यस्मिन्सति सर्वमिदमहं च ब्रह्मैवेति स्वस्मिन्सर्वत्र ब्रह्मत्वधीव्यवस्थापकं परावरैकत्वविज्ञानं विकल्पनिर्मुक्तं वृत्तिव्यापारसमाप्तिलक्षणं संभवति । तदेतज्ज्ञानं नित्यनिरन्तरसजातीयप्रत्ययावृत्त्येकगम्यं नत्वयं घट इतिवत्सकृदुपदेशमात्रगम्यं, नापि राजत्वज्ञानवत्पट्टबन्धक्रियामात्रगम्यं च भवति, तत्र ज्ञेयस्य स्थूलत्वेन तज्ज्ञानस्यापि स्थूलत्वान्निष्प्रतियौगिकत्वाल्लौकिकत्वाच्च प्रत्ययावृत्तिर्नापेक्ष्यते । 'सूक्ष्मात्सूक्ष्मतरं नित्यम्' इति, 'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्' इति श्रवणादत्र तु ज्ञेयं वस्तु परमसूक्ष्ममलौकिकं शैवालपटलैर्जलवदविद्यातत्कार्यैस्तिरोहितं भवति । ततस्तज्ज्ञानं चक्षुः सूर्यालोकमिव स्वविषयावरकवारणं सत्प्रत्ययावृत्तिलक्षणमपेक्षते । नैतेन ब्रह्मभावः कल्पितो भवति । नाहं मनुष्य इत्यत्रात्मनो मनुष्यत्वमपोह्यते नत्वहमर्थत्वं कल्प्यते । नापि ब्रह्मभावः कल्प्यते अहमर्थत्वस्य स्वतःसिद्धत्वात् 'अयमात्मा ब्रह्म' इति, 'क्षेत्रज्ञं चापि मां विद्धि' इति ब्रह्मभावस्य श्रुतिस्मृतिप्रसिद्धत्वात् सति तयोर्भेदे कथमद्वैतं सिध्येत् । 'एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचन', 'एको रुद्रो न द्वितीयाय तस्थुः' इत्यादिश्रुतिभिरद्वैतमेव प्रतिपाद्यते । ततस्तयोर्घटाकाशमहाकाशयोरिव ब्रह्मात्मनोरभिन्नत्वं स्वतःसिद्धं नतु क्रियया कल्पयितुं शक्यं, किंतु सत्प्रत्यययावृत्त्यानादिवासनया प्रतीयमानविपरीतप्रत्ययापनोदनमात्रमेव क्रियते ब्रह्मविदा स्वस्य पूर्णत्वज्ञानदार्ढ्याय, यथा स्थूलमपि रत्नज्ञानं स्वदार्ढ्यार्थं नित्यपरिशीलनमपेक्षते, यथा रविबिम्बज्ञानं स्थूलमपि सर्वेषामपरोक्षत्वाय चिरकालनित्यनिरन्तराभ्यासमपेक्षते, तथैव ब्रह्माभिन्नत्वज्ञानमतिसूक्ष्मं सप्रतिपक्षं च किमुत स्वस्याप्रतिबद्धत्वसिद्धये सत्प्रत्ययावृत्तिमपेक्षत इति 'तस्याभिध्यानाद्योजनात्तत्त्वभावात्' इति, 'तस्याभिध्यानात्तृतीयं देहभेदं' इति, 'निष्कलं ध्यायमानः' इति, 'ध्यात्वा मुनिर्गच्छति भूतयोनिम्' इत्यादिश्रुतिभिरुत्पन्नात्मज्ञानस्याप्रतिबद्धत्वसिद्धये सजातीयप्रत्ययावृत्तिलक्षणः समाधिः कर्तव्यत्वेन श्राव्यते । 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति । यत एवमतः सार्वात्म्यसिद्धये द्वैतप्रत्ययापनोदकः सत्प्रत्ययावृत्तिलक्षणो ज्ञानाभ्यासः कृतश्रवणस्य विदितात्मतत्त्वस्य मुमुक्षोर्यतेः सहकारिसाधनैस्तद्बुद्धित्वादिभिरद्वेष्टृत्वादिभिश्च वक्ष्यमाणैश्च संपन्नस्यावश्यं कर्तव्य इति षष्ठाध्याये निरूपितमेवार्थं पुनर्दृढयितुमुच्यते भगवता 'निबोध मे । समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा' इति । यदुक्तं ज्ञानहेतोर्वेदान्तशास्त्रस्यावृत्त्या शुष्कतर्कवत् क्लेशं विना प्रयोजनाभावादिति । तन्न । वेदान्तावृत्त्येकलभ्यत्वादात्मज्ञानस्य तदावृत्तेः

सफलत्वोपपत्तेः। नहि मुमुक्षोर्यतेः स्तोत्रमन्त्रजपादिभिर्ज्ञानं सिध्यति विनाजस्रवेदान्तविचारेण 'संन्यस्य श्रवणं कुर्यात्' इति 'श्रोतव्यो मन्तव्य' इत्युपनिषदमावर्तयेदिति निरन्तरविचारस्यैव कर्तव्यत्वश्रवणात् 'आवृत्तिरसकृदुपदेशात्' इति, 'शमादिसहितस्तावदभ्यसेच्छ्रवणादिकम्' इति, 'आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया' इति, 'तत्त्यागी पतितो भवेत्' इति विचारस्य नियमेन कर्तव्यत्वं तत्त्यागे प्रत्यवायश्च स्मर्यते। ततः प्रणवजपादिकमङ्गं कृत्वा विचारमङ्गिनं कृत्वा यावत्सम्यगात्मविज्ञानं नोदेति तावदजस्रं वेदान्तावृत्त्यैव नियमेन भवितव्यम्। तदेकप्रयोजनं स्यात्संन्यासस्य। यदा ज्ञानं विज्ञानं च सिद्ध्यति तदाऽवृत्तिस्त्यक्तव्या। तथा च 'ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः। पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः' इत्यतो जिज्ञासोर्निरन्तरावृत्तिः कर्तव्येति सिद्धम्। यदपि चोक्तं चञ्चलत्वान्मनसो ज्ञानस्वरूपे ब्रह्मणि स्थित्यसंभवादिति। तन्न। तदेकसाध्यत्वादात्मयाथात्म्यावधृतेर्निश्चलबुद्धिवृत्तेः। सम्यग्विषयभूतस्यैव मण्यादेः स्वरूपावधारणा दृश्यते नतु चञ्चलवृत्तेर्विषयभूतस्य, तद्वत्समाहितबुद्ध्या सम्यग्विषयीकृतस्यैव ब्रह्मणो याथात्म्यावधारणं तत्रात्मत्वबुद्धिकरणं तत्फलं च सिध्यति नान्यथा। अतो मनसः स्थैर्यं समाधिना प्रयत्नेन संपादनीयं मुमुक्षोर्विज्ञाततत्त्वस्य यतेः 'समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति' इति समाहितबुद्धेरेवात्मयाथात्म्यवेदनं तत्रात्मत्वबुद्धिकरणं सार्वात्म्यदर्शनं च श्रूयते यतस्ततः केवलश्रुतिमात्रेण यतेरात्मन्येवात्मत्वसिद्धिः सार्वात्म्यसिद्धिश्च न सिध्यति, ततस्तदर्थैवैषा कृतश्रवणस्य ज्ञाननिष्ठोच्यते सर्वज्ञेनेश्वरेण 'निष्ठा ज्ञानस्य' इति ॥ ५० ॥

तत्तन्नियतसाधनानुष्ठानपूर्वकं निष्ठां कुर्वतो ब्रह्मविदो ब्रह्मप्राप्तिमाह—

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥

बुद्ध्येति त्रिभिः। बुद्धिरध्यवसायात्मिका। अध्यवसायस्तु 'सत्यं ज्ञानमनन्तं ब्रह्म', 'अयमात्मा ब्रह्म' इति न्यायेन ब्रह्मणः सत्यज्ञानानन्दरूपत्वनिश्चयः आत्मनो ब्रह्माभिन्नत्वनिश्चयः 'विकल्पो नहि वस्तु' इति न्यायेन प्रत्यगभिन्ने परे ब्रह्मणि मरौ जलवद्व्योम्नि नैल्यमदेहादिसर्वदृश्यप्रपञ्चस्य कल्पितत्वनिश्चयः। एवंलक्षणाध्यवसायवती बुद्धिरत्र विवक्षिता। स्वात्मनि ब्रह्मण्यारोपितानात्मप्रत्ययनिरसने प्रवृत्तत्वाद्विदुषः। सा च विशुद्धा श्रुतियुक्तिभिर्निश्चितार्थतया संशयविपर्ययनिर्मुक्ता, तया विशुद्धया बुद्ध्या युक्तः सम्यगविनाभूतः सन् ब्रह्मनिष्ठायां प्रवृत्तो ब्रह्म-

विद्यतिर्धृत्या सात्त्विक्योक्तयात्मानं चित्तं बहिःप्रवृत्तेर्नियम्य चित्तस्य बहिःप्रावण्यं निरुध्य, चकारात्प्राणेन्द्रियक्रियाः सर्वाः सम्यङ्नियम्य शब्दादीन् शब्दस्पर्शरूपादीन् विषयान् त्यक्त्वा। विषयानुसंधानमकृत्वेत्यर्थः। यद्यपि बहिरन्तःकरणनिरोधे कृते सति विदुषः स्वतो विषयसंबन्धो न संभवति तथाप्यवशात्प्राप्तानामप्यनुसंधानं न करोतीत्यर्थः । रागद्वेषौ व्युदस्य च भिक्षाकालेऽपि प्राप्तेष्वर्थेष्विष्टेषु रागमनिष्टेषु द्वेषं च व्युदस्य परित्यज्येत्यर्थः । यद्वा व्युत्थानदशायां दृष्टेषु श्रोत्रियेषु हितकारिषु साधुषु वा रागस्तद्विपरीतेषु द्वेषस्तावुभौ व्युदस्य । चकारात्समाधिविघ्नकारणं मोहमालस्यं जाड्यं प्रमादं च परित्यज्येत्यर्थः ॥ ५१ ॥

किंच—

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥

विविक्तसेवीति । विविक्तसेवी विविक्तान् विजनानेव देशानरण्यनदीपुलिनगिरिकंदरगुहादीन् चित्तप्रसादतदेकाग्रतासिद्ध्यर्थं सेवितुं शीलमस्यास्तीति विविक्तसेवी सर्वदा भवेन्निदिध्यासुर्यतिः । तथा लघ्वाशी च स्याल्लघु यथा तथाशितुं शीलमस्यास्तीति लघ्वाशी । लघ्वशनशीलस्यैव नैश्चल्येन समाधिनिष्ठासंभवात्। यद्वा लघु गुरुत्वरहितद्रव्यमश्नीयादिति लघ्वाशी। लघुपदं हितमितमेध्यानामप्युपलक्षणम्। तेन लघु हितं मितं मेध्यं चान्नमश्नीयान्निदिध्यासुर्यतिरिति सिद्धम्। यतवाक्कायमानसश्च भवेत् । यतानि संयतानि सम्यङ् निरुद्धानि बाह्यप्रवृत्तेः सम्यग्विमुखीकृतानि वाक्कायमानसानि येन स यतवाक्कायमानसः । विषयचिन्तनेन मनः स्थूलमेव भवति नतु तनुत्वं गच्छति, वासना च प्रवर्धते, मनोनाशाय वासनाक्षयाय क्रियमाणः समाधिर्गजस्नानवन्निष्फल एव भवति । ततः सदा विषयचिन्ताराहित्येन भवितव्यम् । तथा वाक्प्रवृत्त्या त्वमहमिदमद इत्यादिविपरीतप्रत्यया न विनश्यन्ति, द्वैतमेव प्रवर्धते रोगिणोऽपथ्येन रोगवृद्धिवत्। ततः सदा मौनेन भवितव्यम्। कायेन कर्मसु प्रवृत्त्या कर्तृतादात्म्यं कर्मवासना स समाधिकाले कायचलनेन मनसश्चेन्द्रियाणां च चलनं समाधिविघ्नश्च भवति यतस्ततो वासनाक्षयाय मनोनाशाय च प्रवृत्तस्य यतेर्विषयाननुसंधानेन मौनेन नैष्कर्म्येण च सर्वदा भवितव्यमित्युच्यते यतवाक्कायमानस इति । एतत्सिद्धये हेतुमाह—**वैराग्यमिति** । दृश्ये मिथ्यात्वबुद्ध्या तुच्छत्वबुद्ध्या च भोक्तुमनुसंधातुं च विषयेभ्यो निगतो निर्गतो राग इच्छा यस्य स विरागस्तस्य

भावो वैराग्यं सर्वत्रेच्छाराहित्यं नित्यमविच्छिन्नं समुपाश्रितः सन्। एवं शुद्धबुद्धित्वादिसाधनयुक्तो ब्रह्मविद्यतिर्नित्यं निरन्तरम्। नित्यमिति विशेषणं देहलीदीपन्यायेनोभयत्र संबध्यते। नित्यपदं निदिध्यासोरनुष्ठानान्तराभावसूचनार्थम्। ततः सर्वदा ध्यानयोगपरः ध्यानं च योगश्च ध्यानयोगौ तत्र परो ध्यानयोगपरः। प्रत्यगभिन्ने सच्चिदानन्दैकरसे निर्विशेषेऽद्वितीये परे ब्रह्मण्यधिष्ठाने आरोपितनामरूपादिविजातीयप्रत्ययतिरस्कारपूर्वकं बहिरन्तः सर्वत्र ब्रह्ममात्रैकविषयाणां सत्प्रत्ययानां प्रत्यग्भावापन्नया वृत्त्या निरन्तरतैलधारावदविच्छिन्नया यत्प्रवाहीकरणं तद्ध्यानम्। विजातीयप्रत्ययानन्तरितानां केवलसत्प्रत्ययानामेव चिरकालनित्यनिरन्तराभ्यासवशाद्विक्षेपकाणां वासनानां संक्षये सति तनुतां गताया बुद्धिवृत्तेर्ब्रह्मणि ब्रह्माकारेण निवातस्थलदीपवद्यो निश्चलीभावः स एव योगस्तयोर्ध्यानयोगयोरुक्तलक्षणयोर्नित्यं परः सन् तद्ध्यानयोगनिष्ठासंपन्न एव यतिः परिपक्वज्ञानो भवतीत्यर्थः॥ ५२॥

एवं बहुकालं निरन्तरसमाधिनिष्ठामेव कुर्वतो ब्रह्मविद्यतेः समाध्यग्निनिर्दग्धाशेषवासनाग्रन्थेर्निःशेषनिवृत्तविपरीतभावस्य सम्यक्परिपक्वविज्ञानसिद्धेः फलमाह—

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम्।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते॥ ५३॥

अहंकारमिति। चिरकालनित्यनिरन्तरसमनुष्ठितसमाधिनिष्पन्नसम्यग्ज्ञानेन देहादिद्वैतप्रपञ्चस्य स्वव्यतिरिक्तत्वाभासत्वात्सत्त्वधीपूर्वकमधिष्ठाने स्वात्मनि ब्रह्मणीदमेवाहमस्मीति स्वात्मना विदिते ब्रह्मण्येवात्मत्ववासनादार्ढ्यादनात्मनि देहादावहंकारमहंकरणमनात्मन्यहमिति बुद्धिं विमुञ्चति ब्रह्मविद्यतिः। नह्यज्ञवदात्मतत्त्वज्ञः सर्वाधिष्ठानं नित्यं शुद्धं बुद्धं मुक्तं चिदेकरसं परिपूर्णं परं ब्रह्म स्वस्वरूपत्वेन विज्ञायारोपितमसत्तुच्छमहमित्यवलम्बते किंतु प्रतिच्छायावदाभासरूपेण प्रतीयमानेऽप्यस्मिन् देहेऽहंभावं परित्यजति। तत्रात्मत्वधीहेतोरज्ञानस्याधिष्ठानयाथात्म्यसंदर्शनेन विनष्टत्वात्ततः 'कारणनाशात्कार्यनाशः' इति न्यायेन ब्रह्मवित्तत्राहंभावं न करोतीत्यर्थः। किंच बलं त्वमहमिदमद इत्यारोपितपदार्थग्रहणकारणं अविद्यावासनाकृतं वृत्तिवेगलक्षणं विमुञ्चति। नित्यनिरन्तरसमाधिनिष्ठयानाद्यविद्यावासनासंक्षये सति तत्कृतं बलं वेगलक्षणमन्तःकरणस्थं परित्यजति। पूर्वं वासनाबलादन्तःकरणं परिपूर्णमपि ब्रह्मस्वरूपमतिक्रम्य यथाप्रपञ्चं गृह्णाति, तथा समाधिना वासनासंक्षयात् विशिष्य

नामरूपादिग्रहणं न करोति किंत्वाभासप्रपञ्चं त्यक्त्वा सर्वत्र ब्रह्मैव पश्यति । व्युत्थानाव्युत्थानयोः सर्वदा ब्रह्मण्येव तिष्ठतीत्यर्थः । एतेन विदुषस्त्वहमिति भावेनेदमितिवासनाद्यभावः सूचितः । दर्पं च कृतार्थोऽहमिति ब्रह्मविदहमित्यभिनिवेशलक्षणोऽन्तःकरणविकारो दर्पस्तं च विमुञ्चति । स्वकारणेऽज्ञानेऽहंकारे च समाधिना विनष्टे सति 'कारणनाशात्कार्यनाशः' इति न्यायेन स्वयमेव दर्पो विनश्यतीत्यर्थः । तथैव कामं क्रोधं च विमुञ्चति । संप्राप्तपदार्थभोगेच्छा कामः, स्वापकारिणं हन्तुमुद्योगः क्रोधस्तौ परित्यजति । स्वकारणस्य रजसः समाधिना निर्मूलितत्वाद्विनिर्मलान्तःकरणतया सम्यगप्रतिबद्धात्मविज्ञानेन अहमेवेदं सर्वमिति सर्वात्मभावं प्राप्तस्याहं भोक्तेदं भोग्यमिति अयं हन्ताहं हन्य इति विपरीतभावनाभावात्स्वमात्रत्वात्सर्वत्र रागद्वेषयोरनवकाशापत्तौ 'निमित्तापाये नैमित्तिकस्याप्यपायः, इति न्यायेन कामक्रोधौ स्वयमेव विनाशं प्राप्तावित्यर्थः । तत एव परिग्रहं शरीररक्षणार्थत्वेन प्राप्तो यः परिग्रहः कौपीनकाषायकन्थादिस्तं चापि विमुञ्चति । एवमहंकारं बलं दर्पं कामं क्रोधं परिग्रहं च यद्यद्बहिरन्तश्च विकल्पकारणं तत्सर्वं विमुच्य, 'न दण्डं न कमण्डलुं न शिखां न यज्ञोपवीतं नाच्छादनं चरति परमहंसः' इत्युक्तरीत्या देहमात्रावशिष्टः परमहंसो भूत्वा । ननु शरीरस्थितिहेतोः काषायकन्थादेः परित्यागे शीतवातादिभिर्विकल्प एव संभवति कथं निर्विकल्पत्वं ब्रह्मविदुत्तमस्य परमहंसस्येत्याशङ्क्य । न । देहादावहंममेत्यभिमानवत एव शीतादिकृतविक्षेपो ननु निरभिमानस्येति तदसंभवे हेतुमाह—**निर्मम इति** । स्वकारणस्याहंकारस्य विनष्टत्वान्निःशेषेण गतो निर्गतो देहे ममभावो यस्य स निर्ममः । परदेह इव स्वदेहे ममतारहित इत्यर्थः । 'स्ववपुः कुणपमिव दृश्यते यतस्तद्वपुरपध्वस्तम्' इति श्रवणाद्ब्रह्मण्येवात्मत्वप्रत्ययवता महात्मना ब्रह्मविदानात्मत्वेन त्यक्ते शवकल्पे शरीरे त्वहंभावो ममभावश्च न क्रियते । तन्निमित्तकत्वात्सर्वविकल्पस्य, विदुषस्तदभावात्तदभाव इति सूचयितुमेव निर्मम इत्युक्तम् । यत एवं चिरकालनित्यनिरन्तरसमाधियोगनिर्धूताहंकारममकाराद्यविद्यावासनाप्रपञ्चो यो ब्रह्मवित्यतिः स सर्वेभ्यो गुहाग्रन्थिभ्यो विमुक्तो भवति । तत एव शान्तः निरिन्धनाग्निवदुपशान्तान्तःकरणसर्वविकारस्तत एव प्रसन्नान्तःकरणतया संप्राप्तात्मयाथात्म्यविज्ञानो ब्रह्मभूयाय ब्रह्मभावाय ब्रह्मभावो नाम सच्चिदानन्दैकरसब्रह्मात्मनावस्थानं तस्मै कल्पते ब्रह्माकारेण तिष्ठतीत्यर्थः । एतेनात्यन्तश्रद्धया चिरकालं नित्यं निरन्तरं समाधिनिष्ठामेवैकां नियमेन समनुतिष्ठतस्तन्निष्ठयाहमादिसर्ववासनाग्र-

न्थिविच्छित्तिं सम्यक्कृतवतस्तद्विच्छित्त्या सम्यगात्मप्रसादं लब्धवतस्त-ल्लब्ध्वा संसिद्धात्मयाथात्म्यविज्ञानेनाहमेवेदं सर्वमिति सर्वमात्मानमेव पश्यतो ब्रह्मविदो ब्रह्मभावः सिध्यतीति सूचितम् ॥ ५३ ॥

एवं विशुद्धबुद्धित्वादिसहकारिसाधनसंपत्त्या समनुष्ठितध्यानयोगनिष्ठासमुत्पन्नसम्यग्ज्ञानेन ब्रह्मभावं गतवतो महात्मनो जीवन्मुक्तस्य कृतार्थस्य यतेः स्थितिमाह श्लोकार्धेन—

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४ ॥

ब्रह्मभूत इति । निरुक्तसाधनसंपत्त्या समनुष्ठितसमाधिनिष्ठाविध्वस्तरजस्तमस्तत्कार्यरागद्वेषाद्यहंकारममकाराद्यशेषमलतया प्रसन्नः केवलशुद्धसत्त्वभावापन्नः सर्वत्र ब्रह्ममात्रग्रहणेन प्रशान्तो विपरीतप्रत्ययनिर्मुक्त आत्मान्तःकरणं यस्य स प्रसन्नात्मा समाधिनिष्ठापरिपक्वविज्ञानस्तत एव दृश्यसंबन्धं परित्यज्य ब्रह्मभूतः सद्घनं चिद्घनमानन्दघनं यत्परं ब्रह्म एतदेवाहमिति तद्भावं गतो जीवन्मुक्तो ब्रह्मवित्तमो न शोचति शोकं न करोति शोकहेतोरनर्थस्याभावात् । लोके यं कंचनानर्थमात्मनो दृष्ट्वा मूढः शोचति । तदभावान्नायं शोचति । नहि सर्वं स्वमेव पश्यतो विदुषः संभवत्यर्थान्तरमनर्थाय यद्दृष्ट्वाऽयं शोचेत् । 'द्वितीयाद्वै भयं भवति' इति द्वैतस्यैव भयहेतुत्वं श्रूयते । दृश्यते च स्वव्यतिरिक्तस्यैव भयकारणत्वं दुःखकारणत्वं च । ततः स्वयमेव सर्वत्र चिदेकरसं प्रशान्तं वृद्धिक्षयादिवर्जितमानन्दघनमद्वितीयं च पश्यतोऽनर्थहेतोरन्यस्यादर्शनाद्ब्रह्मवित्तमः शोकनिमित्ताभावान्न शोचतीत्यर्थः । नन्वाभासरूपेण विदुषोऽप्युपाधिरस्त्येव तद्वैकल्यवैगुण्ययोः शोकनिमित्तयोः संभवात्कथं विद्वान्न शोचतीति चेन्न । देहे ममताभावस्य प्रतिपादितत्वाद्देहे ह्यहंममेत्यभिमानवत एव तद्वैकल्यवैगुण्ययोः शोकः संभवति । किंतु ब्रह्मैवाहं नतु देह इति निरभिमानस्य सर्वात्मन्येव तयोरविषये ब्रह्मण्यात्मभावापत्त्या तदात्मना निरूढवृत्तेर्विदुषः प्रतिच्छायावदुपाधेरसत्त्वात्तन्निमित्तकः शोको न संभवति । तथाच श्रुतिः 'किमिच्छन्कस्य कामाय' इति, 'मत्वा धीरो हर्षशोकौ जहाति' इति, 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति च । न काङ्क्षति च निरुक्तलक्षणो ब्रह्मविद्यतिर्न किंचिदर्थान्तरं कामयते । सर्वो ह्यप्राप्तमर्थं कामयते न तथास्य ब्रह्मविदः प्राप्तव्यमर्थान्तरमस्ति यत्कामयेत ममेदं भूयादिति । 'अहमन्नमहमन्नमहमन्नमहमन्नादोऽहमन्नादोऽहमन्नादः' इति, 'अहं मनुरभवं सूर्यश्च' इति न्यायेन स्वस्यैव भोक्तृभोग्यात्मनावस्थितत्वात्स्व-

व्यतिरिक्तवस्त्वन्तराभावाच्च । अहमेवेदं सर्वमिति सर्वात्मभावापत्त्या सर्वस्यापि वस्तुनः स्वात्मत्वेन प्राप्तत्वाच्च कामनैव न संभवति तत एव न काङ्क्षति । 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता' इति ब्रह्मभावापन्नस्य यतेः सर्वकामाप्तिश्रवणादवाप्तसर्वकामस्य कामयितृत्वासंभवात्कामं क्रोधमिति कामस्य परित्यक्तत्वाच्च ब्रह्मवित्कदाचित्कचित्किंचिदपि न काङ्क्षतीत्यर्थः । ज्ञानस्य सम्यक्त्वसिद्धये विशुद्धबुद्धित्वादिसाधनसंपत्त्या ज्ञाननिष्ठां कुर्वतोऽतत्त्यागपूर्विका ब्रह्मप्राप्तिरेव सूचिता न तु निष्ठया संप्राप्तज्ञानस्वरूपं । तेन वस्तुतत्त्वनिर्धारणप्रकारो निर्धारितवस्तुप्राप्तिश्च जिज्ञासोर्विज्ञातव्यं । तदेतत्सर्वं संक्षेपेण प्रतिपादयति सार्धेन—**सम इति** । विशुद्धबुद्धित्वादिभिस्तद्बुद्धित्वादिभिश्च ज्ञाननिष्ठासहकारिसाधनैः सम्यक्संपन्नः समदर्शनपरः सम्यग्ज्ञानसिद्ध्यै ज्ञाननिष्ठायां प्रवृत्तो ब्रह्मविद्यतिः । 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्' इति, 'सर्वभूतेषु येनैकम्' इत्युक्तप्रकारेण भूतेष्वाकाशादिस्थूलान्तेषु भूतकार्येषु च ब्रह्मादिस्तम्बान्तशरीरेषु सर्वेषु सर्वत्र परां ज्ञाननिष्ठापरिपाकजन्यत्वात्संशयविपर्ययादिदोषनिर्मुक्तत्वादप्रतिबद्धत्वात्परमार्थबोधकत्वाच्च परा प्रकृष्टा तां परां मद्भक्तिं विषयाकारं भजतीति भक्तिर्ज्ञानं निष्ठापरिपाकजं मम सर्वभूतात्मभूतस्य निर्विशेषस्यापरिच्छिन्नस्य सर्वोपाधिविनिर्मुक्तस्य चिदेकरसस्य परस्य ब्रह्मणो भक्तिर्मद्भक्तिस्तां लभते । नित्यनिरन्तरसमाधिनिष्ठयान्तःकरणस्य शुद्धसत्त्वभावापत्तौ सर्वत्र मत्स्वरूपमात्रग्राहकमद्वैतविषयं ज्ञानं ब्रह्मवित्प्राप्नोतीत्यर्थः ॥ ५४ ॥

एवं चिरकालं नित्यनिरन्तरसमभ्यस्तज्ञानयोगेन विपरीतप्रत्ययहेतूनामनाद्यविद्यावासनानां तत्कार्याणां च विपरीतप्रत्ययानां निःशेषसंक्षये सति विकल्पं सर्वं परित्यज्य सर्वत्र समदर्शनलक्षणं ज्ञानं प्राप्तवतो ब्रह्मविद्यतेस्तज्ज्ञानोत्पन्नं वस्तुतत्त्वनिश्चयं प्रतिपादयंस्तादृङ्निश्चयवतो ब्रह्मप्राप्तिं दर्शयति—

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ५५ ॥

भक्त्येति । भक्त्या बहिरन्तः सर्वत्र वस्तुमात्रावगाहिन्या निर्विकल्पया प्रत्यग्दृष्ट्या सम्यगधिष्ठानसंदर्शनजन्यज्ञानेन ब्रह्मविद्यतिर्मां परं ब्रह्माभिजानात्यभितः सर्वत आभिमुख्येन विकल्पराहित्यं यथा तथा साक्षात्कृतस्य वस्तुनस्तत्त्वं विनिश्चिनोति । सामान्यतो विशेषतश्चाधिगतस्य वस्तुनस्तत्त्वनिर्धारणं करोतीत्यर्थः । निर्धारणप्रकारमेवाह—**यावानिति** ।

अव्यक्तमहदादितत्कार्योपाधियोगादहं यावान् मायाकल्पितोपाधिभेदैरहं यादृशोऽस्मि समष्टिस्थूलसूक्ष्मकारणोपाधिभिर्विराट्हिरण्यगर्भ ईश्वर इति, व्यष्टिस्थूलसूक्ष्मकारणोपाधिभिर्विश्वस्तैजसः प्राज्ञ इति, गुणत्रयोपाधितो ब्रह्मा विष्णुरीश्वर इत्यवान्तरवृत्तिभिर्देवास्तिर्यञ्चो मनुष्या इत्युपाधिभेदैर्यादृग्रूपः प्रतीतोऽस्मीत्यर्थः । स्वयमविकृतमेव सदधिष्ठानमारोपितनामरूपाण्यनुकरोति, यथा रज्जुविकारिण्येवारोपितसर्पशिरःपुच्छाद्याकारेण भाति ग्रहीतुर्ग्रहणदोषेण, मरुरेवारोपितजलप्रवाहतरङ्गादिरूपेण प्रतीयते, तथाधिष्ठानभूतमविक्रियमेव परं ब्रह्माप्यारोपितनामरूपाण्यनुकुर्वन्नानेव प्रतीयते । तथैव श्रूयते स्मर्यते च—'इन्द्रो मायाभिः पुरुरूप ईयते', 'एकः सन् बहुधा विचचार', 'एक एव हि भूतात्मा भूते भूते व्यवस्थितः', 'स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा भवति नवधा चैव पुनश्चैकादशः स्मृतः' इति, 'बहुरूप इवाभाति मायया बहुरूपया । नित्यः सर्वगतोऽप्यात्मा कूटस्थो दोषवर्जितः । एकः सन् भिद्यते भ्रान्त्या मायया नतु तत्त्वतः' इति । य एवं मायापरिकल्पितोपाधिविशेषैः परिच्छिद्य इव धर्मीव कर्मीव गुणीव प्रतीतः स एवाहं श्रुत्यनुगतयुक्त्या समाहितबुद्ध्या च परिशील्यमान उपाधितद्धर्मतत्कर्मतद्गुणतद्विकाररहितोऽपरिच्छिन्नो नित्यो निर्विशेषो मुक्तोपसृप्य एक एवाविक्रियोऽस्मीत्याह—**यश्चास्मि तत्त्वत इति** । 'अथात आदेशो नेतिनेति', 'यत्र नान्यत्पश्यति', 'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं', 'अस्थूलमनण्वह्रस्वमदीर्घम्' इत्यादिश्रुत्यनुकूलैर्नेतिनेतिवाक्यैरारोपितनामरूपादेरपवादे क्रियमाणे तन्निषेधावधिभूतं युक्तिशतैरप्यनपोह्यमपवदितुरात्मभूतमहेयमनुपादेयं निर्विशेषं निराभासं निराधारं निराकारं निरवद्यं निरञ्जनं निष्कलं निष्क्रियं शान्तमनन्तमनाद्यन्तं नित्यशुद्धबुद्धमुक्तस्वभावमखण्डानन्दैकरसं परं तत्त्वं यदस्ति, ततः पारमार्थिकस्वरूपेण कालत्रयेऽपि प्रमाणान्तराबाधितसत्तावत्तया स्थितो नित्यः शाश्वतो योऽहमेक एवाद्वितीयोऽस्मि सच्चिदानन्दैकलक्षणस्तं मां परं ब्रह्माभिजानाति 'सर्वात्मा यं हि सर्वं नैवातोऽद्वयो ह्ययमात्मैकल एव', 'नह्ययमोतो नानुज्ञाताऽसङ्गत्वादविकारित्वादसत्त्वादन्यस्य', 'एकमेवाद्वितीयं ब्रह्म', 'नेह नानास्ति किंचन', 'सर्वं यदयमात्मा', 'भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं विविधं ब्रह्ममेतत्', 'ज्ञानं विशुद्धं विमलं विशोकमशेषतो भाति निरस्तसङ्गम्' इति, 'इदं सर्वं ब्रह्ममात्रं ब्रह्मण्यारोपितत्वाच्छुक्तिरजतवत्' इत्यादिश्रुतिस्मृतियुक्तिभिः समाहितबुद्ध्या च स-

म्यक् परिशील्य भ्रमकृतं विकल्पं परित्यज्य सर्वमिदमहं च ब्रह्मैवेत्य-भिजानाति विनिश्चिनोतीत्यर्थः। श्रुतियुक्तिगुरूक्तिस्वानुभवैः पूर्वं यद-नेकधा भातं तत्केवलमविक्रियं निर्विशेषं परं ब्रह्मैवेति सामान्यविशे-षाभ्यां सविकल्पकनिर्विकल्पकाभ्यामवगतस्वरूपं वस्त्वेकमेव निर्विशेषं नान्यदस्तीति तत्त्वतः परमार्थस्वरूपेण चिन्मात्रकेण मां परं ब्रह्मैवं प्रत्यग्दृष्ट्या सर्वतः सम्यग्विषयीकृतं सदेकरसतया ज्ञात्वाऽवधार्य, रज्जोः स्वरूपसंदर्शनेन यत्सर्पात्मना भातं तद्रज्जुरेव केवलेति करगृहीताया र-ज्जोः कैवल्यमिव 'ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण। अधश्चोर्ध्वं प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्' इत्येवंदृष्ट्या ज्ञाननिष्ठापरि-पक्या सर्वं ब्रह्मैव केवलमिति ब्रह्मणः कैवल्यं निश्चित्य, सर्वमिदमहं च ब्रह्मैवेति सर्वस्य च स्वस्य च ब्रह्ममात्रत्वं सम्यगनुभूयेत्यर्थः। 'ज्ञानादेव तु कैवल्यं', 'नान्यः पन्था विद्यतेऽयनाय' इत्युक्तरीत्या ज्ञानादेव मुक्तिर्ना-न्यथेति श्रुत्यनुगतं स्वनिश्चयमाह—**तत इति**। तदनन्तरं यदैवं विज्ञानं वस्तु तत्त्वनिश्चयात्मकं निरूढमप्रतिबद्धं जायते तदनन्तरमेव प्रबोधस्थू-लदेहप्राप्त्योरिव ब्रह्मवेदनतत्प्राप्त्योरन्तरालाभावात्सम्यग्ज्ञानोत्तरक्षण एव ब्रह्मनिष्ठो यतिस्ततस्तेनैव ब्रह्मात्मैकत्वविज्ञानेन विशते। अहं ब्रह्मास्मीति स्वात्मना साक्षात्कृते निर्विशेषे चिदेकरसे परे ब्रह्मण्यानन्दात्मन्येतदेवा-हमस्मीत्यहंबुद्धिं प्रवेशयति। स्थूले स्वस्वरूपे निद्रयान्यथाभावं गतः पुरुषः प्रबोधेन तन्निवृत्तौ सत्यां तत्राहंबुद्धिं यथा करोति तथा स्वाज्ञा-नेन विपरीतभावं गतो विद्वान् विवेकविज्ञानेन तन्निवृत्तौ सत्यां स्वात्म-न्येव ब्रह्मणि एतदेवाहमिति तत्राहंबुद्धिं करोति नतु देवदत्तो गृह इव ब्रह्मणि प्रविशति। ब्रह्मणः परिपूर्णत्वान्निरवयवत्वेन संकोचव्याकोच-शून्यत्वादात्मनः स्वरूपत्वान्नित्याप्तत्वाच्च प्रवेश्यत्वायोगात्। 'न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते', 'ब्रह्मैव सन् ब्रह्माप्येति', 'ब्रह्म वेद ब्रह्मैव भवति', 'तमेवं विद्वानमृत इह भवति' इति विदुष उत्क्रमणराहित्येन ब्रह्मात्मनावस्थितस्येहैव ब्रह्मप्राप्तेः श्रूयमाणत्वाद्गन्तृत्वगन्तव्यगमनक्रिया न संभवन्ति किंतु 'एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते' इति श्रवणाददृश्यत्वादिलक्षणलक्षिते प्रत्यस्तमिताशेषविशेषे अजरेऽमृतेऽभयेऽपूर्वेऽनपरेऽनन्तरेऽबाह्ये नित्यानन्दाखण्डैकरसेऽद्वि-तीये परे ब्रह्मण्यहंबुद्धिं प्रतिष्ठापयति श्रुत्याचार्येश्वरात्मप्रसादसंपत्त्या कृतार्थो ब्रह्मवित्तमो यतिः सविशेषं परित्यज्य निर्विशेषब्रह्मात्मना सुखं तिष्ठतीत्यर्थः॥ ५५॥

'स्वकर्मणा तमभ्यर्च्य' इत्यारभ्य 'विशते तदनन्तरम्' इत्यन्तेन ग्रन्थेन मुमुक्षोरीश्वरार्पणबुद्ध्या समनुष्ठितकर्मभिरेव सत्त्वशुद्धिः शुद्धात्मन एव ज्ञानं ज्ञानवत एव मोक्ष इति ज्ञानकर्मणोः साध्यसाधनभावं सर्वशास्त्रप्रसिद्धं निर्धारयितुं, कर्मभिश्चित्तशुद्धिं शुद्धात्मनो ज्ञानं तस्य फलं मोक्षं च क्रमेण प्रतिपाद्य, अधुना त्वारुरुक्षोर्गृहिणश्चारूढस्य च यतेश्चोभयोर्मोक्षैककामनयोर्नित्यं नियमेन कर्तव्यार्थनिर्णयायोत्तरग्रन्थ आरभ्यते। तत्रादौ ज्ञानं मोक्षफलकं चित्तशुद्धिं विना न सिध्यति, चित्तशुद्धिश्च स्वकर्मभिरेवेश्वरार्पणबुद्ध्या कृतैर्नतु कामनया, आरुरुक्षोरीश्वरप्रीत्यै कर्मैवावश्यं कर्तव्यमिति बोधयितुं मत्प्रीत्यै कर्माणि कुर्वाणो मत्प्रसादान्मुक्तिं प्राप्नोतीत्याह—

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६ ॥

सर्वेति । मद्व्यपाश्रयः योऽहं 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ' इत्युक्तलक्षणः सर्वभूतात्मभूतः सर्वात्मकः परमेश्वरः स एव व्यपाश्रयो भवमुक्त्यै स्वकर्मभिराराधनीयो यस्य स मद्व्यपाश्रयः, स्वाराध्येषु देवेष्वग्न्यादिषु यागे यागीयेषु चरुपुरोडाशस्रुगादिषु च सर्वत्र मद्भावनायुक्तो भूत्वा मुमुक्षुः सर्वकर्माणि सर्वाणि श्रौतानि स्मार्तानि च नित्यानि नैमित्तिकानि च कर्माणि विध्युक्तानि मत्प्रीत्यै श्रद्धया भक्त्या च कुर्वाणः सन् मत्प्रसादान्मम भक्त्याऽनेकजन्मसु समनुष्ठितकर्मभिः संतोषितस्य परमेश्वरस्य प्रसादोऽनुग्रहस्तस्मात्सत्त्वशुद्धिं ज्ञानं च लब्ध्वा अव्ययं वृद्धिक्षयवर्जितं न्यूनाधिकभाववर्जितं सदैकरूपं शाश्वतं नित्यं पदं मोक्षाख्यं प्राप्नोति । कर्मभिः संतुष्टेश्वरानुग्रहान्मुक्तिं विन्दतीत्यर्थः ॥ ५६ ॥

'तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता' इत्युक्तो बुद्धेरात्मतत्त्वप्रकाशनलक्षणो यो मत्प्रसादस्तेनैकलभ्यो मोक्षो यस्मात्तस्मात् मत्परो भवेत्याह—

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥

चेतसेति । कर्मणां संतुष्टेश्वरानुग्रहादेव मुक्तिरिति ज्ञानं चेतस्तेन चेतसा विवेकबुद्ध्या त्वं मत्परः अहमेव परः परमपुरुषार्थः प्राप्यं वस्त्विति बुद्धिर्यस्य स मत्परः । तीव्रमुमुक्षुः सन्नित्यर्थः । मत्प्रसादसिद्धये 'कर्ता भोक्ता जनार्दनः' इति न्यायेन सर्वकर्माणि श्रौतानि स्मार्तानि च

सर्वाणि कर्माणि कृतानि मयि परमेश्वरे संन्यस्य। कर्माणि कर्मफलानि च मह्यं समर्प्येत्यर्थः। बुद्धियोगं बुद्धेर्मय्येव योगः स्थितिस्तमुपाश्रित्य। सततं मद्भजनपरो भूत्वेत्यर्थः। यद्वा 'भूतानि विष्णुर्भुवनानि विष्णुः' इति न्यायेन सर्वत्र परमेश्वरत्वबुद्धिर्बुद्धियोगस्तं सततमाश्रित्य, यद्वा 'न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः' इति गृहिणोऽपि वेदान्तविचारस्य कर्तव्यत्वस्मरणात्कर्माणि कुर्वन्सन् बुद्धियोगः ज्ञानसिद्धिहेतुः श्रवणमननादिस्तं बुद्धियोगमुपाश्रित्य सर्वदा वेदान्तार्थविचारपरो भूत्वा सततं मच्चित्तः मय्येव सर्वमये परमात्मनि चित्तं यस्य स मच्चित्तः ज्ञानसिद्धौ तत्फलसिद्धौ च सर्वदा मच्छरणो भवेत्यर्थः॥ ५७॥

वेदान्तार्थविचारपरत्वस्य त्वदेकशरणत्वस्य किं फलमिति चेदुच्यते शृणु—

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि।
अथ चेत्त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि॥ ५८॥

मच्चित्त इति। मच्चित्तः सर्वदा ध्येयत्वेन सर्वत्र विषयत्वेन वाऽहमेव परमात्मा चित्ते यस्य सः। यद्वा सर्वात्मनि मय्येव चित्तं यस्य स मच्चित्तः सदा मदेकचित्तः सन् त्वं मत्प्रसादान्मदनुग्रहप्राप्तात्मविज्ञानात्सर्वदुर्गाणि सर्वाणि दुर्गाणि दुःखेनातिगन्तुमशक्यानि दुर्गाणि दुस्तराण्यविद्याकामकर्माणि। यद्वा सत्त्वरजस्तमांसि सकार्याणि जन्मजरामृत्युदुःखप्रवाहकारणानि तरिष्यसि। तानि तीर्त्वा विदेहमुक्तिसुखं प्राप्स्यसीत्यर्थः। एतेनेश्वरार्थं कर्म कुर्वाण एव तरति न त्वकुर्वाण इति सूचितं भवति। ननु कर्मणां द्रव्यसाध्यत्वेन हिंसाप्रधानत्वात्साधूनां हिंसाप्रधानकं कर्म कर्तुं न शक्यते। तत्रापि स्वजनवधलक्षणं युद्धं तु सुतरां कर्तुं न शक्यत एवेति सांख्यमतमनुसृत्याहंकारेण स्वधर्मवैमुख्यं न कर्तव्यमिति मुमुक्षोः स्वधर्मप्रवृत्तिमेव दृढीकर्तुमाक्षेपपूर्वकं सार्धद्वयेन स्वधर्मनिष्ठामेवार्जुनमङ्गीकारयति—**अथेति**। अथशब्दः पक्षान्तरारम्भार्थः। त्वमहंकाराच्छास्त्रान्तरज्ञानकृताभिनिवेशाच्चेतसा सर्वकर्माणीत्युक्तं मद्वचनं न श्रोष्यसि चेत्। विधिमुल्लङ्घ्य यदि कर्म न करिष्यसीत्यर्थः। ततो विनङ्क्ष्यसि विनाशमेष्यसि। 'अकृत्वा वैदिकं कर्म द्विजः पतनमृच्छति' इति न्यायेन स्वधर्मत्यागात्पातित्यं प्राप्स्यसि। विध्युल्लङ्घनमेको दोषः स्वधर्मत्यागो द्वितीयः परधर्माश्रयस्तृतीयः पुरुषार्थभ्रंशश्चतुर्थः एवमनर्थपरम्परा स्यादित्यर्थः॥ ५८॥

तथापि नाहं योत्स्य इति चेन्न। तव संकल्पो व्यर्थ एव भविष्यति, स्वभावादपि कर्म कर्तव्यमेव स्यादिति स्वयमपि सांख्यमतावष्टम्भेन कर्मणोऽवश्यकर्तव्यतां प्रतिपादयति—

यदहंकारमाश्रित्य न योत्स्य इति मन्यसे।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९ ॥

यदिति। दोषवत्कर्म न कर्तव्यमेवेत्यहंकारमविवेककृतं पाण्डित्याभिमानमाश्रित्य 'ये युध्यन्ते प्रधनेषु' इति वेदोक्तं धर्ममविज्ञायावैदिकमताश्रयेण न योत्स्य इति यदि मन्यसे, स एष ते तव व्यवसायो निश्चयः शास्त्रविरुद्धो मिथ्याकाशगमनेच्छावन्निरर्थक एव भवति। कथं मे संकल्पो निरर्थक इत्यत आह—**प्रकृतिरिति।** तेजःशौर्यधैर्यदक्षत्वाभिमानादिगुणोत्पत्तिहेतुः क्षत्रत्वयोनिः रजोगुणमयी प्रकृतिः क्षत्रियस्वभावस्त्वामस्वतन्त्रमस्वाधीनं नियोक्ष्यत्यधिक्षेपासहिष्णुत्वलक्षणं गुणमुत्पाद्य युद्धं कारयिष्यतीत्यर्थः ॥ ५९ ॥

अहं करोमि नाहं करोमीति चाभिमानी बद्ध एव भवति नतु मुक्तः अमुक्तस्याशेषकर्मत्यागासंभवादतः स्वाभाविकेन कर्मणा निबद्धस्य तव कर्मत्यागः कर्तुं न शक्यते। यदविवेकात्त्यक्तुमिच्छसि तदेव प्रकृतिवशो भूत्वा करिष्यसि। ततः प्रकृतिबद्धस्य प्राप्तं कर्म कर्तव्यमेवेत्याशयेनाह—

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥ ६० ॥

स्वभावेति। जन्मान्तरीयपुण्यापुण्यकर्मसंस्कारो वर्तमानजन्मनि प्रवृत्तिनिवृत्तिसुखदुःखादिसिद्धिहेतुः स्वभाव इत्युच्यते। प्रकृतिगुणविशेषस्तस्माज्जायत इति स्वभावजं तेन स्वाभाविकेन स्वेन स्वकीयेन क्षात्रेण 'शौर्यं तेजो धृतिः' इत्युक्तेन कर्मणा निबद्धः संसृष्टस्त्वं मोहाद्युद्धादेः स्वधर्मत्वाज्ञानाद्यत्स्वजातितः प्राप्तं कर्म कर्तुं नेच्छसि ममेदं न कर्तव्यमिति त्यक्तुमिच्छसि तदेव कर्म अवशः स्वप्रकृतेर्वशो भूत्वा करिष्यस्येवास्वतन्त्रत्वात्प्रकृत्या बलात्कारेण चोदितः सन्करोष्येव नतु त्यक्तुं शक्नोषि। ततः कर्तव्यत्वेन प्राप्तं स्वीयं शास्त्रीयं कर्म विदुषावश्यं कर्तव्यमित्यर्थः ॥ ६० ॥

प्रकृत्यधीनस्य स्वातन्त्र्याभावात् स्वाभाविकं कर्म त्यक्तुं न शक्यते किंतु कर्तव्यमेवेत्युक्त्वाऽधुनेश्वराधीनस्य कर्म त्यक्तुं न शक्यं तत्प्रेरणया प्राप्तं कर्म कर्तव्यमेवेति कर्मणोऽवश्यं कर्तव्यत्वं बोधयितुमाह—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१ ॥

ईश्वर इति । ईश्वरः ईशनशीलः सर्वलोकनियन्ता परमेश्वरः सूत्रधारी यन्त्रारूढानि दारुमयप्रतिमा यथा तथा सर्वभूतानि ब्रह्मादिस्तम्बान्तानि वासनात्मिकया मायया विक्षेपशक्त्या भ्रामयन् स्वस्वकर्मसु प्रवर्तयन् हृदये हृद्देशे बुद्धिगुहायां तिष्ठति । यद्वा 'एष एव साधु कर्म कारयति यम्' इति, 'यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयति' इति श्रवणाद्यन्त्रारूढानि यन्त्राणि शरीराणि तेष्वात्मत्वाभिमानेनाधिष्ठितानि भूतानि प्राणिनो भ्रामयन् तत्तत्कर्मसु प्रवर्तयन् ईश्वरः सर्वभूतानां हृद्देशे तिष्ठति. अतस्तत्प्रेरणया प्राप्तं कर्म तत्परतन्त्रस्य त्यक्तुं न शक्यते । ततो 'यथा नियुक्तोऽस्मि तथा करोमि' इति मुमुक्षोः कर्तव्यतया प्राप्तं कर्मावश्यं करणीयमित्यर्थः ॥ ६१ ॥

आरुरुक्षोश्चित्तशुद्ध्यै कर्मैव कर्तव्यमिति निर्धारयितुमेवं नयेन भयेन च कर्मणः कर्तव्यत्वमेव संपाद्य, अधुना तस्यैव मोक्षैककामस्य तदेकशरणतया स्वकर्मणा तदाराधनं कुर्वतस्तत्प्रसादाज्ज्ञानं मोक्षश्च सिध्यत्यतस्तत्प्रीत्यै कर्म कुर्वन् तमेव शरणं याहीत्याह—

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२ ॥

तमेवेति । हे भारत, स्वस्वकर्मणा तदाराधनपरो भूत्वा त्वं सर्वभावेन नारायण एवेदं सर्वमिति सर्वत्रात्मभावः सर्वभावस्तेन सर्वभावेन सर्वत्र परमेश्वरत्वबुद्ध्या सर्वात्मानं तमेव परमेश्वरं शरणं गच्छ 'संसारसागरे मग्नं मामुद्धर जगत्प्रभो' इति संसारदुःखनिवृत्त्यै तमेवाश्रय, तदेकशरणो भूत्वा तत्प्रसादात्तस्यैवेश्वरस्य प्रसादादनुग्रहात्समुत्पन्नात्मविज्ञानात्परां दृश्यालम्बनरहितत्वात्प्रकृष्टां परमानन्दानुभूतिहेतुत्वाद्वा परां शान्तिं वृत्त्युपरतिं सर्वत्र समदृष्टिं वा प्राप्स्यसि शाश्वतं नित्यं सर्वदा चिदानन्दैकरसरूपेणाविक्रियात्मना तिष्ठतीति स्थानं स्वस्वरूपं कूटस्थासङ्गचिदात्मकं परं ब्रह्म प्राप्स्यसि । विदेहमुक्तिसुखं गमिष्यसीत्यर्थः ॥ ६२ ॥

'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इत्यारभ्य 'सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे' इत्यन्तेन कर्मभिः समाराधिते-

श्वरप्रसादाच्चित्तशुद्धिस्ततो ज्ञानं ततो मोक्ष इत्युक्तमेवार्थं दृढीकर्तुं पुनः संक्षेपेणोपन्यस्येदानीमुपक्रान्तं शास्त्रमुपसंहरति—

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥

इतीति । 'नत्वेवाहं जातु नासम्' इत्यारभ्य 'स्थानं प्राप्स्यसि शाश्वतम्' इत्येतदन्तं ज्ञानं ब्रह्मात्मैकत्वज्ञानोत्पत्तिकारणमेतद्गीताशास्त्रं गुह्याद्गोपनीयान्मणिमन्त्रादेरणिमादिसिद्धिहेतोरपि प्रयत्नेन संवरणीयत्वाद्गुह्यतरं परमरहस्यं ज्ञानशास्त्रं, मुमुक्षवे शुद्धात्मने शरणं गताय ते तुभ्यं मया सर्वज्ञेन परमकारुणिकेनावाप्तसर्वकामेनेश्वरेणाख्यातं ज्ञानतत्सिद्धिसाधनप्रकाशकं मोक्षशास्त्रं, समग्रमुपदिष्टम् । ज्ञानस्य तत्साधनसंपत्तेश्च बोधकमेतद्गीताशास्त्रं पदवाक्यप्रमाणनिपुणस्त्वमशेषेण सर्वमवमृश्य, साधनं तत्सिद्धिप्रकारं साध्यं तत्सिद्धिप्रकारं स्वाधिकारं च सम्यगालोच्य, सत्त्वशुद्धेरभावे साधने कर्मणि तत्सद्भावे सत्यात्मविज्ञाननिष्ठायां च स्वस्य योग्यत्वं निश्चित्य, यथेच्छसि यथा कर्तुमिच्छसि तथा कुरु तथा वर्तस्व । स्वतृप्तिवत्स्वाधिकारस्य स्वज्ञेयत्वात्परबुद्धेरप्रत्यक्षत्वाच्च स्वाधिकारं स्वयमेव निश्चित्य कर्मणि ज्ञाने वा यत्राधिकारस्तत्र तिष्ठेत्यर्थः ॥ ६३ ॥

एवमारुरुक्षोरारूढस्य च कर्तव्यांशं निर्धार्य ज्ञानतत्फलसिद्धेश्चित्तशुद्धिरेवासाधारणकारणं चित्तशुद्धौ सिद्धायां ज्ञानसिद्धिः सुलभतरा तदभावे ज्ञानं ज्ञाननिष्ठा संन्यासश्च न फलति साधनदार्ढ्येनैव भवितव्यमतश्चित्तशुद्ध्यै कर्मैवारुरुक्षोरीश्वरार्पणबुद्ध्या सम्यक्कर्तव्यमिति दृढतरमुपदेष्टुमुपदेष्टव्यं स्तौति मुमुक्षोः श्रद्धयात्रैव प्रवृत्तिसिद्धये—

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४ ॥

सर्वेति । सर्वाणि यानि गुह्यानि गोप्यान्यणिमादिसिद्धिसाधनानि मन्त्रौषधादीनि तेभ्यो मोक्षसुखैकसाधनत्वेन गुह्यतरं ज्ञानतत्सिद्धेः कारणत्वादीश्वरैकशरणत्वेन कर्माचरणं गुह्यतममत्यन्तरहस्यम् । तद्बोधकं मम वचनमपि सर्वगुह्यतममेव । किंच परमं परमपुरुषार्थसाधनत्वात्परममुत्कृष्टं मे मम वचो वचनं 'मत्कर्मपरमो भव' इति, 'मत्कर्मकृन्मत्परमः' इति तत्रतत्रोक्तमपि भूयः पुनरपि दार्ढ्यायोच्यमानं शृणु । श्रद्धया श्रुत्वा मत्परो भवेत्यर्थः । नन्वस्य वचनस्य सर्वगुह्यतमत्वे कथमुपदेश उपयुज्यत इत्यत आह—**इष्ट इति** । यतः पितुः पुत्रवत्त्वं मदंश-

त्वान्मे ममेष्टः प्रियोऽसि ततस्तस्मादेव हेतोस्ते इत्येवं वक्ष्यमाणलक्षणं दृढं फलाव्यभिचारि पूर्वोक्तमपि दृढं यथातथा हितं हितसाधनं वक्ष्याम्युपदेक्ष्यामि शृण्वित्यर्थः ॥ ६४ ॥

वक्ष्यामीति यत्प्रतिज्ञातं तमेव गुह्यतमं भागवतं कर्मयोगं साङ्गमुपदिशति—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥

मन्मना इति। मद्याजी मद्यजनशीलो भव। मन्मनाः मय्येव मनो यस्य स मन्मना मच्चितो भव। मद्भक्तः मामेव भजतीति मद्भक्तो मद्भजनो भव। मां नमस्कुरु नमस्कारमपि मह्यमेव कुरु। यद्वा मद्याजी वेदोक्तैरेव स्वकर्मभिरौपासनाद्यश्वमेधान्तैर्मामेव परमेश्वरं यष्टुमाराधयितुं शीलमस्यास्तीति मद्याजी भव। स्वकर्मभिर्मामेव यज। मत्प्रीतये सर्वाणि कर्माणि कुर्वित्यर्थः। पुत्रादिकामनयैव परमेश्वरस्याराधनं कृतवतः परमपुरुषार्थसंभवात्कामराहित्येन भवितव्यमित्याशयेनाह— **मन्मना इति**। मयि मोक्षस्वरूप एव मनो यस्य स मन्मना मोक्षैककामो भव नतु पुत्रकामः पशुकामो राष्ट्रकामः स्वर्गकामो मल्लोककामश्च भवेत्यर्थः। स्वकर्मभिः परमेश्वरमेवाराधयतः क्रतुष्वग्नये स्वाहेत्यग्न्यादिषु देवतान्तरत्वबुद्धौ सत्यां परमेश्वरभक्तिर्विच्छिद्यते ततः सर्वत्र मद्बुद्धिः कर्तव्येत्याशयेनाह—**मद्भक्त इति**। 'ब्रह्मा नारायणः शिवश्च नारायणः' इति, 'तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः' इति परमेश्वरस्यैव सर्वदेवतात्मकत्वश्रवणात्सर्वदेवतात्मकं मामेकमेव भजतीति मद्भक्तो भव। वह्न्यादिषु सर्वत्र मद्बुद्ध्या सर्वात्मकं मामेकमेव भजेत्यर्थः। फलेषु कामत्यागेनाग्न्यादिष्वीश्वरत्वबुद्ध्या च रागद्वेषादिदोषा न संभवन्ति। तथाप्यहं ब्राह्मणो याजी पण्डित इत्याद्यभिमानलक्षणं कालुष्यं चित्तप्रसत्तिप्रतिबन्धकं त्वस्ति तन्निवर्तयितुमाह—**मामिति**। 'ईश्वरो जीवकलया प्रविष्टो भगवानिति', 'वासुदेवः सर्वम्' इतिन्यायेन देहाभिमाननिवृत्तये सर्वभूतात्मकं मां सर्वत्र नमस्कुरु नतु केवलदारुपाषाणादिरूपमित्यर्थः। एवं साधनसंपत्त्या स्वकर्मणा मदाराधनतत्परस्त्वं मत्प्रसादाच्चित्तशुद्धिं प्राप्य संप्राप्तात्मतत्त्वविज्ञानः सन् मामेव त्रिविधपरिच्छेदशून्यं सच्चिदानन्दैकरसं परं ब्रह्मैष्यसि मद्भावं प्राप्स्यसि। सत्यं ब्रवीमि नात्र संदेहः कर्तव्यः। ते तवाहमस्मिन्नर्थे प्रतिजाने प्रमाणं करोमि। यस्मान्मे

१ प्रसत्तिर्निर्मलता.

मम त्वमुत्तमभक्त्या प्रियोऽसि तस्मात्तव मद्भावापत्तौ संशयो नास्तीति प्रतिज्ञां करोमीत्यर्थः । श्रद्धाभक्तिभ्यां स्वकर्मभिर्मदाराधनमेव कुर्वाणो निरुक्तसाधनसंपन्नो मुमुक्षुः सत्त्वशुद्धिसंभावितात्मविज्ञानेन मद्भावं याति नास्त्यत्र संशय इति भगवति प्रतिज्ञां कृतवति सति कस्य ब्राह्मणस्य प्रामाणिकस्य योनिबीजशुद्धिमतो विश्वासो न स्यात्, अत आरुरुक्षोर्मोक्षैककामस्याकामनयेश्वरप्रीत्यै कर्मैवावश्यं कर्तव्यमिति सिद्धम् ॥ ६५ ॥

एवमारुरुक्षोर्मोक्षार्थमीश्वरैकशरणत्वेन कर्तव्यः कर्मयोग एवेति निर्धार्य त्वारूढस्याविर्भूतात्मविज्ञानस्याप्रतिबद्धत्वसिद्धये सर्वकर्मसंन्यासपूर्वकं ज्ञाननिष्ठैव कर्तव्येति निर्धारयितुमाह—

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥

सर्वधर्मानिति । नन्वस्य वचनस्य कर्मप्रकरणान्तःपातित्वात्कर्मिपरत्वमेव न त्वकर्मिपरत्वमिति चेन्न । सर्वधर्मानिति सर्वकर्मसंन्यासश्रवणात् । न ह्यारुरुक्षोर्मुमुक्षोर्गृहिणः सर्वकर्मसंन्यास उपयुज्यते 'ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् । सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः' इति, 'सर्वकर्मबहिष्कृतः' इति, 'तद्विहीनः पतत्येव ह्यालम्बरहितान्धवत्' इति स्मरणात्सर्वकर्मपरित्यागे दुर्ब्राह्मणत्वपतितत्वादिदोषापत्तेः । ननु मामेकं शरणं व्रजेतीश्वरभजनात्मकस्य कर्मणो विहितस्यात्यक्तत्वादुक्तदोषा न संभवन्तीति चेन्न । स्वकर्मणा तमभ्यर्च्येति स्मरणान्नामकीर्त्यादिलक्षणस्य कर्मणः श्रुतिस्मृत्यविहितत्वात्स्वधर्मत्वानुपपत्तेर्विहितत्यागाविहितकरणदोषौ च प्रसज्येयाताम् । 'श्रेयान्स्वधर्मो विगुणः' इति विगुणस्यापि स्वधर्मस्य श्रेष्ठत्वस्मरणात् 'नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः' इति, 'कर्मण्येवाधिकारस्ते' इति, 'न कर्मणामनारम्भात्' इति, 'नहि संन्यसनादेव सिद्धिं समधिगच्छति' इति, 'तस्मादसक्तः सततं कार्यं कर्म समाचर' इति, 'मत्कर्मकृन्मत्परमः' इति, 'यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्' इति, 'उपनयनं वेदाध्ययनं फलवन्ति च कर्माणि' इति, 'दारान्कृत्वाग्नीनाधाय कर्माण्यारभन्ते' इति, 'पाणिग्रहणादि गृह्यं परिचरेत्' इति, 'उदिते सूर्ये प्रातर्जुहोति', 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादिश्रुतिस्मृतिकोटिभिर्ब्राह्मणादेर्वैदिकस्यैव कर्मणः स्वधर्मत्वेन कर्तव्यत्वविधानात् । ननु 'सर्वधर्मान्परित्यज्य' इत्यत्र लक्षणया सर्वकर्मफलत्याग एवोच्यते नतु कर्मपरित्यागस्ततः कर्मप्रकरणाङ्गत्वमेवास्य वचनस्येति चेन्न 'संबन्धानुपपत्तिभ्यां लक्षणा' इति न्यायेना-

त्रार्थानुपपत्त्यभावाल्लक्षणाऽप्रसक्तेः । मुख्यस्य गत्यन्तराभावे खलु लक्षण-गत्यन्तराभावाभावाल्लक्षणा नात्र प्रसज्यते । कथं गत्यन्तरमिति चेदुच्यते । 'लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ । ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥' इति योगिनामारुरुक्षूणां कर्मिणां कर्मयोगेन निष्ठा सांख्यानामारूढानां संन्यासिनां ब्रह्मविदां ज्ञानयोगेन निष्ठेति नि-ष्ठाद्वयमुपक्रम्य 'नियतं कुरु कर्म त्वम्' इति कर्मयोगमारभ्य 'प्रति-जाने प्रियोऽसि मे' इत्यन्तेन ग्रन्थेनारुरुक्षोर्नियमेन कर्तव्यतया कर्मयोगं साङ्गं सफलं च निर्धार्य, अथ सांख्यानां ब्रह्मविदां सर्वकर्मसंन्यासिनामा-रूढानां 'यस्त्वात्मरतिरेव स्यात्' इत्यारभ्य 'सर्वकर्माणि मनसा' इति, 'योगारूढस्य तस्यैव' इति, 'योगी युञ्जीत सततमात्मानं रहसि स्थितः' इति, 'ध्यानयोगपरो नित्यम्' इति, 'ब्रह्मभूयाय कल्पते' इति, 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' इत्यन्तेन ग्रन्थेन सर्वकर्मसं-न्यासपूर्वकं नियमेन कर्तव्यतया ज्ञाननिष्ठां सफलां निर्धार्यन्ते, तामेव निष्ठामुक्तलक्षणां साङ्गां सफलामुपसंहरति—**सर्वधर्मेति** । यतस्ततो नास्य वचनस्य कर्मप्रकरणान्तःपातित्वं कर्मिपरत्वं च सिध्यति । नन्वा-रूढस्यापि यतेः सर्वकर्मन्यासो न युक्तः किंतु यत्किंचित् स्मार्तेन कर्मणा भवितव्यमेवेति न शङ्कनीयम् । तृतीयाध्याये श्रीभाष्यकृद्भिरे-वैषा शङ्का परिहृता तत्र द्रष्टव्या ग्रन्थविस्तरभयान्नात्र मीमांस्यते । जन्मान्तरानेकशतेषु श्रद्धाभक्तिभ्यां समनुष्ठितैरीश्वरप्रसादैकप्रयोजनैः श्रौतस्मार्तकर्मभिर्निःशेषनिर्धूताशेषपापौघतया विशुद्धान्तःकरणत्वं स-म्यग्विज्ञातात्मरूपो भूत्वोत्पन्नज्ञानस्याप्रतिबद्धत्वसिद्धये ज्ञाननिष्ठां कर्तु-कामः सन्नादौ प्रयोजनरहितानसद्विषयान्निष्ठाप्रतिबन्धकत्वेन दुष्टांश्च सर्वधर्मान् सर्वे च ते धर्माश्च तान् श्रौतानि स्मार्तानि च सर्वाण्यपि कर्माणि ससाधनानि परित्यज्य । ननु कर्मणां शास्त्रोक्तानामसद्विषय-त्वमप्रयोजनवत्त्वं चानुपपन्नं 'ब्राह्मणा विविदिषन्ति यज्ञेन दानेन' इति यज्ञदानादीनां फलवत्ताश्रवणात् 'स्वकर्मणा तमभ्यर्च्य' इति कर्मणामीश्वरा-राधनात्मकत्वादस्त्येव सद्विषयत्वं फलवत्त्वं चेति चेत्सत्यम्, अस्त्येव कर्म-णामीश्वराराधनात्मकत्वं चित्तशुद्ध्येकप्रयोजनत्वं च । तथापि तदज्ञविषयं कर्तृत्वादिकारकभेदबुद्धिनिबन्धनत्वात् । नात्मैकत्वदर्शिनो विदुषः कर्मोप-युज्यते । ज्ञानकर्मणोः परस्परविरोधिनोः सहभावायोगाच्चित्तशुद्धिं तत्फलं ज्ञानं च प्राप्तवतस्तैः प्रयोजनमपश्यतो ब्रह्मविदस्तत्परित्यागो युक्त एव भ-वति 'सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्यात्मानमन्वि-

च्छेत्' इति स्वाध्यायं च 'सर्वकर्माणि संन्यस्य' इति विदुषः सर्वकर्मपरित्यागश्रवणात् । ननु कर्मणेश्वरः प्रीयते तत्प्रीत्यै कर्म कर्तव्यमेवेतिचेन्न । ब्रह्मनिष्ठया परमेश्वरस्य ततोऽधिकतरप्रीत्युत्पत्तेः 'जीवेशावाभासेन करोति' इति श्रवणान्ममाभासिकं मायिकमसत्यस्वरूपं परित्यज्य मायातत्कार्यसंबन्धरहितं नित्यं निरन्तरं निराभासं निष्कलं निष्क्रियं शान्तमनन्तमनाद्यन्तं सच्चिदानन्दैकरसं प्रमाणान्तराबाध्यं परिपूर्णमद्वैतं परं ब्रह्म मामेकमेवायमुपास्त इति यथार्थदर्शिनि सत्यवादिनि सत्यनिष्ठे ब्रह्मविदि परमेश्वरस्याधिकतरप्रीतिसंभवान्मम वैभवमयं निर्वहतीति यथा राज्ञः शूरतमे तद्वत् 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इत्युक्तत्वात् ब्रह्मविदि परमा प्रीतिः परमेश्वरस्य युक्ता, पितुः पुत्रादौ गुणाधिक्ये प्रीत्याधिक्यं दृश्यते तद्वत् । ततः सिद्धं परमेश्वरस्य निर्गुणं नित्यममायिकं स्वरूपं प्राप्तुमिच्छया श्रवणमननिदिध्यासनादावेव श्रद्धया नियमेन प्रवृत्तेषु सत्यनिष्ठेषु सत्सु मुमुक्षुषु परमा प्रीतिरिति । ननु सर्वधर्मान् परित्यज्येति धर्मस्यैव परित्यागो विधीयते नत्वधर्मस्यातस्तत्र प्रवृत्तिः प्रसज्जत एवेतिचेन्न । न कलञ्जं भक्षयेदिति पूर्वमेव परित्यक्तस्य कलञ्जभक्षणादेरधर्मस्योत्तरकाले प्रसक्त्यसंभवाद्ब्रह्मचर्य एव परित्यक्तस्य पर्युषितान्नभोजनस्य गार्हस्थ्ये यथा प्रवृत्तिर्न प्रसज्यते तद्वत्तथापि 'त्यज धर्ममधर्मं च' इति 'न तेषां धर्माधर्मौ' इति वचनात्सर्वधर्मपदेनाधर्मोऽपि गृह्यते । ततो धर्ममधर्मं च परित्यज । यद्यपि अर्जुनस्य संन्यासोऽनुपयुक्तस्तथापि मुमुक्षुं ब्राह्मणं विषयीकृत्योच्यते सर्वधर्मान्परित्यज्येति ज्ञानकर्मणोस्तमस्तेजसोरिव परस्परप्रतियोगित्वेनैकाश्रयत्वानुपपत्तिं निर्धार्य भगवता । ततः सर्वधर्मान्परित्यज्य विधिना संन्यस्य मामेकम् 'अयमात्मा ब्रह्म', 'तत्त्वमसि' इत्यादिश्रुतिभिर्ब्रह्मात्मनोरेकत्वप्रतिपादनात् 'अस्थूलमनण्वह्रस्वम्' इति, 'सर्वं ह्येतद्ब्रह्म' इत्यादिश्रुतिभिरारोपितस्य जगतोऽपवादपूर्वकं सर्वस्य ब्रह्ममात्रत्वनिरूपणात् 'एकमेवाद्वितीयं ब्रह्म', 'एक एव हि भूतात्मा', 'एक एव रुद्रो न द्वितीयाय तस्थुः' इत्यादिश्रुतिभिर्ब्रह्मण एकत्वावधारणादेकं सजातीयविजातीयस्वगतभेदरहितं नित्यशुद्धबुद्धमुक्तस्वभावमपूर्वमनपरमनन्तरमबाह्यमखण्डं चिदेकरसमद्वितीयं मां परं ब्रह्म शरणं व्रज, सर्वमिदमहं च ब्रह्मैवेति प्रत्यग्दृष्ट्यानुसंधेहि । साधकस्यैवाभ्यासदशायां 'बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च । शब्दादीन्विषयांस्त्यक्त्वा' इत्यादिदेशकालदृष्टिस्थापनादिनियमः ननु सर्वमिदमहं च ब्रह्मैवेति प्रत्यग्दृ-

ष्ट्या स्वं च सर्वं चारोपितनामरूपाद्यग्रहणपूर्वकं ब्रह्मैव पश्यतो ब्रह्मवित्तमस्यातो गच्छन् तिष्ठन्नुपविशन् शयानो वान्यथा वा स्थितः सन् सर्वदा सर्वत्र मामेकमेव परं ब्रह्मानुसंधेहि। एवं दृष्टं स्पृष्टं श्रुतं मतं विज्ञातं च सर्वं सर्वदा ब्रह्मैव पश्यन्तं त्वामहं परमात्मा स्वात्मत्वेन सम्यग्विज्ञातश्चक्षुषो रूपवद्वृत्तेर्बहिरन्तश्च सर्वत्रोपलभ्यमानः सन् सर्वपापेभ्यः। अत्र पापशब्देन पुण्यपापात्मकानि कर्माणि गृह्यन्ते। तेभ्यः पापेभ्यः पापकार्येभ्यो जन्मजरामृत्युबन्धेभ्यो मोक्षयिष्यामि। जन्मादिबन्धनिर्मुक्तं करिष्यामीत्यर्थः। यद्वा पापानि कर्माणि पापपदेन तत्कारणभूता अविद्याकामाश्च गृह्यन्ते। सर्वेभ्यः पापेभ्योऽविद्याकामकर्मभ्यः संततजराजन्ममृत्युदुःखप्रवाहहेतुभ्यः सम्यङ् मोचयिष्यामि। नित्यः कूटस्थोऽसङ्गचिद्रूपः परिपूर्ण एवाहमिति नित्यकूटस्थासङ्गचिन्मात्रस्वरूपस्य स्वात्मनो याथात्म्यप्रकाशनेनारोपितदेहेन्द्रियादिसर्वदृश्यतद्धर्मतत्कर्मतदवस्थासंबन्धरहितमेवात्मानमाकाशवदसङ्गमविक्रियं परिपूर्णमेकरसमेव सदा सर्वत्र ग्राहयित्वा सर्वत्र स्वमात्रग्रहणेनाविद्यां वासनात्मिकां कामांश्च कर्माण्यपि सर्वाणि निर्मूल्य विपरीतभावं निःशेषं विध्वस्य पूर्णश्चिदानन्द एक एवाहमस्मीति वृत्तिमप्रतिबद्धां कारयित्वा सर्वदा मुक्तोऽहमिति मुक्तमेवात्मानं भावयिष्यामि, एवमात्मानमविद्यातत्कार्यबन्धनिर्मुक्तं निर्विशेषब्रह्मात्मना स्थितं साक्षादपरोक्षीकृत्य जीवन्नेव मुक्तस्त्वं मा शुचः 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति स्वात्मैकत्वं पश्यतो विदुषः शोकाभावश्रवणात्सर्वमात्मानमेव पश्यन्मुक्तस्त्वं शोकं मा कार्षीः। स्वातिरिक्तमनर्थकारणमर्थान्तरं पश्यत एव मूढतमस्य शोको न त्वमेवेदं सर्वमिति स्वमेव सर्वं पश्यतो विदुषः शोककारणं संभवति तदभावात्त्वं मा शुच इत्यर्थः। यद्वा 'अशोच्यानन्वशोचस्त्वम्' इत्युपक्रान्तं शोकापनोदनमुपसंहरति भगवान्मा शुचस्त्वमिति। अद्वैतं पश्यतश्चात्मनोऽकर्तृत्वं च पश्यतस्तव शोको न युक्त इत्युपक्रान्तशोकापनोदनमेवानूद्यते नतु विदुषः शोकं संभाव्य तस्यापनोदः क्रियते। 'तत्र को मोहः कः शोकः' इत्यादिश्रुतिविरोधप्रसङ्गात् 'न शोचति न काङ्क्षति' इत्युक्तस्ववचनव्याघातप्रसंगाच्चोपसंहारार्थकमेवेदं वचनमिति युक्तं। एवं निर्विशेषमेव परं ब्रह्म स्वात्मना समधिगतमनुसंदधतो विदुषस्तदनुसंधानफलं सम्यग्ज्ञानं तत्फलं विदेहकैवल्यं च 'ज्ञात्वा विशते तदनन्तरम्' इति पूर्वमेव निरूपितं न पुनरत्र निरूपितव्यं भवति। यस्माज्ज्ञानकर्मणोः

साध्यसाधनभाव एवात्र सम्यङ् निरूपितः सर्वज्ञेनेश्वरेण, तस्मात्सिद्धं कर्मकाण्डस्य ब्रह्मकाण्डस्य च मोक्षकारणत्वम् ॥ ६६ ॥

एवमारुरुक्षोरारूढस्य चोभयोरात्यन्तिकसंसारदुःखोपशान्तये नियमेन कर्तव्यांशं विभज्य दर्शयित्वा तत्फलमप्युपपाद्य ज्ञानकर्मणोर्मोक्षसाधनत्वावधारणेन सर्वेषामपि वेदान्तानां सकलाया अपि गीतायाश्च निर्विशेषब्रह्मपरत्वमेव सूचयित्वा 'इति ते ज्ञानम्' इत्युपक्रान्तं शास्त्रमुपसंहृत्य, अधुना शास्त्रप्रवर्तकानामस्य मोक्षशास्त्रस्य संप्रदायप्रवर्तने नियममाह—

इदं ते नातपस्काय नाभक्ताय कदाचन ।
नचाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७ ॥

इदमिति । इदं मोक्षशास्त्रं ते त्वया अतपस्काय 'ऋतं तपः सत्यं तपः' इत्यादिश्रुत्युक्तं तपो न यस्यास्ति सोऽतपस्कस्तस्मै अतपस्काय वेदोक्तकर्मानुष्ठानविहीनाय न वाच्यम् । कदाचन नोपदेष्टव्यमित्यर्थः । स्वधर्मनिष्ठायाप्यभक्ताय 'यस्य देवे परा भक्तिः' इति न्यायेन गुरौ देवे भक्तिरहितस्त्वभक्तस्तस्मा अभक्ताय कदाचन न वाच्यम् । तपस्विने भक्तिमतेऽप्यशुश्रूषवे गुरुशुश्रूषामकुर्वते कदाचन न वाच्यं किंतु विशेषेण द्वयवते गुरोः शुश्रूषां कुर्वत एव वाच्यम् । चकारान्मेधाविने ग्रन्थतदर्थधारणशक्तिमत एव वाच्यं नतु पूर्वोक्तविशेषणवतेऽपि मेधाशून्याय कदाचन वाच्यम् । तथा चतुर्विशेषणवतेऽपि यो मां वासुदेवं प्राकृतं मनुष्यं मत्वाभ्यसूयति निन्दति तस्मै तु न कदाचन वाच्यम् । यद्वा मां निर्विशेषं परं ब्रह्माभ्यसूयति ब्रह्मणो निर्विशेषत्वं केवलत्वं सजातीयादिभेदरहितत्वमद्वितीयत्वं चायुक्तमिति विदेहकैवल्यमपि लोकशास्त्रविरुद्धमित्यत्रैव ब्रह्मप्राप्तिश्चायुक्तेत्यद्वैतमद्वैतशास्त्रं विदेहकैवल्यं चासहमानो यो निन्दति तस्मै चतुर्वेदिनेऽपि शतक्रतवेऽपि च सगुणभक्तिमतेऽपि चाद्वैतद्वेषिणे कथंचिदपि नोपदेष्टव्यम् । उपदेष्टव्यस्याद्वैतशास्त्रत्वदद्वैते प्रीतिमत एवोपदेष्टव्यं नतु ज्ञानशास्त्रतदर्थासहिष्णव इत्यर्थः । चकारान्मुमुक्षवे यथारोग्यकामिन एव दिव्यौषधं तथा मोक्षेच्छावत एव ज्ञानशास्त्रमुपदेष्टव्यं नान्यस्मा इति सिद्धम् ॥ ६७ ॥

तपस्वित्वं भक्तिमत्त्वं शुश्रूषुत्वमद्वैते प्रीतिमत्त्वं मुमुक्षुत्वं चाधिकारिणः शुद्धात्मत्वे ज्ञानशास्त्रोपदेशयोग्यत्वे च लिङ्गमित्यधिकारिलक्षणमुक्त्वा, निरुक्तलक्षणलक्षितेभ्य एवाधिकारिभ्यो ज्ञानशास्त्रमुपदेष्टुः फलमाह—

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥

य इति । यः श्रोत्रियो ब्रह्मनिष्ठो यतिर्मद्भक्तेषु मामेव परमेश्वरं संसारमोक्षस्थितिबन्धहेतुं मोक्षेच्छया स्वकर्मभिराराधयन्तो ये भजन्ति ते मद्भक्तास्तेषु । तपस्विने भक्तायेति पूर्वमुक्त्वा मद्भक्तेष्विति पुनर्भक्तिग्रहणं 'तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये' इति, 'अमृतस्यैष सेतुः' इति, 'शिवप्रसादेन विना न सिद्धिः' इति मोक्षस्येश्वरप्रसादैकलभ्यत्वश्रवणान्मुमुक्षूणामीश्वरैकशरणत्वेन भवितव्यम्, परमेश्वरैकशरणैरेव कृतं श्रवणादिकं फलत्यतस्तत्रैव दृढा भक्तिः कर्तव्येति ज्ञापनार्थम् । मद्भक्तेषु मदेकशरणेषु पूर्वोक्तविशेषणवत्सु च । अत्र विषयसप्तमी । मद्भक्तानात्मतत्त्वजिज्ञासूनुद्दिश्येत्यर्थः । परमं परमपुरुषार्थसाधनं गुह्यं गोप्यमयोग्येष्वप्रयोक्तव्यमिदं गीताख्यं ज्ञानमयं शास्त्रमभिधास्यति परमकरुणयैवोपदेक्ष्यति नतु शुश्रूषाद्यपेक्ष्य ग्रन्थं तदर्थं च यथागृह्णीयुस्तथा व्याख्यास्यतीत्यर्थः । ननु ब्रह्मनिष्ठस्य विदेहकैवल्यार्थिनः शिष्येभ्यो गीताशास्त्रोपदेशो नोपयुज्यते ज्ञाननिष्ठातत्फलप्रतिबन्धकत्वात् 'ब्रह्मसंस्थोऽमृतत्वमेति', 'प्रमादं वै मृत्युमहं ब्रवीमि' इति श्रुत्या स्मृत्या च ब्रह्मविदो बहिर्मुखत्वं मुक्तिप्रतिबन्धकं निषिध्यत इति चेद्भवानत्र प्रष्टव्यः—तत्त्वोपदेष्टा साधको वा सिद्धो वा संसिद्धो वेति । नाद्यः । साधकस्यात्मयाथात्म्यविज्ञानाभावाद्वाक्यार्थोपदेशमात्रं विना निर्विचिकित्सं तत्त्वोपदेशानुपपत्तेः । यथा शास्त्रेण लक्षणेन स्वरूपेण च वज्रमणिं विज्ञातवत एव मणितत्त्वोपदेश उपपद्यते, नतु शास्त्रमात्राध्येतुर्नापि लक्षणं श्रुतवतो नापि चापातदर्शनवतः सिध्यति तद्वत् । नापि तृतीयः । सप्तमीं भूमिकामधिरुह्य प्रपञ्चं विस्मृत्य परप्रयत्नाच्छारीरं कर्म कुर्वत उपदेशायोगात्पारिशेष्यात्सिद्धस्यैवोपदेशयोग्यत्वम् । ननु सिद्धस्यापि बहिःप्रवृत्त्या ज्ञानं प्रतिबध्येतेति चेन्न । मुमुक्षुभ्यः शिष्येभ्यस्तत्त्वमस्यादिवाक्यार्थोपदेशेनात्मज्ञानं दृढमेव भवति । ततः शिष्येभ्यो मुमुक्षुभ्यः सिद्धेनोपदेष्टव्यम् । अन्यथा त्वाचार्याभावप्रसङ्गाच्छास्त्रानर्थक्यप्रसङ्गान्मुमुक्षूणामगतित्वप्रसङ्गाच्च । ततः स्वयं तीर्णः परान् तारयतीति न्यायेन सिद्धः स्वयं मुक्तोऽन्यान् शरणागतान् मुमुक्षून् बन्धान्मोचयति तदेव फलमैहिकं ज्ञानसंपत्तेर्विदुषः । ननु तदेतत्सत्यं तथापि मूढानामुपदेशप्रवृत्त्या द्वैतवासना प्रवर्धते तया विपरीतप्रत्ययवृद्धिस्तया सर्वात्मत्वज्ञानं प्रतिबध्यते तेन मोक्षश्च कथमात्म-

हानिं विद्वानङ्गीकृत्योपदेक्ष्यतीत्यत आह—भक्तिमिति । 'पुङ्खानुपुङ्खविषयेषु च तत्परोऽपि ब्रह्मावलोकननिरूढमना हि योगी । संगीततालपरिनृत्यवशं गतापि मौलिस्थकुम्भपरिरक्षणधीर्नटीव ॥' इति न्यायेन परोपदेशे प्रवृत्तोऽपि सिद्धो यतिर्मयि सर्वात्मन्यद्वितीये परे ब्रह्मण्यारोपितं सर्वदृश्यं चिरकालनित्यनिरन्तरसमाध्यभ्यासबलेन सन्मात्रतया गृह्णातीति परा प्रकृष्टा तामुत्तमां भक्तिं सर्वत्र सन्मात्रग्राहिणीं प्रत्यग्दृष्टिं कृत्वा । सदा सर्वत्र सर्वं ब्रह्मैव पश्यन् निःशेषविनष्टद्वैतभावो विद्वान्मामेवाद्वितीयं निर्विशेषं परं ब्रह्मैष्यति प्राप्स्यति । नतूत्क्रमणं नापि लोकान्तरं नापि देशान्तरं नैव च देहान्तरं यास्यति । संशयो न कर्तव्यः । ब्रह्मविदो यतेः सिद्धस्य कचित्परोपदेशे प्रवृत्तस्य ब्रह्मप्राप्तौ शङ्कामेवकारेणैव निरस्य तस्यापि दार्ढ्यार्थमसंशय इत्युक्तं, तेन सिद्धं ब्रह्मविद्यतिः सिद्धा कचित्परोपदेशे प्रवृत्तोऽपि स्वयं सर्वत्र ब्रह्मदृष्टिममुञ्चानो ब्रह्मभावमेव गच्छति नास्त्यत्र संशय इति ॥ ६८ ॥

एवं करुणयैव मुमुक्षुभ्यो गीताशास्त्रं तदर्थं चोपदिशन्तं स्तौति—

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥

न चेति । यो ब्रह्मविद्यतिर्मुमुक्षुभ्यो निरुक्तविशेषणवद्भ्यो गीतां तदर्थं चोपदिशति तस्माद्गीताशास्त्रोपदेष्टुर्यतेरन्यः प्रियकृत्तमः मे प्रियमिष्टं मत्प्राप्तेरन्तरङ्गसाधनं श्रवणमननध्यानादिकं नित्यं प्रयत्नेन ये कुर्वन्ति ते प्रियकृतस्तेभ्यः सर्वेभ्योऽप्युत्तमः प्रियकृत् प्रियकृत्तमः । मनुष्येषु स्तोत्रमन्त्रजपपूजादिबहिरङ्गसाधनपरेषु कश्चिन्नास्ति । बहिरङ्गसाधनपरेभ्योऽन्तरङ्गसाधनपरा मम प्रियास्तेभ्यः सर्वेभ्यः प्रियो गीतार्थोपदेष्टा, यतः स्वयं तीर्णः परेषामपि तारणाय प्रवृत्तस्ते तु स्वतरण एव प्रवृत्तास्तस्मादयमेव प्रियकृत्तमो नान्यः कश्चिदिदानीमित्यर्थः । इतः परमपि मे मम तस्मान्मम भक्तेभ्यो गीताशास्त्रोपदेष्टुरन्यः प्रियतरः प्रियकृत्तरो भुवि भूलोके न भविता च न भविष्यति । संसारदुःखसागरनिमग्नान् मद्भक्तान् मुमुक्षून् दययैव ज्ञानशास्त्रार्थोपदेशेन यो ब्रह्मविद्यतिः समुद्धरति स एव कालत्रयेऽपि मम परमेश्वरस्य प्रियकृत्तम इति तात्पर्यार्थः ॥ ६९ ॥

श्रद्धया भक्त्या च नित्यं यो मुमुक्षुर्गीतापारायणं करोति तस्य फलमाह—

---

१ 'धियं न जहाति' इति पाठः.

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ ७० ॥

अध्येष्यत इति । तव च मम चावयोः संवादं संल्लापरूपं धर्म्यं धर्मस्य मोक्षैककारणस्य ज्ञानस्य सिद्धिहेतुत्वाद्धर्मादनपेतं धर्म्यमिमं ग्रन्थं गीताशास्त्रं, यश्च मुमुक्षुर्ब्राह्मणादिः श्रद्धया भक्त्या चार्थज्ञानपूर्वकमध्येष्यते । नित्यं नियमेन पठिष्यतीत्यर्थः । तेनार्थज्ञानपूर्वकं गीताप्रवृत्तिं कुर्वता मद्भक्तेनाहं परमेश्वरः संततं ज्ञानयज्ञेन ज्ञानमात्मैकत्वविषयं ज्ञानमेव यज्ञो ज्ञानयज्ञस्तेन ज्ञानयज्ञेन इष्टः आराधितः स्यां भवेयम् । गीतापठनस्यार्थज्ञानपूर्वकत्वाद्ब्रह्मण एव तदर्थत्वात्तदनुसंधानेन यत्फलं कैवल्यलक्षणं तत्क्रमेण गीताध्येता प्राप्नोतीत्यर्थः ॥ ७० ॥

प्रवक्तुरध्येतुश्च फलमुक्त्वा श्रोतुरिदानीं फलमाह—

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।
सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥ ७१ ॥

श्रद्धावानिति । विचाराध्ययनयोरनधिकारी योऽपि यश्च नरो नरमात्राकारवान् मूढो वा वृद्धो वा स्त्रीजनो वान्वहं श्रद्धावान् वक्तरि गीतायामपि परमेश्वरे च श्रद्धाभक्तिसंपन्नस्तथानसूयुरसूयादिदोषरहितो भूत्वा नित्यमिदं गीताशास्त्रं शृणुयात् सोऽपि श्रोतापि ज्ञानाज्ञानकृतेभ्यः पापेभ्यो मुक्तः सन् पुण्यकर्मणामश्वमेधादियागकर्तॄणां ये लोकास्तान् शुभान् अत्यन्तसुखकरान् प्राप्नुयात् । नित्यं गीताश्रवणमात्रेण सत्यादिपुण्यलोकान्प्राप्नोतीत्यर्थः ॥ ७१ ॥

शास्त्रार्थे सम्यग्ज्ञाते शिष्यः कृतार्थ एव स्यात्, अज्ञाते तु प्रकारान्तरेण बोधयित्वा तदज्ञानविपरीतग्रहणादिदोषमपास्य तस्य कृतार्थतासंपादनीयाऽयमाचार्यस्य धर्म इत्युपदेष्टॄणां सूचयितुमर्जुनस्य स्वबोधितार्थग्रहणं तदग्रहणं च विज्ञातुमिच्छया श्रीभगवान् पृच्छति—

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ॥ ७२ ॥

कच्चिदिति । हे पार्थ, तत्त्वजिज्ञासुना त्वया एतन्मयोपदिष्टमात्मतत्त्वप्रकाशकवाक्यजातमेकाग्रेण सावधानेन चेतसा श्रुतं कच्चित्, किं मयोक्तं सर्वं सावधानेन गृहीतं न गृहीतं वा वक्तव्यमित्यर्थः । एवमुपदेशं पृष्ट्वा तत्कार्यं पृच्छति—**कच्चिदिति ।** ते तवाज्ञानसंमोहः अज्ञानमात्मतत्त्वावरकं तिमिरवदावरणलक्षणं तन्निमित्तकः संमोहो

विपरीतग्रहः नष्टो नाशं गतः कच्चित् । मयोक्तवचनजन्यज्ञानेन तव बुद्धिभ्रमो नष्टः किं नवेत्यर्थः ॥ ७२ ॥

एवं पृष्टवन्तं भगवन्तं प्रति कार्यकथनेन कारणसिद्धिरुक्तप्रायेति मत्वा भगवदुपदेशजन्यज्ञानफलं वक्तुमर्जुन उवाच—

अर्जुन उवाच—

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥ ७३ ॥

जन्मजरामरणदुःखप्रवाहकारणं सर्वानर्थहेतुर्दुरन्तो मोहः स्वाज्ञानसंभवः शार्वरवत्सर्वोऽपि हे अच्युत कूटस्थ भगवन्, त्वत्प्रसादात् त्वदुपदेशजन्यज्ञानान्नष्टः । स्वरूपेणादर्शनं गत इत्यर्थः । एवं भगवदुपदिष्टवाक्यजातस्य तदर्थस्य च ग्रहणं कार्यप्रकाशनेनैव ज्ञापयित्वा तत्प्रसादसिद्धायाः स्वाज्ञानतत्कार्यनिवृत्तेः फलमाह—**स्मृतिरिति ।** अविद्याकृतकर्तृत्वभोक्तृत्वादिसर्वसंसारनिर्मुक्तो नित्यकूटस्थोऽसङ्गचिद्रूपो निष्कलो निष्क्रियः शान्तो य आत्मा सर्ववेदान्तप्रसिद्धः स एवाहमस्मीति स्वात्मतत्त्वविषया स्मृतिर्लब्धा, यथा प्रमादाद्विस्मृतार्थस्याप्तवाक्येन स्मृतिस्तथा त्वत्प्रसादान्मया लब्धा भवति । सर्वहृदयग्रन्थीनां निर्मूलनकारणं यतस्ततो गतसंदेहः गतोऽभावं गतः संदेहः स्वजनवधो दोषः कर्तुं शक्यते वा नवा, मत्कृतेन कर्मणा लेपोऽस्ति वा नवा, कर्तृत्वमात्मनोऽस्ति वा नवेत्येवमादिद्विकोटिकः स्वतत्त्वनिर्धारणविषये यस्य सोऽहं गतसंदेहः । गतसंदेह इत्यनेन विपरीतभावस्य तत्कारणस्य च निःशेषनिवृत्तिः सूचिता । सति विपरीतभावे तत्कारणसद्भावे च संदेहनिवृत्त्यसंभवादतः संदेहनाशात्सर्वविकल्पनाशः सिद्धो भवति । एवं त्वदुपदेशजनितविज्ञानेन सर्वानर्थबीजे मोहे सकारणे विनष्टे सति संप्राप्तात्मयाथात्म्यविज्ञानोऽहं गतसंदेहः सन्नक्षोभ्यस्वभावेन स्थितोऽस्म्यविद्यातत्कार्यतद्धर्मतत्कर्मतदवस्थानिर्मुक्ताविक्रियात्मस्वरूप एव । इतःपरं मम न किंचिज्ज्ञातव्यं प्राप्तव्यं वापीषदस्ति तथापि मद्गुरोरीश्वरस्य तव वचनं करिष्ये । नन्वविद्यासंबन्धनिर्मुक्तेनार्जुनेन करिष्ये वचनं तवेति यदुक्तं तदयुक्तमेव, मुक्तस्य कर्तव्यासंभवान्ममेदमीश्वरस्य वचनं कर्तव्यमिति करणमज्ञधर्मो नतु तत्त्वज्ञधर्मः तज्ज्ञस्यायमीश्वरोऽहं तद्वचनं करिष्य इति भेदज्ञानासंभवात् । नह्यहमेवेदं सर्वमिति सर्वमात्मानमेव विजानतो विदुषस्त्वयमीश्वर इति तस्येदं वचनमहं करिष्य इति भेदज्ञानं संभावयितुं शक्यते । कार्यशेषो वा 'तस्य कार्यं न विद्यत' इति विदुषः कृत्यनिषेधात् ।

'नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित्' इति कृत्यशेषवतोऽज्ञत्वस्मरणाच्च । ततो ज्ञानित्वं कर्मित्वं चैकस्य न संभवति परस्परविरुद्धं सम्राट्त्वं भिक्षुत्वं चैकस्य यथा तद्वत् । यद्यर्जुनस्य कर्तव्यशेषस्तर्हि ज्ञत्वमेव न संभवति । ननु नष्टो मोहः स्मृतिर्लब्धेत्यज्ञाननिवृत्तिर्ज्ञानप्राप्तिश्च कण्ठरवेणोक्ता अतोऽस्त्येव ज्ञत्वमिति चेन्न । करिष्ये वचनं तवेत्येवमपि कण्ठरवेणैवोक्तत्वादज्ञत्वमपि संभवति । नन्विष्टोऽसि मे दृढमिति हितबुद्ध्या दयया च मद्याजी भवेति भगवतोक्तहितवचनकरणं तज्ज्ञस्याप्यर्जुनस्य युक्तमेवेतिचेन्न । तदारुरुक्षुविषयत्वादारूढस्यास्यानुपयुक्तेः । मद्यजनमारुरुक्षोः कर्तव्यमित्युक्तकर्माचरणमर्जुनस्यारूढस्यानुपयुक्तमेवेति चेत्त्वयोक्तं सत्यम् । ब्रह्मविद आरूढस्य कर्मानुपयुक्तमेव तथाप्याधिकारिकत्वादर्जुनस्य तदुपपद्यते । यथा जनकाश्वपतिप्रभृतीनां मुक्तानामप्याधिकारिकाणां लोकसंग्रहचिकीर्षया कर्माचरणं तद्वदर्जुनस्याप्याधिकारिकस्य लोकहिताय कर्माचरणमविरुद्धमेव 'लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि', 'यद्यदाचरति श्रेष्ठः' इति भगवता पूर्वं यदुक्तं तन्मनसि निधायोच्यते करिष्ये वचनं तवेति । इन्द्रांशत्वादर्जुनस्येन्द्रादिवदाधिकारिकत्वं तज्ज्ञत्वं लोकहितार्थं कर्मित्वं चाविरुद्धं ततो युक्तमेवोक्तं करिष्ये वचनं तवेति । यद्वा भगवत्प्रसादान्निःशेषविनष्टमोहत्वाल्लब्धात्मस्मृतित्वाच्चार्जुनः प्राप्तारूढभावः सन् स्वोत्पन्नज्ञानस्य परिपाकसिद्ध्यै समाधिं कर्तुमिच्छया भगवदुक्तं बाह्यं सर्वं परित्यज्य मां परं ब्रह्मैवाजस्रमनुसंधेहीत्येतदर्थावबोधकं 'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज' इति चरमवचनं हृदिस्थमनुवदति 'करिष्ये वचनं तव' इति । सन्निहितत्वादस्योपदेशस्य परमसिद्धान्तत्वाद्विद्वत्कृत्यत्वाच्च विदुषः स्वस्याग्रे कर्तव्यं वदति करिष्ये वचनं तवेति । अतो न कश्चिदत्र विरोध इति सिद्धम् ॥ ७३ ॥

एवमर्जुनस्याविद्यातत्कार्यभ्रममार्जनायोपक्रान्तस्य ज्ञानशास्त्रस्य तदर्थस्य च परिसमाप्तिं ज्ञात्वा तच्छ्रवणतदर्थानुभवसंजातात्मानन्दरसातिरेकेण स्वगुरोरनुग्रहं स्वतृप्तिं चाविष्कर्तुं कथासंदर्भमवतारयितुं च संजय उवाच—

संजय उवाच—

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४ ॥

इतीति । 'सर्वभूताधिवासं यद्भूतेषु च वसत्यपि' इति श्रुतलक्षणलक्षितत्वाद्वासुदेवः सर्वज्ञः परमेश्वरस्तस्य वासुदेवस्य महात्मनो महानु-

भावस्य पार्थस्य चार्जुनस्य इत्युक्तप्रकारकं संवादं प्रश्नप्रतिवचनरूपमिमं गीताग्रन्थमद्भुतमत्यन्तविस्मयकरम् । रोमहर्षणमश्रुतपूर्वत्वेनातिगम्भीरत्वेनामेयार्थत्वेनातिलोकत्वेनाद्भुतरसत्वेन च रोमाञ्चावहं तयोः संवादमहमश्रौषं श्रुतवानस्मि ॥ ७४ ॥

कथमश्रौषीरित्याकाङ्क्षायां स्वगुरोः प्रसादादित्याह—

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् ।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥ ७५ ॥

व्यासेति । व्यासप्रसादाद्वेदानां शास्त्राणां पुराणानां च विस्तरकरणाद्व्यासस्तस्य मद्गुरोः श्रीकृष्णद्वैपायनस्य प्रसादादनुग्रहात्तज्जनितज्ञानशक्तेरेवैतत् । एतच्छन्दस्य विधेयप्राधान्येन लिङ्गनिर्देशः । एतदेवं मोक्षैकसाधनत्वात्परमत्यन्तं गुह्यं गोपनीयं रहस्यमित्यर्थः । योगं ज्ञानयोगमहं श्रुतवानस्मि । कस्य मुखाच्छ्रुतमित्याकाङ्क्षायां योगेश्वरादिति । योगानां हठादीनां तत्फलसिद्धेश्च कारणत्वाद्योगेश्वरः । यद्वा योगो मायायोगः सृष्ट्यादिस्तत्कर्तृत्वाद्योगेश्वरः । यद्वा योगो ज्ञानयोगः आत्यन्तिकसंसारदुःखनिवृत्तिकारणं तत्सिद्धिर्यस्य प्रसादात्स योगेश्वरस्तस्माद्योगेश्वरात्साक्षाच्छ्रीकृष्णादेव स्वयं स्वमुखेनैव कथयत एतं ज्ञानयोगमहं श्रुतवानस्मि । अहो मम भाग्यमहो गुरुप्रसाद इति स्वतृप्तिमाविष्कृतवानित्यर्थः ॥७५॥

श्रुत्वा किं कृतवानसीत्याकाङ्क्षायां संतुष्यामीत्याह—

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥

राजन्निति । पुण्यं पुण्यकरं पावनं श्रवणपठनाभ्यां ज्ञानाज्ञानकृतसर्वपापविध्वंसकं केशवार्जुनयोः संवादमुक्तलक्षणमिमं गीताख्यं ग्रन्थं श्रुतं मुहुर्मुहुश्च स्मृत्वा स्मृत्वा हृष्यामि । किं मया जन्मान्तरशतेषु पुण्यं कृतं किं तप्तं किं दत्तं किं हुतं किं दृष्टं वा न जाने येन तयोरिदं संवादलक्षणं गीताशास्त्रं मया श्रुतमित्यर्थः ॥ ७६ ॥

विश्वरूपसंदर्शनजां तृप्तिं वर्णयति—

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ॥ ७७ ॥

तच्चेति । हरेः स्वसाक्षात्कारमात्रेणाविद्यां तत्कार्यं च हरति स्वस्मिन्नेव तिरोभावयतीति हरिः सच्चिदानन्दस्वरूपः परमेश्वरस्तस्यानन्तबाहुं शशिसूर्यनेत्रमित्युक्तलक्षणं तच्च रूपं विश्वरूपमपि अत्यद्भुतं महाश्चर्यकरं

पुनःपुनश्च संस्मृत्य संस्मृत्य स्मृत्वा स्मृत्वा हृष्यामि। धन्योऽहं धन्योऽहं कृतकृत्योऽहमिति संतोषसागरे मज्जामीत्यर्थः ॥ ७७ ॥

किमतः परं वक्तव्यमस्ति मम निश्चयं शृण्वित्याह—

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नामाऽष्टादशोऽध्यायः ॥ १८ ॥

यत्रेति। योगेश्वरः योगास्तेजोबलपौरुषविद्याराज्यजयधनधान्यपुत्रपौत्राद्यभ्युदयानां घटनास्तेषामीश्वरः। यद्वा 'विद्याविद्ये ईशते यस्तु सोऽन्यः' इति श्रवणात् युज्यते आभ्यामिति योगौ विद्याविद्ये ईशितुं शीलमस्यास्तीति योगेश्वरः। यद्वा युज्यते समाधीयते चित्तमेतेष्विति योगाः ऐहिकामुष्मिकसुखविशेषाः कर्मसाध्या उपास्तिसाध्याश्च तेषां प्रदाने शक्त ईश्वरो योगेश्वरः। यद्वा योगो ज्ञानयोगः कर्मयोगो वा तयोः फलसिद्धेरीश्वराधीनत्वाद्योगेश्वरः 'संसारमोक्षस्थितिबन्धहेतुः' इति श्रुतेः। एवंलक्षणः परमात्मा श्रीकृष्णो यत्र यस्मिन् पक्षे तिष्ठति धनुर्धरो धनुर्विद्यापारगोऽतिरथो गाण्डीवधन्वार्जुनः यत्र यस्मिन् पक्षे तिष्ठति तत्र तस्मिन् पक्ष एव ध्रुवा अव्यभिचारिणी नीतिः शास्त्रदृष्टा मर्यादा तिष्ठति। धर्मस्तत्रैव तिष्ठतीत्यर्थः। 'यतो धर्मस्ततो जयः' इति न्यायेन विजयोऽपि तत्रैव तिष्ठतीत्यर्थः। श्रीर्ध्रुवा निश्चला राजलक्ष्मीस्तत्रैव तिष्ठति। भूतिर्गजतुरगधनधान्यादिसंपत्तिस्तत्र तस्मिन्नेव पक्षे ध्रुवा निश्चला तिष्ठतीति मम मतिर्निश्चयः। त्वमतः पुत्राणां जयाशां परित्यजेत्यर्थः। गुरुभ्रात्रादिहिंसालक्षणं घोरं कर्माहं कृत्वा पापी स्यां तेन नरकं यास्यामीत्यनात्मकर्तृके कर्मण्यकर्तारमेवात्मानं कर्तारं भोक्तारं मत्वा मोहेन शोचतोऽर्जुनस्य मोहसागरे निमग्नस्योद्धरणमात्मयाथात्म्यविज्ञानेन विना नान्येन सिध्यत्यात्मयाथात्म्यविज्ञानं च तत्त्वंपदार्थयोः शोधितयोरेकत्वप्रतिपादनेन विना न सिध्यत्यतस्तयोः शोधनं कर्तव्यमिति। 'नत्वेवाहं जातु नासम्' इत्यारभ्य प्रथमषट्केन त्वंपदार्थं शोधयित्वा द्वितीयेन तत्पदार्थं च शोधयित्वा तृतीयेन तयोरेकत्वं प्रतिपाद्य कर्तृत्वभोक्तृत्वाद्यविद्यातत्कार्यसंबन्धरहितं सर्वसंसारधर्मनिर्मुक्तमात्मतत्त्वं बोधयित्वा तस्यैव बोधस्याप्रतिबन्धत्वसिद्धये ज्ञाननिष्ठामुपदिश्य तत्परिपक्वज्ञानेन 'भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' इत्यात्मयाथात्म्यावधारणं तेन ब्रह्मप्राप्तिश्च प्रतिपादिता, ततः

सर्वस्या अपि गीतायाः प्रतिपाद्यं प्रत्यगभिन्नं परं ब्रह्मैव तज्ज्ञानमेव मोक्षसाधनमिति पर्यवसितम् । तथैव सर्वस्या अपि गीतायाः श्रवणं कृतवतोऽर्जुनस्योक्तिरप्यनुभवारूढा 'नष्टो मोहः स्मृतिर्लब्धा' इति ज्ञानेनाज्ञाननिवृत्तिं तत्फलभूतमात्मलाभं च बोधयति । अतः सिद्धं ज्ञानमेव मोक्षस्य परमकारणमिति । तथाच श्रुतिः 'ज्ञानादेव तु कैवल्यं', 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति, 'एषा तेऽभिहिता सांख्ये' इति ज्ञानयोगमुपदिश्य स्वेनोपदिष्टज्ञानसंपादने पुरुषस्य प्रज्ञामान्द्यमालक्ष्य 'बुद्धिर्योगे त्विमां शृणु' इति कर्मयोगमुपक्रम्य 'बुद्धौ शरणमन्विच्छ', 'योगः कर्मसु कौशलम्' इति ज्ञानयोगं च पुनः प्रस्तुत्य 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्' इति तयोर्विषयभेदव्यवस्थां कृत्वा राजसतामसत्यागनिन्दापूर्वकं सात्विकत्यागस्यैव श्रेष्ठत्वमुक्त्वा तच्चापि परमेश्वरप्रीत्यै कर्तव्यमिति निश्चित्य कर्मनिष्ठया परिशुद्धचित्तस्य ज्ञानं प्राप्तवतो ज्ञाननिष्ठा विहिता । ततः कर्मयोगो ज्ञानयोगस्य साधनमेव भवति नतु साक्षान्मोक्षकारणमित्येव सिद्धान्तितं भवति । अत्र गीताया ज्ञानकर्मयोगयोरेव द्वयोरुपक्रमोपसंहारदर्शनाद्योगान्तरस्य न प्राधान्यं प्रतीयते अमानित्वाद्वेष्टृत्वशुद्धबुद्धित्वादयो यथा ज्ञानतत्फलसिद्धिसाधनानि तथा मुमुक्षुत्वनिष्ठावत्त्वसात्विकश्रद्धाभक्तिमत्त्वादयः कर्मफलसिद्धिसाधनानीति सिद्धं सर्वमनवद्यम् ॥ ७८ ॥

कालकूटसमो दोषो यस्य कण्ठे लवायते ।
गुणोऽपि वा कलामात्रो यस्य भूषायते सतः ।
तमहं पुरुषं वन्देऽविद्यादोषहरं परम् ॥ १ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मसरस्वतीभगवत्पादपूज्यशिष्यश्रीशंकरानन्दसरस्वतीकृतौ गीतातात्पर्यबोधिन्यामष्टादशोऽध्यायः ॥ १८ ॥

ॐ तत्सत् ॥

श्रीमद्भगवद्गीतापद्यानामकारादिवर्णक्रमः ।

श्लोकप्रतीकं.	अ०	श्लो०
अ		
अकीर्तिं चापि भूतानि	२	३४
अक्षरं ब्रह्म परमं	८	३
अक्षराणामकारोऽस्मि	१०	३३
अग्निर्ज्योतिरहः शुक्लः	८	२४
अच्छेद्योऽयमदाह्योऽयं	२	२४
अजोऽपि सन्नव्ययात्मा	४	६
अज्ञश्चाश्रद्दधानश्च	४	४०
अंतकाले च मामेव	८	५
अंतवत्तु फलं तेषां	७	२३
अंतवंत इमे देहाः	२	१८
अत्र शूरा महेष्वासा	१	४
अथ केन प्रयुक्तोऽयम्	३	३६
अथ चित्तं समाधातुं	१२	९
अथ चेत्त्वमिमं धर्म्यं	२	३३
अथ चैनं नित्यजातं	२	२६
अथवा योगिनामेव	६	४२
अथवा बहुनैतेन	१०	४२
अथ व्यवस्थितान् दृष्ट्वा	१	२०
अथैतदप्यशक्तोऽसि	१२	११
अदृष्टपूर्वं हृषितोऽस्मि	११	४५
अदेशकाले यद्दानम्	१७	२२
अद्वेष्टा सर्वभूतानाम्	१२	१३
अधर्मं धर्ममिति या	१८	३२
अधर्माभिभवात्कृष्ण	१	४१
अधश्चोर्ध्वं प्रसृताः	१५	२
अधिभूतं क्षरो भावः	८	४
अधियज्ञः कथं कोऽत्र	८	२
अधिष्ठानं तथा कर्ता	१८	१४
अध्यात्मज्ञाननित्यत्वं	१३	११
अध्येष्यते च य इमं	१८	७०
अनंतविजयं राजा	१	१६

श्लोकप्रतीकं.	अ०	श्लो०
अनंतश्चास्मि नागानां	१०	२९
अनन्यचेताः सततम्	८	१४
अनन्याश्चिंतयंतो मां	९	२२
अनपेक्षः शुचिर्दक्षः	१२	१६
अनादित्वान्निर्गुणत्वात्	१३	३१
अनादिमध्यांतमनंतवीर्य	११	१९
अनाश्रितः कर्मफलं	६	१
अनिष्टमिष्टं मिश्रं च	१८	१२
अनुद्वेगकरं वाक्यम्	१७	१५
अनुबंधं क्षयं हिंसाम्	१८	२५
अनेकचित्तविभ्रांताः	१६	१६
अनेकबाहूदरवक्त्रनेत्रं	११	१६
अनेकवक्त्रनयनम्	११	१०
अन्नाद्भवंति भूतानि	३	१४
अन्ये च बहवः शूरा	१	९
अन्ये त्वेवमजानंतः	१३	२५
अपरं भवतो जन्म	४	४
अपरे नियताहाराः	४	३०
अपरेयमितस्त्वन्यां	७	५
अपर्याप्तं तदस्माकम्	१	१०
अपाने जुह्वति प्राणम्	४	२९
अपि चेत्सुदुराचारो	९	३०
अपि चेदसि पापेभ्यः	४	३६
अप्रकाशोऽप्रवृत्तिश्च	१४	१३
अफलाकांक्षिभिर्यज्ञो	१७	११
अभयं सत्त्वसंशुद्धिः	१६	१
अभिसंधाय तु फलं	१७	१२
अभ्यासयोगयुक्तेन	८	८
अभ्यासेऽप्यसमर्थोऽसि	१२	१०
अमानित्वमदम्भित्वम्	१३	७
अमी च त्वां धृतराष्ट्रस्य पुत्राः	११	२६
अमी हि त्वां सुरसंघा विशन्ति	११	२१

श्लोकप्रतीकं.	अ०	श्लो०
अयनेषु च सर्वेषु	१	११
अयतिः श्रद्धयोपेतो	६	३७
अयुक्तः प्राकृतः स्तब्धः	१८	२८
अवजानंति मां मूढाः	९	११
अवाच्यवादांश्च बहून्	२	३६
अविनाशि तु तद्विद्धि	२	१७
अविभक्तं च भूतेषु	१३	१६
अव्यक्तादीनि भूतानि	२	२८
अव्यक्ताद्व्यक्तयः सर्वाः	८	१८
अव्यक्तोऽक्षर इत्युक्तः	८	२१
अव्यक्तोऽयमचिंत्योऽयं	२	२५
अव्यक्तं व्यक्तिमापन्नं	७	२४
अशास्त्रविहितं घोरं	१७	५
अशोच्यानन्वशोचस्त्वं	२	११
अश्रद्दधानाः पुरुषाः	९	३
अश्रद्धया हुतं दत्तं	१७	२८
अश्वत्थः सर्ववृक्षाणां	१०	२६
असक्तबुद्धिः सर्वत्र	१८	४९
असक्तिरनभिष्वंगः	१३	९
असत्यमप्रतिष्ठं ते	१६	८
असौ मया हतः शत्रुः	१६	१४
असंयतात्मना योगो	६	३६
असंशयं महाबाहो	६	३५
अस्माकं तु विशिष्टा ये	१	७
अहंकारं बलं दर्पं	१६	१८
अहं क्रतुरहं यज्ञः	९	१६
„	१८	५३
अहमात्मा गुडाकेश	१०	२०
अहं वैश्वानरो भूत्वा	१५	१४
अहं सर्वस्य प्रभवो	१०	८
अहं हि सर्वयज्ञानाम्	९	२४
अहिंसा सत्यमक्रोधः	१६	२
अहिंसा समता तुष्टिः	१०	५
अहो बत महत्पापम्	१	४५

श्लोकप्रतीकं.	अ०	श्लो०
आ		
आख्याहि मे को भवान्	११	३१
आचार्याः पितरः पुत्राः	१	३४
आढ्योऽभिजनवानस्मि	१६	१५
आत्मसंभाविताः स्तब्धाः	१६	१७
आत्मौपम्येन सर्वत्र	६	३२
आदित्यानामहं विष्णुः	१०	२१
आपूर्यमाणमचलप्रतिष्ठं	२	७०
आब्रह्मभुवनाल्लोकाः	८	१६
आयुधानामहं वज्रम्	१०	२८
आयुःसत्त्वबलारोग्य	१७	८
आरुरुक्षोर्मुनेर्योगं	६	३
आवृतं ज्ञानमेतेन	३	३९
आशापाशशतैर्बद्धाः	१६	१२
आश्चर्यवत्पश्यति कश्चिदेनं	२	२९
आसुरीं योनिमापन्नाः	१६	२०
आहारस्त्वपि सर्वस्य	१७	७
आहुस्त्वामृषयः सर्वे	१०	१३
इ		
इच्छाद्वेषसमुत्थेन	७	२७
इच्छा द्वेषः सुखं दुःखं	१३	६
इति क्षेत्रं तथा ज्ञानं	१३	१८
इति गुह्यतमं शास्त्रं	१५	२०
इति ते ज्ञानमाख्यातं	१८	६३
इत्यर्जुनं वासुदेवस्तथोक्त्वा	११	५०
इत्यहं वासुदेवस्य	१८	७४
इदमद्य मया लब्धं	१६	१३
इदं ज्ञानमुपाश्रित्य	१४	२
इदं तु ते गुह्यतमम्	९	१
इदं ते नातपस्काय	१८	६७
इदं शरीरं कौन्तेय	१३	१
इंद्रियस्येंद्रियस्यार्थे	३	३४
इंद्रियाणां हि चरतां	२	६७
इंद्रियाणि पराण्याहुः	३	४२

श्लोकप्रतीकं.	अ०	श्लो०
इंद्रियाणि मनो बुद्धिः	३	४०
इंद्रियार्थेषु वैराग्यम्	१३	८
इमं विवस्वते योगं	४	१
इष्टान् भोगान् हि वो देवाः	३	१२
इहैकस्थं जगत् कृत्स्नं	११	७
इहैव तैर्जितः सर्गो	५	१९
ई		
ईश्वरः सर्वभूतानाम्	१८	६१
उ		
उच्चैःश्रवसमश्वानाम्	१०	२७
उत्क्रामन्तं स्थितं	१५	१०
उत्तमः पुरुषस्त्वन्यः	१५	१७
उत्सन्नकुलधर्माणाम्	१	४४
उत्सीदेयुरिमे लोकाः	३	२४
उदाराः सर्व एवैते	७	१८
उदासीनवदासीनो	१४	२३
उद्धरेदात्मनात्मानं	६	५
उपद्रष्टानुमन्ता च	१३	२२
ऊ		
ऊर्ध्वं गच्छन्ति सत्त्वस्थाः	१४	१८
ऊर्ध्वमूलमधःशाखं	१५	१
ऋ		
ऋषिभिर्बहुधा गीतं	१३	४
ए		
एतच्छ्रुत्वा वचनं	११	३५
एतद्योनीनि भूतानि	७	६
एतन्मे संशयं कृष्ण	६	३९
एतान्न हन्तुमिच्छामि	१	३५
एतान्यपि तु कर्माणि	१८	६
एतां दृष्टिमवष्टभ्य	१६	९
एतां विभूतिं योगं च	१०	७
एतैर्विमुक्तः कौन्तेय	१६	२२
एवमुक्तो हृषीकेशो	१	२४
एवमुक्त्वाऽर्जुनः संख्ये	१	४७
एवमुक्त्वा ततो राजन्	११	९
एवमुक्त्वा हृषीकेशं	२	९
एवमेतद्यथात्थ त्वं	११	३
एवं परंपराप्राप्तं	४	२
एवं प्रवर्तितं चक्रं	३	१६
एवं बहुविधा यज्ञाः	४	३२
एवं बुद्धेः परं बुद्ध्वा	३	४३
एवं सततयुक्ता ये	१२	१
एवं ज्ञात्वा कृतं कर्म	४	१५
एषा तेऽभिहिता सांख्ये	२	३९
एषा ब्राह्मी स्थितिः पार्थ	२	७२
ओ		
ओमित्येकाक्षरं ब्रह्म	८	१३
ॐतत्सदिति निर्देशो	१७	२३
क		
कच्चिन्नोभयविभ्रष्टः	६	३८
कच्चिदेतच्छ्रुतं पार्थ	१८	७२
कट्वम्ललवणात्युष्ण	१७	९
कथं न ज्ञेयमस्माभिः	१	३९
कथं भीष्ममहं संख्ये	२	४
कथं विद्यामहं योगिन्	१०	१७
कर्मजं बुद्धियुक्ता हि	२	५१
कर्मणः सुकृतस्याहुः	१४	१६
कर्मणैव हि संसिद्धिं	३	२०
कर्मणो ह्यपि बोद्धव्यं	४	१७
कर्मण्यकर्म यः पश्येत्	४	१८
कर्मण्येवाधिकारस्ते	२	४७
कर्म ब्रह्मोद्भवं विद्धि	३	१५
कर्मेन्द्रियाणि संयम्य	३	६
कर्षयन्तः शरीरस्थं	१७	६
कविं पुराणमनुशासितारं	८	९
कस्माच्च ते न नमेरन्	११	३७
काम एष क्रोध एष	३	३७
कामक्रोधवियुक्तानां	५	२६

श्लोकप्रतीकं.	अ०	श्लो०
काममाश्रित्य दुष्पूरं	१६	१०
कामात्मानः स्वर्गपरा	२	४३
कामैस्तैस्तैर्हृतज्ञानाः	७	२०
काम्यानां कर्मणां न्यासं	१८	२
कायेन मनसा बुद्ध्या	५	११
कार्पण्यदोषोपहतस्वभावः	२	७
कार्यकारणकर्तृत्वे	१३	२०
कार्यमित्येव यत्कर्म	१८	९
कालोऽस्मि लोकक्षयकृत्	११	३२
काश्यश्च परमेष्वासः	१	१७
काङ्क्षन्तः कर्मणां सिद्धिं	४	१२
किं कर्म किमकर्मेति	४	१६
किं तद्ब्रह्म किमध्यात्मं	८	१
किं पुनर्ब्राह्मणाः पुण्याः	९	३३
किरीटिनं गदिनं चक्रहस्तं	११	४६
किरीटिनं गदिनं चक्रिणं च	११	१७
कुतस्त्वा कश्मलमिदं	२	२
कुलक्षये प्रणश्यन्ति	१	४०
कृपया परयाविष्टो	१	२८
कृषिगोरक्षवाणिज्यं	१८	४४
कैर्लिङ्गैस्त्रीन्गुणानेतान्	१४	२१
क्रोधाद्भवति संमोहः	२	६३
क्लैब्यं मा स्म गमः पार्थ	२	३
क्लेशोऽधिकतरस्तेषां	१२	५
क्षिप्रं भवति धर्मात्मा	९	३१
क्षेत्रक्षेत्रज्ञयोरेवं	१३	३४
क्षेत्रज्ञं चापि मां विद्धि	१३	२
ग		
गतसङ्गस्य मुक्तस्य	४	२३
गतिर्भर्ता प्रभुः साक्षी	९	१८
गाण्डीवं स्रंसते हस्तात्	१	३०
गामाविश्य च भूतानि	१५	१३
गुणानेतानतीत्य त्रीन्	१४	२०
गुरूनहत्वा हि महानुभावान्	२	५

श्लोकप्रतीकं.	अ०	श्लो०
च		
चञ्चलं हि मनः कृष्ण	६	३४
चतुर्विधा भजन्ते माम्	७	१६
चातुर्वर्ण्यं मया सृष्टं	४	१३
चिन्तामपरिमेयां च	१६	११
चेतसा सर्वकर्माणि	१८	५७
ज		
जन्म कर्म च मे दिव्यं	४	९
जरामरणमोक्षाय	७	२९
जातस्य हि ध्रुवो मृत्युः	२	२७
जितात्मनः प्रशान्तस्य	६	७
ज्ञानयज्ञेन चाप्यन्ये	९	१५
ज्ञानविज्ञानतृप्तात्मा	६	८
ज्ञानेन तु तदज्ञानं	५	१६
ज्ञानं कर्म च कर्ता च	१८	१९
ज्ञानं तेऽहं सविज्ञानं	७	२
ज्ञानं ज्ञेयं परिज्ञाता	१८	१८
ज्ञेयः स नित्यसंन्यासी	५	३
ज्ञेयं यत्तत्प्रवक्ष्यामि	१३	१२
ज्यायसी चेत्कर्मणस्ते	३	१
ज्योतिषामपि तज्ज्योतिः	३	१७
त		
तं तथा कृपयाविष्टं	२	१
ततः पदं तत्परिमार्गितव्यं	१५	४
तच्च संस्मृत्य संस्मृत्य	१८	७७
ततः शङ्खाश्च भेर्यश्च	१	१३
ततः श्वेतैर्हयैर्युक्ते	१	१४
ततः स विस्मयाविष्टो	११	१४
तत्त्ववित्तु महाबाहो	३	२८
तत्र तं बुद्धिसंयोगं	६	४३
तत्र सत्त्वं निर्मलत्वात्	१४	६
तत्रापश्यत्स्थितान्पार्थः	१	२६
तत्रैकस्थं जगत्कृत्स्नं	११	१३
तत्रैकाग्रं मनः कृत्वा	६	१२

श्लोकप्रतीकं.	अ०	श्लो०
तत्रैवं सति कर्तारं	१८	१६
तत्क्षेत्रं यच्च यादृक् च	१३	३
तदित्यनभिसंधाय	१७	२५
तद्बुद्धयस्तदात्मानः	५	१७
तद्विद्धि प्रणिपातेन	४	३४
तपस्विभ्योऽधिको योगी	६	४६
तपाम्यहमहं वर्षं	९	१९
तमस्त्वज्ञानजं विद्धि	१४	८
तमुवाच हृषीकेशः	२	१०
तमेव शरणं गच्छ	१८	६२
तं विद्याद्दुःखसंयोगं	६	२३
तस्माच्छास्त्रं प्रमाणं ते	१६	२४
तस्मात्प्रणम्य प्रणिधाय	११	४४
तस्मात्त्वमिन्द्रियाण्यादौ	३	४१
तस्मात्त्वमुत्तिष्ठ यशो	११	३३
तस्मात्सर्वेषु कालेषु	८	७
तस्मादसक्तः सततं	३	१९
तस्मादज्ञानसंभूतं	४	४२
तस्मादोमित्युदाहृत्य	१७	२४
तस्माद्यस्य महाबाहो	२	६८
तस्मान्नार्हा वयं हन्तुं	१	३७
तस्य संजनयन् हर्षं	१	१२
तानहं द्विषतः क्रूरान्	१६	१९
तानि सर्वाणि संयम्य	२	६१
तुल्यनिन्दास्तुतिर्मौनी	१२	१९
तेजः क्षमा धृतिर्दाक्ष्यं	१६	३
ते तं भुक्त्वा स्वर्गलोकं	९	२१
तेषामहं समुद्धर्ता	१२	७
तेषामेवानुकम्पार्थं	१०	११
तेषां सततयुक्तानां	१०	१०
तेषां ज्ञानी नित्ययुक्त	७	१७
त्यक्त्वा कर्मफलासङ्गं	४	२०
त्याज्यं दोषवदित्येके	१८	३
त्रिभिर्गुणमयैर्भावैः	७	१३

श्लोकप्रतीकं.	अ०	श्लो०
त्रिविधा भवति श्रद्धा	१७	२
त्रिविधं नरकस्येदं	१६	२१
त्रैगुण्यविषया वेदाः	२	४५
त्रैविद्या मां सोमपाः पूत	९	२०
त्वमक्षरं परमं वेदितव्यं	११	१८
त्वमादिदेवः पुरुषः पुराणः	११	३८

द

दण्डो दमयतामस्मि	१०	३८
दम्भो दर्पोऽभिमानश्च	१६	४
दंष्ट्राकरालानि च ते	११	२५
दातव्यमिति यद्दानं	१७	२०
दिवि सूर्यसहस्रस्य	११	१२
दिव्यमाल्याम्बरधरं	११	११
दुःखमित्येव यत्कर्म	१८	८
दुःखेष्वनुद्विग्नमनाः	२	५६
दूरेण ह्यवरं कर्म	२	४९
दृष्ट्वा तु पाण्डवानीकं	१	२
दृष्ट्वेदं मानुषं रूपं	११	५१
देवद्विजगुरुप्राज्ञ	१७	१४
देवान्भावयतानेन	३	११
देही नित्यमवध्योऽयं	२	३०
देहिनोऽस्मिन्यथा देहे	२	१३
दैवमेवापरे यज्ञं	४	२५
दैवी ह्येषा गुणमयी	७	१४
दैवी संपद्विमोक्षाय	१६	५
दोषैरेतैः कुलघ्नानां	१	४३
द्यावापृथिव्योरिदम्	११	२०
द्यूतं छलयतामस्मि	१०	३६
द्रव्ययज्ञास्तपोयज्ञा	४	२८
द्रुपदो द्रौपदेयाश्च	१	१८
द्रोणं च भीष्मं च	११	३४
द्वाविमौ पुरुषौ लोके	१५	१६
द्वौ भूतसर्गौ लोकेऽस्मिन्	१६	६

श्लोकप्रतीकं.	अ०	श्लो०
ध		
धर्मक्षेत्रे कुरुक्षेत्रे	१	१
धूमो रात्रिस्तथा कृष्णः	८	२५
धूमेनाव्रियते वह्निः	३	३८
धृत्या यया धारयते	१८	३३
धृष्टकेतुश्चेकितानः	१	५
ध्यानेनात्मनि पश्यन्ति	१३	२४
ध्यायतो विषयान्पुंसः	२	६२
न		
न कर्तृत्वं न कर्माणि	५	१४
न कर्मणामनारम्भात्	३	४
न काङ्क्षे विजयं कृष्ण	१	३२
न च तस्मान्मनुष्येषु	१८	६९
न च मत्स्थानि भूतानि	९	५
न च मां तानि कर्माणि	९	९
न चैतद्विद्मः कतरन्नो	२	६
न जायते म्रियते वा	२	२०
न तदस्ति पृथिव्यां वा	१८	४०
न तद्भासयते सूर्यो	१५	६
न तु मां शक्यसे द्रष्टुं	११	८
न त्वेवाहं जातु नासं	२	१२
न द्वेष्ट्यकुशलं कर्म	१८	१०
न प्रहृष्येत्प्रियं प्राप्य	५	२०
न बुद्धिभेदं जनयेत्	३	२६
नभःस्पृशं दीप्तमनेकवर्णं	११	२४
नमः पुरस्तादथ पृष्ठतस्ते	११	४०
न मां कर्माणि लिम्पन्ति	४	१४
न मां दुष्कृतिनो मूढाः	७	१५
न मे पार्थास्ति कर्तव्यं	३	२२
न मे विदुः सुरगणाः	१०	२
न रूपमस्येह तथोपलभ्यते	१५	३
न वेदयज्ञाध्ययनैर्न दानैः	११	४८
नष्टो मोहः स्मृतिर्लब्धा	१८	७३
नहि कश्चित्क्षणमपि	३	५

श्लोकप्रतीकं.	अ०	श्लो०
नहि देहभृता शक्यं	१८	११
नहि प्रपश्यामि ममापनुद्यात्	२	८
नहि ज्ञानेन सदृशं	४	३८
नान्तोऽस्ति मम दिव्यानां	१०	४०
नात्यश्नतस्तु योगोऽस्ति	६	१६
नादत्ते कस्यचित्पापं	५	१५
नान्यं गुणेभ्यः कर्तारं	१४	१९
नासतो विद्यते भावो	२	१६
नास्ति बुद्धिरयुक्तस्य	२	६६
नाहं प्रकाशः सर्वस्य	७	२५
नाहं वेदैर्न तपसा	११	५३
निमित्तानि च पश्यामि	१	३१
नियतस्य तु संन्यासः	१८	७
नियतं कुरु कर्म त्वं	३	८
नियतं सङ्गरहितं	१८	२३
निराशीर्यतचित्तात्मा	४	२१
निर्मानमोहा जितसङ्गदोषाः	१५	५
निश्चयं शृणु मे तत्र	१८	४
निहत्य धार्तराष्ट्रान्नः	१	३६
नेहाभिक्रमनाशोऽस्ति	२	४०
नैते सृती पार्थ जानन्	८	२७
नैनं छिन्दन्ति शस्त्राणि	२	२३
नैव किंचित्करोमीति	५	८
नैव तस्य कृतेनार्थो	३	१८
प		
पञ्चैतानि महाबाहो	१८	१३
पत्रं पुष्पं फलं तोयं	९	२६
परस्तस्मात्तु भावोऽन्यो	८	२०
परं ब्रह्म परं धाम	१०	१२
परं भूयः प्रवक्ष्यामि	१४	१
परित्राणाय साधूनाम्	४	८
पवनः पवतामस्मि	१०	३१
पश्य मे पार्थ रूपाणि	११	५
पश्यादित्यान्वसून्रुद्रान्	११	६

श्लोकप्रतीकं.	अ०	श्लो०
पश्यामि देवांस्तव देव देहे	११	१५
पश्यैतां पाण्डुपुत्राणां	१	३
पार्थ नैवेह नामुत्र	६	४०
पाञ्चजन्यं हृषीकेशो	१	१५
पितासि लोकस्य चराचरस्य	११	४३
पिताहमस्य जगतो	९	१७
पुण्यो गन्धः पृथिव्यां च	७	९
पुरुषः प्रकृतिस्थो हि	१३	२१
पुरुषः स परः पार्थ	८	२२
पुरोधसां च मुख्यं मां	१०	२४
पूर्वाभ्यासेन तेनैव	६	४४
पृथक्त्वेन तु यज्ज्ञानं	१८	२१
प्रकाशं च प्रवृत्तिं च	१४	२२
प्रकृतिं पुरुषं चैव	१३	१९
प्रकृतिं स्वामवष्टभ्य	९	८
प्रकृतेः क्रियमाणानि	३	२७
प्रकृतेर्गुणसंमूढाः	३	२९
प्रकृत्यैव च कर्माणि	१३	२९
प्रजहाति यदा कामान्	२	५५
प्रयत्नाद्यतमानस्तु	६	४५
प्रयाणकाले मनसा	८	१०
प्रलपन्विसृजन्गृह्णन्	५	९
प्रवृत्तिं च निवृत्तिं च	१६	७
,,	१८	३०
प्रशान्तमनसं ह्येनं	६	२७
प्रशान्तात्मा विगतभीः	६	१४
प्रसादे सर्वदुःखानां	२	६५
प्रह्लादश्चास्मि दैत्यानां	१०	३०
प्राप्य पुण्यकृतांल्लोकान्	६	४१
ब		
बलं बलवतामस्मि	७	११
बहिरन्तश्च भूतानां	१३	१५
बहूनां जन्मनामन्ते	७	१९
बहूनि मे व्यतीतानि	४	५
बन्धुरात्मात्मनस्तस्य	६	६
बाह्यस्पर्शेष्वसक्तात्मा	५	२१
बीजं मां सर्वभूतानां	७	१०
बुद्धियुक्तो जहातीह	२	५०
बुद्धिर्ज्ञानमसंमोहः	१०	४
बुद्धेर्भेदं धृतेश्चैव	१८	२९
बुद्ध्या विशुद्धया युक्तः	१८	५१
बृहत्साम तथा साम्नां	१०	३५
ब्रह्मणो हि प्रतिष्ठाहं	१४	२७
ब्रह्मण्याधाय कर्माणि	५	१०
ब्रह्मभूतः प्रसन्नात्मा	१८	१४
ब्रह्मार्पणं ब्रह्महविः	४	२४
ब्राह्मणक्षत्रियविशां	१८	४१
भ		
भक्त्या त्वनन्यया शक्यः	११	५४
भक्त्या मामभिजानाति	१८	५५
भयाद्रणादुपरतं	२	३५
भवान्भीष्मश्च कर्णश्च	१	८
भवाप्ययौ हि भूतानां	११	२
भीष्मद्रोणप्रमुखतः	१	२५
भूतग्रामः स एवायं	८	१९
भूमिरापोऽनलो वायुः	७	४
भूय एव महाबाहो	१०	१
भोक्तारं यज्ञतपसां	५	२९
भोगैश्वर्यप्रसक्तानां	२	४४
म		
मच्चित्तः सर्वदुर्गाणि	१८	५८
मच्चित्ता मद्गतप्राणाः	१०	९
मत्कर्मकृन्मत्परमो	११	५५
मत्तः परतरं नान्यत्	७	७
मदनुग्रहाय परमं	११	१
मनःप्रसादः सौम्यत्वं	१७	१६
मनुष्याणां सहस्रेषु	७	३
मन्मना भव मद्भक्तो	९	३४

श्लोकप्रतीकं.	अ०	श्लो०
मन्मना भव मद्भक्तो	१८	६५
मन्यसे यदि तच्छक्यं	११	४
मम योनिर्महद्ब्रह्म	१४	३
ममैवांशो जीवलोके	१५	७
मया ततमिदं सर्वं	९	४
मयाध्यक्षेण प्रकृतिः	९	१०
मया प्रसन्नेन तवार्जुनेदं	११	४७
मयि चानन्ययोगेन	१३	१०
मयि सर्वाणि कर्माणि	३	३०
मय्यावेश्य मनो ये मां	१२	२
मय्यासक्तमनाः पार्थ	७	१
मय्येव मन आधत्स्व	१२	८
महर्षयः सप्त पूर्वे	१०	६
महर्षीणां भृगुरहं	१०	२५
महात्मानस्तु मां पार्थ	९	१३
महाभूतान्यहंकारो	१३	५
मां च योऽव्यभिचारेण	१४	२६
मा ते व्यथा मा च	११	४९
मात्रास्पर्शास्तु कौन्तेय	२	१४
मानापमानयोस्तुल्यः	१४	२५
मामुपेत्य पुनर्जन्म	८	१५
मां हि पार्थ व्यपाश्रित्य	९	३२
मुक्तसङ्गोऽनहंवादी	१८	२६
मूढग्राहेणात्मनो यत्	१७	१९
मृत्युः सर्वहरश्चाहं	१०	३४
मोघाशा मोघकर्माणः	९	१२
य		
य इदं परमं गुह्यं	१८	६८
य एनं वेत्ति हन्तारं	२	१९
य एवं वेत्ति पुरुषं	१३	२३
यच्चापि सर्वभूतानां	१०	३९
यच्चावहासार्थमसत्कृतोऽसि	११	४२
यजन्ते सात्त्विका देवान्	१७	४
यज्ञदानतपःकर्म	१८	५

श्लोकप्रतीकं	अ०	श्लो०
यज्ञशिष्टामृतभुजो	४	३१
यज्ञशिष्टाशिनः सन्तो	३	१३
यज्ञार्थात्कर्मणोऽन्यत्र	३	९
यज्ञे तपसि दाने च	१७	२७
यज्ज्ञात्वा न पुनर्मोहं	४	३५
यततो ह्यपि कौन्तेय	२	६०
यतः प्रवृत्तिर्भूतानां	१८	४६
यतेन्द्रियमनोबुद्धिः	५	२८
यतो यतो निश्चरति	६	२६
यतन्तो योगिनश्चैनम्	१५	११
यत्करोषि यदश्नासि	९	२७
यत्तदग्रे विषमिव	१८	३७
यत्तु कामेप्सुना कर्म	१८	२४
यत्तु कृत्स्नवदेकस्मिन्	१८	२२
यत्तु प्रत्युपकारार्थं	१७	२१
यत्र काले त्वनावृत्तिं	८	२३
यत्र योगेश्वरः कृष्णो	१८	७८
यत्रोपरमते चित्तं	६	२०
यत्सांख्यैः प्राप्यते स्थानं	५	५
यथाकाशस्थितो नित्यं	९	६
यथा दीपो निवातस्थो	६	१९
यथा नदीनां बहवोऽम्बुवेगा	११	२८
यथा प्रकाशयत्येकः	१३	३३
यथा प्रदीप्तं ज्वलनं	११	२९
यथा सर्वगतं सौक्ष्म्यात्	१३	३२
यथैधांसि समिद्धोऽग्निः	४	३७
यदग्रे चानुबन्धे च	१८	३९
यदहंकारमाश्रित्य	१८	५९
यदक्षरं वेदविदो वदन्ति	८	११
यदा ते मोहकलिलं	२	५२
यदादित्यगतं तेजो	१५	१२
यदा भूतपृथग्भावं	१३	३०
यदा यदा हि धर्मस्य	४	७
यदा विनियतं चित्तं	६	१८

श्लोकप्रतीकं	अ०	श्लो०
यदा सत्त्वे प्रवृद्धे तु	१४	१४
यदा संहरते चायं	२	५८
यदा हि नेन्द्रियार्थेषु	६	४
यदि मामप्रतीकारं	१	४६
यदि ह्यहं न वर्तेयं	३	२३
यदृच्छया चोपपन्नं	२	३२
यदृच्छालाभसंतुष्टो	४	२२
यद्यदाचरति श्रेष्ठः	३	२१
यद्यद्विभूतिमत्सत्त्वं	१०	४१
यद्यप्येते न पश्यन्ति	१	३८
यं यं वापि स्मरन् भावं	८	६
यया तु धर्मकामार्थान्	१८	३४
यया धर्ममधर्मं च	१८	३१
यया स्वप्नं भयं शोकं	१८	३५
यं लब्ध्वा चापरं लाभं	६	२२
यं संन्यासमिति प्राहुः	६	२
यं हि न व्यथयन्त्येते	२	१५
यः सर्वत्रानभिस्नेहः	२	५७
यस्त्वात्मरतिरेव स्यात्	३	१७
यस्त्विन्द्रियाणि मनसा	३	७
यस्मात्क्षरमतीतोऽहम्	१५	१८
यस्मान्नोद्विजते लोको	१२	१५
यस्य नाहंकृतो भावो	१८	१७
यस्य सर्वे समारम्भाः	४	१९
यातयामं गतरसं	१७	१०
या निशा सर्वभूतानाम्	२	६९
यामिमां पुष्पितां वाचं	२	४२
यावत्संजायते किंचित्	१३	२६
यावदेतान्निरीक्षेऽहं	१	२२
यावानर्थ उदपाने	२	४६
यान्ति देवव्रता देवान्	९	२५
युक्तः कर्मफलं त्यक्त्वा	५	१२
युक्ताहारविहारस्य	६	१७
युञ्जन्नेवं सदात्मानम्	६	१५
,,	६	२८

श्लोकप्रतीकं	अ०	श्लो०
युधामन्युश्च विक्रान्त	१	६
ये चैव सात्त्विका भावाः	७	१२
ये तु धर्म्यामृतमिदम्	१२	२०
ये तु सर्वाणि कर्माणि	१२	६
ये त्वक्षरमनिर्देश्यं	१२	३
ये त्वेतदभ्यसूयन्तो	३	३२
येऽप्यन्यदेवताभक्ता	९	२३
ये मे मतमिदं नित्यम्	३	३१
ये यथा मां प्रपद्यन्ते	४	११
ये शास्त्रविधिमुत्सृज्य	१७	१
येषामर्थे काङ्क्षितं नो	१	३३
येषां त्वन्तगतं पापं	७	२८
ये हि संस्पर्शजा भोगा	५	२२
योगयुक्तो विशुद्धात्मा	५	७
योगसंन्यस्तकर्माणं	४	४१
योगस्थः कुरु कर्माणि	२	४८
योगिनामपि सर्वेषां	६	४७
योगी युञ्जीत सततं	६	१०
योत्स्यमानानवेक्षेऽहं	१	२३
यो न हृष्यति न द्वेष्टि	१२	१७
योऽन्तःसुखोऽन्तरारामः	५	२४
यो मामजमनादिं च	१०	३
यो मामेवमसंमूढो	१५	१९
यो मां पश्यति सर्वत्र	६	३०
यो यो यां यां तनुं भक्तः	७	२१
योऽयं योगस्त्वया प्रोक्तः	६	३३
यः शास्त्रविधिमुत्सृज्य	१६	२३

र

श्लोकप्रतीकं	अ०	श्लो०
रजस्तमश्चाभिभूय	१४	१०
रजसि प्रलयं गत्वा	१४	१५
रजो रागात्मकं विद्धि	१४	७
रसोऽहमप्सु कौन्तेय	७	८
रागद्वेषवियुक्तैस्तु	२	६४

श्लोकप्रतीकं.	अ०	श्लो०
रागी कर्मफलप्रेप्सुः	१८	२७
राजन् संस्मृत्य संस्मृत्य	१८	७६
राजविद्या राजगुह्यं	९	२
रुद्राणां शंकरश्चास्मि	१०	२३
रुद्रादित्या वसवो ये च	११	२२
रूपं महत्ते बहुवक्त्रनेत्रं	११	२३
ल		
लभन्ते ब्रह्मनिर्वाणं	५	२५
लेलिह्यसे ग्रसमानः	११	३०
लोकेऽस्मिन्द्विविधा निष्ठा	३	३
लोभः प्रवृत्तिरारम्भः	१४	१२
व		
वक्तुमर्हस्यशेषेण	१०	१६
वक्त्राणि ते त्वरमाणा	११	२७
वायुर्यमोऽग्निर्वरुणः	११	३९
वासांसि जीर्णानि यथा	२	२२
विद्याविनयसंपन्ने	५	१८
विधिहीनमसृष्टान्नं	१७	१३
विविक्तसेवी लघ्वाशी	१८	५२
विषया विनिवर्तन्ते	२	५९
विषयेन्द्रियसंयोगात्	१८	३८
विस्तरेणात्मनो योगं	१०	१८
विहाय कामान्यः सर्वान्	२	७१
वीतरागभयक्रोधाः	४	१०
वृष्णीनां वासुदेवोऽस्मि	१०	३७
वेदानां सामवेदोऽस्मि	१०	२२
वेदाविनाशिनं नित्यं	२	२१
वेदाहं समतीतानि	७	२६
वेदेषु यज्ञेषु तपःसु चैव	८	२८
व्यवसायात्मिका बुद्धिः	२	४१
व्यामिश्रेणेव वाक्येन	३	२
व्यासप्रसादाच्छ्रुतवान्	१८	७५
श		
शक्नोतीहैव यः सोढुम्	५	२३

श्लोकप्रतीकं.	अ०	श्लो०
शनैः शनैरुपरमेत्	६	२५
शमो दमस्तपः शौचं	१८	४२
शरीरं यदवाप्नोति	१५	८
शरीरवाङ्मनोभिर्यत्	१८	१५
शुक्लकृष्णे गती ह्येते	८	२६
शुचौ देशे प्रतिष्ठाप्य	६	११
शुभाशुभफलैरेवं	९	२८
शौर्यं तेजो धृतिर्दाक्ष्यं	१८	४३
श्रद्धया परया तप्तं	१७	१७
श्रद्धावाननसूयश्च	१८	७१
श्रद्धावाँल्लभते ज्ञानं	४	३९
श्रुतिविप्रतिपन्ना ते	२	५३
श्रेयान्द्रव्यमयाद्यज्ञात्	४	३३
श्रेयान्स्वधर्मो विगुणः	३	३५
,,	१८	४७
श्रेयो हि ज्ञानमभ्यासात्	१२	१२
श्रोत्रादीनीन्द्रियाण्यन्ये	४	२६
श्रोत्रं चक्षुः स्पर्शनं च	१५	९
श्वशुरान्सुहृदश्चैव	१	२७
स		
स एवायं मया तेऽद्य	४	३
सक्ताः कर्मण्यविद्वांसो	३	२५
सखेति मत्वा प्रसभं	११	४१
स घोषो धार्तराष्ट्राणां	१	१९
सततं कीर्तयन्तो माम्	९	१४
स तया श्रद्धया युक्तो	७	२२
सत्कारमानपूजार्थम्	१७	१८
सत्त्वात्संजायते ज्ञानं	१४	१७
सत्त्वं रजस्तम इति	१४	५
सत्त्वं सुखे संजयति	१४	९
सत्त्वानुरूपा सर्वस्य	१७	३
सदृशं चेष्टते स्वस्याः	३	३३
सद्भावे साधुभावे च	१७	२६
समदुःखसुखः स्वस्थः	१४	२४

श्लोकप्रतीकं.	अ०	श्लो०
समोऽहं सर्वभूतेषु	९	२९
समं कायशिरोग्रीवं	६	१३
समं पश्यन्हि सर्वत्र	१३	२८
समं सर्वेषु भूतेषु	१३	२७
समः शत्रौ च मित्रे च	१२	१८
सर्गाणामादिरन्तश्च	१०	३२
सर्वकर्माणि मनसा	५	१३
सर्वकर्माण्यपि सदा	१८	५६
सर्वगुह्यतमं भूयः	१८	६४
सर्वतःपाणिपादं तत्	१३	१३
सर्वद्वाराणि संयम्य	८	१२
सर्वद्वारेषु देहेऽस्मिन्	१४	११
सर्वधर्मान्परित्यज्य	१८	६६
सर्वभूतस्थमात्मानं	६	२९
सर्वभूतस्थितं यो मां	६	३१
सर्वभूतानि कौन्तेय	९	७
सर्वभूतेषु येनैकं	१८	२०
सर्वमेतदृतं मन्ये	१०	१४
सर्वयोनिषु कौन्तेय	१४	४
सर्वस्य चाहं हृदि	१५	१५
सर्वाणीन्द्रियकर्माणि	४	२७
सर्वेन्द्रियगुणाभासं	१३	१४
सहजं कर्म कौन्तेय	१८	४८
सहयज्ञाः प्रजाः सृष्ट्वा	३	१०
सहस्रयुगपर्यन्तं	८	१७
साधिभूताधिदैवं मां	७	३०
सिद्धिं प्राप्तो यथा ब्रह्म	१८	५०

श्लोकप्रतीकं.	अ०	श्लो०
सीदन्ति मम गात्राणि	१	२९
सुखदुःखे समे कृत्वा	२	३८
सुखमात्यन्तिकं यत्तत्	६	२१
सुखं त्विदानीं त्रिविधं	१८	३६
सुदुर्दर्शमिदं रूपं	११	५२
सुहृन्मित्रार्युदासीन	६	९
संकरो नरकायैव	१	४२
संकल्पप्रभवान्कामान्	६	२४
संतुष्टः सततं योगी	१२	१४
संनियम्येन्द्रियग्रामं	१२	४
संन्यासस्तु महाबाहो	५	६
संन्यासस्य महाबाहो	१८	१
संन्यासं कर्मणां कृष्ण	५	१
संन्यासः कर्मयोगश्च	५	२
सांख्ययोगौ पृथग्बालाः	५	४
स्थाने हृषीकेश तव	११	३६
स्थितप्रज्ञस्य का भाषा	२	५४
स्पर्शान्कृत्वा बहिर्बाह्यान्	५	२७
स्वधर्ममपि चावेक्ष्य	२	३१
स्वभावजेन कौन्तेय	१८	६०
स्वयमेवात्मनात्मानं	१०	१५
स्वे स्वे कर्मण्यभिरतः	१८	४५
ह		
हतो वा प्राप्स्यसि स्वर्गं	२	३७
हन्त ते कथयिष्यामि	१०	१९
हृषीकेशं तदा वाक्यं	१	२१

समाप्तोऽयं गीतापद्यानामकारादिवर्णक्रमः ।

विक्रेयाणि संस्कृतपुस्तकानि ।

गाथासप्तशती

हालोपनामक-महाकवि-सातवाहनसंकलिता
तृतीयसंस्करणमिदं मूलग्रन्थछायारूपया

संस्कृत-गाथासप्तशत्या

सर्वंकषाख्यटीकया च संवलितमस्ति ।
मूल्यं ३ रूप्यकाः, मार्गव्ययः १२ आणकौ ।

श्रीलौगाक्षिभास्करप्रणीतः

अर्थसंग्रहः ।

श्रीमत्परमहंसरामेश्वरशिवयोगिभिक्षुप्रणीत-
मीमांसार्थसंग्रहकौमुदीव्याख्यासहितः ।
मूल्यं १४ आणकाः, मार्गव्ययः २ आणकौ ।

शास्त्रदीपिका ।

श्रीमत्पार्थसारथिमिश्रप्रणीता ।
प्रत्यधिकरणविभक्तजैमिनीयन्यायमालायुता
सोमनाथप्रणीतमयूखमालिकाव्याख्यासंवलिता ।
अस्याः प्रथमस्तर्कपादश्च रामकृष्णप्रणीतयुक्तिस्नेहप्रपूरणी-
सिद्धान्तचन्द्रिकाव्याख्यायुतः स्वोपज्ञसिद्धान्तचन्द्रिकागूढार्थ-
विवरणसहितश्च ।
मूल्यं ८। रूप्यकाः, मार्गव्ययः १॥ रूप्यकः ।

मीमांसाशास्त्रसारः ।

निर्वीतान्तमीमांसासिद्धान्ततत्त्वार्थप्रकाशः ।
मूल्यं १ रूप्यकः, मार्गव्ययः ४ आणकाः ।

	मू. रु.	आ.	ट. रु.	आ.
अद्वैतसिद्धिः—(श्रीमत्परमहंसमधुसूदनसरस्वतीप्रणीता।) विठ्ठलेशीयव्याख्योपबृंहित–गौडब्रह्मानन्दीव्याख्यासहिता तथा बलभद्रप्रणीतसिद्धिव्याख्यया–अनन्तकृष्णशास्त्रिसंगृहीतन्यायामृताऽद्वैतसिद्धितरंगिणीलघुचन्द्रिकासंग्रहात्मकचतुर्ग्रंथ्योपस्कृता च।...	१०	०	५	०
अद्वैतरत्नरक्षणं—मधुसूदनीयं.	०	१०	०	४
अनुभूतिप्रकाशः—विद्यारण्यस्वामिकृतः.	१	०	०	४
अष्टोत्तरशतोपनिषदः.	३	०	०	१२
अवधूतगीता—पत्रबद्धा.	०	४	०	१
अवधूतगीता	०	६	०	५
ईशादिदशोपनिषद्भाष्य—गोपालानंदस्वामिविरचित.	४	०	०	१२
उपदेशसाहस्री—(गद्यपद्योभयभागात्मिका) अद्वैतवेदान्तविलसितः सर्वोत्कृष्टोऽयं निबन्धः श्रीमद्भगवत्पादाचार्यप्रणीतो विलसति.	१	८	०	८
गणेशगीता—पत्रबद्धा.	०	४	०	१
गणेशगीता	०	६	०	१
तत्त्वप्रदीपिका-चित्सुखी—श्रीमच्चित्सुखाचार्यमुनिविरचिता, परमहंसप्रत्यग्रूपभगवत्प्रणीतया नयनप्रसादिनीव्याख्यया सहिता.	३	४	०	८
पञ्चदशी—विद्यारण्यकृता, रामकृष्णविरचितटीकासहिता.	१	०	०	४
पञ्चरत्नगीता—भगवद्गीता, विष्णुसहस्रनाम, भीष्मस्तवराज, अनुस्मृति, गजेंद्रमोक्षयुता. स्थूलाक्षरा. ...	१	४	०	६
पञ्चरत्नगीता—रेशमी पुठ्ठा, मध्यमाक्षरा. ३२ पत्रा....	०	१४	०	२
पञ्चरत्नगीता—साधी, पत्रबद्धा, मध्यमाक्षरा. ३२ पत्रा.	०	१२	०	२
पञ्चरत्नगीता—रेशमी पुठ्ठा, पट्टबद्धा, सूक्ष्माक्षरा. ६४ पत्रा.	०	८	०	२
पांडवगीता.	०	१	०	१
ब्रह्मसूत्रशांकरभाष्यं—मूलमात्रं, सटिप्पणं. ...	२	८	०	४
मंत्ररत्नमंजूषा—श्रीमत्त्रिविक्रमभट्टारकप्रणीता. ...	०	१०	०	२
योगवासिष्ठः—वासिष्ठमहारामायणतात्पर्यप्रकाशव्याख्यासहितः (भागद्वयात्मकः).	१४	०	१	८

पाण्डुरङ्ग जावजी,

निर्णयसागरयन्त्रालयाधिपतिः

कालिकादेवीरोड–मुंबई.